आर्षम्

भारतम्

ासिकम्

(दश-साहस्री संहिता)

मूल-वचनैः

श्रीगोविन्दनाथ गुह एम्-ए प्रोक्तम्

उत्तर-भागः

'अष्टादश पुराणानि धर्म-शास्त्राणि सर्वशः
वेदाः साङ्गास् तथैकत्र, भारतं चैकतः स्थितम् ।'

उपसंहारः,

कलिकातायाम्

२०९-कर्णोयालिस्-ष्ट्रीटि शीतला-मुद्रणालये श्रीमाणिकचन्द्रघोषेण
तथा ८१-सिमला-ष्ट्रीटि ललित-मुद्रणालये साँतरोपाभिधेन
श्रीचण्डीचरणेन च मुद्रयित्वा ३९-हारिसन्-रोडः
श्रीगोविन्दनाथ-गुहेन प्रकाशितम् ।

ईशाब्दाः १९३८

[मूल्यं रूप्याणि सप्त

गोविन्द-नाथ-प्रोक्तम् आर्षम्

लघु-रामायणम् वाल्मीकीयम्

अभि मतानि

Mahamahopadhyaya Haraprasad Shastri, C. I. E., M. A., F. A. S. B., Hony. M. R. A. S., *Principal Retired, Calcutta Sanskrit College*:—"It goes without saying that Valmiki's Ramayana has profoundly influenced life throughout the length and breadth of India for many thousand years. It has been translated into all the Vernaculars of India and several times into many of them. But in these busy days it is impossible to study either the original or the translations in entirety. It is therefore with the greatest pleasure that we welcome the abridged edition entitled Laghu-Ramayana by Govindanath Guha. It will now be possible even for the busiest men to read the Ramayana in Valmiki's own words within a very short time. The author has not changed the language of Valmiki. He has done another great service to the students of the great epic. He has given an up-to-date account of all the researches on the subject in easy and idiomatic Sanskrit. The book may be safely recommended to the public as a very valuable contribution to Literature."

The Bengalee:—"* * Our boys and girls ought now to be able to come into direct contact with the great personality of Valmiki. Their parents and teachers and the University ought to see that they receive the full advantage of Babu Govindanath Guha's scholarly and devoted labours."

The Indian Messenger:—"The Hindus owe the good features in their national character more to the *Ramayana* and the *Mahabharata* than to any other works in their national literature. But the very bulk of these epics has prevented most people from reading them in the original Sanskrit. It cannot however be said that the main story and the really important episodes of the *Ramayana* with which we are at present concerned make an unmanageably long poem. Babu Govindanath Guha has really rendered a national service by omitting all interpolations and repetitions, everything in fact which is not indispensably necessary for understanding the mind and heart of Valmiki and for coming under his inspiring and elevating influence. * *"

The Modern Review (February, 1915):—"Babu Govindanath Guha has done an invaluable service to the cause of Sanskrit Literature by publishing this abridged editlon in three-thousand slokas of the original Ramayana of Valmiki. Within these three thousand slokas, all in the sweet, simple language of Valmiki himself, every main incident of the Ramayana has been narrated. The Ramayana has furnished many poets—Kalidas, Bhababhuti, Bhatti and others—with themes for their works, but many of them took only epi-

लघु-रामायणम् वाल्मीकीयम् अभि मतानि

sodes of the Ramayana as their subject-matter. Even those who like the authors of the *Ramayana-katha-manjari*, the *Bala-ramayanam*, the *Champu-ramayanam*, tried to deal with the whole of the Ramayana, did this in their own language. But the present work is unique in that its editor has given the whole of the epic, though within a short compass, without using even a single syllable that is not of the 'Adi-kavi'. In this book, the editor has followed the text of the Bengal recension of the *Ramayanam* having compared it with all the three other recensions. ** But the special feature of the book is the learned Introduction at the beginning covering more than forty pages, bristling with references and quotations, and what is more, written in Sanskrit. ** In the Introduction many important points have been discussed: the claim of Valmiki to the title of the *Adi-Kavi* or first poet, what the Ramayana is, the social and religious condition of the country described in it, its origin, date of its composition, its comparison with the Iliad. Whilc going through the Introduction, one is sure to be delighted with the respectful tone of the criticism: and the flow and grandeur of the stylc will in many places remind the reader of that of Banabhatta. In fact the style as used therein is in no way inferior to that of well-known prose-writers in Sanskrit whereas it has this advantage over all, that while the style of even the best prose-works in Sansrit is cumbrous on account of long-drawn-out compounds and too frequent use of figures of speech, very often impeding the clear understanding of the meaning of passages in which they occur, that of the Introduction of the *Laghu Ramayana* is simple, charming and full of life: compounds there are in it, but they only add to the vigour of the style.

"The passages in which the editor has established the priority of the Ramayana to the 'Dasaratha-Jataka' and also where he has refuted the theory of Prof. Weber placing the date of the composition of the Ramayana' at the commencement of the Christian era, at an epoch when the operation of Greek influence had already set in, by adducing numerous proofs, internal and external both from the Ramayana and the Iliad, in a manner that would do credit to any antiquarian, show how Sanskrit may be used in literary and historical criticism.

"All Greek names ** have been rendered into Sanskrit. In some cases new words have been coined to translate Greek words and expressions conveying ideas unknown in Sanskrit. ** This is probably the first attempt in this direction, and if there be many writers to enrich Sanskrit with words and phrases expressing the new ideas and thoughts evolving with the progress of time, who can say Sanskrit may not be as good as a living language again? In fact this Introduction is in many points unique and unprecedented ** as a literary work in Sanskrit as well as a critical study of the great epic."

अनुक्रमणी

भारते उत्तर-भागे

(5) उद्योग-पर्वणि

(6) भीष्म-पर्वणि

☞ संशोधन्या क्रमान् संशोध्य क्रोड़-पत्राणां श्लोकान् भारते यथा-स्थानं संनिवेशयेत् ।

भारतम्

उत्तर-भागः

सङ्केत-विवरणम्

आआ.—आत्मने-पदम् आर्षम् ।

आप्र.—आर्ष-प्रयोगः ।

आव.—आद्यं वह्नि-पुराणम् (शकद्रु.) ।

ऋवे.—ऋग्-वेद-संहिता ।

कउ.—कठोपनिषत् ।

कापु.—कालिका-पुराणम् (शकद्रु.) ।

कुभ.—कुल्लूक-भट्टः ।

कृ.—टि. आर. कृष्णाचार्यः ।

कैपिज.—K. P. Jaswal.

गा.—गारुड़म् (शकद्रु.) ।

गी.—श्रीमद्-भगवद्-गीता ।

जीको.—जीवनी-कोष ।

तैब्रा.—तैत्तिरीय-ब्राह्मणम् ।

तैसं.—तैत्तिरीय-संहिता ।

देभा.—देवी-भागवतम् (शकद्रु.) ।

नी.—नील-कण्ठः ।

न्याको.—न्याय-कोषः ।

पआ.—परस्मै-पदम् आर्षम् ।

पा.—पाणिनिः ।

पायोसू.—पातञ्जल-योग-सूत्रम् ।

भ.—भरतः (शकद्रु.) ।

भट्टो.—भट्टोजी-दीक्षितः ।

भाग.—श्रीमद्-भागवतम् ।

मभा.—महा-भारतम् ।

मल्लि.—मल्लिनाथः ।

मसं.—मनु-संहिता ।

मापु.—मार्कण्डेय-पुराणम् (शकद्रु.)

मुउ.—मुण्डकोपनिषत् ।

मेति.—मेधातिथिः ।

यवे.—यजुर्वेद-संहिता, वाजसनेयी, माध्यन्दिनी शाखा ।

यासं.—याज्ञवल्क्य-संहिता ।

रानि.—राज-निर्घण्टः (शकद्रु.) ।

वि.—विश्वः (शकद्रु.) ।

बृउ.—बृहदारण्यकोपनिषत् ।

शकद्रु.—शब्द-कल्प-द्रुमः ।

श्वे.—श्वेताश्वतरोपनिषत् ।

संसो.—संस्कृत-सोपान ।

ससा.—सत्यव्रत-सामश्रमी ।

सिमभा.—सिद्धान्त-वागीशस्य महाभारतम् ।

हला.—हलायुधः (शकद्रु.) ।

हे. हेच.—हेम-चन्द्रः (शकद्रु.) ।

२७६ पृ. ६ श्लो.—'कत' 'कर्त' स्यात् ।

८३२ पृ. ३४ श्लो.—'क्ष' 'क्ष' भवेत् ।

पूर्व-भागे ॥० पृ. अन्तिम पं.—'ट' 'भृ' स्यात् ।

अथ

श्री-भारते

उद्योग-पर्व

प्रथमो ऽध्यायः

मन्त्र-सदः

वैशम्पायन उवाच,—

कृत्वा विवाहं तु, कुरु-प्रवीरास्,
तदाभिमन्योर्, मुदिताः, स-पक्षाः,
विश्रम्य रात्राव् उषसि, प्रतीताः,
सभां विराटस्य ततो ऽभिजग्मुः। १

अशेष-क्लेश-कर-वन-वास-व्रतोद्यापनात् परेण कुरु-कुल-ललाम-भूतस्याभिमन्योः शुभ-विवाहेन पूर्व-भारतं समाप्य इदानीं हृत-राज्यो-द्धरणोपाय-निर्धारणार्थेन मन्त्रेण उत्तर-भारतम् आरभते कृत्वादिना।

१। कृत्वा—सम्पाद्य। कुरु-प्रवीराः—कुरुषु (कुरु-वंश्येषु) प्रधानाः।

सभा तु सा मत्स्य-पतेः समृद्धा,
मणि-प्रवेकोत्तम-रत्न-चित्रा,
न्यस्तासना, माल्यवती, सु-गन्धा।
ताम् अभ्ययुस् ते नर-राज-वर्याः। २

अथासनान्याविशतां पुरस्ताद्
उभौ विराट-द्रुपदौ नरेन्द्रौ
वृद्धौ च, मान्यौ पृथिवी-पतीनां ;
पित्रा समं राम-जनार्दनौ च। ३

पाञ्चाल-राजस्य समीपतस् तु
शिनि-प्रवीरः सह-रौहिणेयः।
मत्स्यस्य राज्ञस् तु सु-सन्निकृष्टौ
जनार्दनश् चैव युधिष्ठिरश् च। ४

सुताश् च सर्वे द्रुपदस्य राज्ञो,
भीमार्जुनौ माद्रवती-सुतौ च,
प्रद्युम्न-शाम्बौ च युधि प्रवीरौ,
विराट-पुत्रैश् च सहाभिमन्युः। ५

स-पक्षाः—स्व-पक्षैः सोमक-यादव-मात्स्यादिभिः सहिताः। प्रतीताः—स्थिर-सङ्कल्पाः। २। पं २—मणिषु (मुक्ता-प्रबालादिषु) ये प्रवेकाः (श्रेष्ठाः) तैः यानि उत्तमानि (श्रेष्ठानि) रत्नानि (हीरक-पद्मरागादीनि) तैश् च चित्रा (शबला, कर्बुरा, नाना-वर्णा)। वर्याः—श्रेष्ठाः, प्रधानाः। ३। आविशताम्—उपाविशताम्, आसाताम्। पित्रा समम्—वसुदेवेन सह। ४। शिनि-प्रवीरः—शिनिषु (शिनि-वंश्येषु) प्रधानः शिनि-पौत्रः

सर्वे च शूराः, पितृभिः समाना
वीर्येण रूपेण तथा बलेन,
उपाविशन् द्रौपदेयाः कुमाराः
सुवर्ण-चित्रेषु वरासनेषु । ६

तत्रोपविष्टेषु महा-रथेषु
विभ्राजमानाम्बर-भूषणेषु,
रराज सा राजवती समृद्धा,
ग्रहैर् इव द्यौर् विमलैर् उपेता । ७

ततः कथास् ते, समवाय-युक्ताः,
कृत्वा, विचित्राः, पुरुष-प्रवीराः
तस्थुर् मुहूर्तं, परिचिन्तयन्तः,
कृष्णं नृपास् ते समुदीक्षमाणाः । ८

श्रीकृष्ण उवाच,—

सर्वैर् भवद्भिर् विदितं, यथायं
युधिष्ठिरः सौबलेनाक्षवत्याम्
जितो निकृत्यापहृतं च राज्यं,
वन-प्रवासे समयः कृतश् च ; ९

सत्यक-पुत्रश् च युयुधानो नाम यादवः। सत्यक-पुत्रत्वात् सात्यकिर् इत्यभिधानम् अपि तस्य प्रसिद्धम्। रौहिणेयः [रोहिणी+एय, १।१]—रोहिणी-पुत्रः बलरामः। सु-सन्निकृष्टौ—अति-निकटस्थौ । माद्रवती—माद्री । प्रद्युम्न-साम्बौ—रुक्मिणी-जाम्बवत्योर् जातौ कृष्ण-पुत्रौ । ६ । समयः—पणः ।

शक्तैर् विजेतुं तरसा महीं च
सत्ये स्थितैः सत्य-रथैर् यथावत्
पाण्डोः सुतैस् तद् व्रतम् उग्र-रूपं
वर्षाणि षट् सप्त च चीर्णम् अग्र्यैः । १०

एवं गते, धर्म-सुतस्य राज्ञो
दुर्योधनस्यापि च यद् धितं स्यात्,
तच् चिन्तयध्वं, कुरु-पाण्डवाणां
धर्म्यं च युक्तं च यशस्करं च । ११

अ-धर्म-युक्तं न च कामयेत
राज्यं सुराणाम् अपि धर्म-राजः ।
धमार्थ-युक्तं च मही-पतित्वं
ग्रामे ऽपि कस्मिंश् चिद् अयं बुभूषेत् । १२

पित्र्यं हि राज्यं, विदितं नृपाणां,
यथापकृष्टं धृतराष्ट्र-पुत्रैः
मिथ्योपचारेण, यथाह्यनेन
कृच्छ्रं महत् प्राप्तम् अ-सह्य-रूपम् । १३

१०। सत्ये स्थितैः—प्रतिज्ञायाम् अचलैः। सत्य-रथैः—सत्यः (सदा सर्वत्र च एक-रूपः [युद्ध-सहः]) रथो येषां तैः। १२। बुभूषेत्—बुभूषेत, प्राप्तुम् इच्छेत्। प आ,।

न चापि पार्थो विजितो रणे तैः
स्व-तेजसा धृतराष्ट्रस्य पुत्रैः।
तथापि राजा सहितः सुहृद्भिर्
अभीपाते ऽनामयम् एव तेषाम्। १४

यत् तु स्वयं पाण्डु-सुतैर् विजित्य
समाहृतं भूमि-पतीन् निपीड्य,
तत् प्रार्थयन्ते पुरुष-प्रवीराः
कुन्ती-सुता माद्रवती-सुतौ च। १५

बालास् त्विमे तैर्, विविधैर् उपायैः,
सम्प्रार्थिता हन्तुम् अ-मित्र-सङ्घैः,
राज्यं जिहीर्षद्भिर्, असद्भिर्, उग्रैः।
सर्वं च तद् वो विदितं यथावत्। १६

तेषां च लोभं प्रसमीक्ष्य वृद्धं
धर्मात्मतां चापि युधिष्ठिरस्य,
सम्बन्धितां चापि समीक्ष्य तेषां,
मतिं कुरुध्वं सहिताः पृथक् च। १७

इमे च सत्ये ऽभिरताः सदैव
तं पालयित्वा समयं यथावत्।
अतो ऽन्यथा तैर् उपचर्यमाणा
हन्युः समेतान् धृतराष्ट्र-पुत्रान्। १८

१४। अनामयम्—कुशलम्। १५। तत्—तत् सार्वभौमत्वम्। १७। वृद्धम्—वृद्धिं गतम्। १८। अतः—राज्य-दानात्। उपचर्यमाणाः—व्यवह्रियमाणाः।

तैर् विप्रकारं च निशम्य कार्ये
सुहृज्-जनास् तान् परिवारयेयुः ;
युद्धेन बाधेयुर् इमांस्, तथैव
तैर् वध्यमाना युधि तांश् च हन्युः । १९

तथापि नेमेऽल्पतया समर्थास्
तेषां जयायेति भवेद् मतं वः,
समेत्य सर्वे सहिताः सुहृद्भिस्
तेषां विनाशाय यतेयुर् एव । २०

दुर्योधनस्यापि मतं यथावद्
न ज्ञायते, किं नु करिष्यतीति ।
अ-ज्ञायमाने च मते परस्य,
किं स्यात् समारभ्यतमं मतं वः ? २१

तस्माद् इतो गच्छतु धर्म-शीलः
शुचिः कुलीनः पुरुषो ऽ-प्रमत्तः

---

१९ । तैः—धार्तराष्ट्रैः [कृतम्] । विप्रकारम्—अपकारम् । निशम्य—श्रुत्वा, ज्ञात्वा । कार्ये—[राज्य-विषयके] व्यापारे । तान्—पाण्डवान् । परिवारयेयुः—वेष्टेरन्, रक्षेयुः । इमान्—पाण्डवान् । बाधेयुः—[धार्तराष्ट्रा यदि] बाधेरन् । प आ, । तैः—धार्तराष्ट्रैः । वध्यमानाः—हन्यमानाः । हन्युः—इमे पाण्डवाः इति शेषः । २० । भवेत्—यदि भवेत् । यतेयुः—यतेरन्, चेष्टेरन् । व्यवस्येयुः । हेतु-हेतुमतोर् लिङ् । २१ । समारभ्यतमम्—समारब्धुं युक्ततमम् ।

दूतः, समर्थः प्रशमाय तेषां,
राज्यार्ध-दानाय युधिष्ठिरस्य । २२

वैशम्पायन उवाच,—

निशम्य वाक्यं तु जनार्दनस्य
धर्मार्थ-युक्तं मधुरं समं च,
समाददे वाक्यम् अथाग्रजो ऽस्य,
सं-पूज्य वाक्यं तद् अतीव, राजन् । २३

बल-देव उवाच,—

श्रुतं भवद्भिर् गद-पूर्व-जस्य
वाक्यं यथा धर्मवद् अर्थवच् च,
अ-जात-शत्रोश् च हितं, हितं च
दुर्योधनस्यापि तथैव राज्ञः । २४

अर्धं हि राज्यस्य विसृज्य, वीराः
कुन्ती-सुतास् तस्य कृते यतन्ते ।
प्रदाय चार्धं धृतराष्ट्र-पुत्रः
सुखी सहास्माभिर् अतीव मोदेत् । २५

---

२३ । समम्——साधु, निरपेक्षम् । २४ । गदः—वसुदेवाद् रोहिण्यां जातः । स हि बलदेव-सहोदरः श्रीकृष्णस्य च कणीयान् वैमात्रेयो भ्राता । गद-पूर्व-जः—गदात् पूर्वं जातः, गदस्य ज्यायान् भ्राता । २५ । तस्य कृते—अर्धस्य (अपरार्धस्य) अर्थे । मोदेत—मोदेत, हृष्येत् । प आ. ।

लब्ध्वा हि राज्यं पुरुष-प्रवीराः,
सम्यक् प्रवृत्तेषु परेषु चैव,
ध्रुवं प्रशान्ताः सुखम् आविशेयुस्
तेषां प्रशान्तिश् च हितं प्रजानाम् । २६

दुर्योधनस्यापि मतं च वेत्तुं,
वक्तुं च वाक्यानि युधिष्ठिरस्य
प्रियं मम स्याद् यदि तत्र कश्चिद्
व्रजेच् छमार्थं कुरु-पाण्डवानाम् । २७

स, भीष्मम् आमन्त्र्य कुरु-प्रवीरं
वैचित्रवीर्यं च महानुभावम्
द्रोणं स-पुत्रं विदुरं कृपं च
गान्धार-राजं च स-सूत-पुत्रम्, २८

सर्वे च ये ऽन्ये धृतराष्ट्र-पुत्रा
बल-प्रधाना निगम-प्रधानाः
स्थिताश् च धर्मेषु तथा स्वकेषु
लोक-प्रवीराः श्रुत-काल-वृद्धाः । २९

२६ । राज्यम्—राज्यार्धम् इति भावः । २९ । बल-प्रधानाः—बलेन (सैन्येन, सेनानीत्वेन) प्रधानाः (मुख्याः, अग्रगण्याः) । निगम-प्रधानाः—निगमेन (नीति-शास्त्रेण, नीति-शास्त्रज्ञत्वेन) प्रधानाः । श्रुत-काल-वृद्धाः—श्रुतेन (शास्त्र-ज्ञानेन) कालेन (वयसा, भूयोदर्शनेन) च वृद्धाः, (परिणताः, परिपक्वाः) ।

एतेषु सर्वेषु समागतेषु,
पौरेषु वृद्धेषु च सङ्गतेषु
ब्रवीतु वाक्यं प्रणिपात-युक्तं
कुन्ती-सुतस्यार्थ-करं यथा स्यात्। ३०

सर्वास्ववस्थासु च ते न कोप्या।
ग्रस्तो हि सो ऽर्थो बलम् आश्रितैस् तैः।
प्रियाभ्युपेतस्य युधिष्ठिरस्य
द्यूते प्रसक्तस्य हृतं स्व-राज्यम्। ३१

निवार्यमाणश् च कुरु-प्रवीरः
सर्वैः सुहृद्भिर् ह्ययम्, अप्य-तज्-ज्ञः,
स दीव्यमानः, प्रति-दीव्य चैनं
गान्धार-राजस्य सुतं मताक्षम्, ३२

हित्वा हि कर्णं च सुयोधनं च,
समाह्वयद् देवितुम् आजमीढः।
दुरोदरास् तत्र सहस्रशो ऽन्ये,
युधिष्ठिरो यान् विषहेत जेतुम्। ३३

३०। समागतेषु, सङ्गतेषु—[सदसि] मिलितेषु। ३१। ते—धार्तराष्ट्राः। प्रियाभ्युपेतस्य—[अ-प्रशस्ये] प्रिय-कर्मणि रतस्य। ३२। अयम्—युधिष्ठिरः। अप्य-तज्-ज्ञः—द्यूत-रहस्यानभिज्ञोऽपि। ३३। अन्ये—आसन् इति शेषः। विषहेत जेतुम्—जेतुं समर्थ आसीत्। शक्यार्थे लिङ्।

उत्सृज्य तान् सौबलम् एव चायं
समाह्वयत्, तेन जितो ऽक्षवत्याम् ।
स दीव्यमानः, प्रतिदेवनेन,
अक्षेषु नित्यं तु पराङ्-मुखेषु, ३४

संरम्भमाणो, विजितः प्रसह्य ।
तत्रापराधः शकुनेर् न कश्चित् ।
तस्मात् प्रणम्यैव वचो ब्रवीतु
वैचित्रवीर्यं बहु साम-युक्तम् । ३५

तथा हि शक्यो धृतराष्ट्र-पुत्रः
स्वार्थे नियोक्तुं पुरुषेण तेन ।
अ-युद्धम् आकाङ्क्षत कौरवाणां ।
साम्नैव दुर्योधनम् आह्वयध्वम् । ३६

वैशम्पायन उवाच,—

एवं ब्रुवत्येव मधु-प्रवीरे,
शिनि-प्रवीरः सहसोत्पपात ;
तच् चापि वाक्यं परि-निन्द्य तस्य,
समाददे वाक्यम् इदं, स-मन्युः, ३७

३४ । नित्यम्––सततम् । पराङ्-मुखेषु––विमुखेषु प्रतिकूलेषु । ३५ । संरम्भमाणः–वर्धमान-संवेगः । ३७ । मधु-प्रवीरे—मधुषु (मधु-वंश्येषु) प्रवीरे (प्रधाने), बलरामे ।

"एकस्मिन्न् एव जायेते कुले क्लीव-महा-बलौ,
फलाफलवती शाखे यथैकस्मिन् वनस्पतौ। ३८

नाभ्यसूयामि ते, वाक्यं ब्रुवतो, लाङ्गल-ध्वज।
ये तु शृण्वन्ति ते वाक्यं तान् असूयामि, माधव। ३९

कथं हि, धर्म-राजस्य दोषम् अल्पम् अपि ब्रुवन्,
लभते, परिषद्-मध्ये व्याहर्त्तुम् अ-कुतो-भयः ? ४०

समाहूय महात्मानं जितवन्तो ऽक्ष-कोविदाः
अनक्षज्ञं यथा-श्रद्धं। तेषु धर्म-जयः कुतः ? ४१

यदि कुन्ती-सुतं, गेहे क्रीड़न्तं भ्रातृभिः सह,
अभि-गम्य, जयेयुस् ते, तत् तेषां धर्मतो भवेत्। ४२

कथं प्रणिपतेच् चायम् इह कृत्वा पणं परम् ?
वनवासाद् विमुक्तस् तु प्राप्तः पैतामहं पदम्। ४३

यद्ययं पर-वित्तानि कामयेत युधिष्ठिरः,
एवम् अप्ययम् अत्यन्तं परान् नार्हति याचितुम्। ४४

३९। असूयामि, अभ्यसूयामि—निन्दामि। ४०। लभते व्याहर्तुम्—अनुमतिम् इति शेषः। ४१। यथा-श्रद्धम्—[द्यूते] निःस्पृहः इति प्रतीयमानम्। श्रद्धा—स्पृहा। धर्म-जयः—धर्म-मूलको जयः। कुतः—कथम्, केन हेतुना। ४३। प्रणिपतेत्—[दुर्योधनं] शरणं गच्छेत्। अयम्—युधिष्ठिरः। कृत्वा पणं परम्—अतिदुस्तरां [वनवास-] प्रतिज्ञां निस्तीर्य। पैतामहं पदम्—पितामहस्य [विचित्रवीर्यस्य] राजत्वम्।

कथं च धर्म-युक्तास् ते न च राज्यं जिहीर्षवः
निवृत्त-वासान् कौन्तेयान् य आहुर् 'विदिता' इति, ४५

अनुनीता हि भीष्मेण द्रोणेन विदुरेण च
न व्यवस्यन्ति पाण्डूनां प्रदातुं पैतृकं वसु ? ४६

अहं तु तान्, शितैर् बाणैर् अनुनीय रणे, बलात्
पादयोः पातयिष्यामि कौन्तेयस्य महात्मनः। ४७

अथ ते न व्यवस्यन्ति प्रणिपाताय धीमतः,
गमिष्यन्ति सहामात्या यमस्य सदनं प्रति। ४८

न हि ते युयुधानस्य संरब्धस्य युयुत्सतः
वेगं समर्थाः संसोढुं, वज्रस्येव मही-धराः। ४९

को हि गाण्डीव-धन्वानं कश् च चक्रायुधं युधि
मां चापि विषहेत् क्रुद्धं, कश् च भीमं दुरासदम्, ५०

यमौ च दृढ़-धन्वानौ यम-कल्पौ महा-द्युती,
विराट-द्रुपदौ वीरौ यम-कालोपम-द्युती ? ५१

४५। ते—धार्तराष्ट्राः। जिहीर्षवः [हृ+स+उ, १।ब]—हर्तुम् इच्छुकाः। विदिताः—[अ-ज्ञात-चर्याकाले] परिज्ञाताः। ४६। अनुनीताः—[अ-ज्ञात-चर्या-कालः अतिवाहित एवेति] श्लक्ष्णं बोधिताः। व्यवस्यन्ति—Resolve, अध्यवसायं कुर्वन्ति। ४७। अनुनीय—बोधयित्वा। ४८। अथ—यदि। ५०। चक्रायुधम्—श्रीकृष्णम्। ५१। यमः—शरीरात् प्राणानाम् उद्धर्ता (नी)। कालः—आयुः-परिच्छेद- कर्ता (नी)।

को जिजीविषुर् आसादेद् धृष्टद्युम्नं च पार्षतम्,
पञ्चेमान् पाण्डवेयांश् च, द्रौपद्याः कीर्त्ति-वर्धनान्, ५२

सम-प्रमाणान् पाण्डूनां सम-वीर्यान्, मदोत्कटान्,
सौभद्रं च महेष्वासम्, अमरैर् अपि दुः-सहम् ? ५३

ते वयं, धृतराष्ट्रस्य पुत्रं शकुनिना सह
कर्णं चैव निहत्याजाव्, अभिषेक्ष्याम पाण्डवम्। ५४

नाधर्मो विद्यते कश्चिच् छत्रून् हत्वाततायिनः।
अ-धर्म्यम् अ-यशस्यं च शात्रवाणां प्रयाचनम्। ५५

हृद्गतस् त्वस्य यः कामस् तं कुरुध्वम्, अ-तन्द्रिताः।
निसृष्टं धृतराष्ट्रेण राज्यं प्राप्नोतु पाण्डवः। ५६

अद्य पाण्डु-सुतो राज्यं लभतां वा युधिष्ठिरः,
निहता वा मया सर्वे शेष्यन्ते वसुधा-तले।" ५७

५२। जिजीविषुः [जीव्+स+उ, ११]—जीवितुम् इच्छुकः। आसादेत्—आसादयेत्, अभिगच्छेत्। णेर् लोप आर्षः। पाण्डवेयान् [पाण्डवी+एय, २।ब]—द्रौपदी-पुत्रान्। ५३। पाण्डूनाम्—पाण्डु-पुत्राणाम्, पाण्डवानाम्। सौभद्रम् [सुभद्रा+अ, २।१]—सुभद्रा-पुत्रम, अभिमन्युम्। दुःसहम्—सोढुम् अशक्यम्। ५६। अस्य—पाण्डवस्य, युधिष्ठिरस्य।

द्वितीयो ऽध्यायः

निश्चयः

द्रुपद उवाच,—

एवम् एतद्, महा-बाहो, भविष्यति, न संशयः ।
न हि दुर्योधनो राज्यं मधुरेण प्रदास्यति । १

अनुवर्त्स्यति तं चापि धृत-राष्ट्रः सुत-प्रियः,
भीष्म-द्रोणौ च कार्पण्याद्, मौर्ख्याद् राधेय-सौबलौ । २

बलदेवस्य वाक्यं तु मम ज्ञाने न युज्यते ।
एतद् धि पुरुषेणाग्रे कार्यं सुनयम् इच्छता । ३

न तु वाच्यो मृदु वचो धार्तराष्ट्रः कथञ्चन ।
न हि मार्दव-साध्यो ऽसौ पाप-बुद्धिर् मतो मम । ४

मृदुं वै मन्यते पापो भाषमाणम् अ-शक्तिकम् ।
जितम् अर्थं विजानीयाद् अबुधो मार्दवे सति । ५

एतच् चैव करिष्यामो—यत्नश् च क्रियताम् इह—
प्रस्थापयाम मित्रेभ्यो, बलान्युद्योजयन्तु नः । ६

---

१ । मधुरेण—प्रियेण [वचनेन], साम्ना । २ । अनुवर्त्स्यति—अनुवर्तिष्यते, अनुगमिष्यति । पा० ७।२।५९ । कार्पण्यात्—[अन्न-भक्षण-जनित] दैन्यात् । मौर्ख्यात्—अ-ज्ञानात् । ३ । एतत्—प्रस्थापयाम मित्रेभ्यो बलान्युद्योजयन्तु नः (परस्तात् श्लो० ६) इत्येतत् ।

स च दुर्योधनो नूनं प्रेषयिष्यति सर्वशः।
पूर्वाभिपन्नाः सन्तश् च भजन्ते पूर्व-चोदनम्। ७

तत् त्वरध्वं नरेन्द्राणां पूर्वम् एव प्रचोदने।
महद् धि कार्यं वोढव्यम् इति मे वर्तते मतिः। ८

अयं च ब्राह्मणो विद्वान् मम, राजन, पुरोहितः
प्रेष्यतां धृतराष्ट्राय। वाक्यम् अस्मै प्रदीयताम्। ९

वासुदेव उवाच,—

उपपन्नम् इदं वाक्यं सोमकानां धुरन्धरे
अर्थ-सिद्धि-करं राज्ञः पाण्डवस्यामितौजसः। १०

किं तु सम्बन्धकं तुल्यम् अस्माकं कुरु-पाण्डुषु,
यथेष्टं वर्तमानेषु पाण्डवेषु च तेषु च। ११

ते विवाहार्थम् आनीता वयं सर्वे तथा भवान,
कृते विवाहे, मुदिता, गमिष्यामो गृहान् प्रति। १२

भवान् वृद्धतमो राज्ञां वयसा च श्रुतेन च।
शिष्यवत् ते वयं सर्वे भवामेह, न संशयः। १३

७। पूर्वाभिपन्नाः—पूर्वम एव साहाय्यं याचिताः। पूर्व-चोदनम्—पूर्वा चोदमा (प्रेरणा) यस्य तम, पूर्व-प्रेरकम्। ११। पं १—आसीद् युधिष्ठिर-भीमार्जुनानां माता पृथा श्रीकृष्ण- पितामहस्य शूरस्य पुत्री। दुर्योधनस्य पुत्री लक्ष्मणा च श्रीकृष्ण-पुत्रस्य साम्बस्य भार्या बभूव। यथेष्टम्—यथा इच्छामस् तथैव।

भवन्तं धृतराष्ट्रश् च सततं बहु मन्यते ।
आचार्ययोः सखा चासि द्रोणस्य च कृपस्य च । १४

स भवान् प्रेषयत्वद्य पाण्डवार्थ-करं वचः ।
सर्वेषां निश्चितं तद् नः प्रेषयिष्यति यद् भवान् । १५

यदि तावच् छमं कुर्याद् न्यायेन कुरु-पुङ्गवः,
न भवेत्, कुरु-पाण्डूनां सौभ्रात्रेण, महान् क्षयः । १६

अथ दर्पान्वितो मोहाद् न कुर्याद् धृतराष्ट्र-जः,
अन्येषां प्रेषयित्वा च पश्चाद् अस्मान् समाह्वयेः। १७

तृतीयो ऽध्यायः

मित्र लाभः

वैशम्पायन उवाच,—

ततः सत्-कृत्य वार्ष्णेयं विराटः पृथिवी-पतिः
गृहान् प्रस्थापयामास स-गणं सह-बान्धवम् । १

द्वारकां तु गते कृष्णे, युधिष्ठिर-पुरोगमाः
चक्रुः सांग्रामिकं सर्वं विराटश् च मही-पतिः । २

ततः संप्रेषयामास विराटः, सह बान्धवैः
सर्वेषां भूमि-पालानां, द्रुपदश् च मही-पतिः । ३

---

१५ । वचः—[सन्देश-] वाक्यम् । १७ । प्रेषयित्वा— दूतं इति शेषः ।

वचनात् कुरु-सिंहानां मत्स्य-पाञ्चाल्योश् च ते
समाजग्मुर् मही-पालाः, संप्रहृष्टा, महाबलाः । ४

तच् छ्रुत्वा, पाण्डु-पुत्राणां समागच्छद् महद् बलम्,
धृतराष्ट्र-सुताश् चापि समानिन्युर् मही-पतीन् । ५

समाकुला मही, राजन्, कुरु-पाण्डव-कारणात्
तदा समभवत् कृत्स्ना सं-प्रयाणे मही-क्षिताम् । ६

ततः प्रज्ञा-वयो-वृद्धं पाञ्चाल्यः स्व-पुरोहितम्
कुरुभ्यः प्रेषयामास, युधिष्ठिर-मते स्थितः ७

द्रुपद उवाच,—

भूतानां प्राणिनः श्रेष्ठाः, प्राणिनां बुद्धि-जीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा, नरेष्वपि द्विजातयः । ८

द्विजेषु वैद्याः श्रेयांसो वैद्येषु कृत-बुद्धयः ।
कृत-बुद्धिषु कर्तारः कर्तृषु ब्रह्म-वादिनः । ९

स भवान् कृत-बुद्धीनां प्रधान इति मे मतिः ।
कुलेन च विशिष्टो ऽसि वयसा च श्रुतेन च । १०

---

४ । कुरु-सिंहानाम्—पाण्डवानाम् । ५ । समागच्छत् [सम्-आ-गम् + द् (लङ्),]—अमिलत् Assembled ८ । प्राणिनः—श्वास-प्रश्वासादि-प्राण-क्रियावन्तः । ९ । वैद्याः—विद्यावन्तः ।

विदितं चापि ते सर्वं यथा-वृत्तः स कौरवः,
पाण्डवश् च यथा-वृत्तः कुन्ती-पुत्रो युधिष्ठिरः ।
धृत-राष्ट्रस्य विदितं, वञ्चिताः पाण्डवाः परैः । ११

ते, तथा वञ्चयित्वा तु धर्म-राजं युधिष्ठिरम्,
न कस्यां-चिद् अवस्थायां राज्यं दास्यन्ति वै स्वयम् । १२

भवांस् तु, धर्म-संयुक्तं धृत-राष्ट्रं ब्रुवन् वचः,
मनांसि तस्य योधानां ध्रुवम् आवर्तयिष्यति । १३

अमात्येषु च भिन्नेषु योधेषु वि-मुखेषु च,
पुनर् एकत्र करणं तेषां कर्म भविष्यति । १४

एतस्मिन्न् अन्तरे पार्थाः सुखं, एकाग्र-बुद्धयः,
सेना-कर्म करिष्यन्ति द्रव्याणां चैव सञ्चयम् । १५

वैशम्पायन उवाच,—

तथानुशिष्टः, प्रययौ, द्रुपदेन महात्मना,
पुरो-धा वृत्त-सम्पन्नो नगरं नागसाह्वयम् । १६

कृत-बुद्धयः—सिद्धान्त-ज्ञाः । कर्तारः—[ज्ञानानुरूप-] कर्म-कृतः । ब्रह्म-वादिनः—वेद-वक्तारः, वेदान्तिनः । ११ । यथा-वृत्तः—यादृक्-चरितः । १३ । आवर्तयिष्यति— घूर्णयिष्यति । १५ । एतस्मिन् अन्तरे—एतस्मिन् अवसरे, भिन्नानाम् अमात्यानाम् एकीकरणे विमुखानां योधानां आवर्तने च व्यापृतेषु शत्रुषु ।

प्रस्थाप्य दूतान् अन्यत्र, द्वारकां पुरुषर्षभः
स्वयं जगाम कौरव्यः कुन्ती-पुत्रो धनञ्जयः। १७

सर्वम् आगमयामास पाण्डवानां विचेष्टितम्
धृतराष्ट्रात्मजो राजा गूढैः प्रणिहितैश् चरैः। १८

स, श्रुत्वा माधवं यान्तं, सदश्वैर् अनिलोपमैः
बलेन नाति-महता द्वारकाम् अभ्ययात् पुरीम्। १९

तम् एव दिवसं चापि कौन्तेयः पाण्डु-नन्दनः
आनर्त-नगरीं रम्यां जगामाशु धनञ्जयः। २०

तौ यात्वा पुरुष-व्याघ्रौ द्वारकां, कुरु-नन्दनौ
सुप्तं ददृशतुः कृष्णं ; शयानं चाभिजग्मतुः। २१

ततः, शयाने गोविन्दे, प्रविवेश सुयोधनः,
उच्छीर्षतश् च कृष्णस्य निषसाद वरासने। २२

ततः किरीटी तस्यानु प्रविवेश महामनाः
पश्चाच् चैव स कृष्णस्य, प्रह्वो ऽतिष्ठत् कृताञ्जलिः। २३

१८। आगमयामास—आत्मानं ज्ञापयामास, जज्ञौ। प्रणिहितैः—[युधिष्ठिर-सभायां] स्थापितैः। २०। आनर्त-नगरीम्——द्वारकाम्। आनर्ताः—इदानीन्तनं गुजराटं मालव-विभागं च व्याप्य स्थितः प्रदेशः। २२। उच्छीर्षतः [उत्+शीर्षतः]—मस्तकात् ऊर्ध्वम्, [उत्तानस्य श्रीकृष्णस्य] मस्तकात् पश्चात्। २३। तस्यानु—ततः पश्चात्। पश्चात्

प्रति-बुद्धः स वार्ष्णेयो ददर्शाग्रे किरीटिनम् ;
सिंहासन-गतं पश्चात् परिवृत्य च दृष्टवान् । २४

स, तयोः स्वागतं कृत्वा, यथावत् प्रति-पूज्य तौ,
तदागमन-जं हेतुं पप्रच्छ मधु-सूदनः । २५

ततो दुर्योधनः कृष्णम् उवाच प्रहसन्न् इव ;
"विग्रहे ऽस्मिन् भवान् साह्यं मम दातुम् इहार्हसि । २६

समं हि भवतः सख्यं मयि चैवार्जुने ऽपि च
तथा सम्बन्धकं तुल्यम् अस्माकं त्वयि, माधव । २७

अहं चाभिगतः पूर्वं त्वाम् अद्य, मधु-सूदन ।
पूर्वं चाभिगतं सन्तो भजन्ते पूर्व-सारिणः । २८

त्वं च श्रेष्ठतमो लोके, सताम् अद्य, जनार्दन,
सततं सम्मतश् चैव । सद्-वृत्तम् अनु-पालय" । २९

कृष्ण उवाच,—

भवान् अभिगतः पूर्वम् अत्र मे नास्ति संशयः ।
दृष्टस् तु प्रथमं, राजन्, मया पार्थो धनञ्जयः । ३०

कृष्णस्य—[उत्तानस्य] श्रीकृष्णस्य चरण-तलयोः परम् । अतिष्ठत्—दण्डायमान एवावतस्थे । २४ । प्रतिबुद्धः—जागरितः [सन्] । सिंहा...वान्—अवाचाम् एव पाठः । परिवृत्य—घूर्णित्वा । २६ । साह्यम् [सह+य, २।१]—सहितत्वम्, साहाय्यम् । २८ । अभिगतः—अभिगतवान्, प्राप्तवान् । अभिगतम्—प्राप्तम् । पूर्व-सारिणः—पूर्व्वाचारानुसारिणः । २९ । सद्-वृत्तम्—सतां चरितम् ।

तव पूर्वाभिगमनात् पूर्वं चाप्यस्य दर्शनात्
साहाय्यम् उभयोर् एव करिष्यामि सुयोधन । ३१

प्रवारणं तु बालानां पूर्वं कार्यम् इति श्रुतिः ।
तस्मात् प्रवारणं पूर्वम् अर्हः पार्थो धनञ्जयः । ३२

मत्-संहनन-तुल्यानां गोपानाम् अर्बुदम् महत्,
नारायणा इति ख्याताः सर्वे संग्राम-योधिनः । ३३

ते वा युधि दुराधर्षा भवन्त्वेकस्य सैनिकाः ।
अ-युध्यमानः संग्रामे न्यस्त-शस्त्रो ऽहम् एकतः । ३४

ताभ्याम् अन्यतरं, पार्थ, यत् ते हृद्यतरं मतम्,
तद् वृणीतां भवान् अग्रे । प्रवार्यस् त्वं हि धर्मतः । ३५

वैशम्पायन उवाच,—

एवम् उक्तस् तु कृष्णेन, कुन्ती-पुत्रो धनञ्जयः,
अ-युध्यमानं संग्रामे, वरयामास केशवम् । ३६

दुर्योधनस् तु तत् सैन्यं सर्वम् आवरयत् तदा,
सहस्राणां सहस्रं तु योधानां प्राप्य, भारत । ३७

---

३२ । प्रवारणम्—काम्य-दानम्, ईप्सित-वस्तु-प्रदानम् । अर्हः—त्वत्तः कनीयस्त्वात् इति शेषः । ३३ । मत्-संहनन-तुल्यानाम्—मदीय-देह-सम-देहानाम् । ३५ । प्रवार्यः—काम्य-दान-योग्यः । ३७ । आवरयत्—साकल्येन प्रार्थयामास ।

ततो ऽभ्यगाद् भीम-बलो रौहिणेयं महा-बलम्,
सर्वं चागमने हेतुं स तस्मै सं-न्यवेदयत्। ३८

प्रत्युवाच ततः शौरिर्, धार्तराष्ट्रम् इदं वचः,
"नाहं सहायः पार्थानां नापि दुर्योधनस्य वै।" ३९

इत्येवम् उक्तस् तु तदा परिष्वज्य हलायुधम्,
कृष्णं चापहृतं मत्वा, जितं मेने धनञ्जयम्। ४०

सो ऽभ्ययात् कृत-वर्माणं धृतराष्ट्र-सुतो नृपः
कृत-वर्मा ददौ तस्य सेनाम् अक्षौहिणीं तदा। ४१

स, तेन सर्व-सैन्येन भीमेन, कुरु-नन्दनः,
वृतः, परि-ययौ, हृष्टः, सुहृदः सं-प्रहर्षयन्। ४२

गते दुर्योधने, कृष्णः किरीटिनम् अथाब्रवीत्,
अ-युध्यमानः कां बुद्धिम् आ-स्थायाहं वृतस् त्वया ? ४३

अर्जुन उवाच,—

भवान् समर्थस् तान् सर्वान् निहन्तुं, नात्र संशयः।
निहन्तुम् अहम् अप्येकः समर्थः, पुरुषर्षभ। ४४

३९। शौरिः [शूर+इ, १।१]—शूरस्य पौत्रो बलरामः। ४०। अपहृतम्—हृत-बलम्, सर्व-सेनया वियुक्तम्। ४१। कृत-वर्मा—यदु-वंश्यः सात्वत-कुल-जो हृदिक-पुत्रः। ४४। तान्—दुर्योधनादीन्।

भवांस् तु कीर्तिमाल्ँ लोके । तद् यशस् त्वां गमिष्यति ।
यशसां चाहम् अप्यर्थी, तस्माद् असि मया वृतः । ४५

सारथ्यं च त्वया कार्यम् इति मे मानसं सदा ।
चिर-रात्रेप्सितं कामं तद् भवान् कर्तुम् अर्हति । ४६

वासुदेव उवाच,—

उपपन्नम् इदं पार्थ, यत् स्पर्धसि मया सह ।
सारथ्यं ते करिष्यामि । कामः सम्पद्यतां तव । ४७

वैशम्पायन उवाच,—

एवं प्रमुदितः पार्थः कृष्णेन सहितस् तदा
वृतो दाशार्ह-प्रवरैः पुनर् आयाद् युधिष्ठिरम् । ४८

चतुर्थो ऽध्यायः

मातुल-हारः

शैल्यः, श्रुत्वा तु दूतानां, सैन्येन महता वृतः,
अभ्ययात् पाण्डवान्, राजन्, सह पुत्रैर् महा-रथैः, १

---

४६ । मानसम्—सङ्कल्पः । चिररात्रेप्सितम्—चिर-वाञ्छितम् । तद्—मानसम् इति शेषः । ४७ । स्पर्धसि—स्पर्धसे, पराभवाय विपक्षम् आह्वयसे पआ. । ४८ । दाशार्ह-प्रवरैः—दाशार्ह-कुल-धुरन्धरैः [यादवैः] । १ । श्रुत्वा दूतानाम्—दूतेभ्यः श्रुत्वा । षष्ठी आर्षी ।

व्यथयन्न् इव भूतानि, कम्पयन्न् इव मेदिनीम् ।
शनैः, विश्रामयन् सेनां, स ययौ येन पाण्डवः । २

कारयामास पूजार्थं तस्य दुर्योधनः सभाः
रमणीयेषु देशेषु रत्न-चित्राः स्वलङ्कृताः । ३

शिल्पिभिर् विविधैश् चैव क्रीड़ास् तत्र प्रयोजिताः ।
तत्र माल्यानि मांसानि भक्ष्यं पेयं च सत्-कृतम् ४

कूपाश् च विविधाकारा मनो-हर्ष-विवर्धनाः
वाप्यश् च विविधाकारा उदकानि गृहाणि च । ५

स, ताः सभाः समासाद्य, पूज्यमानो यथामरः,
मेने ऽभ्यधिकम् आत्मानम्, अवमेने पुरन्दरम् । ६

पप्रच्छ स ततः प्रेष्यान् प्रहृष्टः क्षत्रियर्षभः,
"युधिष्ठिरस्य पुरुषाः के ऽत्र चक्रुः सभा इमाः ? ७

आनीयन्तां सभा-काराः प्रदेयार्हा हि मे मताः ।
प्रसादम् एषां दास्यामि, कुन्ती-पुत्रो ऽनुमन्यताम्" । ८

सं-प्रहृष्टो यदा शल्यो दिदित्सुर् अपि जीवितम्,
गूढ़ो दुर्योधनस् तत्र दर्शयामास मातुलम् । ९

---

२ । येन—यत्र [देशे तत्र] । ४ । सत्कृतम्—सुष्ठु कृतम् । ५ । उदकानि गृहाणि—उदक-गृहाणि, जल-गृहाणि । विशेषणार्थे विशेष्य-प्रयोगः । ९ । दिदित्सुः [दा+स+उ, १।१]—दित्सुः, दातुम् इच्छुकः । आप्र ।

तं दृष्ट्वा मद्र-राजश् च, ज्ञात्वा यत्नं च तस्य तम्,
परिष्वज्या-ब्रवीत् प्रीत 'इष्टो ऽर्थो गृह्यताम्' इति। १०

दुर्योधन उवाच,—

सत्य-वाग् भव, कल्याण, वरो वै मम दीयताम्।
सर्व-सेना-प्रणेता वै भवान् भवितुम् अर्हति। ११

वैशम्पायन उवाच,—

'कृतम्' इत्यब्रवीच् छल्यः, 'किम् अन्यत् क्रियताम् ?' इति।
'कृतम्' इत्येव गान्धारिः प्रत्युवाच पुनः पुनः। १२

शल्य उवाच,—

गच्छ, दुर्योधन, पुरं स्वकम् एव नरर्षभ।
दृष्ट्वा युधिष्ठिरं, राजन्, क्षिप्रम् एष्ये, नराधिप। १३

दुर्योधन उवाच,—

क्षिप्रम् आगम्यतां राजन् पाण्डवं वीक्ष्य, पार्थिव।
त्वय्यधीनाः स्म, राजेन्द्र। वर-दानं स्मरस्व नः। १४

११। प्रणेता—नायकः। १२। कृतम् (१)—[त्वया यद् ईप्सितम् मया तत् स्वेच्छया] करिष्यते। आशंसायाम् (इच्छायाम्) भविष्यति अतीतवत् प्रत्ययः। 'आशसायां भूतवच्च'—पा० ३।३।१३२। कृतम् (२)—अलम् [अन्येन कर्मना]। गान्धारिः [गान्धारी+इ (अपत्यार्थे), १।१]—गान्धारी-पुत्रः, दुर्योधनः। १३। पुरं स्वकम्—स्वनगरम्, हास्तिन-नगरम्। एष्ये—एष्यामि, आआ। १४। स्म—स्मः। स्मरस्व—स्मर। आआ।

वैशम्पायन उवाच, —

उपप्लव्यं स गत्वा तु स्कन्धावारं प्रविश्य च,
पाण्डवान् अथ तान् सर्वान् शल्यस् तत्र ददर्श ह। १५

ततः कुशल-पूर्वं हि मद्र-राजो ऽरि-सूदनः,
प्रीत्या परमया युक्तः, समाश्लिष्य युधिष्ठिरम्। १६

ततो ऽस्या कथयद् राजा दुर्योधन-समागमम्
तच् च शुश्रूषितं सर्वं वरदानं च, भारत। १७

युधिष्ठिर उवाच,—

सु-कृतं ते कृतं, राजन्, प्रहृष्टेनान्तरात्मना
दुर्योधनस्य यद्, वीर, त्वया वाचा प्रतिश्रुतम्। १८

एकं त्विच्छामि—भद्रं ते—क्रियमाणं, मही-पते।
राजन्न्, अकर्तव्यम् अपि कर्तुम् अर्हसि, सत्तम, १९

मम त्ववेक्षया, वीर। शृणु, विज्ञापयमि ते
भवान् इह, महा-राज, वासुदेव-समो युधि— २०

कर्णार्ज्जुनाभ्यां संग्रामे द्वैरथे, राज-सत्तम,
कर्णस्य भवता कार्यं सारथ्यं, नात्र संशयः। २१

१५। स्कन्धावारम्—शिविरम्, सेना-निवेशम। १८। सुकृतम्—पुण्य-कर्म।

तत्र पार्थो ऽर्जुनो, राजन, यदि मत्-प्रियम् इच्छसि ।
तेजो-वधश् च ते कार्यः सौतेर् अस्मज्जयावहः । २२

शल्य उवाच,—

अहं तस्य भविष्यामि संग्रामे सारथिर् ध्रुवम् ।
वासुदेवेन हि समं नित्यं मां स हि मन्यते । २३

तस्याहं, कुरु-शार्दूल, प्रतीपम् अहितं वचः
ध्रुवं संकथयिष्यामि, योद्धु-कामस्य, संयुगे, २४

यथा स हृत-दर्पश् च हृत-तेजाश् च, पाण्डव
भविष्यति सुखं हन्तुं । सत्यम् एतद् ब्रवीमि ते । २५

एवम् एतत् करिष्यामि यथा, तात, त्वम् आत्थ माम् ।
यच् चान्यद् अपि शक्ष्यामि तत् करिष्यामि ते प्रियम् ।२६

वैशम्पायन उवाच,—

ततस् त्वामन्त्र्य कौन्तेयान्, छल्यो मद्राधिपस् तदा
जगाम, स-बलः, श्रीमान, दुर्योधनम्, अरिन्दमः । २७

२२। सौतेः [सूत+इ, ६।१]—सूत-पुत्रस्य, कर्णस्य ।

पञ्चमो ऽध्यायः

दूत्यम्

ततः पञ्च-नदं चैव कृत्स्नं च कुरु-जाङ्गलम्
तथा रोहितकारण्यं मरु-भूमिश् च केवला, १

अहिच्छत्रं कालकूटं गङ्गाकूलं च, भारत,
वारणं वाट-धानं च यामुनश् चैव पर्वतः— २

एष देशः सु-विस्तीर्णः प्रभूत-धन-धान्यवान्
बभूव कौरवेयाणां बलेन सु-समाकुलः। ३

तत्र सैन्यं तथा युक्तं ददर्श स पुरोहितः
यः स पाञ्चाल-राजेन प्रेषितः कौरवान् प्रति। ४

स च कौरव्यम् आसाद्य, द्रुपदस्य पुरोहितः,
सत्-कृतो धृत-राष्ट्रेण भीष्मेण विदुरेण च, ५

१। पञ्चनदम्—इदानीन्तनः पन्जावः। कुरु-जाङ्गल-म्, ।:—हस्तिनातः उत्तर-पश्चिमस्यां दिशि इदानीन्तन-दिल्लीतश् च पूर्वोत्तरास्यां दिशि स्थितो वन-प्रायो भूभागः। रोहितकः, रोहितकः—इदानीन्तन-रोहतकः दिल्लीतः उत्तर-पश्चिमस्यां दिशि एकविंशतिः क्रोशाः (टि आं क्र.)। २। अहिच्छत्रम्—इदानीन्तनं राम-नगरम् वेरोलतः पश्चिमस्यां दश क्रोशाः (क्र), पञ्चनदादयः प्रदेश-विशेषाः इदानीं दुर्ज्ञेय-सीमानः। ३। सु-समाकुलः—नितरां क्षुभितः। 'अतीव संवृतः' इति पाठान्तरम्।

सर्वं कौशल्यम् उक्त्वादौ, पृष्ट्वा चैवम् अनामयम्,
सर्व-सैन्य-प्रणेतॄणां मध्ये वाक्यम् उवाच ह,— ६

“सर्वैर् भवद्भिर् विदितो राज-धर्मः सनातनः।
वाक्योपादान-हेतोस् तु वक्ष्यामि विदिते सति। ७

धृत-राष्ट्रश् च पाण्डुश् च सुताव् एकस्य विश्रुतौ।
तयोः समानं द्रविणं पैतृकं, नात्र संशयः। ८

धृत-राष्ट्रस्य ये पुत्राः प्राप्तं तैः पैतृकं वसु।
पाण्डु-पुत्राः कथं नाम न प्राप्ताः पैतृकं वसु? ९

एवं गते, पाण्डवेयैर् विदितं वः पुरा यथा
न प्राप्तं पैतृकं द्रव्यं धार्तराष्ट्रेण संवृतम्। १०

प्राणान्तिकैर् अप्युपायैः, प्रयतद्भिर् अनेकशः
शेष-वन्तो न शकिता गमितुं यम-सादनम्। ११

ते सर्वे, पृष्ठतः कृत्वा तत् सर्वं पूर्व-किल्बिषम्,
सामैव कुरुभिः सार्धम् इच्छन्ति कुरु-पुङ्गवाः। १२

तेषां च वृत्तम् आज्ञाय, वृत्तं दुर्योधनस्य च,
अनुनेतुम् इहार्हन्ति धार्तराष्ट्रं सुहृज्-जनाः। १३

७। वाक्योपादान-हेतोः—भवद्भिर् यद् वक्तव्यं तदपि श्रोतव्यम् इति हेतोः। १०। संवृतम्—आत्मसात् कृतम्। ११। प्रयतद्भिः—प्रयतमानैः, प्रचेष्टमानैः। पञा। शेषवन्तः—[आयुः-] शेष-युक्ताः।

न हि ते विग्रहं वीराः कुर्वन्ति कुरुभिः सह ।
अ-विनाशेन लोकस्य काङ्क्षन्ते पाण्डवाः स्वकम् ! १४

अक्षौहिण्यश् च सप्तैव धर्म-पुत्रस्य सङ्गताः,
युयुत्समानाः कुरुभिः, प्रतीक्षन्ते ऽस्य शासनम् । १५

ते भवन्तो यथा-धर्मं यथा-समयम् एव च
प्रयच्छन्तु प्रदातव्यं । मा वः कालो ऽत्यगाद् अयम् ।" १६

तस्य तद् वचनं श्रुत्वा, प्रज्ञा-वृद्धो महा-द्युतिः,
सं-पूज्यैनं यथा-कामं, भीष्मो वचनं अब्रवीत्,— १७

"अ-संशयं क्लेशितास् ते वने चेह च पाण्डवाः ।
प्राप्ताश् च धर्मतः सर्वं पितुर् धनम् अ-संशयम् ।" १८

भीष्मे ब्रुवति तद् वाक्यं, धृष्टम् आक्षिप्य मन्युना,
दुर्योधनं समालोक्य कर्णो वचनं अब्रवीत्, १९

"दुर्योधनार्थे शकुनिर् द्यूते निर्जितवान् पुरा ।
समयेन गतो ऽरण्यं पाण्डु-पुत्रो युधिष्ठिरः । २०

न तं समयम् आदृत्य राज्यम् इच्छति पैतृकम्,
बलम् आश्रित्य मत्स्याणां पाञ्चालानां च, मूर्खवत् । २१

---

१६ । मा अत्यगात्—मा अतिगात् । मा-योगे ऽपि अडागम आर्षः । १९ । धृष्टम्—धर्षणा-युक्तं यथा स्यात् तथा । आक्षिप्य—तिरस्कृत्य । २० । समयेन [सह]—त्रयोदश-वर्षं ज्ञातेः पुनः द्वादश वर्षाणि वने वस्तव्यम् इत्यादि-रूपां प्रतिज्ञां कृत्वा । २१ । न···आदृत्य

दुर्योधनो भयोद्विग्नो न दद्यात् पादम् अन्ततः ।
धर्मतस् तु महीं कृत्स्नां प्रदद्याच् छत्रवे ऽपि च । २२

यदि कांक्षन्ति ते राज्यं पितृपैतामहं पुनः,
यथा-प्रतिज्ञं कालं तु चरन्तु वनम् आश्रिताः । २३

ततो दुर्योधनस्याङ्के वर्तन्ताम् अ-कुतो-भयाः ।
अ-धार्मिकीं तु मा बुद्धिं मौर्ख्यात् कुर्वन्तु केवलाम् २४

अथ ते धर्मम् उत्सृज्य युद्धम् इच्छन्ति पाण्डवाः,
आसाद्येमान कुरु-श्रेष्ठान् स्मरिष्यन्ति वचो मम ।" २५

भीष्म उवाच,—

किं नु, राधेय, वाचा ते ? कर्म तत् स्मर्तुम् अर्हसि,
एक एव यदा पार्थः षड् रथान् जितवान् युधि ! २६

न चेद् एवं करिष्यामो यद् अयं ब्राह्मणो ऽब्रवीत्,
ध्रुवं, युधि हतास् तेन, भक्षयिष्याम पांशुकान् । २७

—त्रयोदश-वर्षान्तात् प्राग् एव ज्ञाताः सन्तो ऽपि वनम् अ-गत्वा ।
२२ । पादम अन्ततः—राज्यस्य चतुर्थांशम् अपि, किम् उत अर्धम् ।
२७ । भक्षयिष्याम पांशुकान्—युद्ध-क्षेत्रे अधो-मुखाः शेष्यामहे । विसर्ग-लोप आर्षः । छन्दो ऽनु-रोधात् ।

षष्ठो ऽध्यायः

प्रति-दूत्यम्

वैशम्पायन उवाच,—

धृत-राष्ट्रस् ततो, भीष्मम् अनुमान्य प्रसाद्य च,
अवभर्तुस्य च राधेयम्, इदं वचनम् अब्रवीत्,— १

"अस्मद्-धितम् इदं वाक्यं भीष्मः शान्तनवो ऽब्रवीत्
पाण्डवानां हितं चैव सर्वस्य जगतस् तथा। २

चिन्तयित्वा तु, पार्थेभ्यः प्रेषयिष्यामि सञ्जयम्।
स भवान् प्रति-यात्वद्य पाण्डवान् एव मा चिरम्।" ३

स तं, सत्-कृत्य, कौरव्यः प्रेषयामास पाण्डवान्;
सभा-मध्ये समाहूय, सञ्जयं वाक्यम् अब्रवीत्,— ४

"स गच्छ शीघ्रं, प्रहितो, रथेन
पाञ्चाल-राजस्य चमू-निवेशम्।
पुनः पुनः प्रीति-युक्तं वदेस् त्वम्
'धृत-राष्ट्रः पाण्डवैः शान्तिम् ईप्सुः'। ५

यद् यत् तत्र प्राप्त-कालं परेभ्यस्
त्वं मन्येथा भारतानां हितं च,
तद् भाषेथाः, सञ्जय, राज-मध्ये,
न मूर्च्छयेद् यद् न च युद्ध-हेतुः। ६

१। अनुमान्य—अनुमतिं याचित्वा, ६। परेभ्यः—शत्रुभ्यः। प्राप्त-कालम्—समयोचितम्। मूर्च्छयेत्—[शत्रूणां क्रोधं] वर्द्धयेत्।

राज्ञस् तद् वचनं श्रुत्वा धृत-राष्ट्रस्य, सञ्जयः
उपप्लव्यं ययौ द्रष्टुं पाण्डवान् अमितौजसः । ७

स तु, राजानम् आसाद्य, कुन्ती-पुत्रं युधिष्ठिरम्,
अभिवाद्य ततः पूर्वं, सूत-पुत्रो ऽभ्यभाषत,– ८

"शमं राजा धृत-राष्ट्रो, ऽभिनन्दन्न्,
अयोजयत्, त्वरमाणो, रथं मे ।
स-भ्रातृ-पुत्र-स्वजनस्य राज्ञस्
तद् रोचतां ! पाण्डवानां शमो ऽस्तु ! ९

सर्व-क्षयो दृश्यते यत्र कृत्स्नः
पापोदयो निरयो ऽभाव-संस्थः,
कस् तत्र कुर्याज् जातु कर्म, प्रजानन्,
पराजयो यत्र समो जयश् च । १०

युद्ध-हेतुः—भवेत् इति शेषः । ९ । शमम्—शान्तिम् । अयोजयत् [अश्व-सारथि-प्रभृतिभिः] सज्जं चकार । मे—मम इह सत्वरा-गमनाय । राज्ञः—राज्ञे [युधिष्ठिराय] । तद्—[धृतराष्ट्रस्य] दूत-प्रेरणाय ईदृशी त्वरा । रोचताम्—अभिमतं भवतु । पाण्डवानाम् ॐ—धृतराष्ट्र-प्रेरित-शान्ति-वार्त्ता-ग्रहणेन— इति शेषः । १० । अ-भाव-संस्थः—[सर्व-] शून्ये पर्यवसितः । भाव-संस्थः इत्यवाचां पाठः । —पापोदयः—पाप-मूलकः । पराजयः ॐ—सर्व-स्वजन-संक्षयात् जयो ऽपि पराजय एव ।

को ह्येव युष्मान्, सह केशवेन,
स-चेतिकानान् पार्षत-बाहु-गुप्तान्
स-सात्यकीन् विषहेतेह जेतुं,
लब्ध्वापि देवान् सचिवान् सहेन्द्रान् ? ११

को वा कुरून्, भीष्म-द्रोणाभिगुप्तान्,
अश्वत्थाम्ना शल्य-कृपादिभिश् च,
रणे विजेतुं प्रसहेत, राजन्,
राधेय-गुप्तान् सह भूमि-पालैः ? १२

महद् बलं धार्तराष्ट्रस्य राज्ञः
को वा शक्तो हन्तुम्, अक्षीयमाणः ?
सो ऽहं जये चैव पराजये च
निः-श्रेयसं नाधिगच्छामि किञ्चित्। १३

कथं हि नीचा इव दौष्कुलेया
निर्धर्मार्थं कर्म कुर्युश् च पार्थाः ?
कृताञ्जलिः शरणं वः प्रपद्ये—
कथं स्वस्ति स्यात् कुरु-सृञ्जयानाम् ? १४

१३। निःश्रेयसम्——मङ्गलम्। १४। दौष्कुलेयाः——हीन-कुल-भवाः। निर्धर्मार्थम्——धर्म-विरुद्धम् अर्थ-विरुद्धं (राजनीति-विरुद्धं) च। शरणं प्रपद्ये——शरणं गच्छामि।

प्राणान् दद्याद् याचमानः। कुतो ऽन्यद् ?
एतद्, विद्वन्, साधनार्थं ब्रवीमि।
एतद् राज्ञो भीष्म-पुरोगमस्य
मतं यद् वः शान्तिर् इहोत्तमा स्यात्"। १५

युधिष्ठिर उवाच,—

कां नु वाचं, सञ्जय, मे शृणोषि
युद्धैषिणीं येन युद्धाद् बिभेषि ?
अ-युद्धं वै, तात, युद्धाद् गरीयः।
कस् तं लब्ध्वा जातु युध्येत, सूत ? १६

आशंसते वै धृत-राष्ट्रः स-पुत्रो
महा-राज्यम् अ-सपत्नं पृथिव्याम्।
तस्मिञ् छमः केवलो नोपलभ्यः
सर्वं स्वकं मद्-गते मन्यते ऽर्थम्। १७

जानासि त्वं क्लेशम् अस्मासु वृत्तं।
त्वां पूजयन् सञ्जयाहं क्षमेयम्

१५। याच्यमानः—याचमानः इति प्रतीचां पाठः। साधनार्थम्—[सन्धेः सिद्ध्यर्थम्। १६। युद्धैषिणीम्—युद्ध-कामाम्, युद्धेच्छा-द्योतिकाम्। १७। आशंसते—आकाङ्क्षति। असपत्नम्—निःशत्रुम्, निष्कण्टकम्। तस्मिन्—तस्मिन् जने। केवलः—एकान्तः। मद्-गते—मयि वनं गते, मम वन-वास-काले। मन्यते—यः इति शेषः।

यच् चास्माकं कौरवैर् भूत-पूर्वं ।
या नो वृत्तिर् धार्तराष्ट्रे तदासीत् १८

अद्यापि तत् तत्र तथैव वर्ततां ।
शान्तिं गमिष्यामि यथा त्वम् आत्थ ।
इन्द्रप्रस्थे भवतु ममैव राज्यं ।
सुयोधनो यच्छतु भारताग्र्यः । १९

सञ्जय उवाच,—

धर्म-नित्या, पाण्डव, ते वि-चेष्टा
लोके श्रुता दृश्यते चापि, पार्थ ।
महा-श्रावं जीवितं चाप्यनित्यं,
संपश्यंस्, त्वं, पाण्डव, मा व्यनीनशः । २०

न चेद् भागं कुरवो ऽन्यत्र युद्धात्
प्रयच्छेरंस् तुभ्यम्, अ-जात-शत्रो,
भैक्ष्य-चर्याम् अन्धक-वृष्णि-राज्ये
श्रेयो मन्ये, न तु युद्धेन राज्यम् । २१

---

१८ । क्लेशम्— विषदान-जतुगृह-दाहादि-सम्भूतम् । त्वां पूजयन्—तव वाक्यं मानयन् । १९ । ३या पं—केवलम् इन्द्र-प्रस्थे मम राज्यं (उप-राज्यं) भवतु, न तु सार्वभौमत्वं लब्ध्वा वर्त्तमाने राजधाने हस्तिनापुरेऽपि । यच्छतु (यम्+तु)—नियमयतु, [महा-साम्राज्यं] प्रशास्तु । भारताग्र्यः—भारतेषु अग्र्यः (अग्रणीः, नेता, प्रधानः) सन् । २० । महा-श्रावम्—महा-श्रवणम्, विपुल-कीर्त्ति । मा व्यनीनशः [वि-नश्+इ+लुङ् स्]—[क्रोधेन सहानुगान् धार्तराष्ट्रान्] न विनाशय ।

अन्तं गत्वा कर्मणां, मा प्रजह्याः
सत्यं दमं चार्जवम् आनृशंस्यम्
अश्वमेधं राजसूयं तथेज्याः।
पापस्यान्तं कर्मणो मा पुनर् गाः। २२

बलं कस्माद् वर्धयित्वा परस्य,
निजान् कस्मात् कर्शयित्वा सहायान्,
निरुष्य कस्माद् वर्ष-पूगान् वनेषु,
युयुत्ससे, पाण्डव, हीन-कालम् ? २३

पापानुबन्धं को नु तं कामयेत—
क्षमैव ते ज्यायसी नोत भोगाः—
यत्र भीष्मः शान्तनवो हतः स्यात्,
यत्र द्रोणः सह-पुत्रो हतः स्यात् ? २४

२२। अन्तं गत्वा कर्मणाम्—[ज्ञानेन] कर्मणां नाशं प्राप्य। Cf. 'ज्ञानाग्निः सर्व-कर्माणि भस्मसात् कुरुते, ऽर्जुन' (गी.)। अन्तम् (२)—सीमानम्, समीपम् इत्यर्थः। अश्वमेधादीनां चित्त-शुद्धि-द्वारेण ज्ञान-जननत्वम् अभ्युपगम्यते। ज्ञानोत्पत्त्युत्तर-काले कृतं वर्णाश्रम-विहितं कर्म कर्मिणं न स्पृशति इत्युच्यते। Cf. 'पुष्कर-पलाशे आपो न श्लिष्यन्ते एवम् एवं-विदि पापकं कर्म न श्लिष्यते' (श्रुतिः)। २३। निरुष्य—जन-समाजात् निर्गत्य [वने] वासं कृत्वा। वर्ष-पूगान्—वत्सर-समूहान्, बहूनि वर्षाणि। युयुत्ससे—योद्धुम् इच्छसि। हीन-कालम्—गते [युद्ध-] काले। २४। पापानुबन्धम् [पापम् अनुबध्नाति (अनुषजति) इति, तथा-विधम्]—पाप-मूलभूतम् [क्रोधम्]।

युधिष्ठिर उवाच,—

अ-संशयं, सञ्जय, सत्यम् एतद् ,
धर्मो वरः कर्मणां यत् त्वम् आत्थ ।
ज्ञात्वा तु मां, सञ्जय, गर्हयेस् त्वम्,
यदि धर्मं यद्यधर्मं चरेयम् । २५

यत्राधर्मो धर्म-रूपाणि धत्ते,
धर्मः कृतस्नो दृश्यते ऽधर्म-रूपः,
बिभ्रद् धर्मो धर्म-रूपं तथा च,
विद्वांस् तं संप्रपश्यन्ति बुद्ध्या । २६

यदि ह्यहं विसृजन् साम गर्ह्यो,
युध्यमानो यदि जह्यां स्व-धर्मम्,
महा-यशाः केशवस् तद् ब्रवीतु ।
वासुदेवस् तूभयोर् अर्थ-कामः । २७

---

२५ । ज्ञात्वा —परीक्ष्य । गर्हयेः—निन्द । २६ । त्रिविधैव धर्म-परीक्षा । प्रथमतस् तावत् दम्भ-मूलकः पर-पीड़नार्थको यागादिः अधर्मः सन्न् अपि अज्ञान-जनाय धर्म इव भाति । द्वितीयतो योग-मार्गस्थस्य बाह्यार्थेषूदासीनस्य दुःखेष्वनुद्विग्न-चित्तस्य सुखेषु विगतस्पृहस्य वीत-राग-भय-क्रोधस्य आचारो धर्मः सन्न् अपि तस्मै अ-धर्म इव भासते तृतीयतो जीवन्मुक्तस्य वशिष्ठादेः व्यवहारो याथार्थ्येन बाह्येन च धर्म इति प्रतीयते । २७ । विसृजन्—त्यजन् । साम—सन्धिम् । गर्ह्यः—निन्दनीयः ।

वृष्ण्यन्धका ह्युग्रसेनादयो वै
कृष्ण-प्रणीताः, सर्व एवेन्द्रकल्पाः
मनस्विनः सत्य-परायणाश् च
महा-बला यादवा भोगवन्तः। २८

ईदृशो ऽयं केशवस्, तात, विद्वान्।
विद्धि ह्येनं कर्मणां निश्चय-ज्ञम्।
प्रियश् च नः साधुतमश् च कृष्णो।
नातिक्रामे वचनं केशवस्य। २९

वासुदेव उवाच,—

अ-विनाशं, सञ्जय, पाण्डवानाम्
इच्छाम्यहं भूतिम् एषां प्रियं च।
तथा राज्ञो धृत-राष्ट्रस्य सूत,
समाशंसे बहु-पुत्रस्य वृद्धिम्। ३०

कामो हि मे, सञ्जय, नित्यम् एव
नान्यद् ब्रूयां तान् प्रति शाम्यतेति।
राज्ञश् च हि प्रियम् एतच् छृणोमि।
मन्ये चैतत् पाण्डवानां समर्थम्। ३१

२८। कृष्ण-प्रणीताः—कृष्णेनैव नीति-पथे परिचालिताः। भोगवन्तः—सुखिनो वर्द्धिष्णवश् च। २९। नातिक्रामे—न अतिक्रमे, न अतिवर्ते। वृद्धिर् आर्षो। ३०। समाशंसे—सर्वथा इच्छामि। ३१। नान्यत्···शाम्यतेति—तान् (पाण्डवान्) प्रति 'शाम्यत' इत्यतः

सु-दुष्करस् तत्र शमो हि नूनं
सन्दर्शितः, सञ्जय, पाण्डवेन,
यस्मिन् गृद्धो धृतराष्ट्रः स-पुत्रः।
कस्माद् एषां कलहो नावमूर्च्छेत् ? ३२

स्तेनो हरेद् यत्र धनं ह्यदृष्टः,
प्रसह्य वा यत्र हरेत दृष्टः,
उभौ गर्ह्यौ भवतः सञ्जयैतौ।
किंवा पृथक्त्वं धृतराष्ट्रस्य पुत्रे ? ३३

सो ऽयं लोभाद् मन्यते धर्मम् एतं
यम् इच्छति क्रोध-वशानुगामी।
भागः पुनः पाण्डवानां निविष्टः।
तं नः कस्माद् आददीरन् परे वै ? ३४

अन्यत् [वचो] न ब्रूयाम् (वदेयम्)। इच्छार्थ-पदेन योगे लिङ्। पा. ३।३।१५७। राज्ञः—युधिष्ठिरात्। एतत्—शाम्यतेत्येतत्। मन्ये—मानयामि। ३२। तत्र—[राज्ये] गृद्धः—लिप्सावान्। कस्मात्—केन हेतुना। एषाम्—कौरवाणाम्। अवमूर्छेत्—स्वतएव आविर्भवेत्। ३३। स्तेनः—चौरः, तस्करः। गर्ह्यौ—निन्द्यौ। पृथक्त्वम्—[स्तेनाद्] अन्यत्वम्। ३४। सोऽयम्—धृतराष्ट्रस्य पुत्रः। एतम्—छलेन राज्यार्धापहारम्। निविष्टः—वनवासात् परं प्रत्यर्पणाय कौरवेषु न्यास-रूपेण स्थितः। नः (अस्माकं) तं (राज्यार्ध-भागं) परे (अन्ये) कथम् वै (हि) आददीरन् (गृह्णीयुः) ?

अस्मिन् पदे युध्यतां—नो वधो ऽपि
श्लाघ्यः। पित्र्यं पर-राज्याद् विशिष्टम्।
एतान् धर्मान् कौरवाणां पुराणान्
आचक्षीथाः, सञ्जय, राज-मध्ये। ३५

स्थिताः शुश्रूषितुं पार्थाः, स्थिता योद्धुम् अरिन्दमाः।
यत् कृत्यं धृतराष्ट्रस्य तत् करोतु नराधिपः। ३६

युधिष्ठिर उवाच,—

अक्षतान् कुरु-पाञ्चालान् पश्येयम् इति कामये।
शान्तिर् नो ऽस्तु, महा-प्राज्ञ, ज्ञातिभिः सह, सञ्जय! ३७
अलम् एव शमायास्मि तथा युद्धाय, सञ्जय।
धर्मार्थयोर् अलं चाहं, मृदवे दारुणाय च। ३८

वैशम्पायन उवाच,—

अनुज्ञातः पाण्डवेन, प्रययौ सञ्जयस् तदा,
शासनं धृतराष्ट्रस्य सर्वं कृत्वा, महात्मनः। ३९

३५। पदे—वस्तुनि, अवश्य-ग्रहणीय-राज्यार्धभागाय। निमित्तात् कर्म-समवाये सप्तमी। पा. २।३।३६ ॐ। पित्र्यम्—पितुर् आगतम् [राज्यम्]। विशिष्टम्—भिन्नम्। ३६। शुश्रूषितुम्— [भृत्यवद् धृतराष्ट्रं] सेवितुम्। ३८। अलम्—शक्तः, समर्थः। ३९। अनुज्ञातः [सन्] पाण्डवेन—तदनुज्ञां विना दूतेनापि तदधिकृत-स्थान-त्यागाशक्तेः।

सप्तमो ऽध्यायः

कुरु-सभा

शुश्रूषमाणाः पार्थानां वाचो धर्मार्थ-संहिताः,
धृतराष्ट्र-मुखाः सर्वे ययू, राजन् सभां शुभाम् । १

आसन-स्थेषु सर्वेषु तेषु राजसु, भारत,
द्वास्थो निवेदयामास सूत-पुत्रन् उपस्थितम् । २

उपेयाय स तु क्षिप्रं, रथात् प्रस्कन्द्य, कुण्डली,
प्रविवेश सभां, पूर्णां मही-पालैर् महात्मभिः । ३

सञ्जय उवाच,—

प्राप्तो ऽस्मि, पाण्डवान् गत्वा । तद् विजानीत, कौरवाः ।
यथा-वयः कुरून् सर्व्वान् प्रतिनन्दन्ति पाण्डवाः । ४

यथाहं धृतराष्ट्रेण शिष्टः पूर्वम् इतो गतः,
अब्रवम् पाण्डवान्, गत्वा । नात्र किञ्चन हापितम् । ५

इन्द्र-केतुर् इवोत्थाय, दिव्याभरण-भूषितः
इन्द्रवीर्योपमः कृष्णः, संविष्टो, माभ्यभाषत,— ६

---

१ । शुश्रूषमाणाः—श्रोतुम् इच्छुकाः । ३ । उपेयाय [उप-इ+अ] —उपाजगाम । प्रस्कन्द्य—उल्लम्फनेन भूमौ अवतीर्य । ४ । यथा-वयः—वयसो ऽनुरूपम् । ५ । शिष्टः—अनुशिष्टः, उपादिष्टः । हापितम्—[हा-इ + त]—परित्यक्तम् । नात्र···तम्—"तन्निबोधत, पर्थिवाः" इति प्रत्यन्तरः । ६-९—अवाचामेव पाठः । ६ । इन्द्र-केतुः—[पूजार्थः] इन्द्र-ध्वजः । संविष्टः—[पाण्डवैः] सहोपविष्टः ।

"स्वञ्जयेतद् वचो ब्रूयाः, प्राप्य क्षत्रिय-संसदम्,
शृण्वतः कुरु-वृद्धस्य आचार्यस्य च धीमतः,— ७

'अर्थास् त्यजत पार्थेषु, सुखम् आप्नुत काम-जम्,
प्रियं प्रियेभ्यश् चरत। राजा हि त्वरते जये। ८

तेजोमयं दुराधर्षं बिभ्रता गाण्डिवं धनुः,
मद्द्वितीयेन पार्थेन वैरं वः प्रत्युपस्थितम्'।" ९

अवोचद् मां योत्स्यमानः किरीटी,—
"मध्ये, ब्रूया धार्तराष्ट्रं कुरूणाम्,
संशृण्वतस् तस्य दुर्भाषिणो वै
दुरात्मनः सूत-पुत्रस्य, सूत, १०

'न चेद् राज्यं मुञ्चति धार्तराष्ट्रो
युधिष्ठिरस्याजमीढस्य राज्ञः,
अहं ह्येकः पार्थिवान्—सर्व-योधान्,
शरान् वर्षन्, मृत्यु-लोकं नयेयम्'।" ११

वैशम्पायन उवाच,—

दुर्योधनम् इदं वाक्यं भीष्मः शान्तनवो ऽब्रवीत्,—
"वासुदेवार्जुनौ वीरौ समवेतौ महा-रथौ, १२

७। संसदम्—सभाम्। ८। राजा—युधिष्ठिरः। १०। अवोचद् [वच् + लुङ्-द्]—सन्निहिते ऽतीते लुङ्। योत्स्यमानः—[युध्+स्यमान, १।१]—भविष्यति स्यमानः।

अजेयौ मानुषे लोके, सेन्द्रैर् अपि सुरासुरैः ।
न चेद् ग्रहीष्यसे वाक्यं, श्रोतासि सु-बहून् हतान् । १३

तवैव हि मतं सर्वं कुरवः पर्युपासते ।
त्रयाणाम् एव च मतं तत् त्वम् एको ऽनुमन्यसे— १४

दुर्जातेः सूत-पुत्रस्य शकुनेः सौबलस्य च
तथा क्षुद्रस्य पापस्य भ्रातुर् दुःशासनस्य च"। १५

कर्ण उवाच,—

नैवम् आयुष्मता वाच्यं यद् माम् आत्थ, पितामह ।
क्षत्र-धर्मे स्थितो ह्यस्मि, स्व-धर्माद् अनपेयिवान् । १६

अहं हि पाण्डवान् सर्वान् हनिष्यामि, रणे स्थितान् ।
प्राग्-विरुद्धैः शमः सद्भिः कथं वा क्रियते पुनः ? १७

राज्ञो हि धृतराष्ट्रस्य सर्वं कार्यं प्रियं मया,
तथा दुर्योधनस्यापि । स हि राज्ये समाहितः । १८

१३। श्रोतासि—सन्निहित-भविष्यति लुट् । १४। पर्युपासते—[परि-उप-आस्+अन्ते]—अनुवर्तन्ते । अनुमन्यसे—अनुमोदसे । कुरवो यद् मतं तव मतम् मत्वा अनुवर्तन्ते तत् तव आत्म-मतं न । यदेव त्रयो मन्यन्ते त्वं तदेव अनमोदसे । कुरवस् तद् एव तव मतं मत्वा अनुवर्तन्ते । १५। दुर्जातेः—नीच-जातेः । क्षुद्रस्य—नीचस्य । १६। अनपेयिवान् [न+अप+इ+वस्, पुं १।१]—अनपेतः, अचलितः । स्व-धर्माद् अनपेयिवान् —स्वधर्मे प्रतिष्ठितः । १८। राज्ये समाहितः—राज-कर्मणि अभिनिविष्टः ।

वैशम्पायन उवाच,—

कर्णस्य तु वचः श्रुत्वा, भीष्मः शान्तनवः पुनः,
धृतराष्ट्रं महा-राजम् आभाष्येदं वचो ऽब्रवीत्,— १९

"यद् अयं कत्थते नित्यं 'हन्ताहं पाण्डवान्' इति,
नायं कलापि सम्पूर्णा पाण्डवानां महात्मनाम्। २०

अ-नयो यो ऽयम् आगन्ता पुत्राणां ते दुरात्मनाम्,
तद् अस्य कर्म जानीहि सूत-पुत्रस्य दुर्मतेः।" २१

भीष्मस्य तु वचः श्रुत्वा, भारद्वाजो महा-मनाः
धृतराष्ट्रम् उवाचेदं राज-मध्ये, ऽभि-पूजयन्,— २२

"यद् आह भरत-श्रेष्ठो भीष्मस् तत् क्रियतां, नृप।
न कामम् अवलिप्तानां वचनं कर्तुम् अर्हसि। २३

यद् वाक्यम् अर्जुनेनोक्तं सञ्जयेन निवेदितम्,
सर्वं तद्, अभिजानामि, करिष्यति च पाण्डवः"। २४

धृतराष्ट्र उवाच,—

युद्धे विनाशः कृत्स्नस्य कुलस्य भविता ध्रुवम्।
यदि त्वयुद्धम् इष्टं वो, वयं शान्त्यै यतामहे। २५

१९। आभाष्य—सम्बोध्य। २०। कत्थते—श्लाघते। कलापि—षोड़शांशो ऽपि। २१। आगन्ता—अचिरात् आगमिष्यति। २३। कामम्—स्वेच्छया। अवलिप्तानाम्—गर्वितानाम्।

दुर्योधन उवाच,—

न भेतव्यं, महा-राज। न शोच्या भवता वयम्।
समर्थाः स्म परान् जेतुं बलिनः समरे, विभो। २६

वने प्रव्राजितान् पार्थान् यदायाद् मधु-सूदनः
महता बल-चक्रेण पर-राष्ट्रावमर्दिना, २७

केकया धृष्ट-केतुश् च धृष्टद्युम्नश् च पार्षतः
राजानश् चान्वयुः पार्थान् बहवो ऽन्ये ऽनुयायिनः, २८

इन्द्रप्रस्थस्य चादूरात् समाजग्मुर् महा-रथाः
व्यगर्हयंश् च संगम्य भवन्तं कुरुभिः सह, २९

प्रत्यादानं च राज्यस्य कार्यम् ऊचुर्, नराधिपाः
भवतः सानुबन्धस्य समुच्छेदं चिकीर्षवः। ३०

श्रुत्वा चैवं मयोक्तास् तु भीष्म-द्रोण-कृपास् तदा
ज्ञाति-वध-भयाद्, राजन्, भीतेन, भरतर्षभ। ३१

ततो द्रोणो ऽब्रवीद् भीष्मः कृपो द्रौणिश् च, भारत,
मत्वा मां महतीं चिन्ताम् आस्थितं व्यथितेन्द्रियम्,— ३२

"अभिद्रुग्धाः परे चेद् नो, न भेतव्यं परन्तप।
अ-समर्थाः परे जेतुम् अस्मान्, युधि समास्थितान्। ३३

२९। व्यगर्हयन्—व्यनिन्दन्। ३३। अभिद्रुग्धाः— द्रोह-विषयाः कृताः। नः—अस्माभिः। अभिद्रुग्धाः...नः - यदि वयं परान् हिंसितुम् आक्रमितुं वा यतेमहि।

एकैकशः समर्थाः स्मो विजेतुं सर्व-पार्थिवान्।
आगच्छन्तु, विनेष्यामो दर्पम् एषां शितैः शरैः"। ३४

धृतराष्ट्र उवाच,—

क्षत्र-तेजा ब्रह्म-चारी कौमाराद् अपि पाण्डवः
तेन संयुगम् एष्यन्ति मन्दा विलपतो मम। ३५

दुर्योधन, निवर्तस्व युद्धाद्, भरत-सत्तम।
न हि युद्धं प्रशंसन्ति सर्वावस्थम्, अरिन्दम। ३६

अलम् अर्धं पृथिव्यास् ते सहामात्यस्य जीवितुम्।
प्रयच्छ पाण्डु-पुत्राणां यथोचितम्, अरिन्दम। ३७

येषु संप्रतितिष्ठेयुः कुरवः पीड़िताः शरैः
ते युद्धं नाभिनन्दन्ति। तत् तुभ्यं, तात, रोचताम्! ३८

न त्वं करोषि कामेन। कर्णः कारयिता तव,
दुःशासनश् च पापात्मा शकुनिश् चापि सौबलः। ३९

दुर्योधन उवाच,—

अहं च, तात, कर्णश् च रण-यज्ञं वितत्य वै
युधिष्ठिरं पशुं कृत्वा दीक्षितौ, भरतर्षभ। ४०

३७। अलम्—पर्याप्तम्। ३८। संप्रतितिष्ठेयुः—संप्रतितिष्ठेरन्, निरापदम् आश्रयं लभेरन्, अवतिष्ठेरन्। प आ.।

आत्म-यज्ञेन, नृपते, इष्ट्वा वैवस्वतं रणे
विजित्य च समेष्यावो हतामित्रौ श्रिया वृतौ। ४१

अहं च, तात, कर्णश् च भ्राता दुःशासनश् च मे,
एते वयं हानिष्यामः पाण्डवान् समरे, त्रयः। ४२

अहं हि पाण्डवान् हत्वा प्रशास्ता पृथिवीम् इमाम्,
मां वा हत्वा पाण्डु-पुत्रा भोक्तारः पृथिवीम् इमाम्। ४३

त्यक्तं मे जीवितं राज्यं धनं सर्वं च पार्थिव,
न जातु पाण्डवैः सार्धं वसेयम् अहम्, अच्युत। ४४

यावद् धि सूच्यास् तीक्ष्णाया विध्येद् अग्रेण, मारिष,
तावद् अप्यपरित्याज्यं भूमेर् नः पाण्डवान् प्रति। ४५

विदुर उवाच,—

दुर्योधनो योद्धु-मनाः समरे सव्य-साचिना।
न च पश्यामि तेजो ऽस्य विक्रमं वा तथा-विधम्। ४६

अङ्के कुरुष्व राजानं, धृत-राष्ट्र, युधिष्ठिरम्।
युध्यतोर् हि द्वयोर् युद्धे नैकान्तेन भवेज् जयः। ४७

४१। वैवस्वतम् [विवस्वत् (सूर्य)+अ, २।१]—यमम्। समेष्यावः – संगमिष्यावहे, मिलिष्यावः। ४७। द्वयोः—कुरु-पाण्डवयोः। नैकान्तेन भवेज् जयः——एकतरस्य पराजयः तव पराजय एव। भ्रातुष्पुत्राणाम् अपि स्व-पुत्रत्वात्।

धृत-राष्ट्र उवाच,—

दुर्योधन, विजानीहि यत् त्वां वक्ष्यामि, पुत्रक।
उत्पथं मन्यसे मार्गम् अनभिज्ञ इवाध्वगः। ४८

तिष्ठ, तात, सतां वाक्ये सुहृदाम् अर्थ-वादिनाम्।
वृद्धं शान्तनवं भीष्मं तितिक्षस्व पितामहम्।
मां च ब्रुवाणं शुश्रूष कुरूणाम् अर्थ-दर्शिनम्। ४९

वैशम्पायन उवाच,—

दुर्योधने धार्तराष्ट्रे तद् वचो नाभिनन्दति,
तूष्णीम्भूतेषु सर्वेषु, समु-त्तस्थुर् नरर्षभाः। ५०

अष्टमो ऽध्यायः

अवसादः

सञ्जये प्रतियाते तु, धर्म-राजो युधिष्ठिरः
अभ्यभाषत दाशार्हम् ऋषभं सर्व-सात्वताम्,— १

४८। उत्पथम् —अ-मार्गम्। अध्वगः—पथिकः। ४९। अर्थ-वादिनाम्—आगमिष्यत्यपि महाक्षये स्वप्रयोजनवताम्। तितिक्षस्व पितामहम्—पितामहाय सहिष्णुर् भव, धीरतया पितामहस्य वाक्यं गृहाण। मां च शुश्रूष—मां च शुश्रूषस्व, ममापि वाक्यं स्वेच्छया शृणु। कुरूणाम् अर्थ-दर्शिनम् – जगत्-प्रपञ्चे कुरु-कुल-प्रयोजनस्य द्रष्टारम्। [आ प्र.]।
१। ऋषभं सर्व-सात्वताम् - (सर्व्व यादवानां) श्रेष्ठम्।

"अयं स कालः संप्राप्तो मित्राणां मित्र-वत्सल ।
न च त्वद् अन्यं पश्यामि यो न आपत्सु तारयेत् । २

श्रुतं ते धृत-राष्ट्रस्य स-पुत्रस्य चिकीर्षितम्,
अ-प्रदानेन राज्यस्य शान्तिम् अस्मासु मार्गति । ३

दुर्योधन-मते तिष्ठन् राजास्मासु, जनार्दन,
मिथ्या चरति, लुब्धः सन्, चरन् हि प्रियम् आत्मनः । ४

इतो दुःखतरं नु किं यद् अहं मातरं ततः
संविधातुं न शक्नोमि, मित्राणां वा, जनार्दन !" ५

एवम्, उक्तः, प्रत्युवाच धर्म-राजं जनार्दनः,—
"उभयोर् एव वाम् अर्थे यास्यामि कुरु-संसदम् । ६

शमं तत्र लभेयं चेद् युष्मदर्थम् अ-हापयन्,
पुण्यं मे सु-महद्, राजंश्, चरितं स्याद् महा-फलम्, ७

मोचयेयं मृत्यु-पाशात् संरब्धान् कुरु-सञ्जयान्,
पाण्डवान् धार्तराष्ट्रांश् च, सर्वां च पृथिवीम् इमाम् । ८

---

३ । मार्गति—मार्गयते, अन्विष्यति । ४ । मिथ्या चरति – अन्तः अस्माकं राज्यम् ईप्सन् बहिर् अस्माभिः सौहृद्यं भाषते । ५ । ततः — तत्र, तत्र-स्थाम् इत्यर्थः, विदुरालय-स्थाम् । संविधातुम् — पोषयितुम् । मित्राणाम्— मित्राणि । कर्मणि षष्ठी । ६ । वाम् – युवयोः । ७ । अ-हापयन्— अ-परित्यजन् ।

यतिष्ये ऽहं शमं कर्तुं लक्षयिष्ये च चेष्टितम्
कौरवाणां। प्रवृत्तिं च, गत्वा, युद्धाधिकारिकाम्
निशम्य, विनिवर्तिष्ये जयाय तव, भारत।" ९

भीम उवाच,—

यथा यथैव शान्तिः स्यात् कुरूणां, मधु-सूदन,
तथा तथैव भाषेथा, मा स्म युद्धेन भीषयेः! १०

अ-मर्षी जात-संरम्भः श्रेयो-द्वेषी महा-मनाः
नोग्रं दुर्योधनो वाच्यः। साम्नैवैनं समाचरेः! ११

दुर्योधनस्य क्रोधेन भरता, मधु-सूदन,
धक्ष्यन्ते शिशिरापाये वनानीव हुताशनैः। १२

अपि दुर्योधनं, कृष्ण, सर्वे वयं अधश्चराः।
नीचैर् भूत्वा नु यास्यामो, मा स्म नो भरता नशन्! १३

वाच्यः पितामहो वृद्धो ये च, कृष्ण, सभासदः
'भ्रातृणाम् अस्तु सौभ्रात्रं, धार्तराष्ट्रः प्रशाम्यताम्!' १४

अहम् एतद् ब्रवीम्येवं राजा चैव प्रशंसति।
अर्जुनो नैव युद्धार्थी। भूयसी हि दयार्जुने। १५

९। निशम्य—श्रुत्वा, आलोच्य। १०। भीषयेः [भी-इ+यास्]—भाययेः। आप्र.। ११। समाचरेः—प्राग् अपि समाहितवान् असि। १२। शिशिरापाये—शीतापगमे। १५। प्रशंसति—'शमम्' इति शेषः।

वैशम्पायन उवाच,—

एतच् छ्रुत्वा, महा-बाहुः केशवः, प्रहसन्न् इव,
अभूत-पूर्वं भीमस्य मार्दवोपहितं वचः, १६

गिरेर् इव लघुत्वं तच् छीतत्वम् इव पावके
मत्वा, रामानुजः शौरिः शार्ङ्गधन्वा वृकोदरम् १७

संतेजयंस् तदा वाग्भिर्, मातरिश्वेव पावकम्,
उवाच भीमम् आसीनं कृपयाभिपरिप्लुतम्,— १८

"त्वम् अन्यदा, भीम-सेन, युद्धम् एव प्रशंससि,
वधाभिनन्दिनः क्रूरान् धार्तराष्ट्रान् मिमर्दिषुः ; १९

'हन्ताहं गदयाभ्येत्य दुर्योधनम् अ-मर्षणम्'
इति स्म मध्ये भ्रातॄणां सत्येनालभसे गदाम्। २०

तस्य ते प्रशमे बुद्धिर् ध्रियते ऽद्य, परन्तप!
कश्मलेनाभिपन्नो ऽसि, तेन ते विकृतं मनः। २१

उद्वेपते ते हृदयं मनस् ते प्रति-सीदति,
ऊरु-स्तम्भ-गृहीतो ऽसि, तस्मात् प्रशमम् इच्छसि। २२

१८। मातरिश्वा—वायुः। १९। मिमर्दिषुः [मृद्-स+उ, ३।२]—मर्दितुम् इच्छुः। २०। हन्ता [हन्+लुट्-ता]—अचिरेण हनिष्यामि। सत्येन—प्रतिज्ञां कुर्वन्। आलभसे—स्पृशसि। २२। उद्वेपते—निरतिशयं कम्पते।

इदं मे महद् आश्चर्यं पर्वतस्येव सर्पणम्,
यद् ईदृशं प्रभाषेथा भीमसेनासमं वचः। २३

स दृष्ट्वा स्वानि कर्माणि कुले जन्म च, भारत,
उत्तिष्ठस्व! विषादं मा कृथा! वीर, स्थिरो भव! २४

न चैतद् अनुरूपं ते यत् ते ग्लानिर्, अरिन्दम।
यद् ओजसा न लभते, क्षत्रियो न तद् अश्नुते।" २५

श्वो-भूते धृत-राष्ट्रस्य समीपं प्राप्य, पाण्डव,
यतिष्ये प्रशमं कर्त्तुं, युष्मदर्थम् अ-हापयन्। २६

ते चेद् अभिनिवेक्ष्यन्ते, नाभ्युपैष्यन्ति मे वचः
कुरवो, युद्धम् एवात्र घोरं कर्म भविष्यति। २७

अस्मिन् युद्धे, भीमसेन, त्वयि भारः समाहितः।
धूर् अर्जुनेन धार्या स्याद्। वोढव्य इतरो जनः। २८

अहं हि यन्ता बीभत्सोर् भविता संयुगे सति।
धनञ्जयस्यैष कामो, न हि 'युद्धं न कामये'। २९

तस्माद् आशङ्कमानो ऽहं, वृकोदर, मतिं तव,
गदतः क्लीवया वाचा, तेजस् ते समदीदिपम्। ३०

तथोक्तो वासुदेवेन नित्य-मन्युर् अमर्षणः
सदश्ववत् समाधावद्, बभाषे तदनन्तरम्,— ३१

२३। सर्पणम्—चलनम्। अ-समम्—विसदृशम्, अयोग्यम्।
३१। सदश्ववत्—[कशाघातेन] शिक्षितो ऽश्व इव। समाधावत्—केशव-वचसा समुद्दीपित-तेजा बभूव।

"न मे सीदन्ति मज्जानो, न ममोद्वेपते मनः,
सर्व-लोकाद् अभिक्रुद्धाद् न भयं विद्यते मम। ३२

किं तु सौहृदम् एवैतत्। कृपया, मधु-सूदन,
सर्वांस् तितिक्षे संक्लेशान् मास्म नो भरता नशन्।" ३३

नवमोऽध्यायः

उद्दी-पना

अर्जुन उवाच,—

पाण्डवानां कुरूणां च भवान् नः प्रथमः सुहृद्।
क्रिया कथं च मुख्या स्याद्, मृदुना चेतरेण वा। १

नकुल उवाच,—

निवृत्त-वनवासान् नः श्रुत्वा, वीरा, समागताः,
अक्ष्यौहिण्यो हि सप्तेमास्, त्वत्-प्रसादाज् जनार्दन। २

इमान् हि पुरुष-व्याघ्रान् अ-चिन्त्य-बल-पौरुषान्
आत्त-शस्त्रान् रणे दृष्ट्वा न व्यथेद् इह कः पुमान्? ३

स भवान् कुरु-मध्ये तत् सान्त्व-पूर्वं भयोत्तरम्
ब्रूयाद् वाक्यं यथा मन्दो न व्यथेत सुयोधनः। ४

३३। नः---अस्मभ्यस्।

१। कथं च—कथम् अपि। मुख्या—फलवती। मृदुना [उपायेन]—साम्ना (प्रिय-वचनेन)। इतरेण—अन्येन [उपायेन], युद्धेन।

३। आत्त-शस्त्रान्—गृहीतायुधान्। व्यथेत्—क्लिश्येत। पआ।

सहदेव उवाच,—

यदि प्रशमम् इच्छेयुः कुरवः पाण्डवैः सह,
तथापि युद्धं दाशार्ह, योजयेथाः सहैव तैः । ५

कथं नु, दृष्ट्वा पाञ्चालीं तथा, कृष्ण, सभा-गताम्,
अ-वधेन प्रशाम्येत मम मन्युः सुयोधने ? ६

यदि भीमार्जुनौ, कृष्ण, धर्म-राजश् च धार्मिकः,
धर्मम् उत्सृज्य तेनाहं योद्धुम् इच्छामि संयुगे । ७

सात्यकिर् उवाच,—

सत्यम् आह, महा-बाहो, सहदेवो महा-मतिः
वचनं । सर्व-योधानां तद् मतं, पुरुषोत्तम । ८

वैशम्पायन उवाच,—

एवं वदति वाक्यं तु युयुधाने महा-मतौ
सु-भीमः सिंह-नादो ऽभूद् योधानां तत्र सर्वशः । ९

कृष्णा दाशार्हम् आसीनम् अब्रवीच्, छोक-कर्शिता,
सं-पूज्य सहदेवं च सात्यकिं च महा-रथम्,— १०

"अ-प्रदानेन राज्यस्य यदि, कृष्ण, सुयोधनः
सन्धिम् इच्छेत्, न कर्तव्यं, तत्र गत्वा, कथञ्चन । ११

७। धार्मिकः [स्यात्]—धर्मम् रक्षितुं न युध्येत ।

शक्ष्यन्ति हि, महा-बाहो, पाण्डवाः सृञ्जयैः सह
धार्तराष्ट्र-बलं घोरं क्रुद्धं प्रतिसमासितुम् । १२

न हि साम्ना न दानेन शक्यो ऽर्थस् तेषु कश्चन ।
तस्मात् तेषु न कर्तव्या कृपा ते, मधुसूदन । १३

साम्ना दानेन वा, कृष्ण, ये न शाम्यन्ति शत्रवः
योक्तव्यस् तेषु दण्डः स्याज् जीवितं परिरक्षता । १४

तस्मात् तेषु महा-दण्डः क्षेप्तव्यः क्षिप्रम्, अच्युत,
त्वया चैव, महा-बाहो, पाण्डवैः सहसृञ्जयैः । १५

क्षत्रियेण हि हन्तव्यः क्षत्रियो, लोभम् आस्थितः,
अ-क्षत्रियो वा दाशार्ह, स्व-धर्मम् अनुतिष्ठता । १६

का तु सीमन्तिनी मादृक् पृथिव्याम् अस्ति, केशव ?
सुता द्रुपद-राजस्य वेदी-मध्याद् उपस्थिता, १७

धृष्टद्युम्नस्य भगिनी तव, कृष्ण, प्रिया सखी,
आजमीढ़-कुलं प्राप्ता, स्नुषा पाण्डोर् महात्मनः, १८

महिषी पाण्डु-पुत्राणां पञ्चेन्द्र-सम-वर्चसाम् !
सुता मे पञ्चभिर् वीरैः पञ्च जाता महा-रथाः । १९

---

१२ । प्रतिसमासितुम् [प्रति-सम्-आस् + तुम्]—प्रति-विपक्षतया अभिगन्तुम् । १३ । अर्थः कश्चन—[शमोपाय-भूतं] किम् अपि । शक्यः—कर्तुम् इति शेषः । १७ । वेदी-मध्याद् उपस्थिता—यज्ञकाले इति शेषः । अतएव अयोनि-सम्भवा ।

साहं केश-ग्रहं प्राप्ता परिक्लिष्टा सभां गता
पश्यतां पाण्डु-पुत्राणां त्वयि जीवति, केशव ! २०

जीवत्सु पाण्डु-पुत्रेषु पञ्चालेष्वथ वृष्णिषु
दासी -भूतास्मि पापानां सभा-मध्ये व्यवस्थिता !" २१

इत्युक्त्वा, मृदु-संहारं वृजिनाग्रं सुदर्शनम्
केश-पक्षं वरारोहा गृह्य वामेन पाणिना, २२

पद्माक्षी पुण्डरीकाक्षम् उपेत्य, गज-गामिनी,
अश्रु-पूर्णेक्षणा कृष्णा कृष्णं रचनम् अब्रवीत् ,- २३

"अयं ते, पुण्डरीकाक्ष, दुःशासन-करोद्धृतः
स्मर्तव्यः सर्व-कार्येषु परेषां सन्धिम् इच्छता २४

यदि भीमार्जुनौ, कृष्ण, कृपणौ सन्धि-कामुकौ,
पिता मे योत्स्यते वृद्धः सह पुत्रैर् महा-रथैः । २५

पञ्च चैव महावीर्याः पुत्रा मे मधु-सूदन,
अभिमन्युं पुरस्कृत्य योत्स्यन्ते कुरुभिः सह । २६

दुःशासन-भुजं श्यामं संछिन्नं पांशु-गुण्ठितम्
यद्यहं तु न पश्यामि, का शान्तिर् हृदयस्य मे ? २७

विदीर्यते मे हृदयं भीम-वाक्-शल्य-पीड़ितम्
यो ऽयम् अद्य महा-बाहुर् धर्मम् एवानुपश्यति !" २८

---

२२ । मृदु-संहारम् [मृदुः (कोमलः) संहारः (संग्रहः) यस्य तम्]—वेणी-रूपेण समाहृतम् अपि कोमलम् । वृजिनाग्रम्—कुटिलाग्रम् ।

इत्युक्त्वा वाष्प-रुद्धेन कण्ठेनायत-लोचना
रुरोद कृष्णा सोत्कम्पं सु-स्वरं वाष्प-गद्गदम् । २९

ताम् उवाच महा-बाहुः केशवः, परिसान्त्वयन्, —
"अचिराद् द्रक्ष्यसे, कृष्णे, रुदतीर् भरत-स्त्रियः । ३०

धार्तराष्ट्राः काल-पक्वा न चेच् छृण्वन्ति मे वचः,
शेष्यन्ते निहता भूमौ श्व-शृगालादनी-कृताः । ३१

सत्यं ते प्रति-जानामि कृष्णे वाष्पो निगृह्यताम् !
हतामित्रान् श्रिया युक्तान् अचिराद् द्रक्ष्यसे पतीन् ।" ३२

दशमो ऽध्यायः

कृष्ण-यात्रा

मैत्रे मुहूर्ते संप्राप्ते मृद्वर्चिषि दिवाकरे,
कौमुदे मासि, रेवत्यां, शरदन्ते हिमागमे, १

मङ्गल्याः पुण्य-निर्घोषा वाचः शृण्वंश् च सूनृताः
ब्राह्मणानां प्रतीतानाम्, ऋषीणाम् इव वासवः, २

---

३० । द्रक्ष्यसे—द्रक्ष्यसि । आ आ । ३१ । अदनम्—भक्षणम्, भक्ष्य-द्रव्यम् । ३२ । प्रतिजानामि [प्रति-ज्ञा+मि]—प्रतिज्ञां करोमि ।

१ । मैत्रे मुहूर्ते—मित्र-दैवत्ये मुहूर्ते, उदय-मुहूर्तात् तृतीये इत्यर्थः (मल्लिनाथः) । मृद्वर्चिषि—मृदु-किरणे । कौमुदे—कार्तिके । २ । मङ्गल्याः—मङ्गलावहाः । सूनृताः—सत्याः प्रियाश् च । प्रतीतानाम्—

कृत्वा पौर्वाह्णिकं कृत्यं, स्नातः शुचिर् अलङ्कृतः
उपतस्थे विवस्वन्तं पावकं च जनार्दनः । ३

ऋषभं पृष्ठ आलभ्य, ब्राह्मणान् अभिवाद्य च
अग्निं प्रदक्षिणं कृत्वा पश्यन् कल्याणम् अग्रतः ४

आरुरोह रथं शौरिर्, विमानम् इव कामगम् ।
ततः सात्यकिम् आरोप्य प्रययौ पुरुषोत्तमः । ५

तं, प्रयान्तम् अनु-प्रायात् कुन्ती-पुत्रो युधिष्ठिरः,
संपरिष्वज्य कौन्तेयः संदेष्टुम् उपचक्रमे,— ६

"या सा बाल्यात् प्रभृत्यस्मान् पर्यवर्धयताबला,
सुयोधन-भयाद् या नो ऽत्रायतामित्र-कर्शन, ७

अस्मत्-कृते च सततं यया दुःखानि, माधव,
अनुभूतान्यदुःखार्हा तां स्म पृच्छेर् अनामयम् । ८

भृशम् आश्वासयेश् चैनां, पुत्र-शोक-परिप्लुताम्
अभिवाद्य स्वजेथास् त्वं, पाण्डवान् परिकीर्तयन् । ९

अपि जातु स कालः स्यात्, कृष्ण, दुःख-विपर्ययः
यद् अहं मातरं क्लिष्टां सुखं दद्याम्, अरिन्दम !" १०

इत्युक्त्वा केशवं तत्र राज-मध्ये, युधिष्ठिरः
अनुज्ञातो निववृते कृष्णं कृत्वा प्रदक्षिणम् । ११

हृष्टानाम् । ४ । आलभ्य—स्पृष्ट्वा ।

प्रयान्तं देवकी-पुत्रं पर-वीर-रुजो दश
महा-रथा, महा-बाहुम्, अन्वयुः, शस्त्र-पाणयः । १२

पदातीनां सहस्रं च सादिनां च, परन्तप,
भोज्यं च विपुलं राजन्, प्रेष्याश् च शतशो ऽपरे । १३

एकादशो ऽध्यायः

आश्वासनम्

धार्तराष्ट्रास् तम् आयान्तं प्रत्युद्-जग्मुः, स्वलङ्कृताः,
दुर्योधनाद् ऋते, सर्वे, भीष्म-द्रोण-कृपादयः ; १

पौराश् च बहुला, राजन्, हृषीकेशं दिदृक्षवः—
यानैर् बहु-विधैर् अन्ये पद्भिर् एव तथा परे । २

स वै पथि समागम्य भीष्मेणाक्लिष्ट-कर्मणा
द्रोणेन धार्तराष्ट्रैश् च, तैर् वृतो नगरं ययौ ३

कृष्ण-सम्माननार्थं च नगरं समलङ्कृतम् ।
न च कश्चिद् गृहे, राजंस्, तदासीद् भरतर्षभ । ४

तथा च गतिमन्तस् ते वासुदेवस्य वाजिनः
प्रनष्ट-गतयो ऽभूवन् राज-मार्गे जनैर् वृते । ५

---

१२ । पर-वीर-रुजः—पर-वीरान् (शत्रु-पक्षीयशूरान्) रुजन्ति [भञ्जन्ति, घ्नन्ति ये तादृशः,—रुज्+०+१।३]—शत्रु-पक्षीय-वीर-गण-हन्तारः । १३ । सादिनाम्--अश्वारोहिणाम् ।

स गृहं धृत-राष्ट्रस्य प्राविशच् छत्रु-कर्शन,
पाण्डुरं, पुण्डरीकाक्षः, प्रासादैर् उपशोभितम्। ६

तिस्रः कक्ष्या व्यतिक्रम्य, केशवो राज-वेश्मनः,
वैचित्रवीर्यं राजानम् अभ्यगच्छद्, अरिन्दमः। ७

राजानं समनुज्ञाप्य निरक्रामद् अरिन्दमः।
विदुरावसथं रम्यम् उपातिष्ठत माधवः। ८

कृतातिथ्यं तु गोविन्दं विदुरः सर्व-धर्म-वित्
कुशलं पाण्डु-पुत्राणां अपृच्छद् मधु-सूदनम्। ९

तस्य सर्वं स-विस्तारं पाण्डवानां विचेष्टितम्
क्षत्तुर् आचष्ट दाशार्हः, सर्वं प्रत्यक्ष-दर्शिवान्। १०

अथोपगम्य विदुरम्, अपराह्णे जनार्दनः
पितृष्वसारं स पृथाम् अभ्यगच्छद्, अरिन्दमः। ११

सा, दृष्ट्वा कृष्णम् आयान्तम् प्रसन्नादित्य-वर्चसम्,
कण्ठे गृहीत्वा प्राक्रोशत्, स्मरन्ती तनयान्, पृथा। १२

तेषां सत्त्ववतां मध्ये गोविन्दं सह-चारिणम्
चिरस्य दृष्ट्वा वार्ष्णेयं वाष्पम् आहारयत् पृथा। १३

साब्रवीत् कृष्णम् आसीनं कृतातिथ्यं युधां पतिम्
वाष्प-गद्गद-पूर्णेन मुखेन परिशुष्यता,— १४

६। कक्ष्याः—कक्षाः (पू. पृ. २०१)।

"त्यक्त्वा प्रिय-सुखे, पार्था, रुदतीम् अपहाय माम्,
अहाषुंश् च, वनं यान्तः, स-मूलं हृदयं मम। १५

अतदर्हा महात्मानः कथं, केशव, पाण्डवाः
ऊषुर् महा-वने, तात, सिंह-व्याघ्र-समाकुले ? १६

न मां, माधव, वैधव्यं नार्थ-नाशो न वैरता
तथा, शोकाय दहति यथा पुत्रैर् विना भवः। १७

जीव-नाशं प्रनष्टानां श्राद्धं कुर्वन्ति मानवाः।
अर्थतस् ते मम मृतास् तेषां चाहं, जनार्दन !
पराश्रया, वासुदेव, या जीवति धिग् अस्तु ताम् ! १८

न दुःखं राज्य-हरणं न च द्यूते पराजयः ;
प्रव्राजनं तु पुत्राणां, न मे तद् दुःख-कारणम्। १९

यत् तु सा वृहती श्यामा, एक-वस्त्रा सभां गता,
अश्रृणोत् परुषा वाचः, किं नु दुःखतरं ततः ? २०

यस्या मम स-पुत्रायास् त्वं नाथो, मधुसूदन,
रामश् च बलिनां श्रेष्ठः प्रद्युम्नश् च महा-रथः, २१

साहम् एवं-विधं दुःखं सहेयं, पुरुषोत्तम
भीमे जीवति दुर्धर्षे विजये चापलायिनि ?" २२

१५। प्रिय-सुखे—राज्यादि-प्रिय-वस्तु भोगोत्थम् आनन्दं च।

तत आश्वासयामास पुत्राधिभिर् अभिप्लुताम्
पितृ-ष्वसारं शोचन्तीं शौरिः पार्थ-सखः पृथाम्,— २३

"का नु स्त्रीमन्तिनी त्वादृग् लोकेष्वस्ति, पितृ-ष्वसः ?
शूरस्य राज्ञो दुहिता, आजमीढ़-कुलं गता, २४

महा-कुलीना भवती ह्रदाद् ह्रदम् इवागता,
ईश्वरी सर्व-कल्याणी, भर्त्रा परम-पूजिता। २५

वीर-सूर् वीर-पत्नी त्वं, सर्वैः समुदिता गुणैः।
सुख-दुःखे, महा-प्राज्ञे, त्वादृशी सोढुम् अर्हति। २६

निद्रा-तन्द्रे क्रोध-हर्षौ क्षुत्-पिपासे हिमातपौ,
एतानि पार्था निर्जित्य नित्यं वीर-सुखं रताः। २७

त्यक्त-ग्राम्य-सुखाः पार्था नित्यं वीर-सुख-प्रियाः।
न तु स्वल्पेन तुष्येयुर् महोत्साहा महा-बलाः। २८

अभिवादयन्ति भवतीं पाण्डवाः सह कृष्णया।
आत्मानं च कुशलिनं निवेद्याहुर् अनामयम्। २९

अ-रोगान् सर्व-सिद्धार्थान् क्षिप्रं द्रक्ष्यसि पाण्डवान्
ईश्वरान् सर्व-लोकस्य, हतामित्रान् श्रिया वृतान्"। ३०

एवम् आश्वासिता, कुन्ती, प्रत्युवाच जनार्दनम्,
पुत्राधिभिर् अभिध्वस्ता निगृह्य बुद्धि-जं तमः,—
"यद् यत् तेषां, महा-बाहो, पथ्यं स्याद्, मधु-सूदन ३१

२८। ग्राम्य-सुखानि—इतर-जनोचित-सुखानि।

यथा यथा त्वं मन्येथाः—कुर्याः, कृष्ण, तथा तथा,
अ-विलोपेन धर्मस्य, अनिकृत्या, परन्तप।" ३२

द्वादशो ऽध्यायः

प्रेमानम्

पृथाम् आमन्त्र्य गोविन्दः कृत्वा चाभिप्रदक्षिणम्।
दुर्योधन-गृहं शौरिर् अभ्यगच्छद्, अरिन्दमः। १

तत्र राज-सहस्रैश् च कुरुभिश् चाभिसंवृतम्
धार्तराष्ट्रं महाबाहुं ददर्शासीनम् आसने २

अभ्यागच्छति दाशार्हे धार्तराष्ट्रो महायशाः
उदतिष्ठत् सहामात्यः, पूजयन् मधु-सूदनम्। ३

समेत्य धार्तराष्ट्रेण सहामात्येन केशवः,
राजभिस् तत्र वार्ष्णेयः समागच्छद् यथा-वयः। ४

तत्र जाम्बूनदमयं पर्यङ्कं सु-परिष्कृतम्
विविधास्तरणास्तीर्णम् अभ्युपाविशद् अच्युतः। ५

३२। आधिभिः—मानस-व्यथाभिः। बुद्धिजम्—[अ-संस्कृत-] बुद्धि-सम्भूतम्। तमः—मिथ्या-ज्ञानम्। अ-निकृत्या—अच्छलेन।

तस्मिन् गां मधुपर्कं चाप्युदकं च जनार्दने
निवेदयामास तदा गृहान् राज्यं च कौरवः । ६

तत्र गोविन्दम् आसीनं प्रसन्नादित्यवर्चसम्
उपासाञ्चक्रिरे सर्वे कुरवो राजभिः सह । ७

ततो दुर्योधनो राजा वार्ष्णेयं जयतां वरम्
न्यमन्त्रयद् भोजनेन । नाभ्यनन्दच् च केशवः । ८

ततो दुर्योधनः कृष्णम् अब्रवीत् कुरु-संसदि,—
"कस्माद् अन्नानि पानानि वासांसि शयनानि च
त्वदर्थम् उपनीतानि नाग्रहीस् त्वं जनार्दन ?" ९

स एवम् उक्तो गोविन्दः प्रत्युवाच, महा-मनाः,—
"कृतार्था भुञ्जते दूताः पूजां गृह्णन्ति चैव ह ।
कृतार्थं मां सहामात्यं समर्चिष्यसि, भारत । १०

सम्प्रीति-भोज्यान्यन्नानि आपद्-भोज्यानि वा पुनः ।
न च सम्प्रीयसे, राजन् , न च वापद् गता वयम्" ११

अकस्माद् द्वेक्षि वै, राजन् , जन्म-प्रभृति पाण्डवान्
ऐकात्म्यं मां गतं विद्धि पाण्डवैर् धर्म-चारिभिः ।" १२

निर्याय च, महा-बाहुर् वासुदेवो महा-मनाः
निवेशाय ययौ वेश्म विदुरस्य महात्मनः । १३

---

१२ । अकस्मात्—अतर्कितम्, हठात् ।

तम् अभ्यगच्छद् द्रोणश् च कृपो भीष्मो ऽथ बाह्लिकः
कुरवश् च, महा-बाहुं, विदुरस्य गृहे स्थितम्। १४

त ऊचुर् माधवं वीरं कुरवो मधु-सूदनम्,—
"निवेदयामो, वार्ष्णेय, स-रत्नांस् ते गृहान् वयम्।" १५

तान् उवाच महा-तेजाः कौरवान् मधु-सूदनः,—
"सर्वे भवन्तो गच्छन्तु। सर्वा मे ऽपचितिः कृता"। १६

यातेषु कुरुषु, क्षत्ता दाशार्हम् अ-पराजितम्
अभ्यर्चयामास तदा सर्व-कामैः, प्रयत्नवान्। १७

ततः क्षत्तान्न-पानानि शुचीनि गुणवन्ति च।
उपाहरद् अनेकानि केशवाय महात्मने। १८

तैस् तर्पयित्वा प्रथमं ब्राह्मणान्, मधु-सूदनः
वेद-विद्भ्यो ददौ कृष्ण प्रथमं द्रविणान्यपि। १९

ततो ऽनुयायिभिः सार्धं, मरुद्भिर् इव वासवः,
विदुरान्नानि बुभुजे, शुचीनि गुणवन्ति च। २०

शयने-सुख-संस्पर्शे शिश्ये यदु-सुखावहः।
शिवा नक्षत्र-सम्पन्ना सा व्यतीयाय शर्वरी २१

१६। अपचितिः—पूजा १९। द्रविणानि—वित्तानि। २०। अनुयायिभिः—पश्चाद्-गामिभिः। मरुद्भिः—इन्द्रानुग-देव-विशेषैः। २१। शिवा—शरदन्ते वृष्टि-राहित्येन परिव्राजकेभ्यः कल्याणमयी। नक्षत्र-सम्पन्ना—[आकाशस्य निर्मेघत्वात] सुस्पष्ट-तारका।

त्रयोदशो ऽध्यायः

मध्य-स्थः

अथ दुर्योधनः कृष्णं शकुनिश् चापि सौबलः
सन्ध्यां तिष्ठन्तम् अभ्येत्य दाशार्हम् अ-पराजितम् १

आचक्षेतां तु कृष्णस्य धृतराष्ट्रं सभागतम्
कुरूंश् च भीष्म-प्रमुखान् राज्ञः सर्वांश् च पार्थिवान्। २

ततः सभां समासाद्य केशवस्यानुयायिनः
स-शङ्खैर् वेणु-निर्घोषैर् दिशः सर्वा व्यनादयन्। ३

ततः सा समितिः सर्वा राज्ञाम् अ-मित-तेजसाम्
सम्प्राकम्पत हर्षेण कृष्णागमनकाङ्क्षया। ४

अवतीर्य रथाच् छौरिः कैलास-शिखरोपमात्
महेन्द्र-भवन-प्रख्यां प्रविवेश सभां ततः। ५

उत्तिष्ठति महा-राजे, धृतराष्ट्रे जनेश्वरे
तानि राज-सहस्राणि समुत्तस्थुः समन्ततः। ६

१। सन्ध्यां तिष्ठन्तम्—सन्ध्याम् उपतिष्ठमानम्, सन्ध्याम् उपासीनम्।
३। वेणुः—वंशी।

तत्र केशवम् आनर्चुः सम्यग्, अभ्यागतं सभाम्,
राजानः पार्थिवाः सर्वे कुरवश् च, जनार्दनम्। ७

ततस् तुष्णीं सर्वम् आसीद् गोविन्द-गत-मानसम्।
न तत्र कश्चित् किञ्चिद् वा व्याजहार पुमान् क्वचित्। ८

तेष्वासीनेषु सर्वेषु तूष्णीम्भूतेषु राजसु,
धृतराष्ट्रम् अभिप्रेक्ष्य समभाषत माधव,— ९

"कुरूणां पाण्डवानां च शमः स्याद् इति, भारत,
अ-प्रणाशेन वीराणाम्, एतद् याचितुम् आगतः। १०

इदं ह्यद्य कुलं श्रेष्ठं सर्व-राजसु, पार्थिव,
श्रुत-वृत्तोपसम्पन्नं सर्वैः समुदितं गुणैः। ११

कृपानुकम्पा-कारुण्यम् आनृशंस्यं च, भारत,
तथार्जवं क्षमा सत्यं, कुरुष्वेतद् विशिष्यते। १२

७। आनर्चुः —पूजयामासुः, सम्मानयामासुः। राजानः—[लोक-रञ्जन-परायणाः।] पार्थिवाः—पृथिवी-पतयः, भू-पतयः। ८। व्याजहार [वि-आ-हृ+अ]—उवाच। १०। आगतः—उपस्थितः अस्मि। ११। समुदितम्—सम्यक् कथितम् प्रख्यापितम्। १२। कृपा—परस्य सुखाय यत्नः। अनुकम्पा—पर-दुःख-दर्शने दुःखानुभवः। कारुण्यम्—पर-दुःखापसारणः प्रवृत्तिः। आनृशंस्यम्—परदुःखाप्रदानम्।

तस्मिन्न एवं-विधे, राजन्, कुले महति तिष्ठति,
त्वद्-निमित्तं विशेषेण नेह युक्तम् अ-साम्प्रतम्। १३

त्वं हि धारयिता श्रेष्ठः कुरूणां, कुरु-सत्तम,
मिथ्या प्रचरतां, तात, बाह्येष्वाभ्यन्तरेषु च। १४

ते पुत्रास् तव कौरव्य, दुर्योधन-पुरोगमाः
धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत्, १५

अ-शिष्टा गत-मर्यादा, लोभेन हृत-चेतसः,
स्वेषु बन्धुषु मुख्येषु। तद् वेत्थ, पुरुषर्षभ। १६

सेयम् आपद् महा-घोरा, कुरुष्वेव समुत्थिता,
उपेक्ष्यमाणा, कौरव्य, पृथिवीं घातयिष्यति। १७

शक्या चेयं शमयितुं त्वं चेद् इच्छसि भारत।
पुत्रान् स्थापय, कौरव्य? स्थापयिष्याम्यहं परान्। १८

आज्ञा तव हि, राजेन्द्र, कार्या पुत्रैः सहान्वयैः।
हितं बलवद् अप्येषां तिष्ठतां तव शासने। १९

१३। युक्तम्—कर्तुम् उचितम्। अ-साम्प्रतम्—असङ्गतम्, [कृपादिभ्यो] विपरीतः पर-दुःख-दर्शने आह्लादः पर-सुख-नाशाय यत्नः पर-दुःखाय कौटिल्याद्याश्रयणं च। १४। धारयिता—धारकः। बाह्येषु—[द्यूतादिषु] प्रकाशेषु। आभ्यन्तरेषु—[जतुगृह-दाहादिषु] गुप्तेषु [व्यापारेषु]। १७। कुरुष्वेव—केवलं दुर्योधनादिषु न तु पाण्डवेष्वपि न्यायपक्षावलम्बित्वात्। १८। स्थापय—शमय, युद्धोद्यमात् नि-वर्तय। १९। सहान्वयैः—स-सन्तानैः, स-वंश्यैः।

तव चैव हितं, राजन्, पाण्डवानाम् अथोहितम्,
शमे प्रयतमानस्य तव शासन-काङ्क्षिणः । २०

सहाय-भूता भरतास् तवैव स्युर्, जनेश्वर ।
धर्मार्थयोस् तिष्ठ, राजन्, पाण्डवैर् अभिरक्षितः २१

न हि त्वां पाण्डवैर्, जेतुं, रक्ष्यमाणं महात्मभिः,
इन्द्रो ऽपि, देवैः सहितः, प्रसहेत । कुतो नृपाः ? २२

लोकस्येश्वरतां भूयः शत्रुभिश् चाप्यधृष्यताम्
प्राप्स्यसि त्वम्, अ-मित्र-घ्न, सहितः कुरु-पाण्डवैः । २३

तस्य ते पृथिवी-पालास् त्वत्-समाः, पृथिवी-पते,
श्रेयांसश् चैव राजानः संधास्यन्ते, परन्तप । २४

स त्वं, पुत्रैश् च पौत्रैश् च पितृभिर् भ्रातृभिस् तथा
सुहृद्भिः सर्वतो गुप्तः, सुखं शक्ष्यसि जीवितुम् । २५

एतैर् हि सहितः सर्वैः पाण्डवैः स्वैश् च, भारत,
अन्यान् विजेष्यसे शत्रून् । एष स्वार्थस् तवाखिलः । २६

तैर् एवोपार्जितां भूमिं भोक्ष्यसे च, परन्तप,
यदि सम्पत्स्यसे पुत्रैः सहामात्यैर्, नराधिप । २७

बलवद् अपि—अत्यन्तम् एव । २० । शासन-काङ्क्षिणः—[पुत्रान्] शासितुम् इच्छतः २४ । तस्य ते—उक्त-रूपेण (तादृग्-भूतेन, युगपत् कुरु-पाण्डवैर् मिलितेन) त्वया [सह] । सन्धास्यन्ते—सन्धिं करिष्यन्ति । २६ । अखिलः—सर्वः ।

संयुगे वै, महा-राज दृश्यते सु-महान् क्षयः ।
क्षये चोभयतो, राजन् , कं धर्मम् अनुपश्यसि ? २८

पाण्डवैर् निहतैः सङ्ख्ये पुत्रैर् वापि महा-बलैः
यद् विन्देथाः सुखं, राजंस्, तद् ब्रूहि, भरतर्षभ । २९

शूराश् चापि कृतास्त्राश् च सर्वे युद्धाभिकाङ्क्षिणः
पाण्डवास् तावकाश् चैव । तान् रक्ष महतो भयात् । ३०

न पश्येम कुरून् सर्वान् पाण्डवांश् चैव संयुगे
क्षीणान् उभयतः शूरान् , रथिनो रथिभिर् हतान् । ३१

समवेताः पृथिव्यां हि राजानो, राज-सत्तम ,
अमर्ष-वशम् आपन्ना नाशयेयुर् इमाः प्रजाः । ३२

त्राहि, राजन्न् , इमं लोकं, न नश्येयुर् इमाः प्रजाः ।
त्वयि प्रकृतिम् आपन्ने शेषः स्यात् कुरु-नन्दन । ३३

शुक्ला वदान्या ह्रीमन्त आर्या पुण्याभिजातयः
अन्योन्य-सचिवा, राजंस् । तान् पाहि महतो भयात् ३४

शिवेनेमे भूमि-पालाः समागम्य परस्परम् ,
सह भुक्त्वा च पीत्वा च प्रतियान्तु यथा-गृहम् , ३५

सु-वाससः स्रग्विणश् च सत्कृता, भरतर्षभ
अ-मर्षं च निराकृत्य वैराणि च, परन्तप । ३६

३३·। प्रकृतिम्—[चेतसि सत्त्व-रजस्-तमसां] साम्यावस्थाम् ,

हार्दं यत् पाण्डवेष्वासीत् , प्राप्ते ऽस्मिन् आयुषः क्षये
तद् एव ते भवत्वद्य। सन्धत्स्व, भरतर्षभ। ३७

बाला, विहीना पित्रा, ते त्वयैव परिवर्धिताः।
तान् पालय यथा-न्यायं पुत्रांश् च, मनुजेश्वर। ३८

भवतैव हि रक्ष्यास् ते, व्यसनेषु विशेषतः।
मा ते धर्मस् तथैवार्थो नश्येत, भरतर्षभ। ३९

आहुस् त्वां पाण्डवा, राजन्, अभिवाद्य प्रसाद्य च, —
'भवतः शासनाद् दुःखम् अनुभूतं सहानुगैः ४०

द्वादशेमानि वर्षाणि वने निर्व्युषितानि नः,
त्रयोदशं तथाज्ञातैः स-जने परि-वत्सरम्। ४१

स्थाता नः समये तस्मिन् पितेति कृत-निश्चयाः
नाहास्म समयं, तात। तच् च नो ब्राह्मणा विदुः। ४२

तस्मिन् नः समये तिष्ठ स्थितानां भरतर्षभ।
नित्यं संक्लेशिता, राजन्, स्व-राज्यांशं लभेमहि। ४३

पित्रा स्थापयितव्या हि वयम् , उत्पथम् आस्थिताः।
संस्थापय पथिष्वस्मांस् , तिष्ठ धर्मे स्व-वर्त्मनि।' ४४

स्थित-प्रज्ञात्वम्। ३७। हार्दम्—प्रीतिः। आसीत्—प्रथम-बाल्ये आसीत्। ४२। स्थाता – स्थास्यति। अहास्म [हा + लुङ् म]— अत्याक्ष्म।

आहुश् चेमां परिषदं पुत्रास् ते, भरतर्षभ,—
'धर्म-ज्ञेषु सभा-सत्सु नेह युक्तम् अ-साम्प्रतम् । ४५

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च
हन्यते प्रेक्षमाणानां, हतास् तत्र सभा-सदः ।' ४६

ये, धर्मम् अनुपश्यन्तस्, तूष्णीं ध्यायन्त आसते,
ते सत्यम् आहुर् धर्म्यं च न्याय्यं च, भरतर्षभ । ४७

शक्यं किम् अन्यद् वक्तुं ते दानाद् अन्यज् जनेश्वर ?
ब्रुवन्तु वा मही-पालाः सभायां ये समासते । ४८

धर्मार्थौ सम्प्रधार्यैव—यदि सत्यं ब्रवीम्यहं—
प्रमुञ्चेमान् मृत्यु-पाशात् क्षत्रियान्, पुरुषर्षभ । ४९

पित्र्यं तेभ्यः प्रदायांशं पाण्डवेभ्यो यथोचितम्,
ततः स-पुत्रः सिद्धार्थो भुंक्ष्व भोगान्, परन्तप । ५०

अ-जात-शत्रुं जानीषे स्थितं धर्मे सतां सदा,
स-पुत्रे त्वयि वृत्तिं च वर्तते यां, नराधिप । ५१

दाहितश् च निरस्तश् च त्वाम् एवोपाश्रितः पुनः ।
इन्द्रप्रस्थं त्वयैवासौ स-पुत्रेण विवासितः । ५२

---

४५ । परिषदम्—धर्म-ज्ञ-सभाम् । पुत्रास् ते—तव पुत्र-कल्पाः [पाण्डवाः] । ४७ । ये—ये [पाण्डवाः] । तूष्णीम् आसते —['निर्वासनान्त एव स्व-राज्यं लभेमहि' इति मनसि-कृत्य ततः प्राक्] निर्वाचो वर्तन्ते । ५२ । दाहितः—[जतु-गृहे] भस्मीकारितः । निरस्तः—[द्यूतेन राज्याद्] दूरीकृतः ।

स तत्र निवसन् सर्वान् वशम् आनीय पार्थिवान्
त्वद्-मुखान् अकरोद्, राजन्, न च त्वाम् अत्यवर्तत। ५३

तस्यैवं वर्तमानस्य सौबलेन, जिहीर्षता
राष्ट्राणि धन-धान्यं च, प्रयुक्तः परमोपधिः। ५४

स, ताम् अवस्थां संप्राप्य कृष्णां प्रेक्ष्य सभां गताम्,
क्षत्र-धर्माद् अमेयात्मा नाकम्पत् युधिष्ठिरः। ५५

अहं तु तव तेषां च श्रेय इच्छामि, भारत।
लोभे ऽति-प्रसृतान् पुत्रान् निगृह्णीष्व, विशाम् पते। ५६

स्थिताः शुश्रूषितुं पार्थाः, स्थिता योद्धुम् अरिन्दमाः।
यत् ते पथ्यतमं, राजंस्, तस्मिंस् तिष्ठ, परन्तप।" ५७

चतुर्दशो ऽध्यायः

उपदेशः

धृतराष्ट्र उवाच,—

स्वर्ग्यं लोक्यं च माम् आत्थ धर्म्यं न्याय्यं च, केशव।
न त्वहं स्व-वशस्, तात, क्रियमाणं न मे प्रियम्। १

५४। जिहीर्षता—हर्तुम् इच्छता। परमोपधिः—महत् छद्म।
५७। शुश्रूषितुम्—[त्वां] सेवितुम्।

१। स्वर्ग्यम्—स्वर्ग-प्राप्ति-हेतुकम्। लोक्यम्—लोकाय हितम्। धर्म्यम्—धर्माद् अनपेतम्। न्याय्यम्—न्यायाद् अनपेतम्, न्याय-सङ्गतम्। क्रियमाणम् [भवति]—क्रियते।

अङ्ग दुर्योधनं, कृष्ण, मन्दं शास्त्रातिगं मम
अनुनेतुं, महा-बाहो, यतस्व, पुरुषोत्तम । २

न शृणोति, महा-बाहो, वचनं साधु भाषितम्
गान्धार्याश् च, हृषीकेश विदुरस्य च धीमतः,
अन्येषां चैव सुहृदां भीष्मादीनां हितैषिणाम् । ३

अनुशाधि दुरात्मानं स्वयं दुर्योधनं नृपम् !
सुहृत्-कार्यं च सु-महत् कृतं ते स्याज् जनार्दन । ४

वैशम्पायन उवाच,—

ततो ऽभ्यावृत्य वार्ष्णेयो दुर्योधनम् अ-मर्षणम्
अब्रवीद् मधुरां वाचं, सर्व-धर्मार्थ-तत्त्ववित् ,— ५

"दुर्योधन, निबोधेदं मद्-वाक्यं, कुरु-सत्तम ।
महा-प्राज्ञ-कुले जातः साध्वेतत् कर्तुम् अर्हसि । ६

प्राज्ञैः शूरैर् महोत्साहैर् आत्मवद्भिर् बहु-श्रुतैः
सन्धत्स्व पुरुष-व्याघ्रैः पाण्डवैर्, भरतर्षभ । ७

तद् धितं च प्रियं चैव धृतराष्ट्रस्य धीमतः ।
तिष्ठ, तात, पितुः शास्त्रे मातुश्च, भरतर्षभ । ८

रोचते ते पितुस्, तात, पाण्डवैः सह सङ्गमः,
सामात्यस्य, कुरु-श्रेष्ठ । तत् तुभ्यं, तात, रोचताम् । ९

---

२ । अङ्ग—हे । शास्त्रातिगं—शासनम् अतिवर्तिनम् । ५ । अभ्यावृत्य दुर्योधनम्—दुर्योधनम् अभि (प्रति) मुखम् आवर्त्य । उपसर्गेण सकर्मकत्वम् । ७ । आत्मवद्भिः—सत्त्ववद्भिः, मनस्विभिः । बहु-श्रुतैः—अनेक-शास्त्र-ज्ञैः । ८ । पितुः शास्त्रे—पितुः शासने ।

श्रुत्वा यः सुहृदां शास्त्रं मर्त्यो न प्रतिपद्यते,
विपाकान्ते दहत्येनं किं-पाकम् इव भक्षितम् । १०

यस् तु निःश्रेयसं वाक्यं मोहाद् न प्रतिपद्यते,
स दीर्घ-सूत्रो हीनार्थः पश्चात्-तापेन युज्यते । ११

यस् तु निःश्रेयसं श्रुत्वा प्राक् तद् एवाभिपद्यते,
आत्मनो मतम् उत्सृज्य, स लोके सुखम् एधते । १२

को हि, शक्र-समान् ज्ञातीन् अतिक्रम्य महा-रथान्,
अन्येभ्यस् त्राणम् आशंसेत्, त्वद् अन्यो भुवि मानवः ? १३

मिथ्योपचरितास्, तात, जन्म-प्रभृति, बान्धवाः
त्वयि सम्यग्, महाबाहो, प्रतिपन्ना, यशस्विनः । १४

त्वयापि प्रतिपत्तव्यं तथैव, भरतर्षभ,
स्वेषु बन्धुषु मुख्येषु । मा मन्यु-वशम् अन्वगाः ! १५

श्रेयस् ते दुर्जनात्, तात, पाण्डवैः सह सङ्गतम् :
तैर् हि सं-प्रीयमाणस् त्वं सर्वान् कामान् अवाप्स्यसि । १६

---

१० । प्रतिपद्यते—गृह्णाति । विपाकः—परिणामः । किम्पाकम्—महा-काल-फलम् । ११ । निःश्रेयसम्—कल्याणम् । दीर्घ-सूत्रः—चिर-क्रियः, बहु-कालेन कार्यारम्भी । १२ । एधते—वर्धते । १३ । आशंसेत्—आशंसेत, प्रार्थयेत । प आ. । १४ । मिथ्योपचरिताः—वाचा सेविताः कर्मणा तु हिंसिताः प्रतारिताः । प्रतिपन्नाः—अधिगताः । १६ । संप्रीयमाणः—सम्प्रीतिम् आपद्यमानः, संप्रीत-मानसः, संतुष्यन्, सन्तुष्ट-चित्तः ।

पाण्डवैर् निर्मितां भूमिं भुञ्जानो, राज-सत्तम,
पाण्डवान् पृष्ठतः कृत्वा त्राणम् आशंससे ऽन्यतः। १७

न हीमे सर्व-राजानः पर्याप्ताः सहितास् त्वया
क्रुद्धस्य भीमसेनस्य प्रेक्षितुं मुखम् आहवे। १८

दृश्यतां वा पुमान् कश्चिन् समग्रे पार्थिवे बले
यो ऽर्जुनं समरे प्राप्य स्वस्तिमान् आव्रजेद् गृहान्। १९

पश्य पुत्रांस् तथा भ्रातॄन् ज्ञातीन् सम्बन्धिनस् तथा—
त्वत्-कृते न विनश्येयुर् इमे भरत-सत्तमाः? २०

अस्तु शेषं कौरवाणां—मा पराभूर् इदं कुलम्—
कुलघ्न इति नोच्येथा, नष्ट-कीर्तिर्, नराधिप! २१

मा, तात, श्रियम् आयान्तीम् अव-मंस्थाः, समुद्यताम्!
अर्धं प्रदाय पार्थेभ्यो, महतीं श्रियम् आप्स्यसि। २२

पाण्डवैः सङ्गमं कृत्वा, कृत्वा च सुहृदां वचः,
संप्रीयमाणो मित्रैश् च चिरं भद्राण्यवाप्स्यसि"। २३

ततः शान्तनवो भीष्मो दुर्योधनम् अमर्षणम्,
केशवस्य वचः श्रुत्वा, प्रोवाच, भरतर्षभ,— २४

१७। निर्मिताम्—राज्ञां वशीकरणेन स्व-राज्यांशत्वेन उत्पादिताम्। आशंससे—इच्छसि। १९। स्वस्तिमान्---शुभान्वितः। २०। न विनश्येयुः—न विनश्यन्तु, न हन्यन्ताम्। २१। पराभूः—तिरस्कुरु, न्यक्-कुरु, नाशय। २३। सङ्गमम्—मेलम्।

"अ-कृत्वा वचनं, तात, केशवस्य महात्मनः,
श्रेयो न जातु न सुखं न कल्याणम् अवाप्स्यसि। २५

ज्वलितां त्वम् इमां लक्ष्मीं भारतीं सर्व-राजसु,
जीवतो धृतराष्ट्रस्य दौरात्म्याद् भ्रंशयिष्यसि। २६

आत्मानं च सहामात्यं स-पुत्र-भ्रातृ-बान्धवम्
'अहम्' इत्यनया बुद्ध्या जीविताद् भ्रंशयिष्यसि। २७

अति-क्रामन् केशवस्य तथ्यं वचनम् अर्थवत्
मातरं पितरं चैव मा मज्जीः शोक-सागरे।" २८

अथ द्रोणो ऽब्रवीत् तत्र दुर्योधनम् इदं वचः,
अमर्ष-वशम् आपन्नं, निश्वसन्तं पुनः पुनः,— २९

"अनुतिष्ठ, महा-प्राज्ञ, कृष्ण-भीष्मौ यद् ऊचतुः।
माधवं बुद्धि-मोहेन मावमंस्थाः, परन्तप। ३०

ये त्वां प्रोत्साहयन्त्येते, नैते कृत्याय कर्हिचित्
वैरं परेषां ग्रीवायां प्रति-मोक्ष्यन्ति संयुगे। ३१

२५। श्रेयः—धर्मः। २६। ज्वलिताम्—ज्वलन्तीम्, दीप्यमानाम्। लक्ष्मीम्—सम्पदम्। भारतीम्—भरत-वंश्यानाम्। २७। 'अहम्' इत्यनया बुद्ध्या—आत्माभिमानेन, अहङ्कारेन। २८। मां मज्जीः—मा मज्जय, मा निमज्जय। ३१। एते—कर्णादयः। कृत्याय—[जय-साधक-] कर्त्तव्य-कर्मणे [भवन्ति]। परेषाम्—अस्मदादीनाम्। प्रति-मोक्ष्यन्ति—निक्षेप्स्यन्ति।

मा जीघनः प्रजाः सर्वाः पुत्रान् भ्रातॄंस् तथैव च।
वासुदेवार्जुनौ यत्र विद्ध्य् अजेयं बलं हि तत्। ३२

एतच् चैव मतं सत्यं सुहृदोः कृष्ण-भीष्मयोः
यदि नादास्यसे, तात, पश्चात् तप्स्यसि, भारत"। ३३

तस्मिन् वाक्यान्तरे वाक्यं क्षत्तापि विदुरो ऽब्रवीत्,
दुर्योधनम् अभिप्रेक्ष्य, धार्तराष्ट्रम् अ-मर्षणम्,— ३४

"दुर्योधन, न शोचामि त्वाम् अहं, भरतर्षभ।
इमौ च वृद्धौ शोचामि गान्धारीं पितरं च ते, ३५

याव् अनाथौ चरिष्येते त्वया नाथेन दुर्हृदा
हत-मित्रौ हतामात्यौ लून-पक्षाव् इवाण्डजौ ३६

भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीम् इमाम्
कुलघ्नम् ईदृशं पापं जनयित्वा कु-पूरुषम्।" ३७

अथ दुर्योधनं राजा, धृत-राष्ट्रो ऽभ्यभाषत,
आसीनं भ्रातृभिः सार्धं, राजभिः परिवारितम्,— ३८

"दुर्योधन, निबोधेदं शौरिणोक्तं महात्मना
आदत्स्व शिवम् अत्यन्तं योग-क्षेमवद् अ-व्ययम्। ३९

३२। मा जीघनः [हन्-इ+लुङ्-स्]—मा घातय। ३६। लून-पक्षौ—छिन्न-पक्षौ। अण्डजौ—पक्षिणौ। ३९। आदत्स्व—गृहाण। योग-क्षेमवत्—अ-प्राप्तस्य प्राप्तिर् योगः, प्राप्तस्य रक्षणं क्षेमः। तयोः समाहारः योग-क्षेमम् तेन विशिष्टम्, अप्राप्तार्थप्राप्ति-कारणं

अनेन हि सहायेन कृष्णेनाक्लिष्ट-कर्मणा
इष्टान् सर्वान् अभिप्रायान् प्राप्स्यामः सर्व-राजसु । ४०

सु-संहतः केशवेन, गच्छ, तात, युधिष्ठिरम् ।
चर स्वस्त्ययनं कृत्स्नं भरतानाम् अनामयम् । ४१

वासुदेवेन तीर्थेन, तात, गच्छस्व संशमम्
काल-प्राप्तम् इदं मन्ये । मा त्वं दुर्योधनातिगाः ! ४२

शमं चेद् याचमानं त्वं प्रत्याख्यास्यसि केशवम्,
त्वद्-अर्थम् अभिजल्पन्तं, न तवास्त्य-पराभवः । ४३

पञ्च-दशो ऽध्यायः

प्रत्युत्तरम्

श्रुत्वा दुर्योधनो वाक्यम् अ-प्रियं कुरु-संसदि
प्रत्युवाच महा-बाहुं वासुदेवं यशस्विनम्,— १

प्राप्तार्थ-रक्षण-हेतुं च । ४० । अभिप्रायान्—अर्थान् । ४१ । सु-संहतः—सम्मिलितः । स्वस्त्ययनम्—शुभङ्कराचारम् । ४२ । तीर्थेन—गुरुणा । मा अतिगाः [अति-इ+लुङ्-स्]—मा अतिक्राम । ४३ । त्वद्-अर्थम् अभिजल्पन्तम्—तव हिताय भाषमाणम् (कथां कुर्वन्तम्) । न अपराभवः—पराभवः, (पराजयः) एव इत्यर्थः । द्वयोर् अभावयोर् योगो भावम् एव व्यनक्ति हि ।

"भवान् क्षत्ता वा राजा वाप्याचार्यो वा पितामहः
माम् एव परिगर्हन्ते, नान्यं कञ्चन पार्थिवम्। २

न चाहं लक्षये कञ्चिद् व्यभिचारम् इहात्मनः।
प्रियाभ्युपगते द्यूते पाण्डवा, मधु-सूदन,
जिताः शकुनिना राज्यं। तत्र किं मम दुष्कृतम्? ३

यत् पुनर् द्रविणं किञ्चित् तत्राजीयन्त पाण्डवाः,
तेभ्य एवाभ्यनुज्ञातं तत् तदा, मधु-सूदन। ४

अपराधो न चास्माकं यत् ते ह्यक्ष-पराजिताः
अ-जेया, जयतां श्रेष्ठ, पार्थाः प्रव्राजिता वनम्। ५

केन वाप्यपवादेन विरुध्यन्त्यरिभिः सह
अ-शक्ताः पाण्डवाः, कृष्ण, प्रहृष्टाः, प्रत्यमित्रवत्? ६

किम् अस्माभिः कृतं तेषां कस्मिन् वा पुनर् आगसि,
धार्तराष्ट्रान् जिघांसन्ति पाण्डवाः सृञ्जयैः सह? ७

न चापि वयम् उग्रेण कर्मणा वचनेन वा
वित्रास्ताः प्रणमामेह भयाद्, अपि शतक्रतुम्। ८

३। व्यभिचारम्—न्यायातिक्रमणम्, अन्यायाचरणम्। प्रिया-भ्युपगते—प्रीत्या-स्वीकृते। ६। अपवादेन—कुत्सया। विरुध्यन्ति—[अस्मभ्यं] विरुद्धा भवन्ति। प्रत्यमित्रवत्—प्रत्यमित्रम् (शत्रवे यथा) शत्रवे इव। ७। आगसि—अपराधे। ८।—वित्रस्ताः—'प्रभ्रष्टाः' इति पाठान्तरम्।

न च तं, कृष्ण, पश्यामि क्षत्र-धर्मम् अनुष्ठितम्
उत्सहेत युधा जेतुं यो नः, शत्रु-निवर्हण। ९

न हि भीष्म-कृप-द्रोणाः स-कर्णा, मधु-सूदन,
देवैर् अपि युधा जेतुं शक्याः ; किम् उत पाण्डवैः ? १०

स्व-धर्मम् अनुपश्यन्तो यदि, माधव, संयुगे
अस्त्रेण निधनं काले प्राप्स्यामः, स्वर्ग्यम् एव तत्। ११

मुख्यश् चैवैष नो धर्मः क्षत्रियाणां जनार्दन,
यच् छयीमहि संग्रामे शर-तल्प-गता वयम्। १२

ते वयं वीर-शयनं प्राप्स्यामो यदि संयुगे
अ-प्रणम्यैव शत्रूणां, न नस् तप्स्यन्ति, माधव। १३

'उद्-यछेद् एव, न नमेद् ; उद्यमो ह्येव पौरुषम् ;
अप्यपर्वणि भज्येत, न नमेद् इह कस्यचित्, १४

इति मातङ्ग-वचनं परीप्सन्ति हितेप्सवः।
धर्माय चैव प्रणमेद् ब्राह्मणेभ्यश् च मद्-विधः। १५

राज्यांशश्चाभ्यनुज्ञातो यो मे पित्रा पुराभवत्
न स लभ्यः पुनर् जातु मयि जीवति, केशव। १६

९। अनुष्ठितम्—अनुष्ठितवन्तम्, अनुतिष्ठन्तम् इत्याशयः। १२। शर-तल्पम्—शर-शय्या। १४। उद्-यच्छेद् एव—उद्यमं कुर्याद् एव। अ-पर्वणि—अक्षणे। १५। मातङ्गः—मुनि-विशेषः। परीप्सन्ति—

अप्रदेयं पुरा दत्तं राज्यं परवतो मम
अज्ञानाद्वा भयाद्वापि, मयि नाले, जनार्दन। १७

न तद् अद्य पुनर् लभ्यं पाण्डवैर्, वृष्णि-नन्दन,
ध्रियमाणे, महा-बाहो, मयि, सम्प्रति, केशव। १८

यावद् धि तीक्ष्णया सूच्या विध्येद् अग्रेण केशव,
तावद् अप्यपरित्याज्यं भूमेर् नः पाण्डवान् प्रति।" १९

ततः प्रहस्य दाशार्हः, क्रोध-पर्याकुलेक्षणः,
दुर्योधनम् इदं वाक्यम् अब्रवीत् कुरु-संसदि,— २०

"लप्स्यसे वीर-शयनं! कामम् एतत् अवाप्स्यसि।
स्थिरो भव सहामात्यो। विमर्दो भविता महान्। २१

न शर्म प्राप्स्यसे, राजन्, उत्क्रम्य सुहृदां वचः।
अ-धर्म्यम् अ-यशस्यं च क्रियते, पार्थिव, त्वया।" २२

एवं ब्रुवति दाशार्हे, दुर्योधनम् अमर्षणम्
दुःशासन इदं वाक्यम् अब्रवीत् कुरु-संसदि,— २३

"न चेत् सन्धास्यसे, राजन्, स्वेन कामेन पाण्डवैः,
बद्ध्वा किल त्वां दास्यन्ति कुन्ती-पुत्राय कौरवाः। २४

वैकर्तनं त्वां च मां च, त्रीन् एतान्, मनुजर्षभ,
पाण्डवेभ्यः प्रदास्यन्ति भीष्मो द्रोणः पिता च ते।" २५

आश्रयितुम् इच्छन्ति। १८। ध्रियमाणे—[धृ+आन, ७१] जीवति।
२१। विमर्दः—संघर्षः सम्बाधः।

भ्रातुर् एतद् वचः श्रुत्वा, धार्तराष्ट्रः सुयोधनः
क्रुद्धः प्रातिष्ठतोत्थाय, महा-नाग इव श्वसन् । २६

तं प्रस्थितम् अभिप्रेक्ष्य, भ्रातरो मनुजर्षभम्
अनुजग्मुः, सहामात्या, राजानश् चापि सर्वशः । २७

सभायाम् उत्थितं क्रुद्धं, प्रस्थितं भ्रातृभिः सह,
दुर्योधनम् अभिप्रेक्ष्य, भीष्मः शान्तनवो ऽब्रवीत् ,— २८

"धर्मार्थाव् अभिसंत्यज्य संरम्भं यो ऽनुमन्यते,
हसन्ति व्यसने तस्य दुर्हृदो न-चिराद् इव ।" २९

भीष्मस्याथ वचः श्रुत्वा दाशार्हः पुष्करेक्षणः
भीष्म-द्रोण-मुखान् सर्वान् अभ्यभाषत, वीर्यवान् ,— ३०

"सर्वेषां कुरु-वृद्धानां महान् अयं अतिक्रमः
प्रसह्य मन्दम् ऐश्वर्ये न नियच्छन्ति यन् नृपम् । ३१

कंसम् एकम परित्यज्य कुलार्थे, सर्व-यादवाः,
सम्भूय, सुखम् एधन्ते भारतान्धक-वृष्णयः । ३२

राजन्, दुर्योधनं बद्ध्वा ततः संशाम्य पाण्डवैः—
त्वत्-कृते न विनश्येयुः क्षत्रियाः, क्षत्रियर्षभ ।" ३३

---

२९ । संरम्भम्—क्रोधम् । ३१ । अतिक्रमः—समय-लङ्घनम् व्यवहार-विरुद्धाचरणम् । नियच्छन्ति—नियमयन्ति, दाम्यन्ति । ३३ । संशाम्य—सन्धेहि, सन्धिं कुरु ।

कृष्णस्य तु वचः श्रुत्वा, धृतराष्ट्रो जनेश्वरः
विदुरं सर्व-धर्मज्ञं त्वरमाणो ऽभ्यभाषत,— ३४

"गच्छ, तात, महा-प्रज्ञां गान्धारीं दीर्घ-दर्शिनीम्
आनयेह। तया सार्धम् अनुनेष्यामि दुर्मतिम्।" ३५

षोडशो ऽध्यायः

मातृ-शासनम्

राज्ञस् तु वचनं श्रुत्वा, विदुरो दीर्घ-दर्शिनीम्
आनयामास गान्धारीं धृतराष्ट्रस्य शासनात्। १

धृतराष्ट्र उवाच,—

एष, गान्धारि, पुत्रस् ते दुरात्मा शासनातिगः।
ऐश्वर्य-लोभाद् ऐश्वर्यं जीवितं च प्रहास्यति। २

अशिष्टवद्, अमर्यादः, पापैः सह, दुरात्मवान्,
सभाया निर्गतो मूढो व्यतिक्रम्य सुहृद्-वचः। ३

वैशम्पायन उवाच,—

सा, भर्तुर् वचनं श्रुत्वा, राज-पुत्री यशस्विनी,
अन्विच्छन्ती महच् छ्रेयो, गान्धारी वाक्यम् अब्रवीत्,— ४

"आनायय सुतं क्षिप्रं राज्य-कामुकम् आतुरम्।
न हि राज्यम् अ-शिष्टेन शक्यं धर्मार्थ-लोपिना। ५

त्वं ह्य् एवात्र भृशं गर्ह्यो, धृतराष्ट्र, सुत-प्रियः
यो, जानन् पापताम् अस्य, तत्-प्रज्ञाम् अनुवर्तसे। ६

स एष, काम-मन्युभ्यां प्रलम्बो, लोभम् आस्थितः,
अशक्यो ऽद्य त्वया, राजन्, विनिवर्तयितुं बलात्। ७

राष्ट्र-प्रदाने मूढस्य बालिशस्य दुरात्मनः
दुःसहायस्य लुब्धस्य धृत-राष्ट्रो ऽश्नुते फलम्। ८

कथं हि स्व-जने भेदम् उपेक्षेत मही-पतिः?
भिन्नं हि स्वजनेन त्वां प्रहसिष्यन्ति शत्रवः। ९

या हि शक्या, महा-राज, साम्ना भेदेन वा पुनः
निस्तर्तुम् आपदः, स्वेषु दण्डं कस् तत्र पातयेत्" १०

शासनाद् धृतराष्ट्रस्य, दुर्योधनम् अमर्षणम्,
मातुश् च वचनात्, क्षत्ता सभां प्रावेशयत् पुनः ११

तं, प्रविष्टं अभिप्रेक्ष्य, पुत्रम्, उत्पथ-प्रस्थितम्
विगर्हमाणा गान्धारी शमार्थं वाक्यम् अब्रवीत्,— १२

"दुर्योधन, यद् आह त्वां पिता भरत-सत्तमः
भीष्मो द्रोणः कृपः क्षत्ता, सुहृदां कुरु तद् वचः। १३

न हि राज्यं, महा-प्राज्ञ, स्वेन कामेन शक्यते
अवाप्तुं रक्षितुं चापि भोक्तुं वा, भरतर्षभ। १४

काम-क्रोधौ हि पुरुषम् अर्थेभ्यो व्यपकर्षतः।
तौ तु शत्रू विनिर्जित्य राजा विजयते महीम्। १५

७। प्रलम्बः—लम्बमानः, सुस्पष्टमुपलक्षितः।

लोकेश्वर-प्रभुत्वं हि महद् एतद् दुरात्मभिः
राज्यं, नामेप्सितं स्थानम् अशक्यम् अभिरक्षितुम्। १६

एकी-भूतैर् महा-प्राज्ञैः शूरैर् अरि-निवर्हणैः
पाण्डवैः पृथिवीं, तात, भोक्ष्यसे, सहितः, सुखी। १७

प्रपद्यस्व महा-बाहुं कृष्णम् अक्लिष्ट-कारिणम्।
प्रपन्नो हि सुखाय स्याद् उभयोर् एव केशवः। १८

न युद्धे, तात, कल्याणं, न धर्मार्थौ, कुतः सुखम्?
न चापि विजयो नित्यं। मा युद्धे चेत आधिथाः। १९

भीष्मेण हि, महा-प्राज्ञ, पित्रा ते वाह्लिकेन च
दत्तोऽंशः पाण्डु-पुत्राणां, भेदाद् भीतैर्, अरिन्दम। २०

तस्य चैतत् प्रदानस्य फलम् अद्यानुपश्यसि
यद् भुङ्क्षे पृथिवीं कृत्स्नां, शूरैर् निहत-कण्टकाम्। २१

प्रयच्छ पाण्डु-पुत्राणां यथोचितम्, अरिन्दम।
यदीच्छसि सहामात्यो भोक्तुम्, अर्धं प्रदीयताम्। २२

अलम् अर्धं पृथिव्यास् ते सहामात्यस्य जीवनम्।
सुहृदां वचने तिष्ठन् यशः प्राप्स्यसि, भारत। २३

श्रीमद्भिर् आत्मवद्भिस् तैर् बुद्धिमद्भिर् जितेन्द्रियैः
पाण्डवैर् विग्रहस्, तात, भ्रंशयेद् महतः सुखात्। २४

२०। अंशः—भागः। २३। अलम्—पर्याप्तम्। २४। आत्मवद्भिः—सत्त्ववद्भिः, मनस्विभिः।

न चैव शक्तः, पार्थानां यस् त्वम् अर्थम् अभीप्ससि
सूत-पुत्रो दृढ़-क्रोधो भ्राता दुःशासनश् च ते। २५

अ-मर्ष-वशम् आपन्नो मा कुरूंश्, तात, जीघनः!
एषा हि पृथिवी कृत्स्ना मा गमत् त्वत्-कृते वधम्! २६

यच्च च त्वं मन्यसे, मूढ़, भीष्म-द्रोण-कृपादयः
योत्स्यन्ते सर्व-शक्त्येति, नैतद् अद्योपपद्यते। २७

समं हि राज्यं प्रीतिश् च स्थानं च विदितात्मनाम्
पाण्डवेष्वथ युष्मासु। धर्मस् त्वभ्यधिकस् ततः। २८

राज-पिण्ड-भयाद् एते यदि हास्यन्ति जीवितम्,
न हि शक्ष्यन्ति राजानं युधिष्ठिरम् उदीक्षितुम्। २९

न लोभाद् अर्थ-सम्पत्तिर् नराणाम् इह दृश्यते।
तद् अलं, तात, लोभेन। प्रशाम्य, भरतर्षभ।" ३०

तत् तु वाक्यम् अनादृत्य सोऽर्थवद् मातृ-भाषितम्।
पुनः प्रतस्थे संरम्भात् सकाशम् अ-कृतात्मनाम्। ३१

२५। न च यस् त्वम् पार्थानाम् अर्थम् अभीप्ससि (प्राप्तुम् इच्छसि) स त्वं [तदर्थापहाराय शक्तो भवसि]। न चापि सूतपुत्रादयः शक्ता भवन्ति। २६। मा जीघनः [हन्-इ+लुङ्-स्]—मा घातय। मा गमत्—मा गच्छतु। २७। उपपद्यते—सम्भवति। २८। विदितात्मनाम्—आत्मज्ञानाम्। ततः—तत्र, पाण्डवेषु। ३०। अलं लोभेन—लोभं त्यज। ३१। अ-कृतात्मनाम्—असंस्कृत-चित्तानां [कर्ण-शकुनि-दुःशासनानाम्]।

सप्त-दशो ऽध्यायः

चक्रिका

ततः सभाया निर्गम्य मन्त्रयामास कौरवः
सौबलेन मताक्षेण राज्ञा शकुनिना सह । १

दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च,
दुःशासन-चतुर्थानाम्, इदम् आसीद् विचेष्टितम्,— २

'पुरायम् अस्मान् गृह्णाति क्षिप्रकारी जनार्दनः
सहितो धृत-राष्ट्रेण राज्ञा शान्तनवेन च, ३

वयम् एव हृषीकेशं निगृह्णीम बलाद् इव
प्रसह्य पुरुष-व्याघ्रम्, इन्द्रो वैरोचनिं यथा । ४

श्रुत्वा गृहीतं वार्ष्णेयं, पाण्डवा हत-चेतसः
निरुत्साहा भविष्यन्ति, भग्न-दंष्ट्रा इवोरगाः । ५

४। वैरोचनिम् [विरोचन+इ, २।१]—प्रह्लाद-तनयस्य विरोचनस्य पुत्रं [बलिम्]।

इन्द्रो वैरोचनिं यथा—पुरा किल प्रह्लाद-पुत्रस्य विरोचनस्य सुतो बलिर् नाम दैत्य-राज इन्द्रादीन् देवान् भृशम् उत्पीड़यामास। देवानां प्रार्थनया विष्णुर् वामन-रूपेण अदिति-कश्यपयोः पुत्रत्वम् अवाप्य भिक्षया दान-धर्म-परायणाद् बलेस् त्रिपाद-परिमितां भूमिं लब्ध्वा विराट-रूपं परिगृह्य प्रथमेन पादेन स्वर्गं द्वितीयेन पृथिवीं च समावृत्य स्थाना-भावात् तृतीयेन बलेर् मस्तकम् आवृत्य पातालस्य प्रभुं कृत्वा तं तत्र प्रेषयामास। ५। उरगाः—सर्पाः।

तस्माद् वयम् इहैवैकं केशवं क्षिप्र-कारिणम्,
क्रोशतो धृत-राष्ट्रस्य, बद्ध्वा योत्स्यामहे रिपून्'। ६

तेषां पापम् अभिप्रायं पापानां दुष्ट-चेतसाम्
इङ्गित-ज्ञः कविः क्षिप्रम् अन्वबुध्यत सात्यकिः। ७

तदर्थम् अभिनिष्क्रम्य हार्दिक्येन सहास्थितः
अब्रवीत् कृत-वर्माणं,—"क्षिप्रं योजय वाहिनीम्। ८

व्यूढानीकः सभा-द्वारम् उपतिष्ठस्व, दंशितः,
यावद् आख्यास्यहं चैतत् कृष्णायाक्लिष्ट-कारिणे।" ९

स, प्रविश्य सभां, वीरः, सिंहो गिरि-गुहाम् इव,
आचष्ट तम् अभिप्रायं केशवाय महात्मने। १०
धृत-राष्ट्रं ततश् चैव विदुरं चान्वभाषत।

सात्यकेस् तद् वचः श्रुत्वा, विदुरो दीर्घ-दर्शिवान्
धृतराष्ट्रं महा-बाहुम् अब्रवीत् कुरु-संसदि,— ११

"राजन्, परीत-कालास् ते पुत्राः सर्वे, परन्तप,
अशक्यम् अ-यशस्यं च कर्तुं कर्म समुद्यताः।" १२

विदुरेणैवम् उक्ते तु केशवो वाक्यम् अब्रवीत्,
धृतराष्ट्रम् अभिप्रेक्ष्य, सुहृदां शृण्वताम्, मिथः,— १३

११। दीर्घ-दर्शिवान्—दीर्घ-दर्शी। १२। परीत-कालाः—आसन्न-मृत्यवः। अशक्यम्—असाध्यम्।

"राजन्, एते यदि क्रुद्धा मां निगृह्णीयुर् ओजसा,
एतान् हि सर्वान् सं-रब्धान् नियन्तुम् अहम् उत्सहे। १४

न त्वहं निन्दितं कर्म, कुर्य्यां पापं कथञ्चन।
पाण्डवार्थे हि लुभ्यन्तः स्वार्थान् हास्यन्ति ते सुताः। १५

इदं तु न प्रवर्तेयं निन्दितं कर्म, भारत,
सन्निधौ ते, महा-राज, क्रोधजं पाप-बुद्धि-जम्।" १६

एतच् छ्रुत्वा तु, विदुरं धृत-राष्ट्रो ऽभ्यभाषत,—
"क्षिप्रम् आनय तं पापं राज्य-लुब्धं सुयोधनम् १७

सह-मित्रं सहामात्यं स-सोदर्यं सहानुगम्,
शक्नुयां यदि पन्थानम् अवतारयितुं पुनः।" १८

ततो दुर्योधनं क्षत्ता पुनः प्रावेशयत् सभाम्
अ-कामं भ्रातृभिः सार्धं राजभिः परिवारितम्। १९

अथ दुर्योधनं राजा धृत-राष्ट्रो ऽभ्यभाषत,
कर्ण-दुःशासनाभ्यां च राजभिश् चापि संवृतम्,— २०

१४। निगृह्णीयुः—निग्रहीतुम् इच्छन्ति। उत्सहे—शक्नोमि। १५। पाण्डवार्थे लुभ्यन्तः—पाण्डव-धनाय लुभ्यन्तः (लोभं कुर्वन्तः)। १६। इदम्—सानुज-धार्तराष्ट्र-नियमन-रूपम्। १८। पन्थानम् अवतारयितुम्—सत्-पथे निवेशयितुम् १९। अ-कामम् —[आगन्तुम्] अनिच्छुकम्।

"नृ-शंस, पाप-भूयिष्ठ, क्षुद्र-कर्म-सहायवान्
पापैः सहायैः संहत्य पापं कर्म चिकीर्षसि ! २१

त्वम्, इमं पुण्डरीकाक्षम् अ-प्रधृष्यं दुरासदम्
पापैः सहायैः संहत्य निग्रहीतुं किलेच्छसि !" २२

इत्युक्ते धृत-राष्ट्रेण, क्षत्तापि विदुरो ऽब्रवीत्।
दुर्योधनम् अभि-प्रेक्ष्य धार्तराष्ट्रम् अमर्षणम्,— २३

"प्रधर्षयन् महा-बाहुं कृष्णम् अ-क्लिष्ट-कारिणम्,
पतङ्गो ऽग्निम् इवासाद्य, सामात्यो न भविष्यसि।" २४

ततो रथेन शुभ्रेण महता किङ्किणीकिना
शैब्य-सुग्रीव-युक्तेन प्रत्यदृश्यत दारुकः। २५

उपस्थित-रथं शौरिं प्रयास्यन्तम् अरिन्दमम्
धृत-राष्ट्रो, महा-राज, पुनर् एवाभ्यभाषत,— २६

'यावद् बलं मे पुत्रेषु पश्यतस् ते, जनार्दन,
प्रत्यक्षं ते, न ते किञ्चित् परोक्षं, शत्रु-कर्षण। २७

२१। संहत्य—मिलित्वा। २२। अ-प्रधृष्यम्—[दूतत्वात्] प्रधर्षणानर्हम्। दुरासदम्—आसादितुम्, (अभिगन्तुम्, आक्रमितुम्) अशक्यम्। २४। प्रधर्षयन्—आक्रामन्। न भविष्यसि—सत्ता-हीनो भविष्यसि, आत्मनोऽस्तित्वं हारयिष्यसि, मरिष्यसि। २५। किङ्किणीकिना —[किङ्किणी (क्षुद्र-घण्टिका)+क (जाल)+इन्। ३।१]— क्षुद्र-घण्टिका-जाल-समावृतेन। शैब्य-सुग्रीवौ—श्रीकृष्ण-रथाश्वौ।

न मे पापो ऽस्त्यभिप्रायः पाण्डवान् प्रति, केशव ।
ज्ञातम् एव हि ते वाक्यं यद् मयोक्तः सुयोधनः । २८

जानन्ति कुरवः सर्वे राजानश् चैव पार्थिवाः
शमे प्रयतमानं मां सर्व-यत्नेन, माधव ।" २९

ततो ऽब्रवीद् महा-बाहुर् धृत-राष्ट्रं जनार्दनः
द्रोणं पितामहं भीष्मं क्षत्तारं बाह्लिकं कृपम् ,— ३०

"प्रत्यक्षं एतद् भवतां यद् वृत्तं कुरु-संसदि,
यथा चाशिष्टवद् मन्दो रोषाद् अद्य समुत्थितः । ३१

वदत्यनीशम् आत्मानं धृत-राष्ट्रो मही-पतिः—
आपृच्छे भवतः सर्वान् , गमिष्यामि युधिष्ठिरम् । ३२

आमन्त्र्य प्रस्थितं शौरिं रथ-स्थं पुरुषर्षभम्
अनुजग्मुर् महेष्वासाः प्रवीरा भरतर्षभाः ३३

ततो रथेन शुभ्रेण महता किङ्किणीकिना
कुरूणां पश्यतां द्रष्टुं स्वसारं स पितुर् ययौ । ३४

प्रविश्याथ गृहं तस्याश् चरणाव् अभिवाद्य च,
आचख्यौ तत् समासेन यद् वृत्तं कुरु-संसदि । ३५

---

३२ । अनीशम् [न+ईश, २।१]—प्रभुत्व-हीनम् । ३३ । प्रवीराः—प्रकृष्ट-वीराः, सु-भटाः ।

वासुदेव उवाच,—

आपृच्छे भवतीं ! शीघ्रं प्रयास्ये पाण्डवान् प्रति ।
किं वाच्याः पाण्डवेयास् ते भवत्या वचनाद् मया ? ३६

कुन्ती उवाच, —

ब्रूयाः, केशव, राजानं धर्मात्मानं युधिष्ठिरम् ,—
"क्षत्रियो ऽसि, क्षतात् त्राता, बाहु-वीर्योपजीविता । ३७

पित्र्यम् अंशं, महा-बाहो, निमग्नं पुनर् उद्धर
साम्ना भेदेन दानेन दण्डेनाथ नयेन च । ३८

इतो दुःखतरं किं ते यद् अहं हीन-बान्धवा
पर-पिण्डम् उदीक्षे वै त्वां सूत्वा मित्र-नन्दनम् ? ३९

युध्यस्व राज-धर्मेण, मा मज्जय पितामहान् !
मा गमः क्षीण-पुण्यस् त्वं सानुजः पापिकां गतिम् ! ४०

अष्टादशो ऽध्यायः

विदुला-संवादः

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
विदुलायाश् च संवादं पुत्रस्य च, परन्तप । १

३९ । पर-पिण्डम्—अन्य-दत्त-जीविकाम् । उदीक्षे—उन्मुखी सती प्रतीक्षे ।
१ । उदाहरन्ति—दृष्टान्त-त्वेन कथयन्ति ।

क्षत्र-धर्म-रता दान्ता विदुला दीर्घ-दर्शिनी,
विश्रुता राज-संसत्सु, श्रुत-वाक्या बहु-श्रुता। २

विदुला नाम राजन्या जगर्हे पुत्रम् औरसम्,
निर्जितं सिन्धु-राजेन, शयानं, दीन-चेतसम्। ३

विदुला उवाच,—

अ-नन्दन, मम जात, द्विषतां हर्ष-वर्धन,
न मया त्वं न पित्रा च जातः। काभ्यागतोऽह्यसि ? ४

उत्तिष्ठ, हे का-पुरुष, मा शेष्वैवं पराजितः,
अ-मित्रान् नन्दयन् सर्वान्, निर्मानो, बन्धु-शोक-दः। ५

अप्यहेर् आ-रुजन् दंष्ट्रां मा श्वेव निधनं व्रज !
अपि वा संशयं प्राप्य जीविते ऽपि, पराक्रमेः ! ६

अप्यरेः श्येनवच् छिद्रं पश्येस् त्वं, वि-परिक्रमन्
विवदन् वाथ वा तूष्णीं व्योम्नि वापरिशङ्कितः ! ७

२। दान्ता—क्लेशसहा। बहु-श्रुता—सम्यग्-वेदज्ञा बहु-शास्त्रज्ञा। ३। राजन्या—मूर्धाभिषिक्ता। जगर्हे—निनिन्द। ४। अ-नन्दन—कु-पुत्र। ५। मा शेष्व—निरुद्योगो मा भूः। अ-मित्रान्—शत्रून्। ६। अहेः—सर्पस्य। आरुजन्—गुञ्जन्। पराक्रमेः—पराक्रामेः, पराक्रमं कुरु। ७। वि-परिक्रमन्—विपरिक्रममाणः, समन्तात् भ्राम्यन्। आप्र.। विवदन्—शत्रु-जयार्थम् अनेकान् पक्षान् उद्भावयन्। तूष्णीम्—तूष्णींभूय, मौनी भूत्वा। व्योम्नि वापरिशङ्कितः—अथवा व्योमस्थः (आकाश-स्थः) श्येन इव शत्रोर आधिक्यात् भयम् अपश्यन्।

त्वम् एवं प्रेतवच्छेषे कस्माद् वज्र-हतो यथा ?
उत्तिष्ठ, हे का-पुरुष, मा स्वाप्सीः शत्रु-निर्जितः ! ८

मास्तं गमस् त्वं कृपणो—विश्रूयस्व स्व-कर्मणा !
मा मध्ये, मा जघन्ये त्वं, माधो भूस्—तिष्ठ गर्जितः ! ९

अलातं तिन्दुकस्येव मुहूर्तम् अपि हि ज्वल !
मा तुषाग्निर् इवानर्चिर् धूमायस्व, जिजीविषुः ! १०

मुहूर्तं ज्वलितं श्रेयो, न च धूमायितं चिरम् ।
मा ह स्म कस्यचिद् गेहे जनि राज्ञः खरो मृदुः ! ११

कृत्वा मानुष्यकं कर्म सृत्वाजिं यावद् उत्तमम्
धर्मस्यानृण्यम् आप्नोति, न चात्मानं विगर्हते । १२

---

८ । मा स्वाप्सीः—मा निद्राहि । ९ । विश्रूयस्व—ख्यातो भव । मध्ये—भेदे । जघन्ये—साम्नि । अधः—अधमे (नीचे) उपाये दाने । गर्जितः—गर्जन-शीलः [दण्डयिता] एव । तिष्ठ—दण्डायमानो भव । १० । अलातम्—ज्वलद्-अङ्गारः । तिन्दुकस्य —तिन्दुक-काष्ठस्य । ज्वल—दीप्यस्व । यथा तिन्दुक-काष्ठस्य ज्वलद्-अङ्गारः दिक्षु स्फूलिङ्गान् विक्षिपन् ज्वलति तथा त्वम् अपि समन्तात् तेजो विकिरन् अपि दीप्यस्व । अनर्चिः—शिखा-हीनः, दीप्तिहीनः । जिजीविषुः—जीवितुम् इच्छुः । ११ । मा जनि [जन् + लुङ्-त] —मा जायताम् । मा उत्-पद्यताम् । खरः—जन्मना-कर्कशः, उर्जस्वलः [जनः] । [वृत्तेन] मृदुः—कोमलः, दयालुः । १२ । मानुष्यकम्—मनुष्योचितम् । सृत्वा—अभिसृत्य, अभिगम्य । आजिम्—संग्रामम्, युद्धम् ।

अलब्ध्वा यदि वा लब्ध्वा नानुशोचति पण्डितः ।
आनन्तर्यम् आरभते न प्राणानां धनायते । १३

इष्टापूर्तं हि ते, क्लीव, कीर्तिश् च सकला हता ;
विच्छिन्नं भोग-मूलं ते । किं निमित्तं हि जीवसि ? १४

शत्रुर् निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता ।
विपरिच्छिन्न-मूलो ऽपि न विषीदेत् कथञ्चन । १५

उद्यम्य धुरम् उत्कर्षेद् आजानेय-कृतं स्मरन् ।
उद्भावय कुलं मग्नं त्वत्-कृते, स्वयम् एव हि । १६

---

१३ । अ-लब्धा यदि वा लब्धा—[अभीष्ट-वस्तुनः] लाभे अ-लाभे वा । प्राणानाम् (बलानाम् बल-साध्यानां कार्याणाम्) आनन्तर्यम् (अविच्छिन्नां धाराम्) आरभते, न धनायते (आत्मनो धनम् इच्छति, तृष्णया पीड्यते) इत्यन्वयः । १४ । भोग-मूलम्—राज्यं धनं वा । इष्टापूर्तम् [इष्ट + पूर्त, ११]—अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् आतिथ्यं वैश्वदेवं च इष्टम् इत्यभिधीयते । वापी-कूप-तडागादि देवतायतनानि च अन्न-प्रदानम् आरामाः पूर्तम् इत्यभिधीयते ।—जातूकर्णः (शकद्रु) । १५ । पं १—निमज्जन् पतिष्यन् वा जनः शत्रुं जङ्घायां गृहीत्वा तेनैव सह निमज्जेत् पतेद् वा । विपरिच्छिन्न-मूलः—मूलात् (राज्याद् धनाद् वा) भ्रष्टः । न विषीदेत्—न निरुद्यमो भवेत् । १६ । उद्यम्य—उद्यमं कृत्वा । धुरम्—भारम् । उत्कर्षेत्—उद्-वहेत्, उद्-यच्छेत् । आजानेय-कृतम्—आ-जानेयानां (जात्यश्वानां)

आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम् ।
परं विषहते यस्मात् तस्मात् पुरुष उच्यते । १७

य आत्मनः प्रिय-सुखे हित्वा मृगयते श्रियम्,
अमात्यानाम् अथो हर्षम् आदधात्यचिरेण सः । १८

पुत्र उवाच,—

किं नु ते माम् अपश्यन्त्याः पृथिव्या अपि सर्वया,
किम् आभरण-कृत्यं ते, किम् भोगैर् जीवितेन वा ? १९

माता उवाच,—

किम्-अद्यकानां ये लोका द्विषन्तस् तान् अवाप्नुयुः ।
ये त्वादृतात्मनां लोका सुहृदस् तान् व्रजन्तु नः । २०

भृत्यैर् विहीयमानानां पर-पिण्डोपजीविनाम्
कृपणानाम् अ-सत्त्वानां मा वृत्तिम् अनुवर्तिथाः । २१

[युद्धे अन-वसाद-रूपं] कृतं [कर्म] । उद्भावय—उन्नय, उद्वह । मग्नं त्वत्-कृते—तव औदासीन्येन [दैन्य-सागरे] निमज्जितम् । १७ । आयसम्—लोहमयम्, लोहवत् कठिनम् । मृगयस्व—अन्विष्य । स्वकम्—स्वकीयं [राज्य-धनादिकम्] । परं वि-षहते—शत्रुं बाधते । १९ । पं १—माम् अपश्यन्त्यास् ते (तव) सर्वया पृथिव्यापि किन्नु ? इत्यन्वयः । २० । किम्-अद्यकानाम्—किम् अद्यम् [अद्+य, ३।१] (भोजनीयम्) इति ये चिन्तयन्ति तेषाम्, निर्धनानाम् ।

यदा मां चैव भार्यां च द्रष्टासि भृश-दुर्बलाम्,
न तदा जीवितेनार्थो भविता तव, सञ्जय। २२

दास-कर्म-करान् भृत्यान् आचार्यर्त्विक्-पुरोहितान्
अ-वृत्त्यास्मान् प्रजहतो दृष्ट्वा किं जीवितेन ते? २३

यदि कृत्यं न पश्यामि तवाद्याहं यथा पुरा
श्लाघनीयं यशस्यं च, का शान्तिर् हृदयस्य मे? २४

वयम् आश्रयणीयाः स्म, न श्रेतारः परस्य च।
सान्यम् आश्रित्य जीवन्ती परित्यक्ष्यामि जीवितम्। २५

अ-पारे भव नः पारम् अ-प्लवे भव नः प्लवः,
कुरुष्व स्थानम् अ-स्थाने, मृतान् संजीवयस्व नः। २६

एक-शत्रु-वधेनैव शूरो गच्छति विश्रुतिम्।
इन्द्रो वृत्र-वधेनैव महेन्द्रः समपद्यत। २७

यदैव लभते वीरः सु-युद्धेन महद् यशः,
तदैव प्रव्यथन्ते ऽस्य शत्रवो विनमन्ति च। २८

नास्मिन् जातु कुले जातो गच्छेद् यो ऽन्यस्य पृष्ठतः।
न त्वं परस्यानुचरस्, तात, जीवितुम् अर्हसि। २९

२३। अ-वृत्त्या—वृत्तेः(जीविकायाः) अभावेन हेतुना। प्रजहतः—परित्यजतः। २४। कृत्यम्—कर्तव्यं [पराक्रमम्]। २५। श्रेतारः—आश्रयितारः। २७। विश्रुतिम्—ख्यातिम्। २८। विनमन्ति—वशम् आयान्ति।

यो वै कश्चिद् इहाजातः क्षत्रियः क्षत्र-कर्म-वित्,
भयाद्, वृत्तिं समीक्ष्यैव, न नमेद् इह कस्यचित्। ३०

उद्-यच्छेद् एव न नमेद्; उद्यमो ह्येव पौरुषम्।
अप्यपर्वणि भज्येत, न नमेतेह कस्यचित्। ३१

पुत्र उवाच,—

कृष्णायसस्येव च ते संहृत्य हृदयं कृतम्।
अहो क्षत्र-समाचारो यत्र माम्, इतरं यथा, ३२

नियोजयसि युद्धाय पर-मातेव मां तथा!
ईदृशं वचनं ब्रूयाद् भवती पुत्रम् एक-जम्! ३३

माता उवाच,—

सर्वारम्भा हि विदुषां, तात, धर्मार्थ-कारणात्।
ताव् एवाभिसमीक्ष्याहं, सञ्जय, त्वाम् अचूचुदम्। ३४

३०। आ-जातः [आ-जन्+त, १।१]—सम्यग् जातः, सत्-कुल-प्रसूतः। वृत्तिम्—[क्षत्रस्य] स्वभावजं कर्म इत्यर्थः। समीक्ष्यैव—सम्यग् दृष्ट्वा। सम्यग् दर्शनं हि अष्टाङ्ग-मार्गस्य प्रथमम् अङ्गम्। तथा हि तथागतः। 'दृष्टि-सङ्कल्प-वाक्यानि कर्मणाम् अत्ययस् तथा आ-जीवश् चैव व्यायामः स्मृतिः समाधिर् एव च एतान् समाचरन् सम्यग् मुक्तो भवति तापसः' इति। न नमेत्—न वशम् आगच्छेत्। ३१। अप्यपर्वणि—अ-काण्डे ऽपि, अ-समये ऽपि, वृथापि। ३२। कृष्णायसस्य—लोहस्य। संहृत्य—पिण्डीकृत्य। अहो—हा। क्षत्र-समाचारः—क्षत्रियाणाम् विहिताचारः। ३३। तथा—तादृशी (आयस-हृदया) सती। ३४। आरम्भाः—उद्योगाः। धर्मार्थ-कारणात्——धर्मार्थ-साधनाय।

अस्मिंश् चेद् आगते काले कार्यं न प्रतिपद्यसे,
असम्भावित-रूपस् त्वम् आनृशंस्यं करिष्यसि, ३५

तं त्वाम् अ-यशसा स्पृष्टं न ब्रूयां यदि, सञ्जय,
खरी-वात्सल्यम् आहुस् तद् निः-सामर्थ्यम् अ-हेतुकम्। ३६

युद्धाय क्षत्रियः सृष्टः सञ्जयेह जयाय च।
जयन् वा वध्यमानो वा प्राप्नोतीन्द्र-स-लोकताम्। ३७

न शक्र-भवने पुण्ये दिवि तद् विद्यते सुखम्
यद् अ-मित्रान् रणे कृत्वा क्षत्रियः सुखम् एधते। ३८

आत्मा वापि परित्याज्यो निपात्याः शत्रवो ऽपिवा।
अतो ऽन्येन प्रकारेण शान्तिर् अस्य कुतो भवेत्? ३९

अथ त्वां पूजयिष्यामि, हत्वा वै सर्व-सैन्धवान्
अहं पश्यामि विजयं कृच्छ्र-भावितम् एव ते। ४०

अचूचुदम् [चुद्-इ+अम्]—प्रेरितवती अस्मि। ३५। काले—[युद्धोपयोगिनि] समये। कार्यम्—कर्त्तव्यं [युद्धम्]। प्रतिपद्यसे—आश्रयसि, अवलम्बसे। असम्भावित-रूपः—अ-सम्मानितरूपः तिरस्कृत-रूपः। आनृशंस्यम्—दयाम्। नञत्र विरोध-सूचकः। असम्भावित...करिष्यसि—शत्रुषु स्व-देहे च दयां कुर्वन् तिरस्कृत-रूपो भविष्यसि। ३६। खरी-वात्सल्यम्—अनुपयुक्ते पुत्रे गर्दभी-वात्सल्यम्, यत् वात्सल्यम् पुत्रम् उपयुक्ते कर्मणि न प्रवर्तयति तत् वृथैव। आहुः—विद्वांस इति शेषः। ४०। अथ—तदा। पश्यामि—[यदा] द्रक्ष्यामि। वर्त्तमान-सामीप्ये वर्त्तमान-प्रयोगः। कृच्छ्र-भावितम्—कष्टेन उत्पादितम्। ते—तव।

पुत्र उवाच,—

अ-कोषस्या-सहायस्य कुतः सिद्धिर् जयो मम
इत्यवस्थां विदित्वेमाम् आत्मनात्मनि दारुणाम् , ४१

राज्याद् भावो निवृत्तो मे त्रिदिवाद् इव दुष्कृतः ।
ईदृशं भवती कञ्चिद् उपायम् अनुपश्यति, ४२

तं मे, परिणत-प्रज्ञे, सम्यक् प्र-ब्रूहि पृच्छते ।
करिष्यामि च तत् सर्वं यथावद् अनुशासनम् । ४३

माता उवाच,—

पुत्र, नात्मावमन्तव्यः पूर्वाभिर् अ-समृद्धिभिः ।
अ-भूत्वा हि भवन्त्यर्था, भूत्वा नश्यन्ति चापरे । ४४

क्रुद्धान् लुब्धान् परिक्षीणान् अवलिप्तान् विमानितान् ,
स्पर्धिनश् चैव ये केचित् तान् युक्त उपधारय । ४५

एतेन त्वं प्रकारेण महतो भेत्स्यसे गणान्
महा-वेग इवोद्धूतो मातरिश्वा बलाहकान् । ४६

तेषाम् अग्र-प्रदायी स्याः कल्योत्थायी प्रियं-वदः ।
ते त्वां प्रियं करिष्यन्ति पुरो-धास्यन्ति च ध्रुवम् । ४७

---

४१ । आत्मना—स्वयम् । आत्मनि—बुद्धौ । ४२ । भावः—चित्तम् । दुष्कृतः [दुः-कृ+०, १।ब]—दुष्कर्माणः, पाप-कर्माणः । ४५ । युक्तः—समाहित-चित्तः, स्थिरचित्तः, अविचलितचित्तः । ४७ । तेषाम् अग्र-प्रदायी स्यात्—तेभ्यः (क्रुद्धादिभ्यो) [भक्तं वेतनं च] प्रथमं दद्यात् । [न चेत् सद्यः कुपितास् ते त्यजेयुः]।

यदैव शत्रुर् जानीयात् सपत्नं त्यक्त-जीवितम्,
तदैवास्माद् उद्विजेत सर्पाद् वेश्म-गताद् इव । ४८

तं विदित्वा पराक्रान्तं वशे न कुरुते यदि,
निर्वादैर् निर्वदेद् एनम्, अन्ततस् तद् भविष्यति । ४९

निर्वादाद् आस्पदं लब्ध्वा धन-वृद्धिर् भविष्यति ।
धनवन्तं हि मित्राणि भजन्ते चाश्रयन्ति च । ५०

स्खलितार्थं पुनस् तानि संत्यजन्ति च ; बान्धवाः
अप्यस्मिन् नाश्वसन्ते च जुगुप्सन्ते च तादृशम् । ५१

नैव राज्ञा दरः कार्यो जातु कस्याञ्चिद् आपदि,
अथ चेद् अपि दीर्णः स्याद्, नैव वर्तेत दीर्णवत् । ५२

कल्योत्थायी—यथाकालोद्यमशीलः । पुरोधास्यन्ति—अग्रे स्थापयिष्यन्ति । ध्रुवम्—निश्चितम् । ४८ । सपत्नम्—विपक्षम् । त्यक्त-जीवितम्—युद्धे जीवित-निराकाङ्क्षम् । शत्रुः—[स्व-जीवनरक्षण-काङ्क्षी] रिपुः । उद्विजेत—बिभीयात् । ४९ । तम्—शत्रुम् । वशे न कुरुते यदि—यदि [आत्मनः शक्तिहीनतया] स्वाज्ञायां न स्थापयति । निर्वादैः—परिनिष्ठितैः । निर्वदेत्—परिनिष्ठां प्रापयेत् साम्ना दानेन वा तं पर्यवस्थापयेत् । अन्ततः—शेषतः, फलतः । तद्—[शत्रोर्] वशीकरणम् । ५० । निर्वादात्—परिनिष्ठातः । आस्पदम्—स्थानम्, स्थितिम् स्थिरत्वम्, शत्रुणा अनुपद्रुतत्वम् इत्यर्थः । ५१ । स्खलितार्थम्—च्युत-धनम् । तानि—मित्राणि । न आश्वसन्ते—न विश्वसन्ति । जुगुप्सन्ते—निन्दन्ति । ५२ । दरः—[दॄ (भये) + अ, ३।१]—भयम् ।

दीर्णं हि दृष्ट्वा राजानं सर्वम् एवानुदीर्यते,
राष्ट्रं बलम् अमात्याश् च। पृथक् कुर्वन्ति ते मतीः। ५३

शत्रून् एके प्रपद्यन्ते, प्रजहत्य-परे पुनः।
अन्ये तु प्रजिहीर्षन्ति ये पुरस्ताद् विमानिताः। ५४

य एवात्यन्त-सुहृदस् त एनं पर्युपासते,
अ-शक्तयः स्वस्ति-कामा, बद्ध-वत्सा इला इव ! ५५

मा दीदरस् त्वं सुहृदो, मा त्वां दीर्णं प्रहासिषुः !
कृत्वा सौम्यम् इवात्मानं जयायोत्तिष्ठ, सञ्जय ! ५६

अस्ति नः कोष-निचयो महान्, अ-विदितस् तव।
तम् अहं वेद, नान्यस्। तम् उपसम्पादयामि ते। ५७

सन्ति नैकतमा भूयः सुहृदस् तव, सञ्जय,
सुख-दुःख-सहा, वीर, संग्रामाद् अ-निवर्तिनः। ५८

जातु—कदाचित्। दीर्णः [दॄ (चु. भये)+त, ११]—भीतः। ५३। अनुदीर्यते—राजवत् भीतं भवति। ५४। प्रपद्यन्ते—अभिगच्छन्ति। प्रजहति—त्यजन्ति। अपरे—स्वीयाः। प्रजिहीर्षन्ति—प्रहर्तुं (ताड़यितुम्) इच्छन्ति। ५५। पर्युपासते [परि-उप+आस+अन्ते]—सन्निधौ परिवृत्य आसते। इलाः—धेनवः। Cf. "सह-वत्सा न आगात्" इति मन्त्रवर्णः। ५६। मा दीदरः [दॄ+इ+स्]—मा दारय, मा भैषीः, मा बिभीहि। मा प्रहासिषुः [प्र-हा+अन्]—मा प्रजहतु, मा त्यजन्तु। सौम्यम्—शान्त-मूर्तिम्। ५७। उपसम्पादयामि—उपहरामि। ५८। नैकतमाः—[बहुषु] अ-सामान्याः।

तादृशा हि सहाया वै पुरुषस्य बुभूषतः,
इष्टं जिहीर्षतः किञ्चित्, सचिवाः, शत्रु-कर्षण। ५९

कुन्ती उवाच,—

तस्यास् त्वीदृशकं वाक्यं श्रुत्वापि स्वल्प-चेतसः
तमस् त्वपागमत् तस्य, सु-चित्रार्थ-पदाक्षरम्। ६०

पुत्र उवाच,—

उदके भूर् इयं धार्या मर्तव्यं प्रवणे मया
यस्य मे भवती नेत्री भविष्यद्-भूति-दर्शिनी। ६१

अहं हि वचनं त्वत्तः शुश्रूषुर् अपरापरम्,
किञ्चित् किञ्चित् प्रतिवदन् तूष्णीम् आसम् मुहुर् मुहुः, ६२

अ-तृप्यन्न् अमृतस्येव कृच्छ्राल् लब्धस्य बान्धवात्।
उद्यच्छाम्येष शत्रूणां नियमार्थं जयाय च। ६३

५९। बुभूषतः—भवितुं (वर्तितुम्, अवस्थातुम्) इच्छतः। जिहीर्षतः [हृ+स+अत् ६।१]—हर्तुं (साधयितुम्) इच्छतः। ६०। अपि स्वल्प-चेतसः—दुर्बल-हृदयस्यापि। तमः—मोहः। ६१। उदके—जले। भूः—[मज्जन्ती] पृथिवी, पित्र्यं राज्यम् इत्यर्थः। धार्या—धारणीया उद्धर्तव्या। धूः इति पाठान्तरम्। प्रवणे—[अथवा युद्ध-रूपे] प्रपाते। नेत्री—चालयित्री, उपदेष्ट्री, शिक्षयित्री। भूतिः—सम्पत्। ६२। अपरापरम्—उत्तरोत्तरम्। प्रतिवदन्—प्रतिकूलं वदन् [कृष्णायसस्येव च ते इत्यादिना]। ६३। अमृतस्य—अमृतेन। करणे षष्ठी। उद्-यच्छाम्येषः—अयमहम् उद्यमं करोमि। नियमार्थम्—नियमनार्थम्, निग्रहार्थम्।

कुन्ती उवाच,—

सदश्व इव स, क्षिप्तः, प्रणुन्नो वाक्य-सायकैः,
तच् चकार तथा सर्वं यथावद् अनुशासनम् । ६४
इदम् उद्धर्षणं भीमं तेजो-वर्धनम् उत्तमम्
राजानं श्रावयेद् मन्त्री सीदन्तं शत्रु-पीड़ितम् । ६५

नव-दशो ऽध्यायः

मातृ-सन्देशः

नमो धर्माय महते ! धर्मो धारयते प्रजाः ।
एतद् धनञ्जयो वाच्यो नित्योद्युक्तो वृकोदरः,— १

"यदर्थं क्षत्रिया सूते तस्य कालो ऽयम् आगतः ।
न हि वैरं समासाद्य सीदन्ति पुरुषर्षभाः ।" २

विदिता ते सदा बुद्धिर् भीमस्य, न स शाम्यति
यावद् अन्तं न कुरुते शत्रूणां शत्रु-कर्षणः । ३

सर्व-धर्म-विशेष-ज्ञां स्नुषां पाण्डोर् महात्मनः
ब्रूया, माधव, कल्याणीं कृष्णां, कृष्ण, यशस्विनीम् ,— ४

"युक्तम् एतद् , महाभागे, कुले जाते मनस्विनि,
यद् मे पुत्रेषु सर्वेषु यथावत् त्वम् अवर्तिथाः ।" ५

माद्री-पुत्रौ च वक्तव्यौ क्षत्र-धर्म-रताव् उभौ,
"विक्रमेणार्जितान् भोगान् वृणीतं जीविताद् अपि । ६

यच् च वः प्रेक्षमाणानां सर्व-धर्मोपचायिनाम्
पाञ्चाली परुषाण्युक्ता, को नु तत् क्षन्तुम् अर्हति ७

न राज्य-हरणं दुःखं द्यूते वापि पराजयः,
प्रव्राजनं सुतानां च, न मे तद् दुःख-कारणम् । ८

यत् तु सा बृहती श्यामा सभायां रुदती तदा
अश्रौषीत् परुषा वाचस् तद् मे दुःखतरं महत् ।" ९

तं वै ब्रूहि, महा-बाहो, सर्व-शस्त्र-भृतां वरम्
अर्जुनं पुरुष-व्याघ्रं "द्रौपद्याः पदवीं चर" । १०

पाण्डवान् कुशलं पृच्छेः स-पुत्रान् कृष्णया सह ;
मां च कुशलिनीं ब्रूयास् तेषु भूयो, जनार्दन ।
अ-रिष्टं व्रज पन्थानं । पुत्रान् मे परिपालय । ११

वैशम्पायन उवाच,—

अभि-वाद्याथ तां कृष्णः कृत्वा चाभिप्रदक्षिणम्,
निश्चक्राम महा-बाहुः सिंह-खेल-गतिस् ततः । १२

७। सर्व-धर्मोपचायिनाम्—सर्व-धर्म-वर्धन-शीलानाम् । ९ । बृहती—महती । १० । द्रौपद्याः पदवीं चर—शत्रु-स्त्रीणां वैधव्याय यतस्व ।

विंशो ऽध्यायः

माता-पुत्रौ

असिद्धानुनये कृष्णे कुरुभ्यः पाण्डवान् गते,
अभिगम्य पृथां, क्षत्ता शनैः शोचन्न् इवाब्रवीत् ,— १

"जानासि मे, जीव-पुत्रि, भावं नित्यम् अ-विग्रहे।
क्रोशतो न च गृह्णीते वचनं मे सुयोधनः २

उपपन्नो ह्यसौ राजा चेदि-पाञ्चाल-केकयैः
भीमार्जुनाभ्यां कृष्णेन युयुधान-यमैर् अपि, ३

उपप्लव्ये निविष्टो ऽपि धर्मम् एव युधिष्ठिरः
काङ्क्षते ज्ञाति-सौहार्दाद् बलवान् , दुर्बलो यथा ! ४

राजा तु धृत-राष्ट्रो ऽयं वयो-वृद्धो न शाम्यति,
मत्तः पुत्र-मदेनैव विधर्मे पथि वर्तते। ५

जयद्रथस्य कर्णस्य तथा दुःशासनस्य च
सौबलस्य च दुर्बुद्ध्या मिथो भेदः प्रपत्स्यते। ६

१। असिद्धानुनये—निष्फल-विनये। २। जीव-पुत्री—जीवाः (जीविताः) पुत्रा यस्याः सा, (जीवत्-पुत्रा)। ३। उपपन्नः—सङ्गतः, मिलितः। ४। काङ्क्षते—काङ्क्षति। आआ। बलवान् दुर्बलो यथा—स्वयं बलवान् सन्न् अपि दुर्बल इव। ५। विधर्मे—अ-धर्मे, धर्म-विरुद्धे। ६। प्रपत्स्यते—लप्स्यते।

ह्रियमाणे बलाद् धर्मे कुरुभिः को न संज्वरेत् ?
अ-साम्ना केशवे याते समुद्योक्ष्यन्ति पाण्डवाः । ७

ततः कुरूणाम् अनयो भविता वीर-नाशनः,
चिन्तयन् न लभे निद्राम् अहःसु च निशासु च ।" ८

श्रुत्वा तु कुन्ती तद् वाक्यम् अर्थ-कामेन भाषितम् ,
सा निश्वसन्ती दुःखार्ता मनसा विममर्श ह,— ९

"पाण्डवाश् चेदि-पाञ्चाला यादवाश् च समागताः
भारतैः सह योत्स्यन्ति । किं नु दुःखम् अतःपरम् ? १०

पश्ये दोषं ध्रुवं युद्धे तथा-युद्धे पराभवम् ।
अ-धनस्य मृतं श्रेयो । न हि ज्ञाति-क्षयो जयः । ११

पितामहः शान्तनव आचार्यश् च युधां पतिः
कर्णश् च धार्तराष्ट्रार्थं वर्धयन्ति भयं मम । १२

नाचार्यः कामवाञ् छिष्यैर् द्रोणो युध्येत जातुचित् ।
पाण्डवेषु कथं हार्दं कुर्याद् न च पितामहः ? १३

७। ह्रियमाणे—[विरोध-विषय-विचारात्] अपनीयमाने । संज्वरेत्—क्लिश्येत । समुद्-योक्ष्यन्ति—युद्धोद्योगं करिष्यन्ति । ९। अर्थ-कामेन—हित-कामनया । १०। योत्स्यन्ति—योत्स्यन्ते । पआ । ११। पश्ये—पश्यामि । आआ । अयुद्धे—युद्धाभावे ।

अयं त्वेको वृथा-दृष्टिर्, धार्तराष्ट्रस्य दुर्मतेः
मोहानुवर्ती, सततं पापो द्वेष्टि च पाण्डवान्, १४

महत्यनर्थे निर्बन्धी, बलवांश् च, विशेषतः,
कर्णः, सदा पाण्डवानां। तद् मे दहति सम्प्रति। १५

आशंसे त्वद्य कर्णस्य मनोऽहं पाण्डवान् प्रति
प्रसादयितुम्, आसाद्य, दर्शयन्ती यथातथम्।" १६

इति कुन्ती विनिश्चित्य कार्य-निश्चयम् उत्तमम्,
कार्यार्थम् अभिनिश्चित्य ययौ भागीरथीं प्रति। १७

आत्म-जस्य ततस् तस्य घृणिनः सत्य-सङ्गिनः
गङ्गा-तीरे पृथाश्रौषीद् वेदाध्ययन-निस्वनम्। १८

प्राङ्-मुखस्योर्ध्व-बाहोः सा पर्यतिष्ठत पृष्ठतः।
जप्यावसाने कार्यार्थं प्रतीक्षन्ती, तपस्विनी, १९

अतिष्ठत् सूर्य-तापार्ता कर्णस्योत्तर-वाससि
कौरव्य-पत्नी वार्ष्णेयी, पद्म-मालेव शुष्यती। २०

आपृष्ठ-तापाज् जप्त्वा, स परिवृत्य, यत-व्रतः,
दृष्ट्वा कुन्तीम्, उपातिष्ठद् अभिवाद्य, कृताञ्जलिः। २१

१६। आशंसे—इच्छामि १७। कार्यार्थम्—[अभिप्रेत-] कर्म साधयितुम्। १८। घृणिनः—दयालोः। सत्य-सङ्गिनः—सत्य-व्रतस्य। २०। उत्तर-वाससि—उत्तरीय-छायायाम्। शुष्यती—शुष्यन्ती। नुमभाव आर्षः। २१। आपृष्ठ-तापात्—अपराह्ण-पर्यन्तम्। परिवृत्य

यथा-न्यायं महा-तेजा मानी धर्म-भृतां वरः
उत्स्मयन् प्रणतः प्राह कुन्तीं वैकर्तनो वृषः,— २२

"राधेयो ऽहम् आधिरथिः कर्णस्। त्वाम् अभिवादये।
प्राप्ता किम्-अर्थं भवती ? ब्रूहि, किं करवाणि ते।" २३

कुन्ती उवाच,—

कौन्तेयस् त्वं, न राधेयो। न तवाधिरथः पिता।
नासि सूत-कुले जातः। कर्ण, तद् विद्धि मे वचः। २४

कानीनस् त्वं मया जातः पूर्वजः, कुक्षिणा धृतः
कुन्ति-राजस्य भवने। पार्थस् त्वम् असि पुत्रक। २५

प्रकाश-कर्मा तपनो, यो ऽयं देवो विरोचनः,
अजीजनत् त्वां मय्येव, कर्ण शस्त्र-भृतां वर। २६

स त्वं, भ्रातॄन् अ-संबुध्य, मोहाद् यद् उपसेवसे
धार्तराष्ट्रान्, न तद् युक्तं—त्वयि, पुत्र, विशेषतः। २७

एतद् धर्म-फलं, पुत्र, नराणां धर्म-निश्चये,
यत् तुष्यन्त्यस्य पितरो माता चाप्येक-दर्शिनी। २८

[परि-वृत्+य]—घूर्णित्वा। २२। उत्स्मयन्—उद्भूत-विस्मयः। २५। कानीनः—कन्यायाम् [अनूढायां नार्यां] जातः। २६। अजीजनत् [जन्-इ+द्]—जनयामास, उत्पादयामास। २८। एक-दर्शिनी—एकं पुत्रम् एव स्नेहेन पश्यन्ती।

अर्जुनेनार्जितां पूर्वं, हृतां लोभाद् अ-साधुभिः,
आच्छिद्य धार्तराष्ट्रेभ्यो, भुङ्क्ष्व यौधिष्ठिरीं श्रियम्। २९

अद्य पश्यन्तु कुरवः कर्णार्जुन-समागमम्।
असाध्यं किं नु लोके स्याद् युवयोः संहितात्मनोः ? ३०

वैशम्पायन उवाच,—

ततः सूर्याद् निश्चरितां कर्णः शुश्राव भारतीम्
दूरत्ययां प्रणयिनीं पितृवद् भास्करेरिताम्,— ३१

"सत्यम् आह पृथा वाक्यं। कर्ण, मातृ-वचः कुरु !
श्रेयस् ते स्याद्, नर-व्याघ्र, सर्वम् आचरतस् तथा"। ३२

एवम् उक्तस्य मात्रा च स्वयं पित्रा च भानुना
चचाल नैव कर्णस्य मतिः, सत्य-धृतेस् तदा। ३३

कर्ण उवाच,—

न चैतच् छ्रद्दधे वाक्यं, क्षत्रिये, भाषितं त्वया।
धर्म-द्वारं ममैतत् स्याद् नियोग-करणं भव। ३४

अहं चेत् क्षत्रियो जातो, न प्राप्तः क्षत्र-सत्क्रियाम्
त्वत्-कृते। किं नु पापीयः शत्रुः कुर्याद् ममाहितम् ? ३५

२९। आच्छिद्य—परिकृत्य। ३०। संहितात्मनोः—मिलित-चेतसोः। ३१। निश्चरिताम्—निर्गताम्। दुरत्ययाम्—दुरतिक्रमाम्। प्रणयिनीम्—परिचिताम्। ३४। श्रद्दधे—ग्राह्यं मन्ये। धर्म-द्वारम्—धर्माद् [वहिर्गमनस्य] द्वारम्। नियोग-करणम्—आदिष्ट-कर्मानुष्ठानम्। ३५। सत्क्रियाम्—संस्कारम्। त्वत्कृते—तव सुखाय तव कानीनो गर्भः प्रकाशो मा भूद् इति। पापीयः [पाप+ईयस्, ११]—पापतरम्।

न वै मम हितं पूर्वं मातृवच् चेष्टितं त्वया ।
सा मां सं-बोधयत्यद्य केवलात्म-हितैषिणी ! ३६

कृष्णेन सहितात् को वै न व्यथेत धनञ्जयात् ?
को ऽद्य भीतं न मां विद्यात् पार्थानां समितिं गतम् ? ३७

अ-भ्राता विदितः पूर्वं, युद्ध-काले प्रकाशितः
पाण्डवान् यदि गच्छामि, किं मां क्षत्रं वदिष्यति? ३८

सर्व-कामैः संविभक्तः पूजितश् च यथा-सुखम्,
अहं वै धार्तराष्ट्राणां कुर्यात् तद् अ-फलं कथम् ? ३९

मया प्लवेन संग्रामं तितीर्षन्ति दुरत्ययम्
अ-पारे पार-कामा ये, त्यजेयं तान् अहं कथम् ? ४०

अयं हि कालः सम्प्राप्तो धार्तराष्ट्रोपजीविनाम् ।
निर्वेष्टव्यं मया तत्र प्राणान् अ-परिरक्षता । ४१

धृतराष्ट्रस्य पुत्राणाम् अर्थे योत्स्यामि ते सुतैः
बलं च शक्तिं चास्थाय । न वै त्वय्यनृतं वदे । ४२

पृः ११२, श्लोः ३४—('भव') 'तव' स्यात् ३८ । क्षत्रम्—क्षत्रिय-जातिः, क्षत्रिय-समाजः । ३९ । सं-विभक्तः—प्राप्त-[सोदर-] भागः । ४० । तितीर्षन्ति [तॄ+स+अन्ति]—तर्तुम् इच्छन्ति । दुरत्ययम्—दुस्तरम् । ४१ । उपजीविनाम्—आश्रितानाम् । निर्वेष्टव्यम् [निः-विश्+तव्य, ११]—भुक्तान्नादेर् आनृण्यं कर्त्तव्यम् । ४२ । योत्स्यामि—योत्स्ये । पआ. । वदे—वदामि, कथयामि । आआ. ।

न च ते ऽयं समारम्भो मयि मोघो भविष्यति ।
वध्यान् विषह्यान् संग्रामे न हनिष्यामि ते सुतान् ४३

युधिष्ठिरं च भीमं च यमौ चैवार्जुनाद् ऋते ।
अर्जुनेन समं युद्धं मम यौधिष्ठिरे बले । ४४

अर्जुनं हि निहत्याजौ संप्राप्तं स्यात् फलं मया ।
यशसा चापि युज्येय निहतः सव्य-साचिना । ४५

न ते जातु नशिष्यन्ति पुत्राः पञ्च, यशस्विनि,
निरर्जुना स-कर्णा वा सार्जुना वा हते मयि । ४६

वैशम्पायन उवाच,—

इति कर्ण-वचः श्रुत्वा कुन्ती, दुःखात् प्रवेपती,
उवाच, पुत्रम् आश्लिष्य, कर्णम्, धैर्याद् अ-कम्पनम्,— ४७

"एवं वै भाव्यम्! एतेन क्षयं यास्यन्ति कौरवाः
यथा त्वं भाषसे, कर्ण । दैवं तु बलवत्तरम्! ४८

त्वया चतुर्णां भ्रातॄणाम् अ-भयं, शत्रु-कर्षण,
दत्तं । तत् प्रति-जानीहि सङ्गर-प्रतिमोचनम् ।" ४९

अनामयं स्वस्ति चेति पृथाथो कर्णम् अब्रवीत् ।
तां कर्णो ऽथ तथेत्युक्त्वा, ततस् तौ जग्मतुः पृथक् । ५०

---

४३ । समारम्भः—उद्योगः । वध्यान्—वधार्हान् । विषह्यान्—हन्तुं शक्यान् [अपि] ।४७ । प्रवेपती—प्र-वेपमाना, निरतिशयं कम्पमाना । पआ. । ४८ । भाव्यम्—अवश्यं भवितव्यम् । ४९ । प्रतिजानीहि—स्वीकुरु । सङ्गर-प्रतिमोचनम्—प्रतिज्ञा-पालनम्, प्रतिज्ञात-कर्म-सम्पादनम् ।

एक-विंशो ऽध्यायः

पाण्डवाभिनिर्याणम्

आगस्य हास्तिन-पुराद् उपप्लव्यम्, अरिन्दमः
पाण्डवानां यथा-वृत्तं केशवः सर्वम् उक्तवान्। १

जनार्दन-वचः श्रुत्वा, धर्म-राजो युधिष्ठिरः
भ्रातॄन् उवाच, धर्मात्मा, समक्षे केशवस्य ह,— २

"श्रुतं भवद्भिर् यद् वृत्तं सभायां कुरु-संसदि।
तस्मात् सेना-विभागं मे कुरुध्वं, नर-सत्तमाः। ३

अक्षौहिण्यस् तु सप्तैताः समेता विजयाय वै।
तासां ये पतयः सप्त विख्यातास्, तान् निबोधत। ४

विराटश् च द्रुपदश् च धृष्टद्युम्न-शिखण्डिनौ
सात्यकिश् चेतिकानश् च भीमसेनश् च वीर्यवान्। ५

सप्तानाम् अपि यो नेता सेनानां, प्रविभागवित्,
यः सहेत रणे भीष्मं शरार्चिः-पावकोपमम्, ६

तं तावत् सहदेवात्र प्रब्रूहि, कुरु-नन्दन—
स्व-मतं, पुरुष-व्याघ्र, को नः सेना-पतिः क्षमः।" ७

सहदेव उवाच,—

संयुक्त एक-दुःखश् च वीर्यवांश् च मही-पतिः
यं समाश्रित्य धर्म-ज्ञं स्वम् अंशम् अनु-युञ्ज्महे, ८

८। संयुक्तः सम्बन्धी।

मत्स्यो विराटो बलवान् कृतास्त्रो युद्ध-दुर्मदः
प्रसहिष्यति संग्रामे भीष्मं तांश् च महा-रथान् । ९

वैशम्पायन उवाच,—

तथोक्ते सहदेवेन वाक्ये, वाक्य-विशारदः
नकुलो ऽनन्तरं तस्माद् इदं वचनम् आददे,— १०

"वयसा शास्त्रतो धैर्यात् कुलेनाभिजनेन च
यो नित्यं स्पर्धते द्रोणं भीष्मं चैव महा-बलम्, ११

पितेवास्मान् समाधत्ते यः सदा पार्थिवर्षभः,
श्वशुरो द्रुपदो ऽस्माकं सेनाग्रं संप्रकर्षतु ।" १२

माद्री-सुताभ्याम् उक्ते तु स्व-मते, कुरु-नन्दनः
वासविर् वासवोपमः सव्य-साच्यब्रवीद् वचः,— १३

"पुरुषं तं न पश्यामि यः सहेत महाव्रतम्
धृष्टद्युम्नम् ऋते, राजन्न्, इति मे धीयते मतिः । १४

क्षिप्र-हस्तश् चित्र-योधी मतः सेनापतिर् मम
अ-भेद्य-कवचः श्रीमान् मातङ्ग इव यूथ-पः ।" १५

---

११ । कुलेन—वंशेन । अभिजनेन—स्व-जन-समूहेन । १३ । वासविः [वासव (इन्द्र)+इ, ११।]—इन्द्र-पुत्रः [अर्जुनः] । १४ । महाव्रतम्—भीष्मम् । Cf. उपरिष्टात् १।३ ।

भीमसेन उवाच,—

यस्य संग्राम-मध्येषु दिव्यम् अस्त्रम् प्रकुर्वतः
रूपं द्रक्ष्यन्ति पुरुषा, रामस्येव महात्मनः, १६

न तं युद्धे प्रपश्यामि यो भिन्द्यात् तं शिखण्डिनम्
शस्त्रेण समरे, राजन्, सन्नद्धं, स्यन्दने स्थितम्। १७

द्वैरथे समरे नान्यो भीष्मं हन्याद् महा-व्रतम्
शिखण्डिनम् ऋते वीरं। स मे सेना-पतिर् मतः। १८

युधिष्ठिर उवाच,—

सर्वस्य जगतस्, तात, सारासारं बलाबलम्
सर्वं जानाति धर्मात्मा मतम् एषां च केशवः। १९

यम् आह कृष्णो दाशार्हः सो ऽस्तु सेना-पतिर् मम,
कृतास्त्रो ऽप्य-कृतास्त्रो वा वृद्धो वा यदि वा युवा। २०

वैशम्पायन उवाच,—

तस्य तद् वचनं श्रुत्वा धर्म-राजस्य धीमतः
अब्रवीत् पुण्डरीकाक्षो धनञ्जयम् अवेक्ष्य ह,— २१

"ममाप्येते, महाराज, भवद्भिर् य उदाहृताः
नेतारस् तव सेनाया, मता, विक्रान्त-योधिनः। २२

१६। रामस्य—परशु-रामस्य। Cf. उपरिष्टात् ३।३६। १७। सन्नद्धम्—वर्मितम्। २१। धनञ्जयम् अवेक्ष्य—धनञ्जय-मतम् एव मम मतम् इति धनञ्जयं प्रति दृष्टि-निक्षेपेण सूचयित्वा।

सर्व एव समर्था हि तव शत्रुं प्रबाधितुम् ।
इन्द्रस्यापि भयं ह्येते जनयेयुर् महाहवे । २३

सारवद् बलम् अस्माकं दुष्प्रधर्षं दुरासदम्—
धृष्टद्युम्नम् अहं मन्ये सेना-पतिम् , अरिन्दम ।" २४

एवम् उक्ते तु कृष्णेन संप्राहृष्यन् नरोत्तमाः ।
तेषां प्रहृष्ट-मनसां नादः समभवद् महान् । २५

हय-वारण-शब्दाश् च नेमि-घोषाश् च सर्वतः
शङ्ख-दुन्दुभि-घोषाश् च तुमुलाः सर्वतो ऽभवन् । २६

प्रयास्यतां पाण्डवानां स-सैन्यानां समन्ततः
गङ्गेव पूर्णा, दुर्धर्षा समदृश्यत वाहिनी । २७

प्रहृष्टा दुर्धर्षा योधाः परानीक-विदारणाः,
तेषां मध्ये ययौ राजा कुन्ती-पुत्रो युधिष्ठिरः । २८

शकटापण-वेशाश् च यानं युग्यं च सर्वशः,
कोषं यन्त्रायुधं चैव ये च वैद्याश् चिकित्सकाः , २९

---

२९ । शकटाः—[भाण्डवन्ति] अनांसि । आपणः—पण्य-द्रव्य-शाला पण्य-सहित-बणिक्-समुदायः इत्यर्थः । वेशः---वेश्या-जनः । यानम्--युद्ध-योग्यं वाहनम् । युग्यम्—युगार्हं वहनमात्र-योग्यं वाहनम् । कोषम्—धन-चयम् । यन्त्रायुधम्—गोलक-प्रक्षेपकम् यन्त्रम् । चिकित्सकाः—शल्योद्धरण-विद्या-विदः Cf. परस्तात् ५।१९।२२-२३ ।

फल्गु यच् च बलं किञ्चिद् यच् चापि कृश-दुर्बलम्,
तत् संगृह्य ययौ राजा, ये चापि परिचारकाः। ३०

उपप्लव्ये तु पाञ्चाली द्रौपदी सत्य-वादिनी
सह स्त्रीभिर् निववृते, दासी-दास-समावृता। ३१

कृत्वा मूल-प्रतीकारं गुल्मैः स्थावर-जङ्गमैः
स्कन्धावारेण महता प्रययुः पाण्डु-नन्दनाः। ३२

ते ऽवगाह्य कुरु-क्षेत्रं शङ्खान् दध्मुर् अरिन्दमाः।
निशम्य सर्व-सैन्यानि समहृष्यन्त सर्वशः। ३३

शङ्ख-दुन्दुभि-संहृष्टः सिंह-नादस् तरस्विनाम्
पृथिवीं चान्तरीक्षं च सागरांश् चान्वनादयत्। ३४

ततो देशे समे स्निग्धे प्रभूत-यवसेन्धने
निवेशयामास तदा सेनां राजा युधिष्ठिरः। ३५

परिहृत्य श्मशानानि देवतायतनानि च
आश्रमांश् च महर्षीणां तीर्थान्यायतनानि च ३६

३०। फल्गु—अ-सारम्। ३२। मूल-प्रतीकारम्—धनद्वार-रक्षाम्। गुल्मैः स्थावर-जङ्गमैः—स्थावरैः (स्थिति-शीलैः) शूर-गण-कर्म-सम्पादक-प्राकारैः परितः स्थाने स्थाने स्थापितैः शूर-सङ्घैश् च। स्कन्धावारेण—सैन्येन। ३३। समहृष्यन्त—रोमाञ्चितानि बभूवुः। ३५। यवसम्—घासः।

मधुरानूषरे देशे शुचौ पुण्ये महा-मतिः
निवेशं कारयामास कुन्ती-पुत्रो युधिष्ठिरः । ३७

विद्राव्य शतशो गुल्मान्—धार्तराष्ट्रस्य सैनिकान्
पर्यक्रामत् समन्ताच् च पार्थेन सह केशवः । ३८

शिविरं मापयामास धृष्टद्युम्नश् च पार्षतः
सात्यकिश् च रथोदारो युयुधानः प्रतापवान् । ३९

आसाद्य सरितं पुण्यां कुरु-क्षेत्रे हिरण्वतीम्
सूप-तीर्थां शुचि-जलां शर्करा-पङ्क-वर्जिताम्, ४०

खानयामास परिखां केशवस् तत्र, भारत,
गुप्त्यर्थम् अपि चादिश्य बलं तत्र न्यवेशयत् । ४१

विधिर् यः शिविरस्यासीत् पाण्डवानां महात्मनाम्,
तद्-विधानि नरेन्द्राणां कारयामास केशवः । ४२

प्रभूततर-काष्ठानि दुराधर्षतराणि च
भक्ष्य-भोज्यान्न-पानानि, शतशोऽथ सहस्रशः ४३

शिविराणि महार्हाणि राज्ञां तत्र पृथक् पृथक्,
विमानानीव, राजेन्द्र, निविष्टानि मही-तले । ४४

---

३७ । मधुरे—मनोहरे । ३८ । गुल्मान्—सैनिक-सङ्घान् । पर्यक्रामत समन्तात्—चतुर्दिक्षु बभ्राम । ४० । सूपतीर्थाम्—शोभनोपक्रमणाम् । ४२ । तद्विधानि—शिविराणि इति शेषः ।

तत्रासन् शिल्पिनः प्राज्ञाः शतशो दत्त-वेतनाः
सर्वोपकरणैर् युक्ता, वैद्याः शास्त्र-विशारदाः, ४५

ज्या-धनुर्-वर्म-शस्त्राणां तथैव मधु-सर्पिषोः
स-सर्ज-रस-पांशूनां राशयः पर्वतोपमाः । ४६

बहूदकं सु-यवसं तुषाङ्गार-समन्वितम्
शिविरे शिविरे राजा सञ्चकार युधिष्ठिरः । ४७

महा-यन्त्राणि नाराचास् तोमराणि परश्वधाः
धनूंषि कवचादीनि ऋष्टयस् तूण-संयुताः ४८

गजाः कण्टक-सन्नाहा लोह-वर्मोत्तर-च्छदाः
दृश्यन्ते तत्र गिर्याभाः सहस्र-शत-योधिनः । ४९

निविष्टान् पाण्डवांस् तत्र ज्ञात्वा, मित्राणि, भारत,
अभिसस्रुर् यथा-देशं, स-बलाः सह-वाहनाः । ५०

---

४८ । ऋष्टयः—खड्गाः । ४९ । कण्टक-सन्नाहाः—कण्टकानि (कण्टक-जालानि) सन्नाहाः (कवचानि) येषां तादृशाः । कण्टक-जाल-समावृत-गज-देह-स्पर्शेन गजान्तरस्य कण्टक-वेधो भवति । ५० । निविष्टान्—कृत-निवेशान् । अभिसस्रुः—अभ्याजग्मुः । स-बलाः सह-वाहनाः—स-बलानि सह-वाहनानि च । मित्र-शब्दस्य क्लीवत्वेऽपि तदर्थस्य पुंस्त्वात् तद्-विशेषणयोः पुंस्त्वम् । लोह-वर्मोत्तर-च्छदाः—लोह-वर्म उत्तर-च्छदः (उपरि-स्थम् आवरणं) येषां ते तादृशाः ।

द्वा-विंशो ऽध्यायः

कौरव-निर्याणम्

अभियाते तु दाशार्हे, राजा दुर्योधनस् तदा
कर्णं दुःशासनं चैव शकुनिं चाब्रवीद् इदम् ,— १

"अकृतेनैव कार्येण गतः पार्थान् अधोक्षजः ।
स एनान् मन्युनाविष्टो ध्रुवं धक्ष्यत्यसंशयम् । २

इष्टो हि वासुदेवस्य पाण्डवैर् मम विग्रहः ।
भीमसेनार्जुनौ चैव दाशार्हस्य मते स्थितौ । ३

अ-जात-शत्रुर् अत्यर्थं भीमार्जुन-वशानुगः ।
निकृतश् च मया पूर्वं सह सर्वैः सहोदरैः । ४

विराट-द्रुपदौ चैव कृत-वैरौ मया सह ।
तौ च सेना-प्रणेतारौ वासुदेव-वशानुगौ । ५

भविता विग्रहः सो ऽयं तुमुलो लोम-हर्षणः ।
तस्मात् सांग्रामिकं सर्वं कारयध्वम् अ-तन्द्रिताः । ६

शिविराणि कुरु-क्षेत्रे क्रियन्तां, वसुधाधिपाः,
सु-पर्याप्तावकाशानि, दुरादेयानि शत्रुभिः, ७

आसन्न-जल-कोष्ठानि, शतशो ऽथ सहस्रशः,
अच्छेद्याहार-मार्गाणि रत्नोच्चय-चितानि च,
विचित्रायुध-पूर्णानि पताका-ध्वजवन्ति च । ८

---

८ । आसन्न-जल-कोष्ठानि—आसन्न-जलाः (सन्निहित-जलाः)

समाश् च तेषां पन्थानः क्रियन्तां नगराद् बहिः।
प्रयाणं घुष्यताम् अद्य 'श्वो-भूत' इति मा चिरम्"। ९

ततस् ते पार्थिवाः सर्वे, तच् छ्रुत्वा राज-शासनम्,
आसनेभ्यो महार्हेभ्य उदतिष्ठन्न् अमर्षिताः। १०

ते, रथान् रथिनः श्रेष्ठा, हयांश् च हय-कोविदाः
सज्जयन्ति स्म, नागांश् च नाग-शिक्षा-स्वनुष्ठिताः। ११

अथ वर्माणि चित्राणि काञ्चनानि बहूनि च,
विविधानि च शस्त्राणि चक्रुः सर्वाणि सर्वशः। १२

पदातयश च पुरुषाः शस्त्राणि विविधानि च
उपाजह्रुः शरीरेषु हेम-चित्राण्यनेकशः। १३

तद् उत्सव इवोदग्रं संप्रहृष्ट-नरावृतम्
नगरं धार्तराष्ट्रस्य भारतासीत् समाकुलम्। १४

व्युष्टायां वै रजन्यां तु, राजा दुर्योधनस् ततः
व्यभजत् तान्यनीकानि दश चैकं च, भारत। १५

कोष्ठाः (कक्ष्याः) येषु तानि। अच्छेद्याहार-मार्गाणि—अ-च्छेद्याः (शत्रु-भिर् अनिवार्याः) आहारस्य (वस्तूनाम् आहरणस्य) मार्गाः येषु तानि। चितानि—पूर्णानि। १३। उपाजह्रुः [उप-आ-हृ+उस्]—परिदध्रिरे। १५। व्युष्टायाम्—व्यतीतायाम्।

नर-हस्ति-रथाश्वानां सारं मध्यं च फल्गु च
सर्वेषु तेष्वनीकेषु सन्दिदेश मही-पतिः ।। १६

तत्र दुर्योधनो राजा शूरान् बुद्धिमतो नरान्
प्रसमीक्ष्य महा-बाहुश् चक्रे सेना-पतींस् तदा । १७

पृथग् अक्षौहिणीनां च प्रणेतॄन् नर-सत्तमान्
विधिवत् , पूर्वम् आनीय, पार्थिवान् अभ्यषेचयत्— १८

कृपं द्रोणं च शल्यं च सैन्धवं च जयद्रथम्
सु-दक्षिणं च काम्बोजं कृत-वर्माणम् एव च १९

द्रोण-पुत्रं च कर्णं च भूरि-श्रवसम् एव च
शकुनिं सौबलं चैव बाह्लीकं च महा-बलम् । २०

दिवसे दिवसे चैषां प्रति-वेलं च, भारत,
चक्रे स विविधाः पूजाः प्रत्यक्षं च पुनः पुनः । २१

तथा विनियताः सर्वे ये च तेषां पदानुगाः
बभूवुः सैनिका, राजन्, प्रियं राज्ञश् चिकीर्षवः । २२

ततः शान्तनवं भीष्मं प्राञ्जलिर् धृत-राष्ट्र-जः
सह सर्वैर् मही-पालैर् इदं वचनम् अब्रवीत् ,— २३

"ऋते सेना-प्रणेतारं पृतना सुमहत्यपि
दीर्यते युद्धम् आसाद्य, पिपीलिक-पुटं यथा । २४

---

१६ । सारम् — पुरोगामि । मध्यम्—मध्यम् । फल्गु—पाश्चात्यम् । २१ । प्रति-वेलम्—अवसरे अवसरे । २४ । सेना-प्रणेतारम्—सेना-नायकम् ।

न हि जातु द्वयोर् बुद्धिः समा भवति कर्हिचित् ।
शौर्यं च नाम नेतॄणां स्पर्धते च परस्परम् । २५

श्रूयते च, महा-प्राज्ञ, हैहयान् अमितौजसः
अभ्ययुर् ब्राह्मणाः सर्वे समुच्छ्रित-कुश-ध्वजाः । २६

तान् अभ्ययुस् तदा वैश्याः शूद्राश् चैव, पितामह ।
एकतस् तु त्रयो वर्णा, एकतः क्षत्रियर्षभाः । २७

ते स्म युद्धेष्वभज्यन्त त्रयो वर्णाः पुनः पुनः ।
क्षत्रियाश् च जयन्त्येव बहुलं चैकतो बलम् । २८

ततस् ते क्षत्रियान् एव पप्रच्छुर् द्विज-सत्तमाः ।
तेभ्यः शशंसुर् धर्म-ज्ञा याथातथ्यं, पितामह,— २९

'वयम् एकस्य शृणुमो महा-बुद्धिमतो रणे ।
भवन्तस् तु पृथक् सर्वे स्व-बुद्धि-वश-वर्तिनः ।' ३०

ततस् ते ब्राह्मणाश् चक्रुर् एकं सेना-पतिं द्विजम्,
नये सु-कुशलं, शूरम्; अजयन् क्षत्रियांस् ततः । ३१

एवं ये कुशलं शूरं हितेप्सितम् अ-कल्मषम्
सेना-पतिं प्रकुर्वन्ति, ते जयन्ति रणे रिपून् । ३२

पृतना—सेना । पिपीलिक-पुटम्—कर-तल-द्वय-विरचित-पात्र-स्थः अन्योन्य-संश्लिष्टः बृहत्-पील-समूहः । पिपीलकः—पीलः, डेउया । पिपीलिका—क्षुद्रे पीपिड़ा । २६ । हैहयान्—हैहयाख्यस्य कार्तवीर्यार्जुनस्य अनुगान् तदधिकृत-प्रदेशाधिवासिनः क्षत्रियान् ।

भवान् उशनसा तुल्यो हितैषी च सदा मम,
अ-संहार्यः, स्थितो धर्मे। स नः सेना-पतिर् भव। ३३

भवता हि वयं गुप्ताः, शक्रेणेव दिवौकसः,
अनाधृष्या भविष्यामस् त्रिदशानाम् अपि ध्रुवम्। ३४

प्रयातु नो भवान् अग्रे, देवानाम् इव पावकिः।
वयं त्वाम् अनुयास्यामः, सौरभेया इवर्षभम्।" ३५

भीष्म उवाच,—

एवम् एतद्, महाबाहो, यथा वदसि, भारत।
संयोद्धव्यम् तवार्थाय यथा मे समयः कृतः। ३६

न तु पश्यामि योद्धारम् आत्मनः सदृशं भुवि,
ऋते तस्माद् नर-व्याघ्रात् कुन्ती-पुत्राद् धनञ्जयात्। ३७

स हि वेद, महा-बुद्धिर्, दिव्यान्यस्त्राण्यनेकशः।
न तु मां विवृतो युद्धे जातु युध्येत पाण्डवः ३८

अहं चैव क्षणेनैव निर्मनुष्यम् इदं जगत्
कुर्यां शस्त्र-बलेनैव, स-सुरासुर-राक्षसम्। ३९

३३। उशनसा—शुक्रेण। तम् एवाश्रित्य असुरा देवान् विजिग्यिरे। असंहार्यः—[पितुर् वर-दानात् कालेनापि] संहर्तुम् (हन्तुम्, नाशयितुम्) अशक्यः। ३५। पावकिः—[पावक+इ, ११] कार्तिकेयः। सौरभेयाः—सुरभि-वंश्याः, गावः। ३६। यथा मे समयः कृतः—उपरिष्टात् ११३। ३८। विवृतः [सन्]—विस्पष्टः, [सन्] प्रकाशम्।

न त्वेवोत्सादनीया मे पाण्डोः पुत्रा, नराधिप।
तस्माद् योधान् हनिष्यामि प्रयोगेणायुतं सदा। ४०

एवम् एषां करिष्यामि निधनं, कुरु-नन्दन,
न चेत् ते मां हनिष्यन्ति पूर्वम् एव समागमे। ४१

वैशम्पायन उवाच,—

ततः सेना-पतिं चक्रे विधिवद् भूरि-दक्षिणम्
धृतराष्ट्रात्मजो भीष्मं। सो ऽभिषिक्तो व्यरोचत। ४२

ततो भेरीश् च शङ्खांश् च शतशो ऽथ सहस्रशः
वादयामासुर् अ-व्यग्राः पुरुषा राज-शासनात्। ४३

वाचयित्वा द्विज-श्रेष्ठान् गोभिर् निष्कैश् च भूरिशः,
वर्धमानो जयाशीर्भिर् निर्ययौ, सैनिकैर् वृतः; ४४

आपगेयं पुरस्कृत्य भ्रातृभिः सहितस् तदा।
स्कन्धावारेण महता कुरु-क्षेत्रं जगाम ह। ४५

परिक्रम्य कुरु-क्षेत्रं कर्णेन सह कौरवः,
शिविरं मापयामास समे देशे नराधिपः— ४६

मधुरानूषरे देशे प्रभूत-यवसेन्धने।
यथैव हास्तिन-पुरं तद्वच् छिविरम् आबभौ। ४७

४०। उत्सादनीयाः—उत्सादयितुम् (नाशयितुम्) अर्हाः। मे—मया। प्रयोगेण—उपायानुष्ठानेन। सदा—प्रत्यहम्। ४३। अ-व्यग्राः—अनाकुलाः।

त्रयो-विंशो ऽध्यायः

आगन्तुक-त्रयम्

सेना-प्रणेतॄन् विधिवद् अभ्यषिञ्चद् युधिष्ठिरः ;
सर्व-सेना-पतिं चात्र धृष्टद्युम्नं चकार ह ;
सेना-पति-पतिं चक्रे गुडाकेशं धनञ्जयम् । १

अर्जुनस्यापि नेता च संयन्ता चैव वाजिनाम्
सङ्कर्षणानुजः श्रीमान् महा-बुद्धिर् जनार्दनः । २

तद् दृष्ट्वोपस्थितं युद्धं समासन्नं महात्ययम्,
प्राविशद् भवनं, राजन्, पाण्डवानां हलायुधः । ३

वासुदेवम् अभिप्रेक्ष्य रौहिणेयो ऽभ्यभाषत,—
"भवितायं महा-रौद्रो दारुणः पुरुष-क्षयः । ४

उभौ शिष्यौ हि मे वीरौ गदा-युद्ध-विशारदौ ।
तुल्य-स्नेहो ऽस्म्यतो भीमे तथा दुर्योधने नृपे । ५

तस्माद् यास्यामि तीर्थानि सरस्वत्या निषेवितुम् ।
न हि शक्ष्यामि कौरव्यान् नश्यमानान् उपेक्षितुम् । ६

---

३ । महात्ययम्—अत्यन्त-क्षय-करम् । ४ । रौहिणेयः [रोहिणी+एय, ११]—रोहिणी-पुत्रो [बलरामः] । ६ । नश्यमानान्—नश्यतः । आआ. ।

एवम् उक्त्वा, महा-बाहुर्, अनुज्ञातश् च पाण्डवैः,
तीर्थ-यात्रां ययौ रामो, निवर्त्य मधु-सूदनम्। ७

दाक्षिणात्य-पतेः पुत्रो, दिक्षु रुक्मीति विश्रुतः,
अक्षौहिण्या महा-वीर्यः पाण्डवान् क्षिप्रम् आगमत्। ८

स, पूजितः पाण्डु-पुत्रैर् यथा-न्यायं, सु-संस्तुतः,
उवाच मध्ये वीराणां कुन्तीपुत्रं धनञ्जयम्,— ९

"सहायो ऽस्मि स्थितो युद्धे यदि भीतो ऽसि, पाण्डव।
निहत्य समरे शत्रूंस्, तव दास्यामि मेदिनीम्।" १०

उवाच धीमान् कौन्तेयः प्रहस्य सखि-पूर्वकम्,—
"नास्मि भीतो, महा-बाहो, सहायार्थश् च नास्ति मे।
यथा-कामं यथा-योगं गच्छ वात्रैव तिष्ठ वा।" ११

विनिवर्त्य ततो रुक्मी सेनां सागर-सन्निभाम्
दुर्योधनम् उपागच्छत् तथैव, भरतर्षभ। १२

तथैव चाभिगम्यैनम् उवाच वसुधाधिपः।
प्रत्याख्यातश् च तेनापि स तदा शूर-मानिना। १३

द्वाव् एव तु, महा-राज, तस्माद् युद्धाद् अपेयतुः,
रौहिणेयश् च वार्ष्णेयो रुक्मी च वसुधाधिपः। १४

सेना-निवासं संप्राप्तः, कैतव्यः, पाण्डवस्य ह,
समागतः पाण्डवेयैर्, युधिष्ठिरम् अभाषत,— १५

"इदं त्वाम् अब्रवीद् राजा धार्तराष्ट्रो महा-मनाः,
'अ-समागम्य भीष्मेण संयुगे किं विकत्थसे' ?" १६

स, केशवम् अभिप्रेक्ष्य, गुडाकेशो महायशाः
अभ्यभाषत कैतव्यं, प्रगृह्य विपुलं भुजम् ,— १७

"स्व-वीर्यं यः समाश्रित्य समाह्वयति वै परान् ,
अ-भीतो युध्यते शत्रून् , स वै पुरुष उच्यते । १८

पर-वीर्यं समाश्रित्य यः समाह्वयते परान्
क्षत्र-बन्धुर् , अ-शक्तत्वाल् लोके स पुरुषाधमः । १९

भावस् ते विदितो ऽस्माभिर् , दुर्बुद्धे, कुल-पांसन,
न हनिष्यन्ति गाङ्गेयं पाण्डवा घृणयेति हि । २०

यस्य वीर्यं समाश्रित्य, धार्तराष्ट्र, विकत्थसे,
हन्तास्मि प्रथमं भीष्मं मिषतां सर्व-धन्विनाम् । २१

कैतव्य, गत्वा, भरतान् समेत्य,
सुयोधनं धार्तराष्ट्रं वदस्व
'तथेत्युवाचार्जुनः सव्य-साची' ।
निशा-व्यपाये भविता विमर्दः ।" २२

---

१९ । क्षत्र-बन्धुः—क्षत्रस्य बन्धुः (स्व-जनः), जात्या एव क्षत्रियः न तु कर्मणा । २० । घृणया—[वात्सल्य-जनित-] दयया । २१ । हन्तास्मि—अचिरेण हनिष्यामि । मिषतां सर्व-धन्विनाम्—मिषतः (पश्यतः) [सह-योगिनः] सर्वान् एव धन्विनः अनादृत्य (विफल-रक्षण-प्रयत्नान् कृत्वा) । २२ । भरतान्—कौरवान् इति भावः । समेत्य—मेलयित्वा, एकीकृत्य । निशा-व्यपाये—श्वो-भूते ।

चतुर्विंशो ऽध्यायः

समर-सामर्थ्यम्

सैनापत्यम् अनुप्राप्य, भीष्मः शान्तनवो, नृप,
दुर्योधनम् उवाचेदं वचनं, हर्षयन्न् इव,— १

"नमस्कृत्य कुमाराय सेनान्ये शक्ति-पाणये,
अहं सेनापतिस् ते ऽद्य भविष्यामि, न संशयः। २

ये रथाः, पृथिवी-पाल, तथैवाति-रथाश् च ये,
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च। ३

सखा ते दयितो नित्यं य एष रण-कर्कशः
उत्साहयति, राजंस्, त्वां विग्रहे पाण्डवैः सह, ४

परुषः कत्थनो नीचः कर्णो वैकर्तनस्, तव
मन्त्री नेता च बन्धुश् च, मानी चात्यन्तम् उच्छ्रितः, ५

एष नैव रथः कर्णो न चाप्यति-रथो रणे।
नैष फाल्गुनम् आसाद्य पुनर् जीवन् विमोक्ष्यते।" ६

उवाच भीष्मं राधेयस्, तुदन् वाग्भिः प्रतोदवत्,—
" 'भवान् अर्ध-रथो मह्यं मतो वै'—नात्र संशयः,
सर्वस्य जगतश् चैव—गाङ्गेयो न मृषा वदेत्। ७

७। भवान्—कर्णः। वदेत्—कथयेत् [इति हेतुना]।

'श्रोतव्यं खलु वृद्धानाम्' इति शास्त्र-निदर्शनम् ।
न त्वेव ह्यति-वृद्धानाम् । पुनर् बाला हि ते मताः । ८

अहम् एको हनिष्यामि पाण्डवानाम् अनीकिनीम्
सु-युद्धे, राज-शार्दूल, यशो भीष्मं गमिष्यति । ९

कृतः सेना-पतिस् त्वेष त्वया भीष्मो, नराधिप ।
सेना-पतौ यशो गन्ता, न तु योधान् कथञ्चन । १०

नाहं जीवति गाङ्गेये योत्स्ये, राजन्, कथञ्चन ।
हते भीष्मे तु योद्धास्मि सर्वैर् एव महा-रथैः ।" ११

भीष्म उवाच,—

समुद्यतो ऽयं भारो मे सु-महान् सागरोपमः ;
मिथो भेदो न मे कार्यस् ; तेन जीवसि, सूत-ज । १२

वैशम्पायन उवाच,—

तम् उवाच ततो राजा धार्तराष्ट्रः प्रतापवान् ,—
"मां समीक्षस्व, गाङ्गेय । कार्यं हि महद् उद्यतम् । १३

चिन्त्यताम् इदम् एकाग्रं मम निःश्रेयसम् परम् ।
उभाव् अपि भवन्तौ मे महत् कर्म करिष्यतः । १४

बलाबलम् अ-मित्राणां श्रोतुम् इच्छामि, कौरव ।
प्रभातायां रजन्यां वै इदं युद्धं भविष्यति ।" १५

---

८ । निदर्शनम्—निर्देशः, विधानम् । मताः—शास्त्राणाम् इति शेषः । अतिवृद्धत्वेन बाल्यत्व-प्राप्तेः भीष्मस्य वाक्यं बाल-वचनम्, इव

भीष्म उवाच,—

स्वयं राजा रथोदारः पाण्डवः कुन्ति-नन्दनः
अग्निवत् समरे, तात, चरिष्यति, न संशयः । १६

भीमसेनस् तु, राजेन्द्र, रथो ऽष्ट-गुण-सम्मितः ।
न तस्यास्ति समो युद्धे गदया सायकैर् अपि । १७

नागायुत-बलो मानी, तेजसा स न मानुषः ।
माद्री-पुत्रौ च रथिनौ द्वाव् एव पुरुषर्षभौ । १८

प्रादेशेनाधिकाः पुंभिर् अन्यैस् ते च प्रमाणतः,
सिंह-संहननाः सर्वे पाण्डु-पुत्रा महा-बलाः । १९

वासुदेवश् च संयन्ता योद्धा चैव धनञ्जयः,
गाण्डीवं च धनुर् दिव्यं ते चाश्वा वात-रंहसः ! २०

दानवानां सहस्राणि हिरण्य-पुर-वासिनाम्
हतान्येक-रथेनाजौ ! कस् तस्य सदृशो रथी ? २१

एष हन्याद् धि संरम्भी बलवान् सत्य-विक्रमः
तव सेनां महा-बाहुः, स्वां चैव परिपालयन् । २२

अग्राह्यम् इति भावः । १६ । रथोदारः [रथे उदारः (महान्)]—महा-रथः । कुन्ति-नन्दनः—छन्दोऽनुरोधेन ह्रस्वत्वम् । १८ । प्रादेशेनाधिकाः—तर्जनी-सहित-विस्तृताङ्गुष्ठेन उन्नततराः । २० । संयन्ता—सारथिः ।

अहं चैनं प्रत्युदियाम् आचार्यो वा धनञ्जयम् ।
न तृतीयो ऽस्ति, राजेन्द्र, सेनयोर् उभयोर् अपि,
य एनं शर-वर्षाणि वर्षन्तम् उदियाद् रथी । २३

समायुक्तश् च कौन्तेयो वासुदेव-सहायवान्
तरुणश् च कृती चैव । जीर्णाव् आवाव् उभाव् अपि । २४

द्रौपदेया, महा-राज, सर्वे पञ्च महा-रथाः ।
वैराटिर् उत्तरश् चैव रथोदारो मतो मम । २५

अभिमन्युर् महा-बाहू रथ-यूथ-प-यूथ-पः
समः पार्थेन समरे वासुदेवेन चारिहा । २६

अ-जेयौ समरे वृद्धौ विराट-द्रुपदौ तथा ।
वयो-वृद्धाव् अपि हि तौ क्षत्र-धर्म-परायणौ । २७

पञ्चाल-राजस्य सुतो, राजन्, पर-पुरञ्जयः
शिखण्डी रथ-मुख्यो मे मतः पार्थस्य, भारत । २८

धृष्टद्युम्नश् च सेनानीः सर्व-सेनासु, भारत,
मतो मे ऽति-रथो, राजन्, द्रोण-शिष्यो महा-रथः । २९

भैमसेनिर्, महाराज, हैडिम्बो राक्षसेश्वरः
योत्स्यते समरे, तात, मायावी समर-प्रियः । ३०

एते चान्ये च बहवो नाना-जन-पदेश्वराः
समेताः पाण्डवस्यार्थे वासुदेव-पुरोगमाः । ३१

२३ । प्रत्युदियाम् [प्रति-उद्-इ+यास्]—प्रत्यभिगच्छेयम् । २४ । समायुक्तः—[स्व-सेनया] समवेतः ।

तैर् अहं समरे, वीर, मायाविद्भिर् जयैषिभिः
योत्स्यामि जयम् आकाङ्क्षन्, अथवा निधनं रणे। ३२

पाञ्चाल्यं तु, महा-बाहो, नाहं हन्यां शिखण्डिनम्
उद्यतेषुम् अथो दृष्ट्वा प्रतियुध्यन्तम् आहवे। ३३

लोकस् तद् वेद यद् अहं पितुः प्रिय-चिकीर्षया
प्राप्त-राज्यं परित्यज्य ब्रह्मचर्य-व्रते स्थितः। ३४

देव-व्रतत्वं विज्ञाप्य पृथिव्यां सर्व-राजसु
नैव हन्यां स्त्रियं जातु न स्त्री-पूर्वं कदाचन। ३५

स हि स्त्री-पूर्वको, राजन्, शिखण्डी यदि ते श्रुतः
कन्या भूत्वा पुमान् जातो। न योत्स्ये तेन, भारत! ३६

३५। देव-व्रतत्वम्—ब्रह्म-चारि-व्रतत्वम्।
पं २—अष्टाङ्ग-मैथुनाभावो हि ब्रह्म-चर्यम्। तथा हि,—
स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्य-भाषणम्
सङ्कल्पो ऽध्यवसायश् च क्रिया-निर्वृत्तिर् एव च
एतद् मैथुनम् अष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्म-चर्यं तदप्यष्टाङ्ग-लक्षणम्।
नारी-प्रेक्षणम् मैथुनस्य चतुर्थम् अङ्गम्, स्त्री-पूर्वस्य पुरुषस्य प्रेक्षणम् अपि तस्य पूर्वं स्त्रीत्वं स्मारयति। तत् स्मरणं हि मैथुनस्य प्रथमम् अङ्गम्। प्रेक्षणाद् ऋते स्त्रिया स्त्रीपूर्वेण पुरुषेण वा योद्धुं न शक्यते। स्थान एव भीष्मः शिखण्डिनं न प्रत्याहन्तुं व्यवस्यति।

३६। अद्यापि लोके मनुष्येषु इतरेष्वपि केषुचित् लिङ्ग-परिवर्तनं श्रूयते।

सर्वांस् त्वन्यान् हनिष्यामि पार्थिवान्, भरतर्षभ,
यान् समेष्यामि समरे। न तु कुन्ती-सुतान्, नृप। ३७

वैशम्पायन उवाच,—

एतच्, छ्रुत्वा तु कौरव्यो राजा दुर्योधनस् तदा,
मुहूर्तम् इव स ध्यात्वा भीष्मे युक्तम् अमन्यत। ३८

मध्ये सर्वस्य सैन्यस्य पितामहम् अपृच्छत,—
"पाण्डवेयस्य, गाङ्गेय, यद् एतत् सैन्यम् उद्यतम्,
प्रभूत-नर-नागाश्वं महा-रथ-समाकुलम्, ३९

अ-प्रधृष्यम् अनावार्यम् उद्धूतम् इव सागरम्,
केन कालेन, गाङ्गेय, क्षपयेथा, महा-द्युते ?" ४०

भीष्म उवाच,—

'आर्जवेनैव युद्धेन योद्धव्य इतरो जनः,
माया-युद्धेन मायावी' इत्येतद् धर्म-निश्चयः। ४१

हन्याम् अहं, महा-भाग, पाण्डवानाम् अनीकिनीम्
दिवसे दिवसे कृत्वा भागं, प्राग्-आह्निकं, मम, ४२

योधानां दश-साहस्रं कृत्वा भागं, महा-द्युते,
सहस्रं रथिनाम् एकम्—एष भागो मतो मम— ४३

४०। क्षपयेथाः—हन्तुं शक्यसि। ४१। आर्जवेन—सरल-भावेन।

मुञ्चेयं यदि वास्त्राणि महान्ति, समरे स्थितः,
शत-सहस्र-घातीनि, हन्यां मासेन, भारत । ४४

वैशम्पायन उवाच,—

श्रुत्वा भीष्मस्य तद् वाक्यं राजा दुर्योधनस् तदा
पर्यपृच्छत, राजेन्द्र, द्रोणम्, अङ्गिरसां वरम् ४५

"आचार्य, केन कालेन पाण्डु-पुत्रस्य सैनिकान्
निहन्या" इति । तं द्रोणः प्रत्युवाच, हसन्न् इव,— ४६

"स्थविरोऽस्मि महा-बाहो, मन्द-प्राण-विचेष्टितः ।
शस्त्राग्निना निर्दहेय पाण्डवानाम् अनीकिनीम्, ४७

यथा भीष्मः शान्तनवो, मासेनेति मतिर् मम ।
एषा मे परमा शक्तिर्, एतद् मे परमं बलम् ।" ४८

"द्वाभ्याम् एव तु मासाभ्यां" कृपः शारद्वतो ऽब्रवीत् ।
द्रौणिस् तु दश-रात्रेण प्रतिजज्ञे बल-क्षयम् ।
कर्णस् तु पञ्च-रात्रेण प्रतिजज्ञे महास्त्र-वित् । ४९

तच् छ्रुत्वा सूत-पुत्रस्य वाक्यं सागर-गा-सुतः
जहास स-स्वनं हासं वाक्यं चेदम् उवाच ह,— ५०

"न हि यावद् रणे पार्थं बाण-शङ्ख-धनुर्धरम्
वासुदेव-समायुक्तं रथेनायान्तम् आहवे ५१

समागच्छसि, राधेय—तेनैवम् अभिमन्यसे—
शक्यम् एवं च भूयश् च त्वया वक्तुं यथेष्टतः ।" ५२

एतच् छ्रुत्वा तु कौन्तेयः, सर्वान् भ्रातॄन् उपह्वरे
आहूय, भरत-श्रेष्ठ इदं वचनम् अब्रवीत्,— ५३

"धार्तराष्ट्रस्य सैन्येषु ये चार-पुरुषा मम,
ते प्रवृत्तिं प्रयच्छन्ति ममेमां व्युषितां निशाम्। ५४

दुर्योधनः किलापृच्छद् आपगेयं महा-व्रतम्
'केन कालेन पाण्डूनां हन्याः सैन्यम्' इति 'प्रभो ?' ५५

मासेनेति च तेनोक्तो धार्तराष्ट्रः सु-दुर्मतिः।
तावता चापि कालेन द्रोणो ऽपि प्रतिजज्ञिवान्। ५६

'गौतमो द्वि-गुणं कालम् उक्तवान्' इति नः श्रुतम्।
द्रौणिस् तु दश-रात्रेण प्रति-जज्ञे महास्त्रवित्। ५७

तथा दिव्यास्त्र-वित् कर्णः, सं-पृष्टः कुरु-संसदि,
पञ्चभिर् दिवसैर् हन्तुं स सैन्यं प्रतिजज्ञिवान्। ५८

तस्माद् अहम् अपीच्छामि श्रोतुम्, अर्जुन, ते वचः,
कालेन कियता शत्रून् क्षपयेर् इति, फाल्गुन।" ५९

एवम् उक्तो गुडाकेशः पार्थिवेन, धनञ्जयः
वासुदेवं समीक्ष्येदं वचनं प्रत्यभाषत,— ६०

"सर्व एते महात्मानः कृतास्त्राश् चित्र-योधिनः
अ-संशयं, महा-राज, हन्युर् एव, न संशयः। ६१

यद् युगान्ते पशु-पतिः, सर्व-भूतानि संहरन्,
प्रयुङ्क्ते, पुरुष-व्याघ्र, तद् इदं मयि वर्तते। ६२

तद् न जानाति गाङ्गेयो न द्रोणो न च गौतमः
न च द्रोण-सुतो, राजन्। कुत एव तु सूत-जः ? ६३

न तु युक्तं रणे हन्तुं दिव्यैर् अस्त्रैः पृथग्-जनम्।
आर्जवेनैव युद्धेन विजेष्यामो वयं परान्। ६४

तथेमे पुरुष-व्याघ्राः सहायास् तव, पार्थिव,
निहन्युः समरे सेनां देवानाम् अपि, पाण्डव।
स्वयं चापि समर्थोऽसि त्रैलोक्योत्सादने ऽपि च।" ६५

पञ्च-विंशो ऽध्यायः

अधिवासः

ततः प्रभाते विमले, धार्तराष्ट्रेण चोदिताः
दुर्योधनेन, राजानः प्रययुः पाण्डवान् प्रति, १

आप्लाव्य, शुचयः सर्वे स्रग्विणः शुक्ल-वाससः,
गृहीत-शस्त्रा ध्वजिनः, स्वस्ति वाच्य, हुताग्नयः, २

आहवेषु पराल्ँ लोकाञ् जिगीषन्तो, महा-बलाः,
एकाग्र-मनसः सर्वे, श्रद्दधानाः परस्परम्। ३

२। आप्लाव्य [आ-प्लु-इ+य]—स्नात्वा।

दाक्षिणात्याः प्रतीच्याश् च पार्वतीयाश् च ये नृपाः
गान्धार-राजः शकुनिः प्राच्योदीच्याश् च सर्वशः ४

शकाः किराता यवनाः शिबयो ऽथ वसातयः,
एते महा-रथाः सर्वे द्वितीये निर्ययुर् बले। ५

ते समेत्य, यथा-न्यायं धार्तराष्ट्रा महा-बलाः
कुरु-क्षेत्रस्य पश्चार्धे व्यवातिष्ठन्त, दंशिताः। ६

दुर्योधनस् तु शिविरं कारयामास, भारत।
तादृशान्येव दुर्गाणि राज्ञाम् अपि मही-पतिः। ७

पञ्च-योजनम् उत्सृज्य मण्डलं तद् रणाजिरम्,
सेना-निवेशांस् ते, राजन्, आविशन् छत-सङ्घशः। ८

तत्र ते पृथिवी-पाला यथोत्साहं यथा-बलम्
विविशुः शिविराण्यत्र द्रव्यवन्ति सहस्रशः; ९

तेषां दुर्योधनो राजा स-सैन्यानां महात्मनाम्
व्यादिदेश स-बाह्यानां भक्ष्य-भोज्यम् अनुत्तमम् १०

स-नागाश्व-मनुष्याणां। ये च शिल्पोपजीविनः
ये चान्ये ऽनुगतास् तत्र सूत-मागध-वन्दिनः ११

८। पञ्च-योजनम् उत्सृज्य मण्डलं—पञ्च-योजनं वर्तुलं परिधिं कृत्वा। आविशन्—प्रविविशुः।

वणिजो गणिकाश् चारा ये चैव प्रेक्षका जनाः
सर्वांस् तान् कौरवो राजा विधिवत् प्रत्यवैक्षत । १२

तथैव राजा कौन्तेयो धर्म-पुत्रो युधिष्ठिरः
धृष्टद्युम्न-मुखान् वीरांश् चोदयामास, भारत । १३

ते शूराश् चित्र-वर्माणस् तप्त-कुण्डल-धारिणः
आज्यावसिक्ता ज्वलिता, धिष्ण्येष्विव हुताशनाः
अशोभन्त महेष्वासा ग्रहाः प्रज्वलिता इव । १४

अथ सैन्यं यथा-योगं पूजयित्वा, नरर्षभः
दिदेश तान्यनीकानि प्रयाणाय मही-पतिः । १५

तेषां युधिष्ठिरो राजा स-सैन्यानां महात्मनाम्
व्यादिदेश स-वाह्यानाम् भक्ष्य-भोज्यम् अनुत्तमम् । १६

भाण्डं समारोपयतां चरतां संप्रधावताम्
हृष्टानां तत्र योधानां शब्दो दिवम् इवास्पृशत् । १७

स्वयम् एव ततः पश्चाद् विराट-द्रुपदान्वितः
अथापरैर् मही-पालैः सह प्रायाद् मही-पतिः । १८

भीम-धन्वायनी सेना धृष्टद्युम्नेन पालिता
गङ्गेव पूर्णा स्तिमिता स्यन्दमाना व्यदृश्यत । १९

---

१७ । भाण्डम्—युद्धोपकरणम् । १९ । भीम-धन्वायनी [भीम-धन्वन्-अय्+अन+ई]—भीम-धन्वानः [भीम+धनुस्+अन्, १।ब] (भीषणधनुर्धराः) अयन्ते (प्रचरन्ति) यस्यां सा तादृशी ।

युधिष्ठिरो यत्र सैन्ये स्वयम् एव बलार्णवे
तत्र ते पृथिवी-पाला भूयिष्ठं पर्यवस्थिताः, २०

ते ऽवतीर्य कुरु-क्षेत्रं पाण्डवाः सह-सोमकाः
प्राङ्-मुखाः पश्चिमे भागे न्यविशन्त स-सैनिकाः । २१

समन्त-पञ्चकाद् बाह्यं शिविराणि सहस्रशः
कारयामास विधिवत् कुन्ती-पुत्रो युधिष्ठिरः । २२

यावत् तपति सूर्यो हि जम्बू-द्वीपस्य मण्डलम्
तावद् एव समायातं बलं, पार्थिव-सत्तम । २३

अभिज्ञानानि सर्वेषां संज्ञाश् चाभरणानि च
योजयामास कौरव्यो युद्ध-काल उपस्थिते । २४

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायाम्
उद्योग-पर्व ।

---

२१ । अवतीर्य कुरु-क्षेत्रम्—कुरु-क्षेत्रस्य अभ्यन्तरं प्रविश्य । न्यविशन्त—[युद्धाय] अवतस्थिरे । २२ । समन्त-पञ्चकात्—कुरु-क्षेत्रात् । बाह्यम्—बहिः । २४ । अभिज्ञानानि—[स्वकीयानि] चिह्नानि । संज्ञाः—हस्ताद्यैर् अर्थसूचनाः ।

इति तारकालोके नाम भारतवृत्तौ
उद्योग-पर्व ।

अथ

श्री भारते

भीष्म-पर्व

प्रथमो ऽध्यायः

समर-धर्म-स्थापनम्

वैशम्पायन उवाच,—

दृष्ट्वा ध्वजाग्रं पार्थस्य धार्तराष्ट्रो महा-मनाः
सह सर्वैर् मही-पालैः प्रत्यव्यूहत पाण्डवम् । १

ततो हर्षं समागम्य, वासुदेव-धनञ्जयौ
दध्मतुः, पुरुष-व्याघ्रौ, दिव्यौ शङ्खौ, रथे स्थितौ । २

पाञ्चजन्यस्य निर्घोषं देवदत्तस्य चोभयोः
श्रुत्वा तु निनदं योधाः शकृद्-मूत्रं प्रसुस्रुवुः । ३

---

३ । शकृत्—पुरीषम् , विष्ठाम् ।

तयोस् तु सेनयोर् आसीद् अद्भुतः स तु सङ्गमः
युगान्ते समनुप्राप्ते द्वयोः सागरयोर् इव । ४

शून्यासीत् पृथिवी सर्वा वृद्ध-बालावशेषिता,
निरश्व-पुरुषेवासीद् रथ-कुञ्जर-वर्जिता,
तेन सेना-समूहेन समानीतेन कौरवैः । ५

ततस् ते समयं चक्रुः कुरु-पाण्डव-सोमकाः,
धर्मान् संस्थापयामासुर् युद्धानां, भरतर्षभ,— ६

निवृत्ते विहिते युद्धे स्यात् प्रीतिर् नः परस्परम्
यथा-परं यथा-योगं, न च स्याच् छलनं पुनः । ७

वाचा युद्ध-प्रवृत्तानां वाचैव प्रति-योधनम् ।
निष्क्रान्ताः पृतना-मध्याद् न हन्तव्याः कथञ्चन । ८

रथी च रथिना योध्यो, गजेन गज-धूर्गतः,
अश्वेनाश्वी पदातिश् च पादातेनैव, भारत । ९

यथा-योगं यथा-कामं यथोत्साहं यथा-बलम्
समाभाष्य प्रहर्तव्यं, न विश्वस्ते, न विह्वले । १०

---

६ । धर्मान्—पराङ्-मुखः त्यक्त-शस्त्रः शरणागतः अन्येन संयुक्तश् च न हन्तव्य इत्यादीन् । ७ । यथायोगम्—[तुल्ययोर् न तु विसदृशयोर्] योगः यथा स्यात् तथा । यथा-परम्—परम् (परमं श्रेष्ठम्) [नियमम्] अनतिक्रम्य । छलनम्—प्रतारणा । ८ । पृतना—सेना । ९ । गज-धूर्गतः—हस्ति-स्कन्ध-स्थः । १० । विश्वस्ते—[न मां प्रहरिष्यतीति] जात-विश्वासे ।

एकेन सह संयुक्तः प्रमत्तो विमुखस् तथा
क्षीण-शस्त्रो वि-वर्मा च न हन्तव्यः कदाचन । ११

न सूतेषु न धुर्येषु न च शस्त्रोपनायिषु
न भेरी-शङ्ख-वादेषु प्रहर्तव्यं कथञ्चन । १२

एवं ते समयं कृत्वा कुरु-पाण्डव-सोमकाः
विस्मयं परमं जग्मुः प्रेक्षमाणाः परस्परम् । १३

ततः पूर्वापरे सैन्ये समीक्ष्य, भगवान् ऋषिः,
सर्व-वेद-विदां श्रेष्ठो व्यासः सत्यवती-सुतः, १४

भविष्यति रणे घोरे, भरतानां पितामहः,
प्रत्यक्ष-दर्शी भगवान् भूत-भव्य-भविष्य-वित्, १५

वैचित्रवीर्यं राजानं रहस्थम् इदम् अब्रवीत्,
शोचन्तम् आर्तं, ध्यायन्तं पुत्राणाम् अनयं तदा,— १६

"राजन्, परीत-कालास् ते पुत्राश् चान्ये च पार्थिवाः ।
ते हिंसन्त्येव संग्रामे समासाद्येतरेतरम् । १७

११। एकेन—'परेण' इति अवाचां पाठः । १२। सूतेषु—सारथिषु । धुर्येषु [धुर्+य, ७ब]—भार-वाहकेषु [नरेषु पशुषु च]। पा. ४।४।७७, दीर्घाभावे ८।२।७९ । १५। भविष्यति—भाविनि, आगामिनि । भव्यम्—वर्तमानम् । १७। परीत-कालाः—प्राप्तान्तिम-कालाः । हिंसन्त्येव—नाशयन्त्येव ।

तेषु काल-परीतेषु विनश्यत्सु च, भारत,
काल-पर्यायम् आज्ञाय मा स्म शोके मनः कृथाः। १८

यदि वेच्छसि संग्रामे द्रष्टुम् एतान्, विशाम् पते,
चक्षुर् ददानि ते हन्त! युद्धं, पुत्र, निशामय।" १९

धृतराष्ट्र उवाच,—

न रोचये ज्ञाति-वधं द्रष्टुं, ब्रह्मर्षि-सत्तम।
युद्धम् एतद् अ-शेषेण शृणुयां तव तेजसा। २०

वैशम्पायन उवाच,—

तस्मिन्न् अनिच्छति द्रष्टुं संग्रामं, श्रोतुम् इच्छति,
वराणाम् ईश्वरो व्यासः सञ्जयाय वरं ददौ। २१

व्यास उवाच,—

एष ते सञ्जयो, राजन् युद्धम् एतद् वदिष्यति।
एतस्य सर्वं संग्रामे न परोक्षं भविष्यति। २२

चक्षुषा सञ्जयो, राजन्, दिव्येनैव समन्वितः,
कथयिष्यति ते युद्धं, सर्वज्ञश् च भविष्यति। २३

प्रकाशं वा-प्रकाशं वा, दिवा वा यदि वा निशि,
मनसा चिन्तितम् अपि सर्वं वेत्स्यति सञ्जयः। २४

१८। पर्यायम्—वैपरीत्यम्। आज्ञाय—बुद्ध्वा। १९। निशामय—पश्य। २२। न परोक्षम्—प्रत्यक्षम्।

नैनं शस्त्राणि छेत्स्यन्ति, नैनं बाधिष्यते श्रमः ।
गावल्गणिर् अयं जीवन् युद्धाद् अस्माद् विमोक्ष्यते । २५

वैशम्पायन उवाच,—

एवम् उक्त्वा ययौ व्यासो धृत-राष्ट्राय धीमते ।
धृत-राष्ट्रो ऽपि तच् छ्रुत्वा ध्यानम् एवान्वपद्यत । २६

स, मुहूर्तम् इव ध्यात्वा, विनिश्वस्य मुहुर् मुहुः,
सञ्जयं संशितात्मानम् अपृच्छद्, भरतर्षभ ।
एवं राज्ञा स पृष्टस् तु सञ्जयो वाक्यम् अब्रवीत् । २७

द्वितीयो ऽध्यायः

प्रोत्साहन-विषादौ

सञ्जय उवाच,—

सर्व-धर्म-विशेष-ज्ञः पिता देव-व्रतस् तव,
समानीय मही-पालान्, इदं वचनम् अब्रवीत्,— १

"इदं वः, क्षत्रिया, द्वारं स्वर्गायापावृतं महत् ।
गच्छध्वं तेन शक्रस्य ब्रह्मणः सह-लोकताम् ! २

एष वः शाश्वतः पन्थाः पूर्वैः पूर्वतरैः कृतः ।
सम्भावयध्वम् आत्मानम्, अ-व्यग्र-मनसो, युधि ! ३

२। अपावृतम्—उद्घाटितम् । गच्छध्वम्—गच्छत । आआ ।
३। सम्भावयध्वम्—सम्मानयध्वम् ।

नाभागो ऽथ ययातिश् च मान्धाता नहुषो नृगः
संसिद्धाः परमं स्थानं गताः कर्मभिर् ईदृशैः । ४

अ-धर्मः क्षत्रियस्यैष यद् व्याधि-मरणं गृहे ।
यद् अयो-निधनं याति सो ऽस्य धर्मः सनातनः ।" ५

एवम् उक्ता महीपाला भीष्मेण, भरतर्षभ,
निर्ययुः स्वान्यनीकानि शोभयन्तो रथोत्तमैः । ६

दृष्ट्वा तु पाण्डवानीकं व्यूढं, दुर्योधनस् तदा,
आचार्यम् उपसङ्गम्य, राजा वचनम् अब्रवीत् ,— ७

"पश्यैताम् पाण्डु-पुत्राणाम् , आचार्य, महतीं चमूम्
व्यूढां द्रुपद-पुत्रेण तव शिष्येण धीमता । ८

---

४ । नाभागः—वैवस्वतस्य मनोः पुत्रः अम्बरीषस्य पिता च सूर्य-वंश्यो राजा । ययातिः—नहुषस्य पुत्रः चन्द्र-वंश्यो राजा । तस्य पुत्रः पूरुः यस्य पौरवा अपत्यानि । मान्धाता—युवनाश्व-पुत्रः सूर्य-वंश्यो राजा । 'कम् एष धास्यति ?' इत्युक्ते माम् धास्यतीति इन्द्रोक्तेः मान्धातेति तस्य नाम बभूव । नहुषः—ययातेः पिता चन्द्र-वंश्यो राजा । नृगः—उशीनर-पुत्रः चन्द्र-वंश्यो मनु-पुत्रः सूर्य्य-वंश्यो वा राजा । ५ । अयो-निधनम्—लौह-शस्त्रेण मरणम् । ८ । व्यूढाम्—व्यूह- रचनयाधिष्ठिताम् । व्यूहः—बल-विन्यासः, युद्धे दुर्लङ्घ्यत्वाय आक्रमण-सौकर्याय च सैनिकानां स्थान-विशेषेषु संस्थापनम् । महतीम्—विशालाम् , विपुलाम् , विस्तृताम् । चमूम्—सेनाम् । द्रुपद-पुत्रेण—धृष्टद्युम्नेन ।

अयनेषु च सर्वेषु यथा-भागम् अवस्थिताः,
भीष्मम् एवाभिरक्षन्तु भवन्तः सर्व एव हि।" ६

तस्य संजनयन् हर्षं, कुरु-वृद्धः पितामहः,
सिंह-नादं विनद्योच्चैः शङ्खं दध्मौ, प्रतापवान्। १०

ततः शङ्खाश् च भेर्यश् च पणवानक-गोमुखाः
सहसैवाभ्यहन्यन्त। स शब्दस् तुमुलो ऽभवत्। ११

ततः श्वेतैर् हयैर् युक्ते महति स्यन्दने स्थितौ
माधवः पाण्डवश् चैव दिव्यौ शङ्खौ प्रदध्मतुः। १२

धृष्टद्युम्नो विराटश् च सात्यकिश् चापराजितः
सौभद्रश् च महा-बाहुः शङ्खान् दध्मुः पृथक् पृथक्। १३

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्,
नभश् च पृथिवीं चैव तुमुलो ऽभ्यनुनादयन्। १४

६। अयनेषु—[व्यूह-प्रवेश-] मार्गेषु। यथा-भागम्—भागं (विभक्तां स्वां स्वां रण-भूमिम्) अ-परित्यज्य। अभिरक्षन्तु—यथा पुरतो युध्यमानः स पृष्ठतः पार्श्वतो वा कैश्चित् न हन्येत तथा रक्षन्तु।
१०। उच्चैः—महान्तम्। दध्मौ—मुख-मारुतेन वादयामास।
११। अभ्यहन्यन्त—अवाद्यन्त। १२। प्रदध्मतुः—मुखमारुतेन स-प्रकर्षं वादयामासतुः। १४। नभः—आकाशम्। अभ्यनुनादयन्—प्रतिध्वनिभिर् आपूरयन्।

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् , कपि-ध्वजः,
प्रवृत्ते शस्त्र-सम्पाते, धनुर् उद्यम्य, पाण्डवः १५

हृशीकेशं तदा वाक्यम् इदम् आह, मही-पते,—
"सेनयोर् उभयोर् मध्ये रथं स्थापय मे, ऽच्युत, १६

यावद् एतान् निरीक्षे ऽहं योद्धु-कामान् अवस्थितान् ,
कैर् मया सह योद्धव्यम् अस्मिन् रण-समुद्यमे ।" १७

एवम् उक्तो हृषीकेशो गुडाकेशेन, भारत,
सेनयोर् उभयोर् मध्ये स्थापयित्वा रथोत्तमम् , १८

उवाच, "पार्थ, पश्यैतान् समवेतान् कुरून्" इति ।
तत्रापश्यत् स्थितान् पार्थः पितॄन् अथ पितामहान् १९

आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखींस् तथा
श्वशुरान् सुहृदश् चैव सेनयोर् उभयोर् अपि । २०

तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धून् अवस्थितान् ,
कृपया परयाविष्टो, विषीदन्न्, इदम् अब्रवीत् ,— २१

"दृष्ट्वेमान् स्व-जनान्, कृष्ण, युयुत्सून् समवस्थितान्
सीदन्ति मम गात्राणि मुखं च परिशुष्यति । २२

---

१५ । अथ—[महाशब्दोत्पत्तेर्] अनन्तरम् । व्यवस्थितान्—युद्धाय व्यूहे अवस्थितान् । कपि-ध्वजः—वानर-केतनः, अर्जुनः । १८ । गुडाकेशेन—जित-निद्रेण [अर्जुनेन] । २० । सखा, सुहृद्—पूभा. ५३ पृद्र. । २१ । आविष्टः — गृहीतः । २२ । सीदन्ति—विशीर्यन्ते । गात्राणि—करचरणादीनि ।

वेपथुश् च शरीरे मे रोम-हर्षश् च जायते
गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते । २३

न च शक्नोम्य् अवस्थातुं भ्रमतीव च मे मनः ।
निमित्तानि च पश्यामि विपरीतानि, केशव । २४

न च श्रेयो ऽनुपश्यामि, हत्वा स्वजनम् आहवे ।
किं नो राज्येन, गोविन्द, किं भोगैर् जीवितेन वा ? २५

येषाम् अर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च,
त इमे ऽवस्थिता युद्धे प्राणांस् त्यक्त्वा धनानि च । २६

एतान् न हन्तुम् इच्छामि घ्नतो ऽपि, मधु-सूदन,
अपि त्रैलोक्य-राज्यस्य हेतोः । किं नु मही-कृते ? २७

यद्य् अप्य् एते न पश्यन्ति, लोभोपहत-चेतसः,
कुल-क्षय-कृतं दोषं मित्र-द्रोहे च पातकम्, २८

कथं न ज्ञेयम् अस्माभिः पापाद् अस्माद् निवर्तितुम्
कुल-क्षय-कृतं दोषं प्रपश्यद्भिर्, जनार्दन ? २९

---

२३ । वेपथुः—कम्पः । रोम-हर्षः—रोमाञ्चः । स्रंसते—निपतति । परि-दह्यते—सर्वतः सन्तप्यते । २४ । अवस्थातुम्—स्थिरः सन् स्थातुम् (to stand) भ्रमति—घूर्णति । निमित्तानि—शकुनादीनि । विपरीतानि—अनिष्ट-सूचकानि । २५ । आहवे—युद्धे । २७ । घ्नतः—[अस्मान्] विनाशयतः । मही-कृते—पृथिवी-प्राप्त्यर्थम् । २९ । ज्ञेयम्—बुद्धिः कर्तव्या ।

अहो वत महत् पापं कर्तुं व्यवसिता वयम्,
यद् राज्य-सुख-लोभेन हन्तुं स्व-जनम् उद्यताः ! ३०

यदि माम् अ-प्रतीकारम् अ-शस्त्रं शस्त्र-पाणयः
धार्तराष्ट्रा रणे हन्युस् तद् मे क्षेमतरं भवेत् ।" ३१

एवम् उक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्,
विसृज्य स-शरं चापं, शोक-संविग्न-मानसः । ३२

तं तथा कृपयाविष्टम् अश्रु-पूर्णाकुलेक्षणम्
विषीदन्तम् इदं वाक्यम् उवाच मधु-सूदनः,— ३३

"कुतस् त्वा कश्मलम् इदं विषमे समुपस्थितम्
अनार्य-जुष्टम् अ-स्वर्ग्यम् अ-कीर्ति-करम्, अर्जुन ? ३४

क्लैब्यं मा स्म गमः, पार्थ ! नैतत् त्वय्युपपद्यते ।
क्षुद्रं हृदय-दौर्बल्यं त्यक्त्वोत्तिष्ठ, परन्तप !" ३५

---

३० । अहो वत—महत् कष्टम् ! । ३१ । क्षेमतरम्—[स्व-जन-हननेन राज्य-लाभात्] हिततरम् । ३२ । संख्ये—संग्रामे । रथोपस्थे—रथस्योपरि । शोक-संविग्न-मानसः—शोकेन प्रकम्पित-चित्तः, शोक-परिभूत-मानसः । ३४ । कुतः—कस्मात् [कारणात्] । कश्मलम्—मोहः । विषमे—सङ्कटे । अनार्यजुष्टम्—पूज्य-जनैर् असेवितम् । अस्वर्ग्यम्—अधर्म्यम् । अकीर्तिकरम्—अयशस्करम् । ३५ । क्लैब्यम्—नपुंसकत्वम्, अ-पुरुषत्वम् । उपपद्यते—योग्यं भवति । क्षुद्रम्—तुच्छम् । हृदय-दौर्बल्यम्—कातर्यम्, दीनत्वम् ।

अर्जुन उवाच,—

कथं भीष्मम् अहं सङ्ख्ये द्रोणं च, मधु-सूदन,
इषुभिः प्रति-योत्स्यामि, पूजार्हाव् , अरि-सूदन ? ३६

गुरून् अ-हत्वा हि, महानुभावान् ,
श्रेयो भोक्तुं भैक्ष्यम् अपीह लोके ।
हत्वार्थ-कामांस् तु गुरून् इहैव,
भुञ्जीय भोगान् रुधिर-प्रदिग्धान् ! ३७

न चैतद् विद्मः कतरद् नो गरीयो,
यद् वा जयेम यदि वा नो जयेयुः ।
यान् एव हत्वा न जिजीविषामस्,
ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ! ३८

---

३६ । प्रति-योत्स्यामि—प्रतियोत्स्ये । पआ. । पूजार्हौ—सम्मान-योग्यौ । ३७ । महानुभावान् (महा-माहात्म्यान्) गुरून् (भीष्म-द्रोणादीन्) अहत्वा (अहिंसित्वा, अविनाश्य) इह लोके भैक्ष्यम् (भिक्षान्नम्) अपि भोक्तुं (भक्षयितुं) श्रेयः ([गुरु-हनन-सम्भूत-राज्य-भोगात्] प्रशस्यतरम्) । अर्थ-कामान् (विषयैषिणो) गुरून् हत्वा (मारयित्वा) इहैव [लोके] रुधिर-प्रदिग्धान् (शोणित-प्रलिप्तान् , सर्वथा नरक-भवान्) भोगान् भुञ्जीय (अश्नीयाम् , भोक्ष्ये) । ३८ । न च, यद् वा [वयम् एतान् धार्तराष्ट्रान्] जयेम (जेष्यामः), यदि वा [ते] नः (अस्मान्) जयेयुः (जेष्यन्ति) [एतयोः] कतरत् (किं नाम) नः (अस्मभ्यं) गरीयः (गुरुतरम्) [इति] विद्मः (जानीमः) । यान् एव हत्वा (मारयित्वा) न जिजीविषामः (जीवितुम्

सञ्जय उवाच,—

एवम् उक्त्वा हृषीकेशं, गुडाकेशः परन्तपः
'न योत्स्य' इति गोविन्दम् उक्त्वा, तूष्णीं बभूव ह। ३९

तृतीयो ऽध्यायः

बोधनम्

तम् उवाच हृषीकेशः, प्रहसन्न् इव, भारत,
सेनयोर् उभयोर् मध्ये विषीदन्तम्, इदं वचः,— १

"अ-शोच्यान् अन्वशोचस् त्वं, प्रज्ञा-वादांश् च भाषसे!
गतासून् अ-गतासूंश् च नानुशोचन्ति पण्डिताः। २

देहिनो ऽस्मिन् यथा देहे कौमारं यौवनं जरा,
तथा देहान्तर-प्राप्तिर्। धीरस् तत्र न मुह्यति। ३

इच्छामः) ते धार्तराष्ट्राः [अस्माकं] प्रमुखे (सम्मुख) अवस्थिताः [सन्ति]।

१। प्रहसन्न् इव—प्रसन्न-मुखेन इव। २। अशोच्यान्—शोकस्य अ-विषय-भूतान्। अन्वशोचः—शोक-विषयीकृत्य तप्यसे। प्रज्ञा-वादान्—पण्डित-जनोचित-शब्दान्। गतासून्—गत-प्राणान्, मृतान्। अ-गतासून्—[युद्धेन बन्धु-हीनान्] जीवितान्। ३। देहिनः—देहवतः [जन्तोः]। धीरः—धीमान्। तत्र—देहान्तर-प्राप्तौ, देहस्य विनाशे पुनर् उत्पत्तौ च। न मुह्यति—मोहात् आत्मैव विनष्ट इति न मन्यते।

मात्रा-स्पर्शास् तु, कौन्तेय, शीतोष्ण-सुख-दुःख-दाः
आगमापायिनो ऽनित्यास्। तांस् तितिक्षस्व, भारत। ४

नासतो विद्यते भावो, नाभावो विद्यते सतः।
उभयोर् अपि दृष्टो ऽन्तस् त्वनयोस् तत्त्व-दर्शिभिः। ५

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः
अनाशिनो ऽ-प्रमेयस्य। तस्माद् युध्यस्व, भारत। ६

वासांसि जीर्णानि यथा विहाय,
नवानि गृह्णाति नरो ऽपराणि,
तथा शरीराणि विहाय जीर्णान्य् ,
अन्यानि संयाति नवानि देही। ७

४। मात्रा-स्पर्शाः—मीयन्ते ज्ञायन्ते [विषयाः] आभिर् इति मात्राः (इन्द्रिय-वृत्तयः); तासां स्पर्शाः (विषयैः सह संयोगाः)। आगमापायिनः [आगम+अपाय+इन्, १।ब.]—आविर्भाव-तिरोभाववन्तः। अ-नित्याः—अ-स्थिराः। तितिक्षस्व—सहस्व। ५। भावः—सत्ता, विद्यमानता। अभावः—अ-सत्ता, अ-विद्यमानता। अ-सतः—अविद्यमानस्य। सतः—विद्यमानस्य। अनयोः सद्-असतोः। अन्तः—निर्णयः। यत् सत् तत् सदैव सत्। यद् असत् तत् सदैव असत्। न कदापि सत् असत् असत् वा सद् भवति। सदैव देहादि असत् आत्मा च सत् भवति। अत्रोच्यते, नित्यानित्ययोर् अङ्गाङ्गि-भावात् अनित्यस्यापि आपेक्षिक-सत्त्वं प्रसज्यते इति। ६। अन्तवन्तः—शेषवन्तः। नित्यस्य—चिर-स्थायिनः। शरीरिणः—शरीरवतः [आत्मनः]। अनाशिनः—अ-नाश-शीलस्य। अ-प्रमेयस्य—अ-परिच्छेद्यस्य, ईदृक्तया इयत्तया वा अनिरूप्यस्य। ७। वासांसि—वस्त्राणि।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः,
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः । ८

अथ चैनं नित्य-जातं नित्यं वा मन्यसे मृतम् ,
तथापि त्वं, महा-बाहो, नैनं शोचितुम् अर्हसि । ९

जातस्य हि ध्रुवो मृत्युर्, ध्रुवं जन्म मृतस्य च ।
तस्माद् अपरिहार्येऽर्थे न त्वं शोचितुम् अर्हसि । १०

स्व-धर्मम् अपि चावेक्ष्य न विकम्पितुम् अर्हसि ।
धर्म्याद् धि युद्धाच् छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते । ११

अथ चेत् त्वम् इमं धर्म्यं संग्रामं न करिष्यसि,
ततः स्व-धर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि । १२

भयाद् रणाद् उपरतं मंस्यन्ते त्वां महा-रथाः
येषां च त्वं बहु-मतो भूत्वा यास्यसि लाघवम् । १३

हतो वा प्राप्स्यसे स्वर्गं, जित्वा वा भोक्ष्यसे महीम् ।
तस्माद् उत्तिष्ठ, कौन्तेय, युद्धाय कृत-निश्चयः । १४

---

८ । क्लेदयन्ति—आर्द्री-करणेन शिथिलं कुर्वन्ति । ९ । अथ—यदि [अनाशिन आत्मनो नाशम् अङ्गीकृत्य] । एनम्—आत्मानम् । १० । ध्रुवः—निश्चितः । अपरिहार्ये—अवश्यम्भाविनि । अर्थे —विषये । ११ । धर्म्यात्—न्याय्यात् , धर्म-सङ्गतात् । १३ । बहु-मतो भूत्वा—पूर्वं बहु-गुणत्वेन सम्मतो भूत्वा । लाघवम्—लघुत्वम् , लघु-भावम् ।

सुख-दुःखे समे कृत्वा लाभालाभौ जयाजयौ,
ततो युद्धाय युज्यस्व । नैवं पापम् अवाप्स्यसि । १५

एषा ते ऽभिहिता सांख्ये बुद्धिर् । योगे त्विमां शृणु
बुद्ध्या युक्तो यया, पार्थ, कर्म-बन्धं प्रहास्यसि । १६

नेहाभिक्रम-नाशो ऽस्ति, प्रत्यवायो न विद्यते ।
स्वल्पम् अप्यस्य धर्मस्य त्रायते महतो भयात् । १७

व्यवसायात्मिका बुद्धिर् एकेह, कुरु-नन्दन ।
बहु-शाखा ह्यनन्ताश् च बुद्धयो ऽव्यवसायिनाम् । १८

---

१५ । पं १—सुख-दुखे तयोः कारण-भूतौ लाभालाभौ च तयोर् अपि कारण-भूतौ जयाजयौ समौ कृत्वा । समत्वे कारणं हर्ष-विषाद-राहित्यम् । युज्यस्व—सन्नद्धो भव । एवम्—सुख-दुःखाद्यभिलाषं त्यक्त्वा केवल-स्व-धर्म-बुद्ध्या युध्यमानः । १६ । सांख्यम्—सम्यक् ख्यायते (प्रकाश्यते) वस्तु-तत्त्वम् अनया इति संख्या (सम्यक् ज्ञानम्); तस्यां प्रकाशमानम् आत्म-तत्त्वं सांख्यम् (श्रीधरः)। कर्म-बन्धम्—कर्मात्मकं बन्धम् । प्रहास्यसि—प्रकर्षेण त्यक्ष्यसि । अस्मिन् निबन्धे वाद-त्रयम् उपलभ्यते । तत्र सांख्यवादः तर्केण ज्ञान-मार्गं दर्शयन् तर्क-वाद एव । वेद-वादः फलाय विहितं कर्म कुर्याद् इत्यनुशास्ति । योग-वादस् तु फल-निरपेक्षः सन् कृत्यं कुर्याद् इत्युपदिशति । १७ । इह—[निष्काम-] कर्म-योगे । अभिक्रम-नाशः—प्रारम्भस्य विनाशः (निष्फलत्वम्)। १८ । व्यवसायात्मिका—[ईश्वर-प्रीतये] एवं करिष्यामीति निश्चयात्मिका । अव्यवसायिनाम् बुद्धयो वासना-प्रचोदितत्वात् वासनायाश् च विषय-भेदेन आनन्त्यात् बहु-मुखत्वाच् च बहु-शाखा अनन्ताश् च भवन्ति ।

त्रैगुण्य-विषया वेदा। निस्त्रैगुण्यो भवार्जुन,
निर्द्वन्द्वो नित्य-सत्त्व-स्थो निर्योग-क्षेम आत्मवान्। १९

कर्मण्येवाधिकारस् ते, मा फलेषु कदाचन।
मा कर्म-फल-हेतुर् भूर्! मा ते सङ्गो ऽस्त्व-कर्मणि! २०

योग-स्थः कुरु कर्माणि, सङ्गं त्यक्त्वा, धनञ्जय,
सिद्ध्य-सिद्ध्योः समो भूत्वा। समत्वं योग उच्यते। २१

श्रुति-विप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधाव् अचला बुद्धिस्, तदा योगम् अवाप्स्यसि। २२

विषया विनिवर्तन्ते निराहारस्य देहिनः
रस-वर्जं। रसो ऽप्यस्य परं दृष्ट्वा निवर्तते। २३

१९। त्रैगुण्य-विषयाः—सत्व-रजस्तमो-रूप-विकार-हेतु-त्रिगुण-विषयकाः, सकाम-कर्म-विषयकाः। निस्त्रैगुण्यः त्रिगुणातीतः। निर्द्वन्द्वः—शीतोष्ण-सुख-दुःखातीतः। सत्त्व-स्थः—विशुद्ध-सत्त्वः, निर्मल-चित्तः। निर्योग-क्षेमः—अप्राप्तस्योपार्जने प्राप्तस्य रक्षणे च यत्न-हीनः। आत्मवान्—अ-प्रमत्तः। २०। कर्म-फल-हेतुः—कर्म-फलं [कर्म-करणे] हेतुः (कारणं) यस्य तादृशः। मा···भूः—फलाय कर्म मा कुरु। मा···त्वकर्मणि—कर्माभावे मा आसक्तो भव, अ-कर्मणि तव आग्रहो न भवतु। २२। श्रुति-विप्रतिपन्ना—श्रुतिभिः (वेदैः, नाना-वेद-वचनैः) विप्रतिपन्ना (इतस्ततो विक्षिप्ता, चञ्चला, नितराम् अ-स्थिरा)। २३। विषयाः—शब्द-स्पर्श-रूप-रस-गन्धाः। निराहारस्य—इन्द्रियैर् विषयाणाम् आहारात् (आहरणात्, ग्रहणात्) निवृत्तस्य।

न हि कश्चित् क्षणम् अपि जातु तिष्ठत्यकर्म-कृत ।
कार्यते ह्य-वशः कर्म सर्वः प्रकृति-जैर् गुणैः । २४

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्
इन्द्रियार्थान् विमूढ़ात्मा, मिथ्याचारः स उच्यते । २५

यस्त्विन्द्रियाणि मनसा नियम्यारभते, ऽर्जुन,
कर्मेन्द्रियैः कर्म-योगं असक्तः, स विशिष्यते । २६

तस्माद् अ-सक्तः सततं कार्यं कर्म समाचर ।
अ-सक्तो ह्याचरन् कर्म, परम् आप्नोति पूरुषः । २७

देहिनः—देह-स्थस्य आत्मनः । रस-वर्जम्—[विषयस्य] रसं (स्वादं) वर्जयित्वा । रसो ऽप्यस्य—अस्य (देहिनः) स्वादोऽपि, देहिस्थो विषय-स्वादो ऽपि । परं दृष्ट्वा—परस्य (परमेश्वरस्य) दर्शनात् परम् । २४ । जातु—कदाचित् , कस्याञ्चिद् अवस्थायाम् । अ-वशः—अ-स्व-तन्त्रः । प्रकृति-जैः—स्वभाव-प्रसूतैः । कर्म तावत् त्रिधैव शारीरं वाचनिकं मानसिकं चेति । २५ । कर्मेन्द्रियाणि—वाक्-पाणि-पादपायूपस्थानि । संयम्य—नियम्य । इन्द्रियार्थान्—इन्द्रियाणाम् विषयान् , शब्द-स्पर्श रूप-रस-गन्धान् । विमूढ़ात्मा—कृत्याकृत्य-ज्ञान-हीन-चित्तः, विषय-मोह-ग्रस्तत्वात् किं कर्त्तव्यमिति निर्णेतुम् एकान्तम् अशक्तः । मिथ्याचारः—कपटाचारः । २६ । नियम्य—संयम्य । अ-सक्तः—सङ्ग-रहितः, [फल-] सङ्ग-रहितः । विशिष्यते—विशिष्टः [श्रेष्ठो] भवति । २७ । कार्यम्—कर्त्तव्यम् । परम्—परमं वस्तु, मोक्षं परम-पुरुषं वा ।

कर्मणैव हि सं-सिद्धिम् आस्थिता जनकादयः ।
लोक-संग्रहम् एवापि संपश्यन् कर्तुम् अर्हसि । २८

यद् यद् आचरति श्रेष्ठस् तत् तद् एवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस् तद् अनुवर्तते । २९

न बुद्धि-भेदं जनयेद् अ-ज्ञानां कर्म-सङ्गिनाम् ।
योजयेत् सर्व-कर्माणि विद्वान् युक्तः समाचरन् । ३०

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कार-विमूढात्मा कर्ताहम् इति मन्यते । ३१

अभ्यास-योग-युक्तेन चेतसा नान्य-गामिना
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् । ३२

---

२८ । सं-सिद्धिम्—परमां सिद्धिम् । आस्थिताः—प्रापुः । लोक-संग्रहम् संपश्यन्—जगतो रक्षणं मनसिकृत्य, जगद्-धिताय । कर्तुम्—'कर्म' इति शेषः । २९ । जनः—'आचरति' इति शेषः । प्रमाणं कुरुते—'अनुसर्तव्यम्' इति दर्शयति । अनुवर्तते—अनुसरति । ३० । बुद्धि-भेदम्—बुद्धि-विचालनम् । जनयेत्—उत्पादयेत् । अ-ज्ञानाम्—अ-विवेकिनाम् । कर्म-सङ्गिनाम्—कर्मासक्तानाम् । योजयेत्—कारयेत् । विद्वान्—ज्ञानी । युक्तः—समत्ववान् [सन्] । समाचरन्—स्वयं सम्यक् कुर्वन् । ३१ । प्रकृतेर् गुणैः—स्वभावस्य विकारैः [इन्द्रियैः] । विमूढात्मा—विमूढ-बुद्धिः । कर्ताहम्—अहं करोमि । ३२ । अभ्यास-योग-युक्तेन—अभ्यासः (तत्र स्थितौ यत्नः) एव योगः (उपायः), तेन युक्तः

कविं पुराणम् अनुशासितारम्
अणोर् अणीयांसम् अनुस्मरेद् यः,
सर्वस्य धातारम् अचिन्त्य-रूपम्
आदित्य-वर्णं, तमसः परस्तात्, ३३

प्रयाण-काले मनसा-चलेन,
भक्त्या युक्तो, योग-बलेन चैव,
भ्रुवोर् मध्ये प्राणम् आवेश्य सम्यक्,
स तं परं पुरुषम् उपैति दिव्यम्। ३४

पुरुषः स परः, पार्थ, भक्त्या लभ्यस् त्वनन्यया,
यस्यान्तः-स्थानि भूतानि, येन सर्वम् इदं ततम्। ३५

(समत्वं प्राप्तः) तादृशेन। नान्य-गामिना—नान्यम् (एकम् एव) गन्तुं शीलं यस्य तादृशेन। दिव्यम् [दिव्+य, २।१]—प्रकाशमानम्। अनु-चिन्तयन्—अविच्छेदेन ध्यायन्। ३३। कविम्—सर्व-ज्ञं सर्व-विद्या-निर्मातारं च। पुराणम्—पुरातनम्, अनादि-सिद्धम्। अनुशासितारम्—नियन्तारम्। अणोर् अणीयांसम्—सूक्ष्मतमम्। धातारम्—पोषकम्। अचिन्त्य-रूपम्—[मलिनयोर्] मनो-बुद्ध्योर् अ-गोचरम्। आदित्य-वर्णम्—स्व-प्रकाशम्। तमसः परस्तात् [वर्तमानम्]—जगत्-प्रपञ्चान्तर्हितम्। ३४। प्रयाण-काले – देह-त्याग-समये। अ-चलेन—अ-चञ्चलेन, विक्षेप-रहितेन। भक्त्या—ईश्वरे परानुरक्तया। योग-बलेन – चित्तस्य समत्व-बलेन। आवेश्य—[सुषुम्णा-मार्गेण उन्नीय] स्थापयित्वा। ३५। पुरुषः परः—परमेश्वरः। अनन्यया [नास्ति अन्यत् {शरणं} यस्याः

पुरुषः प्रकृति-स्थो हि भुङ्क्ते प्रकृति-जान् गुणान् ।
कारणं गुण-सङ्गो ऽस्य सदसद्-योनि-जन्मसु । ३६

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः,
परमात्मेति चाप्युक्तो देहे ऽस्मिन् , पुरुषः परः । ३७

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह,
सर्वथा वर्तमानो ऽपि न स भूयो ऽभिजायते । ३८

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्
विनश्यत्स्व-विनश्यन्तं यः पश्यति स पश्यति । ३९

द्वाव् इमौ पुरुषौ लोके क्षरश् चाक्षर एव च ।
क्षरः सर्वाणि भूतानि, कूट-स्थो ऽक्षर उच्यते । ४०

ताद्दश्या]-- ऐकान्तिक्या । अन्तः-स्थानि—मध्य-स्थानि । इदम्—दृश्यमानं [जगत्] । ततम्—व्याप्तम् । ३६ । प्रकृति-स्थः—प्रकृति-विकार-भूते देहे तादात्म्येन स्थितः । प्रकृति-जान्—प्रकृति-सम्भूतान् सुख-दुःखादि-रूपान् । गुण-सङ्गः—गुणैः ([शुभाशुभ-कर्म-कारिभिः] इन्द्रियैः) सङ्गः (संसर्गः, सहवासः) । सदसद्-योनि-जन्मसु—सतीषु (उत्तमासु) [देवादि-] योनिषु असतीषु (अपकृष्टासु) [पश्वादि-] योनिषु च यानि जन्मानि तेषु । ३७ । उपद्रष्टा—[पृथग्-भूत एव] समीपे [स्थित्वा] द्रष्टा (साक्षी) । अनुमन्ता—अनुमोदिता । पुरुषः परः—परमः पुरुषः, उत्तमः पुरुषः, पुरुषोत्तमः । Cf. परस्तात् ६।३।४१ । ३८ । एवम्— विभेदेन । पुरुषम्—कूटस्थः परश्चेति पुरुष-द्वयम् । सर्वथा—शास्त्र-गुरु-निर्दिष्ट-विधि-निषेधौ अनुसृत्य अतिक्रम्य वा । भूयः—पुनः । न...ऽभिजायते—स जन्म-शृङ्खलात् मुच्यत एव । ३९ । पश्यति—जानाति । ४० । क्षरः—क्षय-शीलः, विनाशी ।

उत्तमः पुरुषस् त्वन्यः परमात्मेत्युदाहृतः,
यो लोक-त्रयम् आविश्य बिभर्त्यव्यय ईश्वरः। ४१

स्वे स्वे कर्मण्यभिरतः सं-सिद्धिं लभते नरः।
स्व-कर्म-निरतः सिद्धिं यथा विन्दति तच् छृणु। ४२

यतः प्रवृत्तिर् भूतानां, येन सर्वम् इदं ततम्,
स्व-कर्मणा तम् अभ्यर्च्य सिद्धिं विन्दति मानवः। ४३

सह-जं कर्म, कौन्तेय, स-दोषम् अपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निर् इवावृताः। ४४

अ-सक्त-बुद्धिः सर्वत्र जितात्मा विगत-स्पृहः
नैष्कर्म-सिद्धिं परमां सन्न्यासेनाधिगच्छति। ४५

अक्षरः—अविनाशी। भूतानि—[स्थावर-जङ्गमानि] वस्तूनि। यद् एव अस्ति तद् एव भूतम् 'भूः सत्तायाम्' इत्युक्तेः। कूट-स्थः—स्थिरः, निर्विकारः। ४१। अन्यः—[क्षराक्षराभ्यां] विलक्षणः। उदाहृतः—उक्तः। अ-व्ययः—अ-क्षयः, निर्विकारः। आविश्य—व्याप्य। बिभर्ति—पालयति। ईश्वरः—प्रभुः। ४२। अभिरतः—तत्परः। संसिद्धिम्—पूर्ण-मोक्षम्। ४३। प्रवृत्तिः—जीवन-प्रवाहः। भूतानाम्—सत्त्ववताम्। इदम्—ज्ञायमानम् [विश्वम्]। ततम्—व्याप्तम्। अभ्यर्च्य—पूजयित्वा। ४४। सह-जम्—[जन्मना] सह जातम्, स्व-भाव-विहितम्। कर्म—[कर्तव्यं] कर्म, कृत्यम्। आरम्भाः—कर्माणि। ४५। असक्त-बुद्धिः—अ-सक्ता (सङ्ग-हीना) बुद्धिः यस्य तादृशः। जितात्मा—संयत-चित्तः। विगत-स्पृहः—फलाकाङ्क्षा-शून्यः। सन्न्यासेन—[एवम्भूत-] यथार्थ-त्यागेन, आसक्ति-त्यागेन चित्त-जयेन कर्म-फला-

बुद्ध्या विशुद्धया युक्तो, धृत्यात्मानं नियम्य च,
शब्दादीन् विषयांस् त्यक्त्वा, राग-द्वेषौ व्युदस्य च, ४६

विविक्त-सेवी, लघ्वाशी, यत-वाक्-काय-मानसः,
ध्यान-योग-परो नित्यं, वैराग्यं समुपाश्रितः, ४७

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्
विमुच्य, निर्ममः शान्तो ब्रह्म-भूयाय कल्पते। ४८

काङ्क्षा-वर्जनेन च। नैष्कर्म-सिद्धिम्—तथा-कथित-नैष्कर्म्योद्देश्यां मुक्ति-निष्पत्तिम्। अनेन कृत्यस्य अवश्य-कर्तव्यत्वं प्रसज्यते। परमाम्—ऐकान्तिकीम्। इतःपरं त्रिभिः श्लोकैः ऐकान्तिकीं नैष्कर्म-सिद्धिं प्राप्तो जनो येन प्रकारेण सकल-साधन-चरम-लक्ष्य-भूतं ब्रह्म समाप्नोति स संक्षेपेणोच्यते। ४६। विशुद्धया—निर्मलया अतएव प्रकाशमानया। धृत्या—धैर्येण। आत्मानम्—चित्तम्। नियम्य—वशीकृत्य। व्युदस्य—उत्क्षिप्य, निराकृत्य, निवार्य। ४७। विविक्त-सेवी—[अरण्य-पुलिन-गुहादि-] निर्जन-शुचि-स्थान-विहारी। लघ्वाशी—अल्प-भोजी। यत-वाक्-काय-मानसः—संयत-वाग्-देह-चित्तः। ध्यानम्—अ-विच्छेदेन [परमात्म-] चिन्तनम्। ध्यान-योग-परः—ध्यानम् एव योगः (उपायः) परः (परमः [अर्थः]) यस्य तादृशः। वैराग्यम्—विषय-वितृष्णाम्। ४८। अहङ्कारम्—अहं करोमीति भावम्। बलम्—[अ-स्थाने] सामर्थ्य [-प्रयोग-] म्। दर्पम्—स्व-चेष्टा-साफल्येन तृप्ति-प्रकाशनम्। कामम्—तृष्णाम्। परिग्रहम्—चेतसा विषय-ग्रहणम्। निर्ममः—इदं ममेति भावेन रहितः। शान्तः—निगृहीतान्तरिन्द्रियः। ब्रह्म-भूयाय [ब्रह्मन्-भू+य, ४।१]—ब्रह्म-भावाय, ब्रह्मत्वाय, ब्रह्मत्वं प्राप्तुम्। कल्पते—योग्यो भवति।

यद् अहङ्कारम् आश्रित्य न योत्स्य इति मन्यसे,
मिथ्यैव व्यवसायस् ते, प्रकृतिस् त्वां नियोक्ष्यति। ४९

स्वभाव-जेन, कौन्तेय, निबद्धः स्वेन कर्मणा,
कर्तुं नेच्छसि यद् मोहात्, करिष्यस्यवशोऽपि तत्। ५०

ईश्वरः सर्व-भूतानां हृद्-देशे, ऽर्जुन, तिष्ठति,
भ्रामयन् सर्व-भूतानि यन्त्रारूढानि मायया। ५१

तम् एव शरणं गच्छ सर्व-भावेन, भारत,
तत्-प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्। ५२

इति ते ज्ञानम् आख्यातं गुह्याद् गुह्यतरं मया,
विमृश्यैतद् अ-शेषेण यथेच्छसि तथा कुरु। ५३

४९। मन्यसे—चिन्तयसि। व्यवसायः—निश्चयः, सङ्कल्पः। नियोक्ष्यति [नि-युज्+स्यति]—[युद्धे] प्रवर्तयिष्यति। ५०। स्व-भाव-जेन—[आत्म-] प्रकृति-सम्भूतेन। निबद्धः—नितरां बद्धः, यन्त्रितः। कर्मणा - कृत्येन। मोहात्—अज्ञानात्। अवशोऽपि—पर-वश एव, अनिच्छन्न् अपि। ५१। ईश्वरः—प्रभुः। तिष्ठति—[अन्तर्यामितया] अवतिष्ठते। भ्रामयन्—चालयन्, नियन्त्रयन् इत्यर्थः। मायया—ऐश-शक्त्या। ५२। सर्व-भावेन—सर्वात्मना। तत्-प्रसादात्—ईश्वरानुग्रहेण। पराम्—परमाम्। स्थानं शाश्वतम्—नित्यं [वास-] स्थानम्। परा शान्तिर् हि ईश्वराश्रितानां नित्यं वास-स्थानम्। ५३। आख्यातम्—स-विशेषम् उक्तम्। गुह्याद् गुह्यतरम्—गुह्यतमम्, गोप्यतमम्। विमृश्य—विचार्य, आलोच्य। अ-शेषेण—अ-शेषतः, निः-शेषम्।

अर्जुन उवाच,—

नष्टो मोहः स्मृतिर् लब्धा त्वत्-प्रसादाद् मयाच्युत,
स्थितो ऽस्मि गत-सन्देहः। करिष्ये वचनं तव। ५४

चतुर्थो ऽध्यायः

युद्धम्—प्रथमो दिवसः

सञ्जय उवाच,—

ततो धनञ्जयं दृष्ट्वा बाण-गाण्डीव-धारिणम्,
पुनर् एव महा-नादं व्यसृजन्त महा-रथाः। १

सर्वे त्वन्ये मही-पालाः, प्रेक्षका इव, भारत,
ददृशुर् दर्शनीयं तं भीमं ज्ञाति-समागमम्। २

कुरु-पाण्डव-सेने ते हस्त्यश्व-रथ-सङ्कुले,
शुशुभाते रणे ऽतीव पटे चित्र-गते इव। ३

ततस् ते पार्थिवाः सर्वे प्रगृहीत-शरासनाः
सह-सैन्याः समापेतुः पुत्रस्य तव शासनात्। ४

५४। स्मृतिर् लब्धा—नष्टं ज्ञानं पुनः प्राप्तोऽस्मि। करिष्ये वचनं तव—तव उपदेशम् अनुसृत्य योत्स्ये।

१। व्यसृजन्त—व्यसृजन्, मुमुचुः। आआ। २। भीमम्—भयङ्करम्। ३। पटे—अधिकरणे सप्तमी।

युधिष्ठिरेण चादिष्टाः पार्थिवास् ते सहस्रशः,
विनदन्तः समापेतुः पुत्रस्य तव वाहिनीम्। ५

प्रयुद्धानां प्रभग्नानां पुनर् आवर्तताम् अपि
न तु स्वेषां परेषां वा विशेषः समदृश्यत। ६

न पुत्रः पितरं जज्ञे, न पिता पुत्रम् औरसम्,
न भ्राता भ्रातरं तत्र, स्वस्रीयो न च मातुलम्, ७

न मातुलश् च स्वस्रीयं, न सखायं सखा तदा,—
आविष्टा इव युध्यन्ते पाण्डवाः कुरुभिः सह। ८

रथानीकं नर-व्याघ्राः केचिद् अभ्यपतन् रथैः,
अभज्यन्त युगैर् एव युगानि, भरतर्षभ। ९

न शेकुश् चलितुं केचित्, सन्निपत्य, रथा, रथैः,
प्रभिन्नास् तु महा-नागाः सन्निपत्य महा-गजैः। १०

अभिनीताश् च शिक्षाभिस्, तोत्राङ्कुश-समाहताः,
अ-प्रभिन्नाः प्रभिन्नानां सम्मुखाभिमुखा ययुः। ११

—६। आवर्तताम्—आवर्तमानानाम्, घूर्णताम्। पआ.। ७। जज्ञे [ज्ञा+ए]—ज्ञातवान्। स्वस्रीयः [स्वसृ+ईय, ११।१]—भागिनेयः। ८। आविष्टाः—भूतादि-गृहीताः। ९। युगानि—अश्व-स्कन्धार्पितानि काष्ठानि। १०। संनिपत्य—मिलित्वा। प्रभिन्नाः—क्षरन्-मदाः, मत्ताः, गर्जिताः, मद-कलाः। ११। अभिनीताः—सुशिक्षिताः। तोत्रम्,—गज-तोदन-दण्डः। सम्मुखाभिमुखाः—अन्योन्य-सम्मुखाः।

प्रभिन्नैर् अपि संयुक्ताः केचिद् अत्र महा-गजाः,
क्रौञ्चवद् निनदं मुक्त्वा प्राद्रवन्त ततस् ततः। १२

गजानां पाद-रक्षाश् च व्यूढोरस्काः प्रहारिणः,
व्यदृश्यन्त, महा-राज, परस्पर-जिघांसवः। १३

भ्राजमानाश् च निस्त्रिंशाः, संसिक्ता नर-शोणितैः,
प्रत्यदृश्यन्त शूराणाम् अन्योन्यम् अभिधावताम्। १४

हयैर् अपि हयारोहाश्, चामरापीड़-धारिभिः,
हंसैर् इव महा-वेगैर्, अन्योन्यम् अभि-विद्रुताः। १५

तैर् विमुक्ता महा-प्रासा जाम्बूनद-विभूषणाः,
आशुगा वि-मलास् तीक्ष्णाः संपेतुर्, भुजगोपमाः। १६

अश्वैर् अग्र्य-जवैः केचिद्, आप्लुत्य महतो रथात्,
शिरांस्याददिरे वीरा रथिनाम् अश्व-सादिनः। १७

बहून् अपि हयारोहान् भल्लैः सन्नत-पर्वभिः,
रथी जघान संप्राप्य, बाण-गोचरम् आगतान्। १८

१२। प्राद्रवन्त—प्राद्रवन्, पलायाञ्चक्रिरे। आआ। ततस् ततः—सर्वतो दिशः। १५। हयैः—अश्वैः। करणे तृतीया। चामरापीड़ाः—चामर-कलापाः। अभिविद्रुताः—सम्मुखम् उपागताः। १६। प्रासाः—हस्त-क्षेप्या भल्लाः, कुन्ताः। आशु-गाः—शीघ्र-गामिणः। १७। अग्र्य-जवैः—उत्तम-वेगैः। आददिरे—जगृहुः। अश्व-सादिनः—अश्वारोहिणः। १८। भल्लैः—दीर्घ-फलकैर् बाणैः। सन्नत-पर्वभिः—

नव-मेघ-प्रतीकाशाश् चाक्षिप्य तुरगान् गजाः
स्व-पादैर् अवमृद्नन्तो मत्ताः कनक-भूषणाः, १९

पात्यमानेषु कुम्भेषु पार्श्वेष्वपि च वारणाः,
प्रासैर् विमथिताः केचिद्, विनेदुः, परमातुराः। २०

नराश्व-कायान् निर्भिद्य लौहानि कवचानि च,
निपेतुर् विमलाः शक्त्यो वीर-बाहुभिर् अर्पिताः। २१

शङ्कुभिर् दारिताः केचित्, संछिन्नाश् च परश्वधैः,
हस्तिभिर् मृदिताः केचित्, क्षुण्णाः केचित् तुरङ्गमैः, २२

रथ-चक्र-निकृत्ताश् च निकृत्ताश् च परश्वधैः,
व्याक्रोशन्त, महा-राज, तत्र तत्र स्व-बान्धवान्। २३

विकीर्णान्त्राः सु-बहवो भग्न-सक्थाश् च, भारत,
बाहुभिश् चापरे छिन्नैः, पार्श्वेषु च विदारिताः,
क्रन्दन्तः समदृश्यन्त सुभृशं, जीवितेप्सवः। २४

तृषा परिगताः केचिद् अल्प-सत्त्वा, विशाम् पते,
भूमौ निपतिताः सङ्ख्ये, मृगयाञ्चक्रिरे जलम्। २५

शब्दित-ग्रन्थिकैः। १९। आक्षिप्य—आहत्य। २०। पात्यमानेषु—विदार्यमाणेषु। २१। शक्त्यः [शक्ति+ई, १।ब]—शक्तयः, तीक्ष्णाग्रा लौह-दण्डाः। २२। शङ्कुभिः—कण्टक-दण्डादि-गतैः कीलैः। २३। व्याक्रोशन्त—व्याक्रोशन्, उद्दिश्य उच्चैर् विलेपुः। आआ। २४। भग्न-सक्थाः—भग्नोरवः। २५। तृषा [तृष्+०, ३।१]—

रुधिरौघ-परिक्लिन्नाः क्लिश्यमानाश् च, भारत,
व्यनिन्दन भृशम् आत्मानं तव पुत्रांश् च सङ्गतान्। २६

अपरे क्षत्रियाः शूराः कृत-वैराः परस्परम्
—नैव शस्त्रं विमुञ्चन्ति, नैव क्रन्दन्ति, मारिष— २७

निर्दश्य दशनैश् चापि क्रोधाद् स्व-दशन-च्छदम्,
भ्रुकुटी-कुटिलैर् वक्त्रैः प्रेक्षन्ति स्म परस्परम्। २८

अपरे क्लिश्यमानास् तु शरार्ता व्रण-पीडिताः
निष्कूजाः समपद्यन्त दृढ़-सत्त्वा महा-बलाः। २९

अन्ये तु विरथाः शूरा, रथम् अन्यस्य संयुगे
प्रार्थयाना निपतिताः, संक्षुण्णा वर-वारणैः,
अशोभन्त, महा-राज, स-पुष्पा इव किंशुकाः। ३०

निजघान पिता पुत्रं पुत्रश् च पितरं रणे।
एवं युयुधिरे तत्र कुरवः पाण्डवैः सह। ३१

पिपासया। परिगताः—अभिभूताः, आर्ताः। अल्प-सत्त्वाः—क्षीण-प्राणाः। मृगयाञ्चक्रिरे—अन्वीषुः, ययाचिरे। २८। दशन-च्छदम्—दन्तावरणम्, ओष्ठम्। प्रेक्षन्ति स्म—प्रेक्षन्ते स्म, ईक्षाञ्चक्रिरे। पआ. २९। निष्कूजाः—निःशब्दाः। दृढ़-सत्त्वाः—दृढ़-चित्ताः। ३०। प्रार्थयानाः—प्रार्थयमानाः। संक्षुण्णाः—चूर्णिताः।

पञ्चमो ऽध्यायः

उत्तर-पातः

केतुना पञ्च-तारेण तालेन, भरतर्षभ,
राजतेन, महा-बाहुर् , उच्छ्रितेन महा-रथे,
बभौ भीष्मस् तदा, राजंश् , चन्द्रमा इव मेरुणा । १

दुर्मुखः कृत-वर्मा च कृपः शल्यो विविंशतिः,
भीष्मं जुगुपुर् आसाद्य, तव पुत्रेण चोदिताः । २

एतैर् अति-रथैर् गुप्तः पञ्चभिर्, भरतर्षभ,
पाण्डवानाम् अनीकानि विजगाह महा रथः । ३

चेदि-काशि-करूषेषु पाञ्चालेषु च, भारत,
भीष्मस्य बहुधा तालश् चलन् केतुर् अदृश्यत । ४

स शिरांसि रणे ऽरीणां रथांश् च स-युग-ध्वजान्
निचकर्त महा-वेगैर् भल्लैः सन्नत-पर्वभिः । ५

१। केतुना—पताकया। तालेन—ताल-प्रांशु-ध्वज-शीर्षस्थेन अतएव ताल-नाम्ना। राजतेन—रजतमयेन, शुभ्रेण। चन्द्रमा इव मेरुणा—रथस्य सुवर्णमयत्वात् तदन्तर्वर्ती भीष्मो मेरुणा केतुश् च तस्य राजतत्वात् चन्द्रेण उपमीयते। २। दुर्मुख-विविंशती—धृतराष्ट्र-पुत्रौ। जुगुपुः [गुप्+उस्]—ररक्षुः। ३। विजगाह—विजगाहे, प्रविवेश। पआ.। ४। करूषाः—करूप-प्रदेशाधिवासिनः। इदानीन्तन-बिहार-प्रदेशस्य

अभिमन्युः सु-संक्रुद्धः, पिशङ्गैस् तुरगोत्तमैः
संयुक्तं रथम् आ-स्थाय, प्रायाद् भीष्म-रथं प्रति। ६

ततो ध्वजम् अमोघेषुर् भीष्मस्य नवभिः शरैः
चिच्छेद समरे वीरस्, तत उच्चुक्रुशुर् जनाः। ७

ततः शर-सहस्रेण सौभद्रं प्र-पितामहः
अवाकिरद्, अ-मेयात्मा। तद् अद्भुतम् इवाभवत्। ८

ततो दश महेष्वासाः पाण्डवानां महा-रथाः
रक्षार्थम् अभ्यधावन्त सौभद्रं, त्वरिता रथैः। ९

प्रगृहीताग्र-हस्तेन वैराटिर् अपि दन्तिना
अभ्यद्रवत राजानं मद्राधिपतिम् उत्तरः। १०

तस्य वारण-राजस्य, जवेनापततो रथे,
शल्यो नि-वारयामास वेगम् अ-प्रतिमं शरैः। ११

तस्य, क्रुद्धः स नागेन्द्रो, बृहतः साधु-वाहिनः,
पदा युगम् अधिष्ठाय, जघान चतुरो हयान्। १२

शाहाबाद-जिलायाः पूर्व-भागः पुरा किल 'करूषाः' इति नाम्ना ख्यातो बभूव। ६। पिशङ्गैः—पिङ्गलैः। ८। अमेयात्मा—अविज्ञेय-स्वभावः। ९। अभ्यधावन्त—अभ्यधावन्। आआ.। १०। प्रगृहीताग्र-हस्तेन—कुण्डलीकृत-शुण्डाग्रेण। दन्तिना—हस्तिना। अभ्यद्रवत—अभ्यद्रवत्, अभ्यधावत्। आआ.। ११। रथे—रथोपरि। १२। तस्य—शल्यस्य। बृहतः—परिपुष्टान्।

स, हताश्वे रथे तिष्ठन्, मद्राधिपतिर् आयसीम्
उत्तरान्तकरीं शक्तिं चिक्षेप, भुजगोपमाम्। १३

तया भिन्न-तनु-त्राणः, प्रविश्य विपुलं तमः,
स पपात गज-स्कन्धात्, प्रमुक्ताङ्कुश-तोमरः। १४

असिम् आदाय, शल्यो ऽपि अवप्लुत्य रथोत्तमात्,
तस्य वारण-राजस्य चिच्छेदाथ महा-करम्। १५

भिन्न-मर्मा शर-व्रातैश्, छिन्न-हस्तः, स वारणः,
भीमम् आर्त-स्वरं कृत्वा, पपात च ममार च। १६

उत्तरं तु हतं दृष्ट्वा वैराटिर् भ्रातरं ततः,
शङ्खः क्रोधात् प्रजज्वाल, हविषा हव्य-वाड् इव। १७

स, विस्फार्य महच् चापं शक्र-चापोपमं, बली,
अभ्यधावज्, जिघांसन् वै, शल्यं मद्राधिपं युधि,
महता रथ-सङ्घेन समन्तात् परिरक्षितः। १८

तम् आपतन्तं सम्प्रेक्ष्य, मत्त-वारण-विक्रमम्,
तावकानां रथाः सप्त समन्तात् पर्यवारयन्,
मद्र-राजं, परीप्सन्तो, मृत्योर् दंष्ट्रान्तरं गतम्। १९

नाना-धातु-विचित्राणि कार्मुकाणि महात्मनाम्,
विस्फारितान्यदृश्यन्त तोयदेष्विव विद्युतः। २०

साधु-वाहिनः—सम्यग्-वहन-शीलान्। १४। तमः—मोहम्। १०।
हव्य-वाट [हव्य-वह्+०, ३।२] —हव्य-वाहः, अग्निः।

ततो भीष्मो महा-बाहुर्, विनद्य जलदो यथा,
तालमात्रं धनुर् गृह्य शङ्खम् अभ्यद्रवद् रणे। २१

तम् उद्यतम् उदीक्ष्याथ, महेष्वासं, महा-बलम्,
संत्रस्ता पाण्डवी सेना, वात-वेगाहतेव नौः। २२

ततोऽर्जुनः सं-त्वरितः शङ्खस्यासीत् पुरःसरः
भीष्माद् रक्ष्योऽयम् अद्येति। ततो युद्धम् अवर्तत। २३

अथ शल्यो गदा-पाणिर्, अवतीर्य महा-रथात्,
शङ्खस्य चतुरो वाहान् अवधीद्, भरतर्षभ। २४

स, हताश्वाद् रथात् तूर्णं, खड्गम् आदाय, विद्रुतः,
बीभत्सोश् च रथं प्राप्य पुनः शान्तिम् अविन्दत। २५

पञ्चालान् अथ मत्स्यांश् च केकयांश् च प्रभद्रकान्
भीष्मः, प्रहरतां श्रेष्ठः, पातयामास पत्रिभिः। २६

उत्सृज्य समरे, राजन्, पाण्डवं सव्य-साचिनम्,
अभ्यद्रवत पाञ्चाल्यं द्रुपदं सेनया वृतम्। २७

शर-दग्धान्यदृश्यन्त सैन्यानि द्रुपदस्य ह।
अत्यतिष्ठद् रणे भीष्मो विधूम इव पावकः। २८

२१। तालमात्रम्—ताल-वृक्षवत् आयतम्। २५। विद्रुतः—पलायितः। २७। Cf. उपरिष्टात् ५।२२।४० अभ्यद्रवत—अभ्यद्रवत्, अभ्यधावत्। आत्मनेपदम् आर्षम्। २८। अत्यतिष्ठत्—[अन्यान् सर्वान्] अतिक्रम्य दण्डायमान आस्त।

मध्यन्दिने यथादित्यं तपन्तम् इव तेजसा ,
न शेकुः पाण्डवेयस्य योधा भीष्मं निरीक्षितुम् । २९

शरैर् एकायनी-कुर्वन् दिशः सर्वा, यत-व्रतः
जघान पाण्डव-रथान् आदिश्यादिश्य, भारत । ३०

ततः सैन्येषु सर्वेषु मथितेषु च सर्वशः ,
प्राप्ते चास्तं दिन-करे, न प्राज्ञायत किञ्चन । ३१

भीष्मं च समुदीर्यन्तं दृष्ट्वा, पार्था महाहवे
अवहारम् अकुर्वत सैन्यानां , भरतर्षभ । ३२

षष्ठो ऽध्यायः

द्वितीयो दिवसः—भीष्मार्जुनयोः

धर्म-राजस् ततस् , तूर्णम् अभिगम्य जनार्दनम् ,
वार्ष्णेयम् अब्रवीद् , राजन् , दृष्ट्वा भीष्मस्य विक्रमम् ,— १

"कृष्ण, पश्य महेष्वासं भीष्मं भीम-पराक्रमम् ,
लेलिह्यमानं सैन्यं मे, हविष्मन्तम् इवानलम् । २

३०। एकायनीकुर्वन्—एकां दिशम् इव पूरयन् । एक-मार्गाः कुर्वन् (नी.) ।
३२। समुदीर्यन्तम्—समुद्दीप्यमानम् ? अवहारम्—प्रत्याहारम् ।
२। लेलिह्यमानम् [लिह्-य+आन, २।१]—पुनः पुनः अतिशयेन वा लिहन्तम् ।

शक्यो जेतुं यमः क्रुद्धो वज्र-पाणिश् च संयुगे,
न तु भीष्मो महा-तेजाः शक्यो जेतुं, महा-बलः ।" ३
अब्रवीत् तत्र गोविन्दो हर्षयन् सर्व-पाण्डवान्,—
"सैनापत्यम् अनुप्राप्तो धृष्टद्युम्नो महा-रथः ।" ४
एतच्च श्रुत्वा ततो राजा धृष्टद्युम्नम् महा-रथम्
अब्रवीत् समितौ तस्यां वासुदेवस्य शृण्वतः,— ५
"कार्तिकेयो यथा नित्यं देवानाम् अभवत् पुरा,
तथा त्वम् अपि पाण्डूनां सेनानीः, पुरुषर्षभ । ६
स त्वं, पुरुष-शार्दूल, विक्रम्य, जहि कौरवान् ।
अहं च ते ऽनुयास्यामि भीमः कृष्णश् च, मारिष, ७
माद्री-पुत्रौ च सहितौ द्रौपदेयाश् च दंशिताः,
ये चान्ये पृथिवी-पालाः प्रधानाः, पुरुषर्षभ ।" ८
तत उद्धर्षयन् सर्वान्, धृष्टद्युम्नो ऽभ्यभाषत,—
"सर्वान् अद्य रणे दृप्तान् प्रति-योत्स्यामि दंशितः ।" ९
तम् अब्रवीत् पुनः पार्थः पार्षतं पृतना-पतिम्,—
"व्यूहः क्रौञ्चारुणो नाम सर्व-शत्रु-निषूदनः १०
यं बृहस्पतिर् इन्द्राय तदा देवासुरे ऽब्रवीत्,
तं यथावत् प्रति-व्यूहं परानीक-विनाशनम्
अदृष्ट-पूर्वं राजानः पश्यन्तु कुरुभिः सह ।" ११

९। उद्धर्षयन् [उद्-हृष्-इ+अत्, १।१]—उत्साहयन् । ११।
तदा—युद्ध-काले । देवासुरे [युद्धे]—देवासुर-युद्धे ।

तथोक्तः स नृ-देवेन, विष्णुर् वज्र-भृतेव ह,
प्रभाते सर्व-सैन्यानाम् अग्रे चक्रे धनञ्जयम् । १२

शिरो ऽभूद् द्रुपदो राजा महत्या सेनया वृतः,
निषादैः सहितश् चापि पृष्ठम् आसीद् युधिष्ठिरः । १३

पक्षौ तु भीमसेनश् च धृष्टद्युम्नश् च पार्षतः ।
जघनं पालयामास विराटः सह केकयैः । १४

एवम् एतं महा-व्यूहं व्यूह्य, भारत-सत्तमाः
सूर्योदयनम् इच्छन्तः स्थिता युद्धाय दंशिताः । १५

तेषाम् आदित्य-वर्णानि विमलानि महान्ति च
श्वेतच्छत्राण्यदृश्यन्त वारणेषु रथेषु च । १६

ततो भीष्मश् च द्रोणश् च तव पुत्राश् च, मारिष,
अव्यूहन्त महा-व्यूहं पार्थानां प्रति-बाधकम् । १७

ततो युद्धं समभवत् तुमुलं लोम-हर्षणम्
तावकानां परेषां च व्यतिषक्त-रथ-द्विपम् । १८

ववर्ष शर-वर्षाणि वृद्धः कुरु-पितामहः ।
प्राकम्पत महा-व्यूहस् तस्मिन् वीर-समागमे । १९

---

१२ । नृ-देवेन—राज्ञा [युधिष्ठिरेण] । १४ । जघनम्—पश्चाद्-भागम् ।
१८ । व्यतिषक्त-रथ-द्विपम्—अन्योन्य-संलग्न-रथ-हस्तिकम् ।

अर्जुनस् तु नर-व्याघ्रो दृष्ट्वा भीष्मं महा-रथम्
वार्ष्णेयम् अब्रवीत् क्रुद्धो,—"याहि यत्र पितामहः । २०

एष भीष्मः सु-संक्रुद्धो, वार्ष्णेय, मम वाहिनीम्
नाशयिष्यति सु-व्यक्तं, दुर्योधन-हिते रतः ।" २१

तम् अब्रवीद् वासुदेवो,—"यत्तो भव, धनञ्जय ।
एष त्वां प्रापये, वीर, पितामह-रथं प्रति ।" २२

एवम् उक्त्वा ततः शौरी रथं तं लोक-विश्रुतम्
प्रापयामास भीष्मस्य रथं प्रति, जनेश्वर । २३

तम् आपतन्तं वेगेन, प्रभिन्नम् इव वारणम्,
सहसा प्रत्युदियाय भीष्मः शान्तनवो ऽर्जुनम् । २४

को हि गाण्डीव-धन्वानम् अन्यः कुरु-पितामहात्
द्रोण-वैकर्तनाभ्यां वा रथी संयातुम् अर्हति ? २५

द्रौणिर् दुर्योधनश् चैव विकर्णश् च तवात्मजः,
परिवार्य रणे भीष्मं, स्थिता युद्धाय, मारिष । २६

तथैव पाण्डवाः सर्वे, परिवार्य धनञ्जयम्
स्थिता युद्धाय महते । ततो युद्धम् अवर्तत । २७

भीष्म-चाप-विमुक्तानि शर-जालानि सङ्घशः
शीर्यमाणान्यदृश्यन्त, च्छिन्नान्यर्जुन-सायकैः । २८

---

२२ । यत्तः—यत्नवान् । २४ । प्रत्युदियाय [प्रति-उत्-इ+अ]—प्रत्युद्-ययौ ।

तथैवार्जुन-मुक्तानि शर-जालानि सर्वशः
गाङ्गेय-शर-नुन्नानि न्यपतन्त मही-तले । २९

ततः क्रुद्धो, महा-राज, भीष्मः प्रहरतां वरः
वासुदेवं त्रिभिर् बाणैर् आजघान स्तनान्तरे । ३०

ततो ऽर्जुनो, भृशं क्रुद्धो निर्विद्धं प्रेक्ष्य माधवम्,
सारथिं कुरु-वृद्धस्य निर्बिभेद शितैः शरैः । ३१

यतमानौ तु तौ वीराव् अन्योन्यस्य वधं प्रति,
नाशक्नुताम् तदान्योन्यम् अभिसन्धातुम् आहवे । ३२

तौ मण्डलानि चित्राणि गत-प्रत्यागतानि च
अदर्शयेतां बहुधा सूत-सामर्थ्य-लाघवात् । ३३

अन्तरं च प्रहारेषु तर्कयन्तौ परस्परम्,
राजन्न्, अन्तर-मार्गस्थौ स्थिताव् आस्ताम् मुहुर्मुहुः । ३४

उभौ सिंह-रवोन्मिश्रं शङ्ख-शब्दं च चक्रतुः ।
तथैव चाप-निर्घोषं चक्रतुस् तौ महा-रथौ । ३५

न तयोर् अन्तरं कश्चिद् ददृशे, भरतर्षभ ।
बलिनौ युद्ध-दुर्धर्षाव् अन्योन्य-सदृशाव् उभौ । ३६

---

२९ । नुन्नानि—नुत्तानि, क्षिप्तानि । ३३ । सूत-सामर्थ्य-लाघवात्—सारथ्योर् अश्व-चालन-शक्त्या अतिद्रुत-सञ्चरणेन । ३४ । अन्तरम्—छिद्रम् । तर्कयन्तौ—विचारयन्तौ । अन्तर-मार्ग-स्थौ—छिद्रान्वेषण-परौ । ३६ । ददृशे—ददर्श । आआ ।

चिह्न-मात्रेण भीष्मं च प्रजज्ञुस् तत्र कौरवाः ।
तथा पाण्डु-सुताः पार्थं चिह्न-मात्रेण जज्ञिरे । ३७

उभौ हि शर-जालेन ताव् अदृश्यौ बभूवतुः ।
प्रकाशौ च पुनस् तूर्णं बभूवतुर् उभौ रणे । ३८

न हि शक्यो रणे जेतुं भीष्मः पार्थेन धीमता
स-धनुः स-शरः साश्वः प्रवपन् सायकान् रणे । ३९

तथैव पाण्डवं युद्धे, देवैर् अपि दुरासदम्,
न विजेतुं रणे भीष्म उत्सहेत धनुर्धरम् । ४०

'आ-लोकाद् अपि युद्धं हि समम् एतद् भविष्यति'
इति स्म वाचोऽश्रूयन्त प्रचरन्त्यस् ततस् ततः । ४१

सप्तमो ऽध्यायः

कलिङ्ग-पातः

वर्त्तमाने तथा घोरे तस्मिन् युद्धे सु-दारुणे
द्रोण-पाञ्चाल्ययो, राजन्, महान् आसीत् समागमः । १

द्रोणस् तु विविधैर् बाणैर् धृष्टद्युम्नम् अविध्यत,
सारथिं चास्य भल्लेन रथ-नीड़ाद् अपातयत् । २

३७। चिह्नम्—ध्वजः। ४०। उत्सहेत—चेष्टितुं शक्नोति।
४१। आ-लोकात्—आ-संसार-स्थितेः।
२। अविध्यत [व्यध्+त]—अविध्यत। आआ.

अथास्य चतुरो वाहांश् चतुर्भिर् निशितैः शरैः
पातयामास समरे, सिंह-नादं ननाद च ।
ततो ऽपरेण भल्लेन हस्ताच् चापम् अथाच्छिनत् । ३

स च्छिन्न-धन्वा वि-रथो हताश्वो हत-सारथिः
गदा-पाणिर् अवारोहत्, ख्यापयन् पौरुषं महत् । ४

ताम् अस्य विशिखैस् तूर्णं पातयामास, भारत ।
रथाद् अनवरूढस्य तद् अद्भुतम् इवाभवत् । ५

ततः सु-विपुलं चर्म शत-चन्द्रं मनो-रमम्
खड्गं च विपुलं दिव्यं प्रगृह्य, सु-भुजो बली ६

अभिदुद्राव वेगेन द्रोणस्य वध-काङ्क्षया,
आमिषार्थी यथा सिंहो वने मत्तम् इव द्विपम् । ७

तत्राश्चर्यम् अपश्याम भारद्वाजस्य पौरुषम्
लाघवं चास्त्र-योगेन बलं बाह्वोश् च, भारत, ८

यद् एनं शर-वर्षेण वारयामास पार्षतम् ।
न शशाक ततो गन्तुं बलवान् अपि संयुगे । ९

निवारितश् च द्रोणेन धृष्टद्युम्नो महा-रथ
न्यवारयच् छरौघांश् च चर्मणा कृत-हस्तवत् । १०

नीड़ात्—आश्रय-स्थानात् । ५। रथाद् अनवरूढस्य—भूमौ अनवतीर्णस्य ।

ततो भीमो महा-बाहुः सहसा न्यपतद् बली
साहाय्यकारी समरे पार्षतस्य महात्मनः। ११

स द्रोणं निशितैर् बाणै, राजन्, विव्याध सप्तभिः,
पार्षतं च रथं तूर्णम् अन्यम् आरोहयत् तदा। १२

ततो दुर्योधनो, राजन्, कलिङ्गं समचोदयत्,
सैन्येन महता युक्तं, भारद्वाजस्य गोपने। १३

ततः सा महती सेना कलिङ्गानां, जनेश्वर,
भीमम् अभ्याययौ, भीमा, तव पुत्रस्य शासनात्। १४

पाञ्चाल्यम् अभि-संत्यज्य, द्रोणो ऽपि रथिनां वरः,
विराट-द्रुपदौ वृद्धौ योधयामास, सङ्गतौ। १५

धृष्टद्युम्नोऽपि समरे धर्म-राजं समभ्ययात्।
ततः प्रववृते युद्धं तुमुलं लोम-हर्षणम् १६

कलिङ्गानां च समरे भीमस्य च महात्मनः,
जगतः प्रक्षय-करं घोर-रूपं भयानकम्। १७

चरन्तं गदया वीरं, दण्ड-पाणिम् इवान्तकम्,
योधयामास समरे कलिङ्गः सह सेनया। १८

रथैर् अनेक-साहस्रैः कलिङ्गानां जनाधिपः,
अयुतेन गजानां च निषादैः सह, केतुमान्,
भीमसेनं रणे, राजन्, समन्तात् पर्यवारयत्। १९

१३। गोपने—रक्षणाय। निमित्तात् सप्तमी।

चेदि-मत्स्य-करूषाश् च भीमसेन-पदानुगाः ,
अभ्यधावन्त समरे निषादान् सह राजभिः । २०

अन्योन्यस्य तदा योधा निकृन्तन्तो, विशाम् पते ,
महीं चक्रुश् चितां सर्वां मांस-शोणित-सन्निभाम् । २१

कृत्वा पुरुषकारं तु यथा-शक्ति , महा-बलाः ,
भीमसेनं परित्यज्य, संन्यवर्तन्त चेदयः । २२

सर्वैः कलिङ्गैर् आसन्नः , सन्निवृत्तेषु चेदिषु ,
स्व-बाहु-बलम् आस्थाय न न्यवर्तत पाण्डवः । २३

न चचाल रथोपस्थाद् भीमसेनो महा-बलः ,
शितैर् अवाकिरद् बाणैः कलिङ्गानां वरूथिनीम् । २४

कलिङ्गस तु महेष्वासः पुत्रश् चास्य महा-रथः
शक्र-देव इति ख्यातो जघ्नतुः पाण्डवं शरैः । २५

शक्र-देवस् तु समरे विसृजन् सायकान् बहून् ,
अश्वान् जघान चतुरो भीमसेनस्य सायकैः । २६

हताश्वे तु रथे तिष्ठन् भीमसेनो महा-बलः ,
शक्र-देवाय चिक्षेप सर्व-शैक्यायसीं गदाम् । २७

स, तया निहतो, राजन् , कलिङ्गस्य-सुतो, रथात् ,
स-ध्वजः सह सूतेन जगाम धरणी-तलम् ।

---

२५ । जघ्नतुः [हन्+अतुस्]—आजघ्नतुः । २७ । सर्व-शैक्यायसीम्

हतम् आत्म-सुतं दृष्ट्वा, कलिङ्गानां जनाधिपः
रथैर् अनेक-साहस्रैर् भीमस्यावारयद् दिशः। २९

ततो भीमो महा-बाहुर्, गदां त्यक्त्वा, महा-बलः,
निस्त्रिंशम् आददे घोरं, चिकीर्षुः कर्म दारुणम्, ३०

चर्म चाप्रतिमं, राजन्न्, आर्षभं, पुरुषर्षभः,
नक्षत्रैर् अर्ध-चन्द्रैश् च शातकुम्भमयैश् चितम्। ३१

भानुमांस् तु ततो भीमं शर-वर्षेण छादयन्
ननाद बलवन्-नादं, नादयानो नभस्तलन्। ३२

ततो भीमो, महा-राज, नदित्वा विपुलं स्वनम्,
सासिर् वेगवद् आप्लुत्य, दन्ताभ्यां वारणोत्तमम्
आरुरोह, ततो मध्यं नाग-राजस्य, मारिष। ३३

ततो मुमोच कलिङ्गः शक्तिं। ताम् अकरोद् द्विधा
खड्गेन पृथुना मध्ये। भानुमन्तम् अथाच्छिनत्। ३४

गुरु-भार-सहं स्कन्धे नागस्यासिम्, अपातयत्।
छिन्न-स्कन्धः स विनदन् पपात गज-यूथ-पः। ३५

पततश् चाप्यवप्लुत्य गजाद्, भारत, भारतः
खड्ग-पाणिर् अ-दीनात्मा तस्थौ भुवि स दंशितः। ३६

३१। आर्षभम् [ऋषभ + अ, २।१]—षण्ड-त्वग्-विनिर्मितम्।
३२। भानुमान्—कलिङ्ग-राजस्य पुत्रः (नी.)। नादयानः—नादयमानः, प्रतिध्वनिभिः पूरयन्।

स चचार बहून् मार्गान्, अ-भीतः, पातयन् गजान्।
अग्नि-चक्रम् इवाविद्धं सर्वतः प्रत्यदृश्यत। ३७

केचिद्, अग्रासिना छिन्नाः पाण्डवेन महात्मना,
विनेदुर् भिन्न-मर्माणो, निपेतुश् च गतासवः। ३८

छिन्न-दन्ताग्र-हस्ताश् च भिन्न-कुम्भास् तथापरे
वि-योधास् स्वान्यनीकानि जघ्नुर्, भारत, वारणाः। ३९

विमृद्यैवम् महा-नागान् ममर्दाश्वान् नरर्षभः,
अश्वारोह-वरांश् चैव पातयामास संयुगे। ४०

आप्लुत्य, रथिनः कांश्चित् परामृश्य, महा-बलः
पातयामास खड्गेन स-ध्वजान् अपि पाण्डवः। ४१

निजघान पदा कांश्चिद्, आक्षिप्यान्यान् अपोथयत्,
खड्गेनान्यांश् च चिच्छेद, नादैर् अन्यान् अभीषयत्, ४२

ऊरु-वेगेन चाप्यन्यान् पातयामास भू-तले।
अपरे चैनम् आलोक्य भयात् पञ्चत्वम् आगताः। ४३

तम् आयान्तम् अभिप्रेक्ष्य, कलिङ्गो नवभिः शरैः
भीमसेनम् अ-मेयात्मा प्रत्यविध्यत् स्तनान्तरे। ४४

३७। आविद्धम्—भ्रामितम्, घूर्णितम्। ३९। वि-योधाः—[चालक-] योध-हीनाः। ४१। परामृश्य—स्पृष्ट्वा ४२। आक्षिप्य—भूमौ निक्षिप्य। अपोथयत्—विनाशयामास। ४३। पञ्चत्वम् आगताः—देहोपादान-भूतेषु पञ्चसु महा-भूतेषु विलयं प्राप्ताः, मृताः।

कलिङ्ग-बाणाभिहतस् , तोत्रार्दित इव द्विपः,
भीमसेनः प्रजज्वाल क्रोधेनाग्निर् इवेन्धनैः । ४५

अथाशोकः, समादाय रथं हेम-परिष्कृतम् ,
भीमं सम्पादयामास रथेन रथि-सारथिः । ४६

तम् आरुह्य रथं तूर्णं, कौन्तेयः शत्रु-सूदनः
कलिङ्गम् अभिदुद्राव तिष्ठ तिष्ठेति चाब्रवीत् । ४७

क्रुद्धः स, चापम् आयम्य बलवद् , बलिनां वरः,
कलिङ्गम् अवधीत् पार्थो भीमः सप्तभिर् आयसैः । ४८

ततः शक्ति-गदा-खड्ग-तोमरर्ष्टि-परश्वधैः
कलिङ्गाः शतशो, राजन् , भीमसेनम् अवारयन् । ४९

सन्निवार्य तु तां, राजन्, शर-वृष्टिं समुत्थिताम् ,
गदाम् आदाय, तरसा परिप्लुत्य, महा-बलः
भीमः सप्त शतान् वीरान् अनयद् यम-सादनम् । ५०

पुनश् चैव द्वि-साहस्रान् कलिङ्गान् अरि-मर्दनः
प्राहिणोद् मृत्यु-लोकाय । तद् अद्भुतम् इवाभवत् । ५१

हतारोहाश् च, मातङ्गाः, पाण्डवेन कृता रणे,
विप्र-जग्मुर् अनीकेषु घना वाताहता इव, ५२

---

४६ । अशोकः — विशोकः, भीमस्य सारथिः । सम्पादयामास—सम्पन्नं चकार । ४८ । आयम्य—विनाम्य, आकृष्य । ४९ । ऋष्टिः—द्वि-धारः खड्गः । ५० । सप्त शतान् वीरान्—वीराणां सप्त शतानि । आर्ष । ५२ । विप्र-जग्मुः—विपरीतां दिशं जग्मुः ।

मृद्नन्तः स्वान्यनीकानि, विनदन्तः शरातुराः । ५३.
ततो भीमो महा-बाहुः खड्ग-हस्तो महा-भुजः,

सं-प्रहृष्टो, महा-घोषं शङ्खं प्राध्मापयद्, बली ।
प्राकम्पन्त च सैन्यानि, वाहनानि च सुस्रुवुः । ५४.

त्रासितेषु च सर्वेषु भीमेनाद्भुत-कर्मणा,
पुनर् आवर्तमानेषु विद्रवत्सु च सङ्घशः ५५.

सर्व-कलिङ्ग-योधेषु, पाण्डूनां ध्वजिनी-पतिः
अब्रवीत् स्वान्यनीकानि 'युध्यध्वम्' इति पार्षतः । ५६.

सेना-पतेर् वचः श्रुत्वा, शिखण्डि-प्रमुखा गणाः
भीमम् एवाभ्यवर्तन्त रथानीकैः प्रहारिभिः । ५७.

एवं संचोद्य सर्वाणि स्वान्यनीकानि, पार्षतः
भीमसेनस्य जग्राह पार्ष्णिं, सत्-पुरुषैर् वृतः । ५८.

तौ दूरात् सात्यकिर् दृष्ट्वा धृष्टद्युम्न–वृकोदरौ,
पार्थ–पार्षतयोः पार्ष्णिं जग्राह पुरुषर्षभः । ५९.

कलिङ्ग-प्रभवां चैव मांस-शोणित-कर्दमाम्
रुधिर-स्यन्दिनीं तत्र भीमः प्रावर्तयद् नदीम । ६०.

भीमसेनं तथा दृष्ट्वा प्राक्रोशंस् तावका, नृप,—
"कालोऽयं भीम-रूपेण कलिङ्गैः सह युध्यते ।" ६१.

---

५४ । सुस्रुवुः—बहिर्जग्मुः । ५६ । ध्वजिनी—सेना ।

ततः शान्तनवो भीष्मः, श्रुत्वा तं निनदं रणे,
अभ्ययात् त्वरितो भीमं, व्यूढानीकः समन्ततः। ६२

ततः शर-सहस्रेण सन्निवार्य महा-रथान्
हयान् काञ्चन-सन्नाहान् भीमस्याभ्यहनच् छरैः। ६३

ततः शैक्यायसीं गुर्वीं प्रगृह्य महतीं गदाम्,
भीमसेनो रथात् तूर्णं, पुप्लुवे, मनुजर्षभः। ६४

सात्यकोऽपि ततस् तूर्णं, भीमस्य प्रिय-काम्यया
सारथिं कुरु-वृद्धस्य पातयामास सायकैः। ६५

भीष्मस् तु, निहते तस्मिन् सारथौ, रथिनां वरः,
वातायमानैर् अश्वैस् तैर् अपनीतो रणाजिरात्। ६६

भीमसेनस्, ततो, राजन्, अपनीते महा-व्रते,
प्रजज्वाल यथा वह्निर् दहन् कक्षम् इवोल्वणः। ६७

स हत्वा सर्व-कलिङ्गान् सेना-मध्ये व्यतिष्ठत।
नैनम् अभ्युत्सहन् केचित् तावका, भरतर्षभ। ६८

धृष्टद्युम्नस् तम् आरोप्य स्व-रथे, रथिनां वरः,
पश्यतां सर्व-सैन्यानाम्, अपोवाह यशस्विनम्। ६९

६५। सात्यकः [सत्यक+अ, ११।]—सात्यकिः। ६६। वातायमानैः [वात+य+आन, ३।ब]—[वेगेन] वायुवत् आचरद्भिः, वायु-वेगैः। ६७। उल्वणः—व्यक्तः, प्रदीप्तः। ६८। अभ्युत्सहन्—अभ्युदसहन्त, अभिगन्तुम् उत्सेहिरे, अभिगन्तुं

स, पूज्यमानः पाञ्चाल्यैर् मत्स्यैश् च, भरतर्षभ,
धृष्टद्युम्नं परिष्वज्य, समायाद् अथ सात्यकिम् । ७०

अथाब्रवीद् भीमसेनं सात्यकिः सत्य-विक्रमः,—
"महा-व्यूहः कलिङ्गानाम् एकेन मृदितस् त्वया ।" ७१

एवम् उक्त्वा, शिनेर् नप्ता दीर्घ-बाहुर् अरिन्दमः,
रथस्थं तम् अभिद्रुत्य, पर्यष्वजत पाण्डवम् । ७२

ततः स्व-रथम् आगम्य, पुनर् एव महा-रथः
तावकान् अवधीत् क्रुद्धो, भीमस्य बलम् आदधत् । ७३

अष्टमो ऽध्यायः

लक्ष्मणेनाभिमन्योः

ततोऽपराह्ण-भूयिष्ठे तस्मिन्न् अहनि, भारत,
रथ-नागाश्व-पत्तीनां सादिनां च महा-क्षये, १

लक्ष्मणस् तव पौत्रस् तु सौभद्रं पर्यवस्थितम्
अभ्यवर्तत, संक्रुद्धस् । तयोर् युद्धम् अवर्तत । २

ततो दुर्योधनो राजा, दृष्ट्वा पुत्रं महा-रथम्
पीड़ितं तव पौत्रेण, प्रायात् तत्र जनेश्वरः । ३

प्रयेतिरे । आप्र. । ७३ । आदधत्—धारयन्, रक्षन् ।
१ । अपराह्ण-भूयिष्ठे—गत-प्रायापराह्णे ।

सन्निवृत्ते तव सुते, सर्व एव जनाधिपाः
आर्जुनिं रथ-वंशेन समन्तात् पर्यवारयन् । ४

स, तैः परिवृतः शूरैः, शूरो, युधि सुदुर्जयः,
न स्म प्रव्यथते, राजन्, कृष्ण-तुल्य-पराक्रमः । ५

सौभद्रम् अथ संयुक्तं दृष्ट्वा, तत्र धनञ्जयः
अभिदुद्राव वेगेन, त्रातु-कामः स्वम् आत्मजम् । ६

ततः स-रथ-नागाश्वा भीष्म-द्रोण-पुरोगमाः
अभ्यवर्तन्त राजानः सहसा सव्य-साचिनम् । ७

उद्धूतं सहसा भौमं नागाश्व-रथ-सादिभिः
दिवा-कर-पथं प्राप्य रजस् तीव्रम् अदृश्यत । ८

तानि नाग-सहस्राणि भूमिपाल-शतानि च
तस्य बाण-पथं प्राप्य नाभ्यवर्तन्त सर्वशः । ९

प्रणेदुः सर्व-भूतानि बभूवुस् तिमिरा दिशः ।
कुरूणाम् अनयस् तीव्रः प्रत्यपद्यत दारुणः । १०

नाप्यन्तरीक्षं न दिशो न भूमिर् न च भास्करः
प्राज्ञायत, नर-श्रेष्ठ, शर-सङ्घैः किरीटिनः । ११

सादिता रथ-नागाश् च हताश्वा रथिनो भृशम्;
विप्रद्रुत-रथाः केचिद् दृश्यन्ते रथ-यूथपाः । १२

---

४ । रथ-वंशेन—रथ-समूहेन । १० । तिमिराः—अन्धकारावृताः ।
१० । अनयः—अशुभम्, विपत् । १२ । सादिताः—अवसादिताः ।

वि-रथा रथिनश् चान्ये धावमानाः समन्ततः
तत्र तत्रैव दृश्यन्ते सायुधाः साङ्गदैर् भुजैः । १३

हयारोहा हयांस् त्यक्त्वा गजारोहाश् च दन्तिनः,
अर्जुनस्य भयाद् , राजन् , समन्ताद् विप्रदुद्रुवुः । १४

नासीत् तत्र पुमान् कश्चित् तव सैन्यस्य, मारिष,
योऽर्जुनं समरे शूरं प्रत्युदियात् कथञ्चन । १५

तेषु विद्रवमाणेषु तव योधेषु सर्वशः
अर्जुनो वासुदेवश् च शङ्खौ दध्मतुर् उत्तमौ । १६

तत् प्रभग्नं बलं दृष्ट्वा पिता देव-व्रतस् तव
अब्रवीत् समरे शूरं भारद्वाजं, स्मयन्न् इव,— १७

"एष पाण्डु-सुतो, वीर, कृष्णेन सहितो, बली
तथा करोति सैन्यानि यथा कुर्याद् धनञ्जयः । १८

एष चास्तं गिरि-श्रेष्ठं भानुमान् प्रतिपद्यते,
चक्षूंषि सर्व-लोकस्य संहरन्न् इव सर्वथा । १९

तत्रावहारं संप्राप्तं मन्येऽहं , पुरुषर्षभ ।
श्रान्ता भीताश् च नो योधा न योत्स्यन्ति कथञ्चन ।" २०

---

१५ । प्रत्युदियात्—प्रत्यभि-गन्तुम् अशक्नोत् । १६ । विद्रवमाणेषु—विद्रवत्सु, पलायमानेषु । आआ. १८ । कुर्यात्—कर्तुं शक्नोति । १९ । भानुमान्—सूर्यः ।

ततो ऽवहारः सैन्यानां तव तेषां च, मारिष,
अस्तं गच्छति सूर्ये ऽभूत् सन्ध्या-काले च वर्तति । २१

नवमो ऽध्यायः

तृतीयो दिवसः—कौरव-पराभवः

प्रभातायां तु शर्वर्यां भीष्मः शान्तनवस् ततः
अनीकान्यथ संयाने व्यादिदेश, परन्तप । १

गारुडं च महा-व्यूहं चक्रे शान्तनवस् तदा,
गरुडस्य स्वयं तुण्डे पिता देव-व्रतस् तव । २

व्यूढं दृष्ट्वा तु तत् सैन्यं सव्य-साची परन्तपः
धृष्टद्युम्नेन सहितः प्रत्यव्यूहत संयुगे ३

अर्ध-चन्द्रेण व्यूहेन व्यूहं तम् अति-दारुणम् ।
दक्षिणं शृङ्गम् आस्थाय भीमसेनो व्यरोचत । ४

ततः प्रववृते युद्धं व्यतिषक्त-रथ-द्विपम्
तावकानां परेषां च निघ्नताम् इतरेतरम् । ५

न व्यूहो भिद्यते तत्र कौरवाणां कथञ्चन
रक्षितः सत्य-सन्धेन भारद्वाजेन संयुगे । ६

---

२१ । वर्तति—वर्तमाने । पआ. ।
२ । तुण्डे—मुखे ।

तथैव पाण्डवेयानां, रक्षितः सव्य-साचिना,
नाभिद्यत महा-व्यूहो, भीमेन च सु-रक्षितः । ७

सेनाग्राद् अभिनिष्पत्य प्रायुध्यंस् तत्र मानवाः
उभयोः सेनयो, राजन्, व्यतिषक्त-रथ-द्विपाः । ८

ततो भीष्मश् च द्रोणश् च सैन्धवश् च जयद्रथः
पाण्डवानाम् अनीकानि बभञ्जुश् च पुनः पुनः । ९

तथैव भीमसेनो ऽपि राक्षसश् च घटोत्कचः
सात्यकिश् चेतिकानश् च द्रौपदेयाश् च, भारत, १०
तावकांस् तव पुत्रांश् च सहितान् सर्व-राजभिः
द्रावयामासुर् आजौ ते, त्रिदशा दानवान् इव । ११
द्रवतस् तान् समालोक्य, भीष्म-द्रोणौ महा-बलौ
न्यवारयेतां, संक्रुद्धौ, दुर्योधन-हितैषिणौ । १२

ततो दुर्योधनो राजा, समाश्वस्य, विशाम् पते,
अब्रवीत्, त्वरितो गत्वा, भीष्मं शान्तनवं वचः,— १३
"नानुरूपम् अहं मन्ये त्वयि जीवति, कौरव,
द्रोणे चास्त्र-विदां श्रेष्ठे स-पुत्रे स-सुहृज्जने १४
कृपे चैव महेष्वासे, द्रवते यद् वरूथिनी ।
अनुग्राह्याः पाण्डु-सुता नूनं तव, पितामह ! १५

---

१५ । द्रवते—द्रवति, पलायते । आआ. ।

यदि नाहं परित्याज्यो युवाभ्याम् इह संयुगे,
विक्रमेणानुरूपेण युध्येतां, पुरुषर्षभौ ।" १६

एतच् छ्रुत्वा वचो, भीष्मः, प्रहसन् वै मुहुर् मुहुः,
अब्रवीत् तनयं तुभ्यं, क्रोधाद् व्यावृत्य चक्षुषी,— १७

"बहुशो ऽपि मया, राजन् , पथ्यम् उक्तो हितं वचः,—
'अ-जेयाः पाण्डवा युद्धे देवैर् अपि स-वासवैः ।' १८

यत् तु शक्यं मया कर्तुं वृद्धेनात्र, नृपोत्तम,
करिष्यामि यथा-शक्ति । प्रेक्षेदानीं स-बान्धवः ।" १९

सर्व-धर्म-विशेष-ज्ञः पिता देव-व्रतस् तव
अभ्ययाज् जवनैर् अश्वैः पाण्डवानाम् अनीकिनीम् ,
महत्या सेनया युक्तस् तव पुत्रैश् च सर्वशः । २०

प्रावर्तत ततो युद्धं तुमुलं लोम-हर्षणम्
अस्माकं पाण्डवैः सार्धम् अनयात् तव, भारत । २१

धनुषां कूजतां तत्र तलानां चाभिहन्यताम्
बभूव तुमुलः शब्दो गिरीणाम् इव दीर्यताम् । २२

'तिष्ठ' 'स्थितो ऽस्मि' 'विद्ध्येनं' 'निवर्तस्व' 'स्थिरो भव'
'स्थितो ऽस्मि' प्रहरस्वेति शब्दाश्रूयन्त सर्वशः । २३

१६ । युवाभ्याम्—भीष्म-द्रोणाभ्याम् इति भावः । १७ । तुभ्यम्—तव । व्यावृत्य—विस्फार्य घूर्णयित्वा । २२ । तलम् , तला—ज्या-घात-निवारकः

काञ्चनेषु तनुत्रेषु किरीटेषु ध्वजेषु च,
शिलानाम् इव शैलेषु, पतन्तीनाम् अभूत् स्वनः । २४

पतितान्युत्तमाङ्गानि बाहवश् च विभूषिताः
व्यचेष्टन्त महीं प्राप्य शतशो ऽथ सहस्रशः । २५

कृत्तोत्तमाङ्गाः केचित् तु तथैवोद्यत-कार्मुकाः
प्रगृहीतायुधाश् चैव तस्थुः पुरुष-सत्तमाः । २६

प्रावर्तत महा-वेगा नदी रुधिर-वाहिनी
मातङ्गाङ्ग-शिला घोरा मांस-शोणित-कर्दमा । २७

नासीद् रथ-पथस् तत्र योधैर् युधि निपातितैः,
गजैर् निपतितैर् नीलैर् गिरि-शृङ्गैर् इवावृतः । २८

तत्र भीष्मः शान्तनवो, नित्यं मण्डल-कार्मुकः,
मुमोच बाणान् दीप्ताग्रान्, अहीन् आशीविषान् इव । २९

तम् एकं समरे शूरं पाण्डवाः सृञ्जयैः सह
अनेक-शत-साहस्रं समपश्यन्त लाघवात् । ३०

न हि मोघः शरः कश्चिद् आसीद् भीष्मस्य संयुगे
नर-नागाश्व-कायेषु बहुत्वाल् लघु-योधिनः । ३१

चर्म-पट्टः । अभिहन्यताम्—अभिहन्यमानानाम, आहन्यमानानाम् । पआ ।
२५ । व्यचेष्टन्त—चेष्टाः व्यापारयामासुः । २६ । कृत्तोत्तमाङ्गाः—छिन्न-मस्तकाः । तस्थुः—दण्डायमाना आसन् ।

यो यो भीष्मं नर-व्याघ्रम् अभ्येति युधि कश्चन,
मुहूर्त-दृष्टः स मया पतितो भुवि दृश्यते । ३२

एवं सा धर्म-राजस्य वध्यमाना महा-चमूः
भीष्मेणातुल-वीर्येण व्यशीर्यत सहस्रधा । ३३

प्रभज्यमानं सैन्यं च दृष्ट्वा यादव-नन्दनः
उवाच पार्थं बीभत्सुं, निगृह्य रथम् उत्तमम्,— ३४

"बीभत्सो, पश्य सैन्यं स्वं भज्यमानं ततस् ततः,
द्रवतश् च मही-पालान् पश्य यौधिष्ठिरे बले ।" ३५

एवम् उक्तः प्रत्युवाच वासुदेवं धनञ्जयः,—
"नोदयाश्वान् यतो भीष्मो । विगाहे तद्-बलार्णवम् ।" ३६

ततो ऽश्वान् रजत-प्रख्यांश् चोदयामास माधवः
यतो भीष्म-रथो, राजन् , दुष्प्रेक्ष्यो रश्मिवान् इव । ३७

ततस् तत् पुनर् आवृत्तं युधिष्ठिर-बलं महत् ,
दृष्ट्वा पार्थं महा-बाहुं भीष्मायोद्यतम् आहवे । ३८

ततो भीष्मः कुरु-श्रेष्ठः, सिंहवद् विनदन् मुहुः,
धनञ्जय-रथं तूर्णं शर-वर्षैर् अवाकिरत् । ३९

ततः पार्थो, धनुर् गृह्य दिव्यं जलद-निस्वनम् ,
पातयामास भीष्मस्य धनुश् छित्त्वा त्रिभिः शरैः । ४०

---

३५ । ततस्ततः—नाना-स्थानेषु । ३६ । नोदय—चोदय । ३७ । रश्मिवान्—सूर्यः । ३८ । आवृत्तम्—घूर्णितम् , प्रतिनिवृत्तम् ।

स च्छिन्न-धन्वा, कौरव्य, पुनर् अन्यद् महद् धनुः
निमिषान्तरमात्रेण सज्यं चक्रे पिता तव । ४१

अदर्शयद् वासुदेवो हय-याने परं बलम्,
मोघान् कुर्वन् शरांस् तस्य मण्डलान्यचरल् लघु । ४२

तथापि भीष्मः सु-दृढं वासुदेव-धनञ्जयौ
विव्याध निशितैर् बाणैः सर्व-गात्रेषु, मारिष । ४३

ततः कृष्णस् तु समरे दृष्ट्वा भीष्म-पराक्रमम्,
संप्रेक्ष्य च महा-बाहुः पार्थस्य मृदु-युद्धताम्, ४४

अचिन्तयद् अमेयात्मा—"नास्ति यौधिष्ठिरं बलम् ।
अर्जुनो हि, शरैस् तीक्ष्णैर् वध्यमानो ऽपि संयुगे,
कर्तव्यं नाभिजानाति रणे, भीष्मस्य गौरवात् । ४५

तस्माद् अहं, गृह्य रथाङ्गम् उग्रं,
प्राणं हरिष्यामि महा-व्रतस्य ।"
क्षुरान्तम् उद्भ्राम्य भुजेन चक्रं,
रथाद् अवप्लुत्य विसृज्य वाहान्,
संकम्पयन् गां चरणैर् महात्मा
वेगेन कृष्णः प्रससार भीष्मम् । ४६

---

४२ । मण्डलानि—चक्राणि । ४५ । नास्ति—सत्ता-हीनम् एव वर्तते । ४६ । रथाङ्गम्—चक्रम् । वाहान्—अश्वान् । गाम्—पृथिवीम् । चरणैः—चरणाभ्याम् । सम्भ्रमे बहु-वचनम् । प्रससार—अभिजगाम ।

रथाद् अवप्लुत्य ततस्, त्वरावान्
पार्थो, ऽभ्यनुद्रुत्य, यदु-प्रवीरम्
बलाद् निजग्राह शनैर् महात्मा
पदे च, राजन्, दशमे, कथञ्चित्। ४७
अवस्थितं च प्रणिपत्य कृष्णं,
उवाच, कोपं प्रतिसंहरेति,
"न हास्यते कर्म यथा-प्रतिज्ञं।
पुत्रैः शपे, केशव, सोदरैश् च!" ४८
ततः प्रतिज्ञां समयं च तस्य
जनार्दनः प्रीत-मना निशम्य,
स्थितः प्रिये कौरव-सत्तमस्य,
रथं स-चक्रः पुनर् आरुरोह। ४९
गाण्डीव-घोषः स्तनयित्नु-कल्पो
जगाम पार्थस्य नभो दिशश् च।
जग्मुश् च बाणा विमलाः प्रसन्नाः
सर्वा दिशः, पाण्डव-चाप-मुक्ताः। ५०
अथार्जुनाय प्रजिघाय भल्लान्
भूरिश्रवाः, सप्त सुवर्ण-पुङ्खान्,
दुर्योधनस् तोमरम् उग्र-वेगं,
शल्यो गदां, शान्तनवश् च शक्तिम्। ५१

५०। स्तनयित्नु-कल्पः—मेघ-ध्वनि-सदृशः। ५१। प्रजिघाय [प्र-हि+अ]—प्रेषयामास।

स, सप्तभिः सप्त शर-प्रवेकान्
संवार्य, भूरि-श्रवसा प्रमुक्तान्,
शितेन दुर्योधन-बाहु-मुक्तं
क्षुरेण तत् तोमरम् उन्ममाथ। ५२

ततः शुभाम् आपतितां च शक्तिं
विद्युत्-प्रभां शान्तनवेन मुक्ताम्,
गदां च मद्राधिप-बाहु-मुक्तां
द्वाभ्यां शराभ्यां निचकर्त वीरः। ५३

ततो भुजाभ्यां बलवद् विकृष्य
चित्रं धनुर् गाण्डिवम् अ-प्रमेयम्,
माहेन्द्रम् अस्त्रं विधिवत् सु-घोरं
प्रादुश्चकाराद्भुतम् अन्तरीक्षे। ५४

तेनोत्तमास्त्रेण ततो महात्मा
सर्वाण्यनीकानि महा-धनुष्मान्
शरौघ-जालैर् विमलाग्नि-वर्णैर्
निवारयामास किरीट-माली। ५५

शिली-मुखाः पार्थ-धनुर्-विसृष्टा,
रथान् ध्वजाग्राणि धनूंषि बाहून्
निकृत्य, देहान् विविशुः परेषां
नरेन्द्र-नागेन्द्र-तुरङ्गमाणाम्। ५६

५२। शर-प्रवेकान्—बाण-श्रेष्ठान्। उन्ममाथ—नाशयामास।
५३। निचकर्त—चिच्छेद। ५४। प्रादुश्चकार—प्रकाशयामास।

बाणाहतास् तूर्णम् अपेत-सत्त्वा,
विष्टभ्य गात्राणि, निपेतुर् उर्व्याम् ,
ऐन्द्रेण तेनास्त्र-वरेण, राजन् ,
महाहवे भिन्न-तनुत्र-कायाः । ५७

ततः शरौघैर् निशितैः किरीटिना
नृ-देह-शस्त्र-क्षत-लोहितोदा
नदी सु-घोरा नर-मेद-फेना
प्रवर्तिता तत्र रणाजिरे वै । ५८

हत-प्रवीरां च तथैव दृष्ट्वा
सेनां कुरूणाम् अथ फाल्गुनेन
ते चेदि-पाञ्चाल-करूष-मत्स्याः
पार्थाश् च सर्वे सहिताः प्रणेदुः । ५९

अथापयानं कुरवः स-भीष्माः
स-द्रोण-दुर्योधन-बाह्लिकाश् च
चक्रुर् , निशां सन्धि-गतां समीक्ष्य,
विभा-वसोर् लोहित-राग-युक्ताम् । ६०

---

५७ । विष्टभ्य—निश्चेष्टीकृत्य, स्थिरीकृत्य । उर्व्याम् —पृथिव्याम् । ५८ । उदम्—उदकम् , जलम् । ६० । अपयानम्—[सेनायाः] अपसरणम् । सन्धि-गताम्—[दिवसेन] मिलिताम् (सङ्गताम्) ।

पृ. १८६, ४९ टी. । धारा—निशितः प्रान्तः । ५० टी, शर-वृष्टिम्—शस्त्र-वृष्टिम् इत्यभिप्रायः ।

अवाप्य कीर्तिं च यशश् च लोके
विजित्य शत्रूंश् च, धनञ्जयो ऽपि
ययौ, नरेन्द्रैः सह सोदरैश् च,
समाप्त-कर्मा, शिविरं निशायाम्। ६१

दशमो ऽध्यायः

चतुर्थो दिवसः—भीम-धार्तराष्ट्राणाम्

व्युष्टां निशां, भारत, भारतीनाम्
अनीकिनीनाम् प्रमुखे महात्मा
ययौ, सपत्नान् प्रति जात-कोपो,
वृतः समग्रेण बलेन, भीष्मः। १

तं द्रोण-दुर्योधन-बाह्लिकाश् च
तथैव दुर्मर्षण-चित्रसेनौ
जयद्रथश् चाति-बलो बलौघैर्
नृपास् तथान्ये प्रययुः समन्तात्। २

१। व्युष्टाम्—प्रभाताम्। अनीकिनीनाम्—सेनानाम्। २। बाह्लिकः, बाह्लीकः—प्रतीपस्य पुत्रः सोमदत्तस्य पिता च। दुर्मर्षण-चित्रसेनौ—धृतराष्ट्र-पुत्रौ। बलौघैः——सेना-प्रवाहैः।

पृ. १८३, २१ टी.। चिताम्—छन्नाम्, [योधानां शोणित-स्रावि-च्छिन्नाङ्गैः] आवृताम्।

ततो, रणायाभिमुखी, प्रयाता
प्रत्यर्जुनं, शान्तनवाभिगुप्ता,
ससार सेना सहसा कुरूणां,
वेगो यथा भीम इवापगायाः। ३

व्यूहं महा-मेघ-समं महात्मा
ददर्श दूरात् कपि-राज-केतुः।
स निर्ययौ केतुमता रथेन
नरर्षभः श्वेत-हयेन वीरः। ४

विपाठ-जालेन महास्त्र-जालं
विनाशयामास किरीट-माली।
महास्त्र-जालं कपि-राज-केतोर्
विशीर्यमाणं ददृशुस् त्वदीयाः। ५

भीमसेनस् तु, संक्रुद्धो, गदाम् उद्यम्य, भारत,
दुर्योधन-मुखान् सर्वान् पुत्रांस् ते पर्यवारयत्। ६

दुर्योधनश् च समरे भीमसेनं महा-रथम्
आजघानोरसि, क्रुद्धो, मार्गणैर् नवभिः शितैः। ७

ततो भीमो महा-बाहुः स्व-रथं, सु-महा-बलः,
आरुरोह रथ-श्रेष्ठं, विशोकं चेदम् अब्रवीत्,— ८

"मनो-रथ-द्रुमो ऽस्माकं चिन्तितो बहु-वार्षिकः
स-फलः, सूत, चाद्येह यो ऽहं पश्यामि सोदरान्। ९

३। वेगः—स्रोतः। आपगायाः—नद्याः। ९। सफलः—मह्यम् इति शेषः।

यत्राशोक समुत्क्षिप्ता रेणवो रथ-नेमिभिः
प्रयास्यन्त्यन्तरिक्षं हि शर-वृन्दैर् दिगन्तरे, १०

तत्र तिष्ठति सन्नद्धः स्वयं राजा सुयोधनः,
भ्रातरश् चास्य सन्नद्धाः कुल-पुत्रा मदोत्कटाः। ११

एतान् अद्य हनिष्यामि पश्यतस् ते, न संशयः।
तस्माद् ममाश्वान् संग्रामे, यत्तः, संयच्छ, सारथे।" १२

एवम् उक्त्वा, ततः पार्थः पुत्रं तव, विशाम् पते,
विव्याध निशितैस् तीक्ष्णैः शरैः कनक-भूषणैः। १३

तं तु दुर्योधनः षष्ट्या विद्ध्वा भीमं महा-बलम्,
संदधे विशिखं घोरं काल-मृत्यु-सम-प्रभम्; १४

तेनाजघान संक्रुद्धो भीमसेनं स्तनान्तरे।
स, निषण्णो रथोपस्थे, मूर्च्छाम् अभिजगाम ह। १५

तं दृष्ट्वा व्यथितं भीमम्, अभिमन्यु-पुरोगमाः
नामृष्यन्त, महेष्वासाः पाण्डवानां महा-रथाः। १६

ततः सु-तुमुलां वृष्टिं शराणाम् उग्र-तेजसाम्
पातयामासुर्, अ-व्यग्राः, पुत्रस्य तव मूर्धनि। १७

यो ऽहम्—'यद् अहम्' इत्यभिप्रायः। ११। कुल-पुत्राः—उच्चकुल-प्रसूता युवानः। १२। यत्तः—यत्नवान्। १५। स्तनान्तरे—स्तन-द्वय-मध्य-वर्त्तिनि वक्षो-भागे। निषण्णः—उपविष्टः [सन्]। १७। अव्यग्राः—अनाकुलाः।

प्रतिलभ्य ततः संज्ञां, भीमसेनो महा-बलः
दुर्योधनं, त्रिभिर् विद्ध्वा, पुनर् विव्याध पञ्चभिः । १८

प्रत्युद्-ययुस् ततो भीमं तव पुत्राश् चतुर्दश ;
भीमसेनम्, अभिद्रुत्य, विव्यधुः, सहिता, भृशम् । १९

पुत्रांस् तु तव संप्रेक्ष्य, भीमसेनो महा-बलः,
सृक्कणी विलिहन् वीरः, पशु-मध्ये वृको यथा, २०

अभिपत्य, महाबाहुर्, गरुत्मान् इव वेगितः,
सेना-पतेः क्षुरप्रेण शिरश् चिच्छेद पाण्डवः । २१

संप्रहस्य च, हृष्टात्मा, त्रिभिर् बाणैर् महा-भुजः
जलसन्धं विनिर्भिद्य सो ऽनयद् यम-सादनम् । २२

सुषेणं च ततो हत्वा प्रेषयामास मृत्यवे ।
उग्रस्य स-शिरस्त्राणं शिरश् चन्द्रोपमं भुवि
पातयामास भल्लेन, कुण्डलाभ्यां विभूषितम् । २३

वीर-बाहुं च सप्तत्या, साश्व-केतुं स-सारथिम्,
निनाय समरे भीमः पर-लोकाय पाण्डवः । २४

भीम-भीमरथौ चोभौ भीमसेनो, हसन्न् इव,
पुत्रौ ते दुर्मदौ, राजन्न्, अनयद् यम-सादनम् । २५

---

२० । वृकः—कुक्कुर-प्रमाणो हरिणादि-भोजी श्वापद-विशेषः, a wolf, a hyena. २१ । सेना-पतिः—तन्नामा धृतराष्ट्र-पुत्रः ।

ततः सु-लोचनं भीमः क्षुरप्रेण महा-मृधे ,
मिषतां सर्व-सैन्यानां, अनयद् यम-सादनम् । २६

शेषा ये ऽन्ये ऽभवंस् तत्र, ते भीमस्य भयार्दिताः
विप्रद्रुता दिशो, राजन् , वध्यमाना महात्मना । २७

कौरवास् तु ततो, राजन् , प्रययुः शिविरं स्वकम् ,
व्रीड़माना, निशा-काले, पाण्डवेयैः पराजिताः । २८

शर-विक्षत-गात्रास् तु पाण्डु-पुत्रा महा-रथाः,
युद्धे सु-मनसो भूत्वा, जग्मुः स्व-शिविरं प्रति । २९

दुर्योधनस् तु नृपतिर् , दीनो भ्रातृ-वधेन च,
मुहूर्तं चिन्तयामास, वाष्प-शोक-समाकुलः । ३०

ततः कृत्वा विधिं सर्वं शिविरस्य यथा-विधि,
प्रदध्यौ, शोक-सन्तप्तो, भ्रातृ-व्यसन-कर्शितः । ३१

एकादशो ऽध्यायः

पञ्चमो दिवसः—दश-सात्यकेय-पातः

व्युषितायां च शर्वर्याम् उदिते च दिवा-करे,
उभे सेने, महा-राज, युद्धायैव समीयतुः । १

१ । व्युषितायाम्—व्युष्टायाम् , प्रभातायाम् । समीयतुः [सम्-इ+अतुस्]—संजग्माते ।

अथ, राजन्, महा-बाहुः सात्यकिर् युद्ध-दुर्मदः
प्रामुञ्चत् पुङ्ख-संयुक्तान् शरान् आशीविषोपमान् । २

तम् उदीर्यन्तम् आलोक्य, राजा दुर्योधनस् तदा
रथानाम् अयुतं तस्य प्रेषयामास, भारत । ३

तांस् तु सर्वान् महेष्वासान् सात्यकिः सत्य-विक्रमः
जघान, परमेष्वासो, दिव्येनास्त्रेण, वीर्यवान् । ४

स, कृत्वा दारुणं कर्म, प्रगृहीत-शरासनः,
आससाद ततो वीरो भूरि-श्रवसम् आहवे । ५

स हि, संदृश्य सेनां ते युयुधानेन पीड़िताम्,
अभ्यधावत, संक्रुद्धः, कुरूणां कीर्ति-वर्धनः । ६

इन्द्रायुध-सवर्णं तु स विस्फार्य महद् धनुः,
व्यसृजद् वज्र-सङ्काशान् शरान् आशीविषोपमान् । ७

शरांस् तान् मृत्यु-संस्पर्शान् सात्यकेस् तु पदानुगाः
न विषेहुस् तदा, राजन् । दुद्रुवुस् ते समन्ततः । ८

तं दृष्ट्वा, युयुधानस्य सुता दश महा-बलाः
ऊचुः सर्वे सु-संरब्धा यूप-केतुं महा-रणे,— ९

---

३ । तस्य—तं प्रति । ४ । जघान—आजघान । ५,-६ । भूरि-श्रवाः (-वस्)—यूप-केतुर् इति नाम्ना च प्रसिद्धो रथ-यूथ-प-यूथ-पः सोमदत्त-पुत्रः । *Cf.* परस्तात् ७।११।६ ।

"भो भो कौरव-दायाद, सहास्माभिर्, महा-बल,
एहि, युध्यस्व संग्रामे समस्तैः पृथग् एव वा। १०

अस्मान् वा त्वं पराजित्य यशः प्राप्नुहि संयुगे,
वयं त्वां वा पराजित्य प्रीतिं दास्यामहे पितुः।" ११

एवम् उक्तस् तदा शूरैस्, तान् उवाच महा-बलः,—
"युध्यध्वं सहिता, यत्ता। निहनिष्यामि वो रणे।" १२

एवम् उक्ता, महेष्वासास् ते वीराः क्षिप्र-कारिणः
महता शर-वर्षेण अभ्यधावन्न् अरिन्दमम्। १३

अपराह्णे, महा-राज, संग्रामस् तुमुलो ऽभवत्
एकस्य च बहूनां च समेतानां रणाजिरे। १४

तम् एकं रथिनां श्रेष्ठं शरैस् ते समवाकिरन्,
प्रावृषीव यथा मेरुं सिषिचुर् जलदा, नृप। १५

तैस् तु मुक्तान् शरौघांस् तान् यम-दण्डाशनि-प्रभान्,
अ-संप्राप्तान् असंभ्रान्तश् चिच्छेदाशु महा-रथः। १६

सौमदत्तिस् ततः क्रुद्धस् तेषां चापानि, भारत,
चिच्छेद दशभिर् बाणैर् निमेषेण, महा-रथः। १७

अथैषां छिन्न-धनुषां भल्लैः सन्नत-पर्वभिः
चिच्छेद समरे, राजन्, शिरांसि भरतर्षभ। १८

१०। कौरव-दायादः—दुर्योधनस्य सपिण्डो ज्ञातिः शान्तनोर् भ्रातृ-पौत्रत्वात्। ११। दास्यामहे—दास्यामः। आआ।

तान् दृष्ट्वा निहतान् वीरान् रणे पुत्रान् महा-बलान्
वार्ष्णेयो विनदन्, राजन्, भूरि-श्रवसम् अभ्ययात्। १९

ताव्, अन्योन्यस्य समरे निहत्य रथ-वाजिनः,
वि-रथाव् अभिवल्गन्तौ समायातां महा-रथौ। २०

ततः सात्यकिम् अभ्येत्य, निस्त्रिंश-वर-धारिणम्,
भीमसेनस्, त्वरन्, राजन्, रथम् आरोपयत् तदा। २१

तवापि तनयो, राजन्, भूरि-श्रवसम् आहवे
आरोपयद् रथं तूर्णं पश्यतां सर्व-धन्विनाम्। २२

तस्मिंस् तथा वर्तमाने रणे, भीष्मं महा-रथम्
अयोधयन्त संरब्धाः पाण्डवा, भरतर्षभ। २३

लोहितायति चादित्ये त्वरमाणो धनञ्जयः
पञ्च-विंशति-साहस्रान् निजघान महा-रथान्। २४

ते ऽहि, दुर्योधनादिष्टास् तदा पार्थ-निवर्हणे,
अप्राप्यैव गता नाशं, शलभा इव पावकम्। २५

ततो मत्स्याः केकयाश् च, धनुर्वेद-विशारदाः,
परिवव्रू रणे पार्थं सह-पुत्रं महा-रथम्। २६

जगामास्तम् अथादित्यो रजो-मेघैः समुत्थितैः।
सर्वेषाम् एव सैन्यानां प्रमोहः समजायत। २७

२०। अभिवल्गन्तौ—आस्फोटन-पूर्वकेण उल्लम्फनेन अन्योन्यम् अभिधावन्तौ। समायाताम्—समगच्छेताम्। २४। लोहितायति [लोहित+य+अत्, ७।१]—लोहितायमाने। पआ.। २५। निवर्हणे—विनाशे।

अवहारं ततश् चक्रे पिता देव-व्रतस् तव
सन्ध्या-काले, महा-राज, सैन्यानां, श्रान्त-वाहनः। २८

द्वादशो ऽध्यायः

षष्ठो दिवसः—अनुधावनम्

ते विश्रम्य ततो, राजन्, सहिताः, कुरु-पाण्डवाः,
व्यतीतायां च शर्वर्यां, पुनर् युद्धाय निर्ययुः। १

ततो युधिष्ठिरो राजा धृष्टद्युम्नम् अभाषत,—
"व्यूहं व्यूह, महा-बाहो, मकरं शत्रु-नाशनम्।" २

व्यूढं दृष्ट्वा तु तत्-सैन्यं, पिता देव-व्रतस् तव
क्रौञ्चेन महता, राजन्, प्रत्यव्यूहत वाहिनीम्। ३

भीमसेनः, सु-निशितैर् बाणैर् भित्त्वा महा-चमूम्,
आससाद ततो वीरः सर्वान् दुर्योधनानुजान्। ४

अथालोक्य प्रविष्टं तम् ऊचुस् ते सर्व एव तु,—
"जीव-ग्राहं निगृह्णीमो वयम् एनं, नराधिपाः।" ५

संप्राप्य मध्यं सैन्यस्य न भीः पाण्डवम् आविशत्,
यथा देवासुरे युद्धे महेन्द्रं प्राप्य दानवान्। ६

५। जीव-ग्राहम् [जीव-ग्रह्+अम्]—जीवं (जीवन्तं) गृहीत्वा।

ततः शत-सहस्राणि रथिनां सर्वशः, प्रभो,
उद्यतानि शरैस् तीव्रैस्, तम् एकं परिवव्रिरे । ७

तेषां व्यवसितं ज्ञात्वा भीमसेनो, जिघृक्षताम्,
समस्तानां वधे, राजन्, मतिं चक्रे, महा-मनाः । ८

ततो रथं समुत्सृज्य, गदाम् आदाय, पाण्डवः
जघान धार्तराष्ट्राणां तं बलौघ-महार्णवम् । ९

आससाद रथं शून्यं भीमसेनस्य संयुगे
धृष्टद्युम्नो, महाराज, दुर्मना गत-चेतनः । १०

"मम भीमः सखा चैव सम्बन्धी च महा-बलः ।
सो ऽहं तत्र गमिष्यामि यत्र यातो वृकोदरः ।" ११

एवम् उक्त्वा ततो वीरो ययौ मध्येन वाहिनीम्
भीमसेनस्य मार्गेषु गदा-प्रमथितैर् गजैः । १२

ततो युधिष्ठिरः प्राह, समाहूय स्व-सैनिकान्,—
"गच्छन्तु पदवीं शक्त्या भीम-पार्षतयोर् युधि । १३

सौभद्र-प्रमुखा वीरा, रथा द्वादश, दंशिताः,
प्रवृत्तिम् अधिगच्छन्तु । न हि शुध्यति मे मनः ।" १४

---

८ । व्यवसितम् – सङ्कल्पम् । जिघृक्षताम् [ग्रह्+स+अत्, ६।ब]— ग्रहीतुम् इच्छताम् । १३ । पदवीम्—पन्थानम् । १४ । प्रवृत्तिम्— गतिम् । शुध्यति—निर्मलम् (निरुत्कण्ठं) भवति ।

त एवं समनुज्ञाताः शूरा विक्रान्त-योधिनः
मध्यन्दिनं गते सूर्ये प्रययुः सर्व एव हि। १५

ते, कृत्वा समरे व्यूहं सूची-मुखम्, अरिन्दमाः
विभिदुर् धार्तराष्ट्राणां तद् रथानीकम् आहवे। १६

ते ऽभिजाता महेष्वासाः सुवर्ण-विकृत-ध्वजाः
परीप्सन्तो ऽभ्यधावन्त धृष्टद्युम्न-वृकोदरौ। १७

तौ च दृष्ट्वा महेष्वासान् अभिमन्यु-पुरोगमान्
बभूवतुर् मुदा युक्तौ, निघ्नन्तौ तव वाहिनीम्। १८

दृष्ट्वा च सहसायान्तं, पाञ्चाल्यो, गुरुम् आत्मनः,
नाशंसत वधं वीरः पुत्राणां तव पार्षतः।

ततो रथं समारोप्य कैकेयस्य वृकोदरम्
अभ्यधावत् सु-संक्रुद्धो द्रोणम् इष्वस्त्र-पारगम्। २०

तस्याभिपततस् तूर्णं भारद्वाजः प्रतापवान्,
क्रुद्धश्, चिच्छेद भल्लेन धनुः, शत्रु-निषूदनः। २१

हयांश् च चतुरस् तूर्णं चतुर्भिः सायकोत्तमैः
वैवस्वत-क्षयं घोरं प्रेषयामास, भारत। २२

१५। मध्यन्दिनम्—मध्यं दिनस्य, मध्याह्नम्। १७। अभिजाताः—श्रेष्ठ-वंश-सम्भूताः, कुलीनाः। १९। आशंसत—ऐच्छत्। २० कैकेयस्य—कैकेयानां राज्ञः। २२। वैवस्वत-क्षयम्—यमालयम्।

हताश्वात् तु रथात् तूर्णम् अवप्लुत्य महा-रथः,
आरुरोह महा-बाहुर् अभिमन्योर् महा-रथम् । २३

ततः स-रथ-नागाश्वा समकम्पत वाहिनी
पश्यतो भीमसेनस्य पार्षतस्य च पश्यतः । २४

तत् प्रभग्नं बलं दृष्ट्वा द्रोणेनामित-तेजसा
नाशक्नुवन् वारयितुं समस्तास् ते महा-रथाः । २५

भीमसेनो ऽपि समरे संप्राप्य स्व-रथं पुनः,
समारुह्य, महा-बाहुर् ययौ यत्र तवात्मजः । २६

दुर्योधनानुजाः सर्वे, शूराः, संत्यक्त-जीविताः,
निश्चयं परमं कृत्वा निग्रहीतुं प्रचक्रमुः । २७

अभिमन्यु-प्रभृतयस् ते द्वादश महा-रथाः
प्रत्युद्-ययुर्, महा-राज, तव पुत्रान् महा-रथान् । २८

दृष्ट्वा रथ-स्थांस् तान् शूरान् सूर्याग्नि-सम-तेजसः
तत्यजुः समरे भीमं तव पुत्रा महा-बलाः । २९

तान् नाम्मृष्यत कौन्तेयो, 'जीवमाना गता' इति ।
अन्वीय च, पुनः सर्वांस् तव पुत्रान् अपीड़यत् । ३०

---

२५ । ते—भीम-धृष्टद्युम्नौ अभिमन्यु-प्रभृतयश् च । २७ । संत्यक्त-जीविताः—जीवितं रक्षितुं नितराम् अनिच्छुकाः । ३० । जीवमानाः—जीवन्तः । आआ । अन्वीय [अनु-इ+य]—अनुसृत्य ।

अपराह्णे ततो, राजन्, प्रावर्तत महा-रणः
तावकानां च बलिनां परेषां चैव, भारत। ३१

भीष्मो ऽपि समरे, राजन्, पाण्डवानां वरूथिनीम्
कालयामास, बलवान् पालः पशु-गणान् इव। ३२

ततो गाण्डीव-निर्घोषः प्रादुरासीद्, विशाम् पते।
उत्तस्थुः समरे तत्र कवन्धानि सहस्रशः। ३३

शोणितोदं शरावर्तं गज-द्वीपं हयोर्मिणम्,
रथ-नौभिर् नर-व्याघ्राः प्रतेरुः सैन्य-सागरम्। ३४

छिन्न-हस्ता वि-कवचा वि-देहाश् च नरोत्तमाः
पतितास् तत्र दृश्यन्ते शतशो ऽथ सहस्रशः। ३५

धर्म-राजो ऽपि, संप्रेक्ष्य धृष्टद्युम्न-वृकोदरौ
मूर्ध्नि चैताव् उपाघ्राय, प्रहृष्टः शिविरं ययौ। ३६

त्रयोदशो ऽध्यायः

सप्तमो दिवसः—दृश्य-विपर्ययः

ततः प्रभाते विमले स्वेनानीकेन वीर्यवान्
अव्यूहत स्वयं व्यूहं भीष्मो व्यूह-विशारदः। १

३२। वरूथिनीम्—सेनाम्। कालयामास—कलयामास, गणयामास, वशीचकार। पालः—अवेक्षकः। ३३। कवन्धानि—क्रियासक्तानि शिरो-हीन शरीराणि।

मण्डलं तु समालोक्य व्यूहं परम-दारुणम् ,
स्वयं युधिष्ठिरो राजा व्यूहं वज्रम् अथाकरोत् । २

तथा व्यूढेष्वनीकेषु यथा-स्थानम् अवस्थिताः
रथिनः सादिनश् चैव सिंह-नादान् अथानदन् । ३

ततः प्रववृते घोरः संग्रामः शोणितोदकः
तावकानां च समरे पाण्डवानां च, भारत । ४

तस्मिन् सु-तुमुले युद्धे वर्तमाने भयानके
सर्वेषाम् एव सैन्यानाम् आसीद् व्यतिकरो महान् । ५

भिन्नेषु तेषु व्यूहेषु, क्षत्रिया इतरेतरम्
एकम् एकं समाहूय युद्धायैवोपतस्थिरे । ६

युध्यतां तु तथा तेषां, कुर्वतां कर्म दुष्करम् ,
अस्तं गिरिम् अथारूढे—न प्रकाशति—भास्करे, ७

प्रावर्तत नदी घोरा शोणितौघ-तरङ्गिणी
गोमायु-गण-सङ्कीर्णा क्षणेन क्षणदा-मुखे । ८

शिवाभिर् अ-शिवाभिश् च रुवन्तीभिः समन्ततः
घोरम् आयोधनं जज्ञे भूत-सङ्घ-समाकुलम् । ९

राक्षसास् च पिशाचाश् च तथान्ये पिशिताशिनः
समन्ततो व्यदृश्यन्त शतशो ऽथ सहस्रशः । १०

---

५ । व्यतिकरः—विनाशः । ८ । क्षणदा-मुखे—रात्रेः प्रारम्भे ।
९ । रुवन्तीभिः—रुवतीभिः, शब्दायमानाभिः । मुमागम आर्षः ।
१० । पिशिताशिनः—मांस-भक्षकाः ।

अर्जुनो ऽथ, सुशर्मादीन् राज्ञः सह-पदानुगान्
विजित्य पृतना-मध्ये, ययौ स्व-शिविरं प्रति। ११

युधिष्ठिरो ऽपि कौरव्यो भ्रातृभ्यां सहितस् तदा
ययौ स्व-शिविरं, राजन्, निशायां सेनया वृतः। १२

भीमसेनो ऽपि, राजेन्द्र, दुर्योधन-मुखान् रथान्
अवजित्य ततः सङ्ख्ये ययौ स्व-शिविरं प्रति। १३

दुर्योधनो ऽपि नृपतिः, परिवार्य महा-रथैः
भीष्मं शान्तनवं, तूर्णं प्रयातः शिविरं प्रति। १४

ततः स्व-शिविरं गत्वा, पाण्डवाः कुरवस् तथा
न्यविशन्त, महा-राज, पूजयन्तः परस्परम्। १५

रक्षां कृत्वात्मनः शूरा, दृष्ट्वा गुल्मान् यथा-विधि,
अपनीय च शल्यांस् ते, स्नात्वा च विविधैर् जलैः, १६

कृत-स्वस्त्ययनाः सर्वे, स्तूयमानाश् च वन्दिभिः
गीत-वादित्र-शब्देन, चिक्रीडुस् ते यशस्विनः। १७

मुहूर्ताद् इव तत् सर्वम् अभवत् स्वर्ग-सम्मितम्।
न नियुद्ध-कथां काश्चित् तत्र चक्रुर् महा-रथाः। १८

ते प्रसुप्ते बले तत्र परिश्रान्त-जने, नृप,
हस्त्यश्व-बहुले रात्रौ प्रेक्षणीये बभूवतुः। १९

११। पृतना-मध्ये—सेना-परिवृतान्। १७। वन्दिभिः—[वन्दिन्, ३।ब] स्तुति-पाठकैः। वन्दी नाम जातिः किल क्षत्रियात् शूद्रायाम् अजायत।

चतुर्दशो ऽध्यायः

अष्टमो दिवसः—भ्रातृ-शोकः

परिणाम्य निशां तां तु सुख-सुप्ता जनेश्वराः
कुरवः पाण्डवाश् चैव पुनर् युद्धाय निर्युयुः । १

ततः शब्दो महान् आसीत् सेनयोर् उभयोर् अपि
निर्गच्छमानयोः सङ्ख्ये सागर-प्रतिमो महान् । २

कूर्म-व्यूहं ततः कृत्वा पिता तव, विशाम् पते,
सागर-प्रतिमं घोरं वाहनोर्मि-तरङ्गिणम् , ३

अग्रतः सर्व-सैन्यानां भीष्मः शान्तनवो ययौ,
मालवैर् दाक्षिणात्यैश् च आवन्त्यैश् च समन्वितः । ४

ततः स पार्षतः शूरो व्यूहं चक्रे सु-दारुणम्
शृङ्गाटकं, महा-राज, पर-व्यूह-विनाशनम् । ५

ततः शान्तनवो भीष्मो, रथ-घोषेण नादयन् ,
अभ्यागमद् रणे पाण्डून् , धनुः-शब्देन मोहयन् । ६

१। परिणाम्य [परि-नम्-इ+य]—यापयित्वा। २। निर्गच्छमानयोः—निर्गच्छन्त्योः, [शिविरेभ्यः] बहिर्गच्छन्त्योः। आआ । ४। आवन्त्यैः [अवन्ती+य, ३।ब]—अवन्ती-वासिभिः। ५। शृङ्गाटकम्—चतुष्पथाकारम्। ६। पाण्डून्—पाण्डवान्।

पाण्डवानां रथाश् चापि, नदन्तो भैरवं रवम्,
अभ्यद्रवन्त, संयत्ता, धृष्टद्युम्न-पुरोगमाः । ७

भीष्मं तु समरे क्रुद्धं, प्रतपन्तं समन्ततः,
न शेकुः पाण्डवा द्रष्टुं, तपन्तम् इव भास्करम् । ८

ततः सर्वाणि सैन्यानि धर्म-पुत्रस्य शासनात्
अभ्यधावन्त गाङ्गेयं मर्दयन्तं शितैः शरैः । ९

ततो दुर्योधनो राजा, सोदर्यैः परिवारितः,
भीष्मं जुगोप समरे, वर्तमाने महा-क्षये । १०

भीमस् तु, सारथिं हत्वा भीष्मस्य, रथिनां वरः,
प्रद्रुताश्वे रथे तस्मिन् द्रवमाणे समन्ततः,
सु-नाभस्य शरेणाशु शिरश् चिच्छेद, भारत । ११

अपराजितस्य सुनसं, तव पुत्रस्य, संयुगे
पराजितस्य भीमेन, कृत्तं गाम् अपतच् छिरः । १२

अथापरेण भल्लेन कुण्ड-धारं महा-रथम्
प्राहिणोद् मृत्यु-लोकाय सर्व-लोकस्य पश्यतः । १३

ततः पुनर् अ-मेयात्मा, प्रसंधाय शिली-मुखम्
प्रेषयामास समरे पण्डितं प्रति, भारत ।
स शरः पण्डितं हत्वा विवेश धरणी-तलम् । १४

---

७ । अभ्यद्रवन्त—अभ्यद्रवन् । आआ । ११-१८ । सुनाभाद्यो धृतराष्ट्र-पुत्राः । १२ । कृत्तम्—छिन्नम् । १४ । शिलीमुखः—भेकी-मुखो बाणः ।

विशालाक्ष-शिरश् छित्वा पातयामास भूतले
त्रिभिः शरैर् अ-दीनात्मा, स्मरन् क्लेशं पुरातनम्। १५

महोदरं महेष्वासं नाराचेन स्तनान्तरे
विव्याध समरे, राजन्। स हतो न्यपतद् भुवि। १६

आदित्य-केतोः केतुं च च्छित्त्वा बाणेन संयुगे
भल्लेन भृश-तीक्ष्णेन शिरश् चिच्छेद, भारत। १७

बह्वाशिनं ततो भीमः शरेणानत-पर्वणा
प्रेषयामास, संक्रुद्धो, यमस्य सदनं प्रति। १८

प्रदुद्रुवुस् ततस् ते ऽन्ये पुत्रास् तव, विशाम् पते,
मन्यमाना हि तत् सत्यं सभायां तस्य भाषितम्। १९

ततो दुर्योधनो राजा, भीष्मम् आसाद्य, मारिष,
शोकेन महताविष्टो विललापाति-दुःखितः,— २०

"निहता भ्रातरः शूरा भीमसेनेन मे युधि।
यतमानास् तथान्ये ऽपि हन्यन्ते सर्व-सैनिकाः। २१

भवांश् च मध्यस्थतया नित्यम् अस्मान् उपेक्षते।
सो ऽहं का-पथम् आरूढः। पश्य दैवम् इदं मम!" २२

१९। तत्—सु-परिज्ञातम्, सु-स्पष्टं स्मृतौ वर्तमानम्। २२। मध्यस्थतया—स्वपक्ष-परपक्ष-हीनतया। कापथम् [कु-पथिन्+अ, २।१]—कुत्सितं पन्थानम्, विपथम्।

एतच् छ्रुत्वा वचः क्रूरं, पिता देव-व्रतस् तव
दुर्योधनम् इदं वाक्यम् अब्रवीत्, साश्रु-लोचनम्,— २३

"उक्तम् एतद् मया पूर्वं द्रोणेन विदुरेण च
गान्धार्यां च यशस्विन्या। तत् त्वं, तात, न बुद्धवान्। २४

यं यं हि धार्तराष्ट्राणां भीमो द्रक्ष्यति संयुगे,
हनिष्यति रणे तं तं। सत्यम् एतद् ब्रवीमि ते। २५

स त्वं, राजन्, स्थिरो भूत्वा, दृढ़ां कृत्वा रणे मतिम्,
योधयस्व रणे पार्थान् स्वर्गं कृत्वा परायणम्।" २६

पञ्च-दशो ऽध्यायः

इरावत्-पातः

अर्जुनस्यात्मजः श्रीमान् इरावान् नाम, वीर्यवान्,
स्नुषायां नाग-राजस्य जातः पार्थेन धीमता। १

ऐरावतेन सा दत्ता ह्यनपत्या, महात्मना,
पत्यौ हृते सुपर्णेन, कृपणा दीन-चेतना। २

भार्यार्थं तां च जग्राह पार्थः, काम-वशानुगाम्।
एवम् एष समुत्पन्नः पर-क्षेत्रे ऽर्जुनात्मजः। ३

२६। स्वर्गं कृत्वा परायणम्—मृत्युं स्वीकृत्य, जीवित-निराकाङ्क्षः सन्।

१। नाग-राजस्य—ऐरावतस्य।

स, नाग-लोके संवृद्धो मात्रा च परिरक्षितः,
पितृव्येण परित्यक्तः पार्थ-द्वेषाद् दुरात्मना। ४

रूपवान् बल-सम्पन्नो गुणवान् सत्य-विक्रमः,
इन्द्र-लोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम्। ५

सो ऽभिगम्य, महा-बाहुः, पितरं, सत्य-विक्रमः,
न्यवेदयत चात्मानम् अर्जुनस्य महात्मनः। ६

परिष्वज्य सुतं चापि आत्मनः सदृशं गुणैः,
प्रीतिमान् अभवत् पार्थो देव-राज-निवेशने। ७

सो, ऽर्जुनेन समादिष्टो देव-लोके तदा, नृप,
'युद्ध-काले त्वयास्माकं साह्यं देयम्' इति, प्रभो। ८

'बाढम्' इत्येवम् उक्त्वा च युद्ध-काल इहागतः,
काम-वर्ण-जवैर् अश्वैः संवृतो बहुभिर्, नृप। ९

ते हयाः काञ्चनापीड़ा नाना-वर्णा मनो-जवाः
उत्पेतुः सहसा, राजन्, हंसा इव महोदधौ। १०

४। पितृव्येण—अश्वसेनेन। ८। साह्यम् [सह+य, १।१]—सहत्वम्, साहाय्यम्। ९। काम-वर्ण-जवैः—इच्छाधीन-रूप-वेगैः। संवृतः—परिवृतः। १०। काञ्चना-पीड़ाः—सुवर्ण-शेखराः। आपीड़ः—शिखा-स्थित-माल्यम्, शेखरः। मनो-जवाः—मनोवत् द्रुत-गाः। महोदधौ—महा-जलाशये, मानस-सरोवरे। हिमागमे अन्यत्र गता हंसाः पुनर् वर्षासु मानसम् एव गच्छन्ति इति प्रसिद्धिः।

ते, त्वदीयान् समासाद्य हय-सङ्घान् महा-जवान्,
क्रोडैः क्रोडान् अभिघ्नन्तो घोणाभिश् च परस्परम्,
निपेतुः सहसा, राजन्, स्व-वेगाभिहता भुवि । ११

निपतद्भिस् तथा तैश् च हय-सङ्घैः परस्परम्,
शुश्रुवे दारुणः शब्दः सु-पर्ण-पतने यथा । १२

तथैव च, महा-राज, समेत्यान्योन्यम् आहवे,
परस्पर-वधं घोरं चक्रुस् ते हय-सादिनः । १३

प्रक्षीण-सायकाः शूरा निहताश्वाः श्रमातुराः,
विलयं समनुप्राप्तास्, तक्षमाणाः परस्परम् । १४

ततः क्षीणे हयानीके किञ्चिच् छिष्टे च संयुगे,
सौबलस्यानुजाः शूरा निर्गता रण-मूर्धनि । १५

षड् एते बल-सम्पन्ना निर्ययुर् महतो बलात्,
वार्यमाणाः शकुनिना स्वैश् च योधैर् महा-बलैः ; १६

इरावन्तम् अभिद्रुत्य सर्वतः पर्यवारयन्,
ताडयन्तः शितैः प्रासैश्, चोदयन्तः परस्परम् । १७

---

११ । क्रोडैः—वक्षोभिः । क्रोडान्—क्रोडानि, वक्षांसि । अङ्कार्थे पुंस्त्वम् आर्षम् । घोणाभिः—नासाभिः । १२ । सु-पर्णः—गरुडः । १३ । हय-सादिनः—अश्वारोहिणः । १४ । तक्षमाणाः—तक्षन्तः, कृन्तन्तः, छिन्दन्तः । आआ. । १७ । प्रासैः—कुन्तैः । 'प्रासास्त्रं तु चतुर्हस्तं दण्ड-युक्तं क्षुराननम्'—शुनी. (शकद्रु.

इरावान् अपि, निर्विद्धः प्रासैस् तीक्ष्णैर् महात्मभिः,
स्रवता रुधिरेणाक्तस्, तोत्रैर् विद्ध इव द्विपः, १८

उरस्यपि च पृष्ठे च पार्श्वयोश् च भृशाहतः,
एको बहुभिर् अत्यर्थं, धैर्याद्, राजन्, न विव्यथे। १९

प्रासान् उत्कृष्य सर्वांश् च स्व-शरीराद्, अरिन्दमः
तैर् एव ताड़यामास सुबलस्यात्मजान् रणे। २०

निष्कृष्य च शितं खड्गं, गृहीत्वा च शरावरम्,
पदातिस् तूर्णम् आगच्छज्, जिघांसुः, सौबलान् युधि। २१

भूमिष्ठम् अथ तं सङ्ख्ये संप्रदृश्य ततः पुनः
परिवार्य भृशं सर्वे ग्रहीतुम् उपचक्रमुः। २२

अथाभ्यास-गतानां, स खड्गेनामित्र-कर्षणः
असि-हस्ताप-हस्ताभ्यां तेषां गात्राण्यकृन्तत २३

—आयुधानि च सर्वेषां, बाहून् अपि विभूषितान्।
अपतन्त निकृत्ताङ्गा मृता भूमौ, गतासवः। २४

आर्ष्य-शृङ्गिस् तथा दृष्ट्वा समरे शत्रुम् ऊर्जितम्,
कृत्वा घोरं महद् रूपं, ग्रहीतुम् उपचक्रमे। २५

२१। शरावरम्—बाण-श्रेष्ठम्। *Cf.* अ-वरा (दुर्गा)। २२। उपचक्रमुः—उपाजग्मुः। २३। अभ्यास-गतानाम्—समीपागतानाम्। असि-हस्ताप-हस्ताभ्याम्—दक्षिण-बाहु-विभ्रान्ति-च्छेदेन वाम-बाहु-विभ्रान्ति-च्छेदेन च। २५। ऊर्जितम्—ऊर्जस्वलम्, तेजस्विनम्। उपचक्रमे—उपाजगाम।

तां दृष्ट्वा तादृशीं मायां राक्षसस्य दुरात्मनः,
इरावान् अपि संक्रुद्धो मायां स्रष्टुं प्रचक्रमे। २६

यो ऽन्वयो मातृकस् तस्य स एनम् अभिपेदिवान्।
ततो बहु-विधैर् नागैश् छादयामास राक्षसम्। २७

छाद्यमानस् तु नागैः, स ध्यात्वा, राक्षस-पुङ्गवः
सौपर्णं रूपम् आस्थाय, भक्षयामास पन्नगान्। २८

मायया भक्षिते तस्मिन् अन्वये तस्य मातृके,
विमोहितम् इरावन्तं न्यहनद् राक्षसो ऽसिना। २९

अक्रुध्यत महा-कायो भैमसेनिर् घटोत्कचः,
प्रादुश्चक्रे, ततो, मायां घोर-रूपां सु-दारुणाम्। ३०

ततस् ते तावकाः सर्वे, मायया विमुखी-कृताः,
अन्योन्यं समपश्यन्त निकृत्तम् मेदिनी-तले। ३१

तद् दृष्ट्वा, तावकं सैन्यं विद्रुतं शिविरं प्रति,
मम प्राक्रोशतो, राजंस्, तथा देव-व्रतस्य च, —
"युध्यध्वं, मा पलायध्वं—मायैषा राक्षसी—रणे!" ३२

तांश् च प्रद्रवतो दृष्ट्वा, जय-प्राप्ताश् च पाण्डवाः
घटोत्कचेन सहिताः सिंह-नादान् प्रचक्रिरे। ३३

२६। मायाम्—इन्द्र-जालम्, कुहकम्। २७। अन्वयः—सन्तानः, वंशः। अभिपेदिवान् [अभि-पद्+वस्, १।१] - अभ्यपद्यत, अभिजगाम। अतीते क्वसुः। २८। सौपर्णं रूपम्—गरुड़-विग्रहम्। ३०। अक्रुध्यत—अक्रुध्यत्, चुकोप। आआ.। ३१। समपश्यन्त—समपश्यन्। आआ.। ३२। मम—माम् अनादृत्य।

एवं तव बलं सर्वं, हैडिम्बेन दुरात्मना
सूर्यास्तमन-वेलायां प्रभग्नं, विद्रुतं दिशः। ३४

रात्रिः समभवत् तत्र। नापश्याम ततो रणम्।
ततो ऽवहारं सैन्यानां प्रचक्रुः कुरु-पाण्डवाः। ३५

षोडशो ऽध्यायः

वाक्-शल्यम्

ततो दुर्योधनो राजा शकुनिश् चापि सौबलः,
दुःशासनश् च पुत्रस् ते सूत-पुत्रश् च दुर्जयः, १

समागम्य, महा-राज, मन्त्रं चक्रुर् विवक्षितम्,
'कथं पाण्डु-सुताः सङ्ख्ये जेतव्याः स-गणा' इति। २

ततो दुर्योधनो राजा सर्वांस् तान् आह मन्त्रिणः,—
"द्रोणो भीष्मः कृपः शल्यः सौमदत्तिश् च संयुगे
न पार्थान् प्रति-बाधन्ते। न जाने, किं नु कारणम्। ३

३४। अस्तमनम्—अस्त-गमनम्।

पृ. १६८; १५ टी.। चामरापीड़-धारिभिः—चामरम् एव आपीड़म् (शेखरम्, शिरोभूषणम्) धारयन्ति ये तादृशैः। अयमेवार्थः साधीयान् भाति।

पृ. १९३, १० श्लोके—'चेतिकानः' 'चेकितानः' एव भवेत्।

३। सौमदत्तिः [सोमदत्त+इ, १।१]—सोमदत्त-पुत्रो [भूरि-श्रवाः]।

अ-वध्यमानास् ते चापि क्षपयन्ति बलं मम ।
सो ऽहं संशयम् आपन्नः, प्रकरिष्ये कथं रणम् ?" ४

तम् अब्रवीद्, महा-राज, सूत-पुत्रो नराधिपम् ,—
"मा शोच, भरत-श्रेष्ठ, करिष्ये ऽहं प्रियं तव । ५

भीष्मः शान्तनवस् तूर्णम् अप-यातु महा-रणात् ।
अहं पार्थान् हनिष्यामि सहितान् सर्व-सोमकैः ।" ६

ततस् तं नृप-शार्दूलं शार्दूल-सम-विक्रमम्
आरोहयद् धयं तूर्णं भ्राता दुःशासनस् तदा । ७

संप्राप्य तु ततो राजा भीष्मस्य सदनं शुभम्,
अभिवाद्य ततो भीष्मं, निषण्णः परमासने, ८

उवाच प्राञ्जलिर् भीष्मं बाष्प-कण्ठो ऽश्रु-लोचनः,—
"त्वां वयं हि समाश्रित्य संयुगे, शत्रु—सूदन, ९

उत्सहेम रणे जेतुं सेन्द्रान् अपि सुरा-सुरान् ;
किम् उ पाण्डु-सुतान् वीरान् स-सुहृद्-गण-बान्धवान् ? १०

तस्माद् अर्हसि, गाङ्गेय, कृपां कर्तुं मयि, प्रभो,
जहि पाण्डु-सुतान् वीरान्, महेन्द्र इव दानवान् ! ११

त्वद्-वचः सत्यम् एवास्तु ! जहि पार्थान् समागतान्,
सोमकांश् च महेष्वासान् । सत्य-वाग् भव, भारत ! १२

८ । निषण्णः [नि-सद् + त, १।१]—उपविष्टः ।

दयया यदि वा, राजन्, द्वेष्य-भावाद् मम, प्रभो,
मन्द-भाग्यतया वापि मम रक्षसि पाण्डवान्, १३

अनु-जानीहि समरे कर्णम् आहव-शोभिनम्,
स जेष्यति रणे पार्थान् स-सुहृज्-जन-बान्धवान् ।" १४

वाक्-शल्यैस् तव पुत्रेण सो ऽतिविद्धो महा-मनाः,
उद्वृत्य चक्षुषी, कोपाद् निर्दहन्न् इव, भारत, १५

अब्रवीत् तव पुत्रं तु साम-पूर्णम् इदं वचः,—
"किं त्वं दुर्योधनैवं मां वाक्-शल्यैर् अपकृन्तसि, १६

घटमानं यथा-शक्ति, कुर्वाणं च तव प्रियम्,
जुह्वानं समरे प्राणांस् तव वै प्रिय-काम्यया ? १७

स्वयं वैरं महत् कृत्वा पाण्डवैः सह-सृञ्जयैः,
युध्यस्व तान् अद्य रणे, पश्यामः । पुरुषो भव ! १८

अहं तु सोमकान् सर्वान् पाञ्चालांश् च समागतान्
निहनिष्ये, नर-व्याघ्र, वर्जयित्वा शिखण्डिनम् । १९

---

१३ । द्वेष्य-भावात्—द्वेष्यत्वात्, द्वेषार्हत्वात् । १५ । उद्वृत्य—उद्घूर्ण्य । १६ । अपकृन्तसि—छिनत्सि । १७ । घटमानम्—चेष्टमानम् । जुह्वानम् [हु + आन, २।१]—जुह्वन्तम् । आआ । जुह्वानं समरे—समराग्नौ दहन्तम् । प्रिय-काम्यया—प्रीतीच्छया । १९ । निहनिष्ये—निहनिष्यामि । आआ. । वर्जयित्वा शिखण्डिनम्—Cf. ५।२४।३३-३६ ।

सुखं स्वपिहि, गान्धारे, श्वो ऽस्मि कर्ता महा-रणम्
यं जनाः कथयिष्यन्ति यावत् स्थास्यति मेदिनी ।" २०

एवम् उक्तस्, तव सुतो निर्जगाम, जनेश्वर,
अभिवाद्य गुरुं मूर्ध्ना, प्रययौ स्वं निवेशनम् । २१

सप्त-दशो ऽध्यायः

नवमो दिवसः—पाण्डव-पराजयः

ततः शान्तनवो भीष्मो निर्ययुः सह सेनया,
व्यूहं चाव्यूहत महत् सर्वतो-भद्रम् आत्मनः । १

एवं ते ऽपि, महा-व्यूहं प्रति-व्यूह्य सु-दुर्जयम्,
पाण्डवाः समरे, शूराः, स्थिता युद्धाय दंशिताः । २

तावकास् तु रणे यत्ताः सह-सेना नराधिपाः
अभ्युद्ययू रणे पार्थान्, भीष्मं कृत्वाग्रतो, नृप । ३

तथैव पाण्डवा, राजन्, भीमसेन-पुरोगमाः
भीष्मं समभ्ययुः सर्वे, संग्रामे विजयैषिणः । ४

गाङ्गेयो रथिनां श्रेष्ठः पाण्डवानाम् अनीकिनीम्
व्यधमद् निशितैर् बाणैः शतशो ऽथ सहस्रशः । ५

२० । श्वः (-स्)—आगामिनि दिवसे, वर्तमान-दिवसावसाने ।

संममर्द च तत् सैन्यं पिता देव-व्रतस् तव,
धान्यानाम् इव लूनानां प्रकरं गो-गणा इव । ६

स, समन्तात् परिवृतो रथौघैर्, अ-पराजितः,
गहने ऽग्निर् इवोत्सृष्टः, प्रजज्वाल दहन् परान् । ७

महेन्द्र-सम-वीर्येण वध्यमाना, महा-चमूः
अभज्यत, महा-राज। न च द्वौ सह धावतः । ८

प्रभज्यमानं सैन्यं तु दृष्ट्वा, यादव-नन्दनः
उवाच पार्थं बीभत्सुं, निगृह्य रथम् उत्तमम्,— ९

"अयं स कालः संप्राप्तः, पार्थ, यः काङ्क्षितस् तव ।
प्रहरास्मै, नर-व्याघ्र, भीष्मायाहव-शोभिने !" १०

इत्युक्तो वासुदेवेन, तिर्यग्-दृष्टिर् अधो-मुखः,
अ-काम इव, बीभत्सुर् इदं वचनम् अब्रवीत्,— ११

"अवध्यानां वधं कृत्वा राज्यं वा नरकोत्तरम्
दुःखानि वन-वासे वा, किं नु मे सु-कृतं भवेत् ? १२

चोदयाश्वान् यतो भीष्मः। करिष्ये वचनं तव ।
पातयिष्यामि दुर्धर्षं भीष्मं कुरु-पितामहम् ।" १३

स चाश्वान् रजत-प्रख्यांश् चोदयामास माधवः
यतो भीष्मस् ततो, राजन्, दुष्प्रेक्ष्यो रश्मिवान् इव । १४

६। लूनानाम्—छिन्नानाम्, कृत्तानाम्। प्रकरम्—समूहम्।
७। गहने—वने। उत्सृष्टः—दत्तः।

ततस् तत् पुनर् आवृत्तं युधिष्ठिर-बलं महत्,
दृष्ट्वा पार्थं महा-बाहुं भीष्मायोद्यतम् आहवे। १५

वासुदेवस् तु, संप्रेक्ष्य पार्थस्य मृदु-युद्धताम्
भीष्मं च शर-वर्षाणि सृजन्तम् अनिशं युधि,
प्रतपन्तम् इवादित्यं मध्यम् आसाद्य सेनयोः,
वरान् वरान् विनिघ्नन्तं पाण्डु-पुत्रस्य सैनिकान्— १७

युगान्तम् इव कुर्वाणं भीष्मं यौधिष्ठिरे बले
नामृष्यत महा-बाहुर् माधवः पर-वीर-हा। १८

उत्सृज्य रजत-प्रख्यान् हयान् पार्थस्य, मारिष,
वासुदेवस् ततो योगी प्रचस्कन्द महा-रथात्। १९

अभिदुद्राव भीष्मं स भुज-प्रहरणो बली,
प्रतोद-पाणिस्, तेजस्वी, सिंहवद् विनदन् मुहुः। २०

अन्वग् एव ततः पार्थः, समभिद्रुत्य, केशवम्
निजग्राह महा-बाहुर्, बाहुभ्यां परिगृह्य वै। २१

तत एवम् उवाचार्तः क्रोध-पर्याकुलेक्षणम्
निःश्वसन्तं यथा नागम् अर्जुनः प्रणयात् सखा,— २२

"निवर्तस्व, महा-बाहो, नानृतं कर्तुम् अर्हसि
यत् त्वया कथितं पूर्वं न योत्स्यामीति, केशव। २३

१८। नामृष्यत—नामर्षयत, न सेहे, न चक्षमे। १९। योगी—सिद्ध्यसिद्ध्योः समभावापन्नः। *Cf.* ६।२।२१ प्रचस्कन्द—उल्लम्फनेन अवततार। २१। अन्वक् [अनु-अन्चू (गमने)+०, २।१]—पश्चात्।

मिथ्या-वादीति लोकास् त्वां कथयिष्यन्ति, माधव ।
ममैष भारः सर्वो हि । हनिष्यामि पितामहम् ।" २४

माधवस् तु, वचः श्रुत्वा फाल्गुनस्य महात्मनः,
न किञ्चिद् उक्त्वा, स-क्रोध आरुरोह रथं पुनः । २५

ततो युधिष्ठिरो राजा, सन्ध्यां संदृश्य, भारत,
स्व-सैन्यं च परावृत्तं पलायन-परायणम् , २६

सोमकांश् च जितान् दृष्ट्वा निरुत्साहान् महा-रथान् ,
चिन्तयित्वा, ततो राजा अवहारम् अरोचयत् । २७

भीष्मस्य समरे कर्म चिन्तयानास् तु पाण्डवाः
नालभन्त तदा शान्तिं, भीष्म-बाण-प्रपीड़िताः । २८

भीष्मो ऽपि, समरे जित्वा पाण्डवान् सह-सृञ्जयान् ,
न्यविशत् कुरुभिः सार्धं, हृष्ट-रूपैः, समन्ततः ।
ततो रात्रिः समभवत् सर्व-भूत-प्रमोहिनी । २९

---

२६ । परावृत्तम्—अपवृत्तम् , [युद्धात्] अपसृतम् । २७ । अरोचयत्—ऐच्छत्, अभिललाष । २९ । न्यविशत्—न्यविशत, विश्रामाय शिविरं प्रविवेश । पआ ।

१५० पृ. १६ श्लोके—'हृशीकेशम्' 'हृषीकेशम्' भवेत् । नव-मास-सञ्चित-मसी-धूलि-लेपेन दुर्लक्ष्यत्वात् शोधन-पत्रे शः ष इव बभौ ।

अष्टा-दशो ऽध्यायः

समर-सभा

तस्मिन् रात्रि-मुखे घोरे पाण्डवा वृष्णिभिः सह
सृञ्जयाश् च दुराधर्षा मन्त्राय समुपाविशन् । १

ततो युधिष्ठिरो राजा मन्त्रयित्वा चिरं, नृप,
वासुदेवं समुद्वीक्ष्य वचनं चेदम् आददे,— २

"कृष्ण, पश्य महात्मानं भीष्मं भीम-पराक्रमम्,
गजं नल-वनानीव, विमृद्नन्तं बलं मम । ३

न चैवैनं महात्मानम् उत्सहामो निरीक्षितुम्,
लेलिह्यमानं सैन्येषु प्रवृद्धम् इव पावकम् । ४

सो ऽहम्, एवं गते, कृष्ण, निमग्नः शोक-सागरे,
वनं यास्यामि, दुर्धर्ष । श्रेयो मे तत्र वै गतम् । ५

जीवितं बहु मन्ये ऽहं । जीवितं ह्यद्य दुर्लभम् ।
जीवितस्याद्य शेषेण चरिष्ये धर्मम् उत्तमम् ।" ६

प्रत्युवाच ततः कृष्णः, सान्त्वयानो युधिष्ठिरम्,—
"धर्म-पुत्र, विषादं त्वं मा कृथाः, सत्य-सङ्गर, ७

---

१ । रात्रि-मुखे—रात्रेः प्रारम्भे । ४ । उत्सहामः—उत्सहामहे, शक्नुमः । पआ । लेलिह्यमानम् [लिह्-य+आन, २।१]—शिखा-रूप-जिह्वया अतिशयेन स्पृशन्तम् । ६ । बहु मन्ये—महार्हं मन्ये । चरिष्ये—चरिष्यामि । आआ. । ७ । सान्त्वयानः—सान्त्वयमानः, प्रिय-वाक्येन प्रबोधयन् ।

यस्य ते भ्रातरः शूरा दुर्जयाः शत्रु-सूदनाः ।
मां वा नियुङ्क्ष्व—सौहार्दात् योत्स्ये भीष्मेण, पाण्डव ।" ८

अर्जुनो दुःख-सन्तप्तः स-व्रीड़म् इदम् अब्रवीत्,—
"पितामहेन संग्रामे कथं योत्स्यामि, माधव ? ९

क्रीड़ता हि मया बाल्ये, वासुदेव, महा-मनाः
पांशु-रूषित-गात्रेण महात्मा कलुषी-कृतः । १०

यस्याहम् अधिरुह्याङ्कं बालः किल, गदाग्रज,
तातेत्यवोचं पितरं पितुः पाण्डोर् महात्मनः, ११

'नाहं तातस् तव, पितुस् तातो ऽस्मि तव, भारत',
इति माम् अब्रवीद् बाल्ये यः, स वध्यो कथं मया ? १२

कामं वध्यतु सैन्यां मे, नाहं योत्स्ये महात्मना,
जयो वास्तु वधो वा मे ! कथं वा, कृष्ण, मन्यसे ?" १३

वासुदेव उवाच,—

प्रतिज्ञाय वधं, जिष्णो, पुरा भीष्मस्य संयुगे,
क्षत्र-धर्मे स्थितः, पार्थ, कथं नैनं हनिष्यसि ? १४

पातयैनं रथात्, पार्थ, क्षत्रियं युद्ध-दुर्मदम् !
नाहत्वा युधि गाङ्गेयं विजयस् ते भविष्यति । १५

---

१० । पांशु-रूषित-गात्रेण—धूलि-लिप्ताङ्गेन । कलुषी-कृतः—मलिनी-कृतः । 'परुषी-कृतः' इति पाठान्तरम् । गदः—बलरामस्य सोदरः कृष्णस्य च वैमात्रेयो भ्राता । १३ । वध्यतु—वध्यताम् । पआ । १४ । पं. १—Cf. ५।२३।२१, ६।६।४८, ६।१७।२४ । १५ । दुर्मदम्—अति-मत्तम्, दुर्धर्षम् ।

न हि भीष्मं दुराधर्षं व्यात्ताननम् इवान्तकम्
त्वद् अन्यः शक्नुयाद् योद्धुम्, अपि वज्र-धरः स्वयम्। १६

ज्यायांसम् अपि चेद् वृद्धं गुणैर् अपि समन्वितम्,
आततायिनम् आयान्तं हन्याद् घातकम् आत्मनः। १७

शाश्वतो ऽयं स्थितो धर्मः क्षत्रियाणां, धनञ्जय,
योद्धव्यं रक्षितव्यं च यष्टव्यं चानसूयिभिः। १८

अर्जुन उवाच,—

शिखण्डी निधनं, कृष्ण, भीष्मस्य भविता ध्रुवम्।
दृष्ट्वैव हि सदा भीष्मः पाञ्चाल्यं विनिवर्तते।

ते वयं, प्रमुखे तस्य पुरस्कृत्य शिखण्डिनम्,
गाङ्गेयं पातयिष्याम उपायेनेति मे मतिः। २०

अहम् अन्यान् महेष्वासान् वारयिष्यामि सायकैः।
शिखण्ड्यपि युधां श्रेष्ठो भीष्मम् एवाभियोधयेत्। २१

श्रुतं हि कुरु-मुख्यस्य 'नाहं हन्यां शिखण्डिनम्,
कन्या ह्येषा पुरा भूत्वा पुरुषः समपद्यत'। २२

सञ्जय उवाच,—

इत्येवं निश्चयं कृत्वा पाण्डवाः सह-माधवाः,
शयनानि यथा स्वानि भेजिरे पुरुषर्षभाः। २३

व्यात्ताननम् — प्रसारित-मुखम्। १८। अनसूयिभिः—अ-विरुद्ध-भाववद्भिः।१६। निधनम्—निधन-कारी, निहन्ता। कर्त्रर्थे क्रिया-प्रयोगः पाञ्चाल्यम् [पञ्चाल+य, २।१]—पञ्चालस्य (पञ्चालानां राज्ञः) पुत्रं [शिखण्डिनम्]। २०। उपायेन—चेष्टया, यत्नेन

नव-दशो ऽध्यायः

दशमो दिवसः—भीष्म-पातः

ततः प्रभाते विमले सूर्यस्योदयनं प्रति,
ताड्यमानासु भेरीषु मृदङ्गेष्वानकेषु च, १

ध्मायत्सु दधि-वर्णेषु जलजेषु समन्ततः,
शिखण्डिनं पुरस्कृत्य निर्याताः पाण्डवा युधि। २

चक्र-रक्षौ ततस् तस्य भीमसेन-धनञ्जयौ।
पृष्ठतो द्रौपदेयाश् च सौभद्रश् चैव वीर्यवान्। ३

सात्यकिश् चेकितानश् च तेषां गोप्ता महा-रथः।
धृष्टद्युम्नस् ततः पश्चात् पाञ्चालैर् अभिरक्षितः। ४

ततो युधिष्ठिरो राजा, यमाभ्यां सहितः, प्रभुः
प्रययौ सिंह-नादेन नादयन्, भरतर्षभ। ५

विराटस् तु ततः पश्चात्, स्वेन सैन्येन संवृतः,
द्रुपदश् च, महा-बाहो, ततः पश्चाद् उपाद्रवत्। ६

केकया भ्रातरः पञ्च धृष्ट-केतुश् च वीर्यवान्,
जघनं पालयामासुः पाण्डु-सैन्यस्य, भारत। ७

१। सूर्य-स्योदयनं प्रति—सूर्योदये समासन्ने सति। २। ध्मायत्सु—ध्मायमानेषु। पआ.। दधिवर्णेषु जलजेषु—शङ्खेषु। ७। केकयाः—केकयस्य (केकयानां राज्ञः) पुत्राः। जघनम्—पश्चाद्-भागम्।

एवं व्यूह्य महा-सैन्यं, पाण्डवास् तव वाहिनीम्
अभ्यद्रवन्त संग्रामे, त्यक्त्वा जीवितम् आत्मनः । ८

तथैव कुरवो, राजन् , भीष्मं कृत्वा महा-रथम्
अग्रतः सर्व-सैन्यानां, प्रययुः पाण्डवान् प्रति , ९

पुत्रैस् तव दुराधर्षै रक्षिताः , सु-महा-बलैः ।
ततो द्रोणो महेष्वासः पुत्रश् चास्य महा-बलः , १०

भगदत्तस् ततः पश्चाद् गजानीकेन संवृतः ,
कृपश् च कृत-वर्मा च भगदत्तम् अनुव्रतौ , ११

काम्बोज-राजो बलवांस् ततः पश्चात् सु-दक्षिणः ,
मागधश् च जयत्सेनः सौबलश् च बृहद्बलः । १२

तथेतरे महेष्वासाः सुशर्म-प्रमुखा नृपाः
जघनं पालयामासुस् तव सैन्यस्य, भारत । १३

ततः प्रववृते युद्धं तव तेषां च, भारत,
अन्योन्यं निघ्नतां, राजन् , यम-राष्ट्र-विवर्धनम । १४

भीष्मेणैकेन मत्स्येषु पाञ्चालेषु च संयुगे,
गजाश्वम् अ-मितं हत्वा, हताः सप्त महा-रथाः । १५

---

८ । त्यक्त्वा—त्यक्तुम् । 'आशंसायां भूतवच्च' (पा. ३।३।१३२) इति भविष्यदर्थे अतीत-प्रयोगः । ११ । अनुव्रतौ—अनुरक्तौ, समाश्रितौ ।

हत्वा पञ्च सहस्राणि रथिनां प्रपितामहः
नराणां च महा-युद्धे सहस्राणि चतुर्दश १६

दन्तिनां षट् सहस्राणि, हयानाम् अयुतं पुनः
शिक्षा-बलेन निहतं पित्रा तव, विशाम् पते । १७

ततः सर्व-महीपानां क्षोभयित्वा वरूथिनीम्,
विराटस्य प्रियो भ्राता शतानीको निपातितः । १८

शतानीकं तु समरे हत्वा, भीष्मः प्रतापवान्
सहस्राणि, महाराज, राज्ञां भल्लैर् अपातयत् ।
उद्विग्नाः समरे योधा विक्रोशन्ति धनञ्जयम् ! १९

किरन् दश दिशो भीष्मः शर-जालैः समन्ततः,
अतीत्य सेनां पार्थानाम्, अवतस्थे चमू-मुखे । २०

ततस् तस्मिन् क्षणे, राजंश, चोदितो वानर-ध्वजः
स-ध्वजं स-शरं साश्वं भीष्मम् अन्तर्दधे शरैः । २१

स चापि कुरु-मुख्यानाम् ऋषभः पाण्डवेरितान्
शर-व्रातैः शर-व्रातान् बहुधा विदुधाव तान् । २२

विधूय तान् बाण-गणान् ये मुक्ताः पार्थिवोत्तमैः,
पाण्डवानाम् अ-दीनात्मा व्यगाहत वरूथिनीम् । २३

---

१६ । प्रपितामहः—सौभद्र-द्रौपदेय-प्रभृतीनाम् इति शेषः । २२ । ईरितान्—प्रेरितान्, निक्षिप्तान् । विदुधाव [वि-धू+अ]—विदध्मौ । २३ । अदीनात्मा—कातर्य-हीन-स्वभावः । व्यगाहत—न्यमज्जत, प्राविशत् ।

ते नराश्व-रथ-व्रातैर् मार्गणैश् च, परन्तप,
तम् एकं छादयामासुर् मेघा इव दिवा-करम् । २४

ततस् तस्य च तेषां च युद्धे देवासुरोपमे
किरीटी भीष्मम् आनर्च्छ पुरस्कृत्य शिखण्डिनम् । २५

शिखण्डी तु, महा-राज, भरतानां पितामहम्,
आजघानोरसि क्रुद्धो नवभिर् निशितैः शरैः । २६

स, तेनाभिहतः सङ्ख्ये, भीष्मः कुरु-पितामहः
नाकम्पत, महाराज, क्षिति-कम्पे यथाचलः । २७

ततः प्रहस्य बीभत्सुर्, व्याक्षिपन् गाण्डिवं धनुः,
गाङ्गेयं पञ्च-विंशत्या क्षुद्रकाणां समार्चयत् । २८

पुनः शर-शतैर् एनं, त्वरमाणो धनञ्जयः
सर्व-गात्रेषु, संक्रुद्धस् तथा मर्मस्वताडयत् । २९

शिखण्डी तु रणे बाणान् यान् मुमोच महा-रथः,
न चक्रुस् ते रुजं तस्य, रुक्म-पुङ्खाः शिला-शिताः । ३०

सो ऽतिविद्धो महेष्वासो दुःशासनम् अभाषत,—
"एष पार्थो रणे क्रुद्धः पाण्डवानां महा-रथः
शरैर् अनेक-साहस्रैर् माम् एवाभ्यपतद् रणे !" ३१

---

२५ । आनर्च्छ [ऋच्छ्+अ]—अभिजगाम । पा. ७।४।११ । २८ । क्षुद्रकाणाम्—साधारण-बाणानाम् । समार्चयत्—अमानयत्, अपूजयत् । २९ । मर्मसु—सन्धि-स्थानेषु, जीव-स्थानेषु । ३० । रुजम्—पीडाम् । ३१ । अभ्यपतत्—अभ्यधावत्, आक्रामत् ।

एवं तयोः संवदतोः फाल्गुनो निशितैः शरैः
शिखण्डिनं पुरस्कृत्य भीष्मं विव्याध संयुगे । ३२

ततो दुःशासनं भीष्मः स्मयमान इवाब्रवीत्,
अर्दितो निशितैर् बाणैर् भृशं गाण्डीव-धन्वना,— ३३

"वज्राशनि-सम-स्पर्शाः सु-पुङ्खाः सु-प्रतेजनाः
सु-मुक्ता अ-व्यवच्छिन्ना—नेमे बाणाः शिखण्डिनः ! ३४

वज्र-दण्ड-सम-स्पर्शा वज्र-वेग-दुरासदाः
मम प्राणान् आरुजन्ति—नेमे बाणाः शिखण्डिनः ! ३५

नाशयन्तीव मे प्राणान् यम-दूता इवागताः
गदा-परिघ संस्पर्शा—नेमे बाणाः शिखण्डिनः ! ३६

भुजगा इव संक्रुद्धा लेलिहाना विषोल्वणाः
समाविशन्ति मर्माणि—नेमे बाणाः शिखण्डिनः ! ३७

अर्जुनस्य इमे बाणा- नेमे बाणाः शिखण्डिनः—
कृन्तन्ति मम गात्राणि माघमां सेगवा इव । ३८

---

३२ । संवदतोः [सम्-वद्+अत्, ६।२]—मिथः सम्भाषमाणयोः । ३४ । सु-प्रतेजनाः—अति-तीक्ष्णीकृताग्राः । अव्यवच्छिन्नाः—सन्तताः । ३५ । आरुजन्ति—नितरां पीड़यन्ति, निरतिशयं व्यथयन्ति । ३७ । लेलिहानाः [लिह् + य–य+आन, १।ब]—जिह्वया निरतिशयं स्पृशन्तः । विषोल्वणाः—विष-व्याप्ताः । ३८ । माघमां सेगवा इव—यथा सेगवाः (कर्कट्याः अपत्यानि) माघमां ([स्व-मातरं] कर्कटीं)

सर्वे ह्यपि न मे दुःखं कुर्युर् अन्ये नराधिपाः
वीरं गाण्डिव-धन्वानम् ऋते जिष्णुं कपि-ध्वजम् ।" ३९

ततो युधिष्ठिरो राजा स्वान्यनीकान्यचोदयत् ,
'अभिद्रवत गाङ्गेयं, मा वो ऽस्तु भयम् अण्वपि' । ४०

अथ ते तोमरैः प्रासैः बाणौघैश् च समन्ततः ,
पट्टिशैश् च सु-निस्त्रिंशैर् नाराचैश् च तथा शितैः , ४१

वत्स-दन्तैश् च भल्लैश् च तम् एकम् अभिदुद्रुवुः ।
सिंह-नादस् ततो घोरः पाण्डवानाम् अभूत् तदा । ४२

तथैव तव पुत्राश् च नेदुर् भीष्म-जयैषिणः—
तमेकम् अभ्यरक्षन्त, सिंह-नादांश् च चक्रिरे । ४३

ततः सेना-मुखे तस्मिन् स्थितः पार्थो धनुर्धरः
मध्येन कुरु-सैन्यानां द्रावयामास वाहिनीम् । ४४

वयं, श्वेत-हयाद् भीताः कुन्ती-पुत्राद् धनञ्जयात् ,
पीड्यमानाः शितैः शस्त्रै, प्राद्रवाम रणे तदा । ४५

सौवीराः कितवाः प्राच्याः प्रतीच्योदीच्य-मालवाः
अभीषाहाः शूर-सेनाः शिबयो ऽथ वसातयः ४६

निकृन्तन्ति (मातुः पृष्ठं विदाय तस्याः उदरात् निर्गच्छन्ति)] तद्वत् (नी.) । 'माघमा कर्कटी प्रोक्ता, तदपत्यं तु सेगवा ।' एतेन अर्जुन-क्षिप्तानां भीष्माङ्ग-प्रविष्टानां बाणानां प्राणाप-हारित्वम् उच्यते । ४१ । पट्टिशः—परशुः, a battle-axe. वत्स-दन्तैः ? ४४ । द्रावयामास [द्रु-इ+अ]—धावयामास द्रुत

शाल्वाश्रयास् त्रिगर्ताश् च अम्बष्ठाः केकयैः सह
संग्रामे प्रजहुर् भीष्मं युध्यमानं किरीटिना । ४७

ततस् तम् एकं बहवः, परिवार्य समन्ततः,
परिकाल्य कुरून् सर्वान् , शर-वर्षैर् अवाकिरन् । ४८

निहत्य समरे, राजन्, शतशो ऽथ सहस्रशः,
न तस्यासीद् अ-निर्भिन्नं गात्रे द्व्यङ्गुलम् अन्तरम् । ४९

एवम्-भूतस् तव पिता, शरैर् वि-शकली-कृतः
शिताग्रैः फाल्गुनेनाजौ, प्राक्-शिराः प्रापतद् रथात् ,
किञ्चिच्-छेषे दिन-करे, पुत्राणां तव पश्यताम् । ५०

हा हेति दिवि देवानां पार्थिवानां च, भारत,
पतमाने रथाद् भीष्मे बभूव सु-महा-स्वनः । ५१

सह भीष्मेण सर्वेषां प्रापतन् हृदयानि नः ।
धरणीं न स पस्पर्श शर-सङ्घैः समावृतः । ५२

महोपनिषदं चैव, योगम् आस्थाय, वीर्यवान् ,
जपन्, शान्तनवो धीमान् कालाकाङ्क्षी स्थितो ऽभवत् । ५३

चालयामास । वाहिनीम्—[पाण्डव] सेना-समूहम् । ४८ । परिकाल्य—समन्तात् विद्राव्य । ५० । वि-शकलीकृतः—खण्डीकृतः । ५१ । हा हा—अह हो ! शोक-ध्वनिर् अयम् । पतमाने—पतति । आआ । ५३ । योगम् आस्थाय—परमात्मनि चित्तं समाधाय । महोपनिषदं जपन्—उपनिषदो नाम वेद-शिरो-भागस्य अहं ब्रह्मास्मीति महा-वाक्यम् अर्थम् उद्दिश्य अनवरतं मनसा उच्चारयन् । कालाकाङ्क्षी—[मरण-योग्य-] समयाभिलाषी, [देह-त्यागोपयोगि-] समयम् अपेक्षमाणः इति भावः ।

विंशो ऽध्यायः

समर-विरामः

पाण्डवाः सृञ्जयाश् चैव सिंह-नादं प्रचक्रिरे ।
सम्मोहश् चैव तुमुलः कुरूणाम् अभवत् तदा । १

कृप-दुर्योधन-मुखा निश्वस्य रुरुदुस् ततः ,
विषादाच् च चिरं कालम् अतिष्ठन् विगतेन्द्रियाः, २

दध्युश् चैव, महा-राज, न युद्धे दधिरे मनः,
ऊरु-ग्राह-गृहीताश् च नाभ्यधावन्त पाण्डवान् । ३

पाण्डवास् तु जयं लब्ध्वा परत्र च परां गतिम्
सर्वे दध्मुर् महा-शङ्खान्, शूराः, परिघ-बाहवः । ४

ततस् तूर्य-सहस्रेषु नदत्सु सु-महाबलः
आस्फोटयामास भृशं भीमसेनो, ननाद च । ५

सेनयोर् उभयोश् चापि गाङ्गेये निहते, विभो,
संन्यस्य वीराः शस्त्राणि प्राध्यायन्त समन्ततः । ६

---

३ । ऊरु-ग्राह-गृहीताः—ऊर्वोर् जड़त्वेव गति-शक्ति-रहिताः । अभ्यधावन्त—अभ्यधावन् । आआ. । ४ । परिघ-बाहवः—लोह-मुख-मुद्गरवद्-दीर्घ-परिपुष्ट-दृढ़-भुजाः । ५ । आस्फोटयामास—बाहु-शब्दं चकार, बाहु-मूलं कर-तलेन आहत्य महा-शब्दं जनयामास । ६ । प्राध्यायन्त—प्राध्यायन् , चिन्ता-मग्ना आसत । आआ. ।

ततो द्रोणाय निहतं भीष्मम् आचष्ट कौरवः ।
द्रोणस् तत्राप्रियं श्रुत्वा मुमोह, भरतर्षभ । ७

स, संज्ञाम् उपलभ्याशु, भारद्वाजः प्रतापवान्
निवारयामास तदा स्वान्यनीकानि, मारिष । ८

विनिवृत्तान् कुरून् दृष्ट्वा, पाण्डवापि स्व-सैनिकान्
दूतैः शीघ्राश्व-संयुक्तैः समन्तात् पर्यवारयन् । ९

निवृत्तेषु च सैन्येषु पारम्पर्येण सर्वशः,
विमुक्त-कवचाः सर्वे भीष्मम् ईयुर् नराधिपाः । १०

ते तु भीष्मं समासाद्य, शयानं, पुरुषर्षभम्,
अभिवाद्य व्यतिष्ठन्त पाण्डवाः कुरुभिः सह । ११

अथ पाण्डून् कुरूंश् चैव, प्रणिपत्याग्रतः स्थितान्
अभ्यभाषत धर्मात्मा भीष्मः शान्तनवस् तदा, — १२

"स्वागतं वो, महाभागाः ! स्वागतं वो, महा-रथाः !
तुष्यामि दर्शनाच् चाहं युष्माकम्, अमरोपमाः ।" १३

अभिमन्त्र्याथ तान् एवं शिरसा लम्बताब्रवीत्, —
"शिरो मे लम्बतेऽत्यर्थम्—उपधानं प्रदीयताम् ।" १४

---

१० । पारम्पर्येण [परम्परा+य, ३।१]—[सैनिक-] परम्परया, योधानुक्रमेण । ईयुः [इ+उस्]—अभि-जग्मुः । १४ । शिरसा लम्बता—लम्बमानेन (दोलायमानेन) मस्तकेन [उपलक्षितः] । पक्षा । उपधानम्—उपाधानम्, बालिशम् ।

ततो नृपाः समाजह्रुस् तनूनि च मृदूनि च
उपधानानि मुख्यानि। नैच्छत् तानि पितामहः। १५

ततो वीक्ष्य नर-श्रेष्ठम्, अभ्यभाषत पाण्डवम्,
धनञ्जयं दीर्घ-बाहुं सर्व-लोक-महा-रथम्,—
"दीयताम् उपधानं वै यद् युक्तम् इह मन्यसे।" १६

फाल्गुनो ऽपि तथेत्युक्त्वा व्यवसायम् अरोचयत्।
अनुमान्य महात्मानं भरतानां पितामहम्,
त्रिभिस् तीक्ष्णैर् महा-वेगैर् उदगृह्णाच् छिरः शरैः। १७

अहृष्यद् भरत-श्रेष्ठो भीष्मो धर्मार्थ-तत्त्व-वित्,
प्राह, सर्वान् समुद्वीक्ष्य भरतान्, भारतं प्रति,— १८

"एवम् एतद्, महा-बाहो, धर्मेषु परितिष्ठता
स्वप्तव्यं क्षत्रियेणाजौ शर-तल्प-गतेन वै।" १९

एवम् उक्त्वा च बीभत्सुं, सर्वांस् तान् अब्रवीद् वचः,—
"शेष्ये ऽहम् अस्यां शय्यायां यावद् आवर्तनं रवेः। २०

दिशं वैश्रवणाक्रान्तां यदा गन्ता दिवा-करः,
विमोक्ष्ये ऽहं तदा प्राणान् सुहृदः सु-प्रियान् इव। २१

१६। इह—वीर-शय्यायाम्। १७। उदगृह्णात्—उद्धृत्य यथा-स्थानं स्थापयामास। १९। परितिष्ठता—अ-विच्छेदेन सर्व-कालेषु तिष्ठता। शर-तल्पम्—शर-शय्या। २०। शेष्ये—शयिष्ये। इडभाव आर्षः। आवर्तनम्—घूर्णनम्। २१। वैश्रवणाक्रान्ताम्—कुबेराधिष्ठिताम्, उत्तराम्।

परिखा खन्यताम् अत्र ममावसदने, नृपाः।
उपासिष्ये विवस्वन्तम् एवं शर-शताचितः।" २२

उपातिष्ठन्न् अथो वैद्याः शल्योद्धरण-कोविदाः
सर्वोपकरणैर् युक्ताः कुशलाः साधु शिक्षिताः। २३

तान् दृष्ट्वा, जाह्नवी-पुत्रः प्रोवाच तनयं तव,—
"धनं दत्त्वा विसृज्यन्तां पूजयित्वा चिकित्सकाः। २४

एवं गते, नहीदानीं वैद्यैः कार्यम् इहास्ति मे।
क्षत्र-धर्मे प्रशंस्तां हि प्राप्तो ऽस्मि परमां गतिम्। २५

नैष धर्मो, मही-पालाः, शर-तल्प-गतस्य मे।
एभिर् एव शरैश् चाहं दग्धव्यो ऽस्मि, नराधिपाः।" २६

तच् छ्रुत्वा वचनं तस्य, पुत्रो दुर्योधनस् तव
वैद्यान् विसर्जयामास पूजयित्वा यथार्हतः। २७

सहिताः पाण्डवाः सर्वे कुरवश् च महा-रथाः
ते, ऽभिवाद्य ततो भीष्मं कृत्वा च त्रिः प्रदक्षिणम्, २८

विधाय रक्षां भीष्मस्य, सर्व एव, समन्ततः,
निवेशायाभ्युपागच्छन् सायाह्ने, रुधिरोक्षिताः। २९

२२। अवसदने—निवास-स्थाने। शर-शताचितः—बाणानां शतैः समावृतः।

एक-त्रिंशो ऽध्यायः

सन्धि-क्षणः

व्युष्टायां च, महाराज, शर्वर्यां, सर्व-पार्थिवाः
पाण्डवा धार्तराष्ट्राश् च उपातिष्ठन् पितामहम् । १

तं वीर-शयने वीरं शयानं कुरु-सत्तमम्
अभिवाद्योपतस्थुर् वै क्षत्रियाः, क्षत्रियर्षभम् । २

कन्याश् चन्दन-चूर्णैश् च लाजैर् माल्यैश् च सर्वशः
अवाकिरन् शान्तनवं, तत्र गत्वा सहस्रशः । ३

स्त्रियो वृद्धास् तथा बालाः प्रेक्षकाश् च पृथग्-जनाः
समभ्ययुः शान्तनवं, भूतानीव तमो-नुदम् । ४

उपारम्य च युद्धेभ्यः सन्नाहान् विप्रमुच्य ते,
आयुधानि च निक्षिप्य, सहिताः कुरु-पाण्डवाः ५

अन्वासत दुराधर्षं देव-व्रतम् अरिन्दमम् ,
अन्योन्यं प्रीतिमन्तस् ते, यथा-पूर्वं यथा-वयः । ६

भीष्मस् तु, वेदनां धैर्याद् निगृह्य, भरतर्षभ,
'पानीयम्' इति, सम्प्रेक्ष्य राज्ञस् तान् , प्रत्यभाषत । ७

४। भूतानि—प्राणिनः। तमोनुदम्—अन्धकारापहारकम् , सूर्यम् । ५। सन्नाहान्—वर्माणि। विप्रमुच्य—अवमुच्य, अपास्य। ६। अन्वासत देव-व्रतम्—भीष्मस्य समीपे उपाविशन्।

ततस् ते क्षत्रिया, राजन्, समाजह्रुः समन्ततः
भक्ष्यान् उच्चावचान्, राजन्, वारि-कुम्भांश् च शीतलान्। ८

उपनीतांस् ततो दृष्ट्वा, भीष्मः शान्तनवो ऽब्रवीत्,—
"नाद्य. तात, मया शक्या भोगाः केचन मानुषाः। ९

अपक्रान्तो मनुष्येभ्यः शर-शय्या-गतो ऽह्यहम्
प्रतीक्षमाणस् तिष्ठामि निवृत्तिं शशि-सूर्ययोः।" १०

एवम् उक्त्वा, शान्तनवो, निन्दन् वाक्येन पार्थिवान्,
"अर्जुनम् द्रष्टुम् इच्छामि" इत्यभाषत, भारत। ११

अथोपेत्य, महा-बाहुर्, अभिवाद्य पितामहम्,
अतिष्ठत्, प्राञ्जलिः, प्रह्वः, किं करोमीति चाब्रवीत्। १२

अभ्यभाषत धर्मात्मा भीष्मः प्रीतो धनञ्जयम्,—
"दह्यतीव शरीरं मे संस्यूतस्य तवेषुभिः। १३

मर्माणि परिदूयन्ते मुखं च परिशुष्यति।
वेदनार्त-शरीरस्य प्रयच्छापो ममार्जुन।" १४

ततः, प्रदक्षिणं कृत्वा रथेन, रथिनां वरः,
शयानं भरत-श्रेष्ठं सर्व-शस्त्र-भृतां वरम्, १५

१३। दह्यतीव —दह्यत इव, नितरां क्लिश्यते। पआ.। संस्यूतस्य [सम्—सीव्+त, ६।१]—सम्यग् ऊतस्य, संसूत्रितस्य। इषुभिः—बाणैः। 'सूत्रैर् इव' इति शेषः। १४। परिदूयन्ते – परितप्यन्ते।

सन्धाय च शरं दीप्तम् अभिमन्त्र्य, स पाण्डवः,
अविध्यत् पृथिवीं पार्थः पार्श्वे भीष्मस्य दक्षिणे। १६

उत्पपात ततो धारा वारिणो विमला शुभा,
शीतस्यामृतकल्पस्य दिव्य-गन्ध-रसस्य च। १७

अतर्पयत् ततः पार्थः शीतया जल-धारया
भीष्मं, कुरूणाम् ऋषभं, दिव्य-कर्म-पराक्रमम्। १८

तृप्तः शान्तनवश् चापि, राजन्, बीभत्सुम् अब्रवीत्,—
"नैतच् चित्रं, महा-बाहो, त्वयि, कौरव-नन्दन। १९

वासुदेव-सहायस् त्वं महत् कर्म करिष्यसि।
धनुर्धराणाम् एकस् त्वं पृथिव्यां, प्रवरो नृषु!" २०

ततः श्रुत्वा तद् वचः, कौरवेन्द्रो
दुर्योधनो दीन-मना बभूव।
तम् अब्रवीच् छान्तनवो, ऽभिवीक्ष्य,—
"निबोध, राजन्! भव वीत-मन्युः! २१

न शक्यः पाण्डवस्, तात, युद्धे जेतुं कथञ्चन,
अ-मानुषाणि कर्माणि यस्यैतानि महात्मनः। २२

तेन सत्त्ववता सङ्ख्ये शूरेणाहव-शोभिना
जिष्णुना समरे, राजन्, सन्धिर् भवतु मा चिरम्! २३

२०। एकः—अ-द्वितीयः। प्रवरः—श्रेष्ठः। २१। वीत-मन्युः—निरस्त-कोपः। २३। सत्त्ववता—बलवता, शक्तिमता। आहव-शोभिना—युद्धे दीप्ति-शीलेन, समर-क्षेत्रे दीप्यमानेन।

यावद् न ते चमूं सर्वां शरैः सन्नत-पर्वभिः
नाशयत्यर्जुनस् , तावन् सन्धिस् ते, तात, युज्यताम् ! २४

यावत् तिष्ठन्ति समरे हत-शेषाः सहोदराः
नृपाश् च बहवो, राजन् , तावत् सन्धिः प्रयुज्यताम् ! २५

राज्यस्यार्धं दीयतां पाण्डवानाम् ।
इन्द्रप्रस्थं धर्म-राजो ऽभियातु ।
मा मित्र-ध्रुक् पार्थिवानां जघन्यः !
पापां कीर्तिं प्राप्स्यसे, कौरवेन्द्र । २६

ममावसानाच् छान्तिर् अस्तु प्रजानां !
सङ्गच्छन्तां पार्थिवाः प्रीतिमन्तः !
पिता पुत्रं मातुलं भागिनेयो
भ्राता चैव भ्रातरं प्रैतु, राजन् !" २७

धर्मार्थ-सहितं वाक्यं, श्रुत्वा, हितम् अनामयम्
नारोचयत पुत्रस् ते, मुमूर्षुर् इव भेषजम् । २८

ततस् ते पार्थिवाः सर्वे जग्मुः स्वान् आलयान् पुनः
तूष्णींभूते, महा-राज, भीष्मे शान्तनु-नन्दने । २९

---

२६ । मित्र-ध्रुक [मित्र-द्रुह्+०, १।१]—मित्राय द्रुह्यति (अनिष्टं चिन्तयति आचरति वा) यः सः तादृशः । मा—मा [भव] । जघन्यः—नीचतमः । प्राप्स्यसे—[न चेत् ,] प्राप्स्यसि । आआ. । २७ । अवसानात्—शेषात् , मृत्योः । सङ्गच्छन्ताम्—मिलन्तु । अ-कर्मणः सङ्गम आत्मनेपदम् । पा. १।३।२९ २८ । मुमूर्षुः [मृ+स+उ, १।१]—मर्तुम् इच्छुकः ।

द्वा-विंशो ऽध्यायः

कर्णोपगमनम्

श्रुत्वा तु निहतं भीष्मं, राधेयः पुरुषर्षभः,
ईषद् आगत-सन्त्रासस्, त्वरयोपजगाम ह । १

स ददर्श महात्मानं शर-तल्प-गतं तदा,
जन्म-शय्या-गतं वीरं कार्तिकेयम् इव, प्रभुम् । २

निमीलिताक्षं तं वीरं साश्रु-कण्ठस् तदा वृषः
अभ्येत्य पादयोर् अस्य निपपात, महा-द्युतिः । ३

"राधेयो ऽहं, कुरु-श्रेष्ठ, नित्यम् अक्षि-गतस् तव"
"द्वेष्यो ऽहं तव सर्वत्र" इति चैनम् उवाच ह । ४

तच् छ्रुत्वा कुरु-वृद्धो हि बली सं-वृत-लोचनः,
शनैर् उद्वीक्ष्य, स-स्नेहम् इदं वचनम् अब्रवीत्, ५

रहितं धिष्ण्यम् आलोक्य, समुत्सार्य च रक्षिणः,
पितेव पुत्रं गाङ्गेयः परिरभ्यैक-बाहुना,— ६

---

२ । जन्म-शय्या-गतम्—शर-शय्या-गतम् [कार्तिकेयस्य शर-वण-भवत्वात्] । शय्योपकरण-नाम्नोर् ध्वनि-साम्याद् भीष्मः कार्तिकेयं स्मारयति । ५ । संवृत-लोचनः—आवृत-चक्षुः, निमीलित-नेत्रः । ६ । रहितम् —एकान्तस् , निर्जनम् । समुत्सार्य – निःसार्य ।

"एह्येहि त्वं, विप्रतीप ! स्पर्धसे त्वं मया सह !
यदि मां नाधिगच्छेथा, न ते श्रेयो ध्रुवं भवेत् । ७

कौन्तेयस् त्वं, न राधेयो । न तवाधिरथः पिता ।
सूर्य-जस् त्वं, महा-बाहो, विदितो नारदाद् मया । ८

न च द्वेषो ऽस्ति मे, तात त्वयि । सत्यं ब्रवीमि ते ।
तेजो-वध-निमित्तं तु परुषं त्वाहम् अब्रुवम् । ९

जातो ऽसि धर्म-लोपेन । ततस् ते बुद्धिर् ईदृशी,
नीचाश्रयाद् मत्सरेण द्वेषिणी गुणिनाम् अपि । १०

तेनासि बहुशो रूक्षं श्रावितः कुरु-संसदि ।
कुल-भेद-भयाच् चाहं सदा परुषम् उक्तवान् । ११

इष्वस्त्रे चास्त्र-सन्धाने लाघवे ऽस्त्र-बले तथा
सदृशः फाल्गुनेनासि कृष्णेन च महात्मना । १२

सोदर्याः पाण्डवा वीरा भ्रातरस् ते, ऽरि-सूदन ।
सङ्गच्छ तैर्, महा-बाहो, मम चेद् इच्छसि प्रियम् । १३

मया भवतु निर्वृत्तं वैरम्, आदित्य-नन्दन ।
पृथिव्यां सर्व-राजानो भवन्त्वद्य निरामयाः । १४

---

७ । विप्रतीपः—प्रतिकूलः । अधिगच्छेथाः—अधिगच्छेः । आ आ । हेतु-हेतुमतोर् लिङ् । पा. ३।३।१५६ । ९ । अब्रुवम्—अब्रवम् । गुणाभाव आर्षः । ११ । रूक्षम्—कर्कशम् । *Cf.* उपरिष्टात् ५।२४।४-६ । १३ । सङ्गच्छ—सङ्गच्छस्व, मिल । पआ. । १४ । निर्वृत्तम्—समाप्तम् ।

कर्ण उवाच,—

जानाम्येवं, महा-बाहो, सर्वम् एतद् , न संशयः ।
यथा वदसि मे, भीष्म, कौन्तेयो ऽहं, न सूत-जः । १५

अवकीर्णस् त्वहं कुन्त्या, सूतेन च विवर्धितः ,
भुक्त्वा दुर्योधनैश्वर्यं न मिथ्या कर्तुम् उत्सहे । १६

वसु चैव शरीरं च पुत्रा दारास् तथा यशः ,
सर्वं दुर्योधनस्यार्थे त्यक्तं मे, भूरि-दक्षिण । १७

कोपिताः पाण्डवा नित्यं मयाश्रित्य सु-योधनम् ।
अवश्य-भावी ह्यर्थो ऽयं यो न शक्यो निवर्तितुम् । १८

पाण्डवा वासुदेवश् च विदिता मम सर्वशः
अजेयाः पुरुषैर् अन्यैर् इति तांश् चोत्सहामहे । १९

विजयिष्ये रणे पाण्डून् इति मे निश्चितं मनः ।
न च शक्यम् अवस्रष्टुं वैरम् एतत् सुदारुणम् । २०

धनञ्जयेन योत्स्ये ऽहं युधि, सम्प्रीत-मानसः ।
अनुजानीहि मां, तात, युद्धाय कृत-निश्चयम् । २१

---

१६ । अवकीर्णः —परित्यक्तः । १७ । भूरि-दक्षिणः—बहु-दायी, दान-शीलः । १८ । अवश्य-भावी—अवश्यम्भावी । निवर्तितुम्—निवर्तयितुम् । अणित्वम् आर्षम् । १९ । उत्सहामहे—अभियामः । २० । अवस्रष्टुम्—परित्यक्तुम् , विहातुम् ।

यद् उक्तं वि-प्रतीपं वा संरम्भाच् चापलात् तथा,
यद् मयेह कृतं किञ्चित्, तद् मे त्वं क्षन्तुम् अर्हसि। २२

भीष्म उवाच,—

न चेच् छक्यं त्वयोत्स्रष्टुं वैरम् एतत् सु-दारुणम्,
अनुजानामि, कर्ण, त्वां, युध्यस्व स्वर्ग-काम्यया। २३

निर्मन्युर् गत-संरम्भः कुरु कर्म नृपस्य हि
यथा-शक्ति यथोत्साहं, सतां वृत्तेषु वृत्तवान्। २४

सञ्जय उवाच,—

इत्युक्तवति गाङ्गेये, अभिवाद्य प्रसाद्य च,
राधेयो, रथम् आरुह्य, प्रायात् तव सुतं प्रति। २५

इत्यार्षे श्री-भारते वैयासिके
दश-साहस्र्यां संहितायाम्
भीष्म-पर्व।

२२। विप्रतीपम् [वि+प्रति-अप्+अ, ११]—विरुद्धम्। २३। काम्यया—कामनया, इच्छया। २४। निर्मन्युः—निरहङ्कारः। गत-संरम्भः—वीताक्रोशः।

इति तारकालोके नाम भारतवृत्तौ
भीष्म-पर्व

अथ

श्रीभारते

द्रोण-पर्व

प्रथमो ऽध्यायः

एका-दशो दिवसः—राज-जिघृक्षा

सञ्जय उवाच,—

कर्णं दृष्ट्वा महात्मानं युद्धाय समुपस्थितम्,
हृष्टो, दुर्योधनो, राजन्, इदं वचनम् अब्रवीत्,— १

"भीष्मः सेना-प्रणेतासीद् वयसा विक्रमेण च।
कं नु सेना-प्रणेतारं मन्यसे तदनन्तरम्?" २

कर्ण उवाच,—

सर्व एव महात्मान इमे पुरुष-सत्तमाः
सेनापतित्वम् अर्हन्ति। नात्र कार्या विचारणा। ३

अयं च सर्व-योधानाम् आचार्यः स्थविरो गुरुः
युक्तः सेना-पतिः कर्तुं द्रोणः, शस्त्र-भृतां वरः। ४

सञ्जय उवाच,—

अथाभिषिषिचुर् द्रोणं दुर्योधन-मुखा द्विजाः
सैनापत्ये, यथा स्कन्दं पुरा शक्र-मुखाः सुराः। ५

ततो वादित्र-घोषेण शङ्खानां च महा-स्वनैः
प्रादुरासीत् कृते द्रोणे हर्षः सेना-पतौ तदा। ६

सेना-पतित्वं संप्राप्य, भारद्वाजो महा-रथः
मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यम् अब्रवीत्,— ७

"यत् कौरवाणाम् ऋषभाद् आपगेयाद् अनन्तरम्
सैनापत्येन मां, राजन्, अद्य सत्कृतवान् असि, ८

सदृशं कर्मणस् तस्य फलम् आप्नुहि, भारत।
करोमि कामं कं तेऽद्य ? प्रवृणीष्व, यम् इच्छसि।" ९

ततो दुर्योधनो राजा कर्ण-दुःशासनादिभिः
संमन्त्र्योवाच दुर्धर्षं आचार्यं, जयतां वरम्,— १०

"ददासि चेद् वरं मह्यं, जीव-ग्राहं युधिष्ठिरम्
गृहीत्वा, रथिनां श्रेष्ठं, मत्-समीपम् इहानय।" ११

ततः कुरूणाम् आचार्यः, श्रुत्वा पुत्रस्य ते वचः,
सेनां प्रहर्षयन् सर्वाम्, इदं वचनम् अब्रवीत्,— १२

"न चेद् युधिष्ठिरं वीरः पालयत्यर्जुनो युधि,
मन्यस्व पाण्डव-श्रेष्ठम् आनीतं वशम् आत्मनः।" १३

सान्तरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे,
गृहीतं तम् अमन्यन्त तव पुत्राः सु-बालिशाः। १४

ततो दुर्योधनेनापि ग्रहणं पाण्डवस्य तत्
सैन्य-स्थानेषु सर्वेषु सु-घोषितम्, अरिन्दम। १५

ततस् ते सैनिकाः, श्रुत्वा तं युधिष्ठिर-निग्रहम्,
सिंह-नाद-रवांश् चक्रुर् बाहु-शब्दांश् च कृत्स्नशः। १६

तच् च सर्वं यथा-न्यायं धर्म-राजेन, भारत,
आप्तैर् आशु परिज्ञातं भारद्वज-चिकीर्षितम्। १७

अब्रवीद् धर्म-राजस् तु धनञ्जयम् इदं वचः,—
"श्रुतं ते, पुरुष-व्याघ्र, द्रोणस्याद्य चिकीर्षितम्?" १८

अर्जुन उवाच,—

यथा मे न वधः कार्य आचार्यस्य कदाचन,
तथा तव परित्यागो न मे, राजंश्, चिकीर्षितः। १९

अप्येवं, पाण्डव, प्राणान् उत्सृजेयम् अहं युधि,
प्रतीपो नाहम् आचार्ये भवेयं वै कदाचन। २०

१४। सान्तरम्—सावकाशम्, स-च्छिद्रम्, घटनान्तरापेक्षया।
२०। प्रतीपः [प्रति-अप्+अ, ५।१।१] —प्रतिकूलः। पा. ५।४।७४, ६।३।९७।

त्वां निगृह्याहवे राज्यं धार्तराष्ट्रो ऽयम् इच्छति ?
न स तं जीव-लोके ऽस्मिन् कामं प्राप्ता कथञ्चन। २१

प्रपतेद् द्यौः स-नक्षत्रा, पृथिवी शकली-भवेत्,
न त्वां द्रोणो निगृह्णीयाज् जीवमाने मयि ध्रुवम्! २२

सञ्जय उवाच,—

ततः शङ्खाश् च भेर्यश् च मृदङ्गाश् चानकैः सह
प्रावाद्यन्त, महा-राज, पाण्डवानां निवेशने। २३

तं श्रुत्वा शङ्ख-निर्घोषं पाण्डवस्य महौजसः,
त्वदीयेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे। २४

ततो व्यूढान्यनीकानि तव तेषां च, भारत,
शनैर् उपेयुर् अन्योन्यं योत्स्यमानानि संयुगे। २५

मोहयित्वा ततः सैन्यं भारद्वाजः प्रतापवान्
धृष्टद्युम्न-बलं तूर्णं व्यधमद् निशितैः शरैः। २६

विचरन् स तदा, राजन्, सेनां संक्षोभयन्, प्रभुः
वर्धयामास सन्त्रासं शात्रवाणाम् अ-मानुषम्। २७

ततः शोण-हयः क्रुद्धश्, चतुर्दन्त इव द्विपः,
प्रविश्य पाण्डवानीकं, युधिष्ठिरम् उपाद्रवत्। २८

२२। शकली-भवेत्—खण्डी-कृता भवेत्। जीवमाने—जीवति। आ आ.। २४। अभिजघ्निरे [अभि-हन्+इरे]—अभ्यहन्यन्त, अवाद्यन्त। २८। शोण-हयः—लोहिताश्वः, द्रोणः। चतुर्दन्तः—ऐरावतो नाम इन्द्रस्य हस्ती।

ततो विराट-द्रुपदौ केकयाः सात्यकिः शिबिः
आवव्रुस् तस्य पन्थानं, किरन्तः सायकान् बहून्। २९
तान् प्रमृद्य शर-व्रातैः पाण्डवानां महा-रथान्,
युधिष्ठिर-रथाभ्यासे तस्थौ मृत्युर् इवान्तकः। ३०
ततो ऽभवद् महा-शब्दो, राजन्, यौधिष्ठिरे बले
हृतो राजेति योधानां, समीपस्थे यत-व्रते। ३१
आयाज् जवेन कौन्तेयो, रथ-घोषेण नादयन्,
शोणितोदां रथावर्तां कृत्वा विशसने नदीम्। ३२
ततः किरीटी सहसा द्रोणानीकम् उपाद्रवत्,
छादयन्न् इषु-जालेन महता, मोहयन्न् इव। ३३
नादृश्यत तदा, राजंस्, तत्र किञ्चन संयुगे,
बाणान्धकारे महति कृते गाण्डीव-धन्वना। ३४
सूर्ये चास्तम् अनुप्राप्ते रजसा चाभि-संवृते,
नाज्ञायत तदा शत्रुर् न सुहृद् न च कश्चन। ३५
ततो ऽवहारं चक्रुस् ते द्रोण-दुर्योधनादयः।
स्वान्यनीकानि बीभत्सुः शनकैर् अवहारयत्। ३६

३१। यत-व्रते—प्रतिज्ञात-क्रियानुष्ठायिनि [द्रोणे]। ३२। विशसने—युद्धे।

द्वितीयो ऽध्यायः

द्वा-दशो दिवसः—पाण्डव-पराभवः

कृत्वावहारं सैन्यानां, द्रोणः परम-दुर्मनाः,
दुर्योधनम् अभिप्रेक्ष्य, स-व्रीडम् इदम् अब्रवीत्,— १

"उक्तम् एतद् मया पूर्वं, 'न, तिष्ठति धनञ्जये,
शक्यो ग्रहीतुं संग्रामे देवैर् अपि युधिष्ठिरः।" २

अपनीते तु योगेन केनचिच् छ्वेत-वाहने,
तत एष्यति ते, राजन्, वशम् एष युधिष्ठिरः।' ३

द्रोणस्य वचनं श्रुत्वा, त्रिगर्ताधिपतिस् तदा,
भ्रातृभिः सहितो, राजन्न्, इदं वचनम् अब्रवीत्,— ४

"वयं विनिकृता, राजन्, सदा गाण्डीव-धन्वना।
वयं एनं हनिष्यामो निष्कृष्यायोधनाद् बहिः।" ५

एवम् उक्त्वा, तदा, राजंस्, ते ऽभ्यवर्तन्त संयुगे,
आह्वयन्तो ऽर्जुनं वीरा पितृ-जुष्टां दिशं प्रति। ६

आहूतस् तैर्, नर-व्याघ्रः पार्थः पर-पुर-ञ्जयः
धर्म-राजम् इदं वाक्यम् अ-पदान्तरम् अब्रवीत्,— ७

"आहूतो न निवर्तेयम् इति मे व्रतम् आहितम्।
संशप्तकाश् च मां, राजन्न्, आह्वयन्ते महा-मृधे।" ८

३। योगेन—उपायेन। ६। पितृ-जुष्टाम्—प्रेत-सेविताम्, दक्षिणाम्।
७। अ-पदान्तरम्—तत्-क्षणात्। ८। व्रतम्—नियमः। आहितम् [आ

युधिष्ठिर उवाच,—

श्रुतं ते तत्त्वतस् , तात, यद् , द्रोणस्य चिकीर्षितम् ।
यथा तद् अनृतं तस्य भवेत् , तत् त्वं समाचर । ९

अर्जुन उवाच,—

अयं वै सत्य-जिद् , राजन्न् , अद्य त्वां रक्षिता युधि ।
म्रियमाणे च पाञ्चाल्ये नाचार्यः कामम् आप्स्यति । १०

हते तु पुरुष-व्याघ्रे रणे सत्य-जिति, प्रभो,
सर्वैर् अपि समेतैर् वा न स्थातव्यं कथंचन । ११

सञ्जय उवाच,—

अनुज्ञातस् ततो राज्ञा परिष्वक्तश् च फाल्गुनः ,
प्रेम्णा दृष्टश् च बहुधा ह्याशिषश् चास्य योजिताः । १२

विधायैवं ततः पार्थस् त्रिगर्तान् प्रत्ययाद् बली,
क्षुधितः क्षुद्-विघातार्थं सिंहो मृग-गणान् इव । १३

ततो दौर्योधनं सैन्यं मुदा परमया युतम् ,
ऋते ऽर्जुनं भृशं क्रुद्धं धर्म-राजस्य निग्रहे । १४

--धा+त, ११]—कृतम् । संशप्तकः [सम्-{ शप्+त }-क, ११]—स्वयं संग्रामाद् अ-निवर्तितुम् कृत-शपथः अन्यांश् च योधान् पलायनाद् निवारयितुं नियुक्तो योधः । मन्ये एवम्भूत एव नारायणाख्योऽपि सैनिकः । *Cf.* उपरिष्टात् ५।३।३३ । १० । सत्य-जित्—द्रुपदस्य अति-रथः पुत्रः । म्रियमाणे [मृ+आन, ७।१]—जीवति । १३ । प्रत्ययाद् [प्रति-या+द्]—प्रातिकूल्येन अभिजगाम । १४ । दौर्योधनम्—दुर्योधनस्य ।

ततो ऽन्योन्येन ते सैन्ये समाजग्मतुर् ओजसा,
गङ्गा-सरस्वत्यौ वेगेन प्रावृषीवोल्वणोदके । १५

व्यूढानीकस् ततो द्रोणः पाण्डवानां महा-चमूम्
अभ्ययाद्, भरत-श्रेष्ठ, धर्म-राज-जिघृक्षया । १६

व्यूढां दृष्ट्वा सुपर्णेन भारद्वाजस्य तां चमूम्,
व्यूहेन मण्डलार्धेन प्रत्यव्यूहद् युधिष्ठिरः । १७

दृष्ट्वा द्रोणं, ततः शूरः सत्य-जित् सत्य-विक्रमः,
युधिष्ठिरम् अभिप्रेप्सुर्, आचार्यं समुपाद्रवत् । १८

तत आचार्य-पाञ्चाल्यौ युयुधाते, महा-बलौ,
विक्षोभयन्तौ तत् सैन्यम्, इन्द्र-वैरोचनाव् इव । १९

संछाद्यमानं समरे द्रोणं दृष्ट्वा महा-रथम्,
चुक्रुशुः पाण्डवा, राजन्, वस्त्राणि दुधुवुश् च ह । २०

स, सत्य-जितम् आलोक्य तथोदीर्णं महा-हवे,
अर्ध-चन्द्रेण चिच्छेद शिरस् तस्य महात्मनः । २१

तस्मिन् हते महा-मात्रे पाञ्चालानां महा-रथे,
अपायाज् जवनैर् अश्वैर् द्रोणात् त्रस्तो युधिष्ठिरः । २२

---

१५ । समाजग्मतुः—समाजग्माते । उल्वणोदके—उच्छलित-जले । १७ । सुपर्णेन —गरुडेन [नाम व्यूहेन] । १८ । अभिप्रेप्सुः—अभिगन्तुम् इच्छुकः, रक्षितुम् इच्छन् । १९ । वैरोचनः [विरोचन+अ, १।१]—प्रह्लाद-पुत्रस्य विरोचनस्य पुत्रो बलिर् नाम दैत्य-राजः । २० । संछाद्यमानम् [सम्-छद्-इ+य-आन, २।१]—[बाणैर्] आच्छियमाणम् । २१ । उदीर्णम्—उद्दीप्तम् । २२ । महा-मात्रे—प्रधाने ।

पाञ्चालाः केकया मत्स्याश् चेदि-कारूष-कोशलाः,
युधिष्ठिरम् अभीप्सन्तो, हृष्टा द्रोणम् उपाद्रवन्। २३

ततो, युधिष्ठिरम् प्रेप्सुर्, आचार्यः शत्रु-पूग-हा
व्यधमत् तान्यनीकानि, तूल-राशिम् इवानलः। २४

मत्स्यान् जित्वाजयच् चेदीन् कारूषान् केकयान् अपि,
पाञ्चालान् सृञ्जयान् पाण्डून् भारद्वाजः पुनः पुनः। २५

तावकाश् च, महा-राज, जयं लब्ध्वा, महाहवे,
पाण्डवेयान् रणे जघ्नुर् द्रवमाणान् समन्ततः। २६

कौरवाः सिंह-नादेन नाना-वाद्य-स्वनेन च
रथ-द्विप-नरांश् चैव सर्वतः समवारयन्। २७

दुर्योधनो ऽब्रवीत् कर्णं प्रहृष्टः प्रहसन्न् इव,—
"नैते जातु पुनर् युद्धम् इच्छेयुर् इति मे मतिः। २८

एष भीमो महा-क्रोधी हीनः पाण्डव-सृञ्जयैः,
मदीयैर् आवृतो योधैः, कर्ण, नन्दयतीव माम्।" २९

कर्ण उवाच,—

नैष जातु महा-बाहुर् जीवन्न् आहवम् उत्सृजेत्।
न चेमान् पुरुष-व्याघ्रः सिंह-नादान् सहिष्यति। ३०

२३। अभीप्सन्तः [अभि-आप्+स+अत्, १।ब]—प्राप्तुकामाः, रिरक्षिषवः। २४। शत्रु-पूग-हा [-हन्, १।१]—रिपु-चय-घातकः। २७। समवारयन्—अरुन्धन्। २९। आवृतः—परिवृतः, वेष्टितः।

न चापि पाण्डवा युद्धे भज्येरन्न् इति मे मतिः ,
शूराश् च बलवन्तश् च कृतास्त्रा युद्ध-दुर्मदाः । ३१
विषाग्नि-द्यूत-संक्लेशान् वन-वासं च पाण्डवाः
स्मरमाणा न हास्यन्ति संग्रामम् इति मे मतिः । ३२

तृतीयो ऽध्यायः

निवर्तनम्

सञ्जय उवाच,—

तत्रारावो महान् आसीद् एकं द्रोणं जिघांसताम्
पाण्डवानां निवृत्तानां नाना-वर्णैर् हयोत्तमैः । १
ऋक्ष-वर्णैर् हयैर् दृष्ट्वा व्यायच्छन्तं वृकोदरम् ,
रजताश्वस् ततः शूरः शैनेयः संन्यवर्तत । २
पारावत-सवर्णैस् तु हेम-भाण्डैर् महाजवैः
पाञ्चाल-राजस्य सुतो धृष्टद्युम्नो न्यवर्तत । ३
दर्शनीयास् तु काम्बोजाः शुक-पत्र-परिच्छदाः
वहन्तो नकुलं शीघ्रं तावकान् अभिदुद्रुवुः । ४

---

३२ । स्मरमाणाः—स्मरन्तः । आआ ।

१ । आरावः [आ-रु+अ, १।१]—शब्दः । जिघांसताम् [हन्-स+अत् , ६।ब]—हन्तुम् इच्छताम् । २ । ऋक्ष-वर्णैः—भल्लुक-वर्णैः , कृष्ण-वर्णैः [भल्लुकस्य प्रायेण कृष्ण-वर्णत्वात्]। व्यायच्छन्तम् [वि-आ-यम्+अत् २।१]—[निवर्तनाय] श्रमं कुर्वन्तम् , निवर्तमानम् । ३ । पारावत-सवर्णैः—कपोताभैः, सित-नीलैः । हेम-भाण्डैः—स्वर्ण-भूषा-विभूषितैः । ४ । काम्बोजाः – काम्बोज-देश-जा अश्वाः ।

तथा तित्तिरि-कल्माषा हया, वात-समा जवे,
अवहंस् तुमुले युद्धे सहदेवम् उदायुधम्। ५

दन्त-वर्णास् तु राजानं काल-बाला युधिष्ठिरम्,
भीम-वेगा, नर-व्याघ्रम् अवहन्, वात-रंहसः। ६

हेमोत्तम-प्रतिच्छन्नैर् हयैर् वात-समैर् जवे
अभ्यवर्तन्त सैन्यानि सर्वाण्येव युधिष्ठिरम्। ७

राज्ञश् त्वनन्तरो राजा पाञ्चाल्यो द्रुपदो ऽभवत्,
जातरूपमय-च्छत्रः, सर्वैस् तैर् अभिरक्षितः। ८

ललामैर् हरिभिर् युक्तः, सर्व-शब्द-सहैर् युधि,
राज्ञां मध्ये महेष्वासः शान्त-भीर् अभ्यवर्तत। ९

केकयाश् च शिखण्डी च धृष्ट-केतुस् तथैव च,
स्वैः स्वैः सैन्यैः परिवृता, मत्स्य-राजानम् अन्वयुः। १०

तं तु पाटलि-पुष्पाणां सम-वर्णा हयोत्तमाः
वहमाना व्यराजन्त मत्स्यस्यामित्र-घातिनः। ११

'महा-ललाट-जघन-स्कन्ध-वक्षो-जवा हयाः, दीर्घ-ग्रीवायता ह्रस्व-मुष्काः काम्बोजकाः स्मृताः'। (नो.)। शुक-पत्र-परिच्छदाः—शुक-पक्षाभ-रोमाणः। ६। दन्त-वर्णाः—शुक्लाः। काल-बालाः—कृष्ण-केश-लाङ्गूलाः। ७। प्रतिच्छन्नैः—आच्छन्नैः, आवृतैः, भूषितैः। ९। ललामैः—'श्वेतं ललाट-मध्यस्थं तारा-रूपं हयस्य यत्, ललामं चापि तत् प्राहुर् ललामो ऽश्वस् तदन्वितः'। हरिभिः—'स-केसराणि रोमाणि सुवर्णाभानि यस्य तु, हरिः स वर्णतो ऽश्वस् तु पीत-कौषेय-सन्निभः'। ११। पाटलि-पुष्पाणां सम-वर्णाः—श्वेत-रक्ताः। पाटलिः—পারুলগাছ।

हरिद्रा-सम-वर्णास् तु जवना हेम-मालिनः
पुत्रं विराट-राजस्य सत्वरं समुदावहन् । १२

यम् आहुर् अध्यर्ध-गुणं कृष्णात् पार्थाच् च संयुगे,
अभिमन्युं पिशङ्गास् तं कुमारम् अवहन् रणे । १३

वर्णैर् उच्चावचैर् अन्यैः सदश्वानां, प्रभद्रकाः
संन्यवर्तन्त युद्धाय बहवो देव-रूपिणः । १४

अत्यरोचत तान् सर्वान् धृष्टद्युम्नः समागतान् ।
सर्वाण्यति च सैन्यानि भारद्वाजो व्यरोचत । १५

अतीव शुशुभे तस्य ध्वजः कृष्णाजिनोत्तरः,
कमण्डलुर् , महा-राज, जातरूपमयः शुभः । १६

ध्वजं तु भीमसेनस्य वैदूर्य-मणि-लोचनम्
भ्राजमानं महा-सिंहं राजतं दृष्टवान् अहम् । १७

ध्वजं तु कुरु-राजस्य पाण्डवस्य महौजसः
दृष्टवान् अस्मि सौवर्णं सोमं ग्रह-गणान्वितम् । १८

शरभं पृष्ठ-सौवर्णं नकुलस्य महा-ध्वजम्
अपश्याम रथे ऽत्युग्रं भीषयाणम् , अवस्थितम् । १९

---

१३ । अध्यर्ध-गुणम्—अर्धाधिक-गुण-सम्पन्नम् । पिशङ्गाः—कपिलाः । १४ । प्रभद्रकाः—[योध-] श्रेष्ठाः । १५ । अत्यरोचत—अतीत्य अदीप्यत । अति—अतिक्रम्य । पा. १।४।९५ । १६ । कृष्णाजिनोत्तरः—कृष्णाजिनम् (कृष्ण-मृग-चर्म) उत्तरम् (उपरि-स्थम्) यस्य तादृशः । कमण्डलुः—यत्र इतिशेषः । १९ । भीषयाणम् [भी-इ+आन, २।१]—

हंसस् तु राजतः श्रीमान् ध्वजे घण्टा-पताकवान्
सहदेवस्य, दुर्धर्षो, द्विषतां शोक-वर्धनः । २०

अभिमन्योः कुमारस्य शार्ङ्ग-पक्षी हिरण्मयः
रथे ध्वज-वरो, राजंस्, तप्त-चामीकरोज्ज्वलः । २१

घटोत्कचस्य, राजेन्द्र, ध्वजे गृध्रो व्यरोचत ।
अश्वाश् च कामगास् तस्य रावणस्य पुरा यथा । २२

तथा तेषु निवृत्तेषु प्रत्युद्-यातेषु भागशः,
स्वयम् अभ्यद्रवद् भीमं नागानीकेन ते सुतः । २३

स युद्ध-कुशलः पार्थो बाहु-वीर्येण चान्वितः
अभिनत् कुञ्जरानीकं अचिरेणैव, मारिष । २४

दुर्योधनं पीड्यमानं दृष्ट्वा भीमेन, मारिष,
चुक्षोभयिषुर् अभ्यागाद् अङ्गो, मातङ्गम् आस्थितः । २५

तम् आपतन्तं नागेन्द्रम् अम्बुद-प्रतिम-स्वनम्
कुम्भान्तरे भीमसेनो नाराचैर् आर्दयद् भृशम् । २६

भीषयमाणम्, स्वयम् एव भयङ्करम् । आप्र. । २१ । शार्ङ्गः—शृङ्ग-निर्मितः । तप्त-चामीकरम्—तरल-स्वर्णम् । २५ । चुक्षोभयिषुः [क्षुभ्-इ-स+उ, ११]—[पाण्डवानीकं] क्षोभयितुं (विचालयितुम्) इच्छुकः । अङ्गः—अङ्ग-प्रदेशाधिपतिः । अङ्गाः—प्रायेण इदानीन्तनं भागलपुर-प्रदेशं व्याप्य स्थितो भू-भागः । आसीत् चम्पा नाम नगरी (सम्भवत इदानीन्तनं भागल-पुरं नाम नगरं) तस्य राजधानी । कर्णः अभिषेकेण केवलम् अङ्ग-राज इति नाम प्राप, न तु राज-कर्म । २६ । आर्दयत्—अपीड़यत् ।

तस्य कायं विनिर्भिद्य न्यमज्जन् धरणी-तले।
ततः पपात द्वि-रदो वज्राहत इवाचलः। २७
तस्यावर्जित-नागस्य म्लेच्छस्याधः पतिष्यतः
शिरश् चिच्छेद भल्लेन क्षिप्रकारी वृकोदरः। १८
तस्मिन् निपतिते वीरे संप्राद्रवत सा चमूः
सम्भ्रान्ताश्व-द्विप-रथा पदातीन् अवमृद्नती। २९

तेष्वनीकेषु भग्नेषु विद्रवत्सु समन्ततः
प्राग्-ज्योतिषस् ततो भीमं कुञ्जरेण समाद्रवत्। ३०
स नाग-प्रवरो भीमं सहसा समुपाद्रवत्,
वृकोदर-रथं साश्वम् अ-विशेषम् अचूर्णयत्। ३१
पद्भ्यां भीमो ऽप्यथो धावंस् तस्य गात्रेष्वलीयत,
जानन् अञ्जलिका-वेधं नापाक्रामत पाण्डवः। ३२
कुलाल-चक्रवद् नागस् तदा तूर्णम् अथाभ्रमत्।
भीमो ऽपि नाग-गात्रेभ्यो विनिःसृत्यापयाज् जवात्। ३३

रजो दृष्ट्वा समुद्भूतं श्रुत्वा च गज-निस्वनम्
भगदत्ते विकुर्वाणे, कौन्तेयः कृष्णम् अब्रवीत्,— ३४

२७। न्यमज्जन्—'नाराचाः' इति शेषः। २८। आवर्जित-नागस्य—आनमित-गजस्य। ३२। अञ्जलिका-वेधः—बाल-मूषिकानुप्रवेशः। अपाक्रामत—अपाक्रामत्, अपासरत्। आआ। ३३। कुलालः—कुम्भकारः। अपयात्—अपायात्, अपागच्छत्। अडभाव आर्षः। ३४। वि-कुर्वाणे—विशेषं (नाना-विधाः क्रियाः) कुर्वति।

"यथा प्राग्-ज्योतिषो राजा गजेन, मधुसूदन,
त्वरमाणो ऽभिनिष्क्रान्तो, ध्रुवं तस्यैष निस्वनः । ३५

इन्द्राद् अनवरः सङ्ख्ये गज-यान-विशारदः,
प्रथमो गज-योधानां पृथिव्याम्, इति मे मतिः । ३६

स चापि द्विरद-श्रेष्ठः सदा-प्रति-गजो युधि ।
स पाण्डव-बलं सर्वम् अद्यैको नाशयिष्यति । ३७

युगपच् चैव संग्रामे शतशो ऽथ सहस्रशः
पतिता एव मे दृष्टाः संशप्तक-महा-रथाः ।" ३८

संशप्तकांस् ततो हत्वा भूयिष्ठा ये व्यवस्थिताः,
भगदत्ताय याहीति कृष्णं पार्थो ऽभ्यचोदयत् । ३९

ततो धनञ्जयो बाणैः सर्वान् एव महा-रथान्,
आयाद्, विनिघ्नन् कौरव्यान्, दहन् कक्षम् इवानलः । ४०

तथा विक्षोभ्यमाणा सा पार्थेन तव वाहिनी
व्यशीर्यत, महा-राज, नौर् इवासाद्य पर्वतम् । ४१

तस्मिन् प्रमथिते सैन्ये भगदत्तो नराधिपः
तेन नागेन सहसा धनञ्जयम् उपाद्रवत् । ४२

तं रथेन नर-व्याघ्रः प्रत्यगृह्णाद् धनञ्जयः ।
स सन्निपातस् तुमुलो बभूव रथ-नागयोः । ४३

३७। अ-प्रति-गजः—प्रति-योगि-रहितो गजः। ३९। भूयिष्ठाः—प्रचुराः।

ततः पार्थो महा-बाहुर् अ-संभ्रान्तो महा-मनाः
कुम्भयोर् अन्तरे नागं नाराचेन समार्पयत् । ४४

स तु विष्टभ्य गात्राणि दन्ताभ्याम् अवनिं ययौ,
नदन्न् आर्त-स्वनं प्राणान् उत्ससर्ज महा-द्विपः । ४५

ततश् चन्द्रार्ध-बिम्बेन बाणेनानत-पर्वणा
बिभेद हृदयं राज्ञो भगदत्तस्य पाण्डवः । ४६

स भिन्न-हृदयो राजा भगदत्तः किरीटिना
शरासनं शरांश् चैव, गतासुः, प्रमुमोच ह । ४७

प्रियम् इन्द्रस्य सततं सखायम् अ-मितौजसम्,
हत्वा, प्राग्-ज्योतिषं पार्थः प्रदक्षिणम् अवर्तत । ४८

एवम् एष महा-रौद्रः, क्षयार्थं सर्व-धन्विनाम्,
तावकानां परेषां च, त्यक्त्वा प्राणान्, अभूद् रणः । ४९

ततो बले भृश-लुलिते, परस्परं
निरीक्षमाणे, रुधिरौघ-संप्लुते,
दिवा-करे ऽस्तं गिरिम् आस्थिते, शनैर्
उभे प्रयाते शिविराय, भारत । ५०

४४ । समार्पयत् [सम्-आ-इ+द्]—आजघान । ४५ । विष्टभ्य—स्थिरीकृत्य । ५० । लुलिते – ग्लाने ।

चतुर्थो ऽध्यायः

त्रयो-दशो दिवसः—व्यूह-भेदः

ततः प्रभात-समये द्रोणं दुर्योधनो ऽब्रवीत्,—
"आशा-भङ्गं न कुर्वन्ति भक्तस्यार्याः कथञ्चन।" १

ततो ऽ-प्रीतस् तथोक्तः सन् भारद्वाजो ऽब्रवीद् नृपम्,—
"अद्यैषां प्रवरं कञ्चित् पातयिष्ये महा-रथम्।" २

चक्र-व्यूहो, महाराज, आचार्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्वे राजानो विनिवेशिताः। ३

दुर्योधनस् तु, राजेन्द्र, सैन्य-मध्ये व्यवस्थितः,
कर्ण-दुःशासन-कृपैर् वृतो राजा महा-रथैः। ४

तद् अनीकम् अनाधृष्यं, भारद्वाजेन रक्षितम्,
पार्थाः समभ्यवर्तन्त, भीमसेन-पुरो-गमाः। ५

समीपे वर्तमानांस् तान् भारद्वाजो ऽपि वीर्यवान्,
असम्भ्रान्तः, शरौघेण महता समवारयत्। ६

पीड्यमानाः शरै, राजन्, द्रोण-चाप-विनिःसृतैः,
न शेकुः प्रमुखे स्थातुं भारद्वाजस्य पाण्डवाः। ७

तम् आयान्तम् अति-क्रुद्धं द्रोणं दृष्ट्वा, युधिष्ठिरः
बहुधा चिन्तयामास द्रोणस्य प्रतिवारणम्। ८

३। चक्र-व्यूहः—'पद्म-व्यूहः' इति अवाचां पाठः। ७। प्रमुखे—सम्मुखे।

अ-शक्यं तु तम् अन्येन द्रोणं मत्वा, युधिष्ठिरः
अ-विषह्यं गुरुं भारं सौभद्रे समवासृजत्। ९

अब्रवीत् पर-वीर-घ्नम् अभिमन्युम् इदं वचः,—
"एत्य नो नार्जुनो गर्हेद् यथा, तात, तथा कुरु। १०

चक्र-व्यूहस्य न वयं विद्मो भेदं कथञ्चन।
त्वं वार्जुनो वा कृष्णो वा भिन्द्यात् प्रद्युम्न एव वा
चक्र-व्यूहं, महा-बाहो, पञ्चमो नोपपद्यते। ११

अभिमन्युर् उवाच,—

द्रोणस्य दृढम् अत्युग्रम् अनीक-प्रवरं युधि,
पितॄणां जयम् आकाङ्क्षन्न्, अवगाहे ऽविलम्बितम्। १२

उपदिष्टो हि मे पित्रा योगो ऽनीक-विशातने।
नोत्सहे तु विनिर्गन्तुम् अहं कस्याञ्चिद् आपदि। १३

युधिष्ठिर उवाच,—

भिन्ध्यनीकं, युधां श्रेष्ठ, द्वारं संजनयस्व नः।
वयं त्वानुगमिष्यामो येन त्वं, तात, यास्यसि। १४

सञ्जय उवाच,—

संग्रामस् तुमुलो, राजन्, प्रावर्तत सु-दारुणः।
द्रोणस्य मिषतो व्यूहं भित्त्वा प्राविशद् आर्जुनिः। १५

९। समवासृजत्—न्यक्षिपत्। १०। एत्य [आ-इ+य]—आगम्य, [संशप्तकैः सह] युद्धात् प्रत्यावृत्य। ११। भिन्द्यात्—भेत्तुं शक्नोति। प्रद्युम्नः—कृष्ण-रुक्मिण्योः पुत्रः अनिरुद्धस्य पिता च। स किल शम्बरासुरं जघान। उपपद्यते—उपलभ्यते, ज्ञायते। १३। योगः—उपायः। विशातने—विनाशने। नोत्सहे—न शक्नोमि। १५। द्रोणस्य मिषतः—पश्यन्तं

तं प्रविष्टं, विनिघ्नन्तं शत्रु-सङ्घान्, महा-बलम्,
हस्त्यश्व-रथ-पत्त्योघाः परिवव्रुर् उदायुधाः । १६

तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा,
दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रम् अभ्ययात् । १७

ततः कृतज्ञा बलिनः सुहृदो जित-काशिनः,
त्रास्यमाना, भयाद् वीरं परिवव्रुस् तवात्मजम्; १८

सौभद्रं शर-वर्षेण महता समवाकिरन्;
सम्मोहयित्वा तम् अथो दुर्योधनम् अमोचयन् । १९

तान् शरौघेण महता साश्व-सूतान् महा-रथान्
विमुखीकृत्य, सौभद्रः सिंह-नादम् अथानदत् । २०

ततः कर्णः कृपो द्रोणो द्रौणिर् गान्धार-राट् शलः
दुर्योधनश् च संक्रुद्धः शर-वर्षैर् अवाकिरन् । २१

सो ऽतिविद्धो महेष्वासैर् अभिमन्युर् अजिह्मगैः
शरम् आदत्त कर्णाय वर्म-कायावभेदिनम् । २२

तस्य भित्त्वा तनु-त्राणं देहं निर्भिद्य चाशुगः
प्राविशद् धरणीं, राजन्, वल्मीकम् इव पन्नगः । २३

स तेनाति-प्रहारेण, व्यथितो, विह्वलन्न् इव,
सञ्चचाल रणे कर्णः, क्षिति-कम्पे यथाचलः । २४

द्रोणम् अनादृत्य । १६ । उदायुधाः—उच्छ्रित-शस्त्राः । २२ । अजिह्मगैः—सरल-[पथ-] गामिभिः, बाणैः । २३ । आशु-गः—शीघ्र-गामी, बाणः । २४ । वि-ह्वलन्—[भयेन] नितरां कम्पमानः ।

स शरार्चित-सर्वाङ्गः क्रुद्धः शक्रात्मजात्मजः
शल्यं च शर-वर्षेण समीप-स्थम् अवाकिरत् ।
शल्यो, राजन्, रथोपस्थे निषसाद मुमोह च । २५

दुःशासनस् तु, संक्रुद्धः प्रभिन्न इव कुञ्जरः,
अयोधयत सौभद्रम्, अभिमन्युश् च तं रणे । २६

शर-विक्षत-गात्रस् तु, प्रत्यमित्रम् अवस्थितम्,
अभिमन्युः स्मयन् धीमान् दुःशासनम् अथाब्रवीत्,— २७

"अ-मर्षितायाः कृष्णायाः काङ्क्षितस्य च मे पितुः
अद्य, कौरव्य, भीमस्य भवितास्यनृणो युधि ।" २८

एवम् उक्त्वा, महा-बाहुर् बाणं दुःशासनान्तकम्
सन्दधे, पर-वीर-घ्नः, कालाग्न्यनिल-वर्चसम् । २९

तस्योरस् तूर्णम् आसाद्य, जत्रु-देशे विभिद्य तम्,
जगाम सह पुङ्खेन, वल्मीकम् इव पन्नगः । ३०

स, गाढ़-विद्धो व्यथितो, रथोपस्थ उपाविशत्
दुःशासनो, महा-राज, कश्मलं चाविशद् महत् । ३१

सारथिस् त्वरमाणस् तु दुःशासनम् अचेतसम्
रण-मध्याद् अपोवाह, सौभद्र-शर-पीड़ितम् । ३२

ततः कर्णो जय-प्रेप्सुर्, मानी सर्व-धनुष्मताम्,
सौभद्रं शतशो ऽविध्यद्, उत्तमास्त्राणि दर्शयन् । ३३

---

३० । जत्रु-देशे—स्कन्ध-वक्षसोः सन्धौ । ३३ । मानी—सम्मानार्हः ।

विमुखी-कृत्य कर्णं तु, सौभद्रः कङ्क-पत्रिभिः
अन्यान् अपि महेष्वासांस् तूर्णम् एवाभिदुद्रुवे । ३४

ततस् तद् विततं सैन्यं हस्त्यश्व-रथ-पत्तिमत्
क्रुद्धो ऽभिमन्युर् अभिनत्, तिग्म-तेजा महा-यशाः । ३५

कर्णस् तु, बहुभिर् बाणैर् अर्द्यमानो ऽभिमन्युना,
अपायाज् जवनैर् अश्वैस् । ततो ऽनीकम् अभज्यत । ३६

तावकानां तु योधानां वध्यतां निशितैः शरैः,
अन्यत्र सैन्धवाद्, राजन्, न स्म कश्चिद् अतिष्ठत । ३७

पञ्चमो ऽध्यायः

द्वार-रोधः

युधिष्ठिरो भीमसेनः शिखण्डी सात्यकिर् यमौ
धृष्टद्युम्नो विराटश् च द्रुपदश् च स-केकयः १

धृष्ट-केतुश् च संरब्धो मत्स्याश् चाभ्यपतन् रणे,
तेनैव तु पथा यान्तः, पितरो मातुलैः सह ।
तान् दृष्ट्वा द्रवतः शूरांस् त्वदीया विमुखाभवन् । २

ततस् तद् विमुखं दृष्ट्वा तव सूनोर् महद् बलम्,
जामाता तव, तेजस्वी, विष्टम्भयिपुर् आद्रवत् । ३

३४ । कङ्क-पत्री—कङ्क-पक्षिणः पत्रेण युक्तो बाणः । ३६ । अर्द्यमानः—पीड्यमानः । ३७ । वध्यताम्—वध्यमानानाम् । पआ. । अतिष्ठत—अतिष्ठत्, दण्डायमान आस्त । आआ. ।

२ । अभ्यपतन्—[कुरु-सेनाम्] अभ्यधावन् । ३ । विष्टम्भयिषुः

स पुत्र-गृद्धिनः पार्थान् सह-सैन्यान् अवारयत्,
उग्र-धन्वा महेष्वासो, दिव्यम् अस्त्रम् उदीरयन्। ४

सैन्धवेन निरुद्धेषु जय-गृद्धिषु पाण्डुषु,
सु-घोरम् अभवद् युद्धं त्वदीयानां परैः सह। ५

प्रविश्याथार्जुनिः सेनां, सत्य-सन्धो, दुरासदः,
व्यक्षोभयत, तेजस्वी, मकरः सागरं यथा। ६

पौत्रं तु तव दुर्धर्षं लक्ष्मणं प्रिय-दर्शनम्
आससाद रणे कार्ष्णिर्, मत्तो मत्तम् इव द्विपम्। ७

लक्ष्मणेन च संगम्य, सौभद्रः पर-वीर-हा,
शरैः सु-निशितैस् तीक्ष्णैर् बाह्वोर् उरसि चार्पितः, ८

सं-क्रुद्धो वै महा-बाहुर् दण्डाहत इवोरगः,
पौत्रस् तव, महा-राज, तव पौत्रम् अभाषत,— ९

"सु-दृष्टः क्रियतां लोको! ह्यमुं लोकं गमिष्यसि।
पश्यतां बान्धवानां त्वां नयामि यम-सादनम्।" १०

एवम् उक्त्वा ततो भल्लं सौभद्रः पर-वीर-हा
उद्ववर्ह, महा-बाहुर्, निर्मुक्तोरग-सन्निभम्। ११

[वि-स्तन्भ्-इ-स+उ, १।१]—[दुर्योधन-बलम्] अवस्थापयितुम् इच्छुकः। ४। उदीरयन् [उत्-ईर्+अत्, १।१]—उत्-क्षिपन्। ७। कार्ष्णिः [कृष्ण (अर्जुन)+इ, १।१]—अभिमन्युः। ८। अर्पितः—आहतः। १०। लोकः—[अयं (दृश्यमानः)] लोकः। अमुं लोकम्—पर-लोकम्। ११। उद्-ववर्ह—

स, तस्य भुज-निर्मुक्तो, लक्ष्मणस्य सु-दर्शनम्
सु-नसं सुभ्रु केशान्तं शिरो ऽहार्षीत् स-कुण्डलम् । १२

ततो दुर्योधनः, क्रुद्धः , प्रिये पुत्रे निपातिते,
'हतैनम्' इति चुक्रोश क्षत्रियान् , क्षत्रियर्षभः । १३

ततो द्रोणः कृपः कर्णो द्रोण-पुत्रो बृहद्-बलः
कृत-वर्मा च हार्दिक्यः षड् रथाः पर्यवारयन् । १४

स तान् विद्ध्वा शितैर् बाणैर् विमुखीकृत्य चार्जुनिः
वेगेना ऽभ्यपतत् क्रुद्धः सैन्धवस्य महद् बलम् । १५

आवव्रुस् तस्य पन्थानं गजानीकेन, दंशिताः
कलिङ्गाश् च निषादाश् च क्राथ-पुत्रश् च वीर्यवान् । १६

ततस् तु कुञ्जरानीकं व्यधमद् धृष्टम् आर्जुनिः ।
ततः क्राथः शर-व्रातैर् आर्जुनिं समवाकिरत् । १७

अथेतरे सन्निवृत्ताः पुनर् द्रोण-मुखा रथाः ,
परमास्त्राणि तन्वानाः, सौभद्रम् अभिदुद्रुवुः । १८

दृष्ट्वा तु सैन्धवे भारम् अति-मात्रं समाहितम् ,
सैन्यं तव, महा-बाहो, युधिष्ठिरम् उपाद्रवत् । १९

उद्ववर्ह, उच्चिक्षेप । पआ । १२ । केशान्तम्—[घन-कुञ्चित-कृष्ण-] केशैर् अन्तम् (अति-मनोहरम्) । वि. (शकद्रुं) । १३ । हत [हन्+त]—विनाशयत । १४ । बृहद्-बलः—कोसलाधिपतिः, कौसल्यः । १६ । क्राथः—धृतराष्ट्र-पुत्रः । १७ । धृष्टम्—उद्धतम् । १८ । तन्वानाः—विस्तारयन्तः ।

सौभद्रम् इतरे, वीरम् , अभ्यवर्षन् शराम्बुभिः ,
तालमात्राणि चापानि विकर्षन्तो महा-बलाः । २०

षष्ठो ऽध्यायः

अभिमन्यु-पातः

ततो द्रोणो महेष्वासः सर्वांस् तान् प्रत्यभाषत,—
" आरुजन्न् अपि मे प्राणान् मोहयन्न् अपि सायकैः , १
प्रहर्षयति मां भूयः सौभद्रः पर-वीर-हा
अन्तरं यस्य संरब्धा न पश्यन्ति, महा-रथाः ।
अ-भेद्यम् अस्य कवचं युवा चाशु-पराक्रमः । २
उपदिष्टा मयाचास्य पितुः कवच-धारणा ।
ताम् एष निखिलां वेत्ति ध्रुवं पर-पुरञ्जयः । ३
शक्यं त्वस्य धनुश् छेत्तुं ज्यां च बाणैः समाहितैः
अभीषूंश् च हयांश् चैव तथोभौ पार्ष्णि-सारथी । ४
स-धनुष्को न शक्यो ऽयम् अपि जेतुं सुरासुरैः ।
वि-रथं वि-धनुष्कं च कुरुष्वैनं यदीच्छसि । ५
तद् आचार्य-वचः श्रुत्वा, कर्णो वैकर्तनस् त्वरन्
अस्यतो लघु-हस्तस्य पृष्ठतो धनुर् आच्छिनत् । ६
अश्वान् अस्यावधीद् भोजो, गौतमः पार्ष्णि-सारथी,
शेषास् तु च्छिन्न-धन्वानं शर-वर्षैर् अवाकिरन् । ७

---

१ । आरुजन्—परिपीडयन् । ४ । अभीषून्—प्रग्रहान् , लागाम, reins.

त्वरमाणास् त्वरा-काले वि-रथं षड् महा-रथाः
शर-वर्षैर्, अ-करुणा, बालम् एकम् अवाकिरन्। ८

स च्छिन्न-धन्वा वि-रथः, स्व-धर्मम् अनु-पालयन्,
खड्ग-चर्म-धरः श्रीमान् उत्पपात विहायसा। ९

मार्गैः स कौशिकाद्यैश् च लाघवेन बलेन च
आर्जुनिर् व्यचरद् व्योम्नि भृशं वै, पक्षि-राड् इव। १०

'मय्येव निपतत्येष सासिर्' इत्यूर्ध्व-दृष्टयः
विव्यधुस् तं महेष्वासाः समरे, छिद्र-दर्शिनः। ११

तस्य द्रोणो ऽच्छिनद् मुष्टौ खड्गं मणिमय-त्सरुम्।
राधेयो निशितैर् बाणैर् व्यधमच् चर्म चोत्तमम्। १२

व्यसि-चर्मेषु-पूर्णाङ्गः सो ऽन्तरिक्षात् पुनः क्षितिम्
आस्थितश्, चक्रम् उद्यम्य, द्रोणं क्रुद्धो ऽभ्यधावत। १३

वपुः समीक्ष्य पृथ्वीशा, दुः-समीक्ष्यं सुरैर् अपि,
तच् चक्रं भृशम् उद्विग्नाः संचिच्छिदुर् अनेकधा। १४

महा-रथस् ततः कार्ष्णिः संजग्राह महा-गदाम्,
दौःशासनि-रथं साश्वं गदया समपोथयत्। १५

१०। कौशिकाद्यैः—परस्तात् ७।१८।३७-३८ टी.। पक्षि-राट् [पक्षिन्-राज्+० ३।१]—गरुडः। १३। व्यसि-चर्मेषु-पूर्णाङ्गः—विगत-खड्ग-चर्मा बाण-भृत-देहश् च। ५। दौःशासनिः [दुःशासन+इ, ३।१]—दुःशासनस्य पुत्रः। समपोथयत् [सम्-पुथ् (चुप. हिंसायाम्)+द्]—विनाशयामास।

ततो दौःशासनिः क्रुद्धो, गदाम् उद्यम्य , मारिष,
अभिदुद्राव सौभद्रं तिष्ठ तिष्ठेति चाब्रवीत् । १६

ताव् , अन्योन्यं गदाग्राभ्याम् आहत्य, पतितौ क्षितौ,
इन्द्र-ध्वजाव् इवोत्सृष्टौ, रण-मध्ये परन्तपौ । १७

दौःशासनिर् अथोत्थाय, कुरूणां कीर्ति-वर्धनः ,
उत्तिष्ठमानं सौभद्रं गदया मूर्ध्न्यताड़यत् । १८

गदा-वेगेन महता व्यायामेन च मोहितः ,
वि-चेता न्यपतद् भूमौ सौभद्रः पर-वीर-हा । १९

एवं विनिहतो, राजन्न् , एको बहुभिर् आहवे,
क्षोभयित्वा चमूं सर्वां, नलिनीम् इव कुञ्जरः । २०

तं तथा पतितं शूरं तावकाः पर्यवारयन् ,
दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये, २१

विमृद्य तरु-शृङ्गाणि सन्निवृत्तम् इवानिलम् ,
अस्तं गतम् इवादित्यं तप्त्वा भारत-वाहिनीम्— २२

उपप्लुतं यथा सोमं, संशुष्कम् इव सागरम् ,
पूर्ण-चन्द्राभ-वदनं काक-पक्षावृताक्षिकम् । २३

१७। उत्सृष्टौ—कृतोत्सर्गौ, त्यक्तौ । १८। उत्तिष्टमानम्—[भूमेर्] उत्तिष्ठन्तम् । आआ । १९। व्यायामेन—परि-श्रमेण। वि-चेताः—संज्ञा-हीनः । २०। क्षोभयित्वा—वि-लोड्य । २१। शिशिरात्यये—शीतावसाने, वसन्तागमे । २३। उपप्लुतम्—छायाच्छन्नम् । काक-पक्षावृताक्षिकम्—बाल-शिखा-समावृत-चक्षुषम् ।

तं भूमौ पतितं दृष्ट्वा, तावकास् ते महा-रथाः,
मुदा परमया युक्ताश् , चुक्रुशुः सिंहवद् मुहुः । २४

आसीत् परमको हर्षस् तावकानां, विशाम् पते ।
इतरेषां तु वीराणां नेत्रेभ्यः प्रापतज् जलम् । २५

अभिमन्यौ हते वीरे शिशुके ऽ-प्राप्त-यौवने
संप्राद्रवच् चमूः सर्वा धर्म-राजस्य पश्यतः । २६

ततो निशाया दिवसस्य चाशिवः
शिवा-रुतैः सन्धिर् अवर्ततान्द्भुतः,
कुशेशयापीड़-निभे दिवा-करे
विलम्बमाने ऽस्तम् उपेत्य पर्वतम् । २७

वरासि-शक्त्यृष्टि-वरूथ-चर्मणां
विभूषणानां च समाक्षिपन् प्रभाः,
दिवं च भूमिं च समानयन्न् इव,
प्रियां तनुं भानुर् उपैति पावकम् । २८

महार्ह-शय्यास्तरणोचितास् तदा
क्षितात्र् अनाथा इव शेरते हताः ।
अतीव हृष्टाः श्व-शृगाल-वायसा
वकाः सु-पर्णाः स-वृकास् तरक्षवः । २६

'बालानां तु शिखा प्रोक्ता काक-पक्षः शिखण्डकः ।' हला. (मल्लि) । २७ । शिवा-रुतैः—शृगाल-नादैः । कुशेशयापीड़-निभे—शिरो-भूषण-भूत-पद्म-सदृशे । २८ । वरूथम्—तनु-त्राणम् । समाक्षिपन्—संहरन् । समानयन्—एकीकुर्वन् । २६ । सुपर्णाः—स्वर्णचूड़-पक्षिणः ।

वयांस्यसृक्-पाण्यथ रक्षसां गणाः
पिशाच-सङ्घाश् च सु-दारुणा रणे
त्वचो विनिर्भिद्यापिबन् वसाम् असृक्,
तथैव मज्जाः पिशितानि चाश्नुवन्। ३०

सप्तमो ऽध्यायः

पितुः शपथः

हत्वा संशप्तक-व्रातान् दिव्यैर् अस्त्रैः, कपि-ध्वजः
प्रायात् स्व-शिबिरं, जिष्णुर्, जैत्रम् आस्थाय तं रथम्। १

गच्छन्न् एव च गोविन्दं साश्रु-कण्ठो ऽभ्यभाषत,—
"किं नु मे हृदयं त्रस्तं वाक् च मज्जति, केशव? २

नन्दन्ति नाद्य तूर्याणि माङ्गल्यानि, जनार्दन,
मिश्रा दुन्दुभि-निर्घोषैः शङ्खाश् चाड़म्बरैः सह। ३

वीणा नैवाद्य वाद्यन्ते शम्या-ताल-स्वनैः सह।
मङ्गल्यानि च गीतानि न गायन्ति पठन्ति च ४

स्तुति-युक्तानि रम्याणि सर्वानीकेषु वन्दिनः।
योधाश् चापि च मां दृष्ट्वा निवर्तन्ते ह्यधो-मुखाः। ५

३०। वयांसि—पक्षिणः। असृक्-पाणि [असृज्-पा+अ, १ब]—शोणित-पायीनि। 'एकाजुत्तर-पदे णः' इति णः। पा. ८।४।१२। आश्नुवन् [अश्+अन्]—अभक्षयन्। स्वादित्वम् आर्षम्।

३। आड़म्बरैः—तूर्य-ध्वनिभिः। ४। शम्या—करताल-विशेषः। तालः—कालेन नृत्य-गीत-वाद्य-क्रियाणां मानम्।

न च माम् अद्य सौभद्रः, प्रहृष्टो, भ्रातृभिः सह,
रणाद् आयान्तम् उचितं प्रत्युद्-याति, हसन्न् इव।" ६

दृष्ट्वा भ्रातृंश् च पुत्रांश् च, वि-मना, वानर-ध्वजः,
अ-पश्यंश् चैव सौभद्रम्, इदं वचनम् अब्रवीत्,— ७

"मुख-वर्णो ऽ-प्रसन्नो वः सर्वेषाम् एव लक्ष्यते।
अभिमन्युं न पश्यामि, न च मां प्रति-नन्दथ। ८

मया श्रुतश् च द्रोणेन चक्र-व्यूहो विनिर्मितः।
न च वस् तस्य भेत्तास्ति ऋते सौभद्रम् अर्भकम्। ९

न चोपदिष्टस् तस्यासीद् मयानीकाद् विनिर्गमः।
कच्चिद् न बालो युष्माभिः परानीकं प्रवेशितः! १०

भित्त्वानीकं महेष्वासः परेषां, बहुभिर् युधि
कच्चिद् न निहतः शेते सौभद्रः पर-वीर-हा! ११

सुभद्रायाः प्रियं पुत्रं, द्रौपद्याः केशवस्य च
अम्बायाश् च प्रियं नित्यं, को ऽवधीत्, काल-चोदितः? १२

यदि पुत्रं न पश्यामि, यास्यामि यम-सादनम्—
मृदु-कुञ्चित-केशान्तं, बालं, बाल-मृगेक्षणम्, १३

मत्त-द्विरद-विक्रान्तं, शाल-पोतम् इवोद्गतम्,
स्मिताभिभाषिणं, शान्तं, गुरु-वाक्य-करं सदा, १४

युद्धाभिनन्दिनं नित्यं, द्विषतां शोक-वर्धनम्
यदि पुत्रं न पश्यामि, यास्यामि यम-सादनम्। १५

६। उचितम् [वच्+इत, २।१]—विदितम्। ९। अर्भकम्—शिशुम्।

अहो वः पौरुषं नास्ति, न च वो ऽस्ति पराक्रमः
यत्राभिमन्युः समरे पश्यतां वो निपातितः ! १६
आत्मानम् एव गर्हेयं यद् अहं वै सु-दुर्बलान्
युष्मान् आज्ञाय निर्यातो, भीरून् , अ-कृत-निश्चयान् ! १७
आहो स्विद् भूषणार्थानि वर्म-शस्त्रायुधानि वः
वाचश् च वक्तुं संसत्सु, मम पुत्रम् अ-रक्षताम् ! ” १८
एवम् उक्त्वा ततो वाक्यं तिष्ठंश् चाप-वरासिमान्
न स्माशक्यत बीभत्सुः केनचित् प्रसमीक्षितुम् । १९
ततस् तं पुत्र-शोकेन भृशं पीड़ित-मानसम्
राजीव-लोचनं क्रुद्धं राजा वचनम् अब्रवीत् ,— २०
“त्वयि याते, महा-बाहो, संशप्तक-वधं प्रति,
प्रयत्नम् अकरोत् तीव्रम् आचार्यो ग्रहणे मम । २१
स, वार्यमाणो रथिभिर् , मयि चापि सु-रक्षिते,
अस्मान् अभिजघानाशु पीड़यन् निशितैः शरैः । २२
ते, पीड्यमाना द्रोणेन, द्रोणानीकं न शक्नुमः
प्रतिवीक्षितुम् अप्याजौ, भेत्तुं तत् कुत एव तु । २३
वयं, त्व-प्रतिमं वीर्ये, सर्वे , सौभद्रम् आत्म-जम्
उक्तवन्तश् च तं, ‘तात, भिन्ध्यनीकम्’ इति, प्रभो । २४

---

१७ । आज्ञाय—बुद्ध्वा [ऽपि] । १८ । आहो स्वित्—अथ वा । २२ । आशु—द्रुतम् ।

स, तवास्त्रोपदेशेन वीर्येण च समन्वितः,
प्राविशत् तद् बलं बालः, सुपर्ण इव सागरम्। २५

ते ऽनुयाता वयं वीरं सात्वती-पुत्रम् आहवे,
प्रवेष्टु-कामास् तेनैव येन स प्राविशच् चमूम्। २६

ततः सैन्धवको राजा, क्षुद्रस्, तात, जयद्रथः
वर-दानेन रुद्रस्य सर्वान् नः समवारयत्। २७

ततो द्रोणः कृपः कर्णो द्रौणिः कौसल्य एव च
कृत-वर्मा च सौभद्रं षड् रथाः पर्यवारयन्। २८

स तु, हत्वा सहस्राणि नराश्व-रथ-दन्तिनाम्
—राज-पुत्र-सहस्रे द्वे वीरांश् चालक्षितान् बहून्— २९
बृहद्-बलं च राजानं स्वर्गेण समयोजयत्।
ततः परम-धर्मात्मा दिष्टान्तम् उपजग्मिवान्। ३०

एतावद् एव निर्वृत्तम् अस्माकं शोक-वर्धनम्।
स चैवं पुरुष-व्याघ्रः स्वर्ग-लोकम् अवाप्तवान्।" ३१

२५। सुपर्ण इव सागरम्—अमृताय प्रस्थितो गरुडः क्षुन्निवृत्तये मातुर् उपदेशेन समुद्रं प्रविश्य तत्-कुक्षिस्थान् निषादान् चखाद (मभा. १।२८)। २६। सात्वती-पुत्रः—सत्वत-वंश्याया यादव्याः सुभद्रायाः पुत्रः [अभिमन्युः]। तेनैव—'मार्गेण' इति शेष। २७। वर-दानेन रुद्रस्य—*Cf.* उपरिष्टात् ३।५३।२४ टी.। २८। कौसल्यः—कोसल-राजो [बृहद्-बलः]। ३०। दिष्टान्तम्—दिष्टस्य ([विधात्रा] निर्दिष्टस्य [आयुषः]) अन्तम्, मृत्युम्। उपजग्मिवान् [उप गम्+वस्, १।१]—उपागमत्। अतीते क्वसुः।

ततो ऽर्जुनो, वचः श्रुत्वा धर्म-राजेन भाषितम्,
'हा पुत्र !' इति निःश्वस्य व्यथितो न्यपतद् भूवि। ३२

विषण्ण-वदनाः सर्वे, परिगृह्य धनञ्जयम्,
नेत्रैर् अनिमिषैर्, दीनाः, प्रत्यवैक्षन् परस्परम्। ३३

प्रतिलभ्य ततः संज्ञां, वासविः, क्रोध-मूर्च्छितः,
कम्पमानो ज्वरेणेव, निःश्वसंश् च मुहुर् मुहुः, ३४

पाणिं पाणौ विनिष्पिष्य दन्तान् कटकटाय्य च,
उन्मत्त इव संप्रेक्षन्न्, इदं वचनम् अब्रवीत्,— ३५

"सत्यं वः प्रतिजानामि, श्वो ऽस्मि हन्ता जयद्रथम्।
न चेद् वध-भयाद् भीतो धार्तराष्ट्रान् प्रहास्यति, ३६

न चास्मान् शरणं गच्छेत् कृष्णं वा देवकी-सुतम्
भवन्तं वा, महा-राज, श्वो ऽस्मि हन्ता जयद्रथम्। ३७

यद्यस्मिन् न हते पापे सूर्यो ऽस्तम् उपयास्यति,
इहैव संप्रवेष्टास्मि ज्वलितं जात-वेदसम्।" ३८

ततो वादित्र-घोषाश् च प्रादुरासन् समन्ततः
सिंह-नादाश् च पाण्डूनां प्रतिज्ञाते महात्मना। ३९

३३। प्रत्यवैक्षन्—प्रत्यवैक्षन्त, विलोकयाञ्चक्रिरे। प आ।
३४। वासविः [वासव (इन्द्र) +इ, ११]—इन्द्रात्मजः [अर्जुनः]।
३५। संप्रेक्षन्—संप्रेक्षमाणः। पआ। ३८। संप्रवेष्टास्मि [सम्-प्र-विश्+तास्मि]—अविलम्बेनैव प्रवेक्ष्यामि। आसन्न-भविष्यति लुट्।

श्रुत्वा तु तं महा-शब्दं पाण्डूनां पुत्र-गृद्धिनाम्,
चारैः प्रवेदितस्, त्रस्तः, समुत्थाय, जयद्रथः ४०
जगाम समितिं राज्ञां। सैन्धवो, विमृशन् बहु,
अभिमन्यु-पितुर् भीतः, स-व्रीडो वाक्यम् अब्रवीत्,— ४१
"वधो नूनं प्रतिज्ञातो मम गाण्डीव-धन्वना।
तथा हि हृष्टाः क्रोशन्ति शोक-काले ऽपि पाण्डवाः। ४२
तस्माद् माम् अनुजानीत—भद्रं वो ऽस्तु—नरर्षभाः,
अ-दर्शनं गमिष्यामि, न मां द्रक्ष्यन्ति पाण्डवाः।" ४३
आत्म-कार्य-गरीयस्त्वाद् राजा दुर्योधनो ऽब्रवीत्,—
"न भेतव्यं, नर-व्याघ्र। को हि त्वां, पुरुषर्षभ,
मध्ये क्षत्रिय-वीराणां तिष्ठन्तं प्रार्थयेद् युधि?" ४४
एवम् आश्वासितो, राजन्, पुत्रेण तव, सैन्धवः,
दुर्योधनेन सहितो, द्रोणं रात्राव् उपागमत्। ४५
"व्यूहिष्यामि च तं व्यूहं यं पार्थो न तरिष्यति।
तस्माद् युध्यस्व। मा भैस् त्वं! स्व-धर्मम् अनुपालय।" ४६
एवम् आश्वासितो, राजन्, भारद्वाजेन, सैन्धवः
अपानुदद् भयं पार्थाद्, युद्धाय च मनो दधे। ४७
ततः प्रहर्षः सैन्यानां तवाप्यासीद्, विशाम् पते,
वादित्राणां ध्वनिश् चोग्रः सिंह-नाद-रवैः सह। ४८

४०। प्रवेदितः [प्र-विद्-इ+त, १।१]—स-विशेषं विज्ञापितः।
४७। अपानुदत्—अपासारयत्, दूरीचकार।

अष्टमो ऽध्यायः

सुभद्रा-विलापः

अथ कृष्णं महा-बाहुर् अब्रवीत् पाकशासनिः,—
"आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह ।" १

ततो ऽर्जुन-गृहं गत्वा, वासुदेवः सु-दुर्मनाः
भगिनीं पुत्र-शोकार्ताम् आश्वासयत दुःखिताम् ,— २

"मा शोकं कुरु, वार्ष्णेयि, कुमारं प्रति, स-स्नुषा ।
सर्वेषां प्राणिनां, भीरु, निष्ठैषा काल-निर्मिता । ३

कुले जातस्य वीरस्य, क्षत्रियस्य विशेषतः,
सदृशं मरणं ह्येतत् तव पुत्रस्य । मा शुचः ! ४

दिष्ट्या महा-रथो धीरः पितुस् तुल्य-पराक्रमः
क्षात्रेण विधिना प्राप्तो वीराभिलषितां गतिम् । ५

जित्वा सु-बहुशः शत्रून् प्रेषयित्वा च मृत्यवे,
गतः पुण्य-कृतां लोकान् सर्व-काम-दुहो ऽ-क्षयान् । ६

वीर-सूर् वीर-पत्नी त्वं वीर-जा वीर-बान्धवा ।
मा शुचस् तनयं, भद्रे ! गतः स परमां गतिम् । ७

प्राप्स्यते चाप्यसौ पापः सैन्धवो बाल-घातकः
अधर्मस्यास्य तु फलं, स-सुहृद्-गण-बान्धवः । ८

---

३ । निष्ठा—अन्तः , समाप्तिः । ६ । सर्व-काम-दुहः [-दुह्+०,२।ब.] —सर्वाभीष्ट-भोग-प्रदान् । *Cf.* गी. १०।२८ । ८ । प्राप्स्यते—प्राप्स्यति । आआ. ।

श्वः शिरः पाद-मूलं ते सैन्धवस्याहृतं ध्रुवम्
पद्भ्यां प्रमथितासि त्वं ! विशोका भव, मा रुदः !" ९

एतच् छ्रुत्वा वचस् तस्य केशवस्य महात्मनः,
सुभद्रा शोक-दुःखार्ता विललाप, सु-दुःखिता,— १०

"हा पुत्र मम मन्दायाः, कथं संयुगम् एत्य हि,
निधनं प्राप्तवांस्, तात, पितुस् तुल्य-पराक्रमः ? ११

कथम् इन्दीवर-श्यामं सु-दंष्ट्रं चारु-लोचनम्
मुखं ते दृश्यते, वत्स, गुण्ठितं रण-रेणुना ? १२

शयनीयं पुराध्युष्य स्पर्ध्यास्तरण-संवृतम्,
भूमाव् अद्य कथं शेषे विप्रविद्धः, सुखोचितः ? १३

योऽन्वास्यत पुरा वीरो वर-स्त्रीभिर्, महा-भुजः,
कथम् अन्वास्यते सो ऽद्य शिवाभिः, पतितो मृधे ? १४

अ-तृप्त-दर्शना, पुत्र, दर्शनस्य तवानघ।
मन्द-भाग्या गमिष्यामि व्यक्तम् अद्य यम-क्षयम्। १५

धिग् बलं भीमसेनस्य, धिक् पार्थस्य, धनुष्मताम्
धिग् वीर्यं वृष्णि वीराणां, पाञ्चालानां च धिग् बलम्! १६

९। प्रमथितासि [प्र-मथ्+तासि]—अचिरेण प्रमथिष्यसि (विलोडयिष्यसि)। लुट्। १२। गुण्ठितम्—गुण्डितम्, आवृतम्, रूषितम्। १३। शयनीयम्—शय्याम्। अध्युष्य [अधि-वस्+य]—अधिशय्य। स्पर्ध्यास्तरण-संवृतम्—स्पर्ध्येन (अनुकरण-योग्येन, सर्वोत्कृष्टेन) आस्तरणेन (कुथेन, उत्तर-च्छदेन) संवृतम् (आच्छादितम्)।

धिक् केकयांस् तथा चेदीन्, मत्स्यांश् चैवाथ सृञ्जयान्
ये त्वां रण-गतं वीरं न शेकुर् अभिवीक्षितुम्! १७

अद्य पश्यामि पृथिवीं शून्याम् इव हत-श्रियम्,
अभिमन्युम् अपश्यन्ती, शोक-व्याकुल-चेतना। १८

इमां ते तरुणीं भार्यां त्वद्-आधिभिर् अभिप्लुताम्
कथं सन्धारयिष्यामि, वि-वत्साम् इव धेनुकाम्? १९

या गतिर् युध्यमानानां शूराणाम् अ-निवर्तिनाम्,
हत्वारीन् निहतानां च संग्रामे, तां गतिं व्रज! २०

ह्रीमन्तः सर्व-शास्त्रज्ञा ज्ञान-तृप्ता जितेन्द्रियाः
यां गतिं साधवो यान्ति तां गतिं व्रज, पुत्रक!" २१

एवं विलपतीं दीनां सुभद्रां शोक-कर्षिताम्
अभ्यपद्यत पाञ्चाली वैराटि-सहिता तदा। २२

ताः प्रकामं रुदित्वा च विलप्य च, सु-दुःखिताः
उन्मत्तवत् तदा, राजन्, निःसंज्ञा न्यपतन् क्षितौ। २३

सोपचारस् तु ताः कृष्णो, दुःखिता, भृश-दुःखितः,
सिक्त्वाम्भसा, समाश्वास्य, तत् तद् उक्त्वा हितं वचः,
पार्थस्यैव महा-बाहुः पार्श्वम् आगाद्, अरिन्दमः। २४

विप्रविद्धः—अभिहतः। १७। अभिवीक्षितुम्—अवेक्षितुम्, पालयितुम्, रक्षितुम्। १९। सन्धारयिष्यामि—सान्त्वयिष्यामि। २२। विलपतीम्—विलपन्तीम्, परिदेवयमानाम्। आप्र.। वैराटिः [विराट+इ+०, ४।१।९५]—विराट-कन्या [उत्तरा]। २३। प्रकामम्—यथेष्टम्। २४। सोपचारः [सन्]—सेवमानः। समाश्वास्य [सम्-श्वस्-इ+य]—

नवमो ऽध्यायः

चतुर्दशो दिवसः—वध-यात्रा

तस्यां निशायां व्युष्टायां, द्रोणः शस्त्र-भृतां वरः
स्वान्यनीकानि सर्वाणि प्राक्रामद् व्यूहितुं ततः। १

मत्तानां, सुविरूढानां हस्त्यारोहैर् विशारदैः,
नागानां भीम-रूपाणां वर्मिणां रौद्र-कर्मिणाम् २

अध्यर्धेन सहस्रेण पुत्रो दुर्मर्षणस् तव
अग्रतः सर्व-सैन्यानां युध्यमानो व्यतिष्ठत। ३

ततो दुःशासनश् चैव विकर्णश् च तवात्मजौ
सिन्धु-राजार्थ-सिद्ध्यर्थम् अग्रानीके व्यवस्थितौ। ४

व्यूहस् तु चक्र-शकटो भारद्वाजेन निर्मितः।
पश्चार्धे तस्य पद्मस् तु गर्भ-व्यूहः पुनः कृतः। ५

सूची पद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः।
जयद्रथस् ततो, राजन्, सूची-पार्श्वे व्यवस्थितः। ६

शकटस्य तु, राजेन्द्र, भारद्वाजो मुखे स्थितः।
द्रोणस्य रथम् आलोक्य प्रहृष्टाः कुरवो ऽभवन्। ७

सान्त्वयित्वा। तत् तत्—नाना-विधम्।

१। प्राक्रामत्—प्राक्रमत, आरभत। पआ.। २। अध्यर्धेन—सार्धेन। ५। चक्र-शकटः—चक्र-गर्भः शकटः। पश्चार्धे [पश्च + अर्ध, ७।१]—शेषार्धे।

ताड्यमानासु भेरीषु मृदङ्गेषु नदत्सु च,
रौद्रे मुहूर्ते संप्राप्ते, सव्यसाची व्यदृश्यत । ८

नाकुलिश् च शतानीको धृष्टद्युम्नश् च पार्षतः,
पाण्डवानाम् अनीकानि प्राज्ञौ तौ व्यूहतुस् तदा । ९

जयो जेता, स्थितः सत्ये, पारयिष्यन् महा-व्रतम्,
विधुन्वन् गाण्डीवं, सङ्ख्ये बभौ सूर्य इवोदितः । १०

सो, ऽग्रानीकस्य महत इषु-पाते, धनञ्जयः
व्यवस्थाप्य रथं सज्जं, शङ्खं दध्मौ, प्रतापवान् । ११

अथ कृष्णो ऽप्यसंभ्रान्तः, पार्थेन सह, मारिष,
प्राध्मापयत पाञ्चजन्यं शङ्ख-प्रवरम् ओजसा । १२

यथा त्रस्यन्ति भूतानि सर्वाण्यशनि-निस्वनात्,
तथा शङ्ख-प्रणादेन वित्रेसुस् तव सैनिकाः । १३

ततः क्रुद्धो महा-बाहुर्, वार्यमाणः परैर् युधि,
शिरांसि रथिनां पार्थः कायेभ्यो ऽपाहरच् छरैः । १४

यथोदयन् वै गगने सूर्यो हन्ति महत् तमः,
तथार्जुनो गजानीकम् अवधीत् कङ्क-पत्रिभिः । १५

दुःशासन-बलं हत्वा, सव्य-साची महा-रथः
सिन्धु-राजं परीप्सन् वै द्रोणानीकम् उपाद्रवत् । १६

---

९ । नाकुलिः [नकुल + इ, १।१]—[द्रौपद्यां जातो] नकुलस्य पुत्रः । Cf. १।४१।२५। १० । जयः—[जय-शीलत्वात्] अर्जुनः । सत्ये —शपथे । पारयिष्यन्—समापयिष्यन्, साधयिष्यन् ।

स तु, द्रोणं समासाद्य, व्यूहस्य प्रमुखे स्थितम्,
कृताञ्जलिर् इदं वाक्यं कृष्णस्यानुमते ऽब्रवीत्,— १७

"तव प्रसादाद् इच्छामि प्रवेष्टुं दुर्भिदां चमूम्।
भवान् पितृ-समो मह्यं धर्म-राज-समो ऽपि च। १८

अश्वत्थामा यथा, तात, रक्षणीयस् त्वयानघ,
तथाहम् अपि ते रक्ष्यः सदैव, द्विज-सत्तम। १९

तव प्रसादाद् इच्छेयं सिन्धु-राजानम् आहवे
निहन्तुं, द्वि-पदां श्रेष्ठ! प्रतिज्ञां रक्ष मे, प्रभो।" २०

एवम् उक्तस्, तदाचार्यः प्रत्युवाच, स्मयन्न् इव,—
"माम् अ-जित्वा न, बीभत्सो, शक्यो, जेतुं जयद्रथः।" २१

एतावद् उक्त्वा, तं द्रोणः शर-व्रातैर् अवाकिरत्,
स-रथाश्व-ध्वजं, तीक्ष्णैः, प्रहसन् नौ, स-सारथिम्। २२

ततो ऽर्जुनः, शर-व्रातान् द्रोणस्यावार्य सायकैः,
द्रोणम् अभ्यद्रवद् बाणैर् घोर-रूपैर् महत्तरैः। २३

ततः, प्रदक्षिणं कृत्वा द्रोणं, प्रायाद् महा-भुजः।
परि-वृत्तश् च बीभत्सुर् अगच्छद् विसृजन् शरान्। २४

ततो ऽब्रवीत् स्मयन् द्रोणः,— 'क्वेदं, पाण्डव! गम्यते?
न नु नाम रणे शत्रुम् अजित्वा न निवर्तसे? २५

१८। दुर्भिदाम्—दुरवगाहाम्, दुष्प्रवेशाम्। २४। परिवृत्तः—घूर्णितः।

"गुरुर् भवान्, न मे शत्रुः। शिष्यः पुत्र-समो ऽस्ति ते।
न चास्ति स पुमाल्ँ लोके यस् त्वां युधि पराजयेत्।" २६

एवं ब्रुवाणो बीभत्सुर् जयद्रथ-वधोत्सुकः,
त्वरा-युक्तो, महा-बाहुस् तत्-सैन्यं समुपाद्रवत्। २७

तं चक्र-रक्षौ पाञ्चाल्यौ युधामन्यूत्तमौजसौ
अन्वयातां महात्मानौ, विशन्तं तावकं बलम्। २८

अश्वो विद्धो, रथश् छिन्नः, सारोहः पातितो गजः,
छत्राणि चापविद्धानि, रथाश् चक्रैर् विना-कृताः, २९

विद्रुतानि च सैन्यानि भयार्तानि समन्ततः
इत्यासीत् तुमुलं युद्धं। न प्राज्ञायत किञ्चन। ३०

प्रविष्टयोर्, महा-राज, पार्थ-वार्ष्णेययो रणे,
दुर्योधने प्रयाते च पृष्ठतः पुरुषर्षभे, ३१

जवेनाभ्यद्रवन् द्रोणं महता निस्वनेन च
पाण्डवाः सोमकैः सार्धं। ततो युद्धम् अवर्तत। ३२

सैन्धवः पृष्ठतश् चासीत् सर्व-सैन्यस्य, भारत,
रक्षितः परमेष्वासैः कृप-प्रभृतिभी रथैः। ३३

तस्यास्तां चक्र-रक्षौ द्वौ सैन्धवस्य वृहत्तमौ
द्रौणिर् दक्षिणतो, राजन्, सूत-पुत्रश् च वामतः। ३४

पृष्ठ-गोपाश् च तस्यासन् सौमदत्ति-पुरोगमाः
कृपश् च वृषसेनश् च शलः शल्यश् च दुर्जयः। ३५

२९। अपविद्धानि—निक्षिप्तानि। ३५। वृषसेनः—महा-रथः कर्ण-पुत्रः।

नीतिमन्तो महेष्वासाः सर्वे युद्ध-विशारदाः
सैन्धवस्य विधायैवं रक्षां युयुधिरे ततः । ३६

तिष्ठतां युध्यमानानां पुनर् आवर्तताम् अपि
भज्यतां जयतां चैव जगाम तद् अहः शनैः । ३७

तथा तेषु विषक्तेषु सैन्येषु जय-गृद्धिषु
अर्जुनो वासुदेवश् च सैन्धवायैव जग्मतुः । ३८

रथ-मार्ग-प्रमाणं तु कौन्तेयो निशितैः शरैः
चकार तत्र पन्थानं ययौ येन जनार्दनः । ३९

यत्र यत्र रथो याति पाण्डवस्य महात्मनः,
तत्र तत्रैव दीर्यन्ते सेनास् तव, विशाम् पते । ४०

दशमो ऽध्यायः

हय-कर्म

ततस् तस्य बलौघस्य मध्यं प्राप्य, हयोत्तमाः
कृच्छ्रेण रथम् ऊहुस् तं, क्षुत्-पिपासा-श्रमान्विताः । १

शनकैर् इव दाशार्हम् अर्जुनो वाक्यम् अब्रवीत् ,—
"शरार्दिताश् च ग्लानाश् च हया, दूरे च सैन्धवः । २

शलः—सोमदत्त-पुत्रः । ३६ । नीतिमन्तः—अभ्युदयोपाय-विशिष्टाः ।
३७ । आवर्तताम्—आवर्तमानानाम्, प्रत्यागच्छताम् । पआ. । ३८ ।
विषक्तेषु—अन्योन्य-संयोगेन सुदृढं स्थितेषु । जय-गृद्धिषु—जय-लोलुपेषु ।

अहम् आवारयिष्यामि सर्व-सैन्यानि, केशव ।
त्वम् अप्यत्र यथा-न्यायं कुरु कार्यम् अनन्तरम् ।" ३
सो, ऽवतीर्य रथोपस्थाद्, अ-संभ्रान्तो धनञ्जयः,
गाण्डीवं धनुर् आदाय, तस्थौ गिरिर् इवाचलः । ४
तम् अभ्यधावन् क्रोशन्तः क्षत्रिया जय-गृद्धिनः,
'इदं छिद्रम्' इति ज्ञात्वा, धरणी-स्थं धनञ्जयम् । ५
तत्र पार्थस्य भुजयोर् महद् बलम् अदृश्यत
यत् क्रुद्धो बहुलाः सेनाः सर्वतः समवारयत् । ६
वासुदेवो रथात् तूर्णम् अवतीर्य, महा-द्युतिः
मोचयामास तुरगान् वितुन्नान् कङ्क-पत्रिभिः । ७
अर्जुनेन कृते सङ्ख्ये शर-गर्भ-गृहे, तदा
उपावर्तयद् अ-व्यग्रस् तान् अश्वान् पुष्करेक्षणः । ८
तेषां श्रमं च ग्लानिं च वमथुं वेपथुं व्रणान्,
सर्वं व्यपानुदत् कृष्णः कुशलो ह्यश्व-कर्मणि । ९
शल्यान् उद्धृत्य पाणिभ्यां परिमृज्य च तान् हयान्,
उपावृत्य यथा-न्यायं, पाययामास वाजिनः । १०

---

३ । आवारयिष्यामि—निवारयिष्यामि । ८ । उपावर्तयत्—पर्यलोडयत । ९ । श्रमम्—[मनः-काय-] खेदम् । ग्लानिम्—बलापचयम् । वमथुम्—फेनोद्गमम् । वेपथुम्—कम्पम् । १० । उपावृत्य—अपनोदित-क्लमान् कृत्वा । पाययामास—[जलम्] पाययाञ्चक्रे । पआ.। पा. १।३।८९।

स तांश् लब्धोदकान् स्नातांश् जग्धान्नान् विगत-क्लमान्
योजयामास संहृष्टः पुनर् एव रथोत्तमे । ११

ततः शीघ्रतरं प्रायात् पाण्डवः सैन्धवं प्रति,
विवर्तमाने तिग्मांशौ, हृष्टैः पीतोदकैर् हयैः । १२

तं प्रयान्तं महा-बाहुं सर्व-शस्त्र-भृतां वरम्
नाशक्नुवन् वारयितुं योधाः, क्रुद्धम् इवान्तकम् । १३

एका-दशो ऽध्यायः

नव-रथी

महा-रथाः समाख्याता दुर्योधन-हितैषिणः
जयद्रथस्य रक्षार्थं पाण्डवं पर्यवारयन् । १

तेषां तु रथ-मुख्यानां रथेषु विविधा ध्वजाः
प्रत्यदृश्यन्त, राजेन्द्र, ज्वलिता इव पावकाः । २

सिंह-लाङ्गूलम् उग्रास्यं ध्वजं वानर-लक्षणम्
धनञ्जयस्य संग्रामे प्रत्यपश्याम भैरवम् । ३

तथैव सिंह-लाङ्गूलं द्रोण-पुत्रस्य, भारत,
ध्वजाग्रं समपश्याम बाल-सूर्य-सम-प्रभम् । ४

हस्ति-कक्ष्या पुनर् हैमी बभूवाधिरथेर् ध्वजः ।
गो-वृषो गौतमस्यासीत् कृपस्य च परिष्कृतः । ५

१२ । विवर्तमाने—आकाशस्य मध्य-रेखां त्यक्त्वा अधो गच्छति । १३ । तिग्मांशौ [तिग्म (तीक्ष्ण) + अंशु (किरण), ७।१]—सूर्ये ।
४ । ध्वजाग्रम्—ध्वज-मुख्यम् । ५ । कक्ष्या—गज-मध्य-बन्धन-चर्म-रज्जुः ।

मयूरो वृष-सेनस्य काञ्चनो मणि-रत्नवान्
व्याहरिष्यन्न इवातिष्ठत् सेनाग्रम् अति शोभयन् । ६

मद्र-राजस्य शल्यस्य ध्वजाग्रे, ऽग्नि-शिखाम् इव,
सौवर्णीं समपश्याम सीताम् अ-प्रतिमां शुभाम् । ७

वराहः सिन्धु-राजस्य राजतो ऽभिविराजते
ध्वजाग्रे ऽ-लोहितार्काभो हेम-जाल-परिष्कृतः । ८

सौमदत्तेः पुनर् यूपो, यज्ञ-शीलस्य धीमतः,
ध्वजः सूर्य इवाभाति सोमश् चात्र प्रदृश्यते । ९

शलस्य तु, महा-राज, राजतो द्वि-रदो महान्,
केतुः काञ्चन-चित्राङ्गैर् मयूरैर् उपशोभितः । १०

नागो मणिमयो राज्ञो ध्वजः काञ्चन-संवृतः
किङ्किणी-शत-संह्रादो भ्राजंश् चित्रो रथोत्तमे । ११

व्यभ्राजत भृशं, राजन्, पुत्रस् तव, विशां पते,
ध्वजेन महता सङ्ख्ये कुरूणाम् ऋषभस् सदा । १२

नवैते तव वाहिन्याम् उच्छ्रिताः परम-ध्वजाः
व्यदीपयंस् ते पृतनां, युगान्तादित्य-सन्निभाः । १३

दशमस् त्वर्जुनस्यासीद् एक एव महा-कपिः
अदीप्यतार्जुनो येन हिमवान् इव वह्निना । १४

---

६ । व्याहरिष्यन्—कथयिष्यन्, भाषिष्यमाणः । ७ । सीताम्—लाङ्गल-पद्धतिम् । ८ । अ-लोहितार्काभः—अनुपरक्त-स्फटिक-वर्णः । परि-ष्कृतः—समलङ्कृतः । १३ । युगान्तादित्य-सन्निभाः—प्रलय-कालीन-सूर्या इव प्रदीप्ताः । १४ । हिमवान् इव वह्निना—पुरा किल पराशरो

तत्राद्भुतं परं चक्रे कौन्तेयः कृष्ण-सारथिः
यद् एको बहुभिः सार्धं समागच्छद् अभीतवत्। १५

द्वादशो ऽध्यायः

भूरिश्रवः-पातः

ततः पाण्डु-सुतो, राजन्, भीमसेनः प्रतापवान्,
दर्शयन् घोरम् आत्मानम्, अमित्रान् सहसाभ्ययात्।
राधेयो भीमम् आनर्च्छ युद्धाय, भरतर्षभ। १

स विह्वलो, महा-राज, कर्णो भीम-शराहतः
प्राद्रवज् जवनैर् अश्वै रणं त्यक्त्वा, महा-यशाः। २

दृष्ट्वा कर्णं तु, पुत्रास् ते, भीमसेन-पराजितम्,
नामृष्यन्त महेष्वासाः सोदर्याः पञ्च भ्रातरः— ३

दुर्मर्षणो दुःसहश् च दुर्मदो दुर्धरो जयः;
पाण्डवं, चित्र-सन्नाहास्, तं प्रतीपम् उपाद्रवन्। ४

तान् बाणैः पञ्च-विंशत्या साश्वान्, राजन्, नरर्षभान्
स-सूतान् भीम-धनुषो भीमो निन्ये यम-क्षयम्। ५

तवात्मजांस् तु पतितान् दृष्ट्वा, कर्णः प्रतापवान्,
क्रोधेन महताविष्टो, निर्विण्णो ऽभूत् स जीवितात्। ६

नाम महर्षिर् हिमालये ऽग्निं स्थापयामास। १५। अभीतवत्—भय-शून्य इव।

१। आनर्च्छ [ऋच्छ्+अ]—अभिजगाम। ४। चित्र-सन्नाहाः—नाना-वर्ण-वर्माणः। प्रतीपम् [प्रति-अप्+अ, २।१]—प्रतिकूलम्। ६। निर्विण्णः [निः-विद्+त, १।१]—विरक्तः। Cf. निर्वेदः (विरागः)।

यान् अन्यान् ददृशे भीमश् चक्षुर्विषयम् आगतान्
पुत्रांस् तव, महा-राज, त्वरया तान् जघान ह । ७

कर्णः प्राच्छादयत् क्रुद्धो भीमं सायक-वृष्टिभिः ।
अचिन्तयित्वा भीमस् तु क्रुद्धः कर्णम् उपाद्रवत् । ८

रश्मीन् योक्त्राणि चाश्वानां क्रुद्धः कर्णो ऽच्छिनद् मृधे,
तस्याश्वांश् च पुनर् हत्वा सूतं विव्याध पञ्चभिः । ९

क्षीण-शस्त्रस् तु, कौन्तेयः, कर्णेन समभिद्रुतः,
पाण्डवो जीविताकाङ्क्षी राधेयं नाभ्यवर्तत । १०

धनुषो ऽग्रेण तं कर्णस् त्वभिद्रुत्य परामृशत् ।
आच्छिद्य स धनुस् तस्य कर्णं मूर्धन्यताडयत् । ११

ततः पार्थ-भुजोत्सृष्टाः शराः कनक-भूषणाः
गाण्डीव-प्रभवाः कर्णं हंसाः क्रौञ्चम् इवाविशन् ।
कर्णो भीमाद् अपायासीद् रथेन महता द्रुतम् । १२

भीमो ऽपि, सात्यकेर् वाहं समारुह्य, नरर्षभः
अन्वयाद् भ्रातरं सङ्ख्ये पाण्डवं सव्य-साचिनम् । १३

तम् आपतन्तं संप्रेक्ष्य सात्वतं युद्ध-दुर्मदम्,
क्रोधाद् भूरि-श्रवा, राजन्, सहसा समुपाद्रवत् । १४

---

९ । योक्त्रम् [युज् + त्र, २।१]—युगेन सह ईशा-दण्ड आबध्यते येन तत्, युग-बन्धन-रज्जुः, योत्रम् । ११ । परामृशत्—अस्पृशत् । आच्छिद्य —आक्षिप्य, बाहु-बलेन गृहीत्वा । १२ । पं. २—हंसाः किल कार्तिकेय-शक्ति-कृतेन रन्ध्रेण क्रौञ्चं नाम मैनाक-पुत्रं महा-गिरिम् अतिक्रम्य मानसं गच्छन्ति । अपायासीत् [अप-या + द्]—अपागमत् ।

सात्यकिः सौमदत्तिश् च, शर-वृष्ट्या परस्परम्
अन्योन्यस्य हयान् हत्वा धनुषी विनिकृत्य च,
विरथाव् असि-युद्धाय समायाताम् महा-रणे । १५

असिभ्यां चर्मणी चित्रे शत-चन्द्रे, नराधिप,
निकृत्य, पुरुष-व्याघ्रौ बाहु-युद्धं प्रचक्रतुः । १६

ततो भूरि-श्रवाः क्रुद्धः सात्यकिं, युद्ध-दुर्मदः,
उद्यम्याभ्याहनद्, राजन्, मत्तो मत्तम् इव द्विपम् । १७

हाहा-कारो महान् आसीत् सैन्यानां, भरतर्षभ,
यद् उद्यस्य महा-बाहुः सात्यकिं न्यहनद् भुवि । १८

अथ कोषाद् विनिष्कृष्य खड्गं, भूरि-श्रवा रणे
मूर्धजेषु निजग्राह पदा चोरस्यताड़यत्;
ततो ऽस्य छेत्तुम् आरब्धः शिरः कायात्, स-कुण्डलम् । १९

प्रहरिष्यन्, हृतो. बाहुर्, अदृश्येन किरीटिना,
वेगेन न्यपतद् भूमौ, पञ्चास्य इव पन्नगः । २०

स, मोघं कृतम् आत्मानं दृष्ट्वा पार्थेन, कौरवः
उत्सृज्य सात्यकिं, क्रोधाद् गर्हयामास पाण्डवम् । २१

भूरि-श्रवा उवाच,—

नृशंसं वत, कौन्तेय, कर्मेदं कृतवान् असि
अपश्यतो विषक्तस्य यद् मे बाहुं त्वम् अच्छिदः । २२

२० । बाहुः—[पञ्चाङ्गुलिको दक्षिणो] भुजः । पञ्चास्यः—पञ्च-मुखः ।
२२ । विषक्तस्य—अन्यासक्तस्य (नी.) । अच्छिदः [छिद्+स्]
—छिन्नवान् असि । आसन्ने भूते लुङ् ।

अर्जुन उवाच,—

युध्यन्ति क्षत्रिया: शत्रून् , स्वै: स्वै: परिवृता, नरा: ।
यो यस्य युज्यते ऽर्थेषु स वै रक्ष्यो, नराधिप । २३

सञ्जय उवाच,—

एवम् उक्तो, महा-बाहुर् यूप-केतुर् महा-यशा:,
युयुधानं समुत्सृज्य, रणे प्रायम् उपाविशत् । २४

शरान् आस्तीर्य सव्येन पाणिना, पुण्य-लक्षण:,
यियासुर् ब्रह्म-लोकाय प्राणान् प्राणेष्वेवाजुहोत् । २५

सूर्ये चक्षु: समाधाय, प्रसन्नं सलिले मन:,
ध्यायन् महोपनिषदं योग-युक्तो ऽभवद् मुनि: । २६

अ-संक्रुद्ध-मना, वाच: स्मारयन्न् इव, भारत,
उवाच पाण्डु-तनय: साक्षेपम् इव फाल्गुन,:— २७

---

२३ । रक्ष्य:—'तेन' इति शेष: । २४ । प्रायम् उपाविशत्—आ-मरणम् अनशनम् आरब्धवान् । प्राय: [प्र-इ+अ, १।१]—मरणम् , मरणार्थम् अनशनम् । २५ । आस्तीर्य—[उपवेशनाय] भूमौ विस्तीर्य । यियासु: [या-स+उ, १।१]—यातुम् इच्छुक: । प्राणान् &c.—चित्तं स्थिरीकर्तुम् श्वासं निरुध्य प्राणान् प्राणेष्वेव जुहोमीति दध्यौ । Cf. गी. ४।२६,३ । २६ । समाधाय—संस्थाप्य । प्रसन्नम्—निर्मलम् । ध्यायन्—अनवरतम् एकाग्रेण चेतसा सार्थकं चिन्तयन् । महोपनिषदम्—अहम् ब्रह्मास्मीति (बृहा. १।४।१०) उपनिषदुक्तं परम-तत्त्वम् । योग-युक्त:—[ब्रह्मणा मिलनस्य] उपायेन विशिष्ट: । मुनि:—'दु:खेष्वनुद्विग्नमना: सुखेषु विगत-स्पृह:, वीत-राग-भय-क्रोध: स्थित-धीर् मुनिर् उच्यते ।' (गी. २।५६) । २७ । साक्षेपम्—स-भर्त्सनम् ।

"मम सर्वे ऽपि राजानो जानन्त्येव महा-व्रतम्,
न शक्यो मामको हन्तुं यो मे स्याद् बाण-गोचरे।" २८

एवम् उक्तः स पार्थेन शिरसा भूमिम् अस्पृशत्;
पाणिना चैव सव्येन प्राहिणोद् अस्य दक्षिणम्। २९

उत्थितः स तु शैनेयो, विमुक्तः सौमदत्तिना,
खड्गम् आदाय, चिच्छित्सुः शिरस् तस्य महात्मनः, ३०

वार्यमाणः स कृष्णेन पार्थेन च महात्मना,
विक्रोशतां च सैन्यानाम्, अवधीत् तं यत-व्रतम्। ३१

स, तेजसा शस्त्र-कृतेन पूतो,
महाहवे, देह-वरं विसृज्य,
आक्रामद् ऊर्ध्वं, वरदो वरार्हो,
व्यावृत्य धर्मेण परेण रोदसी। ३२

त्रयो-दशो ऽध्यायः

अकाल-सन्ध्या—जयद्रथ-पातः

ततो रथ-वरान्, राजन्न्, अत्यतिक्रामद् अर्जुनः,
मोहयन्न् इव नाराचैर्, जयद्रथ-वधेप्सया। १

२९। प्राहिणोत्—न्यक्षिपत्। अस्य—अस्मै, अर्जुनाय। दक्षिणम्—[आत्मनश् छिन्नं] दक्षिणम [पाणिम्]। ३०। शैनेयः [शिनि+एय, ११।१]—शिनि-वंश्यः [सात्यकिः]। चिच्छित्सुः [छिद्-स+उ, ११।१]—छेत्तुम् इच्छुकः। ३१। विक्रोशतां सैन्यानाम्—[मेमं जहीति] उच्चैर् ब्रुवतः सैन्यान् (योधान्) अनादृत्य। पा. २।३।३८। ३२। व्यावृत्य [वि-आ-वृ+य]—समावृत्य, व्याप्य।

तथा सर्वा दिशो, राजन्, सर्वांश् च रथिनो रणे
व्याकुलीकृत्य, कौन्तेयो जयद्रथम् उपाद्रवत्। २

द्रौणिं पञ्चाशताविध्यद् वृष-सेनं त्रिभिः शरैः,
कृपायमाणः कौन्तेयः कृपं नवभिर् आर्दयत्; ३

शल्यं षोडशभिर् बाणैः कर्णं द्वा-त्रिंशता शरैः
सैन्धवं च चतुः-षष्ट्या विद्ध्वा सिंह इवानदत्। ४

सैन्धवस् तु, तथा विद्धः शरैर् गाण्डीव-धन्वना,
न चक्षमे सु-संक्रुद्धस्, तोत्रार्दित इव द्विपः। ५

स वराह-ध्वजस् तूर्णं गार्ध्र-पत्रान् अ-जिह्मगान्
मुमोच निशितान् सङ्ख्ये सायकान् सव्य-साचिनः। ६

एतस्मिन्न् एव काले तु द्रुतं गच्छति भास्करे,
अब्रवीत् पाण्डवं, राजंस्, त्वरमाणो जनार्दनः,— ७

"एष मध्ये कृतः षड्भिः, पार्थ, वीरैर् महा-रथैः,
जीवितेप्सुर्, महा-बाहो, भीतस् तिष्ठति सैन्धवः। ८

एतान् अ-निर्जित्य रणे षड् रथान्, पुरुषर्षभ,
न शक्यः सैन्धवो हन्तुं यतो निर्व्याजम्, अर्जुन, ९

३। कृपायमाणः [कृपा + य + आन, १।१]—कृपाम् अनुभवन्। ६। सव्य-साचिनः—सव्य-साचिने, अर्जुनं प्रति। ९। निर्व्याजम्—सरलेन पथा, स्वरूपम् अनाच्छाद्य, कपटाचारं विना। व्यजति [यथार्थ-व्यवहारात् अपगच्छति अनेन इति व्याजः [वि-अज्+अ. १।१]।

योगम् अत्र विधास्यामि सूर्यस्यावरणं प्रति ।
अस्तं गत इति व्यक्तं द्रक्ष्यत्येकः स सिन्धु-राट् ।" १०

एवम् अस्त्विति बीभत्सुः केशवं प्रत्यभाषत ।
ततो ऽसृजत् तमः कृष्णः सूर्यस्यावरणं प्रति । ११

वीक्षमाणे ततस् तस्मिन् सिन्धु-राजे दिवा-करम्
पुनर् एवाब्रवीत् कृष्णो धनञ्जयम् इदं वचः,— १२

"अयं कालो, महा-बाहो, वधायास्य दुरात्मनः ।
छिन्धि मूर्धानम् अस्याशु, कुरु साफल्यम् आत्मनः ।" १३

एतच् श्रुत्वा तु वचनं, सृक्कणी परि-संलिहन्,
इन्द्राशनि-सम-स्पर्शं दिव्य-मन्त्राभिमन्त्रितम् १४

सर्व-भार-सहं, शश्वद् गन्ध-माल्यार्चितं, शरम्
विससर्जार्जुनस् तूर्णं, सैन्धवस्य वधे धृतम् । १५

स पार्थ-भुज-निर्मुक्तः शरः, श्येन इवाशुगः,
छित्त्वा शिरः सिन्धु-पतेर् उत्पपात विहायसम् । १६

तच् छिरः सिन्धु-राजस्य शरैर् ऊर्ध्वम् अवाहयत् ;
दुर्हृदाम् अ-प्रहर्षाय सुहृदां हर्षणाय च, १७

शरैः कदम्बकीकृत्य काले तस्मिंश् च पाण्डवः ।
योधयामास तांश् चैव पाण्डवः षण् महा-रथान् । १८

ततः सु-महद् आश्चर्यं तत्रापश्याम, भारत,
समन्त-पञ्चकाद् बाह्यं शिरो यद् व्यहरत् ततः । १९

---

१८ । कदम्बकीकृत्य [कदम्बक-०-कृ + य]—कदम्ब-कुसुम-सदृशम् कृत्वा ।

एतस्मिन्न् एव काले तु वृद्ध-क्षत्रो मही-पतिः
सन्ध्याम् उपास्ते, तेजस्वी सम्बन्धी तव, मारिष। २०

उपासीनस्य तस्याथ कृष्ण-केशं स-कुण्डलम्
सिन्धु-राजस्य मूर्धानम् उत्सङ्गे समपातयत्। २१

ततो भीतस्य तस्याथ वृद्ध-क्षत्रस्य, भारत,
प्रोत्तिष्ठतस्, तत् सहसा शिरोऽगच्छद् धरा-तलम्। २२

ततस् तस्य नरेन्द्रस्य पुत्र-मूर्धनि भू-तलम्
गते, तस्यापि शतधा मूर्धागच्छद्, अरिन्दम। २३

हतं जयद्रथं दृष्ट्वा तव पुत्रा, नराधिप,
दुःखाद् अश्रूणि मुमुचुर् निराशाश् चाभवन् जये। २४

चतुर्दशोऽध्यायः

निशा-युद्धम्—अलम्बुष-घटोत्कचयोः

ततः प्रववृते, राजन्न्, अस्तं गच्छति भास्करे,
द्रोणस्य सोमकैः सार्धं संग्रामो लोम-हर्षणः। १

यो यो हि प्रमुखे तस्य तस्थौ द्रोणस्य पुरुषः,
तस्य तस्य शिरश् छित्त्वा ययौ द्रोण-शरः क्षितिम्। २

बीभत्सुर् दक्षिणं पार्श्वम् उत्तरं च वृकोदरः
महद्भ्यां रथ-वृन्दाभ्यां बलं जगृहतुस् तव। ३

२०। वृद्ध-क्षत्रः—जयद्रथस्य वनी पिता। Cf. ३।५०।४ टी.।

तौ दृष्ट्वा पुरुष-व्याघ्रौ भीमसेन-धनञ्जयौ
धृष्टद्युम्नो ऽभ्ययाद्, राजन्, सात्यकिश् च महा-बलः। ४

चण्ड-वाताभिपन्नानाम् उदधीनाम् इव स्वनः
आसीद्, राजन्, बलौघानां तदान्योन्यम् अभिन्नताम्। ५

द्रुपदस्यात्मजान् दृष्ट्वा कुन्ति-भोज-सुतांस् तथा
द्रोण-पुत्रेण निहतान् राक्षसांश् च सहस्रशः, ६

युधिष्ठिरो भीमसेनो धृष्टद्युम्नश् च पार्षतः
युयुधानश् च संयत्ता युद्धायैव मनो दधुः। ७

प्रातिपेयस् तु संक्रुद्धः शक्तिं भीमस्य वक्षसि
निचखान महा-बाहुः, पुरन्दर इवाशनिम्। ८

स तयाभिहतो भीमश् चकम्पे च मुमोह च।
प्राप्य चेतश् च बलवान् गदाम् अस्मै ससर्ज ह।
सा पाण्डवेन प्रहिता बाह्लीकस्य शिरो ऽहरत्। ९

पुत्रास् ते ऽभ्यद्रवन् भीमं दश, दाशरथेः समाः।
ते विद्धा व्यसवः पेतुः स्यन्दनेभ्यो हतौजसः। १०

ततः सा भारती सेना, वध्यमाना किरीटिना,
तमसा निद्रया चैव पुनर् एव व्यदीर्यत। ११

ततो युधि, महा-राज, सोमदत्तो महा-रथः
सात्यकिं छादयामास शर-वृष्ट्या, महा-बलः। १२

७। संयत्ताः—कृत-प्रयत्नाः। ८। प्रातिपेयः [प्रतिप+एय, ११] —प्रतिपस्य (प्रतीपस्य) पुत्रः [शान्तनोर् भ्राता च बाह्लीकः]।

सो ऽतिविद्धो, महा-राज, सात्वतेन, महा-रथः
सोमदत्तो महा-बाहुर् निपपात ममार च । १३

ततः सर्वाणि सैन्यानि सेना-गोपाश् च, भारत,
अमुह्यन्त रणे तत्र तमसा संवृते सति । १४

उवाच सर्वांश् च पदाति-सङ्घान्
दुर्योधनः, पार्थिव, सान्त्व-पूर्वम् ,—
"उत्सृज्य सर्वे परमायुधानि,
गृह्णीत हस्तैर् ज्वलितान् प्रदीपान् ।" १५

सा भूय एव ध्वजिनी, विभक्ता,
व्यरोचताग्नि-प्रभया निशायाम् ,
महा-धनैर् आभरणैश् च दिव्यैः ,
शस्त्रैश् च दिव्यैर् अपि संपतद्भिः । १६

रथे रथे पञ्च विदीपकास् तु
प्रदीपकास् तत्र गजे त्रयश् च
प्रत्यश्वम् एकश् च महा-प्रदीपः
कृतास् तु तैः पाण्डवैः कौरवेयैः । १७

प्रदीपानां सहस्रैश् च दीप्यमानैः समन्ततः
विरराज तदा भूमिर् , ग्रहैर् द्यौर् इव, भारत । १८

---

१४ । अमुह्यन्त—अमुह्यन् , दृष्टि-हीना बभूवुः । आआ. । १६ । संपतद्भिः—आक्रामद्भिः ।

अलम्बुषं, च कर्णं च कुरु-सैन्यं च दुस्तरम्
हैडिम्बः प्रममाथैको, महा-वातो ऽम्बुदान् इव । १९

तयोः समभवद् युद्धं गर्जतोर् अति-काययोः
घटोत्कचालम्बुषयोस् तुमुलं रोम-हर्षणम् । २०

ततो घटोत्कचो, राजन् , अलम्बुष-वधेप्सया
उत्पपात भृशं क्रुद्धः , श्येनवद् निपपात च ; २१

गृहीत्वा च महा-कायं, राक्षसेन्द्रम् अलम्बुषम् ,
उद्यम्य न्यवधीद् भूमौ, मयं विष्णुर् इवाहवे । २२

ततो घटोत्कचः खड्गम् उद्गृह्याद्भुत-दर्शनम् ,
रौद्रस्य कायाद् धि शिरो, भीमं, विकृत-दर्शनम् , २३

स्फुरतस् तस्य समरे नदतश् चापि भैरवम् ,
निचकर्त, महा-राज, शत्रोर् , अ-मित-विक्रमः । २४

शिरस् तच् चापि संगृह्य केशेषु , रुधिरोक्षितम् ,
ययौ घटोत्कचस् तूर्णं दुर्योधन-रथं प्रति । २५

शिरो रथे ऽस्य निक्षिप्य, विकृतानन-मूर्धजम् ,
प्राणदद् भैरवं नादं प्रावृषीव बलाहकः । २६

अब्रवीच् च ततो, राजन् , दुर्योधनम् इदं वचः ,—
"रिक्त-पाणिर् न पश्येत राजानं ब्राह्मणं स्त्रियम् । २७

---

२४ । स्फुरतः—स्पन्दमानस्य, विचेष्टमानस्य, हस्तपदादीनि विक्षिपतः ।
२६ । बलाहकः—मेघः । २७ । पश्येत—पश्येत् । आआ । औचित्ये लिङ् । संसो. § २०९

तिष्ठस्व तावत् सु-प्रीतो यावत् कर्णं वधाम्यहम् ।"
एवम् उक्त्वा ततः प्रायात् कर्णं प्रति, नरेश्वर । २८

तम् आपतन्तं संप्रेक्ष्य विरूपाक्षं विभीषणम्,
उत्स्मयन्न् इव राधेयस् त्वरमाणो न्यवारयत् । २९

स सन्निपातस् तुमुलस् तयोर् आसीद् विशाम् पते,
कर्ण-राक्षसयो, राजन्न्, इन्द्र-शम्बरयोर् इव । ३०

तौ, प्रगृह्य महा-वेगे धनुषी भीम-निस्वने,
प्राच्छादयेताम् अन्योन्यं, तक्षमाणौ, महेषुभिः । ३१

समाहिताव् अ-प्रतिम-प्रभावाव्
अन्योन्यम् आजघ्नतुर् उत्तमास्त्रैः ।
तयोर् हि वीरोत्तमयोर् न कश्चिद्
ददर्श तस्मिन् समरे विशेषम् । ३२

घटोत्कचं यदा कर्णो न विशेषयते, नृप,
ततः प्रादुश्चकारोग्रम् अस्त्रम्, अस्त्र-विदां वरः । ३३

तेनास्त्रेणावधीत् तस्य रथं स-हय-सारथिम् ।
वि-रथश् चापि हैडिम्बः क्षिप्रम् अन्तरधीयत । ३४

---

३० । इन्द्र-शम्बरयोर् इव—*Cf.* ऋवे. २।१२।११ ३२ । विशेषम्—प्रकर्षम्, आधिक्यम् । ३३ । विशेषयते—अत्येति । ३४ । अन्तरधीयत [अन्तर-धा-य+त]—अन्तर्हितो बभूव, अन्तर्दधे ।

ततो मायां दारुणाम् अन्तरीक्षे
घोरां भीमां, विहितां राक्षसेन,
अपश्याम, लोहिताभ्र-प्रकाशां,
देदीप्यन्तीम् अग्नि-शिखाम् इवोग्राम्। ३५

ततस् तस्यां विद्युतः प्रादुरासन्न्,
उल्काश् चापि ज्वलिताः, कौरवेन्द्र।
घोषश् चान्यः प्रादुरासीत् सु-घोरः
सहस्रशो नदतां दुन्दुभीनाम्। ३६

ततः शराः प्रापतन्, रुक्म-पुङ्खाः,
शक्त्यृष्टि-प्रासा, मुषलान्यायुधानि,
परश्वधास्, तैल-धौताश् च खड्गाः,
प्रदीप्ताग्रास् तोमराः पट्टिशाश् च। ३७

वृष्टिं विशालां ज्वलितां पतन्तीं
कर्णः शरौघैर् न शशाक हन्तुम्।
दौर्योधनं वै बलम् आर्त-रूपम्
आवर्तमानं ददृशे भ्रमत् तत्। ३८

दृष्ट्वा बलौघांश् च निपात्यमानान्,
महद् भयं तव पुत्रान् विवेश।

३५। देदीप्यन्तीम् [दीप्-य+अत्+ई २।१]—देदीप्यमानाम्, नितरां ज्वलन्तीम्। पआ.। ३८। आवर्तमानम्—घूर्णत्।

महच् छ्रुत्वा निनदं कौरवाणां,
मतिं दध्रे शक्ति-मोक्षाय कर्णः । ३९

यासौ, राजन्, निहिता वर्ष-पूगान्
वधायाजौ सत्-कृता फाल्गुनस्य,
तां वै शक्तिं लेलिहानां प्रदीप्तां
वैकर्तनः प्राहिणोद् राक्षसाय । ४०

भीतं रक्षो विप्र-दुद्राव, राजन्,
कृत्वात्मानं विन्ध्य-तुल्य-प्रमाणम् ।
ववुर् वातास् तुमुलाश् चापि, राजन् ।
स-निर्घाता चाशनिर् गां जगाम । ४१

सा, तां मायां भस्म कृत्वा, ज्वलन्ती,
भित्त्वा गाढं हृदयं राक्षसस्य,
ऊर्ध्वं ययौ, दीप्यमाना निशायां,
नक्षत्राणाम् अन्तराण्याविशन्ती । ४२

ततो ऽन्तरीक्षाद् अपतद् गतासुः
स राक्षसेन्द्रो भुवि, भिन्न-देहः,

---

३९ । महत् निनदम्—क्लीवत्वम् आर्षम् । मतिं दध्रे—मनश् चक्रे । ४० । वर्ष-पूगान्—वत्सर-समूहान्, बहूनि वर्षाणि । लेलिहानाम् [लिह्+य-य+आन+आ, २।१]—सर्पीवत् सद्यो वध-समर्थाम् । लेलिहः, लेलिहानः—सर्पः । ४१ । निर्घातः—वायुना वायोर् अभिघातेन जनितः शब्दः । गाम् [गो+अम् (२।१)]—पृथिवीम् । ४२ । पं४—नक्षत्र-मण्डले अन्तर्दधाना ।

अवाक्-शिराः स्तब्ध-गात्रो वि-जिह्वो
घटोत्कचो, महद् आस्थाय रूपम्। ४३

स तद् रूपं भैरवं, भीम-कर्मा,
भीमं कृत्वा, भैमसेनिः पपात;
हतो ऽप्येवं तव सैन्यैक-देशम्
अपोथयत् स्वेन देहेन, राजन्! ४४

ततः कर्णः, कुरुभिः पूज्यमानो
यथा शक्रो वृत्र-वधे मरुद्भिः,
अन्वारूढस् तव पुत्रस्य यानं
हृष्टश् चापि, प्राविशत् तत् स्व-सैन्यम्। ४५

हैडिम्बं निहतं दृष्ट्वा विशीर्णम् इव पर्वतम्,
बभूवुः पाण्डवाः सर्वे शोक-बाष्पाकुलेक्षणाः। ४६

वासुदेवस् तु, हर्षेण महताभिपरिप्लुतः,
ननाद सिंह-नादं वै, पर्यष्वजत फाल्गुनम्। ४७

अर्जुनो ऽथाब्रवीद्, राजन्, नाति-हृष्ट-मना इव,—
"अति-हर्षो ऽयम् अ-स्थाने तवाद्य, मधु-सूदन।" ४८

४३। अवाक्-शिराः—दक्षिण-शीर्षा। ४४। भैमसेनिः [भीमसेन+इ, ११]—भीमसेन-पुत्रः [घटोत्कचः]। अपोथयत् [पुथ्+द्]—नाशयामास। ४६। हैडिम्बम् [हिडिम्बा+अ, २।१]—हिडिम्बायाः पुत्रम् [घटोत्कचम्]।

वासुदेव उवाच,—

दिष्ट्या सा व्यंसिता शक्तिर् अ-मोघास्य घटोत्कचे !
तां प्राप्यामन्यत वृषा सततं त्वां हतं रणे। ४९

सञ्जय उवाच,—

विगाढ़ायां रजन्यां च राजा, दैन्यं परं गतः,
कश्मलं प्राविशद् घोरं दृष्ट्वा कर्णस्य विक्रमम्। ५०

पञ्चदशो ऽध्यायः

रण-निद्रा

निद्रान्धास् ते, महा-राज, परिश्रान्ताश् च संयुगे,
नाभ्यपद्यन्त समरे काञ्चिच् चेष्टां महारथाः।
सर्वे ह्यासन् निरुत्साहाः क्षत्रिया, दीन-चेतसः। १

उवाच वाक्यं बीभत्सुर् उच्चैः, संनादयन् दिशः,—
"श्रान्ता भवन्तो निद्रान्धाः सर्व एव स-वाहनाः। २

ते यूयं, यदि मन्यध्वम्, उपारमत, सैनिकाः।
निमीलयत चात्रैव रणे भूमौ मुहूर्तकम्। ३

ततो विनिद्रा विश्रान्ताश्, चन्द्रमस्युदिते पुनः
संसाधयिष्यथान्योन्यं स्वर्गाय, कुरु-पाण्डवाः।" ४

४९। व्यंसिता—प्रतारिता, [आत्म-रक्षणाय] अ-स्थाने पातिता।

३। निमीलयत—'चक्षुषी' इति शेषः। ४। संसाधयिष्यथ—हनिष्यथ।

तथा विक्रोशमानस्य फाल्गुनस्य ततस् ततः
उपारमत पाण्डूनां सेना तत्र च, भारत। ५

'त्वयि वेदास् तथास्त्राणि, त्वयि बुद्धि-पराक्रमौ,
धर्मस् त्वयि, महा-बाहो, दया भूतेषु चानघ,' ६

इति ते तं नर-व्याघ्रं प्रशंसन्तो, महा-रथाः
निद्रया समवाक्षिप्तास् तूष्णीम्-आसन्, विशां पते। ७

अश्व-पृष्ठेषु चाप्यन्ये रथ-नीड़ेषु चापरे
गज-स्कन्ध-गताश् चान्ये शेरते चापरे क्षितौ। ८

सायुधाः स-गदाश् चैव स-खड्गाः स-परश्वधाः
स-प्रास-कवचाश् चान्ये नराः सुप्ताः पृथक् पृथक्। ९

गजास् ते पन्नगाभोगैर् हस्तैर् भू-रेणु-गुण्ठितैः
निद्रान्धा वसुधां चक्रुर् घ्राण-निःश्वास-शीतलाम्; १०

सुप्ताः शुशुभिरे तत्र निःश्वसन्तो मही-तले
विकीर्णा गिरयो यद्वद् निःश्वसद्भिर् महोरगैः। ११

हयाः काञ्चन-योक्त्रास् ते केसरालम्बिभिर् युगैः
सुषुपुस् तत्र, राजेन्द्र, युक्ता वाहेषु सर्वशः। १२

एवं हयाश् च नागाश् च योधाश् च, भरतर्षभ,
युद्धाद् विरम्य सुषुपुः, श्रमेण महतान्विताः। १३

७। समवाक्षिप्ताः—परिभूताः, अभिभूताः। १०। पन्नगाभोगैः—सर्प-देहोपमैः। हस्तैः—शुण्डैः।

तत् तथा निद्रया मग्नम् अ-बोधं प्रास्वपद् बलम्,
कुशलैः शिल्पिभिर् न्यस्तं पटे चित्रम् इवाद्भुतम्। १४

ते क्षत्रियाः कुण्डलिनो युवानः
परस्परं सायक-विक्षताङ्गाः
कुम्भेषु लीनाः सुषुपुर् गजानां,
कुचेषु लग्ना इव कामिनीनाम्। १५

ततः कुमुद-नाथेन कामिनी-गण्ड-पाण्डुना
नेत्रानन्देन चन्द्रेण माहेन्द्री दिग् अलङ्कृता। १६

ततो मुहूर्ताद् भुवनं ज्योतिर्भूतम् इवाभवत्।
अ-प्रख्यम् अ-प्रकाशं च जगामाशु तमस् तथा। १७

बोध्यमानं तु तत् सैन्यं, राजंश्, चन्द्रस्य रश्मिभिः
बुबुधे, शत-पत्राणां वनं सूर्यांशुभिर् यथा। १८

यथा चन्द्रोदयोद्धूतः क्षुभितः सागरो ऽभवत्,
तथा चन्द्रोदयोद्धूतः स बभूव बलार्णवः। १९

ततः प्रववृते युद्धं पुनर् एव, विशाम् पते,
लोके लोक-विनाशाय परं लोकम् अभीप्सताम्। २०

१६। माहेन्द्री [महेन्द्र (इन्द्र) + अ + ई, १।१]—इन्द्राधिष्ठिता, पूर्वा। १७। अ-प्रख्यम्—अ-तुलम्। १८। बोध्यमानम्—जागर्यमाणम्, विनिद्रं क्रियमाणम्। बुबुधे—जजागार। शत-पत्राणाम्—पद्मानाम्।

षोड़शो ऽध्यायः

उपालम्भः

ततो दुर्योधनो द्रोणम् अभिगम्याब्रवीद् इदम्,
अमर्ष-वशम् आपन्नो, जनयन् हर्ष-तेजसी,— १

"न मर्षणीयाः संग्रामे विश्राम्यन्तः श्रमान्विताः
सपत्ना ग्लान-मनसो, लब्ध-लक्षा विशेषतः। २

तत् तु मर्षितम् अस्माभिर् भवतः प्रिय-काम्यया।
त एते परि-विश्रान्ताः पाण्डवा बलवत्तराः! ३

सर्वथा परिहीणाः स्म तेजसा च बलेन च।
भवता पाल्यमानास् ते विवर्धन्ते पुनः पुनः। ४

दिव्यान्यस्त्राणि सर्वाणि ब्राह्मादीनि च यानि च
तानि सर्वाणि तिष्ठन्ति भवत्येव विशेषतः। ५

न पाण्डवेया न वयं नान्ये लोके धनुर्धराः
युध्यमानस्य ते तुल्याः। सत्यम् एतद् ब्रवीमि ते। ६

स भवान् मर्षयत्येतांस् त्वत्तो हीनान् विशेषतः,
शिष्यत्वं वा पुरस्कृत्य मम वा मन्द-भाग्यताम्।" ७

एवम् उद्धर्षितो द्रोणः कोपितश् च सुतेन ते,
स-मन्युर् अब्रवीद्, राजन्, दुर्योधनम् इदं वचः,— ८

२। मर्षणीयाः—क्षन्तव्याः। लब्ध-लक्षाः—लक्षाद् अप्रच्युत-शर-शक्ति-खड्गादयः, यथायथायुध-प्रयोग-कुशलाः। लक्षम्—शरव्यम्। *Cf.* मनुः ७।५४ 'लब्ध-लक्षैः' इति पाठान्तरम्। ८। उद्धर्षितः—उत्तेजितः।

"स्थविरः सन् परं शक्त्या घटे दुर्योधनाहवे ।
अतः परं मया कार्यं क्षुद्रं विजय-गृद्धिना—
अनस्त्र-विद् अयं सर्वो हन्तव्यो ऽस्त्र-विदा जनः ! ९

यद् भवान् मन्यते चापि शुभं वा यदि वाशुभम्
तद् वै कर्तास्मि, कौरव्य, वचनात् तव, नान्यथा । १०

को हि गाण्डीव-धन्वानं, ज्वलन्तम् इव तेजसा,
अक्षयं क्षययेत् कश्चित् क्षत्रियः, क्षत्रियर्षभम् ? ११

त्वं तु सर्वाभिशङ्कित्वाद् निष्ठुरः पाप-निश्चयः
श्रेयसस् त्वद्-धिते युक्तांस् तत् तद् वक्तुम् इहेच्छसि ! १२

इमान् किं क्षत्रियान् सर्वान् घातयित्वा ह्यनागसः ?
त्वम् अस्य मूलं वैरस्य, तस्माद् आसादयार्जुनम् ! १३

एष ते मातुलः प्राज्ञः, क्षत्र-धर्मस् अनु-व्रतः,
दुर्द्यूत-देवी, गान्धारे, प्रयात्वर्जुनम् आहवे ! १४

एषो ऽक्ष-कुशलो जिह्मो द्यूत-कृत् कितवः शठः
देविता निकृति-प्रज्ञो युधि जेष्यति पाण्डवान् ! १५

---

९ । घटे—चेष्टे. यते । १० । कर्तास्मि [कृ+तास्मि]—अचिरेण करिष्यामि । ११ । क्षययेत्—क्षयं (नाशं) नेतुं शक्नोति । १२ । सर्वाभिशङ्कित्वात्—न को ऽपि विश्वस्त इति सन्देहवत्त्वात् । श्रेयसः—ज्यायसः. पूज्यतरान् [पुरुषान्] । तत् तत्—यत् किञ्चित् : वक्तुम् अनुचितं नाना-विधं वाक्यम् । १३ । अनागसः—निरपराधान् । आसादय—आक्राम ।

‘अहं च, तात, कर्णश् च भ्राता दुःशासनश् च मे
पाण्डु-पुत्रान् हनिष्यामः, सहिताः, समरे त्रयः’ १६
इति ते कत्थमानस्य श्रुतं संसदि संसदि।
अनुतिष्ठ प्रतिज्ञां तां! सत्य-वाग् भव तैः सह! १७
एष ते पाण्डवः शत्रुर् अ-विषह्यो ऽग्रतः स्थितः।
क्षत्र-धर्मम् अवेक्षस्व! श्लाघ्यस् तव वधो जयात्। १८
दत्तं भुक्तम् अधीतं च, प्राप्तम् ऐश्वर्यम् ईप्सितम्।
कृत-कृत्यो ऽनृणश् चासि; मा भैर्, युध्यस्व पाण्डवम्!” १९

सप्त-दशो ऽध्यायः

पञ्च-दशो दिवसः—कूट-नीतिः

अथ, चन्द्र-प्रभां मुष्णन्, आदित्यस्य पुरःसरः
अरुणो ऽभ्युदयाञ्चक्रे, ताम्री-कुर्वन्न् इवाम्बरम्। १
प्राच्यां दिशि सहस्रांशोर् अरुणेनारुणी-कृतम्,
तापनीयं यथा चक्रं, भ्राजते रवि-मण्डलम्। २

१६। *Cf.* उपरिष्टात् ५।७।४२ १८। अविषह्यः—निरतास् अ-सहनीयः। १९। अनृणः ऋण-हीनः। ‘जायमानो वै ब्राह्मणस् त्रिभिर् ऋणैर् ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एष वा अनृणी यः पुत्री यज्वा ब्रह्म-चारी च।’—तैसं ६।३।१०।५,

१। मुष्णन् [मुष+अत् १।१]—हरन्। पुरःसरः—अग्रगामी। अरुणः—गरुडाग्रजः सूर्य-सारथिः, कृष्ण-लोहित-राग इत्यर्थः। २। तापनीयम् [तपनीय (स्वर्ण)+अ, १।१]—हिरण्मयम्।

ततो रथाश्वांश् च मनुष्य-यानान्य्
उत्सृज्य, सर्वे कुरु-पाण्डु-योधाः
दिवाकरस्याभिमुखं जपन्तः
सन्ध्या-गताः प्राञ्जलयो बभूवुः । ३

ततो द्वैधी-कृते सैन्ये, द्रोणः सोमक-पाण्डवान्
अभ्यद्रवत , स-पाञ्चालान् , दुर्योधन-पुरोगमः । ४

द्रुपदस्य ततः पौत्रास् त्रय एव, विशाम् पते,
चेदयश् च महेष्वासा द्रोणम् एवाभ्ययुर् युधि । ५

तेषां द्रुपद-पौत्राणां त्रयाणां निशितैः शरैः
त्रिभिर् द्रोणो ऽहरत् प्राणांस् । ते हता न्यपतन् भुवि । ६

ततो द्रोणो ऽजयद् युद्धे चेदि-केकय-सृञ्जयान् ।
मात्स्यांश् चैवाजयत् कृत्स्नान् भारद्वाजो महा-रथः । ७

ततो द्रोणः सु-पीताभ्यां भल्लाभ्याम् , अरि-मर्दनः ,
द्रुपदं च विराटं च प्रेषयामास मृत्यवे । ८

द्रोणस्य कर्म तद् दृष्ट्वा, कोप-दुःख-समन्वितः ,
शशाप रथिनां मध्ये धृष्टद्युम्नो महा-बलः ,— ९

"इष्टापूर्तात् तथा क्षात्राद् ब्राह्मण्याच् च स नश्यतु,
द्रोणो यस्याद्य मुच्येत यो वा द्रोणात् पराभवेत् ।" १०

---

३ । सन्ध्यागताः — सन्ध्योपासन-रताः । ८ । सु-पीताभ्याम्—तेजन-द्रवे घर्षणेन तीक्ष्णीकृताग्राभ्याम् । ९ । शशाप—शपथं चकार । १० । क्षात्रम्—महा-क्षत्र-कुलोत्पन्नत्वम् , द्रुपद-वंश्यत्वम् । ब्राह्मण्यम्—

इति तेषां प्रतिश्रुत्य मध्ये सर्व-धनुष्मताम्,
आयाद् द्रोणं, सहानीकः पाञ्चाल्यः पर-वीरहा। ११

पाञ्चालास् त्वेकतो द्रोणम् अभ्यघ्नन् पाण्डवैः सह।
दुर्योधनश् च कर्णश् च शकुनिश् चापि सौबलः
सोदर्याश् च तथा मुख्यास्, ते ऽरक्षन् द्रोणम् आहवे। १२

संसक्ताश् च वियुक्ताश् च योधाः संन्यपतन् रणे।
क्षुत्-पिपासा-परीताङ्गा विसंज्ञा बहवो ऽभवन्। १३

वृकोदरस् ततः कर्णं त्रिभिर् भल्लैः समाहितैः
आकर्ण-पूर्णैर् अभ्यघ्नद् बाह्वोर् उरसि चानदत्। १४

सं-निवृत्य ततः कर्णः, संघट्टित इवोरगः,
भीमम् आवारयामास, विकिरन् निशिताञ् छरान्। १५

तथा द्रोणार्जुनौ चित्रम् अयुध्येतां महा-रथौ,
मोहयन्तौ मनुष्याणां चक्षूंषि च मनांसि च। १६

यद् यच् चकार द्रोणस् तु कुन्ती-पुत्र-जिगीषया,
तत् तत् प्रतिजघानाशु प्रहसंस् तस्य पाण्डवः। १७

ततो द्रोणो ब्राह्मम् अस्त्रं प्रादुश्चक्रे महा-मतिः,
सन्तापयन् रणे पार्थं भूतान्यन्तर्हितानि च। १८

ब्राह्मण-रूपाद् अग्नेर् जातत्वम्। नश्यतु—भ्रश्यतु। यस्य—यस्मात्। १२। संन्यपतन्—संघर्षम् आपद्यन्त। १४। अभ्यघ्नत्—अभ्यहन्। आप्र.। १५। आवारयामास—आच्छादयामास।

ततश् चचाल पृथिवी स-पर्वत-वन-द्रुमा ;
ववौ च विषमो वायुः सागराश् चापि चुक्षुभुः । १६

ततः पार्थो ऽप्यसंभ्रान्तस् तद् अस्त्रं प्रतिजघ्निवान्
ब्रह्मास्त्रेणैव, राजेन्द्र । ततः सर्वम्-अशीशमत् । २०

आसंस् तु पाण्डु-पुत्राणां त्रयो जिह्मा महा-रथाः,
यमौ च भीमसेनश् च । प्राक्रोशंस् ते धनञ्जयम् ,— २१

"अभिद्रवार्जुन क्षिप्रं । कुरून् द्रोणाद् अपानुद ।
तत एनं हनिष्यन्ति पाञ्चाला, हत-रक्षिणम् ।" २२

कौरवेयांस् ततः पार्थः सहसा समुपाद्रवत् ।
पाञ्चालानां ततो द्रोणो ऽप्यकरोत् कदनं महत् । २३

वध्यमानेषु संग्रामे पाञ्चालेषु महात्मना,
उदीर्यमाणे द्रोणास्त्रे, पाण्डवान् भयम् आविशत् । २४

दृष्ट्वाश्व-रथ-सङ्घानां विपुलं च क्षयं युधि
पाण्डवेया, महा-राज, नाशशंसुर् जयं तदा । २५

त्रस्तान् कुन्ती-सुतान् दृष्ट्वा, द्रोण-सायक-पीड़ितान् ,
मतिमान् , श्रेयसा युक्तः , केशवो ऽर्जुनम् अब्रवीत् ,— २६

२० । प्रतिजघ्निवान् [प्रति-हन्+वस्, १।१]—प्रतिहतवान् । अशीशमत् [शम्-इ+द्]—अशामि, शमितम् अभूत् । पआ. । २४ । उदीर्यमाणे—उत्क्षिप्यमाणे । २५ । आशशंसुः—आशशंसिरे , आशशासिरे । पआ. ।

"नैष युद्धे न संग्रामे जेतुं शक्यः कथञ्चन,
स-धनुर्, धन्विनां श्रेष्ठो, देवैर् अपि स-वासवैः।
न्यस्त-शस्त्रस् तु संग्रामे शक्यो हन्तुं भवेद् नृभिः। २७

आस्थीयतां जये योगो, धर्मम् उत्सृज्य पाण्डवाः,
यथा वः संयुगे सर्वान् न हन्याद् रुक्म-वाहनः। २८

अश्वत्थाम्नि हते नैष युध्येद् इति मतिर् मम।
तं हतं संयुगे कश्चिद् अस्मै शंसतु मानवः।" २९

एतद् नारोचयद्, राजन्, कुन्ती-पुत्रो धनञ्जयः।
अन्ये त्वरोचयन् सर्वे। कृच्छ्रेण तु युधिष्ठिरः। ३०

अष्टा-दशो ऽध्यायः।

द्रोण-पातः।

ततो भीमो महा-बाहुर् अनीके ते महा-गजम्
जघान गदया, राजन्, अश्वत्थामानम् इत्युत। १

भीमसेनस् तु स-व्रीडम्, उपेत्य द्रोणम् आहवे,
अश्वत्थामा हत इति शब्दम् उच्चैश् चकार ह। २

अश्वत्थामेति हि गजः ख्यातो नाम्ना हतो ऽभवत्।
कृत्वा मनसि तं भीमो मिथ्या व्याहृतवांस् तदा। ३

२८। रुक्म-वाहनः—स्वर्ण-हयः, लोहिताश्वः, 'शोणाश्वः', द्रोणः।
२९। युध्येत्—युध्येत, योद्धुं शक्ष्यति। पआ.। यद् वा युधं (युधां, युद्धं) कुर्यात् इति युध+य+यात्=युध्येत्।

गो. भा. २—२१

भीमसेन-वचः श्रुत्वा, द्रोणस्, तत् परमाप्रियम्,
मनसा सन्न-गात्रो ऽभूद् यथा सैकतम् अम्भसि। ४

शङ्कमानः स तद् मिथ्या, वीर्यज्ञः स्व-सुतस्य वै,
हतः स इति च श्रुत्वा नैव धैर्याद् अकम्पत। ५

प्रादुश्चक्रे ततो द्रोणो ब्राह्मम् अस्त्रं, परन्तपः।
ततो व्यरोचत द्रोणो विनिघ्नन् सर्व-सैनिकान्। ६

क्षत्रियाणाम् अभावाय दृष्ट्वा द्रोणम् अवस्थितम्,
ऋषयो ऽभ्यागतास् तूर्णं हव्यवाह-पुरोगमाः। ७

त एनम् अब्रुवन् सर्वे द्रोणम् आहव-शोभिनम्,—
"ब्रह्मास्त्रेण त्वया दग्धा अनस्त्र-ज्ञा नरा भुवि! ८

यद् एतद् ईदृशं, विप्र, कृतं कर्म, न साधु तत्।
न्यस्यायुधं रणे, विप्र! द्रोण, मा त्वं चिरं कृथाः!" ९

इति तेषां वचः श्रुत्वा, भीमसेन-वचः स्मरन्,
धृष्टद्युम्नं च संप्रेक्ष्य, रणे स विमनाभवत्। १०

संदिह्यमानो व्यथितः कुन्ती-पुत्रं युधिष्ठिरम्
अहतं वा हतं वेति पप्रच्छ सुतम् आत्मनः। ११

४। सन्न-गात्रः—श्लथ-देहः। सैकतम् [सिकता+अ, १।१]—वालुकामयं तटम्। ७। हव्य-वाह-पुरोगमाः—अग्नि-पुरःसराः, अग्रे ऽग्निं वहन्तः। ११। संदिह्यमानः—संदिहानः, सन्देह-दोलायित-चित्तः। दिआ.।

स्थिरा बुद्धिर् हि द्रोणस्य, न पार्थो वक्ष्यते ऽनृतम्
त्रयाणाम् अपि लोकानाम् ऐश्वर्यार्थे कथञ्चन। १२

तस्मात् तं परिपप्रच्छ, नान्यं कञ्चिद् द्विजर्षभः।
तस्मिंस् तस्य हि सत्याशा बाल्यात् प्रभृति पाण्डवे। १३

ततो निष्पाण्डवाम् उर्वीं करिष्यन्तं युधां पतिम्
द्रोणं ज्ञात्वा, धर्म-राजं गोविन्दो व्यथितो ऽब्रवीत्,— १४

"यद्यर्ध-दिवसं द्रोणो युध्यते, मन्युम् आस्थितः,
सत्यं ब्रवीमि, ते सेना विनाशं समुपैष्यति। १५

स भवांस् त्रातु नो द्रोणात्। सत्याज् ज्यायो ऽनृतं वचः।
अनृतं जीवितस्यार्थे वदन् न स्पृश्यते ऽनृतैः।" १६

तयोः संवदतोर् एवं, भीमसेनो ऽब्रवीद् इदम्,—
"श्रुत्वैव तु, महा-राज, वधोपायं महात्मनः, १७
अश्वत्थामेति विख्यातो गजः शक्र-गजोपमः
निहतो युधि, विक्रम्य। ततो ऽहं द्रोणम् अब्रुवम्,— १८
'अश्वत्थामा हतो, ब्रह्मन्। निवर्तस्वाहवाद्' इति।
नूनं नाश्रद्दधाद् वाक्यम् एष, मे, पुरुषर्षभः। १९

१२। वक्ष्यते—वदिष्यति। १४। उर्वीम्—[बृहत्त्वात्] पृथिवीम्। १६। सत्यात् &c—नैतत् कृष्णस्य युज्यते। वक्तव्ये सति सदा सर्वास्वेवावस्थासु सत्यमेव वदितव्यं नानृतम्। एष एव धर्मः। नीति-धर्मयोर् बाधे धर्म एव अनुवर्तितव्यः, न नीतिः। नायं विधिर् वैधं वाक्-संयमं बाधते। १७। संवदतोः—मिथः कथां कुर्वतोः। १९। अश्रद्दधात् [श्रत्-धा+द्]—श्रद्दधात्, सत्यं मेने। आप्र।

स त्वं गोविन्द-वाक्यानि मानयस्व, जयैषिणः।
द्रोणाय निहतं शंस, राजन्, शारद्वती-सुतम्। २०
त्वयोक्तो नैव युध्येत जातु, राजन्, द्विजर्षभः।
सत्यवान् हि त्रि-लोकेऽस्मिन् भवान् ख्यातो, जनाधिप।" २१
तस्य तद् वचनं श्रुत्वा, कृष्ण-वाक्य-प्रचोदितः,
भावित्वाच् च, महा-राज, वक्तुं समुपचक्रमे। २२
तम् अ-तथ्य-भये मग्नो जये सक्तो युधिष्ठिरः
'अश्वत्थामा हत' इति शब्दम् उच्चैश् चकार ह।
अव्यक्तम् अब्रवीद्, राजन्, 'हतः कुञ्जर' इत्युत। २३
तस्य पूर्वं रथः पृथ्व्याश् चतुरङ्गुलम् उच्छ्रितः
बभूवैवं च तेनोक्ते तस्य वाहास्पृशन् महीम्। २४
युधिष्ठिरात् तु तद् वाक्यं श्रुत्वा द्रोणो महा-रथः,
योद्धुं नाशक्नुवद्, राजन्, यथा-पूर्वम् अरिन्दमः। २५
तं, दृष्ट्वा परमोद्विग्नं शोकोपहत-चेतसम्,
पाञ्चाल-राजस्य सुतो धृष्टद्युम्नः समाद्रवत्। २६

२०। गोविन्द-वाक्यानि जयैषिणः—'जयैषिणः (जयाभिलाषिणः) गोविन्दस्य वाक्यानि' इत्यन्वयः। सापेक्षत्वे ऽपि गमकत्वात् समासः। २२। भावित्वात्—भविष्यतो भावं विचिन्त्य। ल्यब्-लोपे कर्मणि पञ्चमी। पा. १।४।३१ ॐ। २५। अशक्नुवत् [शक्+ट्] — अशक्नोत्। आप्र.।

स, धनुर् जैत्रम् आदाय, घोरं जलद-निःस्वनम् ,

दृढ़-ज्यम् अ-जरं दिव्यं, शरं चाशीविषोपमम् , २७

सन्दधे कार्मुके तस्मिंस् ततस् तं अनलोपमम्,

द्रोणं जिघांसुः, पाञ्चाल्यो, महा-ज्वालम् इवानलम् । २८

ततः प्रयत्नम् आतिष्ठद् आचार्यस् तस्य वारणे,

तेजसा पूर्यमाणश् च युयुधे न यथा पुरा , २९

व्यशातयच् च संक्रुद्धो धृष्टद्युम्नम् अ-मर्षणम् ।

शरांश् च शतधा तस्य द्रोणश् चिच्छेद सायकैः । ३०

ध्वजं धनुश् च निशितैः सारथिं चाप्यपातयत् ।

तस्य पारावतान् अश्वान् रथ-शक्त्या परामृशत् । ३१

वि-रथः स, गृहीत्वा तु खड्गं खड्ग-भृतां वरः,

द्रोणम् अभ्यद्रवद्, राजन, वैनतेय इवोरगम् । ३२

स तदा विविधान् मार्गान् प्रवरांश् चैक-विंशतिम्

दर्शयामास, कौरव्य, पार्षतो विचरन् रणे । ३३

भ्रान्तम् उद्भ्रान्तम् आविद्धम् आप्लुतं प्रसृतं सृतम्

परिवृत्तं निवृत्तं च, खड्गं चर्म च धारयन् , ३४

२७। जैत्रम् [जि+त्र, २।१]—जय-शीलम् । ३०। व्यशातयत् [वि-शद्-इ+द्]—गाढ़म् अभिनत् । ३१। परामृशत्—आक्रामत् । ३२। वैनतेयः [विनता+अ, १।१]—विनता-पुत्रो [गरुड़ः]। ३४-३५। 'मण्डलाकारतः खड्ग-भ्रामणं भ्रान्तम् उच्यते,तद् एव बाहुम् उद्यम्य कृतम् उद्भ्रान्तम् ईरितम् । भ्रामणं स्वस्य परितः खड्गस्याविद्धम्

सम्पातं समुदीर्णं च दर्शयामास पार्षतः,
भारतं कौशिकं चैव सात्वतं चैव शिक्षया। ३५

ततः शर-सहस्रेण शत-चन्द्रम् अपातयत्
चर्म खड्गं च संबाधे धृष्टद्युम्नस्य स द्विजः। ३६

पाञ्चाल्यं विरथं भीमो, हत-सर्वायुधं, बली,
सु-विषण्णं महात्मानं त्वरमाणः समभ्ययात्। ३७

ततः स्व-रथम् आरोप्य पाञ्चाल्यम्, अरि-मर्दनः
अब्रवीद्, अभिसंप्रेक्ष्य द्रोणम् अस्यन्तम् अन्तिकात्,— ३८

"न त्वद् अन्य इहाचार्यं योद्धुम् उत्सहते पुमान्।
त्वरस्व! प्राग् वधाद् अस्य त्वयि भारः समाहितः।" ३९

स तथोक्तो महा-बाहुः सर्व-भार-सहं धनुः
प्रतिपद्यादद्े क्षिप्रम् आयुध-प्रवरं दृढम्। ४०

उच्यते, पर-प्रयुक्त-शस्त्रस्य वारणार्थम् इदं त्रयम्। शत्रोर् आक्रमणार्थाय गमनं त्वाप्लुतं मतम्, खड्गस्याग्रेण तद्देह-स्पर्शनं प्रसृतं मतम्। वञ्चयित्वा रिपौ शस्त्र-पातनं गदितं सृतम्, परिवृत्तं भवेच् छत्रोर् वाम-दक्षिण-भागतः। पश्चात् पदापसरणं निवृत्तं संप्रचक्षते, अन्योन्य-ताडनं प्राहुः सम्पातम् उभयोर् अपि। आधिक्यम् आत्मनो यत् तत् समुदीर्णम् उदीरितम्, अङ्ग-प्रत्यङ्ग-देशेषु भ्रामणं भारतं स्मृतम्। विचित्र-खड्ग-सञ्चार-दर्शनं कौशिकं स्मृतम्, निलीय चर्मणि क्षेपो यद् असेः सात्वतं हि तत्।' ३६। संबाधे—रण-सङ्कटे। ३८। अस्यन्तम् [अस्+अत्, २।१]—[शस्त्रं] निक्षिपन्तम्। ४०। प्रतिपद्य—अधिगम्य।

संरब्धश् च शरान् अस्यन्, द्रोणं दुर्वारणं रणे
विवारयिषुर् आचार्यं शर-वर्षैर् अवाकिरत्। ४१
तस्य द्रोणो, धनुश् छित्त्वा, विद्ध्वा चैनं शिलीमुखैः,
मर्माण्यभ्यहनद् भूयः। स व्यथां परमाम् अगात्। ४२
ततो भीमो दृढ-क्रोधो, द्रोणस्याश्लिष्य तं रथम्,
शनकैर् इव, राजेन्द्र, द्रोणं वचनम् अब्रवीत्,— ४३
"यस्यार्थे शस्त्रम् आदाय यम् अपेक्ष्य च जीवसि,
स चाद्य पतितः शेते पृष्टे नावेदितस् तव
धर्म-राजेन। तद्-वाक्यं नाभिशङ्कितुम् अर्हसि।" ४४
एवम् उक्तस् ततो द्रोणो भीमेनोत्सृज्य तद्-धनुः,
सर्वाण्यस्त्राणि धर्मात्मा हातु-कामो ऽभ्यभाषत,— ४५
कर्ण कर्ण महेष्वास कृप दुर्योधनेति च,
"संग्रामे क्रियतां यत्नो, ब्रवीम्येष पुनः पुनः। ४६
पाण्डवेभ्यः शिवं वो ऽस्तु! शस्त्रम् अभ्युत्सृजाम्यहम्।"
इति तत्र, महा-राज, प्राक्रोशद् द्रौणिम् एव च। ४७
उत्सृज्य च रणे शस्त्रं, रथोपस्थे निविश्य च,
अ-भयं सर्व-भूतानां प्रददौ, योगम् ईयिवान्। ४८

४१। विवारयिषुः [वृ-इ-स+उ, १।१]—वारयितुम् (निवारयितुम्) इच्छुकः। ४४। पृष्टेन—त्वया इति शेषः। तव—तुभ्यम्। ४८। निविश्य—उपविश्य। योगम्—परमात्मना मिलनम्। ईयिवान् [इ+वस्, १।१]—उपा-गतः, उपाश्रितः।

तस्य तच् छिद्रम् आज्ञाय, धृष्टद्युम्नः, प्रतापवान्,
खड्गी, रथाद् अवप्लुत्य, सहसा द्रोणम् अभ्ययात्। ४९

द्रोणो ऽपि, शस्त्राण्युत्सृज्य, परमं शाम्यम् आस्थितः,
पुराणं पुरुषं विष्णुं जगाम मनसा, परम्, ५०

मुखं किञ्चित् समुन्नाम्य विष्टभ्योरस् तथाग्रतः,
निमीलिताक्षः सत्त्व-स्थो, निक्षिप्य हृदि धारणाम्, ५१

ओम् इत्येकाक्षरं ब्रह्म ज्योतिर्भूतं, महा-तपाः,
स्मरित्वा, देव-देवेशम् अक्षरं परमं प्रभुम्। ५२

वितुन्नाङ्गं शर-व्रातैर्, न्यस्तायुधम् असृक्-क्षरम्,
धिक्-कृतः पार्षतस् तं तु, सर्व-भूतैः, परामृशत्। ५३

तस्य मूर्धानम् आलम्ब्य, गत-सत्त्वस्य देहिनः,
किञ्चिद् अब्रुवतः, कायाद् निचकर्तासिना शिरः। ५४

५०। शाम्यम्—चित्त-विक्षेपक-कर्मभ्यो निवृत्तिम्। विष्णुम् [विष् (व्याप्तौ)+नु, २।१]—सर्व-व्यापिनम्। परम्—[सर्व-] श्रेष्ठम्। ५१। समुन्नाम्य [सम्-उत्-नम्-इ-+य]—समुच्छ्रित्य। विष्टभ्य—स्थिरीकृत्य। अग्रतः—[हनोर्] अग्रे। सत्त्व-स्थः—शुद्ध-चित्तः। धारणाम्—देश-बन्धं चित्तस्य। ५२। ज्योतिर्भूतम्—स्व-प्रकाशम्। Cf. 'तद् देवा ज्योतिषां ज्योतिर् आयुर होपासते ऽमृतम्'—बृउ. ४।४।१६ 'ज्योतिर्भूतः' इति पाठो न समीचीनो भाति। स्मरित्वा—स्मृत्वा। इडागम आर्षः। देव-देवाः—ऋभवः, प्रधान-देवाः। इतरेषां, ब्रह्म-ज्ञानाभावात्, तस्य एकाधिपत्यं न ज्ञान-गम्यम्। Cf. पुरस्तात् ३।४६।३८ (पृ. ७१६)। ईशम्—प्रभुम्, पालकम्। ५०-५२। Cf. गी. ८।१२-१३। ५३। वितुन्नाङ्गम्—अति-व्यथित-शरीरम्। असृक्-क्षरम्—शोणित-स्रवम्। परामृशत्—आक्रामत। ५४। आलम्ब्य—धृत्वा।

हर्षेण महता युक्तो, भारद्वाजे निपातिते,
सिंह-नाद-रवं चक्रे, भ्रामयन् खड्गम् आहवे। ५५

आ-कर्ण-पलितः श्यामो यो वर्षाशीति-पञ्चकः,
त्वत्-कृते व्यचरत् संख्ये स तु षोडश-वर्षवत्। ५६

उक्तवांश् च महा-बाहुः कुन्ती-पुत्रो धनञ्जयः,—
"जीवन्तम् आनयाचार्यं, मा वधीर्, द्रुपदात्मज!" ५७

क्रोशमाने ऽर्जुने चैव पार्थिवेषु च सर्वशः,
धृष्टद्युम्नो ऽवधीद् द्रोणं रथ-तल्पे, नरर्षभम्। ५८

धृष्टद्युम्नस् तु तद्, राजन्, भारद्वाज-शिरो ऽहरत्,
तावकानां महेष्वासः प्रमुखे तत् समाक्षिपत्। ५९

गत-सत्त्वस्य—निर्जीवस्य। ५६। आकर्ण-पलितः—आकर्णं (कर्ण-पर्यन्तम्) पलितं (केश-पाको) यस्य तादृशः। वर्षाशीति-पञ्चकः—पञ्चैव पञ्चकानि। स्वार्थे कन्। पा. ५।१।५८ & ५।१।५८*। अशीतिश् च पञ्चकानि च अशीति-पञ्चकानि, द्वौ च दश च द्वादश (भट्टो.] इत्यादिवत्। वर्षाणि अशीति-पञ्चकानि वयो अस्य इति वर्षाशीति-पञ्चकः (पञ्चाशीति-वर्ष-वयस्कः)। वर्ष-शब्दस्य पूर्व-निपात आर्षः। वर्षाणाम् अशीतीनाम् पञ्चकम् अस्यास्तीति विग्रहः चतुः-शत-वार्षिक इत्यर्थश् च न समीचीनो भाति, द्रुपद-द्रोणयोः पाण्डु-द्रुपदयोश् च वयस्यत्वात्। Cf. उपरिष्टात् १।११।३-६ & १।३४।१९; तथा च १।३५।४५, १।३६।१३। कथं नाम पुरुषैक-व्यवधानं त्रि-शताधिक-वर्षान्तरं सम्पद्येत? Cf. सिमभा. १।१२०।१०-१७ 'वयसाशीति-पञ्चकः' इति प्रतीच्यां पाठः। ५८। क्रोशमाने—क्रोशति। आआ।

तो तु दृष्ट्वा शिरो, राजन्, भारद्वाजस्य, तावकाः
पलायन-कृतोत्साहा दुद्रुवुः सर्वतो दिशम्।

हते द्रोणे निरुत्साहान् कुरून् पाण्डव-सृञ्जयाः
अभ्यद्रवन्, महा-वेगास्। ततः सैन्यं व्यदीर्यत। ६१

भीमसेनस् ततो, राजन्, धृष्टद्युम्नश् च पार्षतः
वरूथिन्याम् अनृत्येतां परिष्वज्य परस्परम्। ६२

नव-दशो ऽध्यायः।

पितृ-शोकः।

द्रवमाणं बलं दृष्ट्वा, पलायन-कृत-क्षणम्,
दुर्योधनं समासाद्य द्रोण-पुत्रो ऽब्रवीद् इदम्,— १

"किम् इयं द्रवते सेना त्रस्त-रूपेव, भारत?
द्रवमाणां च, राजेन्द्र, नावस्थापयसे रणे! २

त्वं चापि न यथा-पूर्वं प्रकृति-स्थो, नराधिप।
कर्ण-प्रभृतयश् चेमे नावतिष्ठन्ति, पार्थिव। ३

कस्मिन्न्, इदं, हते, राजन्, रथ-सिंहे, बलं तव
एताम् अवस्थां संप्राप्तं तद् ममाचक्ष्व, कौरव।" ४

तत् तु दुर्योधनः श्रुत्वा द्रोण-पुत्रस्य भाषितम्,
घोरम् अ-प्रियम् आख्यातुं नाशक्नोत् पार्थिवर्षभः। ५

६२। अनृत्येताम्—अनृत्यताम्। आआ।

१। पलायन-कृत-क्षणम्—पलायन-परायणम्। क्षणः—उत्सवः।

भिन्ना नौर् इव ते पुत्रो, मग्नः शोक-महार्णवे,
वाष्पेणापिहितो दृष्ट्वा द्रोण-पुत्रं रथे स्थितम् । ६

ततः शारद्वतं राजा स-व्रीडम् इदम् अब्रवीत् ,—
"शंसात्र—भद्रं ते—सर्वं यथा सैन्यम् इदं द्रुतम्" । ७

अथ शारद्वतो, राजन्न् , आर्तिम् आर्च्छन् पुनः पुनः,
शशंस द्रोण-पुत्राय यथा द्रोणो निपातितः । ८

छद्मना निहतं [illegible] । पितरं पाप-कर्मणा,
वाष्पेणापूर्यत द्रौणी रोषेण च, नरर्षभ । ९

तस्य क्रुद्धस्य, राजेन्द्र, वपुर् दीप्तम् अदृश्यत,
अन्तकस्येव भूतानि जिहीर्षोः काल-पर्यये । १०

अश्रु-पूर्णे ततो नेत्रे व्यपमृज्य पुनः पुनः,
उवाच क्रोधाद् निःश्वस्य दुर्योधनम् इदं वचः,— ११

"पिता मम यथा क्षुद्रैर् न्यस्त-शस्त्रो निपातितः
धर्म-ध्वजवता, पापं कृतं तद् विदितं मम । १२

युद्धेष्वपि प्रवृत्तानां ध्रुवं जय-पराजयौ
द्वयम् एतद् भवेद्। राजन् , वधस् तत्र प्रशस्यते । १३

न्याय-वृत्तो वधो यस् तु संग्रामे युध्यतो भवेत् ,
न स दुःखाय भवति । तथा दृष्टो हि स द्विजैः । १४

यत् तु धर्म-प्रवृत्तः सन् केश-ग्रहणम् आप्तवान्
पश्यतां सर्व-सैन्यानां, तद् मे मर्माणि कृन्तति । १५

---

८ । आर्च्छन् [ऋच्छ् + अत्, १।१]—गच्छन् । १२ । धर्म-ध्वजवता—धार्मिकत्व-ख्यापक-बाह्याचार-सम्पन्नेन [युधिष्ठिरेण] । पापम्—

तद् इदं पार्षतेनेह महद् आधर्मिकं कृतम् ,
अवज्ञाय च मां नूनं नृशंसेन दुरात्मना । १६

तस्यानुबन्धं द्रष्टासौ धृष्टद्युम्नः सुदारुणम् ,
अ-कार्यं परमं कृत्वा, मिथ्यावादी च पाण्डवः । १७

शपे सत्येन, कौरव्य, इष्टापूर्तेन चैव ह,
अ-हत्वा सर्व-पाञ्चालान् जीवेयं न कथञ्चन । १८

पित्रा तु मम सावस्थां प्राप्ता निर्बन्धुना यथा,
मयि शैल-प्रतीकाशे पुत्रे शिष्य च जीवति ! १९

धिग् ममास्त्राणि दिव्यानि, धिग् बाहू , धिक् पराक्रमम ,
यं स्म द्रोणः सुतं प्राप्य केश-ग्रहम् अवाप्तवान् ! २०

स तथाहं करिष्यामि यथा, भरत-सत्तम,
पर-लोक-गतस्यापि भविष्याम्यनृणः पितुः ।" २१

तच् छ्रुत्वा द्रोण-पुत्रस्य पर्यवर्तत वाहिनी ।
ततः सर्वे महा-शङ्खान् दध्मुः पुरुष-सत्तमाः । २२

तथा ननाद वसुधा खुर-नेमि-प्रपीड़िता ।
स शब्दस् तुमुलः खं द्यां पृथिवीं च व्यनादयत् । २३

[मिथ्या-भाषणादि-रूपम्] पापम् । १६ । आधर्मिकम्—धर्म-विरुद्धं [कर्म] । १७ । अनुबन्धम्—फलम् । द्रष्टा—अचिरात् द्रक्ष्यति। लुट् । पाण्डवः—युधिष्ठिरः । १८ । शपे—शपथं करोमि । २२ । पर्यवर्तत—प्रतिन्यवर्तत ।

तं शब्दं पाण्डवाः श्रुत्वा पर्जन्य-निनदोपमम् ,
समेत्य रथिनां श्रेष्ठाः सहिताश् चाप्यमन्त्रयन् । २४

युधिष्ठिर उवाच,—

आचार्ये निहते द्रोणे धृष्टद्युम्नेन संयुगे
आत्म-त्राणे मतिं कृत्वा प्राद्रवन् कुरवो रणात् । २५

क एष कौरवान् दीर्णान् अवस्थाप्य महा-रथः
निवर्तयति युद्धार्थं मृधे देवेश्वरो यथा ? २६

अर्जुन उवाच,—

यो ह्यनाथ इवाक्रम्य पार्षतेन हतस् तथा
कर्मणा सु-नृशंसेन, तस्य नाथो व्यवस्थितः । २७

गुरुं मे यत्र पाञ्चाल्यः केश-पक्षे परामृशत् ,
तद् न जातु क्षमेद् द्रौणिर् जानन् पौरुषम् आत्मनः । २८

चिरं स्थास्यति चाकीर्तिस् त्रैलोक्ये स-चराचरे,
रामे बालि-वधाद् यद्वद्, एवं द्रोणे निपातिते । २९

ब्राह्मणं वृद्धम् आचार्यं न्यस्त-शस्त्रं महा-मुनिम्
घातयित्वाद्य राज्यार्थे मृतं श्रेयो, न जीवितम् । ३०

सञ्जय उवाच,—

अर्जुनस्य वचः श्रुत्वा नोचुस् तत्र महा-रथाः ।
ततः क्रुद्धो महा-बाहुर् भीम-सेनो ऽभ्यभाषत,— ३१

---

२६ । दीर्णान्—भग्नान् । २८ । क्षमेत्—क्षमेत । पआ. । ३० । घातयित्वा [हन्-इ+त्वा]—धृष्टद्युम्नेन इति शेषः । मृतम्—[अस्माकं] मरणम् ।

"द्रोण-पुत्राद् भयं कर्तुं नार्हस्यमित-विक्रम ।
अहम् एनं गदा-पाणिर् जेष्याम्येको महाहवे ।" ३२

ततः पाञ्चाल-राजस्य पुत्रः पार्थम् अथाब्रवीत्,
संक्रुद्धम् इव नर्दन्तं हिरण्य-कशिपुर् हरिम्,— ३३

"यस्य कार्यम् अ-कार्यं वा युध्यतः स्यात् समं रणे,
तं कथं ब्राह्मणं ब्रूयाः क्षत्रियं वा, धनञ्जय ? ३४

यो ह्यनस्त्र-विदो हन्याद् ब्रह्मास्त्रैः, क्रोध-मूर्छितः,
सर्वोपायैर् न स कथं वध्यः, पुरुष-सत्तम ? ३५

विशेषात् पितृ-हन्ता मे न स वध्यः कथं मया ?
छित्त्वापि तस्य मूर्धानं नैवास्मि विगत-ज्वरः । ३६

पितामहं रणे हत्वा मन्यसे धर्मम् आत्मनः ।
मया शत्रौ हते कस्मात् पापे धर्मं न मन्यसे ? ३७

कुल-क्रमागतं वैरं ममाचार्येण विश्रुतम् ।
तथा जानात्ययं लोको, न यूयं, पाण्डु-नन्दनाः ! ३८

'पितरं वा गुरुं वापि, जिघांसुं पुत्र-शिष्ययोः,
जिह्मेन वाप्यजिह्मेन हन्याद् एवाविचारयन्' ३९

इत्युक्तं ब्रह्मणा पूर्वं क्षत्रियाणां द्विषद्-वधे ।
शिष्य-द्रोही हतः पापो । युध्यस्व, विजयस् तव ।" ४०

---

३३ । नर्दन्तम्—गर्जन्तम् । हिरण्य-कशिपुर् हरिम्—दिति-कश्यपयोः पुत्रो दैत्य-राजो हिरण्य-कशिपुः तपो-लब्धेन ब्रह्म-वरेण इन्द्र-साम्राज्यं लब्ध्वा त्रि-लोकीं देवांश् च, विष्णु-भक्तः स्व-पुत्रं प्रह्लादम् अपि, भृशं पीड़यन् नृ-सिंह-रूपेण विष्णुना जघ्ने ।

विंशो ऽध्यायः ।

आत्म-कलहः ।

युधिष्ठिरश् च भीमश् च यमौ कृष्णस् तथापरे
आसन् सु-व्रीडिता, राजन् । सात्यकिस् त्वब्रवीद् इदम्,— १
"नेहास्ति पुरुषः कश्चिद् य इमं पाप-पुरुषम्
भाषमाणम् अ-कल्याणं शीघ्रं हन्याद्, नराधमम् ? २
एतत् कृत्वा महत् पापं, निन्दितः सर्व-साधुभिः,
न लज्जसे कथं वक्तुं, समितिं प्राप्य शोभनाम् ? ३
कथं च शतधा जिह्वा न ते मूर्धा च दीर्यते
गुरुम् आक्रोशतः, क्षुद्र, न चाधर्मेण पात्यसे ? ४
कस् त्वेतद् व्यवसेत् पापं त्वद् अन्यः, पुरुषाधम,
निगृह्य केशेषु, वधं गुरोर् धर्मात्मनः सतः ? ५
उक्तवांश् चापि यत् पार्थे भीष्मं प्रति, नरर्षभम्,
तस्यापि तव सोदर्यो निहन्ता, पाप-कृत्तमः । ६
नान्यः पाञ्चाल-पुत्रेभ्यो विद्यते भुवि पाप-कृत् ।
पाञ्चालाश् चलिता धर्मात् क्षुद्रा मित्र-गुरु-द्रुहः । ७
पुनश् चेद् ईदृशीं वाचं मत्-समीपे वदिष्यसि,
शिरस् ते पोथयिष्यामि गदया वज्रकल्पया । ८

---

८ । पोथयिष्यामि [पुथ् (हिंसायाम्)+स्यामि]—भङ्क्ष्यामि ।

त्वां च ब्रह्म-हणं दृष्ट्वा जनः सूर्यम् अवेक्षते !
ब्रह्म-हत्या हि ते पापं प्रायश्चित्तार्थम् आत्मनः। ९

तिष्ठ तिष्ठ, सहस्वैकं गदा-पातम् इमं मम !
तव चापि सहिष्ये ऽहं गदा-पातान् अनेकशः।" १०

सात्वतेनैवम् आक्षिप्तः, पार्षतः परुषाक्षरम्
संरब्धं सात्यकिं प्राह, सं-क्रुद्धः, प्रहसन्न् इव,— ११

"क्षमा प्रशस्यते लोके। न तु पापो ऽर्हति क्षमाम्।
क्षमावन्तं हि पापात्मा 'जितो ऽयम्' इति मन्यते। १२

स त्वं क्षुद्र-समाचारो नीचात्मा पाप-निश्चयः,
आकेशाग्राद् नखाग्राच् च वक्तव्यो वक्तुम् इच्छसि ! १३

यः स भूरि-श्रवाश् छिन्न-भुजः प्राय-गतस् त्वया
वार्यमाणेन हि हतस्, ततः पापतरं नु किम् ? १४

गाहमानो मया द्रोणो दिव्येनास्त्रेण संयुगे
विसृष्ट-शस्त्रो निहतः। किं तत्र, क्रूर, दुष्कृतम् ? १५

अ-युध्यमानं यस् त्वाजौ तथा प्राय-गतं मुनिम्,
छिन्न-बाहुं परैर्, हन्यात्, सात्यके, स कथं वदेत् ? १६

निहत्य त्वां पदा भूमौ स विकर्षति वीर्यवान्।
किं तदा न निहंस्येनं, भूत्वा पुरुष-सत्तमः ? १७

११। आक्षिप्तः—भर्त्सितः। १३। क्षुद्र-समाचारः—नीच-व्यवहारः। वक्तव्यः—वचनीयः, निन्दनीयः। १५। गाहमानः—[पाण्डव-सेनां] प्रविशन्। विसृष्ट-शस्त्रः—त्यक्त-शस्त्रः। १७। निहत्य—आहत्य,

त्वया पुनर् अनार्येण, पूर्वं पार्थेन निर्जितः
यदा, तदा हतः शूरः सौमदत्तिः प्रतापवान्। १८

कर्ता त्वं कर्मणो ह्यस्य नाहं, वृष्णि-कुलाधम।
पापानां च त्वम् आवासः कर्मणां। मा पुनर् वद! १९

अथ वक्ष्यसि मां मौर्ख्याद् भूयः परुषम् ईदृशम्,
गमयिष्यामि बाणैस् त्वां युधि वैवस्वत-क्षयम्। २०

वञ्चितः पाण्डवः पूर्वम् अधर्मेण युधिष्ठिरः।
द्रौपदी च परिक्लिष्टा तथाधर्मेण, सात्यके। २१

प्रव्राजिता वनं सर्वे पाण्डवाः सह कृष्णया।
सर्वस्वम् अपकृष्टं च तथाधर्मेण, बालिश। २२

अधर्मेणापकृष्टश् च मद्र-राजः परैर् इतः।
अधर्मेण तथा बालः सौभद्रो विनिपातितः। २३

इतो ऽप्यधर्मेण हतो भीष्मः पर-पुरञ्जयः।
भूरि-श्रवा ह्यधर्मेण त्वया धर्म-विदा हतः! २४

दुर्ज्ञेयः स परो धर्मस् तथाधर्मश् च दुर्विदः।
युध्यस्व कौरवैः सार्धं। मा गाः पितृ-निवेशनम्!" २५

प्रहत्य, विघट्टय। विकर्षति—अवनमयति। पा. ३।३।१२१। २२। अप-कृष्टम्—अपहृतम्। २५। दुर्विदः—कृच्छ्रेण वेद्यः (ज्ञेयः)। पितृ-निवेशनम्—पितृ-लोकम्, प्रेत-लोकम्, मृत्युम् इत्यर्थः।

तच् श्रुत्वा क्रोध-ताम्राक्षः सात्यकिस् त्वाददे गदाम्,
विनिश्वस्य यथा सर्पः, प्रणिधाय रथे धनुः। २६
ततो ऽभिपत्य पाञ्चाल्यं संरम्भेणेदम् अब्रवीत,—
"न त्वां वक्ष्यामि परुषं, हनिष्ये त्वां वध-क्षमम्।" २७
तम् आपतन्तं सहसा महा-बलम् अमर्षणम्
पाञ्चाल्यायाभि-संक्रुद्धम् अन्तकायान्तकोपमम्, २८
चोदितो वासुदेवेन भीमसेनो महा-बलः,
अवप्लुत्य रथात् तूर्णं, बाहुभ्यां समवारयत्। २९
अवरुह्य रथात् तूर्णं, ध्रियमाणं बलीयसा
उवाच श्लक्ष्णया वाचा सहदेवो, विशाम् पते,— ३०
"अस्माकं, पुरुष-व्याघ्र, मित्रम् अन्यद् न विद्यते
परम् अन्धक-वृष्णिभ्यः पाञ्चालेभ्यश् च, मारिष। ३१
पाञ्चालानां च, वार्ष्णेय, समुद्रान्तां विचिन्वताम्
नान्यद् अस्ति परं मित्रं यथा पाण्डव-वृष्णयः।
भवन्तश् च यथास्माकं भवतां च तथा वयम्। ३२
स एवं, सर्व-धर्मज्ञ, मित्र-धर्मम् अनुस्मरन्,
नियच्छ मन्युं पाञ्चाल्यात्। प्रशाम्य, शिनि-पुङ्गव! ३३

२६। प्रणिधाय—निक्षिप्य। २७। हनिष्ये—हनिष्यामि। आआ.। वध-क्षमम्—वध-योग्यम्। ३२। समुद्रान्ताम्—सागर-पर्यन्तां [पृथिवीम्]।

पार्षतस्य क्षम त्वं नौ, क्षमतां पार्षतश् च ते !
वयं क्षमयितारश् च ! किम् अन्यत्र शमाद् भवेत् ?" ३४

प्रशाम्यमाने शैनेये सहदेवेन, मारिष,
पाञ्चाल-राजस्य सुतः प्रहसन्न् इदम् अब्रवीत्,— ३५

"मुञ्च मुञ्च शिनेः पौत्रं, भीम, युद्ध-मदान्वितम् !
आसादयतु माम् एष, धरा-धरम् इवानिलः, ३६

यावद् अस्य शितैर् वाणैः संरम्भं विनयाम्यहम्,
युद्ध-श्रद्धां च, कौन्तेय, जीवितं चास्य संयुगे । ३७

किं नु शक्यं मया कर्तुं—यत् कार्यम् इदम् उच्यताम्—
सु-महत् पाण्डु-पुत्राणाम् ? आयान्त्येते हि कौरवाः ! ३८

अथवा फाल्गुनः सर्वान् वारयिष्यति संयुगे ।
अहम् अप्यस्य मूर्धानं पातयिष्यामि सायकैः । ३९

मन्यते च्छिन्न-बाहुं मां भूरि-श्रवसम् आहवे !
उत्सृजैनम् ! अहं चैनम् एष वा मां हनिष्यति ।" ४०

शृण्वन् पाञ्चाल्य-वाक्यानि सात्यकिः, सर्पवच् छ्वसन्,
भीम-बाह्वन्तरे सक्तो विस्फुरत्यनिशं, बली ।
तौ वृषाव् इव नर्दन्तौ बलिनौ बाहु-शालिनौ ४१

---

३६ । धरा-धरम्—मही-धरम्, पर्वतम् । ३७ । विनयामि—शमयामि । युद्ध-श्रद्धाम्—समर-स्पृहाम् । ४१ । विस्फुरति—विचेष्टते, हस्त-पदादीनि सञ्चालयति ।

त्वरया वासुदेवश् च धर्म-राजश् च, मारिष,
बलेन महता वीरौ वारयामासतुस् ततः। ४२
निवार्य परमेष्वासौ कोप-संरक्त-लोचनौ,
युयुत्सून् अपरान् सङ्ख्ये प्रतीयुः क्षत्रियर्षभाः। ४३
ततः समागमो, राजन्, कुरु-पाण्डव-सेनयोः
पुनर् एवाभवत् तीव्रः पूर्ण-सागरयोर् इव। ४४
प्रादुश्चक्रे ततो द्रौणिर् अस्त्रं नारायणं तदा
अभिसन्धाय पाण्डूनां पाञ्चालानां च वाहिनीम्। ४५
प्रादुरासन् ततो बाणा दीप्ताग्राः खे सहस्रशः।
प्रादुरासन्, महा-राज, कार्ष्णायसमया गुड़ाः, ४६
चतुश्चक्रा द्वि-चक्राश् च शतघ्न्यो बहुला गदाः
चक्राणि च क्षुरान्तानि मण्डलानीव भास्वतः। ४७
शस्त्राकृतिभिर् आकीर्णम् अतीव, पुरुषर्षभ,
दृष्ट्वान्तरीक्षम् आविग्नाः पाण्डु-पाञ्चाल-सृञ्जयाः। ४८

४। अपरान्—अन्यान्, शत्रून्। प्रतीयुः [प्रति-इ+उस्]—प्रत्यभिजग्मुः। ४५। प्रादुश्चक्रे—बहिश्चक्रे, प्रकाशयामास। अभिसन्धाय—उद्दिश्य। ४६। प्रादुरासन्—आविर्बभूवुः, प्राकाशन्त। कार्ष्णायसमयाः—कृष्ण-लौह-निर्मिताः, चुम्बकमयाः। गुड़ाः—गुलिकाः। ४७। शतघ्नी [शत-हन्+अ+ई, १।१.]—लौह-कण्टकाच्छादिता बृहती यष्टिर् महती शिला वा।

आपूर्यमाणेनास्त्रेण सैन्ये क्षीयति च, प्रभो,
जगाम परमं त्रासं धर्म-पुत्रो युधिष्ठिरः। ४९

"यो ऽसाव् अत्यन्तम् अस्मासु कुर्वाणः सौहृदं परम्
हतस्, तदर्थे मरणं गमिष्यामि स-बान्धवः।" ५०

एवं ब्रुवति कौन्तेये, दाशार्हस् त्वरितस् ततः,
निवार्य सैन्यं बाहुभ्याम् इदं वचनम् अब्रवीत्,— ५१

"शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश् चावरोहत!
एष योगो ऽत्र विहितः प्रतिघाते महात्मनः।" ५२

विवर्धमानम् आलक्ष्य तद् अस्त्रं भीम-विक्रमम्,
पाण्डु-सैन्यम्, ऋते भीमं, सु-महद् भयम् आविशत्। ५३

तेषु निक्षिप्त-शस्त्रेषु वाहनेभ्यश् च्युतेषु च,
तदस्त्र-वीर्यं विपुलं भीम-मूर्धन्यथापतत्। ५४

तम् अब्रवीद् वासुदेवः,—"किम् इदं, पाण्डु-नन्दन,
वार्यमाणो ऽपि, कौन्तेय, यद् युद्धाद् न निवर्तसे?" ५५

एवम् उक्त्वा तु तं कृष्णो रथाद् भूमिम् अवर्तयत्,
निःश्वसन्तं यथा नागं क्रोध-संरक्त-लोचनम्। ५६

४९। आपूर्यमाणेनास्त्रेण—अनन्तेन अस्त्र-प्रवाहेण। क्षीयति—क्षीयमाणे। पञा। ५०। असौ—द्रोणः। ५२। प्रतिघाते महात्मनः—महात्मनः प्रतिघाताय, महात्मानम् [अश्वत्थामानम] प्रतिहन्तुम् (निवारयितुम्)। ५४। तेषु—पाण्डव-सैनिकेषु। ५६। अवर्तयत्—अवारोहयत्।

यदापकृष्टः स रथाद् न्यासितश् चायुधं भुवि,
ततो नारायणास्त्रं तत् प्रशान्तं शत्रु-तापनम् । ५७

ततो द्रौणिर्, धनुस् त्यक्त्वा, रथाद् प्रस्कन्द्य वेगितः,
धिग् धिक् सर्वम् इदं मिथ्येत्युक्त्वा संप्राद्रवद् रणात् । ५८

ततः प्रत्यवहारो ऽभूत् पाण्डवानां, विशां पते,
कौरवाणां च, दीनानां द्रोणे युधि निपातिते । ५९

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
द्रोण-पर्व ।

---

५७ । न्यासितः—त्याजितः ।

इति तारकालोके नाम भारत-वृत्तौ
द्रोण-पर्व ।

अथ

श्रीभारते

कर्ण-पर्व

प्रथमो ऽध्यायः

नवीन-सेनानीः

सञ्जय उवाच,—

स्वं मनः समवस्थाप्य, बाहु-वीर्यम् उपाश्रितः,
दुर्योधनो, महा-राज, राधेयम् इदम् अब्रवीत्,— १

"भीष्म-द्रोणाव् अति-रथौ हतौ सेनापती मम।
सेना-पतिर् भवान् अस्तु, ताभ्यां द्रविण-वत्तरः। २

वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनञ्जये
मानितौ च मया वीरौ, राधेय, वचनात् तव। ३

२। द्रविणवत्तरः—अधिकतर-[शौर्य-] सम्पत्तिवान्। ३। सापेक्षौ—पक्षपातिनौ।

पितामहत्वं संप्रेक्ष्य पाण्डु-पुत्रा महा-रणे
रक्षितास्, तात, भीष्मेण दिवसानि दशैव तु । ४
हते तस्मिन् महेष्वासे शर-तल्प-गते तथा,
त्वयोक्ते, पुरुष व्याघ्र, द्रोणो ह्यासीत् पुरः-सरः । ५
तेनापि रक्षिताः पार्थाः शिष्यत्वाद् इति मे मतिः ।
स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम् । ६
निहताभ्यां प्रधानाभ्यां ताभ्याम् अतुल-विक्रमः—
त्वत्-समं समरे योधं नान्यं पश्यामि, चिन्तयन् । ७
भवान् एव तु नः शक्तो विजयाय, न संशयः ।
पूर्वं मध्ये च पश्चाच् च तथैव विहितं हितम् । ८
स भवान् धुर्यवत् संख्ये धुरम् उद्वोढुम् अर्हसि ।
अभिषेचय सैनान्ये स्वयम् आत्मानम् आत्मना । ९
अवस्थितं रणे दृष्ट्वा पाण्डवास् त्वां महा-रथाः
द्रविष्यन्ति स-पाञ्चाला विष्णुं दृष्ट्वैव दानवाः ।" १०

---

४ । पितामहत्वम्—'आत्मनः' इति शेषः । ५ । पुरः-सरः—अग्र-णीः, सेना-पतिः । ७ । ताभ्याम् अतुल-विक्रमः—शौर्ये ताभ्याम् [अपि] ना-रहितः [असि] । ८ । विहितम्—[त्वया] सम्पादितम् । ९ । धुर्यः—अश्वादिः [भार-वाहकः] । धुरम् [धुर्, २।१]—धुराम्, भारम् । अश्व-पक्षे शकटादेर् अग्र-भागम् । सैनान्ये [सेनानी+अ, ७।१]— सैनापत्ये ।

राज्ञां मध्ये महा-बाहुः प्रीतात्मा स महा-बलः
हर्षयन्न् अब्रवीत् कर्णो दुर्योधनम् इदं वचः,— ११
"सेना-पतिर् भविष्यामि तवाहं, नात्र संशयः।
स्थिरो भव, महा-राज, जितान् विद्धि च पाण्डवान्।" १२
ततो ऽभिषिषिचुः कर्णं विधि-दृष्टेन कर्मणा
दुर्योधन-मुखा, राजन्, राजानो विजयैषिणः। १३
ब्राह्मणाः क्षत्रिया वैश्यास् तथा शूद्राश् च सम्मताः
तुष्टुवुस् तं महात्मानम् अभिषिक्तं वरासने। १४
ततो, ऽभिषिक्तो, राजेन्द्र, निष्कैर् गोभिर् धनेन च,
वाचयामास विप्राग्र्यान् राधेयः पर-वीर-हा। १५
"जय पार्थान् स-गोविन्दान्, सानुगांस् तान् महा-मृधे"
इति तं वन्दिनः प्राहुर् द्विजाश् च, पुरुषर्षभम्। १६
सैनापत्ये तु राधेयम् अभिषिच्य, सुतस् तव
अमन्यत तदात्मानं कृतार्थं, काल-चोदितः। १७
कर्णो ऽपि राज्ञः संप्राप्य सैनापत्यम्, अरिन्दमः
योगम् आज्ञापयामास सूर्यस्योदयनं प्रति। १८

१८। योगम्—सन्नहनम्, युद्ध-सज्जाम्। सूर्यस्योदयनं प्रति—सूर्योदयापेक्षया, सूर्योदय-सन्निहित-काले।

द्वितीयो ऽध्यायः

षोड़शो दिवसः—व्यर्थ-प्रयासः

महत्यपर-रात्रे च तव सैन्यस्य, मारिष,
योगो योग इति ह्याशु प्रादुरासीद् महा-स्वनः । १

कल्पतां नाग-मुख्यानां रथानां च वरूथिनाम्
संनह्यतां नराणां च वाजिनां च, विशां पते, २

क्रोशतां चैव योधानां, त्वरितानां परस्परम्,
बभूव तुमुलः शब्दो दिव-स्पृक् सु-महांस् ततः । ३

दृष्ट्वा कर्णं महेष्वासं रथ-स्थं रथिनां वरम्,
भानुमन्तम् इवोद्यन्तं तमो ऽघ्नन्तं, दुरासदम्, ४

न भीष्म-व्यसनं केचिद् नापि द्रोणस्य, मारिष,
नान्येषां, पुरुष-व्याघ्र, मेनिरे तत्र कौरवाः । ५

व्यूहं व्यूह्य महेष्वासो मकरं, शत्रु-तापनः
प्रत्युद्-ययौ तथा कर्णः पाण्डवान् विजिगीषया । ६

---

१ । महत्यपर-रात्रे—महति (गुरौ, गुरु-कृत्य-साधनोपयोगिनि) अपर-रात्रे (रात्रेर् अन्तिम-यामे) । २ । कल्पताम्—कल्पमानानाम्, सज्जीभवताम् । पआ. । वरूथिनाम् [वरूथ+इन्, ६।ब]—तनु-त्राणादिवताम् । संनह्यताम्—युद्धाय सज्जीभवताम् । ३ । त्वरितानाम् [त्वर्-इ+त, ६।ब] परस्परम्—त्वरायौ अन्योन्येन उत्तेजितानाम् । दिव-स्पृक्—आकाश-स्पर्शी । ४ । भानुमन्तम् [भानु (किरण)+मत्, २।१]—सूर्यम् । उद्यन्तम् [उत्-इ+अत् २।१]—ऊर्ध्वं गच्छन्तम् । ५ । व्यसनम्—[जीवितात्] भ्रंशम्, पातम् । ६ । विजिगीषया [वि-जि+स+आ, ३।१]—विजेतुम्

धनञ्जयम् अभिप्रेक्ष्य धर्म-राजो ऽब्रवीद् इदम्,—
"पश्य, पार्थ, यथा सेना धार्तराष्ट्रीह संयुगे"। ७

भ्रातुर् एतद् वचः श्रुत्वा, पाण्डवः श्वेत-वाहनः
अर्ध-चन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम्। ८

दृष्ट्वा व्यूढां तव चमूं सूत-पुत्रेण संयुगे,
निहतान् पाण्डवान् मेने धार्तराष्ट्रः स-बान्धवः। ९

तथैव पाण्डवीं सेनां व्यूढां दृष्ट्वा युधिष्ठिरः,
धार्तराष्ट्रान् हतान् मेने स-कर्णान् वै, जनाधिपः। १०

ततः प्रववृते युद्धं नर-वारण-वाजिनाम्
रथानां च, महा-राज, अन्योन्यम् अभिनिघ्नताम्। ११

द्रौणिर् एको ऽभ्ययात् तूर्णं भीमसेनं महा-बलम्।
ततः समागमो घोरो बभूव सहसा तयोः। १२

शरैः शरांस् ततो द्रौणिः संवार्य युधि, पाण्डवम्
ललाटे ऽभ्याहनद्, राजन्, नाराचेन, स्मयन्न् इव। १३

ललाट-स्थं ततो बाणं धारयामास पाण्डवः
यथा शृङ्गं वने दृप्तः खड्गो धारयते, नृप। १४

इच्छया। ७। यथा—यादृशी। ११। अभिनिघ्नताम् [अभि-नि-हन् + अत्, ६।ब]—समीपं गत्वा विनाशयताम्। १४। खड्गः—खड्गी, गण्डकः, a rhinoceros. গণ্ডার। अंश्यर्थे अंश-प्रयोगः।

ततो द्रौणिं रणे भीमो, यतमानं, पराक्रमी,
त्रिभिर् विव्याध नाराचैर् ललाटे विस्मयन्न् इव । १५

ललाटस्थैस् ततो बाणैर् ब्राह्मणो ऽसौ व्यशोभत,
प्रावृषीव यथा सिक्तस् त्रि-शृङ्गः पर्वतोत्तमः । १६

ततो घोरम्, महा-राज, अस्त्र-युद्धम् अवर्तत,
ग्रह-युद्धं यथा घोरं प्रजा-संहरणे ह्यभूत् । १७

बाणाभिघातात् संजज्ञे तत्र, भारत, पावकः
स-विस्फुलिङ्गो दीप्तार्चिर् यो ऽदहद् वाहिनी-द्वयम् । १८

ततः क्रुद्धौ, महा-राज, बाणौ गृह्य, महाहवे
उभौ चिक्षिपतुस् तूर्णम् अन्योन्यस्य वधैषिणौ । १९

तौ परस्पर-वेगाच् च शराभ्यां च भृशाहतौ
निपेततुर् महा-वीर्यौ रथोपस्थे तयोस् तदा । २०

ततस् तु सारथिर् ज्ञात्वा द्रोण-पुत्रम् अचेतनम्
अपोवाद रणाद्, राजन्, सर्व-सैन्यस्य पश्यतः । २१

तथैव पाण्डवं, राजन्, विह्वलन्तं मुहुर् मुहुः
अपोवाह रथेनाजौ विशोकः, शत्रु-तापनम् । २२

श्वेताश्वो ऽपि, महा-राज, व्यधमत् तावकं बलम्,
यथा वायुः समासाद्य तूल-राशिं, समन्ततः । २३

१५ । विस्मयन्—विस्मयमानः, दर्पेण उपहसन् । पआ. । २२ । विह्वलन्तम्—स्वाङ्गानि धारयितुम् अशक्नुवन्तम्, विक्लवी-भवन्तम् ।

ततः कर्णं पुरस्कृत्य, त्वदीया युद्ध-दुर्मदाः
पुनर् आवृत्य संग्रामं चक्रुर् देवासुरोपमम् । २४

अथ तव, नर-देव, सैनिकास्
तव च सुताः सुर-सूनु-सन्निभाः—
अ-मित-बल-पुरः-सरा रणे
कुरु-वृषभाः शिनि-पौत्रम् अभ्ययुः । २५

अथ विस्फार्य गाण्डीवं, रथे नृत्यन्न् इवार्जुनः
शर-संबाधम् अकरोत् खं दिशः प्रदिशस् तथा । २६

तम् अन्तकम् इव क्रुद्धम् अ-निवार्यं महा-रथम्
दुर्योधनो ऽभ्ययाद् एको निघ्नन् बाणैर् अ-जिह्मगैः । २७

तस्यार्जुनो धनुः सूतम् अश्वान् केतुं च सायकैः
हत्वा सप्तभिर्, एकेन छत्रं चिच्छेद पत्रिणा । २८

नवमं च समाधाय व्यसृजत् प्राण-घातिनम्
दुर्योधनायेषु-वरं । तं द्रौणिः सप्तधाच्छिनत् । २९

---

२४ । आवृत्य [आ-वृत्+य]—प्रत्यावृत्य, घूर्णित्वा । २५ । सूनुः [सू+नु, १।१]—पुत्रः । २६ । शर-संबाधम्—बाण-संरुद्धम्, बाणावरुद्धम् । दिशः प्रदिशस् तथा—दिशश् चतस्रः प्राची (पूर्वा) अवाची (दक्षिणा) प्रतीची (पश्चिमा) उदीची (उत्तरा) चेति । विदिशो ऽपि चतस्रः आग्नेयी (दक्षिण-पूर्वा) नैर्ऋती (दक्षिण-पश्चिमा) वायवी (उत्तर-पश्चिमा) ऐशानी (पूर्वोत्तरा) चेति । विदिक्, उपदिशम्—दिशोर् मध्यम् ।

ततो द्रौणेर् धनुश् छित्त्वा हत्वा चाश्वरथान् छरः
दुःशासनस्येष्वसनं छित्त्वा राधेयम् अभ्ययात् । ३०
अथ सात्यकिम् उत्सृज्य त्वरन् कर्णोऽर्जुनं त्रिभिः
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनः पुनः । ३१
ततः प्रवीराः पार्थानां सर्वे कर्णम् अपीडयन्,
परिवार्य रणे कर्णं नाना शस्त्रैर् अवाकिरन्,
भाषन्तो वाग्भिर् उग्राभिः, सर्वे कर्ण-वधे धृताः । ३२
तां शर-वृष्टिं बहुधा कर्णश् छित्त्वा शितैः शरैः
अपोवाहास्त्र-वीर्येण, द्रुमं भङ्क्त्वेव मारुतः । ३३
रथिनः स-महामात्रान् गजन् अश्वान् स-सादिनः
पत्ति-व्रातांश् च संक्रुद्धो निघ्नन् कर्णो व्यदृश्यत । ३४
तद् वध्यमानं पाण्डूनां बलं कर्णास्त्र-तेजसा
वि-शस्त्र-पत्र-देहासु प्राय आसीत् पराङ्-मुखम् । ३५
अथ कर्णास्त्रम् अस्त्रेण प्रतिहत्यार्जुनः स्मयन्
दिशं खं चैव भूमिं च प्रावृणोच् छर-वृष्टिभिः । ३६

३० । इष्वसनम् [इषु (बाण) + अस् (क्षेपणे) + अन, २।१]—धनुः । ३१ । त्वरन्—त्वरमाणः । पआ. । ३२ । भाषन्तः—भाषमाणाः । पआ. । धृताः—व्यवसिताः, कृत-निश्चयाः । ३४ । महामात्राः—हस्ति-पकाधिपाः । पत्ति-व्रातान्—पदाति-समूहान् । ३५ । वि-शस्त्र-पत्र-देहासु—विगत-शस्त्र-वाहन-देह-प्राणम् ।

मुसलानीव संपेतुः परिघा इव चेषवः,
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि चापरे । ३७

तैर् वध्यमानं तत्-सैन्यं स-पत्त्यश्व-रथ-द्विपम्,
निमीलिताक्षम्, अत्यर्थं बभ्राम च ननाद च । ३८

निष्कैवल्यं तदा युद्धं प्रापुर् अश्व-नर-द्विपाः ।
हन्यमानाः शरैर्, आर्तास् तदा भीताः प्रदुद्रुवुः । ३९

त्वदीयानां तदा युद्धे संसक्तानां जयैषिणाम्
गिरिम् अस्तं, समासाद्य, प्रत्यपद्यत भानुमान् । ४०

तमसा च, महा-राज, रजसा च विशेषतः
न किञ्चित् प्रत्यपश्याम शुभं वा यदि वाशुभम् । ४१

ते, त्रस्यन्तो महेष्वासा रात्रि-युद्धस्य, भारत,
अप-यानं ततश् चक्रुः, सहिताः सर्व-योधिभिः । ४२

कौरवेष्वपयातेषु तदा, राजन्, दिन-क्षये
जयं सु-मनसः प्राप्य पार्थाः स्व-शिविरं ययुः, ४३

वादित्र-शब्दैर् विविधैः सिंह-नादैः स-गर्जितैः
परान् उपहसन्तश् च स्तुवन्तश् चाच्युतार्जुनौ । ४४

---

३८ । बभ्राम—जुघूर्णा । ३९ । निष्कैवल्यम्—निर्मोक्षं, निर्मोचनम्, निश्चित-मरणम् । ४० । प्रत्यपद्यत—आशिश्राय । ४२ । रात्रि-युद्धस्य—रात्रि-युद्धात् । पा. १।४।२५

ततो रक्षः-पिशाचाश् च श्वापदाश् चैव सङ्घशः
जग्मुर् आयोधनं घोरं रुद्रस्याक्रीड़-सन्निभम् । ४५

तृतीयो ऽध्यायः

सप्त-दशो दिवसः—राज-सारथिः

प्रभातायां तु रजन्यां कर्णो राजानम् अभ्ययात् ;
समेत्य च महा-बाहुर् दुर्योधनम् अथाब्रवीत्,— १

"अद्य, राजन्, समेष्यामि पाण्डवेन यशस्विना ।
निहनिष्यामि तं वीरं, स वा मां निहनिष्यति । २

बहुत्वाद् मम कार्याणां तथा पार्थस्य, भारत,
नाभूत् समागमो, राजन्, मम चैवार्जुनस्य च । ३

इदं तु मे यथा-प्रज्ञं शृणु वाक्यं, विशाम् पते,
अ-निहत्य रणे पार्थं नाहम् एष्यामि, भारत । ४

कार्यस्य महतो भेदे लाघवे दूर-पातने
सौष्ठवे चास्त्र-पाते च सव्यसाची न मत्-समः । ५

प्राणे शौर्ये च विज्ञाने विक्रमे चापि, भारत,
निमित्त-ज्ञान-योगे च सव्य-साची न मत्-समः । ६

---

४५ । आयोधनम्—युद्ध-क्षेत्रम् । आक्रीड़ः—क्रीड़ा-क्षेत्रम् ।

५ । कार्यस्य भेदे—[परकीय-] कृत्यस्य (कर्तव्य-कर्मणः) विनाशे । लाघवे—शैघ्र्ये । सौष्ठवे—कौशले । ६ । प्राणे—दैहिक-बले । शौर्ये—मानसिक-बले । विज्ञाने—अस्त्र-शिक्षायाम् । विक्रमे—अस्त्राणां स-फल-धारणे । निमित्त-ज्ञान-योगे—लक्ष्य-सम्बन्धावधारणे ।

तस्य दिव्यं धनुः-श्रेष्ठं गाण्डीवम् अजरं युधि ।
विजयं च महद् दिव्यं ममापि धनुर् उत्तमम् । ७
तत्राहम् अधिकः पार्थाद् धनुषा तेन, पार्थिव ।
येन चाभ्यधिको वीरः पाण्डवस् तद् निबोध मे । ८
रश्मि-ग्राहश् च दाशार्हः सर्व-लोक-नमस्कृतः ।
अग्नि-दत्तश् च वै दिव्यो रथः काञ्चन-भूषणः । ९
अच्छेद्याः सर्वतो, वीर, वाजिनश् च मनो-जवाः ।
एभिस् त्रिभिर् अहं हीनो योद्धुम् इच्छामि पाण्डवम् । १०
अयं तु सदृशः शौरेः शल्यः समिति-शोभनः
सारथ्यं यदि मे कुर्याद्, ध्रुवस् ते विजयो भवेत् । ११
यथाश्व-हृदयं वेद दाशार्हः पर-वीरहा,
तथा शल्यो विजानीते हय-ज्ञानं महा-रथः । १२
एवं कृते, रथ-स्थो ऽहं गुणैर् अभ्यधिको ऽर्जुनात्
भवे, युधि जयेयं च फाल्गुनं, कुरु-सत्तम । १३
पुत्रस् तव, महा-राज, मद्र-राजं महा-रथम्
विनयेनोपसंगम्य प्रणयाद् वाक्यम् अब्रवीत्,— १४
"बलवन्तो महात्मानः कौन्तेयाः सत्य-विक्रमाः
बल-शेषं न हन्युर् मे यथा तत् कुरु, पार्थिव । १५

---

१३ । भवे—भवामि । जाआ । जयेयम्—जेतुं शक्नोमि । १४ । विनयेन—नत्या । प्रणयात्—सौहृद्यात् ।

शल्य, कर्णो ऽर्जुनेनाद्य योद्धुम् इच्छति संयुगे।
तस्मिन् जयाशा विपुला मम, मद्र-जनाधिप।
तस्याभीषु-ग्रहो वरो नान्यो ऽस्ति भुवि कश्चन। १६
पार्थस्य समरे कृष्णो यथाभीषु-ग्रहो वरः,
तथा कर्ण-रथे, राजंस्, त्वम् अभीषु-ग्रहो भव। १७
तेन युक्तो रणे पार्थो रक्ष्यमाणश् च, मारिष,
यानि कर्माणि कुरुते प्रत्यक्षाणि तवैव तत्। १८
यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवम्,
तथा भवान् परित्रातु कर्णं वैकर्तनं रणे।" १९
क्रोध-रक्ते महा-नेत्रे परिवृत्य, महा-भुजः
कुलैश्वर्य-श्रुत-बलैर् दृप्तः शल्यो ऽब्रवीद् इदम्,— २०
"अहं मूर्धाभिषिक्तो हि राजर्षि-कुल-जो नृपः
महा-रथः समाख्यातः सेव्यः स्तुत्यश् च वन्दिनाम्। २१
सो ऽहम् एतादृशो भूत्वा नेहारि-बल-सूदनः
सूत-पुत्रस्य संग्रामे सारथ्यं कर्तुम् उत्सहे। २२
अवमानम् अहं प्राप्य न योत्स्यामि कथञ्चन।
आपृच्छे त्वाद्य, गान्धारे, गमिष्यामि गृहाय वै।" २३
एवम् उक्त्वा, महा-राज, शल्यः समिति-शोभनः
उत्थाय प्रययौ तूर्णं राज-मध्याद्, अमर्षितः। २४

१६। अभीषु-ग्रहः—अश्व-रश्मि-ग्राही। २०। परिवृत्य—घूर्णयित्वा। २२। उत्सहे—शक्नोमि।

प्रणयाद् बहुमानाच् च तं निगृह्य सुतस् तव
अब्रवीद् मधुरं वाक्यं साम्ना, सर्वार्थ-साधकम्,— २५

"यथा, शल्य, त्वम् आत्थेदम् एवम् एतद् अ-संशयम्।
अभिप्रायस् तु मे कश्चित्। तं निबोध, जनेश्वर। २६

न कर्णो ऽभ्यधिकस् त्वत्तो, न चान्ये चैव पार्थिवाः।
न च, मद्रेश्वर, त्वां वै कृष्णः सोढुं च शक्ष्यति। २७

ऋतम् एव हि पूर्वास् ते वदन्ति पुरुषोत्तमाः,
तस्माद् आर्तायनिः प्रोक्तो भवान् इति मतिर् मम। २८

शल्य-भूतस् तु शत्रूणां यस्मात् त्वं युधि, मानद,
तस्माच् छल्येति ते नाम कथ्यते पृथिवी-तले। २९

यद् एतद् व्याहृतं पूर्वं भवता, भूरि-दक्षिण,
तद् एव कुरु, धर्म-ज्ञ, मदर्थं—यद् यद् उच्यते। ३०

न च त्वत्तो हि राधेयो न चाहम् अपि वीर्यवान्।
वृणे ऽहं त्वां हयाग्र्याणां यन्तारम् इह संयुगे। ३१

कर्णो ह्यभ्यधिकः पार्थाद् अस्त्रैर् एव, नरर्षभ।
भवान् अभ्यधिकः कृष्णाद् अश्व-ज्ञाने बले तथा। ३२

यथाश्व-हृदयं वेद वासुदेवो महा-मनाः,
द्विगुणं त्वं तथा वेत्सि, मद्र-राजेश्वरात्मज। ३३

२८। आर्तायनिः [ऋतायन+इ, ११]—सत्य-सन्ध-वंश्यः। ऋतम्—सत्यम्। २९। शल्येति—शल्य इति। विसर्ग-लोपे पुनः सन्धिर् आर्षः। ३३। मद्र-देशे हि अश्वा उत्पद्यन्ते, न तु द्वारकायाम्। अत एव

शल्य उवाच,—

यद् मां ब्रवीषि, गान्धारे, मध्ये सैन्यस्य, कौरव,
विशिष्टं देवकी-पुत्राद्, प्रीतिमान् अस्म्यहं त्वयि। ३४

एष सारथ्यम् आतिष्ठे राधेयस्य यशस्विनः
युध्यतः पाण्डवाग्र्येण यथा त्वं, वीर, मन्यसे। ३५

समयश् च हि मे, वीर, कश्चिद् वैकर्तनं प्रति,
उत्सृजेयं यथा-श्रद्धम् अहं वाचो ऽस्य सन्निधौ। ३६

सञ्जय उवाच,—

तथेति, राजन्, पुत्रस् ते सह कर्णेन, भारत,
अब्रवीद् मद्र-राजस्य मतं, भरत-सत्तम। ३७

चतुर्थोऽध्यायः।

महोत्पाताः।

ततः कर्णस्य दुर्धर्षं स्यन्दन प्रवरं महत्
आरुरोह महा-तेजाः शल्यः, सिंह इवाचलम्। १

ततः शल्यास्थितं दृष्ट्वा, कर्णः स्व-रथम् उत्तमम्
अध्यतिष्ठद्; यथाम्भोदं विद्युद्वन्तं दिवाकरः। २

मद्र-राजः शल्यो ऽश्व-रहस्यं कृष्णाद् विशेषतरं जानातीति आशयः। द्वि-गुणम्—अनिर्देश्यार्थे निर्दिष्टस्य प्रयोगः। ३६। उत्सृजेयम्—क्षिपेयम्। सम्भावनायां लिङ्। यथा-श्रद्धम्—यथेच्छम्। २। अम्भोदम्—मेघम्।

दृष्ट्वा कर्णं महेष्वासं युयुत्सुं समवस्थितम्,
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः समन्ततः। ३

ततो दुन्दुभि-निर्घोषैर् भेरीणां निनदेन च
निर्ययुस् तावका युद्धे, मृत्युं कृत्वा निवर्तनम्। ४

प्रयाते तु ततः कर्णे योधेषु मुदितेषु च
चचाल पृथिवी, राजन्, ररास च सु-विस्वरम्। ५

निश्चरन्तो व्यदृश्यन्त सूर्यात् सप्त महा-ग्रहाः,
उल्का-पाताश् च संजज्ञुर् दिग्-दाहाश्चैव दारुणाः,
शुष्काशन्यश् च संपेतुर्, ववुर् वाताश् च भैरवाः। ६

मृग-पक्षि-गणाश् चैव पृतनां बहुशस् तव
अप-सव्यं तदा चक्रुर्, वेदयन्तो महाभयम्। ७

प्रस्थितस्य च कर्णस्य निपेतुस् तुरगा भुवि ;
अस्थि-वर्षं च पतितम् अन्तरीक्षाद् भयानकम्। ८

जज्वलुश् चैव शस्त्राणि ध्वजाश् चैव चकम्पिरे,
अश्रूणि च व्यमुञ्चन्त वाहनानि, विशाम् पते। ९

एते चान्ये च बहव उत्पातास् तत्र, मारिष,
समुत्पेतुर् विनाशाय कौरवाणां, सु-दारुणाः। १०

न च तान् गणयामासुः सर्वे दैवेन मोहिताः।
प्रस्थितं सूत-पुत्रं च जयेत्यूचुर् नराधिपाः। ११

५। ररास—शब्दायाञ्चक्रे। ६। निश्चरन्तः—परिभ्रमण-मार्गं त्यक्त्वा दूरतरं गच्छन्तः। ७। अपसव्यं चक्रुः—प्रदक्षिणं चक्रुः। वेदयन्तः—ज्ञापयन्तः।

प्रयान् एव, ततः कर्णो, हर्षयन् वाहिनीं तव,
एकैकं समरे दृष्ट्वा पाण्डवं पर्यपृच्छत,— १२
"यो ममाद्य महात्मानं दर्शयेच् छ्वेत-वाहनम्,
शतं दद्यां गवां तस्मै नैत्यकं कांस्य-दोहनम्। १३
तथाप्यस्मै पुनर् दद्यां स्त्रीणां शतम् अलंकृतम्,
श्यामानां निष्क-कण्ठीनां गीत-वाद्य-विपश्चिताम्। १४
अन्यं तस्मै वरं दद्यां श्वेतान् पञ्च शतान् हयान्
हेम-भाण्ड-परिच्छन्नान् सु-मृष्ट-मणि-भूषणान्। १५
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम्
युक्तं परम-काम्बोजैर्, यो मे ब्रूयाद् धनञ्जयम्। १६
अन्यं तस्मै वरं दद्यां वैश्य-ग्रामांश् चतुर्दश
सु-स्फीतान् धन-संयुक्तान् प्रत्यासन्न-वनोदकान्।" १७
एता वाचः सु-बहुशः कर्ण उच्चारयन्, युधि
दध्मौ सागर-सम्भूतं सु-स्वरं शङ्खम् उत्तमम्। १८
विकत्थमानं च तदा राधेयम् अरि-कर्षणम्
मद्र-राजः प्रहस्येदं वचनं प्रत्यभाषत,— १९

१३। नैत्यकम्—नित्य-(दुग्ध-दान-)शीलम्। कांस्य-दोहनम्—[स्वास्थ्यकर-]कांस्य-दोहन-पात्र-समन्वितम्। १४। श्यामानाम्—अ-प्रसूतानाम्। विपश्चिताम्—पण्डितानाम्। १५। श्वेतान्... हयान्—श्वेतानां हयानाम् (अश्वानाम्) पञ्च शतानि। भाण्डम्—आभरणम्। परिच्छन्नान्—भूषितान्। १६। परम-काम्बोजैः—श्रेष्ठैः काम्बोज-देशजाश्वैः।

"बाल्याद् इह त्वं त्यजसि वसु, वैश्रवणो यथा ।
अ-यत्नेनैव, राधेय, द्रष्टास्यद्य धनञ्जयम् । २०

अ-प्रार्थितं प्रार्थयसे ! सुहृदो न हि सन्ति ते
ये त्वां निवारयन्त्याशु, प्रपतन्तं हुताशने । २१

यदा दिव्यं धनुर् आदाय, पार्थः,
प्रतापयन् पृतनां, सव्यसाची,
त्वां मर्दयिष्यत्यसुखैः पृषत्कैस्,
तदा पृच्छां त्यक्ष्यसे पाण्डवस्य । २२

क्रुद्धं सिंहं केशरिणं बृंहन्तं
बालो मूढः क्षुद्र-मृगस् तरस्वी
समाह्वयेद् धृष्टम् उपेत्य योद्धुं,
तथा त्वम् अद्याह्वयसे हि पार्थम् । २३

ईषा-दन्तं महा-नागं प्रभिन्न-करटा-मुखम्
शशकाह्वयसे युद्धे, कर्ण, पार्थं धनञ्जयम् । २४

ऋषभं दुन्दुभि-ग्रीवं तीक्ष्ण-शृङ्गं प्रहारिणम्,
वत्स, आह्वयसे युद्धे, कर्ण, पार्थं धनञ्जयम् । २५

---

२० । बाल्यात्—मौढ्यात् । २१ । अ-प्रार्थितम्—अ-प्रार्थयितव्यम् । आशंसायां भूतवच्चेति भविष्यति भूतवत् प्रत्ययः । पा ३।३।१३२ २२ । त्यक्ष्यसे—त्यक्ष्यसि । आआ । २३ । बृंहन्तम्—गर्जन्तम् । २४ । ईषा-दन्तः [ईषेव (लाङ्गल-दण्ड इव) दन्तो यस्य तादृशः] —दीर्घ-दन्तः, उदग्र-दन्तः । प्रभिन्न-करटा-मुखम्—मद-स्रावि-गण्ड-युक्त-मुख-विशिष्टम् ।

यथा च स्व-गृ-हस्थः श्वा व्याघ्रं वन-गतं भषेत्,
तथा त्वं भषसे, कर्ण, नर-व्याघ्रं धनञ्जयम्। २६
यावद् गाण्डीव-निर्घोषं न शृणोषि महाहवे,
तावद् एव त्वया, कर्ण, शक्यं वक्तुं यथेच्छसि। २७
रथ-शब्द-धनुः-शब्दैर् नादयन्तं दिशो दश,
नर्दन्तम् इव शार्दूलं, दृष्ट्वा क्रोष्टा भविष्यसि।" २८
अधिक्षिप्तस् तु, राधेयः, शल्येनामित-तेजसा,
शल्यम् आह, सु-संक्रुद्धो, वाक्-शल्यम् अवधारयन्,— २९
"गुणान् गुणवतां, शल्य, गुणवान् वेत्ति, नागुणः।
त्वं तु, सर्वैर् गुणैर् हीनः, किं ज्ञास्यसि गुणागुणम्? ३०
अर्जुनस्य महास्त्राणि क्रोधं वीर्यं धनुः शरान्
अहं शल्याभिजानामि, विक्रमं च महात्मनः। ३१
तथा कृष्णस्य माहात्म्यम् ऋषभस्य मही-क्षिताम्
यथाहं, शल्य, जानामि न त्वं जानासि तत् तथा। ३२
एवम् एवात्मनो वीर्यम् अहं वीर्यं च पाण्डवे
जानन्न् एवाह्वये युद्धे, शल्य, गाण्डीव-धारिणम्। ३३
पाप-देश-ज, दुर्बुद्धे, क्षुद्र, क्षत्रिय-पांसन,
सुहृद् भूत्वा रिपुः किं मां कृष्णाभ्यां भीषयस्यलम्? ३४

२९। वाक्-शल्यम् अवधारयन्—वाक्-शल्यत्वात् अयं शल्य-नामा इति निश्चिन्वन्। ३४। कृष्णाभ्याम्—वासुदेवार्जुनाभ्याम्। भीषयसि—भाययसि। आर्षं। अलम्—वृथा।

वासुदेव-सहस्रं वा फाल्गुनानां शतानि वा
अहम् एको हनिष्यामि, जोषम्-आस्स्व, कु-देश-ज ! ३५
स्त्रियो बालाश् च वृद्धाश् च, प्रायः क्रीड़ागता जनाः,
या गाथाः संप्रगायन्ति, कुर्वन्तो ऽध्ययनं यथा, ३६
ता गाथाः शृणु मे, शल्य, मद्रकेषु दुरात्मसु ।
श्रुत्वा चैक-मना, मूढ़, क्षम वा ब्रूहि वोत्तरम् । ३७
मित्र-ध्रुग् मद्रको नित्यं । यो नो द्वेष्टि स मद्रकः ।
दुरात्मा मद्रको नित्यं नित्यम् आनृतिको ऽनृजुः । ३८
पिता पुत्रश् च माता च श्वश्रू-श्वशुर-मातुलाः
जामाता दुहिता भ्राता नप्तान्ये ये च बान्धवाः ३९
वयस्याभ्यागताश् चान्ये, दासी-दासं च सङ्गतम्
पुंभिर् विमिश्रा नार्यश् च ज्ञाताज्ञाताः स्वयेच्छया ४०
येषां गृहेष्वशिष्टानां सक्तु-मत्स्याशिनां तथा
पीत्वा सीधु स-गो-मांसं क्रन्दन्ति च हसन्ति च ४१
गायन्ति चाप्यबद्धानि प्रवर्तन्ते च कामतः
काम-प्रलापिनो ऽन्योन्यं, तेषु धर्मः कथं भवेत् ? ४२

३५। जोषम् आस्स्व—मौनी तिष्ठ। ३६। क्रीड़ागताः—लीलया आगताः। ३७। मद्रकेषु—कुत्सितान् मद्रान् अधिकृत्य। विषयाधिकरणम्। क्षम—क्षमस्व। पआ। ३८। आनृतिकः [अनृत+इक, ११]—मिथ्या-परायणः। अनृजुः—अ-सरलः, कुटिलः। ४०। पुंभिः—पुरुषैः। विमिश्राः—सङ्गताः, संमिलिताः। ४१। सीधु—मद्यम्।

वासांस्युत्सृज्य नृत्यन्ति स्त्रियो या मद्य-मोहिताः
मैथुने ऽसंयताश् चापि—यथा-काम-वराश् च ताः—
तासां पुत्रः कथं धर्मं मद्रको वक्तुम् अर्हति ? ४३
यास् तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्र-दशेरकाः
तासां विभ्रष्ट-धर्माणां निर्लज्जानां ततस् ततः—
त्वं पुत्रस् तादृशीनां हि धर्मं वक्तुम् इहेच्छसि ! ४४
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम्,
यद् आजौ निहतः शेते, सद्भिः समभिपूजितः । ४५
सो ऽयं प्रियः सखा चास्मि धार्तराष्ट्रस्य धीमतः ।
तदर्थे हि मम प्राणा यच् च मे विद्यते वसु । ४६
कामं खलु न शक्यो ऽहं त्वद्-विधानां शतैर् अपि
संग्रामाद् विमुखः कर्तुं, धर्मज्ञ इव नास्तिकैः । ४७

सीधोः पानं गुरु-तल्पापमर्दो
भ्रूण-हत्या पर-वित्तापहारः
येषां धर्मस्, तान् प्रति नास्त्य-धर्मः ।
आरट्टजान् पञ्च-नदान् धिग् अस्तु । ४८

शल्य उवाच,—

आतुराणां परित्यागः स्व-दार-सुत-विक्रयः
अङ्गे प्रवर्तते, कर्ण, येषाम् अधिपतिर् भवान् । ४९

---

४३ । यथा-काम-वराः—अनियन्त्रित-कामानुगत्या पुरुष-सङ्गं प्रार्थयमानाः । ४४ । प्रमेहन्ति—मूत्रयन्ति । दशेरकाः—गर्दभाः । ४८ । आरट्टाः—इदानीन्तन-पाञ्जाव-प्रदेशः । ४९ । अङ्गे—अङ्गेषु,

रथाति-रथ-संख्यायां यत् त्वां भीष्मस् तदाब्रवीत्
तान् विदित्वात्मनो दोषान् निर्मन्युर् भव, मा क्रुधः ! ५०

सर्वत्र ब्राह्मणाः सन्ति सन्ति सर्वत्र क्षत्रियाः
वैश्याः शूद्रास् तथा, कर्ण, स्त्रियः साध्व्यश् च सु-व्रताः । ५१

पर-वाच्येषु निपुणः सर्वो भवति सर्वदा ।
आत्म-वाच्यं न जानीते, जानन्न् अपि च मुह्यति । ५२

सर्वत्र सन्ति राजानः स्वं स्वं धर्मम् अनुव्रताः,
दुर्मनुष्यान् निगृह्णन्ति । सन्ति सर्वत्र धार्मिकाः । ५३

न, कर्ण, देश-सामान्यात् सर्वः पापं निषेवते ।
यादृशाः स्व-स्वभावेन, देशांस तांस् तादृशान् विदुः । ५४

सञ्जय उवाच,—

ततो दुर्योधनो राजा कर्ण-शल्याव् अवारयत्,
सखि-भावेन राधेयं शल्यं स्वाञ्जल्यकेन च । ५५

ततो निवारितः कर्णो धार्तराष्ट्रेण, मारिष,
प्रहस्य तत्र, राजेन्द्र, याहि शल्येत्यचोदयत् । ५६

गङ्गां सरयूं चान्तरा इदानीन्तने भागलपुर-प्रदेशे । एक-वचनम् आर्षम् । ५० । *Cf*. उपरिष्टात् ५।२४।४-६ ५६ । स्वाञ्जल्यकेन—आत्मनः अञ्जलि-कर्मणा । 'सौजन्यकेन' इति अर्वाचां पाठः ।

पञ्चमो ऽध्यायः ।

राज्ञो ऽपसरणम् ।

ततः परानीक-सहं व्यूहम् अ-प्रतिमं कृतम्
समीक्ष्य कर्णः पार्थानां, धृष्टद्युम्नाभिरक्षितम्, १
प्रययौ रथ-घोषेण सिंह-नाद-रवेण च
वादित्राणां च निनदैः कम्पयन्न् इव मेदिनीम् । २
वेपमान इव क्रोधाद्, युद्ध-शौण्डः परन्तपः
प्रतिव्यूह्य महा-तेजा यथावद्, भरतर्षभ, ३
व्यधमत् पाण्डवीं सेनाम्, आसुरीं मघवान् इव,
युधिष्ठिरं चाभ्यहनद्, अप-सव्यं चकार ह । ४
ब्रह्मेशानेन्द्र-वरुणान् क्रमशो यो ऽवहत् पुरा,
तम् आद्यं रथम् आस्थाय प्रयातौ केशवार्जुनौ । ५
अथ, तं रथम् आयान्तं दृष्ट्वा चाद्भुत-दर्शनम्,
उवाचाधिरथिं शल्यः पुनस् तं युद्ध-दुर्मदम्,— ६
"अयं स रथ आयाति श्वेताश्वः कृष्ण-सारथिः ।
श्रूयते तुमुलः शब्दो यथा मेघ-स्वनो महान् । ७
एष संशप्तकाहूतस् तान् एवाभिमुखो गतः,
करोति कदनं चैषां संग्रामे द्विषतां बली ।" ८
कर्णो ऽपि, निशितैर् बाणैर् विनिहत्य महा-चमूम्
प्रमृद्य च रथ-श्रेष्ठान्, युधिष्ठिरम् अपीड़यत् । ९

ततस् ते पाण्डवा, राजन्, शिखण्डी च स-सात्यकिः,
राधेयात् परिरक्षन्तो, राजानं पर्यवारयन्। १०

तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे
यत्ताः शूरा महेष्वासाः पर्यरक्षन्त सर्वशः। ११

नानायुध-सहस्राणि प्रेषितान्यरिभिर् वृषः
छित्त्वा बाण-शतैर् उग्रैस् तान् अविध्यद् अ-संभ्रमात्। १२

अथ वैकर्तनं कर्णं रणे क्रुद्धम् इवान्तकम्
रुरुधुः पाण्डु-पाञ्चाला, व्याधिं मन्त्रौषधैर् इव। १३

ततो युधिष्ठिरः कर्णम् अ-दूर-स्थं निवारितम्
अब्रवीत्, पर-वीरघ्नं, क्रोध-संरक्त-लोचनः,— १४

"सदा स्पर्धसि संग्रामे फाल्गुनेन तरस्विना,
तथास्मान् बाधसे नित्यं, धार्तराष्ट्र-मते स्थितः। १५

यद् बलं यच् च ते वीर्यं प्रद्वेषो यश् च पाण्डुषु,
तत् सर्वं दर्शयस्वाद्य, पौरुषं महद् आस्थितः।" १६

ततः पूर्णायतोत्कर्षं यम-दण्ड-निभं शरम्
मुमोच त्वरितो राजा सूत-पुत्र-जिघांसया। १७

स तु, वेगवता मुक्तो, बाणो वज्राशनि-स्वनः
बिभेद सहसा कर्णं सव्य-पार्श्वे, महा-रथम्। १८

११। पर्यरक्षन्त—पर्यरक्षन्। आंआ। १२। असम्भ्रमात्—आवेगं विना। १५। स्पर्धसि—स्पर्धसे, परिभवेच्छया योद्धुम् इच्छसि। पआ।

स तु, तेन प्रहारेण पीड़ितः, प्रमुमोह वै,
स्रस्त-गात्रो महा-बाहुर्, धनुर् उत्सृज्य, स्यन्दने १९
गतासुर् इव निश्चेताः शल्यस्याभिमुखो ऽपतत्।
राजापि भूयो नाजघ्ने कर्णं पार्थ-हितेप्सया। २०
प्रतिलभ्य तु राधेयः संज्ञां नातिचिराद् इव,
अवारयद् अमेयात्मा पाण्डवं निशितैः शरैः। २१
ततः क्षुराभ्यां पाञ्चाल्यौ चक्र-रक्षौ महात्मनः
जघान, चन्द्र-देवं च दण्ड-धारं च, संयुगे। २२
स, सन्धाय महास्त्राणि, महेष्वासो महा-मनाः,
प्रहस्य पुरुषेन्द्रस्य शरैश् चिच्छेद कार्मुकम्। २३
ततः, संधाय नवतिं निमेषाद् नत-पर्वणः,
बिभेद कवचं राज्ञो रणे कर्णः शितैः शरैः। २४
तद् वर्म हेम-विकृतं रत्न-चित्रं बभौ पतत्,
स-विद्युद् अभ्रं, सवितुः श्लिष्टं, वात-हतं यथा। २५
छिन्न-वर्मा शरैः, पार्थो, रुधिरेण समुक्षितः,
क्रुद्धः सर्वायसीं शक्तिं चिक्षेपाधिरथिं प्रति।
सा छिन्ना, भूमिम् अगमद्, महेष्वासस्य सायकैः। २६
ततो बाह्वोर् ललाटे च हृदि चैव युधिष्ठिरः
चतुर्भिस् तोमरैः कर्णं ताड़यित्वानदद् मुहुः। २७

१९। स्रस्त-गात्रः—शिथिलाङ्गः। २०। आजघ्ने—आजघान, प्रजहार।

उद्भिन्न-रुधिरः कर्णः, क्रुद्धः सर्प इव ज्वलन्,
ध्वजं चिच्छेद भल्लेन, त्रिभिर् विव्याध पाण्डवम्,
इषुधी चास्य चिच्छेद रथं च तिलशो ऽच्छिनत्। २८
काल-बालास् तु ये पार्थं दन्त-वर्णावहन् हयाः,
तैर् युक्तं रथम् आस्थाय प्रायाद् राजा पराङ्-मुखः। २९
अभिद्रुत्य तु राधेयः, स्कन्धे संस्पृश्य पाणिना,
अब्रवीत् प्रहसन्, राजन्, कुत्सयन्न् इव पाण्डवम्,— ३०
"कथं नाम कुले जातः, क्षत्र-धर्मे व्यवस्थितः,
प्रजह्यात् समरं, भीतः, प्राणान् रक्षन् महाहवे ? ३१
न भवान् क्षत्र-धर्मेषु कुशलो हीति मे मतिः।
ब्राह्मे बले भवान् युक्तः स्वाध्याये यज्ञ-कर्मणि। ३२
मा स्म युध्यस्व, कौन्तेय, मा स्म वीरान् समासद !
मा चैनान् अप्रियं ब्रूहि, मा वै व्रज महा-रणम् !" ३३
एवम् उक्त्वा ततः पार्थं विसृज्य च, महा-बलः
न्यहनत् पाण्डवीं सेनां, वज्र-हस्त इवासुरीम्। ३४
एतस्मिन्न् अन्तरे कृष्णः पार्थं वचनम् अब्रवीत्,
दर्शयन्न् इव कौन्तेयं धर्म-राजं युधिष्ठिरम्,— ३५
"एष, पाण्डव, ते भ्राता धार्तराष्ट्रैर् महा-बलैः
जिघांसुभिर् महेष्वासैर् द्रुतं पार्थो ऽनुसार्यते। ३६

३०। कुत्सयन्—निर्भर्त्सयमानः। ३२। ब्राह्मे बले युक्तः—[शम-दम-क्षमा द-] ब्राह्मणोचित-शक्तौ नियुक्तः (अभ्यस्तः इत्यर्थः)। ३६। अनुसार्यते—अनुधाव्यते।

एते जिघृक्षवो यान्ति द्विपाश्व-रथ-पत्तयः
युधिष्ठिरं धार्तराष्ट्रा, रत्नोत्तमम् इवार्थिनः । ३७

उपवास-कृशो राजा भृशं, भरत-सत्तम ।
ब्राह्मे बले स्थितो ह्येष, न क्षात्रे हि बले विभुः । ३८

कर्णेन चाभियुक्तो ऽयं भू-पतिः शत्रु-तापनः
संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः । ३९

आतुरो हि कृतो राजा संनिषण्णश् च, भारत,
यथैनम् अनुवर्तन्ते पाञ्चालाः सह पाण्डवैः, ४०

त्वरमाणास् त्वरा-काले सर्व-शस्त्र-भृतां वराः,
मज्जन्तम् इव पाताले बलिनो ह्य् उज्जिहीर्षवः । ४१

न केतुर् दृश्यते राज्ञः, कर्णेन निहतः शरैः,
पश्यतोर् यमयोः, पार्थ, सात्यकेश् च शिखण्डिनः । ४२

एष कर्णो रणे, पार्थ, पाण्डवानाम् अनीकिनीम्
शरैर् विध्वंसयति वै, नलिनीम् इव कुञ्जरः । ४३

एते द्रवन्ति रथिनस् त्वदीयाः, पाण्डु-नन्दन ।
पश्य पश्य यथा, पार्थ, गच्छन्त्येते महा-रथाः ! ४४

एष कर्णो, रणे जित्वा पाञ्चालान् पाण्डु-सृञ्जयान्,
दिशो वै प्रेक्षते सर्वास् त्वदर्थम् इति मे मतिः । ४५

---

३७ । जिघृक्षवः [ग्रह-स+उ, १।ब]—ग्रहीतुम् इच्छुकाः । ३९ । अभियुक्तः—आक्रान्तः । ४० । संनिषण्णः—सम्यक् अवसन्नः । 'संनिषेव्यः' इति प्रतीचां पाठः । ४१ । उज्जिहीर्षवः [उत्-हृ-स+उ, १।ब]—उद्धर्तुम् इच्छुकाः ।

कर्णम् एकाकिनं दृष्ट्वा, रथानीकेन, भारत,
रिरक्षिषुः सु-संयत्तो धार्तराष्ट्रो निवर्तते। ४६

असौ कर्णः सु-संरब्धः पाञ्चालान् अभिधावति।
केतुम् अस्य हि पश्यामि धृष्टद्युम्न-रथं प्रति। ४७

आचक्षे च प्रियं, पार्थ, तवेदं, भरतर्षभ,
राजा जीवति कौरव्यो धर्म-राजो युधिष्ठिरः। ४८

असौ भीमो महा-बाहुः संनिवृत्तश् चमू-मुखे,
वृतः सृञ्जय-सैन्येन सात्यकेन च, भारत। ४९

सेना हि धार्तराष्ट्रस्य विमुखा विस्रवद्-व्रणाः
विप्रधावति वेगेन, भीमस्य निहताः शरैः। ५०

कर्णेन हि दृढं राजा कुन्ती-पुत्रः परिक्षतः।
तं दृष्ट्वाश्वास्य च पुनः कर्णं, पार्थ, वधिष्यसि।" ५१

षष्ठोऽध्यायः

राज-परिदर्शनम्

ततो धनञ्जयो द्रष्टुं राजानं बाण-पीड़ितम्
रथेन प्रययौ क्षिप्रं संग्रामात् केशवाज्ञया। १

गच्छन्न् एव तु कौन्तेयो धर्मराज-दिदृक्षया
सैन्यम् आलोकयामास, नापश्यत् तत्र चाग्रजम्। २

५०। विप्रधावति—विपरीतां दिशम् अभिधावति, पलायते। निहता—आहता।

२। दिदृक्षया [दृश्-स+आ, ३।१]—दर्शनेच्छया।

गो. भा. २—२४

अ-पश्यमानस् तु किरीट-माली
युधिष्ठिरं भ्रातरम् आजमीढ़म्,
उवाच भीमं, तरसाभ्युपेत्य,—
"राज्ञः प्रवृत्तिं वद। कुत्र राजा ?" ३

भीम उवाच,—

अपयात इतो राजा धर्म-राजो युधिष्ठिरः,
कर्ण-बाणाभि-तप्ताङ्गो यदि जीवेत् कथञ्चन। ४

अर्जुन उवाच,—

नूनं, स विद्धो ऽति-भृशं पृषत्कैः
कर्णेन, राजा शिविरं गतो ऽसौ।
ज्ञातुं प्रयाह्याशु तम् अद्य, भीम।
स्थास्याम्यहं शत्रु-गणान् निरुध्य। ५

भीम उवाच,—

त्वम् एव जानीहि, महानुभाव,
राज्ञः प्रवृत्तिं भरतर्षभस्य।
अहं हि यद्यर्जुन यामि तत्र,
वक्ष्यन्ति मां भीत इति प्रवीराः। ६

सञ्जय उवाच,—

ततो ऽब्रवीद् अर्जुनो भीमसेनं,—
"संशप्तकाः प्रत्यनीक-स्थिता मे।

४। यदि जीवेत्—हेतौ लिङ्।

एतान् अ-हत्वा हि मया न शक्यम्
इतो ऽपयातुं रिपु-सङ्घ-गोष्ठात् ।" ७

अथाब्रवीद् अर्जुनं भीमसेनः,—
"स्व-वीर्यम् आस्थाय, कुरु-प्रवीर,
संशप्तकान् प्रतियोत्स्यामि सङ्ख्ये
सर्वान् अहं । याहि, धनञ्जय, त्वम् ।" ८

तद् भीमसेनस्य वचो निशम्य,
सु-दुर्वचं भ्रातुर् अमित्र-मध्ये,
द्रष्टुं कुरु-श्रेष्ठम् अभिप्रयास्यन्,
प्रोवाच वृष्णि-प्रवरं तदानीम्,— ९

"चोदयाश्वान्, हृषीकेश, विहायैतद् बलार्णवम् ।
अजात-शत्रुं राजानं द्रष्टुम् इच्छामि, केशव ।" १०

ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः,
शीघ्राच्छीघ्रतरं, राजन्, वाजिभिर् गरुड़ोपमैः । ११

ततस् तु गत्वा, पुरुष-प्रवीरौ
राजानम् आसाद्य शयानम् एकम्,
रथाद् उभौ प्रत्यवरुह्य तस्माद्,
ववन्दतुर् धर्म-राजस्य पादौ । १२

७ । प्रत्यनीक-स्थिताः—प्रत्यनीकेषु (शत्रु-सैन्येषु) वर्तमानाः । मे—मह्यम्, [युद्धाय] मदपेक्षया । गोष्ठात्—स्थानात् । 'मध्यात्' इति अवाचां पाठः । १२ । ववन्दतुः—ववन्दाते, अभिवादयाञ्चक्राते । पआ. ।

मन्यमानो हतं कर्णं, धर्म-राजो युधिष्ठिरः
हर्ष-गद्गदया वाचा, प्रीतः, प्राह, परन्तपः,— १३
"स्वागतं, देवकी-मातः ! स्वागतं ते, धनञ्जय !
प्रियं मे दर्शनं गाढ़ं युवयोर्, अच्युतार्जुनौ । १४
अन्तकाभम् अमित्राणां हत्वा कर्णं महाहवे,
दिष्ट्या युवाम् अनुप्राप्तौ, जित्वासुरम् इवामरौ । १५
घोरं युद्धम् अ-दीनेन मयाह्यद्याच्युतार्जुनौ
कृतं तेतान्तकेनेव प्रजाः सर्वा जिघांसता । १६
तेन केतुश् च मे च्छिन्नो निहतौ पार्ष्णि-सारथी,
हत-वाहस् ततश् चास्मि, युयुधानस्य पश्यतः १७
धृष्टद्युम्नस्य यमयोर् वीरस्य च शिखण्डिनः,
पश्यतां द्रौपदेयानां पाञ्चालानां च सर्वशः । १८
एतान्स् जित्वा महावीर्यः कर्णः—शत्रु-गणान् बहून्—
जितवान् मां, महा-बाहो, यतमानं महा-रणे । १९
अनुसृत्य च मां युद्धे परुषाण्युक्तवान् बहु,
तत्र तत्र, युधां श्रेष्ठः, परिभूय, न संशयः । २०
भीम-सेन-प्रभावात् तु यज् जीवामि, धनञ्जय,
—बहुनात्र किम् उक्तेन ?—नाहं तत् सोढुम् उत्सहे । २१

---

१४ । देवकी-मातः—देवकी-पुत्र, कृष्ण । बहु-व्रीहिः । १५ । अन्त-काभम्—यम-तुल्यम् । २० । परिभूय—अवहस्य ।

त्रयोदशाहं वर्षाणि यस्माद् भीतो, धनञ्जय,
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित्,
तस्य द्वेषेण संयुक्तः परिदह्ये, धनञ्जय। २२

न प्राप्त-पूर्वं यद् भीष्मात् कृपाद् द्रोणाच् च संयुगे,
तत् प्राप्तम् अद्य मे युद्धे सूत-पुत्राद् महा-रथात्।
तद् माचक्ष्व कात्स्न्र्येन यथा कर्णो हतस् त्वया। २३

शक्र-तुल्य-बलो युद्धे यम-तुल्यः पराक्रमे,
राम-तुल्यस् तथास्त्रेण, स कथं वै निषूदितः? २४

पूजितो धृतराष्ट्रेण स-पुत्रेण, विशाम् पते,
त्वदर्थम् एव राधेयः। स कथं निहतस् त्वया?" २५

तद् धर्म-शीलस्य वचो निशम्य,
राज्ञः क्रुद्धस्याति-रथो महात्मा
उवाच दुर्धर्षम् अ-दीन-सत्त्वं
युधिष्ठिरं, जिष्णुर्, अनन्त-वीर्यः,— २६

"संशप्तकैर् युध्यमानस्य मे ऽद्य,
सेनाग्रयायी कुरु-सैन्य-राज्ञः,
आशी-विषाभान् ख-गमान् प्रमुञ्चन्,
द्रौणिः पुरस्तात् सहसाभ्यतिष्ठत्। २७

२३। कार्त्स्न्येन—साकल्येन। २४। निषूदितः—विनाशितः। २७। कुरु-सैन्य-राज्ञः—कुरु-सैन्य-राजस्य [दुर्योधनस्य]। 'कुरु-सैन्येषु राजन्' इति प्रतीचां 'कुरु-सैन्यस्य राजन्' इति चावाचां पाठः। ख-गमान्—बाणान्।

अहं तु तं त्रिशता वज्रकल्पैः
समार्दयं निमिषस्यान्तरेण ।
क्षणात् श्वावित्-सम-रूपो बभूव
स, मर्दितो मद्-विसृष्टैः पृषत्कैः । २८
स, विक्षरन् रुधिरं सर्व-गात्रैर्,
अथानीकं सूत-सूनोर् विवेश ।
ततो ऽभिभूतं युधि वीक्ष्य सैन्यं,
वित्रस्त-योधं, द्रुत-वाजि-नागम्, २९
पञ्चाशता रथ-मुख्यैः समेत्य,
कर्णस् त्वरन् माम् उपायात्, प्रमाथी ।
तान् सूदयित्वाहम् अपास्य कर्णं,
द्रष्टुं भवन्तं त्वरयाभियातः ।" ३०

सप्तमोऽध्यायः

भाव-संघट्टः

श्रुत्वा कर्णं कल्यम् उदार-वीर्यं,
क्रुद्धः पार्थः फाल्गुनस्यामितौजाः,
धनञ्जयं वाक्यम् उवाच चेदं
युधिष्ठिरः, कर्ण-शराभितप्तः,— १

२८ । श्वा-वित् [श्वन्-व्यध्+०,१।१]—शल्यः, शजारु, a hedgehog. २९ । द्रुताः—पलायिताः । ३० । सूदयित्वा—नाशयित्वा । अपास्य—त्यक्त्वा । १ । कल्यम्—सुस्थम् । उदार-वीर्यम्—श्लाघ्य-प्रभावम् ।

"विप्रद्रुता, तात, चमूस् त्वदीया
तिरस्कृता चाद्य। यथा न साधु,
भीतो भीमं त्यज्य चायास् तथा त्वं,
यद् नाशकः कर्णम् अथो निहन्तुम्। २

यत् तद् वाक्यं द्वैतवने त्वयोक्तं,
कर्णं हन्तास्म्येक-रथेन, पार्थ,
तं त्यक्त्वा त्वं कथम् अद्यापयातः,
कर्णाद् भीतो, भीमसेनं विहाय? ३

इदं यदि द्वैत-वने ऽप्यचक्षः,
कर्णं योद्धुं न प्रशक्ष्ये नृपेति,
वयं ततः प्राप्त-कालं च सर्वे
कृत्यान्युपैष्याम तथैव, पार्थ। ४

मयि प्रतिश्रुत्य वधं हि तस्य,
न वै कृतं तच् च तथैव, वीर।
आनीय नः शत्रु-मध्यं, स कस्मात्
समुत्क्षिप्य स्थण्डिले प्रत्यपिंष्ठाः? ५

२। विप्रद्रुता—पलायिता। तिरस्कृता—निन्दिता, निन्दार्हा जाता। ३। हन्तास्मि—अचिरेण हनिष्यामि। लुट्। अपयातः—अपसृतः। ४। अचक्षः—अख्यः, अचीकथः अवोचः। आप्र.। प्रशक्ष्ये—प्रशक्ष्यामि। पआ.। उपैष्याम [उप-इ+स्याम]—उपागमिष्याम। क्रियाया अनिष्पत्तौ हेतुमति लङ्। ५। स्थण्डिले—भूमौ। प्रत्यपिंष्ठाः [प्रति-पिष्+थास्]—प्रत्यपिनट्, अचुचूर्णः, अमर्दीः। आआ.।

खड्गं गृहीत्वा हेम-पट्टावनद्धं
धनुश् चेदं गाण्डिवं तालमात्रम्,
स केशवेनोह्यमानः कथं त्वं
कर्णाद् भीतो व्यपयातो ऽसि, पार्थ ? ६

धनुश् चैतत् केशवाय प्रदाय,
यन्ताभविष्यस् त्वं रणे चेद्, दुरात्मन्,
ततो ऽहनिष्यत् केशवः कर्णम् उग्रम्,
मरुत्-पतिर् वृत्रम् इवात्त-वज्रः। ७

राधेयम् एवं यदि नाद्य शक्तश्
चरन्तम् उग्रं प्रति-बाधनाय,
देह्यन्यस्मै गाण्डिवम् एतद् अद्य,
त्वत्तो यो ऽस्त्रेष्वभ्यधिको नरेन्द्रः। ८

युधिष्ठिरेणैवम् उक्तः, कौन्तेयः श्वेत-वाहनः
असिं जग्राह, संक्रुद्धो, जिघांसुर् भरतर्षभम्। ९

तस्य कोपं समुद्वीक्ष्य, चित्त-ज्ञः केशवस् तदा
उवाच,—किम् इदं, पार्थ, गृहीतः खड्ग इत्युत। १०

एवम् उक्तस् तु कृष्णेन, प्रेक्षमाणो युधिष्ठिरम्,
अर्जुनः प्राह गोविन्दं, क्रुद्धः सर्प इव श्वसन्,— ११

"अन्यस्मै देहि गाण्डीवम् इति मां यो ऽभिचोदयेत्,
छिन्द्याम् अहं तस्य शिर इत्युपांशु व्रतं मम।" १२

६। हेम-पट्टावनद्धम्—स्वर्ण-खचित-कौषेय-वस्त्राच्छादितम्।

"धिग्! धिग्!" इत्येव गोविन्दः पार्थम् उक्त्वाब्रवीत् पुनः,—
"अनृतां वा वदेद् वाचं, न तु हिंस्यात् कथञ्चन। १३

अयुध्यमानस्य वधस् तथा-शत्रोश् च, भारत,
पराङ्-मुखस्य द्रवतः शरणं चाभिगच्छतः, १४

कृताञ्जलेः प्रपन्नस्य प्रमत्तस्य तथैव च
न वधः पूज्यते सद्भिस्। तच् च सर्वं गुरौ तव। १५

त्वया चैवं व्रतं, पार्थ, बालेनेव कृतं पुरा।
तस्माद् अ-धर्म-संयुक्तं मौढ्यात् कर्म व्यवस्यसि। १६
स गुरुं, पार्थ, कस्मात् त्वं हन्तु-कामो ऽभिधावसि,
अ-संप्रधार्य धर्माणां गतिं सूक्ष्मां दुरत्ययाम्? १७

सत्यस्य वचनं साधु, न सत्याद् विद्यते परम्।
सु-दुर्विदं हि तत्त्वेन तत् सत्यम् इति मे मतिः। १८

भवेत् सत्यम् अ-वक्तव्यं वक्तव्यम् अनृतं भवेत्
यत्रानृतं भवेत् सत्यं सत्यं चाप्यनृतं भवेत्। १९
विवाह-काले रति-संप्रयोगे
प्राणात्यये सर्व-धनापहारे

१३। वा—वरम्। १४। अ-शत्रोः—अ-रिपोः, अनिष्ट-करण-चेष्टा-रहितस्य। १५। प्रपन्नस्य—[इतः पूर्वम् एव] आश्रयम् आजग्मुषः। १६। व्यवस्यसि—कर्तुं कृत-निश्चयो ऽसि। १७। दुरत्ययाम्—अ-प्रमेयाम्, इयत्तया ईदृक्तया च अ-ज्ञेयाम्। १८। सत्यस्य वचनम्—सत्य-भाषणम्। कृदन्त-क्रियायाः कर्मणि षष्ठी। पा. २।३।६६ सु-दुर्विदम्—अति-दुर्ज्ञेयम्।

विप्रस्य चार्थे ह्यनृतं वदेत ।
पञ्चानृतान्याहुर् अ-पातकानि । २०
धारणाद् धर्म इत्याहुर् । धर्मो धारयते प्रजाः ।
यत् स्याद् धारण-संयुक्तम् स धर्म इति निश्चयः । २१

अर्जुन उवाच,—

यथा प्रतिज्ञा मम, लोक-सिद्धा,
भवेत् सत्या, धर्म-भृतां वरिष्ठ,
यथा जीवेत् पाण्डवो ऽहं च, कृष्ण,
तथा बुद्धिं दातुम् अद्यार्हसि त्वम् । २२

वासुदेव उवाच,—

यदा मानं लभते माननार्हस्,
तदा स वै जीवति जीव-लोके ।
यदावमानं लभते महान्तं,
तदा जीवन् मृत इत्युच्यते सः । २३
सम्मानितः पार्थिवो ऽयं सदैव
त्वया च भीमेन तथा यमाभ्याम्
वृद्धैश् च लोके पुरुषैश् च शूरैस् ।
तस्यापमानं कलया प्रयुङ्क्ष्व । २४

---

२० । वदेत—वदेत् । आआ. । पं ४—अनृतमात्रं हि पातकम् इति वक्तव्यम् सार्वभौम-धर्म-विरोधात् । *Cf.* पायोसू. २।३१ २२ । लोक-सिद्धा—लोकेषु प्रसिद्धा । 'लोक-बुद्धौ' इत्यवाचां पाठः । २४ । कलया—अंशतः ।

त्वम् इत्यत्र-भवन्तं हि ब्रूहि, पार्थ, युधिष्ठिरम् ।
त्वम् इत्युक्तो हि निहतो गुरुर् भवति, भारत । २५

वधं ह्ययं, पाण्डव, धर्म-राजस्
त्वत्तो ऽ-युक्तं वेत्स्यते चैवम् एषः ।
ततो ऽस्य पादाव् अभिवाद्य पश्चात्
समं ब्रूयाः सान्त्वयित्वा च पार्थम् । २६

सञ्जय उवाच,—

ततो ऽब्रवीद् अर्जुनो धर्म-राजम्
अनुक्त-पूर्वं परुषं प्रसह्य,—
"मा त्वं, राजन्, व्याहर, व्याहरस्व
यस् तिष्ठसे क्रोशमात्रे रणाद् वै ! २७

भीमस् तु माम् अर्हति गर्हणाय
यो युध्यते सर्व-लोक-प्रवीरैः,
यः कुञ्जराणाम् अधिकं सहस्रं
हत्वानदत् तुमुलं सिंह-नादम् । २८

---

२५ । अत्र-भवन्तम्—पूज्यम्, मान्यम् । २६ । अ-युक्तम्—अन्याय्यं [सम्बोधनम्] । वेत्स्यते—लप्स्यते । समम्—[पूज्ये] उपयुक्तम् । २७ । परुषम्—निष्ठुर-वाक्यम् । प्रसह्य—भूयसा । तिष्ठसे—तिष्ठसि । आआ. । क्रोशमात्रे—अति-दूरे [स्थाने] । अ-प्रमितार्थे प्रमितस्य प्रयोगः । २८ । गर्हणाय—गर्हितुम् (निन्दितुम्, कुत्सयितुम्) । 'तुमर्थाच् च भाव-वचनात्' (पा. २।३।१५) इति चतुर्थी । अधिकं सहस्रम्—सहस्राद् अधिकम्, सहस्राधिकम् । आप्र. ।

बलं तु वाचि द्विज-सत्तमानां ।
क्षात्रं बुधा बाहु-बलं वदन्ति ।
त्वं वाग्-बलो, भारत, निष्ठुरश् च ।
त्वम् एव मां वेत्सि यथा-विधो ऽहम् । २९
मा मावमंस्था द्रौपदी-तल्प-संस्थो !
महा-रथान् प्रतिहन्मि त्वदर्थे !
तेनाविशङ्की, भारत, निष्ठुरो ऽसि ।
त्वत्तः सुखं नाभिजानामि किञ्चित् । ३०
त्वं देविता, त्वत्-कृते राज्य-नाशस्,
त्वत्-सम्भवं नो व्यसनं, नरेन्द्र ।
मास्मान् क्रूरैर् वाक्-प्रतोदैस् तुदंस् त्वं
भूयो, राजन्, कोपयेस्, त्वल्प-भाग्यः !" ३१
ततो ऽनुतेपे सुर-राज-पुत्रो,
विनिश्वसंश् चाप्यसिम् उद्ववर्ह ।
तम् आह कृष्णः,—"किम् इदम् ? पुनर् भवान्
वि-कोषम् आकाश-निभं करोत्यसिम् !" ३२
इत्येवम् उक्तः पुरुषोत्तमेन,
सु-दुःखितः, केशवम् अर्जुनो ऽब्रवीत्,—

---

३० । अविशङ्की—[जये] आशङ्का-शून्यः (सन्देह-हीनः)। ३२ । अनुतेपे—अनुतापं प्राप्तवान् । उद्ववर्ह—उद्ववर्हे, कोशाद् निष्कासितवान् । पआ. । आह (अह्+अ)—ब्रवीति । संसो. २९५ । ३३ । पुरुषोत्तमेन—पुरुष-श्रेष्ठेन [कृष्णेन] । अर्जुनो ऽब्रवीत्

"अहं हनिष्ये स्व-शरीरम् एव
प्रसह्य, येनाहितम् आचरं वै।" ३३

निशम्य तत् पार्थ-वचो, ऽब्रवीद् इदं
धनञ्जयं धर्म-भृतां वरिष्ठः,—
"हत्वा त्मानम् आत्मना प्राप्नुयास् त्वं
वधाद् भ्रातुर् नरकं चाति-घोरम्। ३४

ब्रवीहि वाचाद्य गुणान् इहात्मनस्।
तथा हतात्मा भवितासि, पार्थ।"
तथास्तु कृष्णेत्यभिनन्द्य तद् वचो,
धनञ्जयः प्राह, धनुर् विनाम्य,— ३५

"न मादृशो ऽन्यो, नर-देव, विद्यते
धनुर्धरो देवम् ऋते पिनाकिनम्।
अहं हि, तेनानुमतो महात्मना,
क्षणेन हन्यां स-चराचरं जगत्।" ३६

इत्येवम् उक्त्वा पुनर् एव पार्थो
युधिष्ठिरं धर्म-भृतां वरिष्ठम्,
विमुच्य शस्त्राणि धनुर विसृज्य
कोषे च खड्गं विनिधाय तूर्णम्, ३७

—'आह पार्थः' इत्यवाचां पाठः। छन्दः-पतनं लक्ष्यम्। हनिष्ये—हनिष्यामि। आआ.। ३४। आत्मना—आत्म-कर्मणा। अतिघोरम्—घोरतरम्, भीषणतरम्। ३५। ब्रवीहि—ब्रूहि। ईडागमो गुणश् चार्षः। ३६। हन्याम्—हन्तुं शक्नोमि। 'शकि लिङ् च'—पा. ३।३।१७२

स, व्रीड़या नम्र-शिराः, किरीटी
युधिष्ठिरं प्राञ्जलिर् अभ्युवाच,—
"प्रसीद, राजन्, क्षम यद् मयोक्तं
काले भवान् वेत्स्यति तद्। नमस् ते! ३८

यास्येष भीमं समरात् प्रमोक्तुं,
सर्वात्मना सूत-पुत्रं च हन्तुम्।"
इति प्रयास्यन्न्, उपगृह्य पादौ,
समुत्थितो दीप्त-तेजाः किरीटी। ३९

युधीष्ठिर उवाच,—

प्रयाहि, वृद्धिं च दिशन्तु देवताः!
यथाहं इच्छामि तवास्तु तत् तथा!
प्रयाहि तूर्णं—जहि कर्णम् आहवे,
पुरन्दरो वृत्रम् इवात्म-वृद्धये। ४०

अष्टमो ऽध्यायः

दुःशासन-पातः

सञ्जय उवाच,—

तं प्रयान्तं महेष्वासं दृष्ट्वा भूतानि, भारत,
निहतं मेनिरे कर्णं पाण्डवेन महात्मना। १

३९। इति—इत्युक्त्वा। ४०। वृद्धिम्—उन्नतिम्। दिशन्तु—विदधतु।

चाषाश् च शत-पत्राश् च क्रौञ्चाश् चैव, जनेश्वर,
प्रदक्षिणम् अकुर्वन्त तदा वै पाण्डु-नन्दनम् । २

कङ्का गृध्रा वकाः श्येना वायसाश् च, विशाम् पते,
अग्रतस् तस्य गच्छन्ति भक्ष्य-हेतोर्, भयानकाः । ३

प्रयातस्याथ पार्थस्य महान् स्वेदो व्यजायत,
चिन्ता च विपुला जज्ञे 'कथं चेदं भविष्यति' । ४

श्रुत्वा च रथ-निर्घोषं सिंह-नादं च संयुगे,
अर्जुनः प्राह गोविन्दं,—"शीघ्रं चोदय वाजिनः । ५

राधेयो ऽप्यन्यथा पार्थान् सृञ्जयांश् च महा-रथान्
निः-शेषान् समरे कुर्यात् पश्यतां नो, जनार्दन ।" ६

ततः प्रायाद् रथेनाशु केशवस् तव वाहिनीम्
कर्णं प्रति महेष्वासं द्वैरथे सव्य-साचिना । ७

महता रथ-घोषेण पाण्डवः सत्य-विक्रमः
अभ्ययाद्, अ-प्रमेयात्मा, निर्जयंस् तव वाहिनीम् । ८

मद्र-राजो ऽब्रवीत् कर्णं, केतुं दृष्ट्वा महात्मनः,—
"अयं स रथ आयाति, श्वेताश्वः, कृष्ण-सारथिः । ९

एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः
अर्जुनस्य भयात् तूर्णं, निघ्नतः शात्रवान् बहून् । १०

---

२ । चाषाः—स्वर्ण-चातकाः, नील-कण्ठाः, সোণাচড়া । शत-पत्राः—मयूराः । ६ । कुर्यात्—हेतुमति लिङ् । ७ । द्वैरथे—द्वैरथाय [युद्धाय] । निमित्तात् सप्तमी ।

सहसैक-रथः पार्थस् त्वाम् अभ्येति, परन्तप।
तं, कर्ण, प्रतियाह्येनं। नास्त्यन्यो हि धनुर्धरः। ११

न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः।
एक एवाभियाति त्वां! पश्य साफल्यम् आत्मनः। १२

लेलिहानं यथा सर्पं, गर्जन्तम् ऋषभं यथा,
वन-स्थितं यथा व्याघ्रं, जहि, कर्ण, धनञ्जयम्।" १३

कर्ण उवाच,—

प्रकृति-स्थो ऽसि मे, शल्य, इदानीं सम्मतस् तथा।
कृतार्थो ऽद्य भविष्यामि, हत्वा वाप्यथ वा हतः। १४

सञ्जय उवाच,—

राजन्, कुरूणां प्रवरैर् बलैर् भीमम् अभिद्रुतम्,
मज्जन्तम् इव, कौन्तेयम् उज्जिहीर्षुर् धनञ्जयः— १५

उत्सृज्य सूत-पुत्रस्य सेनां, भारत, सायकैः
प्राहिणोद् मृत्यु-लोकाय पर-वीरान् धनञ्जयः। १६

ततः प्रादीर्यत चमूर् धनञ्जय-शराहता,
महा-वात-समाविद्धा महा-नौर् इव सागरे। १७

कुरवः पर्यवर्त्तन्त निर्दग्धाः सव्य-साचिना,
उत्सृज्य हि महा-बाहुं भीमसेनं तथा रणे। १८

१४। प्रकृति-स्थः—स्वाभाविकः, स्वस्थः। १५। उज्जिहीर्षुः [उत्-हृ-स+उ, ११]—उद्धर्तुम् इच्छुकः। १६। उत्सृज्य—'विमृद्य' इति प्रतीचां पाठः। १८। पर्यवर्त्तन्त—अघूर्णन्, पर्यभ्राम्यन्।

तथा गते, भीमम् अभीस् तवात्मजः
ससार राजावरजः किरञ् छरैः।
तम् अभ्यधावत् त्वरितो वृकोदरो,
महा-रुरुं सिंह इवाभिपेदिवान्। १९

तत्राकरोद् दुष्करं राज-पुत्रो
दुःशासनस् तुमुलं युध्यमानः,
चिच्छेद भीमस्य धनुः शरेण,
षड्भिः शरैः सारथिम् अप्यविध्यत्। २०

स तत् कृत्वा राज-पुत्रस् तरस्वी
विव्याध भीमं नवभिः पृषत्कैः।
ततो ऽभिनद् बहुभिः क्षिप्रम् एव
वरेषुभिर् भीमसेनं महात्मा। २१

स विस्फुरन्, नाग इव प्रभिन्नो,
गदाम् अस्मै तुमुले प्राहिणोद् वै ;
तयाहरद् दश धन्वन्तराणि
दुःशासनं भीमसेनः प्रसह्य। २२

दुःशासनं तत्र समीक्ष्य, राजन्,
भीमो महा-बाहुर् अचिन्त्य-कर्मा,

१९। तथा गते—एवं सति। राजावरजः—राज्ञो दुर्योधनस्य कनीयान् भ्राता [दुःशासनः]। २२। तुमुले—युद्धे इति शेषः। अहरत्—अनयत्, न्यक्षिपत्। दश धन्वन्तराणि—चत्वारिंशतं हस्तान्। धन्वन्तरम्—चतुर्हस्त-परिमाणम्, दण्डम्।

अनागसो भर्तृ-पराङ्-मुखाया
दुःखानि दत्तान्यपि विप्रचिन्त्य, २३
तत्राह कर्णं सुयोधनं च
कृपं द्रौणिं कृत-वर्माणम् एव,—
"निहन्मि दुःशासनम् अद्य पापं—
संरक्ष्यताम् अद्य, समस्त-योधाः !" २४
रथाद् अवप्लुत्य, गतः स भूमौ,
यत्नेन तस्मिन् प्रणिधाय चक्षुः,
असिं समुद्यम्य सितं सुधारं,
कण्ठे पदाक्रम्य च वेपमानम्, २५
उवाच—"तद् गौर् इति, यद् ब्रुवाणो
हृष्टो, वदेः कर्ण-सुयोधनाभ्यां !
ये राजसूयावभृथे पवित्रा
जाताः कचा याज्ञसेन्या, दुरात्मन्, २६
ते पाणिना कतरेणावक्लिष्टा,
ब्रूहि, त्वां पृच्छति भीमसेनः ।"
दुःशासनो, भीमसेनं निरीक्ष्य,
जगाद भीमं, परिवर्त्त-नेत्रः,— २७

२३ । अनागसः—निरपराधायाः । भर्तृ-पराङ्-मुखायाः—प्रतिकूल-भर्तृकायाः । विप्रचिन्त्य—प्रतिकूलत्वेन चिन्तयित्वा । २६ । हृष्टः—'भवसि' इति शेषः । वदेः—वद । प्रार्थनायां लिङ् । कचाः—केशाः । २७ । परिवर्त-नेत्रः [सन्]—नेत्रे घूर्णयन् ।

"अयं करि-करा-कारः पीन-स्तन-विमर्दनः ।
अनेन याज्ञसेन्या मे, भीम, केशा विकर्षिताः
पश्यतां कुरु-मुख्यानां युष्माकं च सभा-सदाम् !" २८

भीमो बलात् तं प्रतिगृह्य दोर्भ्याम्,
उच्चैर् ननादाथ समस्त-योधान्
उवाच—"यस्यास्ति बलं स रक्षत्व्—
असौ भवेद् अद्य निरस्त-बाहुः !" २९

एवं क्रुद्धो भीमसेनः करेण
उत्पाटयामास भुजं । महात्मा
दुःशासनं तेन शरीर-मध्ये
जघान, वज्राशनि-संनिभेन । ३०

उत्कृत्य वक्षः पतितस्य भूमाव्,
अथापिबच् छोणितम् अस्य कोष्णम्,
सत्यां चिकीर्षुर् मतिमान् प्रतिज्ञाम् ;
क्रुद्धो हि चैवं निजगाद वाक्यम्, ३१

गतासुम् आलोक्य विहस्य सु-स्वरं,—
"किं वा कुर्यां ? मृत्युना रक्षितो ऽसि" ।
ये चापि तत्रापतिता मनुष्याः,
तेषां करेभ्यः पतितं हि शस्त्रम् । ३२

२९ । तम्—पाणिम् इति शेषः । दोर्भ्याम् [दोस्, ३।२]—बाहुभ्याम् । ३१ । उत्कृत्य—विदीर्य । कोष्णम् [कु+उष्ण, २।१]—ईषत् उष्णम् । ३२ । आपतिताः—आगताः, अभिगताः ।

ये तत्र भीमं ददृशुः समन्ताद्
दौःशासनं तद् रुधिरं पिबन्तम्,
सर्वे ऽपलायन्त भयाभिपन्ना,
'नायं मनुष्य' इति भाषमाणाः । ३३

भीमो ऽपि, हत्वा तत्रैव दुःशासनम् अमर्षणम्
पुनर् आह, महाराज, स्मयंस्, तौ केशवार्जुनौ, ३४

—असृग्-दिग्धो विह्वल्-लोहितास्यः
क्रुद्धो ऽत्यर्थं भीमसेनस् तरस्वी—
"दुःशासने यद् रणे संश्रुतं मे
तद् वै सत्यं कृतम् अद्येह, वीरौ । ३५

अत्रैव दास्याम्यपरं द्वितीयं
दुर्योधनं यज्ञ-पशुं विशस्य,
शिरो मृदित्वा च पदा दुरात्मनः
शान्तिं लप्स्ये कौरवाणां समक्षम् ।" ३६

दुःशासने तु निहते, पुत्रास् तव महा-रथाः
दश, राजन्, महा-वीर्या भीमं प्राच्छादयञ् छरैः । ३७

तांस् तु भल्लैर् महा-वेगैर् दशभिर् दश भारतान्
रुक्माङ्गदान् रुक्म-पुङ्खैः पार्थो निन्ये यम-क्षयम् । ३८

३५ । असृग्-दिग्धः—शोणित-लिप्तः । संश्रुतम्—प्रतिज्ञातम् । ३६ । विशस्य [वि-शस्+य]—हत्वा । ३८ । पार्थः [पृथा+अ, १।१]—पृथा-पुत्रो [भीमः] । रुक्माङ्गदान्—स्वर्ण-केयूर-भूषितान् ।

हतेषु तेषु वीरेषु प्रदुद्राव बलं तव,
पश्यतः सूत-पुत्रस्य, पाण्डवस्य भयार्दितम्। ३६

ततः क्रुद्धो वृषसेनो ऽभ्यधावद्
वृकोदरं कालम् इवात्त-दण्डम्।
अथाभ्यधावद् नकुलः प्रवीरः
कर्णस्य पुत्रं, समरे प्रहृष्टः। ४०

स, भीमसेनस्य रथं, हताश्वो,
माद्री-सुतः, कर्ण-सुताभितप्तः,
आपुप्लुवे, सिंह इवाचलाग्रं,
संप्रेक्षमानस्य धनञ्जयस्य। ४१

ततः किरीटी पर-वीर-घाती,
हताश्वम् आलोक्य नर-प्रवीरम्,
तम् अभ्यधावद् वृषसेनम् आहवे,
स, सूत-जस्य प्रमुखे स्थितं तदा। ४२

स पार्थ-बाणाभिहतः पपात
रथाद्, वि-बाहुर् वि-शिरा, धरायाम्,
सु-पुष्पितो वृक्ष-वरो ऽति-कायो
वातेरितः शाल इवाद्रि-शृङ्गात्। ४३

४०। वृषसेनः—कर्णस्य (महा-रथः) पुत्रः। ४१। आपुप्लुवे (आ-प्लु+ए)—उल्लम्फनेन अधिरुरोह। ४३। वातेरितः—वायु-विक्षिप्तः।

तं प्रेक्ष्य बाणाभिहतं पतन्तं
रथात् सुतं, सूत-जः क्षिप्रकारी
रथं रथेनाशु जगाम रोषात्
किरीटिनः, पुत्र-वधाभितप्तः । ४४

नवमो ऽध्यायः

कर्णार्जुन-समागमः

आजघ्नुः कुरवस् तत्र वादित्राणि समन्ततः,
कर्णं प्रहर्षयिष्यन्तः, शङ्खान् दध्मुश् च पुष्कलान् । १
तथैव पाण्डवाः सर्वे, हर्षयन्तो धनञ्जयम् ,
तूर्य-शङ्ख-निनादेन दिशः सर्वा ह्यनादयन् । २
उभौ श्वेत-हयौ, राजन् , रथ-प्रवर-वाहिनौ ।
सारथि-प्रवरौ चापि तयोर् आस्तां महा-रणे । ३
धार्तराष्ट्रास् ततः कर्णं, स-बला, भरतर्षभ,
परिवव्रुर् महात्मानं क्षिप्रम् , आहव-शोभिनम् । ४
तथैव पाण्डवा हृष्टा धृष्टद्युम्न-पुरोगमाः
परिवव्रुर् महात्मानं पार्थम् अ-प्रतिमं युधि । ५
तावकानां रणे कर्णो ग्लह आसीद् , विशाम् पते ।
तथैव पाण्डवेयानां ग्लहः पार्थो ऽभवत् तदा । ६

३ । रथ-प्रवर-वाहिनौ (-वाह+इन् , १।२)—श्रेष्ठ-रथ-यानवन्तौ ।

ततो ऽन्तरीक्षे साक्षेपा विवादा, भरतर्षभ,
मिथो भेदाश् च भूतानाम् आसन् कर्णार्जुनान्तरे। ७

देव-दानव-गन्धर्वाः पिशाचोरग-राक्षसाः,
प्रति-पक्ष-ग्रहं चक्रुः कर्णार्जुन-समागमे। ८

तत्राजयद् वासुदेवः शल्यं नयन-सायकैः,
कर्णं चाप्यजयद् दृष्ट्या कुन्ती-पुत्रो धनञ्जयः। ९

ततः प्रहृष्टाः कुरु-पाण्डु-योधा
वादित्र-शङ्ख-स्वन-सिंह-नादैः
निनादयन्तो वसुधां दिशश् च,
स्वनेन सर्वे द्विषतो निजघ्नुः। १०

नराश्व-मातङ्ग-रथायुधाकुलं
गदासि-शक्त्यृष्टि-निपात-दुःसहम्
अभीरु-जुष्टं हत-देह-सङ्कुलं
रणाजिरं लोहितम् आबभौ तदा। ११

तथा प्रवृत्ते ऽस्त्र-भृतां पराभवे
धनञ्जयश् चाधिरथिश् च सायकैः
दिशश् च सैन्यं च शितैर् अ-जिह्म-गैः
परस्परं प्रावृणुतां, सु-दंशितौ। १२

७। साक्षेपाः—[अन्योन्य-] निन्दा-सहिताः। अन्तरे—न्यूनाधिक्ये। ८। प्रतिपक्ष-ग्रहम्—अन्यतर-पक्षावलम्बनम्। १०। द्विषतः द्विष्+अत्, २।ब]—शत्रून्।

ततो महास्त्राणि महा-धनुर्धरौ
विमुञ्चमानाव्, इषुभिर् भयानकैः
नराश्व-नागान् अ-मितान् निजघ्नतुः
परस्परं चापि, महा-रथौ, नृप । १३

अथाभ्यधावंस् त्वरितं शतं रथाः
शतं गजाश् चार्जुनम्, आततायिनः
शकास् तुखारा यवनाश् च सादिनः,
सहैव काम्बोज-वरैर्, जिघांसवः । १४

वरायुधान् पाणि-गतैः शरैः सह
क्षुरैर् निकृन्तंस्, त्वरितः, शिरांसि च
हयांश् च नागांश् च रथांश् च युध्यतो,
धनञ्जयः शत्रु-गणान् क्षितौ क्षिणोत् । १५

ततो ऽन्तरीक्षे सुर-तूर्य-निस्वनाः
स-साधु-वादा हृषितैः समीरिताः ।
निपेतुर् अप्युत्तम-पुष्प-वृष्टयः
सु-रूप-गन्धाः पवनेरिताः शुभाः । १६

अथाब्रवीद् द्रोण-सुतस् तवात्मजं,
करं करेण प्रतिपीड्य, सान्त्वयन्,—
"प्रसीद, दुर्योधन, शाम्य ! पाण्डवैर्
अलं विरोधेन । धिग् अस्तु विग्रहम् ! १७

---

१३ । परस्परम्—अन्योन्यम् । १५ । क्षिणोत्—अक्षिणोत्, छित्त्वा पातयामास । १६ । समीरिताः—विकीर्णाः । पवनेरिताः—वायु-प्रेरिताः ।

हतो गुरुर् ब्रह्म-समो महास्त्र-वित्,
तथैव भीष्म-प्रमुखा नरर्षभाः ।
अहं त्व-वध्यो, मम चापि मातुलः ।
प्रशाधि राज्यं सह पाण्डवैश् चिरम् ! १८

धनञ्जयः शाम्यति, वारितो मया ।
जनार्दनो नैव विरोधम् इच्छति ।
युधिष्ठिरो भूत-हिते सदा रतो ।
वृकोदरस् तद्-वश-गस् तथा यमौ । १९

व्रजन्तु शेषाः स्व-पुराणि पार्थिवाः ।
निवृत्त-वैरास् तु भवन्तु सैनिकाः ।
न चेद् वचः श्रोष्यसि मे, नराधिप,
ध्रुवं प्रतप्तासि हतो ऽरिभिर् युधि ।" २०

स, एवम् उक्तः सुहृदा वचो हितं,
विचिन्त्य निश्वस्य च दुर्मनाब्रवीत्,—
"यथा भवान् आह, सखे, तथैव तद् ।
ममापि विज्ञापयतो वचः शृणु । २१

निहत्य दुःशासनम्, उक्तवान् वचः,
प्रसह्य-शार्दूलवद् एष दुर्मतिः
वृकोदरस्, तद् धृदये मम स्थितं ।
न तत् परोक्षं भवतः । कुतः शमः ? २२

२० । प्रतप्तासि—प्रतप्तासे, अचिरात् प्रतप्स्यसे । लुट् । पआ । २२ ।

न चापि कर्णं प्रसहेद् रणे ऽर्जुनो,
महा-गिरिं मेरुम् इवोग्र-मारुतः ।
न चाश्वसिष्यन्ति पृथात्मजा मयि
प्रसह्य वैरं बहुशो विचिन्त्य । २३

न चापि कर्ण, गुरु-पुत्र, संयुगाद्
उपारमेत्यर्हसि वक्तुम्, अच्युत ।
श्रमेण युक्तो महताद्य फाल्गुनस् ।
तम् एष कर्णः प्रसभं हनिष्यति ।" २४

तम् एवम् उक्त्वाप्यनुनीय चासकृत्,
तवात्मजः स्वान् अनुशास्ति सैनिकान्,—
"विनिघ्नताभिद्रवता-हितान् इमान् !
स-बाण-हस्ताः किम् उ जोषम् आसत ?" २५

प्रसह्य-शार्दूलवत्—हठ-कारी व्याघ्र इव । *Cf.* प्रसह्य-चौरः । शमः—[युद्धात्] निवृत्तिः ।

२३ । प्रसहेत्—प्रसहेत, सम्यक् सोढुं शक्यति । आश्वसिष्यन्ति—सान्त्वनां लप्स्यन्ते । प्रसह्य वैरम्—घोरं द्वेषम् । २५ । विनिघ्नत [वि-नि-हन्+त]—विनिहत, विनाशयत । आप्र. । अ-हितान्—शत्रून् । जोषम् आसत—निश्चेष्टा आसिषत, निष्क्रिया अस्थुः । लुङर्थे लङ् । 'भवन्तः' इति शेषः

दशमो ऽध्यायः

कर्ण-पातः

स-नाग-पत्त्यश्व-रथे उभे बले
विचित्र-वर्माभरणाम्बरायुधे
चकम्पतुश् चोन्नदतुश् च विस्मयाद्,
वियद्-गताश् चार्जुन-कर्ण-संयुगे। १

उदक्रोशन् सोमकास् तत्र पार्थं,—
"त्वरस्व, याह्यर्जुन, भिन्धि कर्णम्।"
तथास्माकं बहवस् तत्र योधाः
कर्णं तदा याहि याहीत्यवोचन्। २

कर्णो ऽथ पूर्वं दशभिः पृषत्कैर्
गाण्डीव-धन्वानम् अविध्यद् आशु।
जघान तं चापि ततः किरीटी
शरैस् तदाष्टादशभिः सु-मुक्तैः। ३

ततो धनुर्ज्या सहसातिकृष्टा
स-घोषम् अच्छिद्यत पाण्डवस्य।
तस्मिन् क्षणे सूत-पुत्रस् तु पार्थं
समाचिनोत् क्षुद्रकाणां शतेन। ४

१। चकम्पतुः—चकम्पाते। पआ। वियद्-गताः—आकाश-गताः। ४। समाचिनोत्—आच्छादयामास।

तथा तु सैन्य-प्रवरांश् च, राजन्,
अभ्यर्दयद् मार्गणैः सूत-पुत्रः ।
ते भिन्न-देहा व्यसवो निपेतुः
कर्णेषुभिर् भूमि-तले, स्तनन्तः । ५
ततो नव-ज्यां सु-दृढां किरीटी,
स्व-बाहु-विक्षेप-सहां प्रगृह्य,
सु-संरब्धः, कर्ण-शर-क्षताङ्गो,
रणे योधान् तावकान् प्रत्यगृह्णात् । ६
अथो ऽपलायन्त विहाय कर्णं
तवात्मजाः कुरवश् चावशिष्टाः,
हतान् अपाकीर्य शर-क्षतांश् च,
लालप्यमानांस् तनयान् पितॄंश् च । ७
स, सर्वतः प्रेक्ष्य दिशो विशून्या,
भयावदीर्णैः कुरुभिर् विहीनः,
न विव्यथे, भारत, तत्र कर्णः ;
प्रहृष्ट एवार्जुनम् अभ्यधावत् । ८
ततो ऽपयाताः शर-पात-मात्रम्
अवस्थिताः कुरवो भिन्न-सेनाः,
विद्युत्-प्रकाशं ददृशुः समन्ताद्
धनञ्जयास्त्रं समुदीर्यमाणम् । ९

५ । स्तनन्तः—शब्दायमानाः । ७ । अपाकीर्य—निक्षिप्य, पश्चाद् विहाय । लालप्यमानान् [लप्-य+आन, २।ब]—अतिशयेन भाषमाणान् ।

तद् अर्जुनास्त्रं ग्रसति स्म कर्णो
वियद्-गतं घोरतरैः शरौघैः,
क्रुद्धेन पार्थेन भृशाभिसृष्टं
वधाय कर्णस्य महा-विमर्दे। १०

ततः स कर्णः, समवाप्य धैर्यं,
बाणान् विमुञ्चन् कुपिताहिकल्पान्,
विव्याध पार्थं दशभिः पृषत्कैः
कृष्णं च षड्भिः कुपिताहिकल्पैः। ११

ततो महेन्द्राशनि-तुल्य-निस्वनं
महा-शरं सर्प-विषानलोपमम्
अयस्मयं रौद्र-महास्त्र-सम्मितं
महाहवे क्षेप्तु-मना धनञ्जयः। १२

ततो ऽग्रसद् मही चक्रं राधेयस्य तदा, नृप।
ग्रस्त-चक्रस् तु राधेयः कोपाद् अश्रूण्यवर्तयत्। १३

अर्जुनं चाब्रवीत् कर्णो,—"मुहूर्तं क्षम, पाण्डव,
यावच् चक्रम् इदं ग्रस्तम् उद्धरामि मही-तलात्। १४

सव्यं चक्रं मही-ग्रस्तं दृष्ट्वा दैवाद् इदं मम,
न त्वं कापुरुषाचीर्णं मार्गम् आस्थातुम् अर्हसि। १५

१२। अयस्मयम्—लौहमयम्। रौद्रम् (रुद्र+अ, १।१)—पाशुपतम्। १३-१४। सारथिः स्वेच्छयैव पाण्डव-हिताय कर्ण-रथम् अदृढ़-भूमिं निनायेत्यनुमीयते। *Cf.* उपरिष्टात् ५।४।२३-२६। १५। कापुरुषाचीर्णम्—घृण्य-जन-सेवितम्।

प्रकीर्ण-केशे विमुखे ब्रह्म-वादि-कृताञ्जलौ,
शरणागते याचमाने न्यस्त-शस्त्रे तथैव च, १६

अ-बाणे भ्रष्ट-कवचे भ्रष्ट-भग्नायुधे तथा
न विमुञ्चन्ति शस्त्राणि शूराः साधु-व्रते स्थिताः। १७

त्वं च शूरतमो लोके साधु-वृत्तश् च, पाण्डव,
अभिज्ञो युद्ध-धर्माणां। तस्मात् क्षम मम क्षणम् १८

यावच् चक्रम् इदं भूमेर् उद्धरामि, धनञ्जय।
न मां रथस्थो भूमिष्ठम् अ-सज्जं हन्तुम् अर्हसि। १९

न वासुदेवात् त्वत्तो वा, पाण्डवेय, बिभेम्यहम्।
त्वं हि क्षत्रिय-दायादो महा-कुल-विवर्धनः।" २०

तम् अब्रवीद् वासुदेवो रथस्थो,—
"राधेय, दिष्ट्या स्मरसीह धर्मम्!
प्रायेण नीचा व्यसने निमग्ना
निन्दन्ति दैवं, कु-कृतं न तु स्वम्। २१

यद् वारणावते पार्थान्, सुप्तान् जतु-गृहे तदा,
अदीपयस् त्वं, राधेय, क्व ते धर्मस् तदा गतः? २२

१९। प्रकीर्ण-केशे—मुक्त-कुन्तले। ब्रह्म-वादि-कृताञ्जलौ—वेद-वक्तरि कृताञ्जलौ च। २०। क्षत्रिय-दायादः—क्षत्रिय-सुलभ-सद्-गुण-निचयाधिकारी। २१। व्यसने—विपदि। २२। अदीपयः—प्राज्वालयः।

यदा सभायां कौन्तेयम् अनक्षज्ञं युधिष्ठिरम्
अक्ष-ज्ञः शकुनिर् जेता, क्व ते धर्मस् तदा गतः ? २३

यदा रजस्वलां कृष्णां दुःशासन-वशे स्थिताम्
सभायां प्राहसः, कर्ण, क्व ते धर्मस् तदा गतः ? २४

पतिम् अन्यं वृणीष्वेति वदंस् त्वं गज-गामिनीम्
उपप्रेक्षितवांस् त्वं हि। क्व ते धर्मस् तदा गतः ? २५

वनवासे व्यतीते च वर्षे, कर्ण, त्रयोदशे,
न प्रयच्छसि यद् राज्यं, क्व ते धर्मस् तदा गतः ? २६

यदाभिमन्युं बहवो युद्धे जघ्नुर् महा-रथाः,
परिवार्य रणे बालं, क्व ते धर्मस् तदा गतः ? २७

यद्येष धर्मस् तत्र न विद्यते हि,
किं सर्वथा तालु-विशोषणेन ?
अद्येह धर्म्याणि विधत्स्व, सूत,
तथापि जीवन् न विमोक्ष्यसे हि।" २८

एवम् उक्तस् तदा कर्णो वासुदेवेन, भारत,
लज्जयावनतो भूत्वा नोत्तरं किञ्चिद् उक्तवान् २९

क्रोधात् प्रस्फुरमाणौष्ठो, धनुर् उद्यम्य, भारत,
योधयामास वै पार्थं, महा-वेग-पराक्रमः। ३०

२३। जेता [जि+तृ (शीलार्थे), १।१]—अविरतं जयन् आस्त।
२५। उपप्रेक्षितवान्—अवामन्यथाः।

ततः शरं महा-घोरं ज्वलन्तम् इव पावकम्,
आददे पाण्डु-पुत्रस्य सूत-पुत्रो जिघांसया । ३१

स सायकः कर्ण-भुज-प्रमुक्तः
शक्राशनि-प्रख्य-रुचिः शिताग्रः,
भुजान्तरं प्राप्य धनञ्जयस्य,
विवेश, वल्मीकम् इवोरगोत्तमः । ३२

स, गाढ़-विद्धः समरे, महात्मा
विघूर्णमानः श्लथ-हस्त-गाण्डिवः
चचाल बीभत्सुर् अमित्र-मर्दनः,
क्षितेः प्रकम्पे च यथाचलोत्तमः । ३३

तद् अन्तरं प्राप्य, वृषो महा-रथो,
रथाङ्गम् उर्वी-गतम् उज्जिहीर्षुः,
रथाद् अवप्लुत्य, निगृह्य दोर्भ्यां
शशाक दैवाद् न, महा-बलो ऽपि । ३४

ततः किरीटी, प्रतिलभ्य संज्ञां,
जग्राह बाणं यम-दण्ड कल्पम्
दीप्तो ऽर्जुनः । प्राञ्जलिकं, महात्मा,
ततो ऽब्रवीद् वासुदेवो ऽपि पार्थम्,— ३५

"छिन्ध्यस्य मूर्धानम् अरेः शरेण,
न यावद् आरोहति वै रथं वृषः ।"

---

३४ । उज्जिहीर्षुः [उत्-हृ-स+उ, १।१]—उद्धर्तुम् इच्छुकः ।
३५ । प्राञ्जलिकम्—बद्धाञ्जलिम् ।

जघान कक्षाम् अमलार्क-वर्णां
महा-रथो, रथ-चक्रे निमग्ने— ३६

तं हस्ति-कक्षा-प्रवरं च केतुं
सुवर्ण-मुक्ता-मणि-वज्र-पृष्ठम्,
ज्ञान-प्रकर्षोत्तम-शिल्प-यत्नैः
कृतं सु-रूपं तपनीय-चित्रम्, ३७

ऊर्जस्करं तव सैन्यस्य नित्यं,
अमित्र-वित्रासनम्, ईड्य-रूपम्,
विख्यातम् आदित्य-सुतस्य लोके,
सम-त्विषं पावक-भानु-चन्द्रैः। ३८

ततः क्षुरप्रेण सु-शंसितेन
सुवर्ण-पुङ्खेन हुताग्नि-वर्चसा
श्रिया ज्वलन्तं ध्वजम् उन्ममाथ
महा-रथस्याधिरथेः किरीटी। ३९

यशश् च दर्पश् च तथा जयो ऽपि
प्रियाणि सर्वाणि च, तेन केतुना
साकं, कुरूणां हृदयानि चापतन्।
बभूव हा हेति च निस्वनो महान्। ४०

३८। ऊर्जस्करम्—तेजोवर्धनम्, उत्साह-जननम्। ३९। उन्ममाथ—उन्मूलयामास, उत्पाटयामास। साकम्—सह।

अथ त्वरन् कर्ण-वधाय, पार्थो
महेन्द्र-वज्रानल-दण्ड-सन्निभम्
आदत्त चाथाञ्जलिकं निषङ्गात्,
सहस्र-रश्मेर् इव रश्मिम् उत्तमम् । ४१

"तपो ऽस्ति तप्तं गुरवश् च तोषिता
मया यदीष्टं सुहृदां तथा श्रुतम्,
अनेन सत्येन निहन्त्वयं शरः
सुशंसितः कर्णम् अरिं, मयार्चितः" ४२

इत्यूचिवांस् तं प्रमुमोच बाणं
धनञ्जयः कर्ण-वधाय, घोरम् ।
तथा विमुक्तो बलिनार्क-तेजाः
प्रज्वालयामास दिशो नभश् च । ४३

तद् उद्यतादित्य-समान-तेजसः
शरद्-नभो-मध्य-ग-भास्करोपमम्
वराङ्गम् उर्व्याम् अपतच् चमू-पतेर्,
दिवा-करो ऽस्ताद् इव रक्त-मण्डलः । ४४

शरैर् विभिन्नं व्यसु तत्, सु-वर्चसः,
पपात कर्णस्य शरीरम् उच्छ्रितम्

---

४१ । सहस्र-रश्मेः—सहस्र-किरणस्य, सूर्यस्य । ४२ । श्रुतम्—कर्तव्यत्वेन अवधृतम् । सु-शंसितः—प्रशंसितः । ४३ । ऊचिवान् [वच्+वस्, १।१]—उक्त्वा । ४४ । तेजसः— 'तेजसम्' इति पाठो न समीचीनो भाति । वराङ्गम्—मस्तकम् । उर्व्याम्—पृथिव्याम् ।

स्रवद्-व्रणं, गैरिक-तोय-निस्रवं
गिरिर् यथा वज्र-हतं महा-शिरः। ४५

ततः शङ्खान् पाण्डवा दध्मुर् उच्चैर्,
दृष्ट्वा कर्णं पातितं फाल्गुनेन।
तं सोमकाः प्रेक्ष्य हतं शयानं
सैन्यैः सार्धं सिंह-नादान् प्रचक्रुः। ४६

तूर्याणि चाजघ्नुर् अतीव हृष्टाः,
वासांसि चैवादुधुवुर् भुजांश् च।
संवर्धयन्तश् च नरेन्द्र-योधाः
पार्थं समाजग्मुर्, अतीव हृष्टाः। ४७

हते कर्णे, कुरवः प्राद्रवन्त,
भयार्दिता गाढ-विद्धाश् च सङ्ख्ये,
अवेक्षमाणा मुहुर् अर्जुनस्य
ध्वजं महान्तं वपुषा ज्वलन्तम्। ४८

भीमश् च, भीमेन महा-स्वनेन
नादं कृत्वा रोदसी कम्पयानः,
आस्फोटयन् वल्गते नृत्यते च
हते कर्णे, त्रासयन् धार्तराष्ट्रान्। ४९

४७। संवर्धयन्तः—संमानयन्तः। ४९। कम्पयानः—कम्पयमानः। आस्फोटयन्—बाहु-शब्दं कुर्वन्। वल्गते—ववल्गे, बहु भाषमाणः पुप्लुवे। नृत्यते—ननर्त। आ आ.। उभयत्र कथायां लट्। सं सो. ३३९।

मद्राधिपश् चैव विमूढ-चेतास्
तूर्णं रथेनापहृत-ध्वजेन
दुर्योधनस्यान्तिकम् एत्य, राजन्,
संभाष्य, दुःखार्त्तो, उवाच वाक्यम्,— ५०

"नैतादृशं, भारत, युद्धम् आसीद्
यथाद्य कर्णार्जुनयोर् बभूव।
ग्रस्तौ हि कर्णेन समेत्य कृष्णाव्
अन्ये च सर्वे तव शत्रवो ये। ५१

दैवं तु यत् तत् स्व-वशे प्रवृत्तम्।
तत् पाण्डवान् पाति हिनस्ति चास्मान्!
अवध्यकल्पा निहता नरेन्द्रास्
तवार्थ-कामा युधि पाण्डवेयैः!" ५२

एतद् वचो मद्र-पतेर् निशम्य,
स्वं चापनीतं मनसा निरीक्ष्य,
दुर्योधनो दीन-मना वि-संज्ञः
पुनः पुनर् न्यश्वसद्, आर्त-रूपः। ५३

पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः
पृथिवीं चान्तरीक्षं च दिवं च समपूरयत्। ५४

ततो महा-रवं चक्रुर् योधा, राजन्, समन्ततः,
वार्यमाणा, भयोद्विग्नास्, तव पुत्रेण, भारत। ५५

५२। स्व-वशे प्रवृत्तम्—स्वेच्छायां प्रवृत्तम्, स्वेष्टार्थ-साधने प्रावर्तत।

तेषां तु मतम् आज्ञाय, पुत्रस् ते, भरतर्षभ,
अवहारं ततश् चक्रे शल्यस्यानुमते, नृप। ५६

एका-दशो ऽध्यायः

शव-परिदर्शनम्

आश्लिष्य पार्थं दाशार्हो हर्षाद् वचनम् अब्रवीत्,—
"वधं वै वृत्र-कर्णाभ्यां कथयिष्यन्ति मानवाः। १

वज्रेण निहतो वृत्रः संयुगे भूरि-तेजसा।
त्वया तु निहतः कर्णो धनुषा निशितैः शरैः। २

तम् इमं विक्रमं लोके प्रथितं ते यशस्करम्
निवेदय त्वं, कौन्तेय, धर्म-राजाय, भारत! ३

वर्तमाने तु युद्धे वै तव कर्णस्य चोभयोः,
द्रष्टुम् आयोधनं पूर्वम् आगतो धर्म-नन्दनः। ४

सुभृशं गाढ़-विद्धत्वाद् न शक्तः स्थातुम् आहवे।
ततः स्व-शिविरं यातः स राजा पुरुषर्षभः।" ५

एवम् उक्त्वार्जुनं, कृष्णः सैनिकान् इदम् अब्रवीत्,—
"परान् अभिमुखा यत्तास् तिष्ठध्वं। भद्रम् अस्तु वः!" ६

धृष्टद्युम्नं युधामन्युं माद्री-पुत्रौ वृकोदरम्
युयुधानं च गोविन्द इदं वचनम् अब्रवीत्,— ७

१। वृत्र-कर्णाभ्याम्—वृत्र-कर्णयोः। Cf. 'आत्मजस् तुभ्यम्'(६।१।३७)।

६। तिष्ठध्वम्—तिष्ठत। आत्म.।

"यावद् आवेद्यते राज्ञे हतः कर्णो ऽर्जुनेन वै,
तावद् भवद्भिर् यत्तैस् तु भवितव्यं नराधिपैः" । ८
स, तैः शूरैर् अनुज्ञातो, ययौ राज-निवेशनम्,
पार्थम् आदाय, गोविन्दो, ददर्श च युधिष्ठिरम् ९
शयानं राज-शार्दूलं काञ्चने शयनोत्तमे ।
अगृह्णीतां च मुदितौ चरणौ पार्थिवस्य तौ । १०
तयोः प्रहर्षम् आलोक्य प्रहारांश् चातिमानुषान्,
राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः । ११
समुत्थाय महा-बाहुः पुनः पुनर्, अरिन्दमः,
वासुदेवार्जुनौ प्रेम्णा पुनश् च परिषस्वजे । १२
ततो ऽस्मै तद् यथा-वृत्तं वासुदेवः प्रियंवदः
कथयामास कर्णस्य निधनं, यदु-नन्दनः । १३
ईषत् उत्स्मयमानस् तु, कृष्णो राजानम् अब्रवीत्
युधिष्ठिरं हतामित्रं कृताञ्जलिर् अथाच्युतः,— १४
"यस् तु द्यूत-जितां कृष्णां प्राहसत् पुरुषाधमः,
तस्याद्य सूत-पुत्रस्य भूमिः पिबति शोणितम् । १५
शेते ऽसौ शर-पूर्णाङ्गः शत्रुस् ते, कुरु-पुङ्गव !
तं पश्य पुरुष-व्याघ्रं विभिन्नं बहुधा शरैः ।" १६
इति श्रुत्वा वचस् तस्य केशवस्य महात्मनः,
युधिष्ठिरस् तु दाशार्हं प्रहृष्टः प्रत्यपूजयत्
दिष्ट्या दिष्ट्येति ; राजेन्द्र, वाक्यं चेदम् उवाच ह,— १७

"नैतच् चित्रं, महा-बाहो, त्वयि, देवकि-नन्दन,
त्वया सारथिना पार्थो यत् कुर्याद् अप्यमानुषम्"। १८

इत्युक्त्वा धर्म-राजस् तु, तं रथं हेम-भूषितम्
आस्थाय, पुरुष-व्याघ्रः, स्व-बलेनाभि-संवृतः, १९

कृष्णार्जुनाभ्यां वीराभ्याम्, अनुमन्त्र्य ततः प्रियम्,
आगतो बहु-वृत्तान्तं द्रष्टुम् आयोधनं तदा। २०

गन्ध-तैलावसिक्ताभिः काञ्चनीभिः सहस्रशः
दीपिकाभिः कृतोद्द्योतं पश्यते वै वृषं तदा। २१

संजात-प्रत्ययो ऽतीव वीक्ष्य चैवं पुनः पुनः
प्रशशंस नर-व्याघ्राव् उभौ माधव-फाल्गुनौ,— २२

"अद्य राजास्मि, गोविन्द, पृथिव्यां भ्रातृभिः सह,
त्वया नाथेन वीरेण विदुषा परिपालितः। २३

त्रयोदश समास् तीर्णा जागरेण सु-दुःखिताः।
स्वप्स्यामो ऽद्य सुखं रात्रौ त्वत्-प्रसादाद्, महा-भुज।" २४

जग्मुः स्व-शिविरायैव मुदा युक्ता महा-रथाः।
एवम् एष क्षयो वृत्तः सु-महाल्ँ लोम-हर्षणः। २५

वैशम्पायन उवाच,—

श्रुत्वैतद् अ-प्रियं, राजा धृतराष्ट्रो मही-पतिः,
पपात भूमौ निश्चेष्टः कौरव्यः परमासनात्। २६

२१। पश्यते—पश्यति। आआ। कथायां लट्।

तथा सा पतिता देवी गान्धारी दीर्घ-दर्शिनी,
शुशोच बहुलालापैः कर्णस्य निधनं युधि। २७

तं पर्यगृह्लाद् विदुरो नृपतिं सञ्जयस् तथा।
तथैवोत्थापयामासुर् गान्धारीं कुरु-योषितः। २८

स दैवं परमं मत्वा भवितव्यं च, पार्थिवः
चिन्ता-शोक-परीतात्मा न जज्ञे, मोह-पीड़ितः। २९

इमं महा-युद्ध-मखं महात्मनोर्
धनञ्जयस्याधिरथेश् च यः पठेत्,
स सम्यग् इष्टस्य मखस्य यत् फलं
तद् आप्नुयात् संश्रवणाच् च, भारत। ३०

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
कर्ण-पर्व।

२९। दैवम्—भाग्यम्। परमम्—प्रधानम्, सर्व-श्रेष्ठम्। भवितव्यम्—अवश्यम्भावि। न जज्ञे—न [किञ्चिद् अपि] बुबुधे। ३०। मखः—यज्ञः। संश्रवणात्—साभिनिवेश-श्रवणात्।

इति तारकालोके नाम भारत-वृत्तौ कर्ण-पर्व।

अथ

श्रीभारते

शल्य-पर्व

प्रथमो ऽध्यायः

नवोद्यमः

सञ्जय उवाच,—

न सन्धातुम् अनीकानि न चैवाथ पराक्रमे
आसीद् बुद्धिर् हते कर्णे तव योधस्य कस्यचित्। १

कृपाविष्टः कृपो, राजन्, वयः-शील-समन्वितः।
अब्रवीत् तत्र तेजस्वी सो ऽभिसृत्य नराधिपम्,— २

"सर्वैर् अपि च जीवद्भिर् बीभत्सुर् अ-पराजितः।
को वेह स पुमान् अस्ति यो विजेष्यति पाण्डवम्? ३

१। सन्धातुम्—समाहर्तुम्, संग्रहीतुम्, मेलयितुम्।

नष्ट-चन्द्रा यथा रात्रिः, सेनेयं हत-नायका,
नाग-भग्न-द्रुमा शुष्का नदीवाकुलतां गता। ४

ध्वजिन्यां हत-नेत्रायां यथेष्टं श्वेत-वाहनः
चरिष्यति महा-बाहुः, कक्षेष्वग्निर् इव ज्वलन्। ५

सात्यकेश् चैव यो वेगो भीमसेनस्य चोभयोः,
दारयेत गिरीन् सर्वाञ् छोषयेत च सागरान्। ६

उवाच वाक्यं यद् भीमः सभा-मध्ये, विशाम् पते,
कृतं च सकलं तेन, भूयश् चैव करिष्यति। ७

आत्मनो ऽर्थे त्वया लोको यत्नतः सर्व आहृतः,
स ते संशयितस्, तात, आत्मा च, भरतर्षभ। ८

रक्ष दुर्योधनात्मानम्। आत्मा सर्वस्य भाजनम्।
भिन्ने हि भाजने, तात, दिशो गच्छति तद्-गतम्। ९

हीयमानेन वै सन्धिः पर्येष्टव्यः समेन च,
विग्रहो वर्धमानेन। नीतिर् एषा बृहस्पतेः। १०

ते वयं पाण्डु-पुत्रेभ्यो हीनाः स्म बल-शक्तितः।
तद् अत्र पाण्डवैः सार्धं सन्धिं मन्ये क्षमं, प्रभो। ११

५। हत-नेत्रायाम्—हतं नेत्रम् (नेता) यस्याः तादृश्याम्। १०। हीयमानेन—दुर्बलीक्रियमाणेन, पराभूयमानेन। पर्येष्टव्यः [परि-इष्+तव्य, ११।]—अन्वेष्टव्यः अन्वेषितुम् उचितः। बृहस्पतिः—नीति-शास्त्र-प्रणेता।

नातिक्रमिष्यते कृष्णो वचनं कौरवस्य ह
धृतराष्ट्रस्य, मन्ये ऽहं, नापि कृष्णस्य पाण्डवः।" १२

एवम् उक्तस्, ततो राजा, गौतमेन यशस्विना,
निःश्वस्य दीर्घम् उष्णं च, तूष्णीम्-आसीद्, विशाम् पते। १३

ततो मुहूर्तं स ध्यात्वा, धार्तराष्ट्रो महा-मनाः
कृपं शारद्वतं वाक्यम् इत्युवाच, परन्तपः, — १४

"यत् किञ्चित् सुहृदा वाच्यं तत् सर्वं श्रावितो ह्यहम्।
कृतं च भवता सर्वं, प्राणान् संत्यज्य युध्यता। १५

अक्ष-द्यूतेन नृपतिर् जितो ऽस्माभिर् महा-बलः।
स कथं मम वाक्यानि श्रद्दध्याद् भूय एव तु? १६

विललाप हि यत् कृष्णा, सभा-मध्ये समेयुषी,
न तद् मर्षयते कृष्णो, न राज्य-हरणं तथा। १७

एक-प्राणाव् उभौ कृष्णाव् अन्योन्य-प्रति-संहतौ।
पुरा यच् श्रुतम् एवासीद्, अद्य पश्यामि तत्, प्रभो। १८

स्वस्रीयं च हतं श्रुत्वा दुःखं स्वपिति केशवः।
कृतागसो वयं तस्य। हितं मे स कथं चरेत्? १९

अभिमन्योर् विनाशेन न शर्म लभते ऽर्जुनः।
स कथं मद्-हिते यत्नं प्रकरिष्यति, याचितः? २०

मध्यमः पाण्डवस् तीक्ष्णो भीमसेनो महा-बलः।
प्रतिज्ञातं च तेनोग्रं। स भज्येत, न संनमेत्। २१

१७। समेयुषी [सम्-आ-इ+वस्+ई, १।१]—समाजग्मुषी, समागत्य।
१९। कृतागसः—कृतापराधाः।

कृत-वैराव् उभौ वीरौ यमाव् अपि यमोपमौ ।
धृष्टद्युम्नः शिखण्डी च कृत-वैरौ मया सह ।
न निवारयितुं शक्याः संग्रामात् ते परन्तपाः । २२

यदा च द्रौपदी क्लिष्टा मद्-विनाशाय दुःखिता
उग्रं तेपे तपः—कृष्णा भर्तृणाम् अर्थ-सिद्धये २३

स्थण्डिले नित्यदा शेते यावद् वैरस्य यातनम्,
निक्षिप्य मानं दर्पं च वासुदेव-सहोदरा २४

कृष्णायाः प्रैष्यवद् भूत्वा शुश्रूषां कुरुते सदा ।
इति सर्वं समुन्नद्धं न निर्वाति कथञ्चन । २५

कथं च नाम, भुक्त्वेमां पृथिवीं सागराम्बराम्,
पाण्डवानां प्रसादेन भोक्ष्ये राज्यम् अ-कण्टकम् ? २६

उपर्युपरि वै राज्ञां ज्वलित्वा भास्करो यथा,
युधिष्ठिरं कथं पश्चाद् अनुयास्यामि दासवत् ? २७

कथं भुक्त्वा स्वयं भोगान् दत्त्वा दायांश् च पुष्कलान्,
कृपणं वर्तयिष्यामि कृपणैः सह जीविकाम् ? २८

नाभ्यसूयामि ते वाक्यम् । उक्तं स्निग्धं हितं त्वया ।
न तु सन्धिम् अहं मन्ये प्राप्त-कालं कथञ्चन । २९

२४ । स्थण्डिले—अनावृतायां भूमौ । यातनम्—परिशोधः । वासुदेव-सहोदरा—सुभद्रा । नेयं किं कृष्णस्य वैमात्रेयी भगिनी ? Cf. उपरिष्टात् १।४४।७ । २५ । समुन्नद्धम् [सम्-उत्-नह्+त, १।१]—अन्योन्यानुस्यूतम् । २८ । दायान्—धनानि । पुष्कलान्—श्रेष्ठान् । कृपणम्—दैन्येन । कृपणैः—दीनैः ।

ये मदर्थे हताः शूरास् तेषां कृतम् अनुस्मरन्,
ऋणं तत् प्रतिमुञ्चानो न राज्ये मन आदधे। ३०

पातयित्वा वयस्यांश् च भ्रातॄन् अथ पितामहान्
जीवितं यदि रक्षेयं, लोको मां गर्हयेद् ध्रुवम्। ३१

कीदृशं तद् भवेद् राज्यं मम, हीनस्य बन्धुभिः
सखिभिश् च सुहृद्भिश् च, प्रणिपत्य च पाण्डवम्? ३२

सो ऽहम् एतादृशं कृत्वा जगतो ऽस्य पराभवम्,
सु-युद्धेन ततः स्वर्गं प्राप्स्यामि। न तदन्यथा।" ३३

एवं दुर्योधनेनोक्ताः, सर्वे, संपूज्य तद् वचः,
साधु साध्विति राजानं क्षत्रियाः संबभाषिरे। ३४

पराजयम् अ-शोचन्तः कृत-चिन्ताश् च विक्रमे,
सर्वे, विनिश्चिता, योद्धुम् उदग्र-मनसो ऽभवन्। ३५

ते ऽब्रुवन् सहितास् तत्र राजानं शल्य-सन्निधौ,—
"कृत्वा सेना-प्रणेतारं, परांस् त्वम् योद्धुम् अर्हसि।" ३६

दशाङ्गं यश् चतुष्पादम् इष्वस्त्रं वेद तत्त्वतः,
तम् अभ्येत्यात्मजस् तुभ्यम् अश्वत्थामानम् अब्रवीत्,— ३७

३०। प्रतिमुञ्चानः—प्रतिमुञ्चमानः, परिशोधयन्। ३५। उदग्र-मनसः—उत्तेजित-चित्ताः। ३७। दशाङ्गम्—'व्रतं प्राप्तिर् धृतिः पुष्टिः स्मृतिः क्षेपो ऽरि-भेदनम्, चिकित्सोद्दीपनं कृष्टिर् इष्वस्त्रं स्याद् दशाङ्गकम्'। चतुष्पादम्—'दीक्षा शिक्षात्म-रक्षा च एतत्-साधनम् एव च, धनुर्वेदस्य चत्वार एते पादाः प्रकीर्तिताः'। तुभ्यम्—तव। *Cf.* 'वधं वै कर्ण-वृत्राभ्याम्' (८।११।१)।

"गुरु-पुत्राद्य सर्वेषाम् अस्माकं परमा गतिः
भवांस्। तस्माद् नियोगात् ते को ऽस्तु सेना-पतिर् मम ?" ३८

द्रौणिर् उवाच,—

अयं कुलेन वीर्येण तेजसा यशसा श्रिया,
सर्वैर् गुणैः समुदितः शल्यो नो ऽस्तु चमू-पतिः। ३९

भागिनेयान् निजांस् त्यक्त्वा कृतज्ञो ऽस्मान् उपागतः,
महा-सेनो महा-बाहुर्, महा-सेन इवापरः। ४०

एनं सेना-पतिं कृत्वा नृ-पतिं, नृप-सत्तम,
शक्यः प्राप्तुं जयो ऽस्माभिर्, देवैः स्कन्दम् इवाजितम्। ४१

सञ्जय उवाच,—

ततो दुर्योधनः शल्यं, भूमौ स्थित्वा, रथे स्थितम्,
उवाच, प्राञ्जलिर् भूत्वा, राम-भीष्म-समं रणे,— ४२

"अयं स कालः सं-प्राप्तो मित्राणां, मित्र-वत्सल,
यत्र मित्रम् अमित्रं वा परीक्षन्ते बुधा जनाः। ४३

स भवान् अस्तु नः शूरः प्रणेता वाहिनी-मुखे।
रणं याते च भवति पाण्डवा मन्द-चेतसः
भविष्यन्ति सहामात्याः पाञ्चालाश् च निरुद्यमाः। ४४

शल्य उवाच,—

यत् त्वं मां मन्यसे, राजन्, कुरु-राज, करोमि तत्।
त्वत्-प्रियार्थं हि मे सर्वं, प्राणा राज्यं धनानि च। ४५

३९। समुदितः [सम्-वद्+तः, १।१]—सु-वि-ख्यातः। ४०। महा-सेनः (१)—महती सेना यस्य सः तथोक्तः। महा-सेनः (२)—कार्त्तिकेयः।

उद्यतां पृथिवीं सर्वां स-सुरासुर-मानवाम्
योधयेयं रण-मुखे, संक्रुद्धः ! किम् उ पाण्डवान् ? ४६
विजेष्ये च रणे पार्थान् सोमकांश् च समागतान् ।
अहं सेना-प्रणेता ते भविष्यामि, न संशयः । ४७

सञ्जय उवाच,—

एवम् उक्तस्, ततो राजा मद्राधिपतिम् अञ्जसा
अभ्यषिञ्चत सेनाया मध्ये, भारत-सत्तम । ४८

द्वितीयो ऽध्यायः

अष्टा-दशो दिवसः—शल्य-पातः

व्यतीतायां रजन्यां तु राजा दुर्योधनस् तदा
अब्रवीत् तावकान् सर्वान्,—"संनह्यन्ताम् महा-रथाः" । १
राज्ञस् तु मतम् आज्ञाय समनह्यत सा चमूः ।
वादित्राणां च निनदः प्रादुरासीद्, विशाम् पते । २
ततः सर्वे, समागम्य पुत्रेण तव, सैनिकाः—
कृपश् च कृत-वर्मा च द्रौणिः शल्यो ऽथ सौबलः ३
अन्ये च पार्थिवाः शेषाः समयं चक्रिरे तदा,
'न न एकेन योद्धव्यं कथञ्चिद् अपि पाण्डवैः । ४

१। संनह्यन्ताम्—सज्जीभवन्तु । ४। न एकेन—अस्माकम् केन-चित् अनन्य-सहायेन ।

योह्येकः पाण्डवैर् युध्येद् यो वा युध्यन्तम् उत्सृजेत्,
स पञ्चभिर् भवेद् युक्तः पातकैश् चोपपातकैः।' ५

एवं ते समयं कृत्वा, सर्वे तत्र महा-रथाः
मद्र-राजं पुरस्कृत्य तूर्णम् अभ्यद्रवन् परान्। ६

पाण्डवाश् च महेष्वासा व्यूह्य सैन्यम्, अनिन्दिताः,
त्रिधा भूत्वा, महा-राज, तव सैन्यम् उपाद्रवन्। ७

ततो न्यवर्तत बलं तावकं, भरतर्षभ,
शरैः प्रणुन्नं बहुधा पाण्डवैर् जित-काशिभिः। ८

तत् प्रभग्नं बलं दृष्ट्वा, मद्र-राजः प्रतापवान्
उवाच सारथिं,---"तूर्णं चोदयाश्वान् मनो-जवान्। ९

एष तिष्ठति वै राजा पाण्डु-पुत्रो युधिष्ठिरः
छत्रेण ध्रियमाणेन पाण्डरेण विराजता।" १०

एवम् उक्तस्, ततः प्रायाद् मद्र-राजस्य सारथिः
यत्र राजा सत्य-सन्धो धर्म-राजो युधिष्ठिरः। ११

पाण्डवानां बलौघस् तु, शल्यम् आसाद्य, मारिष,
व्यतिष्ठत तदा युद्धे, सिन्धोर् वेग इवाचलम्। १२

५। पञ्चभिः पातकैः—पञ्च-महापातकैः। 'ब्रह्म-हत्या सुरा-पानं स्तेयं गुर्वङ्गनागमः, महान्ति पातकान्याहुः संसर्गश् चापि तैः सह'—मसं. ११।५५। उप-पातकैः—गोवधादिभिः नास्तिक्यान्तैः उप-पातकैः। मसं. ११।६०-६७। ८। प्रणुन्नम्—प्रपीड़ितम्। जित-काशिभिः—जय-शोभिभिः। १२। व्यतिष्ठत—निश्चल आस्त। 'समवप्रविभ्यः स्थः' इत्यात्मने-पदम्। पा. १।३।२२।

मद्र-राजं तु समरे दृष्ट्वा युद्धाय धिष्ठितम्,
कुरवः संन्यवर्तन्त मृत्युं कृत्वा निवर्तनम्। १३

तेषु, राजन्, निवृत्तेषु व्यूढानीकेषु भागशः,
प्रावर्तत महा-रौद्रः संग्रामः शोणितोदकः। १४

विनर्दमानो मद्रेशो मेघ-ह्रादो महा-बलः
अजात-शत्रुं कौन्तेयम् अभ्यधावद् युधिष्ठिरम्। १५

तम् आपतन्तं पत्त्यश्वैः क्रुद्धो राजा युधिष्ठिरः
अवारयच् छरैस् तीक्ष्णैर् मत्तं द्विपम् इवाङ्कुशैः। १६

तस्य शल्यः शरं घोरं मुमोचाशीविषोपमम्।
सो ऽभ्यविध्यद् महात्मानं वेगेनाभ्यपतच् च गाम्। १७

ततो वृकोदरः क्रुद्धः शल्यं विव्याध सप्तभिः,
पञ्चभिः सहदेवस् तु, नकुलो दशभिः शरैः। १८

द्रौपदेयाश् च शत्रुघ्नं शूरम् आर्तायनिं शरैः,
अभ्यवर्षन् महा-वेगं, मेघा इव मही-धरम्। १९

ततो दृष्ट्वा तुद्यमानं शल्यं पार्थैः समन्ततः,
कृत-वर्मा कृपश् चैव संक्रुद्धाव् अभ्यधावताम्। २०

ततः शल्यो, महा-राज, धर्म-राजं युधिष्ठिरम्,
विव्याध निशितैर् बाणैर्, हन्तु-कामो महा-रथम्। २१

१३। धिष्ठितम्—अधिष्ठितम्। छन्दोनुरोधात् अकार-लोपः।

१५। विनर्दमानः—विनर्दन्, उच्चैर् नदन्। आआ.।

ततो युधिष्ठिरो राजा, बाण-जालेन पीड़ितः,
बभूव हृत-विक्रान्तो, जम्भो वृत्र-हणा यथा । २२

सात्यकिर् भीमसेनश् च माद्री-पुत्रौ च पाण्डवौ,
परिवार्य रथैः शल्यं पीड़यामासुर् आहवे । २३

अमर्ष-वशम् आपन्नो, धर्म-राजो युधिष्ठिरः
समाहूयाब्रवीत् सर्वान् भ्रातॄन् कृष्णं च माधवम्,— २४

"यथा-भागं यथोत्साहं भवन्तः कृत-पौरुषाः ।
भागो ऽवशिष्ट एको ऽयं मम शल्यो महा-रथः । २५

सो ऽहम् अद्य युधा जेतुम् आशंसे मद्रकेश्वरम् ।
तत्र यद् मानसं मह्यं तत् सर्वं निगदामि वः । २६

चक्र-रक्षाव् इमौ शूरौ मम माद्रवती-सुतौ
मदर्थं प्रतियुध्येतां, मानार्हौ सत्य-सङ्गरौ । २७

योत्स्ये ऽहं मातुलेनाद्य क्षत्र-धर्मेण, पार्थिवाः,
स्वयं शम् अभिसन्धाय, विजयायेतराय वा । २८

तस्य मे ऽप्यधिकं शस्त्रं सर्वोपकरणानि च
संयुज्यन्तां रथे क्षिप्रं शास्त्रवत् रथ-योजकैः । २९

२२। जम्भो वृत्र-हणा यथा—मन्थनेन समुद्राद् उत्थितस्य अमृतस्यार्थे प्रवृत्ते देवासुर-युद्धे वृषाकपिणा अपराजितं जम्भं नाम दैत्यम् इन्द्रो जघान। भाग. ८।१०-११। २६। मह्यम्—मम। २८। शम्—मङ्गलम्। इतराय—अन्यस्मै, मृत्यवे इति भावः।

शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस् तथोत्तरम्,
पृष्ठ-गोपो भवत्वद्य मम पार्थो धनञ्जयः ।
पुरः-सरो ममाद्यास्तु भीमः शस्त्र-भृतां वरः । ३०
एवम् अभ्यधिकः शल्याद् भविष्यामि महा-मृधे ।"
एवम् उक्तास् तथा चक्रुः सर्वे राज्ञः प्रियैषिणः । ३१

तत्राद्भुतम् अपश्याम कुन्ती-पुत्रे युधिष्ठिरे,
पुरा भूत्वा मृदुर् दान्तो यत् तदा दारुणो ऽभवत् । ३२
विवृताक्षस् तु कौन्तेयो वेपमानश् च मन्युना
चिच्छेद योधान् निशितैर् भल्लैः शत-सहस्रशः । ३३
तस्य तच् चरितं दृष्ट्वा संग्रामे, भीम-कर्मणः,
वित्रेसुस् तावकाः सर्वे । शल्यस् त्वेनं समभ्ययात् । ३४
व्यदृश्येतां तदा, राजन्, कङ्क-पत्रिभिर् आहवे
उद्भिन्न-रुधिरौ शूरौ मद्र-राज-युधि-ष्ठिरौ । ३५
ततः शर-शतं शल्यो मुमोचाग्र्यं युधिष्ठिरे,
धनुश् चास्य शिताग्रेण बाणेन निरकृन्तत । ३६

ततस् तु शक्तिं रुचिरोग्र-दण्डां
मणि-प्रवेकोज्ज्वलितां प्रदीप्ताम्
चिक्षेप वेगात् सु-भृशं, महात्मा,
मद्राधिपाय प्रवरः कुरूणाम् । ३७

३३। विवृताक्षः—विस्फारित-लोचनः। भल्लैः—स्नुही-दल-तुल्य-फलकास्त्रैः।
३६।निरकृन्तत [निः-कृत्+अन्त]—निरकृन्तत् , अच्छिनत् । आआ. ।

सा, तस्य मर्माणि विदार्य, शुभ्रम्
उरो विशालं च तथैव भित्त्वा,
विवेश गां तोयम् इवाप्रसक्ता,
यशो विशालं नृपतेर् वहन्ती । ३८

नासाक्षि-कर्णास्य-विनिःसृतेन
प्रस्यन्दता च व्रण-सम्भवेन
संसिक्त-गात्रो रुधिरेण सो ऽभूत्,
क्रौञ्चो यथा स्कन्द-हतो महाद्रिः । ३९

बाहू प्रसार्याभिमुखो धर्म-राजस्य मद्र-राट्
ततो निपतितो भूमाव्, इन्द्र-ध्वज इवोच्छ्रितः । ४०

पार्थाः समेताः परम-प्रहृष्टाः
शङ्खान् प्रदध्मुर् हतम् ईक्ष्य शल्यम् ;
चक्रुश् च नाना-विध-वाद्य-शब्दान्
निनादयन्तो वसुधां समन्तात् । ४१

३८। तोयम्—जलम्। अ-प्रसक्ता—कुत्रचित् अ-लग्ना, अ-प्रतिहता। नृ-पतेः—मद्राधिपतेः। वहन्ती—हरन्ती ४०। प्रस्यन्दता—प्रस्यन्दमानेन, स्रवता। पआ.। क्रौञ्चो यथा स्कन्द-हतः—पुरा किल कार्त्तिकेयः बाणैर् हिमालयस्य पुत्रं क्रौञ्चं नाम महा-गिरिं पातयामास श्रुत्वा च करुण-निनदं शैलानां पश्चात् तस्य शिखरं शक्त्या अदीदरत् (मभा. ३।२२५।३२-३६)। परशु-रामो हि शङ्कराद् धनुर्वेदम् अधीयानः कार्त्तिकेयस्य स्पर्द्धया बाणेन महा-गिरिं क्रौञ्चं भित्त्वा हंस-द्वारं जनयामासेति कथैव कालिदासेनाद्रियते (मे. १।५७)। ४१। ईक्ष्य—ईक्षित्वा। आप्र.।

तृतीयो ऽध्यायः

चरमोद्यमः

ततो दुर्योधनो राजा, पृष्ठम् आरुह्य वाजिनः,
अपाक्रामद् हत-रथो नातिदूरम्, अरिन्दमः । १

अ-दृष्ट्वा तु रथानीके दुर्योधनम् अरिन्दमम्,
अश्वत्थामा कृपश् चैव कृत-वर्मा च सात्वतः २

अपृच्छन् क्षत्रियांस् तत्र,—"क नु दुर्योधनो गतः ?"
मन्वाना निहत तत्र तव पुत्रं महा-रथाः । ३

आहुः केचिद्,—"हते सूते प्रयातो यत्र सौबलः" ।
अपरे त्वब्रुवंस् तत्र क्षत्रिया भृश-विक्षताः,— ४

"दुर्योधनेन किं कार्यं ? द्रक्ष्यध्वं यदि जीवति ।
युध्यध्वं सहिताः सर्वे ! किं वो राजा करिष्यति ?" ५

श्रुत्वा तु वचनं तेषाम्, अश्वत्थामा महा-बलः
कृपश् च कृत-वर्मा च प्रययुर् यत्र सौबलः । ६

ततस् तेषु प्रयातेषु, धृष्टद्युम्न-पुरस्कृताः,
आययुः पाण्डवा, राजन्, विनिघ्नन्तश् च तावकान् । ७

---

५ । द्रक्ष्यध्वम् [दृश्+स्यध्वम्]—अद्रक्ष्यध्वम् । क्रियाया अनिष्पत्तौ हेतुमति भविष्यति लृङ् । अटोऽभाव आर्षः । आआ. ।

अदृश्यमाने कौरव्ये पुत्रे दुर्योधने तव,
सोदराः सहिता भूत्वा भीमसेनम् उपाद्रवन्। ८

ते हता न्यपतन् भूमौ स्यन्दनेभ्यो महा-रथाः,
वसन्ते पुष्प-शवला निकृत्ता इव किंशुकाः! ९

शकुनिस् तु, महा-राज, भीमं विद्ध्वा त्रिभिः शरैः,
सायकानां नवत्या तु सहदेवम् अवाकिरत्। १०

स्वम् अंशम् अवशिष्टं तं संस्मृत्य, शकुनिं, नृप,
रथेन काञ्चनाङ्गेन सहदेवः समभ्ययात्। ११

उवाच चैनं मेधावी, निगृह्य, स्मारयन्न् इव,—
"क्षत्र-धर्मे स्थिरो भूत्वा युध्यस्व, पुरुषो भव! १२

यत् तदा हृष्यसे, मूढ, ग्लहन्न् अक्षैः सभा-तले,
फलम् अद्य प्रपद्यस्व कर्मणस् तस्य, दुर्मते। १३

निहतास् ते दुरात्मानो ये ऽस्मान् अवहसन् पुरा।
दुर्योधनः कुलाङ्गारः शिष्टस् त्वं चास्य मातुलः। १४

अद्य ते निहनिष्यामि क्षुरेणोन्मथितं शिरः,
वृक्षात् फलम् इवाविद्धं लगुडेन प्रमाथिना।" १५

एवम् उक्त्वा, महा-राज, सहदेवो महा-बलः
शकुनेः प्रेषयामास शर-वृष्टिं दुरासदाम्। १६

१३। हृष्यसे—अहृष्यः। आआ। ग्लहन्—पणमानः। १५। निहनिष्यामि—आहनिष्यामि। उन्मथितम्—उच्छिन्नम्। आविद्धम्—क्षिप्तम्।

ततस् तु क्रुद्धः सुबलस्य पुत्रो
माद्री-सुतं सहदेवं विमर्दे
प्रासेन जाम्बूनद-भूषणेन
जिघांसुर् एको ऽभिपपात शीघ्रम् । १७

माद्री-सुतस् तस्य समुद्यतं तं
प्रासं सु-वृत्तौ च भुजौ रणाग्रे
भल्लैस् त्रिभिर् युगपत् संचकर्त,
ननाद चोच्चैस् तरसाजि-मध्ये । १८

तस्याशु-कारी सु-समाहितेन
सुवर्ण-पुङ्खेन दृढायसेन
भल्लेन सर्वावरणातिगेन
शिरः शरीरात् प्रममाथ भूयः । १९

स तच् छिरो वेगवता शरेण
सुवर्ण-पुङ्खेन शिलाशितेन
प्रावेरयत् कुपितः पाण्डु-पुत्रो,
यत् तत् कुरूणाम् अनयस्य मूलम् । २०

ततः क्रुद्धा, महा-राज, सौबलस्य पदानुगाः
त्यक्त्वा जीवितम् आक्रन्दे पाण्डवान् पर्यवारयन् । २१

तान् अर्जुनः प्रत्यगृह्णात्, सहदेव-जये धृतः,
भीमसेनश् च तेजस्वी क्रुद्धाशीविष-दर्शनः । २२

२०। प्रावेरयत् [प्र-अव+ईर्-इ+द्]—आकाश-मार्गेण दूरं निनाय।

संगृहीतायुधान् बाहून् योधानाम् अभिधावताम्
भल्लैश् चिच्छेद बीभत्सुः, शिरांस्यपि हयान् अपि। २३

ततो दुर्योधनो राजा, दृष्ट्वा स्व-बल-संक्षयम्,
हत-शेषान् समानीय, क्रुद्धो, रथ-गणान् बहून्, २४

कुञ्जरांश् च हयांश् चैव पादातांश् च समन्ततः,
उवाच सहितान् सर्वान् धार्तराष्ट्र इदं वचः,— २५

"समासाद्य रणे सर्वान् पाण्डवान् स-सुहृद्-गणान्
पाञ्चाल्यं चापि स-बलं हत्वा, शीघ्रं निवर्तत।" २६

तस्य ते शिरसा गृह्य वचनं, युद्ध-दुर्मदाः
प्रत्युद्ययू रणे पार्थांस् तव पुत्रस्य शासनात्। २७

तत् सैन्यं, भरत-श्रेष्ठ, मुहूर्तेन महात्मभिः
अवध्यत, रणं प्राप्य---त्रातारं नाभ्यविन्दत। २८

अक्षौहिण्यः समेतास् तु तव पुत्रस्य, भारत,
एका-दश। हता युद्धे ताः, प्रभो, पाण्डु-सृञ्जयैः। २९

तेषु राज-सहस्रेषु तावकेषु महात्मसु
एको दुर्योधनो, राजन्न्, अदृश्यत, भृशं क्षतः। ३०

रथानां द्वे सहस्रे तु सप्त नाग-शतानि च
पञ्च चाश्व-सहस्राणि पत्तीनां च शतं शताः, ३१

२६। निवर्तत—निवर्तध्वम्। पआ। २८। नाभ्यविन्दत—न अलभत। ३१। शतं शताः—शतं शतानि। पुंस्त्वम् आर्षम्।

एतच्-छेषम् अभूद्, राजन्, पाण्डवानां महद् बलम्
परिगृह्य हि यद् युद्धे धृष्टद्युम्नो व्यवस्थितः । ३२

एकाकी, भरत-श्रेष्ठ, ततो दुर्योधनो नृपः
नापश्यत् समरे कंचित् सहायं, रथिनां वरः । ३३

नर्दमानान् परांश् चैव स्व-बलस्य च संक्षयम्
तथा दृष्ट्वा, महा-राज, एकः स पृथिवी-पतिः,
हतं स्व-हयम् उत्सृज्य, प्राङ्-मुखः प्राद्रवद् रणात् । ३४

एका-दश-चमू-भर्ता पुत्रो दुर्योधनस् तव,
गदाम् आदाय, तेजस्वी पदातिः प्रस्थितो ह्रदम् । ३५

चतुर्थो ऽध्यायः

आपृच्छा

अनेक-शत-साहस्रे बले दुर्योधनस्य ह
नान्यो महा-रथो, राजन्, जीवमानो व्यदृश्यत १

द्रोण-पुत्राद् ऋते वीरात् तथैव कृत-वर्मणः
कृपाच् च गौतमाद्, राजन्, पार्थिवाच् च तवात्मजात् । २

क्रोशमात्रम् अपक्रान्तं गदा-पाणिम् अवस्थितम्,
एकं दुर्योधनं, राजन्न्, अपश्यं भृश-विक्षतम् । ३

१ । जीवमानः—जीवन् । आत्म. ।

स तु माम् अश्रु-पूर्णाक्षो नाशक्नोद् अभिवीक्षितुम्,
उपप्रैक्षत मां दृष्ट्वा तदा दीनम् अवस्थितम् । ४

तं चाहम् अपि शोचन्तं दृष्ट्वैकाकिनम् आहवे,
मुहूर्तम् नाशकं वक्तुं किञ्चिद्, दुःख-परिप्लुतः । ५

स, मुहूर्तम् इव ध्यात्वा प्रतिलभ्य च चेतनाम्,
भ्रातॄंश् च सर्व-सैन्यानि पर्यपृच्छत मां ततः । ६

तस्मै तद् अहम्-आचक्षे, सर्वं प्रत्यक्ष-दर्शिवान्,
भ्रातॄंश् च निहतान् सर्वान् सैन्यं च विनिपातितम् । ७

त्रयः किल रथाः शिष्टास् तावकानां, नराधिप,
इति प्रस्थान-काले मां कृष्ण-द्वैपायनो ऽब्रवीत् । ८

स दीर्घम इव निःश्वस्य प्रत्यवेक्ष्य पुनः पुनः,
असौ, मां पाणिना स्पृष्ट्वा, पुत्रस् ते प्रत्यभाषत,— ९

"त्वद् अन्यो नेह संग्रामे कश्चिज् जीवति, सञ्जय ।
द्वितीयं नेह पश्यामि, स-सहायाश् च पाण्डवाः । १०

ब्रूयाः, सञ्जय, राजानं प्रज्ञा-चक्षुषम् ईश्वरम्,
'दुर्योधनस् तव सुतः प्रविष्टो ह्रदम्' इत्युत । ११

सुहृद्भिस् तादृशैर् हीनः पुत्रैर् भ्रातृभिर् एव च,
पाण्डवैश् च हृते राज्ये, को नु जीवेत मादृशः ? १२

---

३ । उपप्रैक्षत—सम्यक् उपैक्षत । १२ । जीवेत—जीवेत्, जीवितुं शक्नोति । आश्चा ।

आचक्षीथाः सर्वम् इदं मां च मुक्तं महाहवात्,
अस्मिन् तोय-ह्रदे सुप्तं जीवन्तं भृश-विक्षतम् ।" १३

एवम् उक्त्वा, महा-राज, प्राविशत् तं ह्रदं नृपः ।
अस्तम्भयत तोयं च मायया मनुजाधिपः । १४

तस्मिन् ह्रदं प्रविष्टे तु, त्रीन् रथान् श्रान्त-वाहनान्
अपश्यं सहितान् एकस् तं देशं समुपेयुषः— १५

कृपं शारद्वतं वीर, द्रौणिं च रथिनां वरम्
भोजं च कृत-वर्माणं, सहितान् शर-विक्षतान् । १६

ते सर्वे, माम् अभिप्रेक्ष्य, तूर्णम् अश्वान् अचोदयन्,
उपयाय च माम् ऊचुर्,—"दिष्ट्या जीवसि, सञ्जय ! १७

कच्चिद् दुर्योधनो राजा, स नो जीवति, सञ्जय !"
आख्यातवान् अहं तेभ्यस् तदा कुशलिनं नृपम् । १८

तच् चैव सर्वम् आचक्षे यद् मां दुर्योधनो ऽब्रवीत् ।
ह्रदं चैवाहम् आचक्षं यं प्रविष्टो नराधिपः । १९

अश्वत्थामा तु तद्, राजन् , निशम्य वचनं मम,
तं ह्रदं विपुलं प्रेक्ष्य करुणं पर्यदेवयत् ,— २०

"अहो धिङ् ! न स जानाति जीवतो ऽस्मान् नराधिपः ।
पर्याप्ता हि वयं तेन सह योधयितुं परान् ।" २१

---

१४ । अ-स्तम्भयत—स्थिरं चकार । १५ । समुपेयुषः [सम्-उप-इ +वस् , २।व]—समुपागतान् । १७ । उपयाय—उपगम्य । १९ । आचक्षम्—आख्यम् । आप्र. ।

ते तु तत्र चिरं कालं विलप्य च, महा-रथाः
प्राद्रवन् रथिनां श्रेष्ठा, दृष्ट्वा पाण्डु-सुतान् रणे । २२
ते तु, मां रथम् आरोप्य कृपस्य सु-परिष्कृतम्,
सेना-निवेशम् आजग्मुर् हत-शेषास् त्रयो रथाः । २३
ततो वृद्धा, महा-राज, योषितां रक्षिणो नराः
राज-दारान् उपादाय प्रययुर् नगरं प्रति । २४
तत्र विक्रोशमानानां रुदतीनां च सर्वशः
प्रादुरासीद् महा-शब्दः, श्रुत्वा तद् बल-संक्षयम् । २५

पञ्चमो ऽध्यायः

आविष्कारः

युधिष्ठिरो ऽपि धर्मात्मा भ्रातृभिः सहितो रणे
हृष्टः पर्यचरद्, राजन्, दुर्योधन-वधेप्सया । १
मार्गमाणास् तु संक्रुद्धास् तव पुत्रं, जयैषिणः
यत्नतो ऽन्वेषमाणास् तु नैवापश्यञ् जनाधिपम् । २
यदा तु पाण्डवाः सर्वे सु-परिश्रान्त-वाहनाः,
ततः स्व-शिविरं प्राप्य व्यतिष्ठन्त स-सैनिकाः । ३

२५ । विक्रोशमानानाम्—विक्रोशन्तीनाम्, उच्चैर् परिदेवयमानानाम् । आआ. ।

३ । व्यतिष्ठन्त—अवातिष्ठन्त, व्यश्राम्यन्, निश्चेष्टा आसत ।

ततः कृपश् च द्रौणिश् च कृत-वर्मा च सात्वतः,
सन्निविष्टेषु पार्थेषु, प्रययुस् तं ह्रदं शनैः । ४

ते तं ह्रदं समासाद्य, यत्र शेते जनाधिपः,
अभ्यभाषत दुर्धर्षं राजानं सुप्तम् अम्भसि,--- ५

"राजन्न्, उत्तिष्ठ, युध्यस्व सहास्माभिर् युधिष्ठिरम् !
जित्वा वा पृथिवीं भुङ्क्ष्व, हतो वा स्वर्गम् आप्नुहि । ६

तेषाम् अपि बलं सर्वं हतं, दुर्योधन, त्वया ।
प्रतिविद्धाश् च भूयिष्ठं ये शिष्टास् तत्र सैनिकाः । ७

न ते वेगं विषहितुं शक्तास् तव, विशाम् पते,
अस्माभिर् अभिगुप्तस्य । तस्माद् उत्तिष्ठ, भारत ।" ८

दुर्योधन उवाच,—

दिष्ट्या पश्यामि वो मुक्तान् ईदृशात् पुरुष-क्षयात्,
पाण्डु-कौरव-सम्मर्दाज् जीवमानान् नरर्षभान् ! ९

विजेष्यामो वयं सर्वे विश्रान्ता विगत-क्लमाः ।
भवन्तश् च परिश्रान्ता वयं च भृश-विक्षताः । १०

न त्वेतद् अद्भुतं, वीरा, यद् वो महद् इदं मनः
अस्मासु च परा भक्तिर् । न तु कालः पराक्रमे । ११

विश्रम्यैकां निशाम् अद्य, भवद्भिः सहितो रणे
प्रतियोत्स्याम्यहं शत्रून् श्वो, न मे ऽस्त्यत्र संशयः । १२

---

५ । सुप्तम्—शयितम्, कृत-शयनम् ।

सञ्जय उवाच,—

एवम् उक्तो ऽब्रवीद् द्रौणी राजानं युद्ध-दुर्मदम्,---
"उत्तिष्ठ, राजन्---भद्रं ते---विजेष्यामो रणे परान्! १३

नाहत्वा सर्व-पाञ्चालान् विमोक्ष्ये कवचं, विभो,
इति सत्यं ब्रवीम्येतत्। तद् मे शृणु, जनाधिप।" १४

तेषु सम्भाषमाणेषु व्याधास् तं देशम् आययुः,
मांस-भार-परिश्रान्ताः, पानीयार्थं यदृच्छया। १५

ते तत्राधिष्ठितास् तेषां सर्वं तद् वचनं रहः
दुर्योधन-वचश् चैव शुश्रुवुः, सङ्गता मिथः। १६

अन्योन्यम् अब्रुवन्, राजन्, मृग-व्याधाः शनैर् इदम्,---
"दुर्योधनं ख्यापयामो, धनं दास्यति पाण्डवः"। १७

एवम् उक्त्वा तु, ते व्याधाः संप्रहृष्टा धनार्थिनः,
मांस-भारान् उपादाय, प्रययुः शिविरं प्रति। १८

पाण्डवाश् च, महा-राज, लब्ध-लक्षाः प्रहारिणः,
अ-पश्यमानाः संग्रामे दुर्योधनम् अवंस्थितम्, १९

निकृतेस् तस्य पापस्य ते पारं गमनेप्सवः
चारान् संप्रेषयामासुः समन्तात् तद्-रणाजिरे। २०

आगम्य तु, ततः सर्वे नष्टं दुर्योधनं नृपम्
न्यवेदयन्त, सहिता, धर्म-राजस्य, सैनिकाः। २१

तेषां तद् वचनं श्रुत्वा चाराणां, भरतर्षभ,
चिन्ताम् अभ्यगमत् तीव्रां निशश्वास च पार्थिवः। २२

अथ स्थितानां पाण्डूनां दीनानां, भरतर्षभ,
तस्माद् देशाद् अपक्रम्य, त्वरिता लुब्धका, विभो,
आजग्मुः शिविरं, दृष्ट्वा हृष्टा दुर्योधनं नृपम्। २३

ते तु पाण्डवम् आसाद्य भीमसेनं महा-बलम्,
तस्मै तत् सर्वम् आचख्युर् यद् वृत्तं यच् च वै श्रुतम्। २४

ततो वृकोदरो, राजन् , दत्त्वा तेषां धनं बहु,
धर्म-राजाय तत् सर्वम् आचचक्षे परन्तपः। २५

ततः प्राप्तो, महा-राज, धर्म-राजः प्रतापवान्
द्वैपायनं ह्रदं ख्यातं यत्र दुर्योधनो ऽभवत्। २६

यौधिष्ठिरस्य सैन्यस्य श्रुत्वा शब्दं, महा-रथाः
कृत-वर्मा कृपो द्रौणी राजानम् इदम् अब्रुवन्,— २७

"इमे ह्यायान्ति संहृष्टाः पाण्डवा जित-काशिनः।
अपयास्यामहे तावद्, अनुजानातु नो भवान्।" २८

दुर्योधनस् तु तच् श्रुत्वा तेषां तत्र तरस्विनाम्,
तथेत्युक्त्वा ह्रदं तं वै माययास्तम्भयत् , प्रभो। २९

ते गत्वा दूरम् अध्वानं, न्यग्रोधं प्रेक्ष्य, मारिष,
न्यविशन्त भृशं श्रान्ताश्, चिन्तयन्तो नृपं प्रति। ३०

२५। आचचक्षे—आचख्यौ। आप्र.। २८। अपयास्यामहे—[त्वत्तो] दूरे गच्छामः। आआ.।

ततस् तेष्वपयातेषु रथेषु त्रिषु, पाण्डवाः
तं ह्रदं प्रत्यपद्यन्त यत्र दुर्योधनो ऽभवत् । ३१

स्तम्भितं धार्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम्,
वासुदेवम् इदं वाक्यम् अब्रवीत् कुरु-नन्दनः,— ३२

"पश्येमां धार्तराष्ट्रेण मायाम् अप्सु प्रयोजिताम् !
विष्टभ्य सलिलं शेते । नास्य मानुषतो भयम् ।" ३३

वासुदेव उवाच,—

मायाविन इमां मायां मायया जहि, भारत ।
मायावी मायया वध्यः । सत्यम् एतद्, युधिष्ठिर । ३४

क्रियाभ्युपायैर् इन्द्रेण निहता दैत्य-दानवाः ।
वृत्रश् च निहतो, राजन्, क्रिययैव, महा-बलः । ३५

तथा पौलस्त्य-तनयो रावणो नाम राक्षसः
रामेण निहतो, राजन्, सानुबन्धः सहानुगः । ३६

क्रियाभ्युपायैर् इन्द्रेण त्रिदिवं भुज्यते, विभो ।
क्रिया बलवती, राजन्, नान्यत् किञ्चिद्, युधिष्ठिर । ३७

---

३३ । माया—छलम् । विष्टभ्य—स्थिरीकृत्य । ३४ । मायावी—छल-कारी । ३५ । क्रियाभ्युपायैः—शत्रु-क्रियानुरूपैर् धर्म्यैर् अधर्म्यैर् वा प्रतिकारैः । ३४-३५ । 'मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः' (ऋवे.-१।११।७) ।

षष्ठो ऽध्यायः

बहिराकर्षणम्

सञ्जय उवाच,—

जल-स्थं तं, महा-राज, तव पुत्रं महा-बलम्
अभ्यभाषत कौन्तेयः प्रहसन्न् इव, भारत,— १

"सर्वं क्षत्रं घातयित्वा स्व-कुलं च, विशाम् पते,
जलाशयं प्रविष्टो ऽद्य वाञ्छन् जीवितम् आत्मनः ! २

उत्तिष्ठ, राजन्, युध्यस्व सहास्माभिः, सुयोधन !
स ते दर्पो, नर-श्रेष्ठ, स च मानः क्व ते गतः ? ३

सर्वे त्वां शूर इत्येवं जना जल्पन्ति संसदि ।
व्यर्थं तद् भवतो मन्ये शौर्यं, सलिल-शायिनः । ४

न हि शूराः पलायन्ते शत्रून् दृष्ट्वा कथञ्चन ।
स त्वम् उत्तिष्ठ, युध्यस्व, विनीय भयम् आत्मनः । ५

अस्मांस् त्वं वा पराजित्य प्रशाधि पृथिवीम् इमाम् ।
अथवा निहतो ऽस्माभिर् भूमौ स्वप्स्यसि, भारत ।" ६

एवम् उक्तो, महा-राज, धर्म-पुत्रेण धीमता,
सलिलस्थस् तव सुत इदं वचनम् अब्रवीत्,— ७

"न प्राण-हेतोर् न भयाद् न विषादाद्, विशाम् पते,
इदम् अम्भः प्रविष्टो ऽस्मि । श्रमात् त्विदम् अनुष्ठितम् । ८

---

५ । विनीय—वशीकृत्य, दमित्वा । ८ । प्राण-हेतोः—जीवन-रक्षणाय ।
भयात्—[बन्धन-] भीतेः । विषादात्—शोकाभिभवात् ।

त्वं चाश्वसिहि, कौन्तेय, ये चाप्यनुगतास् तव,
अहम् उत्थाय वः सर्वान् प्रतियोत्स्यामि संयुगे ।" ९

युधिष्ठिर उवाच,—

आश्वस्ता एव सर्वे स्म । चिरं त्वां मृगयामहे !
तद् इदानीं समुत्तिष्ठ, युध्यस्वेह, सुयोधन । १०

हत्वा वा समरे पार्थान् स्फीतं राज्यम् अवाप्नुहि,
निहतो वा रणे ऽस्माभिर् वीर-लोकम् अवाप्स्यसि । ११

दुर्योधन उवाच,—

यदर्थं राज्यम् इच्छामि कुरूणां, कुरु-नन्दन,
त इमे निहताः सर्वे भ्रातरो मे, जनेश्वर । १२

क्षीण-रत्नां च पृथिवीं हत-क्षत्रिय-पुङ्गवाम्
नाभ्युत्सहाम्यहं भोक्तुं विधवाम् इव योषितम् । १३

अद्यापि त्वहम् आशंसे त्वां विजेतुं, युधिष्ठिर,
भङ्क्त्वा पाञ्चाल-पाण्डूनाम् उत्साहं, भरतर्षभ । १४

न त्विदानीम् अहं मन्ये कार्यं युद्धेन कर्हिचित्
द्रोणे कर्णे च संशान्ते निहते च पितामहे । १५

अ-सहायो हि को राजा राज्यम् इच्छेत् प्रशासितुम् ?
अहं वनं गमिष्यामि ह्यजिनैः प्रतिवासितः । १६

---

१० । स्म—स्मः । १३ । अभ्युत्सहामि—अभ्युत्सहे, भृशम् इच्छामि । १४ । आशंसे—आशान्वितो ऽस्मि । उत्साहम्—उद्यमम्, उद्योगम् । १५ । कर्हिचित्—कदाचित् । संशान्ते—मृते ।

गच्छ त्वं भुङ्क्ष्, राजेन्द्र, पृथिवीं निहतेश्वराम्
हत-योधां नष्ट-रत्नां शीर्ण-क्षत्रां यथा-सुखम्। १७

युधिष्ठिर उवाच,—

आर्त-प्रलापान् मा, तात, सलिल-स्थः प्रभाषथाः !
नैतद् मनसि मे, राजन्, वाशितं शकुनेर् इव। १८

यदि वापि समर्थः स्यास् त्वं दानाय, सुयोधन,
नाहम् इच्छामि अवनिं त्वया दत्तां प्रशासितुम्। १९

न हि धर्मः स्मृतो, राजन्, क्षत्रियस्य प्रतिग्रहः।
त्वां तु युद्धे विनिर्जित्य भोक्तास्मि वसुधाम् इमाम्। २०

न त्वम् अद्य महीं दातुम् ईशः, कौरव-नन्दन।
सूच्यग्रं नात्यजः पूर्वं, स कथं त्यजसि क्षितिम्? २१

एवम् ऐश्वर्यम् आसाद्य प्रशास्य पृथिवीम् इमाम्,
को हि मूढो व्यवस्येत शत्रोर् दातुं वसुन्धराम्?
पृथिवीं दातु-कामो ऽपि जीवितेन विमोक्ष्यसे। २२

आवयोर् जीवतो, राजन्, मयि च त्वयि च, ध्रुवम्
संशयः सर्व-भूतानां विजये नौ भविष्यति। २३

१७। 'शीर्णक्षत्राम्'—'क्षीण-वृत्तिः' इति 'क्षीण-वप्राम्' इति च पाठान्तरम्। १८। प्रभाषथाः—प्रभाषेथाः। आप्र.। 'प्रभाषिथाः' इति प्रतीचां पाठः। वाशितम्—पशु-पक्ष्यादीनां शब्दः। २२। व्यवस्येत—व्यवस्येत्, इच्छेत्। आआ.। २३। विजये नौ—आवयोर् उभयोर् कतरो विजयी इत्यत्र।

जीवितं तव, दुष्प्रज्ञ, मयि संप्रति वर्तते ।
जीवयेयं त्वहं कामं, न तु त्वं जीवितुं क्षमः । २४

दहने हि कृतो यत्नस् त्वयास्मासु विशेषतः,
आशीविषैर् विषैश् चापि जले चापि प्रवेशनैः । २५

त्वया विनिकृता, राजन्, राज्यस्य हरणेन च,
अप्रियाणां च वचनैः द्रौपद्याः कर्षणेन च । २६

एतस्मात् कारणात्, पाप, जीवितं ते न विद्यते ।
उत्तिष्ठोत्तिष्ठ, युध्यस्व ! तत् ते श्रेयो भविष्यति । २७

सञ्जय उवाच,—

तर्ज्यमानस् तथा, राजन्, उदकस्थस् तवात्मजः
मनश् चकार युद्धाय, राजानं चाप्यभाषत,— २८

"यूयं स-सुहृदः पार्थाः सर्वे स-रथ-वाहनाः ।
अहम् एकः परिद्यूनो वि-रथो हत-वाहनः । २९

आत्त-शस्त्रै रथोपेतैर् बहुभिः परिवारितः
कथम् एकः पदातिः सन् अ-शस्त्रो योद्धुम् उत्सहे ? ३०

एकैकेन तु मां यूयं योधयध्वं, युधिष्ठिर ।
न ह्येको बहुभिर् वीरैर् न्याय्यो योधयितुं युधि, ३१

विशेषतो वि-कवचः श्रान्तश् चापत्-समाश्रितः
भृशं विक्षत-गात्रश् च श्रान्त-वाहन-सैनिकः ।" ३२

---

२४ । जीवयेयं कामम्—[त्वां] यथेच्छं पालयितुं [नाशयितुं वा] शक्नोमि । २९ । परिद्यूनः [परि-दिव्+त, १।१]—शोक-विह्वलः । *Cf.* परिदेवनम् (विलापः) । ३० । उत्सहे—शक्नोमि ।

युधिष्ठिर उवाच,—

दिष्ट्या त्वम् अपि जानीषे क्षत्र-धर्मं, सुयोधन !
दिष्ट्या शूरो ऽसि, कौरव्य, दिष्ट्या जानासि सङ्गरम् ! ३३

एक एकेन सङ्गम्य, यत् ते सम्मतम् आयुधम्
तत् त्वम् आदाय युध्यस्व। प्रेक्षकास् ते वयं स्थिताः। ३४

अयम् इष्टं च ते कामं, वीर, भूयो ददाम्यहम्,
हत्वैकं भव नो राजा हतो वा स्वर्गम् आप्नुहि। ३५

सञ्जय उवाच,—

स, भित्त्वा स्तम्भितं तोयं, स्कन्धे कृत्वायसीं गदाम्,
उदतिष्ठत पुत्रस् ते प्रतपन् रश्मिवान् इव। ३६

तम् उत्तीर्णं तु संप्रेक्ष्य समहृष्यन्त सर्वशः
पाञ्चालाः पाण्डवेयाश् च। ते ऽन्योन्यस्य तलान् ददुः। ३७

स, मेघ-निनदो हर्षाद् नर्दन्न् इव च गो-वृषः,
आजुहाव ततः पार्थान् गदया युधि वीर्यवान्। ३८

युधीष्ठिर उवाच—

आमुञ्च कवचं, वीर, मूर्धजान् यमयस्व च।
यच् चान्यद् अपि ते नास्ति तद् अप्यादत्स्व, भारत। ३९

३३। सङ्गरम्—नियमम्। ३६। उदतिष्ठत—उदतिष्ठत्। आआ।
३८। आजुहाव—आजुहुवे, पस्पर्धे, परिभवेच्छया आवाहयामास। पआ।
पा. १।३।३१। ३९। आमुञ्च—परिधेहि। यमयस्व—निगृहाण, बधान।
आदत्स्व—गृहाण।

इमम् एकं च कामं ते, वीर, भूयो ददाम्यहम्,—
पञ्चानां पाण्डवेयानां येन युद्धम् इहेच्छसि
तं हत्वा वै भवान् राजा। हतो वा स्वर्गम् आप्नुहि। ४०

सप्तमो ऽध्यायः

समाह्वयः

सञ्जय उवाच,—

ततस् तव सुतो, राजन्, वर्म जग्राह काञ्चनम्
विचित्रं च शिरस्त्राणं जाम्बूनद-परिष्कृतम्। १

सन्नद्धः स गदी, राजन्, सज्जः, संग्राम-मूर्धनि
अब्रवीत् पाण्डवान् सर्वान् पुत्रो दुर्योधनस् तव,— २

"भ्रातॄणां भवताम् एको युध्यतां गदया मया।
गृह्णातु च गदां यो वै योत्स्यते ऽद्य मया सह।
अहम् अद्य गमिष्यामि वैरस्यान्तं सु-दुर्गमम्।" ३

एवं दुर्योधने, राजन्, गर्जमाने मुहुर् मुहुः
युधिष्ठिरस्य संक्रुद्धो वासुदेवो ऽब्रवीद् इदम्,— ४

"किम् इदं साहसं, राजंस्, त्वया व्याहृतम् ईदृशम्,
एकम् एव निहत्याजौ भव राजा कुरुष्विति? ५

४०। भूयः—पुनः।

४। गर्जमाने—गर्जति। आआ.। ५। व्याहृतम्—उक्तम्।

नान्यम् अस्यानुपश्यामि प्रतियोद्धारम् आहवे
ऋते वृकोदरात् पार्थात् । स च नातिकृत-श्रमः । ६

न हि पश्यामि तं लोके यो ऽद्य दुर्योधनं रणे
गदा-हस्तं विजेतुं वै शक्तः स्याद्, अमरो ऽपि हि । ७

नूनं न राज्य-भाग् एषा पाण्डोः कुन्त्याश् च सन्ततिः,
अत्यन्त-वन-वासाय सृष्टा भैक्षाय वा पुनः ।" ८

भीमसेन उवाच,—

मधु-सूदन, मा कार्षीर् विषादं, यदु-नन्दन ।
अहं सुयोधनं सङ्ख्ये हनिष्यामि, न संशयः । ९

अहम् एतं हि गदया संयुगे योद्धुम् उत्सहे ।
भवन्तः प्रेक्षकाः सर्वे मम सन्तु, जनार्दन । १०

सञ्जय उवाच,—

तथा सम्भाष्यमाणस् तु वासुदेवो वृकोदरम्,
हृष्टः, संपूजयामास, वचनं चेदम् अब्रवीत्,— ११

"त्वया विनिहताः सर्वे धृतराष्ट्र-सुता रणे,
राजानो राज-पुत्राश् च नागाश् च विनिपातिताः । १२

कलिङ्गा मागधाः प्राच्या गान्धाराः कुरवस् तथा
त्वाम् आसाद्य महा-युद्धे निहताः, पाण्डु-नन्दन । १३

---

६ । नाति-कृत-श्रमः—[वन-वास-काले औदासीन्याद् गदा-युद्धे प्रावीण्य-वृद्धये दीर्घ-कालं दुर्योधनवत्] न निरन्तर-कृत-यत्नः ।

हत्वा दुर्योधनं चापि प्रयच्छोर्वीं स-सागराम्
धर्म-राजाय, कौन्तेय, यथा विष्णुः शची-पतेः।” १४

ततस् तु सात्यकी, राजन्, पूजयामास पाण्डवम्,
पाञ्चालाः पाण्डवेयाश् च धर्म-राज-पुरोगमाः। १५

ततो भीम-बलो भीमो युधिष्ठिरम् अथाब्रवीत्,
“अहम् एतेन सङ्गम्य संयुगे योद्धुम् उत्सहे।
न हि शक्तो रणे जेतुं माम् एष पुरुषाधमः। १६

अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशम्
सुयोधने धार्तराष्ट्रे, खाण्डवे ऽग्निम् इवार्जुनः।” १७

इत्युक्त्वा, भरत-श्रेष्ठो, गदाम् उद्यम्य, वीर्यवान्,
उदतिष्ठत युद्धाय शक्रो वृत्रम् इवाह्वयन्। १८

तद् आह्वानम् अमृष्यन् वै, तव पुत्रो ऽति-वीर्यवान्
प्रत्युपस्थित एवाशु, मत्तो मत्तम् इव द्विपम्। १९

तम् एकाकिनम् आसाद्य धार्तराष्ट्रं महा-बलम्,
वि-यूथम् इव मातङ्गं, समहृष्यन्त पाण्डवाः। २०

न सम्भ्रमो न च भयं न च ग्लानिर् न च व्यथा
आसीद् दुर्योधनस्यापि। स्थितः सिंह इवाहवे। २१

१४। यथा विष्णुः शची-पतेः—असुराणां नेत्रा हिरण्याक्षेण विद्रावितेषु देवेषु विष्णुः किल वराहरूपेण तं हत्वा स्वर्गाद्याधिपत्यम् इन्द्राय पुनर्ददौ। शची-पतेः—शची-पतये, इन्द्राय। १८। आह्वयन्—आह्वयमानः, विस्पर्धमानः। पआ.। २१। सम्भ्रमः—आवेगः, व्याकुलता।

तम् उद्यत-गदं दृष्ट्वा कैलासम् इव शृङ्गिणम्,
भीमसेनस् तदा, राजन्, दुर्योधनम् अथाब्रवीत्,— २२

"राज्ञापि धृतराष्ट्रेण त्वया चास्मासु यत् कृतम्
स्मर तद् दुष्कृतं कर्म, यद् वृत्तं वारणावते। २३

द्रौपदी च परामृष्टा सभा-मध्ये रजस्वला,
द्यूते च वञ्चितो राजा शकुनेर् बुद्धि-लाघवात्। २४

त्वत्-कृते निहतः शेते शर-तल्पे महा-यशाः
गाङ्गेयो भरत-श्रेष्ठः, सर्वेषां नः पितामहः। २५

हतो द्रोणश् च कर्णश् च हतः शल्यः प्रतापवान्,
वैरस्य चादि-कर्तासौ शकुनिर् निहतो युधि। २६

भ्रातरश् च हताः शूराः पुत्राश् च सह-सैनिकाः,
राजानश् च हताः शूराः समरेष्वनिवर्तिनः। २७

अवशिष्टस् त्वम् एवैकः कुलघ्नो ऽधम-पुरुषः।
त्वाम् अप्यद्य हनिष्यामि गदया, नात्र संशयः।" २८

दुर्योधन उवाच,—

किं कत्थितेन बहुना ? युध्यस्वाद्य मया सह।
अद्य ते ऽहं विनेष्यामि युद्ध-श्रद्धां, वृकोदर। २९

अद्यापि न हि मे जेता धर्मेणास्ति रणाजिरे।
दर्शयस्व बलं युद्धे यावत् तत् ते ऽद्य विद्यते। ३०

२४। परामृष्टा—स्पृष्टा। बुद्धि-लाघवात्—कृश-बुद्धित्वात्। २९। कत्थितेन—आत्म-श्लाघया। विनेष्यामि—अपनेष्यामि। युद्ध-श्रद्धाम्—युद्धेच्छाम्।

सञ्जय उवाच,---

उन्मत्तम् इव मातङ्गं तल-शब्देन मानवाः
भूयः संहर्षयामासू, राजन्, दुर्योधनं नृपम्। ३१

अष्टमो ऽध्यायः

गदा-युद्धम्—दुर्योधन-पातः

ततस् ताल-ध्वजो रामस्, तयोर् युद्ध उपस्थिते,
श्रुत्वा तच् छिष्ययो, राजन्न्, आजगाम हलायुधः। १
ततो युधिष्ठिरं रामो वाक्यम् एतद् उवाच ह,—
"कुरु-क्षेत्रं परं पुण्यं पावनं स्वर्ग्यम् एव च। २
तत्र वै योत्स्यमाना ये देहं त्यक्ष्यन्ति मानवाः,
तेषां स्वर्गे ध्रुवो वासः शक्रेण सह, मारिष। ३
तस्मात् समन्त-पञ्चकम् इतो याम द्रुतं, नृप।
प्रथितोत्तर-वेदी सा देव-लोके प्रजा-पतेः।" ४
तथेत्युक्त्वा, महा-राज, कुन्ती-पुत्रो युधिष्ठिरः
समन्त-पञ्चकं वीरः प्रायाद् अभि-मुखः प्रभुः। ५
ततो दुर्योधनो राजा, प्रगृह्य महतीं गदाम्,
पद्भ्याम् अमर्षी द्युतिमान् अगच्छत् पाण्डवैः सह। ६

३१। भूयः [बहु+ईयस्, २।१]—बहुतरम्, नितराम्।
१। तत्—तद् युद्धम्।

ततः शङ्ख-निनादेन भेरीणां च महा-स्वनैः
सिंह-नादैश् च शूराणां दिशः सर्वाः प्रपूरिताः । ७

दक्षिणेन सरस्वत्याः स्वयनं तीर्थम् उत्तमम् ।
तस्मिन् देशे त्व-निरिणे ते तु युद्धम् अरोचयन् । ८

ततो भीमो महा-कोटिं गदां गृह्याथ वर्म-भृत्
बिभ्रद् रूपं, महा-राज, सदृशं हि गरुत्मतः ; ९

अवबद्ध-शिरस्त्राणः सङ्ख्ये काञ्चन-वर्म-भृत्
रराज, राजन्, पुत्रस् ते काञ्चनः शैल-राड् इव । १०

ततो दुर्योधनो राजा, गदाम् आदाय, वीर्यवान्
भीमसेनम् अभिप्रेक्ष्य गजो गजम् इवाह्वयत् । ११

अद्रि-सारमयीं भीमस् तथैवादाय, वीर्यवान्,
आह्वयामास नृपतिं, सिंहः सिंहं यथा वने । १२

तं महात्मा महात्मानं, गदाम् उद्यम्य, पाण्डवः
अभिदुद्राव वेगेन धार्तराष्ट्रं वृकोदरः । १३

वृंहन्ति कुञ्जरास् तत्र हया ह्रेषन्ति चासकृत्,
शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणाम् । १४

---

८ । स्वयनम्—सु-पथम् । अनिरिणे [अ+इरिण (क्षार-भूमि), ७।१]—अनूषरे । ९ । महा-कोटिम्—तीक्ष्ण-कोणाम् । *Cf.* शैक्यायसीम् (उपरिष्टात् ६।७।६४), सर्व-शैक्यायसीम् (उपरिष्टात् ६।७।२७) । शिक्यस्, शिक्या—रज्जुमयो लम्बमान आधारः । अष्ट-तीक्ष्ण कोणत्वात् भीमस्य लौह-गदा शिक्येव बभौ । बिभ्रत् [भृ+अत्, १।१]—धारयन् । रराजेति क्रिययान्वयः । १४ । वृंहन्ति—गर्जन्ति ।

ततो दुर्योधनो, दृष्ट्वा भीमसेनं तथा-गतम्,
प्रत्युद्-ययाव् अ-दीनात्मा वेगेन महता, नदन्। १५

समापेततुर् अन्योन्यं शृङ्गिणौ गो-वृषाव् इव।
महा-निर्घात-घोषश् च प्रहाराणाम् अजायत। १६

तौ, परस्परम् आसाद्य, यत्ताव् अन्योन्य-रक्षणे,
मार्जाराव् इव भक्षार्थे ततक्षाते मुहुर् मुहुः। १७

तौ, दर्शयन्तौ समरे युद्ध-क्रीड़ां समन्ततः,
गदाभ्यां सहसान्योन्यम् आजघ्नतुर्, अरिन्दमौ। १८

तौ, परस्परम् आसाद्य, दंष्ट्राभ्यां द्वि-रदौ यथा
अशोभेतां, महा-राज, शोणितेन परिप्लुतौ। १९

एवं तद् अभवद् युद्धं घोर-रूपम् अ-संवृतम्
परिवृत्ते ऽहनि क्रूरं, वृत्र-वासवयोर् इव। २०

स-विस्फुलिङ्गो निह्रादस् तयोस् तत्राभिघात-जः
प्रादुरासीद्, महा-राज, सृष्टयोर् वज्रयोर् इव। २१

समुदीर्णं ततो दृष्ट्वा संग्रामं कुरु-मुख्ययोः
अथाब्रवीद् अर्जुनस् तु वासुदेवं यशस्विनम्,— २२

"अनयोर् वीरयोर् युद्धे को ज्यायान् भवतो मतः,
कस्य वा को गुणो भूयान्? एतद् वद, जनार्दन।" २३

१७। ततक्षाते—ततक्षतुः, चक्षणतुः। आआ.। २०। अ-संवृतम्—प्रकाशम्। परिवृत्ते ऽहनि—सायाह्ने। २१। निह्रादः—ध्वनिः। सृष्टयोः—निक्षिप्तयोः। २२। समुदीर्णम्—सम्यक् उद्दीपितम्।

वासुदेव उवाच,—

उपदेशो ऽनयोस् तुल्यो । भीमस् तु बलवत्तरः ।
कृती यत्न-परस् त्वेष धार्तराष्ट्रो वृकोदरात् । २४

भीमसेनस् तु धर्मेण युध्यमानो न जेष्यति ;
अ-न्यायेन तु युध्यन् वै हन्याद् एव सुयोधनम् । २५

मायया निर्जिता देवैर् असुरा इति नः श्रुतम् ।
तस्माद् मायामयं भीम आतिष्ठतु पराक्रमम् । २६

प्रतिज्ञातं तु भीमेन द्यूत-काले, धनञ्जय,
ऊरू भेत्स्यामि ते सङ्ख्ये गदयेति सुयोधनम् । २७

सो ऽयं प्रतिज्ञां तां चापि पालयत्वरि-कर्शनः ।
मायाविनं च राजानं माययैव निकृन्ततु । २८

यद्येष बलम् आस्थाय न्यायेन प्रहरिष्यति,
विषम-स्थस् ततो राजा भविष्यति युधिष्ठिरः । २९

सञ्जय उवाच,—

धनञ्जयस् तु, श्रुत्वैतत् केशवस्य महात्मनः,
प्रेक्षतो भीमसेनस्य सव्यम् ऊरुम् अताडयत् । ३०

गृह्य संज्ञां ततो भीमो गदया व्यचरद् रणे
मण्डलानि विचित्राणि यमकानीतराणि च । ३१

२७। सुयोधनम्—सुयोधनाय। २९। विषम-स्थः—सङ्कटापन्नः। ३०। प्रेक्षतः—प्रेक्षमाणस्य। पआ.। ३१। संज्ञाम्—सङ्केतम्। यमकानि—सदृशानि।

दक्षिणं मण्डलं सव्यं गो-मूत्रकम् अथापि च
व्यचरत् पाण्डवो, राजन्न्, अरिं संमोहयन्न् इव । ३२

तथैव तव पुत्रो ऽपि गदा-मार्ग-विशारदः
व्यचरल् लघु चित्रं च भीमसेन-जिघांसया । ३३

मण्डलानि विचित्राणि चरतोर् नृप-भीमयोः
गदा-सम्पात-जास् तत्र प्र-जज्ञुः पावकार्चिषः । ३४

उभाव् अपि परिश्रान्तौ युध्यमानाव् अरिन्दमौ,
तौ मुहूर्तं समाश्वस्य, पुनर् एव परन्तपौ
अभ्यहारयतां क्रुद्धौ, प्रगृह्य महतीं गदाम् । ३५

अन्योन्यं जघ्नतुर् वीरौ पङ्कस्थौ महिषाव् इव,
जर्जरी-कृत-सर्वाङ्गौ रुधिरेणाभि-संप्लुतौ । ३६

दुर्योधनस् तु, पार्थेन विवरे संप्रदर्शिते,
ईषद् उत्स्मयमानस् तु सहसा प्रससार ह । ३७

तम् अभ्यास-गतं प्राज्ञो रणे प्रेक्ष्य, वृकोदरः
अवाक्षिपद् गदां तस्मै वेगेन महता, बली । ३८

अवाक्षिप्तां तु तां दृष्ट्वा, पुत्रस् तव, विशाम् पते,
अपासर्पत् ततः स्थानात् । सा मोघा न्यपतद् भुवि । ३९

मोक्षयित्वा प्रहारं तं, पुत्रस् तव सु-संभ्रमात्
भीमसेनं च गदया प्राहरत्, कुरु-सत्तमः । ४०

---

३२ । मण्डलम्—चक्रम् । गो-मूत्रकम्—गो-मूत्र-धारावत् वक्र-सरलम् । ३४ । प्रजज्ञुः—प्रजज्ञिरे । पआ. । ३५ । अभ्यहारयताम्—[अन्योन्यम्] अभ्ययाताम् । ३७ । प्रससार—अभ्युद्ययौ ।

तस्य विस्यन्दमानेन रुधिरेणामितौजसः
प्रहार-गुरु-पाताच् च मूर्च्छेव समजायत। ४१

दुर्योधनो न तं वेद पीड़ितं पाण्डवं रणे।
धारयामास भीमो ऽपि शरीरम् अति-पीड़ितम्; ४२

अमन्यत स्थितं ह्येनं प्रहरिष्यन्तम् आहवे,
ततो न प्राहरत् तस्मै पुनर् एव तवात्मजः। ४३

ततो मुहूर्तम् आश्वस्य, दुर्योधनम् उपस्थितम्
वेगेनाभ्यपतद्, राजन्, भीमसेनः प्रतापवान्। ४४

तम् आपतन्तं संप्रेक्ष्य संरब्धम् अ-मितौजसम्,
मोघं तस्य प्रहारं तं चिकीर्षुर्, भरतर्षभ, ४५

अवस्थाने मतिं कृत्वा, पुत्रस् तव महा-मनाः
इयेषोत्पतितुं, राजंश्, छलयिष्यन् वृकोदरम्।
अबुध्यद् भीमसेनस् तु राज्ञस् तस्य चिकीर्षितम्। ४६

अथास्य, समभिद्रुत्य समुत्क्रुश्य च सिंहवत्,
सृत्या वञ्चयतो, राजन्, पुनर एवोत्पतिष्यतः,
ऊरुभ्यां प्राहिणोद्, राजन्, गदां वेगेन पाण्डवः। ४७

सा, वज्र-निष्पेष-समा, प्रहिता भीम-कर्मणा,
ऊरू दुर्योधनस्याथ बभञ्ज प्रिय-दर्शनौ। ४८

स पपात नर-व्याघ्रो, वसुधाम् अनुनादयन्,
भग्नोरुर् भीमसेनेन, पुत्रस् तव, मही-पते। ४९

४१। विस्यन्दमानेन—विस्रवता।

ववुर् वाताः स-निर्घाताः पांशु-वर्षं पपात च ।
चचाल पृथिवी चापि स-वृक्ष-क्षुप-पर्वता । ५०

जज्ञे घोरतरः शब्दो बहूनां सर्वतो दिशम् ।
भेरी-शृङ्ग-मृदङ्गानाम् अभवच् च स्वनो महान् । ५१

ततो, दुर्योधनं हत्वा, भीमसेनः प्रतापवान्
पतितं कौरवेन्द्रं तम् उपागम्येदम् अब्रवीत् ,— ५२

"गौर् गौर् इति पुरा, मन्द, द्रौपदीम् एक-वाससम्
यत् सभायां, हसन्न् अस्मांस् , तदा वदसि, दुर्मते
तस्यावहासस्य फलम् अद्य त्वं समवाप्नुहि ।" ५३

एवम् उक्त्वा स वामेन पदा मौलिम् उपास्पृशत् ,
शिरश् च राज-सिंहस्य पादेन समलोडयत् । ५४

तथैव क्रोध-संरक्तो भीमः पर-बलार्दनः
पुनर् एवाब्रवीद् वाक्यं यत् तच् छृणु, नराधिप, — ५५

"ये ऽस्मान् पुरा प्रनृत्यन्ति मूढा गौर् इति गौर् इति,
तान् वयं प्रतिनृत्यामः पुनर् गौर् इति गौर् इति । ५६

नास्माकं निकृतिर् वह्निर् नाक्ष-द्यूतं न वञ्चना ।
स्व-बाहु-बलम् आश्रित्य प्रबाधामो वयं रिपून् । ५७

ये नः पुरा षण्ढ-तिलान् अवोचन्
क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः,

---

५० । क्षुपः—क्षुद्र-वृक्षः । ५४ । मौलिम्—किरीटम् । ५६ । इति—इति आह्वयन्तः । Cf. २।२८।११ ५७ । प्रबाधामः—प्रकर्षेण बाधामहे । पआ, ।

ते नो हताः स-गणाः सानुबन्धाः ।
काम स्वर्गं नरकं वा व्रजामः !" ५८

पुनश् च राज्ञः पतितस्य भूमौ
स, तां गदां स्कन्ध-गतां प्रगृह्य,
वामेन पादेन शिरः प्रमृद्य,
दुर्योधनं नैकृतिकेत्यवोचत् । ५९

नवमो ऽध्यायः

मर्यादा-भेदः

तव पुत्रं तथा हत्वा कत्थमानं वृकोदरम्,
नृत्यमानं च बहुशो, धर्म-राजो ऽब्रवीद् इदम्,— १

"गतो ऽसि वैरस्यानृण्यं । प्रतिज्ञा पूरिता त्वया
शुभेनैवाशुभेनाथ कर्मणा । विरमाधुना !

मा शिरो ऽस्य पदामर्दीर् ! मा धर्मस् ते ऽतिगो भवेत् !
राजा ज्ञातिर् हतश् चायं—नैतद् न्याय्यं तवानघ ! ३

एकादश-चमू-नाथं कुरूणाम् अधिपं तथा
मा स्प्राक्षीर्, भीम, पादेन, राजानं ज्ञातिम् एव च ! ४

हत-बन्धुर् हतामात्यो भ्रष्ट-सैन्यो हतो मृधे,
सर्वाकारेण शोच्यो ऽयं, नावहास्यो ऽयम् ईश्वरः ।" ५

---

३ । मा भवेत्—मा भूत् । मा...भवेत्—मा धर्मस् त्वां त्यजतु । प्रार्थनायां लिङ् । पृ. ४४४ श्लो. १७टी. यत्ताव् अन्योन्य-रक्षणे—परस्परात् [आत्म-] रक्षणाय यत्नवन्तौ । सप्तमी निमित्तार्था ।

इत्युक्त्वा भीमसेनं तु, साश्रु-कण्ठो युधिष्ठिरः
उपसृत्याब्रवीद् दीनो दुर्योधनम् अरिन्दमम्,— ६

"तात, मन्युर् न ते कार्यो, नात्मा शोच्यस् त्वया तथा।
नूनं पूर्व-कृतं कर्म सु-घोरम् अनुभूयते। ७

धात्रोपदिष्टं विषमं नूनं फलम् अ-संस्कृतम्,
यद् वयं त्वां जिघांसामस् त्वं चास्मान्, कुरु-सत्तम। ८

आत्मनो ह्यपराधेन महद् व्यसनम् ईदृशम्
प्राप्तवान् असि यल् लोभाद् मदाद् बाल्याच् च, भारत, ९

घातयित्वा वयस्यांश् च भ्रातॄन् अथ पितॄंस् तथा
पुत्रान् पौत्रांस् तथा चान्यांस् ततोऽसि निधनं गतः। १०

नात्मानुशोचनीयस् ते। श्लाघ्यो मृत्युस् तवानघ।
वयम् एवाधुना शोच्याः सर्वावस्थासु, कौरव। ११

भ्रातॄणां चैव पुत्राणां नप्तॄणां शोक-विह्वलाः
कथं द्रक्ष्यामि विधवा वधूः शोक-परिप्लुताः!" १२

ऊर्वोर् अभिहतं दृष्ट्वा भीमसेतेन ते सुतम्,
रामः प्रहरतां श्रेष्ठश् चुक्रोध बलवद्, बली। १३

ततो मध्ये नरेन्द्राणाम्, ऊर्ध्व-बाहुर् हलायुधः,
कुर्वन्न् आर्त-स्वरं घोरं, धिग् धिग् भीमेत्युवाच ह,— १४

८। उपदिष्टम्—विहितम्। अ-संस्कृतम्—अ-शोधितम्, अ-पवित्रम्। जिघांसामः—हन्तुम् इच्छामः। १४। इति—इत्युक्त्वा।

"अहो धिग् यद् अधो नाभेः प्रहृतं धर्म-विग्रहे !
नैतद् दृष्टं गदा-युद्धे कृतवान् यद् वृकोदरः । १५

'अधो नाभ्या न हन्तव्य' इति शास्त्रस्य निश्चयः ।
अयं त्व-शास्त्र-विद् मूढः स्वच्छन्दात् संप्रवर्तते !" १६

तस्य तत् तद् ब्रुवाणस्य रोषः समभवद् महान् ।
ततो लाङ्गलम् उद्यम्य भीमम् अभ्यद्रवद् बली । १७

तम् उत्पतन्तं जग्राह केशवो विनयानतः
बाहुभ्यां पीन-वृत्ताभ्यां प्रयत्नाद् बलवद् बली । १८

उवाच चैनं संरब्धं शमयन्न् इव केशवः,—
"अस्माकं सह-जं मित्रं पाण्डवाः शुद्ध-पौरुषाः
स्वकाः पितृ-ष्वसुः पुत्रास् । ते परैर् निकृता भृशम् । १९

प्रतिज्ञा-पालनं धर्मः क्षत्रियस्येति वेत्थ ह ।
'सुयोधनस्य गदया भङ्क्तास्म्यूरू महाहवे' २०

इति पूर्वं प्रतिज्ञातं भीमेन हि सभा-तले ।
अतो दोषं न पश्यामि । मा क्रुधस् त्वं, प्रलम्ब-हन् ! २१

१९ । सह-जम्—आ-जन्म वर्तमानम् [कृष्ण-बलरामादीनां पितामहस्य शूरस्य पाण्डव-मातामहत्वात्] । २० । भङ्क्तास्मि—अचिरेण भङ्क्ष्यामि । लुट् । २१ । प्रलम्ब-हा—पुरा किल बल-रामो भाण्डीर-वणे कृष्णादि-गोप-बालैर् विहरन् मल्ल-क्रीड़ा-च्छलेन प्रलम्बं नाम गोप-वेशम् अप्यभिज्ञातं दानवं मुष्ट्या जघान (भाग. १०।१८) ।

संशोधनी । ४४६ पृ. ३७ श्लो. उत्मयमानस् उत्स्मयमानस् भवेत्, ४४७ पृ. ४८ श्लो. कमणा कर्मणा, ४४८ पृ. ५३ श्लो. गौर गौर्, ५६ श्लो. गार गौर्, ५७ श्लो. प्रबाधामा प्रबाधामो ।

यौनः स्वैः सुख-हार्दैश् च सम्बन्धः सह पाण्डवैः ।
तेषां वृद्ध्या हि वृद्धिर् नो । मा क्रुधः, पुरुषर्षभ !" २२

वासुदेव-वचः श्रुत्वा, सीर-भृत् प्राह धर्म-वित्,—
"धर्मः सु-चरितः सद्भिः । स च द्वाभ्यां नियच्छति—
अर्थश् चात्यर्थ-लुब्धस्य कामश् चाति-प्रसङ्गिनः । २३

धर्मार्थौ धर्म-कामौ च कामार्थौ चाप्यपीड़यन्
धर्मार्थ-कामान् यो ऽभ्येति सो ऽत्यन्तं सुखम् अश्नुते । २४

तद् इदं व्याकुलं सर्वं कृतं धर्मस्य पीड़नात्
भीमसेनेन । गोविन्द, कामं त्वं तु यथात्थ माम् ।" २५

वासुदेव उवाच,—

अ-रोषणो हि धर्मात्मा सततं धर्म-वत्सलः
भवान् प्रख्यायते लोके । तस्मात् संशाम्य, मा क्रुधः ! २६

---

२२ । यौनः [योनि+अ, ११]—[कृष्ण-बलराम-भीमार्जुनादि-] जन्म-निमित्तः [सुभद्रा-] विवाह-जनितश् च । स्वैः—आत्मीयैः । सुख-हार्दैः—सुखम् ([पक्षयोः] सुख-करम्) हार्दम् (स्नेहः) येषां तैः । २३ । सीर-भृत्—हल-धरः, बल-रामः । नियच्छति—नियम्यते, सङ्कोचम् एति । अति-प्रसङ्गिनः—अति-प्रसक्तस्य, अति-विषयानुरक्तस्य । २४ । पं १—धर्मार्थौ कामेन धर्म-कामौ अर्थेन कामार्थौ वा धर्मेण अपीड़यन् । कामार्थौ चाप्यपीड़यन्—नैतद् युज्यते । धर्मार्थकामानाम् बाधे धर्म एव एकान्तेनाश्रयणीय इति वक्तुम् अर्हामः । २५ । व्याकुलम्—अ-स्थिरम्, स्वभाव-परिभ्रष्टम् । कामम्—तत् तथैव ।

प्राप्तं कलि-युगं विद्धि प्रतिज्ञां पाण्डवस्य च ।
आनृण्यं यातु वैरस्य प्रतिज्ञायाश् च पाण्डवः । २७

सञ्जय उवाच,—

धर्म-च्छलम् अपि श्रुत्वा केशवात् स, विशाम् पते,
नैव प्रीत-मना, रामो वचनं प्राह संसदि,— २८

"हत्वाधर्मेण राजानं धर्मात्मानं सुयोधनम्,
जिह्म-योधीति लोके ऽस्मिन् ख्यातिं यास्यति पाण्डवः । २९

दुर्योधनो हि धर्मात्मा गतिं यास्यति शाश्वतीम् ।
ऋजु-योधी हतो राजा धार्तराष्ट्रो नराधिप । ३०

युद्ध-दीक्षां प्रविश्याजौ रण-यज्ञं वितत्य च,
हुत्वात्मानम् अमित्राग्नौ प्राप चावभृथं यशः ।" ३१

इत्युक्त्वा, रथम् आस्थाय, रौहिणेयः प्रतापवान्
श्वेताभ्रशिखराकारः प्रययौ द्वारकां प्रति । ३२

भीमसेनो ऽपि, हत्वाजौ तव पुत्रम्, अ-मर्षणः,
अभिवाद्याग्रतः स्थित्वा संप्रहृष्टः कृताञ्जलिः, ३३

प्रोवाच, सु-महा-तेजा, धर्म-राजं युधिष्ठिरम्,
हर्षाद् उत्फुल्ल-नयनो जित-काशी, विशाम् पते, — ३४

"तवाद्य पृथिवी, राजन्, क्षेमा निहत-कण्टका ।
तां प्रशाधि, महा-राज, स्व-धर्मम् अनुपालय । ३५

---

२७ । कलि-युगम्—Cf. परस्तात् १२।५।१३-१७ । ३१ । अ-वभृथम्—यज्ञावशेषम् । ३५ । क्षेमा—कल्याणी, मङ्गलमयी ।

यस् तु कर्तास्य वैरस्य निकृत्या निकृति-प्रियः,
सो ऽयं वै निहतः शेते पृथिव्यां, पृथिवी-पते । ३६
सेयं रत्न-समाकीर्णा मही स-वन-पर्वता
उपावृत्ता, महा-राज, त्वाम् अद्य निहत-द्विषम् ।" ३७

युधिष्ठिर उवाच,—

कृष्णस्य मतम् आस्थाय विजितेयं वसुन्धरा ।
दिष्ट्या गतस् त्वम् आनृण्यं मातुः कोपस्य चोभयोः ! ३८

सञ्जय उवाच,—

ततस् ते प्रययुः सर्वे निवासाय मही-क्षितः,
शङ्खान् प्रध्मापयन्तो वै, हृष्टाः, परिघ-बाहवः । ३९
ततस् ते प्राविशन् पार्था हत-त्विट्कं हतेश्वरम्
दुर्योधनस्य शिबिरं रङ्गवद् निःसृते जने ; ४०

प्रविश्य प्रत्यपद्यन्त कोष-रत्नर्द्धि-सञ्चयान्,
रजतं जात-रूपं च मणीन् अथ च मौक्तिकान्, ४१
भूषणान्यथ मुख्यानि कम्बलान्यजिनानि च
दासी-दासम् अ-संख्येयं राज्योपकरणानि च । ४२
ते प्राप्य धनम् अक्षय्यं त्वदीयं, भरतर्षभ,
उदक्रोशन् महा-भागा, नरेन्द्र, विजितारयः । ४३
ते तु वीराः, समाश्वस्य वाहनान्यवमुच्य च,
अतिष्ठन्त मुहुः सर्वे पाण्डवा विगत-ज्वराः । ४४

---

३७ । उपावृत्ता—प्रति घूर्णिता, प्रत्यावृत्ता । ३८ । आनृण्यं मातुः—*Cf.* उपरिष्टात् ५।१६।१-३ । ४० । हत-त्विट्कम्—निस्तेजः ।

अथाब्रवीद् महा-राज, वासुदेवो महा-यशाः,—
"अस्माभिर् मङ्गलार्थाय वस्तव्यं शिविराद् बहिः ।" ४५

तथेत्युक्त्वा हि ते सर्वे पाण्डवाः सात्यकिस् तथा
वासुदेवेन सहिता मङ्गलार्थं बहिर् ययुः ; ४६

ते, समासाद्य सरितं पुण्याम् ओघवतीं, नृप,
न्यवसन्न् अथ तां रात्रिं पाण्डवा हत-शत्रवः । ४७

भग्न-सक्थो नृपो, राजन्, पांशुना सो ऽवगुण्ठितः,
संरम्भाश्रु-परीताभ्यां नेत्राभ्याम् अभिवीक्ष्य माम्, ४८

प्रकीर्णान् मूर्धजान् धुन्वन्, दन्तैर् दन्तान् उपस्पृशन्,
गर्हयन् पाण्डवं ज्येष्ठं निश्वस्येदम् अथाब्रवीत्,— ४९

"आख्यातव्यं मदीयानां ये ऽस्मिन् जीवन्ति संयुगे
यथाहं भीमसेनेन, व्युत्क्रम्य समयं, हतः । ५०

बहूनि सु-नृशंसानि कृतानि खलु पाण्डवैः
भूरि-श्रवसि कर्णे च भीष्मे द्रोणे च श्रीमति । ५१

इदं चाकीर्तिजं कर्म नृशंसैः पाण्डवैः कृतम्
येन ते वाच्यतां सत्सु गमिष्यन्तीति मे मतिः ।

किं नु चित्रम् इतस् त्वद्य भग्न-सक्थस्य यद् मम
क्रुद्धेन भीमसेनेन पादेन मृदितं शिरः ? ५३

---

४८ । भग्न-सक्थः—भग्नोरुः । अवगुण्ठितः—आच्छादितः । ४९ । प्रकीर्णान्—उच्छृङ्खलान् । धुन्वन्—कम्पयन् । ५० । व्युत्क्रम्य—व्यतिक्रम्य । ५२ । वाच्यताम्—निन्दाम् ।

अभिज्ञौ युद्ध-धर्मस्य मम माता पिता च यौ,
तौ हि, सञ्जय, दुःखार्तौ विज्ञाप्यौ वचनाद् धि मे,— ५४
'इष्टं' भृत्या भृताः सम्यग् भूः प्रशास्ता स-सागरा,
मूर्ध्नि स्थितम् अ-मित्राणां जीवताम् एव, सञ्जय, ५५
दत्ता दाया यथा-शक्ति, मित्राणां च प्रियं कृतम्,
अमित्रा बाधिताः सर्वे। को नु स्वन्ततरो मया ?' " ५६
वार्त्तिकांश् चाब्रवीद् राजा पुत्रस् ते सत्य-विक्रमः,—
"अ-धर्माद् भीमसेनेन निहतो ऽहं यथा रणे, ५७
सो ऽहं द्रोणं स्वर्ग-गतं कर्ण-शल्याव् उभौ तथा
पृष्ठतो ऽनुगमिष्यामि, सार्थ-हीन इवाध्वगः। ५८
समन्त-पञ्चके पुण्ये त्रिषु लोकेषु विश्रुते
अहं निधनम् आसाद्य लोकान् प्राप्स्यामि शाश्वतान्।" ५९
ततो जन-सहस्राणि वाष्प पूर्णानि, मारिष,
प्रलापं नृपतेः श्रुत्वा, व्यद्रवन्त दिशो दश। ६०

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
शल्य-पर्व।

५५। इष्टम्—स्वेच्छया। ५६। दायाः—धनानि। स्वन्ततरः—पर्यवसाने उत्तमतरः। मया—मत्तः। पञ्चम्यर्थे तृतीया आर्षी। ५७। वार्त्तिकान्—वार्ताहारिणः। ५८। सार्थ-हीनः—सङ्गि-हीनः, एकाकी।

इति तारकालोके नाम भारत-वृत्तौ शल्य-पर्व।

अथ

श्रीभारते

सौप्तिक-पर्व

प्रथमो ऽध्यायः

असेनः सेनानीः

सञ्जय उवाच,—

वार्त्तिकानां सकाशात् नु श्रुत्वा दुर्योधनं हतम्,
हत-शिष्टास् ततो, राजन, कौरवाणां महा-रथाः १

अश्वत्थामा कृपश् चैव कृत-वर्मा च सात्वतः
त्वरिता जवनैर् अश्वैर् आयोधनम् उपागमन्। २

तत्रापश्यन् महात्मानं धार्तराष्ट्रं निपातितम्,
प्रभग्नं वायु-वेगेन महा-शालं यथा वने, ३

महा-गजम् इवारण्ये व्याधेन विनिपातितम्,
विवर्तमानं बहुशो, रुधिरौघ-परिप्लुतम्। ४

२। आयोधनम्—युद्ध-क्षेत्रम्। ४। विवर्तमानम्—लोटन्तम्।

ते तं दृष्ट्वा महेष्वासा भू-तले पतितं नृपम्,
मोहम् अभ्यगमन् सर्वे कृप-प्रभृतयो रथाः। ५

अवतीर्य रथेभ्यश् च प्राद्रवन् राज-सन्निधौ ;
दुर्योधनं च संप्रेक्ष्य, सर्वे भूमाव् उपाविशन्। ६

ततो द्रौणिर्, महा-राज, वाष्प-पूर्णेक्षणः, श्वसन्,
उवाच भरत-श्रेष्ठं सर्व-लोकेश्वरेश्वरम्,— ७

"न नूनं विद्यते सत्यं मानुषे किञ्चिद् एव हि
यत्र त्वं, पुरुष-व्याघ्र, शेषे पांशुषु रूषितः। ८

भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीम्,
कथम् एको ऽद्य, राजेन्द्र, तिष्ठसे निर्जने वने ? ९

दुःशासनं न पश्यामि नापि कर्णं महा-रथम्
नापि तान् सुहृदः सर्वान्। किम् इदं, पुरुषर्षभ ? १०

क्व ते तद् अ-मलं छत्रं व्यजनं क्व च, पार्थिव ?
सा च ते महती सेना क्व गता, पार्थिवोत्तम ? ११

अ-ध्रुवा सर्व-मर्त्येषु ध्रुवं श्रीर् उपलक्ष्यते,
भवतो व्यसनं दृष्ट्वा, शक्र-विस्पर्धिनो, भृशम्।" १२

उवाच, राजन्, पुत्रस् ते प्राप्त-कालम् इदं वचः,
विमृज्य नेत्रे पाणिभ्यां, शोक-जं वाष्पम् उत्सृजन्,— १३

८। सत्यम्—सर्वदा सर्वत्र च एक-रूपं वस्तु। पांशुषु रूषितः—धूलि-म्रक्षितः। ९। समाज्ञाप्य—आज्ञाधीनां कृत्वा।

"ईदृशो मर्त्य-धर्मो ऽयं धात्रा निर्दिष्ट उच्यते,
विनाशः सर्व-भूतानां काल-पर्यायम् आगतः। १४

सो ऽयं मां समनुप्राप्तः प्रत्यक्षं भवतां हि, यः
पृथिवीं पालयित्वाहम् एतां निष्ठाम् उपागतः। १५

दिष्ट्या नाहं परावृत्तो युद्धे कस्याञ्चिद् आपदि !
दिष्ट्याहं निहतः पापैश् छलेनैव विशेषतः ! १६

उत्साहश् च कृतो नित्यं मया दिष्ट्या युयुत्सता।
दिष्ट्या चास्मि हतो युद्धे निहत-ज्ञाति-बान्धवः ! १७

दिष्ट्या च वो ऽहं पश्यामि मुक्तान् अस्माज् जन-क्षयात्
स्वस्ति-युक्तांश् च कल्यांश् च। तद् मे प्रियम् अनुत्तमम्। १८

मा भवन्तो ऽत्र तप्यन्ताम् सौहृदाद् निधनेन मे !
यदि वेदाः प्रमाणं वो, जिता लोका ममाक्षयाः ! १९

कृतं भवद्भिः सदृशम्, अनुरूपम् इवात्मनः—
यतितं विजये नित्यं। दैवं तु दुरतिक्रमम्।" २०

एतावद् उक्त्वा वचनं, बाष्प-व्याकुल-लोचनः,
तूष्णीं-बभूव, राजेन्द्र, रुजासौ विह्वलो भृशम्। २१

तथा तु दृष्ट्वा राजानं, बाष्प-शोक-समन्वितः,
द्रौणिः क्रोधेन जज्वाल यथा वह्निर् जगत्-क्षये। २२

१५। निष्ठाम्—निष्पत्तिम्, अन्तम्। १६। परावृत्तः—प्रतिनिवृत्तः।

२२। जगत्-क्षये—प्रलये।

स च क्रोध-समाविष्टः, पाणौ पाणिं निपीड्य च,
वाष्प-विह्वलया वाचा राजानम् इदम् अब्रवीत्,— २३

"पिता मे निहतः क्षुद्रैः सु-नृशंसेन कर्मणा।
न तथा तेन तप्यामि यथा, राजन्, त्वयाद्य वै। २४

श्रृणु चेदं वचो मह्यं सत्येन वदतः, प्रभो,
इष्टापूर्तेन दानेन धर्मेण सु-कृतेन च, २५

'अद्याहं सर्व-पाञ्चालान् वासुदेवस्य पश्यतः
सर्वोपायैर् हि नेष्यामि प्रेत-राज-निवेशनम्।'
अनुज्ञां तु, महा-राज, भवान् मे दातुम् अर्हति।" २६

इति श्रुत्वा तु वचनं द्रोण-पुत्रस्य, कौरवः,
मनसः प्रीति-जननं, कृपं वचनम् अब्रवीत्,—
"आचार्य, शीघ्रं कलसं जल-पूर्णं समानय।" २७

स तद् वचनम् आदाय राज्ञो, ब्राह्मण-सत्तमः
कलसं पूर्णम् आदाय राज्ञो ऽन्तिकम् उपागमत्। २८

तम् अब्रवीद्, महा-राज, पुत्रस् तव, विशाम् पते,—
"ममाज्ञया, द्विज-श्रेष्ठ, द्रोण-पुत्रो ऽभिषिच्यताम्
सैनापत्येन—भद्रं ते—मम चेद् इच्छसि प्रियम्। २९

राज्ञो नियोगाद् योद्धव्यं, ब्राह्मणेन विशेषतः,
वर्तता क्षत्र-धर्मेण, ह्येवं धर्म-विदो विदुः।" ३०

२४। तप्यामि—तप्ये, क्लिश्ये। पआ.। ३०। वर्तता—वर्तमानेन। पआ.।

राज्ञस् तु वचनं श्रुत्वा, कृपः शारद्वतस् ततः
द्रौणिं राज्ञो नियोगेन सैनापत्ये ऽभ्यषेचयत् । ३१

सो ऽभिषिक्तो, महा-राज, परिष्वज्य नृपोत्तमम्,
प्रययौ सिंह-नादेन दिशः सर्वा विनादयन् । ३२

दुर्योधनो ऽपि, राजेन्द्र, शोणितेन परिप्लुतः,
तां निशां प्रतिपेदे ऽथ, सर्व-भूत-भयावहाम् । ३३

द्वितीयो ऽध्यायः

उलूकोपदेशः

अपक्रम्य तु ते तूर्णं तस्माद् आयोधनाद्, नृप,
शोक-संविग्न-मनसश् चिन्ता-ध्यान-पराभवन् । १

ततस् ते सहिता वीराः, प्रयाता दक्षिणा-मुखाः,
उपास्तमन-वेलायां शिविराभ्यासम् आगताः । २

विमुच्य वाहांस् त्वरिता भीताः समभवंस् तदा ।
गहनं देशम् आसाद्य प्रच्छन्ना न्यविशन्त ते । ३

श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम्,
अनुसार-भयाद् भीताः प्राङ्-मुखाः प्राद्रवन् पुनः । ४

२ । दक्षिणा-मुखाः—दक्षिणा (दक्षिणस्यां दिशि) मुखानि येषां ते तथोक्ताः, दक्षिण-दिङ्-मुखाः । उपास्तमन-वेलायाम्—सूर्यास्त-गमन-काले सन्निहिते सति ।

ते, मुहूर्तं ततो गत्वा, श्रान्त-वाहाः पिपासिताः
अपश्यन्त वनं घोरं नाना-द्रुम-लतावृतम् । ५

ते, मुहूर्तं तु विश्रम्य, लब्ध-तोयैर् हयोत्तमैः
सूर्यास्तमन-वेलायां समासेदुर् महद् वनम् । ६

ते, ऽवतीर्य रथेभ्यश् च विप्रमुच्य च वाजिनः,
उपस्पृश्य, यथा-न्यायं सन्ध्याम् अन्वासत, प्रभो । ७

ततो, ऽस्तं पर्वत-श्रेष्ठम् अनुप्राप्ते दिवा-करे,
सर्वस्य जगतो धात्री शर्वरी समपद्यत । ८

ग्रह-नक्षत्र-ताराभिः प्रकीर्णाभिर् अलङ्कृतम्
नभो ऽंशुकम् इवाभाति प्रेक्षणीयं समन्ततः । ९

इच्छया ते प्रवल्गन्ति ये सत्त्वा रात्रि-चारिणः ।
दिवा-चराश् च ये सत्त्वास् ते निद्रा-वशम् आगताः । १०

रात्रिञ्चराणां सत्त्वानां निर्घोषो ऽभूत् सु-दारुणः ।
क्रव्यादाश् च प्रमुदिता, घोरा प्राप्ता च शर्वरी । ११

तस्मिन् रात्रि-मुखे घोरे दुःख-शोक-समन्विताः
कृत-वर्मा कृपो द्रौणिर् उपोपविविशुः समम् । १२

---

७ । उपस्पृश्य—आचमनं कृत्वा । यथा-न्यायम्—यथोचितम् । अन्वासत [अनु-आस्+अन्त]—उपासत । ९ । प्रकीर्णाभिः—इतस्ततो विक्षिप्ताभिः, विस्तृताभिः । अंशुकम्—[रजत-विन्दुभिश् चित्रितम्] कौशेय-वस्त्रम् । १० । प्रवल्गन्ति—लम्फनेन यथेच्छं विचरन्ति । सत्त्वाः—प्राणिनः ।

ततो निद्रा-वशं प्राप्तौ कृप-भोजौ महा-रथौ
सुखोचिताव् अ-दुःखार्हौ निषण्णौ धरणी-तले। १३

क्रोधामर्ष-वशं प्राप्तो द्रोण-पुत्रस् तु, भारत,
नैव स्म स जगामाथ निद्रां, सर्प इव श्वसन्। १४

वीक्षमाणो वनोद्देशं नाना-सत्त्वैर् निषेवितम्,
अपश्यत महा-बाहुर् न्यग्रोधं वायसैर् वृतम्। १५

तत्र काक-सहस्राणि तां निशां पर्यणामयन्,
सुखं स्वपन्तः, कौरव्य, पृथक्-पृथग्-उपाश्रयाः। १६

सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः,
सो ऽपश्यत् सहसायान्तम् उलूकं घोर-दर्शनम्, १७

महा-स्वनं महा-कायं हर्यक्षं बभ्रु-पिङ्गलम्
सुतीक्ष्ण-घोणा-नखरं सुपर्णम् इव वेगितम्। १८

सो, ऽथ शब्दं मृदुं कृत्वा, लीयमान इवाण्डजः,
न्यग्रोधस्य ततः शाखां प्रार्थयामास, भारत। १९

संनिपत्य तु शाखायां न्यग्रोधस्य, विहङ्गमः
सुप्तान् जघान सु-बहून् वायसान्, वायसान्तकः। २०

केषाञ्चिद् अच्छिनत् पक्षाञ् शिरांसि च चकर्त ह,
चरणांश् चैव केषाञ्चिद् बभञ्ज चरणायुधः। २१

१६। पर्यणामयन् [परि-नम्-इ+अन्]—अयापयन्। णत्वे पा. ८।४।१४। १७। विस्रब्धेषु—विशङ्केषु। उलूकम्—पेचकम्। १८। हर्यक्षम्—हरिमणि-निभ-लोचनम्। बभ्रु-पिङ्गलम्—गभीर-नील-पीतम्। सु-तीक्ष्ण-घोणा-नखरम्—अति तीक्ष्ण-नासिका-नख-युतम्।

तेषां शरीरावयवैः शरीरैश् च, विशाम् पते,
न्यग्रोध-मण्डलं सर्वं संछन्नं सर्वतो ऽभवत् । २२

तांस् तु दृष्ट्वा ततः काकान् कौशिको मुदितो ऽभवत्,
प्रतिकृत्य यथा-कामं शत्रूणां, शत्रु-सूदनः । २३

तद् दृष्ट्वा सोपधं कर्म कौशिकेन कृतं निशि,
तद्-भावे कृत-सङ्कल्पो द्रौणिर् एको ऽन्वचिन्तयत्,— २४

"उपदेशः कृतो ऽनेन पक्षिणा मम संयुगे ।
शत्रूणां क्षयणे युक्तः प्राप्तः कालश् च मे मतः । २५

नाद्य शक्यं मया हन्तुं पाण्डवा जित-काशिनः
बलवन्तः कृतोत्साहा लब्ध-लक्षाः प्रहारिणः । २६

राज्ञः सकाशे तेषां च प्रतिज्ञातो वधो मया,
पतङ्गाग्नि-समां वृत्तिम् आस्थायात्म-विनाशिनीम् । २७

न्यायतो युध्यमानस्य प्राण-त्यागो, न संशयः ।
छद्मना तु भवेत् सिद्धिः शत्रूणां च क्षयो महान् । २८

तत्र संशयिताद् अर्थाद् यो ऽर्थो निःसंशयो भवेत्,
तं जना बहु मन्यन्ते ये ऽर्थ-शास्त्र-विशारदाः । २९

यच् चाप्यत्र भवेत् कार्यं गर्हितं लोक-निन्दितम्,
कर्तव्यं तद् मनुष्येण क्षत्र-धर्मेण वर्तता । ३०

२३ । कौशिकः—पेचकः । प्रतिकृत्य—वैरं निर्यात्य । २४ । सोपधम्—स-कपटम् । तद्-भावे—कपट-भावे । २५ । 'दुर्जनाचरितं मार्गं प्रमाणं कुर्वते खलाः ; विश्वस्तान् हिंसितुं द्रौणिर् उलूकम् अकरोद् गुरुम् ।' २६ । शक्यम्—*Cf.* ३।६।२६ ।

निन्दितानि च कर्माणि कुत्सितानि पदे पदे
सोपधानि कृतान्येव पाण्डवैर् अ-कृतात्मभिः। ३१
अस्मिन्न् अर्थे पुरा गीताः श्रूयन्ते धर्म-चिन्तकैः
श्लोका, न्यायम् अपेक्षद्भिस्, तत्त्वार्थास्, तत्त्व-दर्शिभिः,— ३२
'परिश्रान्ते विदीर्णे वा भुञ्जाने वापि, शत्रुभिः,
प्रस्थाने वा प्रवेशे वा, प्रहर्तव्यं रिपोर् बलम्, ३३
निद्रार्तम् अर्ध-रात्रे च, तथा नष्ट-प्रणायकम्,
भिन्न-योधं बलं यच् च द्विधा-युक्तं च यद् भवेत्'।" ३४
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे
पाण्डूनां सह पाञ्चालैर् द्रोण-पुत्रः प्रतापवान्। ३५
स, क्रूरां मतिम् आस्थाय, विनिश्चित्य मुहुर् मुहुः,
सुप्तौ प्राबोधयत् तौ तु मातुलं भोजम् एव च। ३६

तृतीयो ऽध्यायः

नैशाभियानम्

तौ प्रबुद्धौ महात्मानौ कृप-भोजौ महा-बलौ
नोत्तरं प्रतिपद्येतां तत्र युक्तं, ह्रिया वृतौ। १
स, मुहूर्तम् इव ध्यात्वा, वाष्प-विह्वलम् अब्रवीत्,—
"हतो दुर्योधनो राजा एक-वीरो महा-बलः २
यस्यार्थे वैरम् अस्माभिर् आसक्तं पाण्डवैः सह।
पातितो भीमसेनेन एका-दश-चमू-पतिः! ३

वृकोदरेण क्षुद्रेण सु-नृशंसम् इदं कृतम्
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता । ४

पाण्डवैर् धार्तराष्ट्राणां यद् इदं कदनं कृतम्,
वयम् एव त्रयः शिष्टा अस्मिन् महति वैशसे । ५

भवतोस् तु यदि प्रज्ञा न मोहाद् अपनीयते,
व्यापन्ने ऽस्मिन् महत्यर्थे यद् नः श्रेयस् तद् उच्यताम् ।" ६

कृप उवाच,—

रागात् क्रोधाद् भयाल् लोभाद् यो ऽर्थान् ईहेत मानवः,
अनीशश् चावमानी च स शीघ्रं भ्रश्यते श्रियः । ७

सो ऽयं दुर्योधनेनार्थो, लुब्धेनादीर्घ-दर्शिना,
अ-संमन्त्र्य समारब्धो मूढत्वाद् अ-विचिन्तितः । ८

हित-बुद्धीन् अनादृत्य सं-मन्त्र्यासाधुभिः सह,
वार्यमाणो ऽकरोद् वैरं पाण्डवैर् गुणवत्तरैः । ९

अनुवर्तामहे यत् तु वयं तं पाप-पुरुषम्,
अस्मान् अप्यनयस् तस्मात् प्राप्तो ऽयं दारुणो महान् । १०

अनेन तु ममाद्यापि व्यसनेनोपतापिता
बुद्धिश्, चिन्तयतः, किञ्चित् स्वं श्रेयो नावबुध्यते । ११

मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ।
तत्रास्य बुद्धिर् विनयस्, तत्र श्रेयश् च पश्यति । १२

४ । मूर्धाभिषिक्तस्य—राज्यारोपण-काले विधिना शिरसि स्नापितस्य । ५ । वैशसे—विनाशे । ७ । अनीशः—अ-जित-चित्तः । अवमानी—[परान्] अवमन्यमानः (अवजानन्) । १० । अ-नयः—अशुभम्, विपत् ।

ते वयं धृतराष्ट्रं च गान्धारीं च यशस्विनीम्
उपपृच्छामहे, गत्वा, विदुरं च महा-मतिम् । १३

ते पृष्टास् तु वदेयुर् यच् छ्रेयो नः, समनन्तरम्
तद् अस्माभिः पुनः कार्यम् इति मे नैष्ठिकी मतिः । १४

सञ्जय उवाच,—

अश्वत्थामा, महाराज, दुःख-शोक-समन्वितः,
क्रूरं मनस् ततः कृत्वा ताव् उभौ प्रत्यभाषत,— १५

"क्षात्र-धर्मं विदित्वाहं यदि ब्राह्मण्यम् आश्रितः,
प्रकुर्यां सु-महत् कर्म, न मे तत् साधु-सम्मतम् । १६

धारयंश् च धनुर् दिव्यं दिव्यान्यस्त्राणि चाहवे,
पितरं निहतं दृष्ट्वा किं नु वक्ष्यामि संसदि ? १७

अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जित-काशिनः
विमुक्त-युग्य-कवचा हर्षेण च समन्विताः । १८

तेषां, निशि प्रसुप्तानां सुस्थानां शिविरे स्वके,
अवस्कन्दं करिष्यामि शिविरस्याद्य दुष्करम् । १९

अद्य तान् सहितान् सर्वान् धृष्टद्युम्न-पुरोगमान्
सूदयिष्यामि, विक्रम्य, कक्षं दीप्त इवानलः ।" २०

---

१४ । समनन्तरम्—अविलम्बेनैव । पुनः—तु । नैष्ठिकी—स्थिरा । १६ । विदित्वा—लब्ध्वा, आ जन्मन आश्रित्य । प्रकुर्याम्—सम्यक् अनुतिष्ठेयम् । कर्म—[शम-दमादि-साधन-रूपं ब्राह्मणोचितं] कृत्यम् । १८ । युग्यम्—वाहनम्, यानम् । १९ । अवस्कन्दम्—अवगाहनम्, आक्रमणम् ।

कृप उवाच,—

दिष्ट्या ते प्रति-कर्तव्ये मतिर् जातेयम्, अच्युत ।
न त्वां वारयितुं शक्तो वज्र-पाणिर् अपि स्वयम् । २१

अनुयास्यावहे त्वां तु प्रभाते, सहिताव्, उभौ ।
अद्य रात्रौ विश्रमस्व, विमुक्त-कवच-ध्वजः । २२

स, गत्वा शिविरं तेषां, नाम विश्राव्य चाहवे,
ततः, कर्तासि शत्रूणां युध्यतां कदनं महत् । २३

सञ्जय उवाच,—

एवम् उक्तस् ततो द्रौणिर् मातुलेन हितं वचः
अब्रवीद् मातुलं, राजन्, क्रोधाद् उद्धृत्य लोचने,— २४

"आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च,
अर्थांश् चिन्तयतश् चापि कामयानस्य वा पुनः ? २५

तद् इदं समनुप्राप्तं पश्य मे ऽद्य चतुष्टयम्,
यस्य भागश् चतुर्थो मे स्वप्नम् अह्नाय नाशयेत् । २६

धृष्टद्युम्नम् अहत्वा तु नाहं जीवितुम् उत्सहे ।
स मे पितुर् वधाद् वध्यः पाञ्चाला ये च सङ्गताः । २७

विलापो भग्न-सक्थस्य यस् तु राज्ञो मया श्रुतः,
स पुनर् हृदयं कस्य क्रूरस्यापि न निर्दहेत् । २८

---

२२ । विश्रमस्व—विश्राम्य, निश्चेष्टस् तिष्ठ । आप्र. । २६ । चतुष्टयम्—आतुरत्वम् अमर्षः अर्थ-चिन्ता अर्थ-कामना च । भागश् चतुर्थः—अर्थ-कामना, पाण्डव-पाञ्चालादि-हननेच्छा । स्वप्नम्—निद्राम् ।

यश् चायं मित्र-पक्षो मे मयि जीवति निर्जितः,
शोकं मे वर्धयत्येष, वारि-वेग इवार्णवम् । २९

वार्त्तिकैः कथ्यमानस् तु मित्राणां मे पराभवः
पाण्डवानां च विजयो हृदयं दहतीव मे । ३०

अहं तु कदनं कृत्वा शत्रूणाम् अद्य सौप्तिके,
ततो विश्रमिता चैव स्वप्ता च विगत-ज्वरः ।" ३१

कृप उवाच,—

न वधः पूज्यते लोके सुप्तानाम् इह धर्मतः
तथैवापास्त-शस्त्राणां विमुक्त-रथ-वाजिनाम् । ३२

अद्य स्वप्स्यन्ति पाञ्चाला विमुक्त-कवचा, विभो,
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः । ३३

यस् तेषां तदवस्थानां द्रुह्येत पुरुषो ऽनृजुः,
व्यक्तं स नरके मज्जेद् अ-गाधे विपुले ऽ-प्लवे । ३४

सर्वास्त्र-विदुषां लोके श्रेष्ठस् त्वम् असि विश्रुतः,
न च ते जातु लोके ऽस्मिन् सु-सूक्ष्मम् अपि किल्बिषम् । ३५

त्वं पुनः सूर्य-सङ्काशः श्वो-भूत उदिते रवौ,
प्रकाशे सर्व-भूतानां विजेता युधि शात्रवान् । ३६

असम्भावित-रूपं हि त्वयि कर्म विगर्हितम्,
शुक्ले रक्तम् इव न्यस्तं, भवेद् इति मतिर् मम । ३७

---

३१ । सौप्तिके—निशा-युद्धे । ३६ । शात्रवान्—शत्रून् ।

अश्वत्थामा उवाच,—

एवम् एव यथात्थ त्वं मातुलेह, न संशयः ।
तैस् तु पूर्वम् अयं सेतुः शतधा विदली-कृतः । ३८

प्रत्यक्षं भूमि-पालानां भवतां चापि सन्निधौ
न्यस्त-शस्त्रो मम पिता धृष्टद्युम्नेन पातितः । ३९

कर्णश् च, पतिते चक्रे रथस्य, रथिनां वरः,
उत्तमे व्यसने सन्नो, हतो गाण्डीव-धन्वना । ४०

तथा शान्तनवो भीष्मो न्यस्त-शस्त्रो निरायुधः,
शिखण्डिनं पुरस्कृत्य, हतो गाण्डीव-धन्वना । ४१

भूरि-श्रवा महेष्वासस् तथा प्राय-गतो रणे,
क्रोशतां भूमि-पालानां युयुधानेन पातितः । ४२

दुर्योधनश् च भीमेन, समेत्य, गदया रणे,
पश्यतां भूमि-पालानाम्, अधर्मेण निपातितः । ४३

विलापो भग्न-सक्थस्य यो मे राज्ञः परिश्रुतः
वार्त्तिकानां कथयतां, स मे मर्माणि कृन्तति । ४४

पितृ-हन्तॄन् अहं हत्वा पाञ्चालान् निशि सौप्तिके,
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै । ४५

त्वरे चाहम् अनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् ? ४६

---

३८ । विदली-कृतः—भग्नी-कृतः, विश्लिष्टी-कृतः । ४५ । कामम्—स्वेच्छया ।

न स जातः पुमाल्ँ लोके कश्चिद् न स भविष्यति,
यो मे व्यावर्तयेद् एतां वधे तेषां कृतां मतिम्। ४७

सञ्जय उवाच,---

एवम् उक्त्वा, महा-राज, द्रोण-पुत्रः प्रतापवान् ,
एकान्ते योजयित्वाश्वान् , प्रायाद् अभिमुखः परान्। ४८

तम् अब्रूताम् महात्मानौ भोज-शारद्वताव् उभौ,—
"किमर्थं स्यन्दनो युक्तः, किं च कार्यं चिकीर्षितम् ? ४९

एक-सार्थ-प्रयातौ स्वस् त्वया सह, नरर्षभ,
सम-दुःख-सुखौ चापि। नावां शङ्कितुम् अर्हसि।" ५०

अश्वत्थामा तु, संक्रुद्धः पितुर् वधम् अनुस्मरन् ,
ताभ्यां तथ्यं तद् आचख्यौ यद् अस्यात्म-चिकीर्षितम्। ५१

"क्षिप्रं सन्नद्ध-कवचौ स-खड्गाव् आत्त-कार्मुकौ,
माम् आस्थाय प्रतीक्षेतां, रथ-वर्यौ परन्तपौ" ५२

इत्युक्त्वा, रथम् आस्थाय प्रायाद् अभिमुखः परान्।
तम् अन्वगात् कृपो, राजन् , कृत-वर्मा च सात्वतः।

ते प्रयाता व्यरोचन्त, परान् अभिमुखास् त्रयः,
हूयमाना यथा यज्ञे समिद्धा हव्य-वाहनाः ; ५४

ययुश् च शिविरं तेषां सं-प्रसुप्त-जनं, विभो।
द्वार-देशं तु सं-प्राप्य द्रौणिस् तस्थौ, महा-रथः। ५५

५०। एक-सार्थ-प्रयातौ—[एकस्यैवार्थस्य साधनाय] त्वया सह प्रस्थितौ। स्वः [अस्+वस्]—भवावः।

चतुर्थो ऽध्यायः

सुप्त-हत्या

तस्मिन् प्रयाते शिविरं द्रोण-पुत्रे महात्मनि,
कृपश् च कृत-वर्मा च शिविर-द्वार्यतिष्ठत । १

अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महा-रथौ,
प्रहृष्टः, शनकै, राजन्, इदं वचनम् अब्रवीत्,— २

"यत्तौ भवन्तौ पर्याप्तौ सर्व-क्षत्रस्य नाशने ।
किं पुनर् योध-शेषस्य, प्रसुप्तस्य विशेषतः ? ३

अहं प्रवेक्ष्ये शिविरं चरिष्यामि च कालवत् ।
यथा न कश्चिद् अपि वां जीवन् मुच्येत मानवः,
तथा भवद्भ्यां कार्यं स्याद् इति मे निश्चिता मतिः ।" ४

इत्युक्त्वा प्राविशद् द्रौणिः पार्थानां शिविरं महत्,
अद्वारेणाभ्यवस्कन्द्य, विहाय भयम् आत्मनः । ५

स प्रविश्य महा-बाहुर् उद्देशज्ञश् च तस्य ह,
धृष्टद्युम्नस्य निलयं शनकैर् अभ्युपागमत् । ६

अथ प्रविश्य तद् वेश्म धृष्टद्युम्नस्य, भारत,
पाञ्चाल्यं शयने द्रौणिर अपश्यत् सुप्तम् अन्तिकात् । ७

---

४ । वाम् (युवयोः)—युवाभ्याम् (५मी) । ५ । अभ्यवस्कन्द्य—आक्रम्य । ६ । उद्देश-ज्ञः—[अवस्थान-] स्थल-ज्ञः ।

क्षौमावदाते महति स्पर्द्ध्यास्तरण-संवृते
माल्य-प्रवर-संयुक्ते धूपैश चूर्णैश् च वासिते। ८

तं शयानं महात्मानं विश्रब्धम् अ-कुतो-भयम्
प्राबोधयत पादेन शयन-स्थं, मही-पते। ९

संबुध्य चरण-स्पर्शाद्, उत्थाय, रण-दुर्मदः,
अभ्यजानाद् असेयात्मा, द्रोण-पुत्रं महा-रथम्। १०

तम उत्पतन्तं शयनाद् अश्वत्थामा महा-बलः,
केशेष्वालभ्य पाणिभ्यां, निष्पिपेष मही-तले। ११

स, बलात् तेन निष्पिष्टः साध्वसेन च, भारत,
निद्रया चैव, पाञ्चाल्यो नाशकच् चेष्टितुं तदा। १२

तम् आक्रम्य पदा, राजन्, कण्ठे चोरसि चोभयोः,
नदन्तं विस्फुरन्तं च पशु-मारम् अमारयत्। १३

तुदन् नखैस् तु स द्रौणिं नाति-व्यक्तम उदाहरत्,—
"आचार्य-पुत्र, शस्त्रेण जहि मां, मा चिरं कृथाः।" १४

"आचार्य-घातिनां लोका न सन्ति, कुल-पांसन!
तस्माच् छस्त्रेण निधनं न त्वम् अर्हसि दुर्मते!" १५

एवं ब्रुवाणस् तं वीरं, सिंहो मत्तम् इव द्विपम्,
मर्मस्वभ्यवधीत्, क्रुद्धः, पाद-घातैः सु-दारुणैः। १६

८। क्षौमावदाते—कौशेय-वस्त्रोज्ज्वले। धूपैश् चूर्णैः—धूप-चूर्णैः। ९। प्राबोधयत—जागरयामास। १०। संबुध्य—जागरित्वा। १२। साध्वसेन—भयेन। १४। उदाहरत्—उवाच।

तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि,
अबुध्यन्त, महा-राज, स्त्रियो ये चास्य रक्षिणः। १७
ते, दृष्ट्वा धर्षयन्तं तम्, अति-मानुष-विक्रमम् ,
भूतम् एवाध्यवस्यन्तो न स्म प्रव्याहरन् भयात्। १८
अपक्रान्ते ततस् तस्मिन् द्रोण-पुत्रे महा-रथे,
सहितै रक्षिभिः सर्वैः प्रणेदुर् योषितस् तदा। १९
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः
संभ्रान्ताः समनह्यन्त किम् एतद् इति चाब्रुवन्। २०
ततस् ते योध-मुख्यास् तं सहसा पर्यवारयन्।
स तान् आपततः सर्वान् रुद्रास्त्रेण व्यपोथयत्। २१
ततो निस्त्रिंशम् आदाय जघानान्यान् पृथक् पृथक्,
भागशो विचरन् मार्गान्, असि-युद्ध-विशारदः। २२
तथैव गुल्मे संप्रेक्ष्य शयानान् , मध्य-गौल्मिकान्
श्रान्तान् न्यस्तायुधान् सर्वान् क्षणेनैव व्यपोथयत्। २३
तस्य लोहित-सिक्तस्य दीप्त-खड्गस्य युध्यतः
अ-मानुष इवाकारो बभौ परम-भीषणः। २४

१७। अबुध्यन्त—अजागरुः। १८। अध्यवस्यन्तः [अधि-अव-सो +अत्, १।ब]—चिन्तयन्तः। प्रव्याहरन् [प्र-वि-आ-हृ+अन्]—[किञ्चिद्] ऊचुः। २०। संभ्रान्ताः—भयेन त्वरान्विताः। २१। व्यपोथयत्—निःशेषं जघान। २३। गुल्मे—सैन्यैक-देशे।

संशोधनी। ४५० पृ. १० श्लो. वातयित्वा घातयित्वा भवेत्। ४५१ पृ. १९ श्लो. संरब्ध संरब्धां। ४५६ पृ. ५७ टी. वार्ता वार्त्ता। ४६२ पृ. १७ श्लो. दशनम् दर्शनम्।

ये त्वजाग्रत, कौरव्य, तेऽपि शब्देन मोहिताः
निरीक्षमाणा अन्योन्यं द्रौणिं दृष्ट्वा प्रविव्यथुः। २५

तद् रूपं तस्य ते दृष्ट्वा, क्षत्रियाः शत्रु-कर्षिणः,
राक्षसं मन्यमानास् तं, नयनानि न्यमीलयन्। २६

स घोर-रूपो व्यचरत् कालवच् छिबिरे ततः,
अपश्यद् द्रौपदी-पुत्रान् अवशिष्टांश् च सोमकान्। २७

धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया, विशां पते,
अवाकिरञ् छर-व्रातैर् भारद्वाजम् अभीतवत्। २८

ततस् तेन निनादेन सं-प्रबुद्धाः, प्रभद्रकाः
शिली-मुखैः, शिखण्डी च, द्रोण-पुत्रं समार्दयन्। २९

भारद्वाजः, स तान् दृष्ट्वा शर-वर्षाणि वर्षतः,
सहस्र-चन्द्रं विमलं गृहीत्वा चर्म संयुगे ३०

खड्गं च विपुलं दिव्यं जात-रूप-परिष्कृतम्,
द्रौपदेयान् अभिद्रुत्य खड्गेन व्यधमद्, बली। ३१

शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना।
प्रभद्रक-गणान् सर्वान् अभिदुद्राव वेगवान्।
यच् च शिष्टं विराटस्य बलं तु, भृशम् आद्रवत्। ३२

२५। अजाग्रत [जागृ+अन्त]—अजागरुः। आआ। प्रविव्यथुः—प्रविव्यथिरे, चिक्लिशिरे। पआ.। २९। तेन निनादेन—*Cf.* उपरिष्टात् १०।४।१९।

द्रुपदस्य च पुत्राणां पौत्राणां सुहृदाम् अपि
चकार कदनं घोरं, दृष्ट्वा दृष्ट्वा, महा-बलः । ३३

अन्यान् अन्यांश् च पुरुषान् अभिसृत्याभिसृत्य च
न्यकृन्तद् असिना द्रौणिर् असि-मार्ग-विशारदः । ३४

सो ऽच्छिनत् कस्यचित् पादौ जघनं चैव कस्यचित्,
कांश्चिद् बिभेद पार्श्वेषु काल-सृष्ट इवान्तकः । ३५

निद्रार्ताश् च भयार्ताश् च व्यधावन्त ततस् ततः,
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च । ३६

बन्धनानि च, राजेन्द्र, संछिद्य तुरगा द्विपाः
समं पर्यपतंश् चान्ये, कुर्वन्तो महद् आकुलम् । ३७

तत्र केचिद् नरा भीता व्यलीयन्त मही-तले ।
तथैव तान् निपतितान् अपिंषन् गज-वाजिनः । ३८

तत्रापरे वध्यमाना, मुहुर् मुहुर् अ-चेतसः,
शिविराद् निष्पतन्ति स्म क्षत्रिया भय-पीड़िताः । ३९

तांश् च निपततस् त्रस्ताञ् छिविराज् जीवितैषिणः
कृत-वर्मा कृपश् चैव द्वार-देशे निजघ्नतुः । ४०

वि-शस्त्र-यन्त्र-कवचान् मुक्त-केशान् कृताञ्जलीन्,
वेपमानान् क्षितौ, भीतान् नैव कांश्चिद् अमुञ्चताम् । ४१

---

३५ । काल-सृष्ट इवान्तकः—काल-प्रेरितो यम इव । *Cf.* परस्तात् १३।१।१८ ३७ । कुर्वन्तः—जनयन्तः । आकुलम्—त्रासम् ।

भूयश् चैव चिकीर्षन्तौ द्रोण-पुत्रस्य तौ प्रियम्,
त्रिषु देशेषु ददतुः शिविरस्य हुताशनम्। ४२

ततः, प्रकाशे शिविरे, खड्गेन पितृ-नन्दनः
अश्वत्थामा, महा-राज, व्यचरत् कृत-हस्तवत्। ४३

तस्या रजन्यास् त्वर्धेन पाण्डवानां महद् बलम्
गमयामास, राजेन्द्र, द्रौणिर् यम-निवेशनम्। ४४

तत्रादृश्यन्त रक्षांसि पिशाचाश् च पृथग्-विधाः
खादन्तो नर-मांसानि पिबन्तः शोणितानि च। ४५

यथैव संसुप्त-जने शिविरे प्राविशद् निशि,
तथैव हत्वा निःशब्दो निश्चक्राम नरर्षभः। ४६

पर्यष्वजत तौ द्रौणिस्, ताभ्यां संप्रतिनन्दितः,
इदं हर्षात् तु सु-महद् आददे वाक्यम् उत्तमम्,— ४७

"पाञ्चाला निहताः सर्वे द्रौपदेयाश् च सर्वशः,
सोमका मत्स्य-शेषाश् च सर्वे विनिहता मया।
यदि जीवति नो राजा, तस्मै शंसामहे प्रियम्।" ४८

पञ्चमो ऽध्यायः

सुख-मृत्युः

ते, हत्वा सर्व-पाञ्चालान् द्रौपदेयांश् च सर्वशः,
आगच्छन्, सहितास्, तत्र यत्र दुर्योधनो हतः। १

तं भग्न-सक्थं राजेन्द्र, कृच्छ्र-प्राणम् अचेतनम्,
वमन्तं रुधिरं वक्त्राद्, अपश्यन् वसुधा-तले, २

वृतं समन्नाद् बहुभिः श्वापदैर् घोर-दर्शनैः,
शाला-वृक-गणैश् चैव भक्षयिष्यद्भिर् अन्तिकात् , ३
निवारयन्तं कृच्छ्रात् तान् श्वापदांश् च चिखादिषून् ,
विचेष्टमानं मह्यां च, सु-भृशं गाढ़-वेदनम् । ४
ते, तं शयानं संप्रेक्ष्य राजानम् अ-तथोचितम्,
अ-विषह्येण दुःखेन ततस् ते रुरुदुस् त्रयः । ५
तं शयानं कुरु-श्रेष्ठं ततो भरत-सत्तमम् ,
अश्वत्थामा, समालिङ्ग्य, करुणं पर्यदेवयत्,— ६
"आहुस् त्वां, राज-शार्दूल, मुख्यं सर्व-धनुष्मताम् ।
कथं विवरम् अद्राक्षीद् भीमसेनस् तवानघ ? ७
ननु रामोऽब्रवीद् , राजंस् , त्वां सदा, यदु-नन्दनः,
'दुर्योधन-समो नास्ति गदायाम्' इति 'वीर्यवान्' । ८
श्लाघते त्वां हि वार्ष्णेयो, राजन्, संसत्सु, भारत,
'स शिष्यो मम कौरव्यो गदा-युद्ध' इति, प्रभो । ९
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः
हतस्याभिमुखस्याजौ, प्राप्तस् त्वम् असि तां गतिम् । १०
दुर्योधन, न शोचामि त्वाम् अहं, पुरुषर्षभ,
हत-पुत्रौ तु शोचामि गान्धारीं पितरं च ते । ११

४ । चिखादिषून् [खाद्-स+उ, २।ब]—खादितुम् इच्छून् । ६ । पर्यदेवयत्—पर्यदेवयत, विललाप । पआ. । ९ । श्लाघते—प्रशंसति ।

दातारं सर्व-कामानां रक्षितारं प्रजा-हितम्
यद् वयं नानुगच्छामस् त्वां, धिग् अस्मान् नराधमान्! १२

दुःखं नूनं, कुरु-श्रेष्ठ, चरिष्यामो महीम् इमाम्।
हीनानां नस् त्वया, राजन्, कुतः शान्तिः, कुतः सुखम्? १३

गत्वैतस् तु, महा-राज, समेत्य च, महा-रथान्
यथा ज्येष्ठं यथा-श्रेष्ठं पूजयेर् वचनाद् मम। १४

आचार्यं पूजयित्वा च केतुं सर्व-धनुष्मताम्,
हतं मयाद्य शंसेथा धृष्टद्युम्नं, नराधिप। १५

परिष्वजेथा राजानं वाह्लिकं सु-महा-रथम्,
सैन्धवं सोमदत्तं च भूरि-श्रवसम् एव च। १६

तथा पूर्व-गतान् अन्यान् स्वर्गे पार्थिव-सत्तमान्
अस्मद्-वाक्यात् परिष्वज्य पृच्छेथास् त्वम् अनामयम्।" १७

इत्येवम् उक्त्वा राजानं भग्न-सक्थम् अचेतनम्,
अश्वत्थामा समुद्वीक्ष्य पुनर् वचनम् अब्रवीत्,— १८

"दुर्योधन, जीवसि चेद्, वाक्यं श्रोत्र-सुखं शृणु,
सप्त पाण्डवतः शेषाः धार्तराष्ट्रास् त्रयो वयम्। १९

ते चैव भ्रातरः पञ्च वासुदेवो ऽथ सात्यकिः;
अहं च कृत वर्मा च कृपः शारद्वतस् तथा। २०

द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः,
पाञ्चाला निहताः सर्वे मत्स्य-शेषं च, भारत। २१

कृते प्रतिकृतं पश्य,—हत पुत्रा हि पाण्डवाः ।
सौप्तिके शिविरं तेषां हतं स नर-वाहनम् । २२

मया च पाप-कर्मासौ धृष्टद्युम्नो, मही-पते,
प्रविश्य शिविरं रात्रौ पशु-मारेण मारितः ।" २३

दुर्योधनस् तु, तां वाचं निशम्य, मनसः प्रियाम्,
प्रतिलभ्य पुनश् चेत इदं वचनम् अब्रवीत्,— २४

"न मे ऽकरोत् तद् गाङ्गेयो न कर्णो न च ते पिता,
यत् त्वया कृप-भोजाभ्यां सहितेनाद्य मे कृतम् । २५

स च सेना-पतिः क्षुद्रो हतः सार्धं शिखण्डिना ।
तेन मन्ये मघवता समम् आत्मानम् अद्य वै । २६

स्वस्ति प्राप्नुत—भद्रं वः!—स्वर्गे नः सङ्गमः पुनः ।"
इत्येवम् उक्त्वा, तूष्णीं स कुरु-राजो महा-मनाः २७

प्राणान् उदसृजद् । वीरः, सुहृदां दुःखम् उत्सृजन्,
आक्रामत दिवं पुण्यां । शरीरं क्षितिम् आविशत् । २८

तथैव ते परिष्वक्ताः, परिष्वज्य च ते नृपम्,
पुनः पुनः प्रेक्षमाणाः, स्वकान् आरुरुहू रथान् । २९

एवम् एष क्षयो वृत्तः कुरु-पाण्डव-सेनयोः
घोरो विशसनो रौद्रो, राजन्, दुर्मन्त्रिते तव । ३०

तव पुत्रे गते स्वर्गं शोकार्तस्य ममानघ
ऋषि-दत्तं प्रनष्टं तद् दिव्य-दर्शित्वम् अद्य वै । ३१

वैशम्पायन उवाच,—

इति श्रुत्वा स नृ-पतिः पुत्रस्य निधनं तदा,
निःश्वस्य दीर्घम् उष्णं च ततश् चिन्ता-परोऽभवत्। ३२

षष्ठो ऽध्यायः

शोकानलः

तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः
शशंस धर्म-राजाय सौप्तिके कदनं महत्,— १

"गौतमेन नृशंसेन भोजेन कृत-वर्मणा
अश्वत्थाम्ना च पापेन हतं वः शिविरं निशि। २

अहम् एको ऽवशिष्टस् तु तस्मात् सैन्याद्, मही-पते,
मुक्तः कथञ्चिद्, धर्मात्मन्, व्यग्राच् च कृत-वर्मणः।" ३

तच् श्रुत्वा वाक्यम् अ-शिवं, कुन्ती-पुत्रो युधिष्ठिरः
पपात मह्यां, दुर्धर्षः, पुत्र शोक-समन्वितः। ४

लब्ध-चेतास् तु कौन्तेयः शोक-विह्वलया गिरा,
जित्वा शत्रून् जितः पश्चात्, पर्यदेवयद् आर्तवत्,— ५

"हत्वा भ्रातॄन वयस्यांश् च पितॄन् पुत्रान् सुहृद्-गणान्
बन्धुन् अमात्यान् पौत्रांश् च—जित्वा सर्वान्—जिता वयम। ६

इन्द्रोपमान् पार्थिव-पुत्र-पौत्रान्
पश्यारि-शेषेण हतान् प्रमादात्,

संशोधनो। ४७३ पृ. १४ श्लो. व्यक्तम व्यक्तम् भवेत्, ४७९ पृ. १२ श्लो ग्रजा प्रजा।

तीर्त्वा समुद्रं बणिजः समृद्धा
मग्नाः कु-नद्याम् इव हेलमानाः ! ७

कृष्णां तु शोचामि कथं नु साध्वी
शोकार्णवं साद्य विशक्ष्यतीति,
भ्रातॄंश् च पुत्रांश् च हतान् निशम्य,
पाञ्चाल-राजं पितरं च वृद्धम् ।" ८

इत्येवम् आर्तः परिदेवयन् स
राजा कुरूणां नकुलं बभाषे,—
"गच्छानयैनाम् इह मन्द-भाग्यां
स-मातृ-पक्षाम्" इति "राज-पुत्रीम् ।" ९

माद्री-सुतस्, तत् परि-गृह्य वाक्यं
धर्मेण धर्म-प्रतिमस्य राज्ञः,
ययौ रथेनालयम् आशु देव्याः,
पाञ्चाल-राजस्य च यत्र दाराः । १०

प्रस्थाप्य माद्री-सुतम्, आजमीढः
शोकार्दितस्, तैः सहितः सुहृद्भिः,
रोरूयमाणः, प्रययौ सुतानाम्
आयोधनं भूत-गणानुकीर्णम् । ११

---

७ । प्रमादात्—अनवधानात् । हेलमानाः—अनवदधानाः । ८ । विशदर्यति—सम्यक् सहिष्यते । ११ । रोरूयमाणः (रु-य+आन, १।१)—अत्युच्चै रुदन् ।

स तत् प्रविश्या-शिवम् उग्र-रूपं
दर्दश पुत्रान् सुहृदः सखींश् च
भूमौ शयानान् रुधिरार्द्र-गात्रान्
विभिन्न-देहान् प्रहृतोत्तमाङ्गान् । १२

स तांस् तु दृष्ट्वा भृशम् आर्त-रूपो
युधिष्ठिरो धर्म-भृतां वरिष्ठः
उच्चैः प्रचुक्रोश च, कौरवाग्र्यः,
पपात चोर्व्यां स-गणो वि-संज्ञः । १३

तम् अश्रु-परिपूर्णाक्षं वेपमानम् अचेतनम्
सुहृदो भृश-संविग्नाः सान्त्वयाञ्चक्रिरे तदा । १४

ततस् तस्मिन् क्षणे कल्यो रथेनादित्य-वर्चसा
नकुलः कृष्णया सार्धम् उपायात्, परमार्तया । १५

कम्पमानेव कदली, वातेनाभि-समीरिता,
कृष्णा राजानम् आसाद्य, शोकार्ता न्यपतद् भुवि । १६

न बभौ वदनं तस्या रुदन्त्याः शोक-कर्शितम्
फुल्ल-पद्म-पलाशाक्ष्यास् तमो-ग्रस्त इवांशुमान् । १७

ततस् तां पतितां दृष्ट्वा, संरम्भी सत्य-विक्रमः,
बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः । १८

सा समाश्वासिता तेन भीम-सेनेन, भामिनी
रुदन्ती पाण्डव-ज्येष्ठम् इदं वचनम् अब्रवीत्,— १९

"दिष्ट्या, राजन्, अवाप्येमाम् अखिलां भोक्ष्यसे महीम्,
आत्मजान् क्षत्र-धर्मेण संप्रदाय यमाय वै ! २०
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पाप-कर्मणा,
शोकस् तपति मां, पार्थ, हुताशन इवाश्रयम्। २१
तस्य पाप-कृतो द्रौणेर् न चेद् अद्य त्वया मृधे
ह्रियते सानु-बन्धस्य युधि विक्रम्य जीवितम्, २२
इहैव प्रायम् आसिष्ये ! तद् निबोधत, पाण्डवाः।"
एवम् उक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत्। २३
प्रत्युवाच स धर्मात्मा द्रौपदीं चारु-दर्शनाम्,—
"स, कल्याणि, वनं दुर्गं दूरं द्रौणिर् इतो गतः।
तस्य त्वं पातनं सङ्ख्ये कथं ज्ञास्यसि, शोभने ?" २४
"द्रोण-पुत्रस्य सहजो मणिः शिरसि मे श्रुतः,
निहत्य संख्ये तं पापं पश्येयं मणिम् आहृतम्" २५
इत्युक्त्वा पाण्डवं कृष्णा राजानं, चारु-दर्शना
भीमसेनं करे स्पृष्ट्वा कुपिता वाक्यम् अब्रवीत्,— २६
"त्रातुम् अर्हसि मां, भीम, क्षत्र-धर्मम् अनुस्मरन्।
जहि तं पाप-कर्माणं, शम्बरं मघवान् इव।
न हि ते विक्रमे तुल्यः पुमान् अस्तीह कश्चन।" २७
स काञ्चन-विचित्राङ्गम् आरुरोह महा-रथम्,
आदाय रुचिरं चित्रं स-मार्गण-गुणं धनुः। २८

२३। प्रायम् आसिष्ये—मरणान्तम् अनशनम् आरप्स्ये।

नकुलं सारथिं कृत्वा, द्रोण-पुत्र-वधे धृतः,
विस्फार्य स-शरं चापं, तूर्णम् अश्वान् अचोदयत्। २९

तस्मिन् प्रयाते दुर्धर्षे, यदूनाम् ऋषभस्, ततः
अब्रवीत् पुण्डरीकाक्षः कुन्ती-पुत्रं युधिष्ठिरम्,— ३०

"एष, पाण्डव, ते भ्राता पुत्र-शोक-परायणः,
जिघांसुर् द्रौणिम् आक्रन्दे, एक एवाभिधावति। ३१

भीमः प्रियस् ते सर्वेभ्यो भ्रातृभ्यो, भरतर्षभ।
तं कृच्छ्र-गतम् अद्य त्वं कस्माद् नाभ्युपपद्यसे? ३२

स, संरम्भी दुरात्मा च चपलः क्रूर एव च,
वेद चास्त्रं ब्रह्म-शिरस्। तस्माद् रक्ष्यो वृकोदरः।" ३३

एवम् उक्त्वा, युधां श्रेष्ठः सर्व-यादव-नन्दनः
सर्वायुध-वरोपेतम् आरुरोह रथोत्तमम्। ३४

अर्जुनः सत्य-कर्मा च कुरु-राजो युधिष्ठिरः
अशोभेताम् महात्मानौ दाशार्हम् अभितः स्थितौ। ३५

ताव् उपारोप्य दाशार्हः स्यन्दनं लोक-पूजितम्,
प्रतोदेन जवोपेतान् परमाश्वान् अचोदयत्। ३६

ते समार्च्छन् नर-व्याघ्राः क्षणेन, भरतर्षभ.
भीमसेनं महेष्वासं, समनुद्रुत्य, वेगिताः। ३७

३१। आक्रन्दे—संग्रामे। ३७। समार्च्छन् [सम्-ऋ+अन्]—समागच्छन्, प्राप्नुवन्।

क्रोध-दीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम्
नाशक्नुवन् वारयितुं समेत्यापि महा-रथाः । ३८

स, तेषां प्रेक्षताम् एव श्रीमतां दृढ़-धन्विनाम्,
ययौ भागीरथी-कच्छं हरिभिर् भृश-वेगितैः,
यत्र स्म श्रूयते द्रौणिः, पुत्र-हन्ता महात्मनाम् । ३९

सप्तमो ऽध्यायः

निष्क्रयः

स ददर्श महात्मानम् उदकान्ते यशस्विनम्
कृष्ण-द्वैपायनं व्यासम् आसीनम् ऋषिभिः सह ; १

तं चैव क्रूर-कर्माणं घृताक्तं कुश-चीरिणम्
रजसा ध्वस्तम् आसीनं ददर्श द्रौणिम् अन्तिके । २

तम् अभ्यधावत् कौन्तेयः, प्रगृह्य स-शरं धनुः,
भीमसेनो महा-बाहुस् तिष्ठ तिष्ठेति चाब्रवीत् । ३

तं दृष्ट्वा भीम-धन्वानं प्रगृहीत-शरासनम्,
भ्रातरौ पृष्ठतश् चास्य जनार्दन-रथे स्थितौ, ४

व्यथितात्माभवद् द्रौणिः, प्राप्तं चेदम् अमन्यत ;
जग्राह च स चेषीकां द्रौणिः सव्येन पाणिना ; ५

---

३९ । भागीरथी-कच्छम्—गङ्गायाः प्रान्त-देशम् ।
१ । उदकान्ते—जल-प्रान्ते ।

अ-पाण्डवायेति रुषा व्यसृजद् दारुणं वचः,
सर्व-लोक-प्रमोहार्थं तद् अस्त्रं प्रमुमोच ह। ६

ततस् तस्याम् इषीकायां पावकः समजायत,
प्रधक्ष्यन्न् इव लोकांस् त्रीन्, कालान्तक-यमोपमः। ७

इङ्गितेनैव दाशार्हस् तम् अभिप्रायम् आदितः
द्रौणेर् बुद्ध्वा, महा-बाहुर् अर्जुनं प्रत्यभाषत,— ८

"अर्जुनार्जुन, यद् दिव्यम् अस्त्रं ते हृदि वर्तते,
द्रोणोपदिष्टं तस्यायं कालः सम्प्रति, पाण्डव। ९

भ्रातृणाम् आत्मनश् चैव परित्राणाय, भारत,
विसृजैतत् त्वम् अप्याजाव् अस्त्रम् अस्त्र-निवारणम्।" १०

केशवेनैवम् उक्तो, ऽथ पाण्डवः पर-वीर-हा
अवातरद् रथात् तूर्णं प्रगृह्य स-शरं धनुः। ११

पूर्वम् आचार्य-पुत्राय ततो ऽनन्तरम् आत्मने
भ्रातृभ्यश चैव सर्वेभ्यः स्वस्तीत्युक्त्वा, परन्तपः १२

देवताभ्यो नमस्कृत्य गुरुभ्यश् चैव सर्वशः,
उत्ससर्ज, शिवं ध्यायन्न् 'अस्त्रम् अस्त्रेण शाम्यताम्'। १३

ततस् तद् अस्त्रं, सहसा सृष्टं गाण्डीव-धन्वना,
प्रजज्वाल, महार्चिष्मद् युगान्तानल-सन्निभम्। १४

६। अ-पाण्डवाय—पाण्डवानाम् तिरो-भावाय। १३। शिवं ध्यायन्—शिवं (मङ्गलं) यथा स्यात् तथा चिन्तयन्। शाम्यताम्—शाम्यताम्, उपशाम्यताम्, निर्वाप्यताम्। आप्र.।

तथैव द्रोण-पुत्रस्य तद् अस्त्रं तिग्म-तेजसः
प्रजज्वाल महा-ज्वालं तेजो-मण्डल-सं-वृतम् । १५

निर्घाता बहवश् चासन् । पेतुर् उल्काः सहस्रशः ।
महद् भयं च भूतानां सर्वेषां समजायत । १६

स-शब्दम् अभवद् व्योम ज्वाला-मालाकुलं भृशम् ।
चचाल च मही कृत्स्ना स-पर्वत-वन-द्रुमा । १७

ताव् अस्त्र-तेजसा लोकांस् त्रासयन्तौ ततः स्थितौ ।
महर्षी सहितौ तत्र दर्शयामासतुस् तदा । १८

नारदः सर्व-धर्मात्मा भरतानां पितामहः
दीप्तयोर् अस्त्रयोर् मध्ये स्थितौ परम-तेजसौ । १९

आस्ताम् ऋषि-वरौ तत्र ज्वलिताव् इव पावकौ
अस्त्र-तेजः शमयितुं लोकानां हित-काम्यया । २०

ऋषी ऊचतुः,—

महास्त्र-विदुषां पूर्वे ये ऽप्यतीता महा-रथाः,
नैतद् अस्त्रं मनुष्येषु तैः प्रमुक्तं कथञ्चन ।
किम् इदं साहसं, वीरौ, कृतवन्तौ महात्ययम् ? २१

वैशम्पायन उवाच,—

दृष्ट्वैव मुनि-शार्दूलौ ताव् अग्नि-सम-तेजसौ
संजहार शरं दिव्यं त्वरमाणो धनञ्जयः । २२

---

१८ । [आत्मानम्] दर्शयामासतुः—आविर्बभूवतुः । १९ । भरतानां पितामहः—व्यासः । स्थितौ—दण्डायमानौ आसाताम् । २१ । साहसम्—अविमृश्य-कृतिम्, मनुष्यमारणादि दुष्कर्म ।

विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे
अ-शक्तः पाण्डवाद् अन्यः, साक्षाद् अपि शत-क्रतुः । २३

द्रौणिर् अप्यथ संप्रेक्ष्य सो ऽन्तरा ताव् ऋषी स्थितौ,
न शशाक पुनर् घोरम् अस्त्रं संहर्तुम् ओजसा । २४

अशक्तः प्रति-संहारे परमास्त्रस्य संयुगे,
द्रौणिर् दीन-मना, राजन्, द्वैपायनम् अभाषत,— २५

"उत्तम-व्यसनार्तेन प्राण-त्राणम् अभीप्सुना
मयैतद् अस्त्रम् उत्सृष्टं भीमसेन-भयाद्, मुने । २६

अधर्मश् च कृतो ऽनेन धार्तराष्ट्रं जिघांसता
मिथ्याचारेण, भगवन्, भीम-सेनेन संयुगे । २७

विसृष्टं हि मया, दिव्यम् एतद् अस्त्रं दुरासदम्
अद्य पाण्डु-सुतान् सर्वान् जीविताद् भ्रंशयिष्यति ।" २८

व्यास उवाच,—

अस्त्रं ब्रह्म-शिरस्, तात, विद्वान् पार्थो धनञ्जयः
उत्सृष्टवान् अहिंसार्थं, न रोषेण, तवाहवे । २९

अस्त्रम् अस्त्रेण तु रणे तव संशमयिष्यता
विसृष्टम् अर्जुनेनेदं, पुनश् च प्रति-संहृतम् । ३०

ब्रह्मास्त्रम् अप्यवाप्यैतद् उपदेशात् पितुस् तव,
क्षत्र-धर्माद् महा-बाहुर् नाकम्पत धनञ्जयः । ३१

---

२३ । संग्रहे—संहरणे ।

एवं धृतिमतः साधोः सर्वास्त्र-विदुषः सतः
स-भ्रातृ-बन्धोः कस्मात् त्वं वधम् अस्य चिकीर्षसि ? ३२

'अस्त्रं ब्रह्म-शिरो यत्र परमास्त्रेण बध्यते,
समा द्वादश पर्जन्यस् तद् राष्ट्रं नाभिवर्षति' ३३

एतदर्थं महा-बाहुः शक्तिमान् अपि पाण्डवः
न विहन्यात् तद् अस्त्रं तु प्रजा-हित-चिकीर्षया। ३४

पाण्डवास् त्वं च राष्ट्रं च सदा संरक्ष्यम् एव नः।
तस्मात् संहर दिव्यं त्वम् अस्त्रम् एतद्, महा-भुज। ३५

अ-रोषस् तव चैवास्तु, पार्थाः सन्तु निरामयाः!
नह्य-धर्मेण राजर्षिः पाण्डवो जेतुम् इच्छति। ३६

मणिं चैव प्रयच्छैभ्यो यस् ते शिरसि तिष्ठति।
एतम् आदाय ते प्राणान् प्रतिदास्यन्ति पाण्डवाः। ३७

द्रौणिर् उवाच,—

पाण्डवैर् यानि रत्नानि यच् चान्यत् कौरवैर् धनम्
अवाप्तम् इह तेभ्यो ऽयं मणिर् मम विशिष्यते। ३८

यम् आवध्य भयं नास्ति शस्त्र-व्याधि-क्षुधाश्रयम्,
एवं-वीर्यो मणिर् अयं न मे त्याज्यो कथञ्चन। ३९

यत् तु मे भगवान् आह तद् मे कार्यम् अनन्तरम्।
अयं मणिर् अयं चाहम्—इषीका तु पतिष्यति। ४०

एतद् अस्त्रम् अतश् चैव गर्भेषु विसृजाम्यहम्।
न च वाक्यं भगवतो न करिष्ये, महा-मुने। ४१

व्यास उवाच,—

एवं कुरु, न चान्यत्र बुद्धिः कार्या कथञ्चन ।
गर्भेषु पाण्डवेयानां विसृज्यैतद् उपारम । ४२

वैशम्पायन उवाच,—

ततः परमम् अस्त्रं तु द्रौणिर्, उद्यतम् आहवे,
द्वैपायन-वचः श्रुत्वा गर्भेषु प्रमुमोच ह । ४३

प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम्,
जगाम, वि-मनास्, तेषां सर्वेषां पश्यतां, वनम् । ४४

पाण्डवाश् चापि, गोविन्दं पुरस्कृत्य, हत-द्विषः,
द्रौपदीम् अभ्यधावन्त, प्रायोपेतां मनस्विनीम् । ४५

ताम् उपेत्य, निरानन्दां दुःख-शोक-समन्विताम्,
परिवार्य व्यतिष्ठन्त पाण्डवाः सह-केशवाः । ४६

ततो राज्ञाभ्यनुज्ञातो भीमसेनो महा-बलः
प्रददौ तं मणिं दिव्यं, वचनं चेदम् अब्रवीत्,— ४७

"अयं, भद्रे, तव मणिः । पुत्र-हन्ता जितः स ते ।
उत्तिष्ठ, शोकम् उत्सृज्य । क्षत्र-धर्मम् अनुस्मर । ४८

हतो दुर्योधनः पापो, राज्यस्य परि-पन्थिकः ।
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया । ४९

---

४५ । अभ्यधावन्त—अभ्यधावन् । आआ. । प्रायोपेताम्—मरणाय नियमम् आस्थाय उपविष्टाम् ।

वैरस्य गतम् आनृण्यं । न स्म वाच्या विवक्षताम् ।
जित्वा मुक्तो द्रोण-पुत्रो ब्राह्मण्याद् गौरवेण च । ५०

यशो ऽस्य पतितं, देवि, शरीरं त्ववशेषितम् ।
वियोजितश् च मणिना भ्रंशितश् चायुधं भुवि । ५१

द्रौपदी उवाच,—

केवलानृण्यम् आप्तास्मि । गुरु-पुत्रो गुरुर् मम ।
शिरस्येतं मणिं राजा ग्रहीतुम्, अनघो, ऽर्हति । ५२

वैशम्पायन उवाच,—

तं गृहीत्वा ततो राजा शिरस्येवाकरोत् तदा ।
उत्तस्थौ पुत्र-शोकार्ता ततः कृष्णा मनस्विनी । ५३

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां सौप्तिक-पर्व ।

---

५० । स्म—स्मः । वाच्याः—निन्दनीयाः । विवक्षताम् [वच्-सन्+अत्, ६।ब]—वक्तुं (निन्दितुम्) इच्छताम् ।

इति तारकालोके नाम भारत-वृत्तौ सौप्तिक-पर्व ।

अथ

श्रीभारते

स्त्री-पर्व

प्रथमो ऽध्यायः

संसार-कान्तारः

वैशम्पायन उवाच,—

हते पुत्र-शते दीनं, छिन्न-शाखम् इव द्रुमम्,
पुत्र-शोकाभि-सन्तप्तं धृतराष्ट्रं मही-पतिम्, १

ध्यान-मूकत्वम् आपन्नं, चिन्तया समभिप्लुतम्,
अभिगम्य, महा-प्राज्ञः सञ्जयो वाक्यम् अब्रवीत्,— २

"किं शोचसि, महा-राज ? नास्ति शोके सहायता।
निर्जनेयं वसुमती शून्या सम्प्रति केवला। ३

पितॄणां पुत्र-पौत्राणां ज्ञातीनां सुहृदां तथा
गुरूणां चानुपूर्व्येण प्रेत-कार्याणि कारय।" ४

३। केवला—[प्रायेण] एकाकिनी। ४। आनुपूर्व्येण—पौर्वापर्येण, मरण-काल-क्रमम् अनुसृत्य। प्रेत-कार्याणि—प्रेतानां (परेतानां, मृतानां) कार्याणि ([और्ध्वदेहिक-] कृत्यानि)।

तच् श्रुत्वा करुणं वाक्यं पुत्र-पौत्र-वधार्दितः
पपात भुवि दुर्धर्षो वाताहत इव द्रुमः। ५

तस्य लालप्यमानस्य बहु शोकं वितन्वतः
शोकापहं नरेन्द्रस्य सञ्जयो वाक्यम् अब्रवीत्,— ६

"स्वयम् उत्पादयित्वाग्निं परीतस् तेन यो ऽग्निना
दह्यमानो मनस्-तापं भजते, न स पण्डितः। ७

त्वयैव स-सुतेनायं वाक्य-वायु-समीरितः
लोभाज्येन च संसिक्तो ज्वलितः पार्थ-पावकः। ८

तस्मिन् समिद्धे पतिताः शलभा इव ते सुताः।
तान् वै शराग्नि-निर्दग्धान् न त्वं शोचितुम् अर्हसि। ९

यच् चाश्रु-पात-कलिलं वदनं वहसे, नृप,
अशास्त्र-दृष्टम् एतद् धि न प्रशंसन्ति पण्डिताः।
जहीहि मन्युं बुद्ध्या वै, धारयात्मानम् आत्मना।" १०

एवम् आश्वासितं तेन सञ्जयेन महात्मना
विदुरो भूय एवाह बुद्धि-पूर्वं, परन्तप,— ११

"उत्तिष्ठ, राजन्, किं शेषे ? धारयात्मानम् आत्मना।
एषा वै सर्व-सत्त्वानां, लोकेश्वर, परा गतिः। १२

६। लालप्यमानस्य [लप्-य+आन, ६।१]—नितरां विलपतः। वितन्वतः—प्रकाशयतः। ७। परीतः—वेष्टितः। ८। समीरितः—सञ्चालितः। १०। कलिलम्—मलिनम्। जहीहि [हा+हि]—त्यज। मन्युम्—शोकम्। आत्मानम्—चित्तम्। आत्मना—[ज्ञान-दीप-प्रकाशितया] धृत्या।

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्। १३

एक-सार्थ-प्रयातानां सर्वेषां तत्र गामिनाम्,
यस्य कालः स यात्यग्रे, तत्र का परिदेवना ? १४

न चाप्येतान् हतान् युद्धे, राजन्, शोचितुम् अर्हसि।
प्रमाणं यदि शास्त्राणि, गतास् ते परमां गतिम्। १५

न यज्ञैर् दक्षिणावद्भिर् न तपोभिर् न विद्यया
स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः। १६

आत्मानम् आत्मनाश्वास्य मा शुचः, पुरुषर्षभ।
नाद्य शोकाभिभूतस् त्वं कायम् उत्स्रष्टुम् अर्हसि। १७

भैषज्यम् एतद् दुःखस्य यद् एतद् नानुचिन्तयेत्।
चिन्त्यमानं हि न व्येति, भूयश् चापि प्रवर्धते। १८

प्रज्ञया मानसं दुःखं हन्याच्, छारीरम् औषधैः।
एतद् विज्ञान-सामर्थ्यं। न बालैः समताम् इयात्। १९

यथा तु सलिलं, राजन्, क्रीडार्थम् अनुसंचरन्
उन्मज्जेच् च निमज्जेच् च किञ्चित् सत्त्वं, नराधिप, २०

एवं संसार-गहने उन्मज्जन-निमज्जने
कर्म-योगेन बध्यन्ते क्लिश्यन्ते चाल्प-बुद्धयः। २१

१३। निचयाः—समूहाः, सङ्घाताः। समुच्छ्रयाः—समुन्नतयः। १४। तत्र गामिनाम्—परत्र-गमन-शीलानाम्। परिदेवना—विलापः। १७। उत्स्रष्टुम्—त्यक्तुम्। १९। इयात् [इ+यात्]—गच्छेत्। **समताम् इयात्—तुल्यो भवेत्। औचित्ये लिङ्।**

अत्र ते वर्तयिष्यामि नमस्कृत्वा स्वयम्भुवे
यथा संसार-गहनं वदन्ति परमर्षयः । २२

कश्चिद् महति कान्तारे वर्तमानो द्विजः किल
महद् दुर्गम् अनुप्राप्तो वनं क्रव्याद-संकुलम् । २३

स तेषां नाशम् अन्विच्छन्, प्रद्रुतो भय-पीड़ितः,
न च निर्याति वै दूरं न वा तैर् विप्रयुज्यते । २४

अथापश्यद् वनं गूढ़ं समन्ताद् वागुरावृतम्,
बाहुभ्यां सं-परिष्वक्तः स्त्रिया परम-घोरया ; २५

पञ्च-शीर्ष-धरैर् नागैर् शैलैर् इव समुन्नतैः,
नभः-स्पृशैर् महा-वृक्षैः परिक्षिप्तं महा-वनम् । २६

वन-मध्ये च तत्राभूद् उद-पानः समावृतः,
वल्लीभिस् तृण-नद्धाभिर् गूढ़ाभिर् अभि-संवृतः । २७

पपात स द्विजस् तत्र निगूढ़े सलिलाशये
विलग्नश् चाभवत् तस्मिलँ् लता-सन्तान-सङ्कुले । २८

पनसस्य यथा जातं वृन्त-बद्धं महा-फलम्,
स तथा लम्बते तत्र ह्यूर्ध्व-पादो ह्यधः-शिराः । २९

---

२२ । वर्तयिष्यामि—कथयिष्यामि । २३ । कान्तारे—उद्वेजकारण्ये । २४ । नाशम्—अदर्शनम् । २५ । वागुरा—मृग-बन्धनार्थ-जाल-विशेषः । २६ । परिक्षिप्तम्—समन्ताद् समाकीर्णम् । २७ । उदपानः—कूपः । वल्लीभिः—लताभिः । २८ । सन्तानः—विस्तारः । सङ्कुले—व्याप्ते ।

अथ तत्रापि चान्यो ऽस्य भूयो जात उपद्रवः,
कूप-मध्ये महा-नागम् अपश्यत महा-बलम् । ३०

कूप-वीनाह-वेलायाम् अपश्यत महा-गजम्
षड्-वक्त्रं कृष्ण-शवलं द्विषट्क-पद-चारिणम्
क्रमेण परि-सर्पन्तं वल्ली-वृक्ष-समावृतम् । ३१

तस्य शाखाग्र-शाखासु वृक्ष-शाखावलम्बिनः
नाना-रूपा मधु-करा घोर-रूपा भयावहाः ३२

आसते, मधु संवृत्य पूर्वम् एव । निकेत-जाः
भूयो भूयः समीहन्ते मधूनि, भरतर्षभ, ३३

स्वादनीयानि भूतानां, यैर् बालो विप्रकृष्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते तदा । ३४

आलम्बमानः स पुमान् धारां पिबति सर्वदा,
न चास्य तृष्णा विरता पिबमानस्य सङ्कटे; ३५

अभीप्सति च तां नित्यम् अतृप्तः स पुनः पुनः ;
न चास्य जीविते, राजन्, निर्वेदः समजायत । ३६

संशोधनी । ४८१ पृ. ६ श्लो. बन्धुन् बन्धून् भवेत् । ५८७ पृ. १२ श्लो. भ्रातृस्यश्च भ्रातृभ्यश्, ४६६ पृ. २६ श्लो. नागैर् नागैः ।

३० । नागम्—[काल-] सर्पम् । ३१ । वीनाहः [वि-नह्+अ, १।१]—[कूपस्य] मुख-बन्धनम् (प्रच्छादकम्), नान्दी-पट्टः । वेलायाम्—सीम्नि । कृष्ण-शवलम्—कृष्ण-कर्बुरम्, शुक्ल-कृष्णम् । द्वि-षट्कानि—द्वादश । ३३ । संवृत्य—संगृह्य । निकेत-जाः—[सन्धि-] गृह-जाः । समीहन्ते—कर्तुं चेष्टन्ते । ३४ । विप्रकृष्यते—[स्व-स्थानात्] सञ्चाल्यते । ३५ । पिबमानस्य—पिबतः । आआ. ।

तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश् च तं वृक्षं निकृन्तन्ति स्म मूषिकाः । ३७

व्यालैश् च तद् वनं दुर्गं । स्त्रिया च परमोग्रया
कूपाधस्ताच् च नागेन वीनाहे कुञ्जरेण च ३८

वृक्ष-प्रपाताच् च भयं मूषिकेभ्यश् च पञ्चमम्
मधु-लोभाद् मधु-करैः षष्ठम् आहुर् महद् भयम् । ३९

एवं स वसते तत्र क्षिप्तः संसार-सागरे
न चैव जीविताशायां निर्वेदम् उपगच्छति । ४०

शील-रश्मि-समायुक्तः स्थितो यो मानसे रथे,
त्यक्त्वा मृत्यु-भयं, राजन्, ब्रह्म-लोकं स गच्छति । ४१

---

३७ । निकृन्तन्ति—कुट्टयन्ति । ३९ । प्रपातात्—महा-पतनात् । ४० । वसते—वसति । आआ । २३-४० । उपाख्यानम् इदं रूपकम् एव । अत्र हि कान्तारं संसारः, द्विजः संसार-प्रविष्टो मनुष्यः । इह खलु मातृ-गर्भाद् बहिर्गमनं नरस्य प्रथमं जन्म, वयः-प्राप्तौ संसार-प्रवेशो हि तस्य द्वितीयं जन्म चेति मन्तव्यम् । वनं संसार-गहनम्, क्रव्यादाः व्याधयः, भयङ्करी स्त्री रूप-नाशिनी जरा, उदपानः देहिनो देहः, वल्ली जीविताशा, ऊर्ध्व-पादः स्वर्ग-च्युतः, अधः-शिराः तमसि पतनोन्मुखः, कूपस्थो महा-नागः मृत्युः, वीनाहः क्रोध-लोभादिः, महा-गजः संवत्सरः, वक्त्राणि (मुखानि) ऋतवः, कृष्ण-शवलम् (शुक्ल-कृष्णम्) पक्षद्वयम्, पदानि मासाः, वृक्षः जीवित-कालः (आयुः), शाखाः बाल्य-यौवन-प्रौढ़ि-वार्धकावस्थाः, मधु-कराः इन्द्रियाणि, मधूनि भोग्य-वस्तूनि, बालः अ-बोध-जनः, कृष्ण-मूषिकाः रात्रयः, शुक्ल-मूषिकाश् च दिनानि ।

अभयं सर्व-भूतेभ्यो यो ददाति, मही-पते,
स गच्छति परं स्थानं विष्णोः पदम् अनामयम् । ४२

न तत् क्रतु-सहस्रेण नोपवासैश् च नित्यशः,
अभयस्य च दानेन यत् फलं प्राप्नुयाद् नरः । ४३

नह्यात्मनः प्रियतरं किञ्चिद् भूतेषु निश्चितम् ।
अनिष्टं सर्व-भूतानां मरणं नाम, भारत ।
तस्मात् सर्वेषु भूतेषु दया कार्या विपश्चिता ।" ४४

द्वितीयो ऽध्यायः

रणाङ्गन-यात्रा

विदुरस्य तु तद् वाक्यं निशम्य. कुरु-सत्तमः
पुत्र-शोकाभि-सन्तप्तः पपात भुवि, मूर्च्छितः । १

अथ दीर्घस्य कालस्य लब्ध-संज्ञो मही-पतिः
विललाप चिरं कालं पुत्राधिभिर् अभिप्लुतः,— २

"धिग् अस्तु खलु मानुष्यं मानुष्ये च परिग्रहम्
यतो-मूलानि दुःखानि सम्भवन्ति पुनः पुनः" । ३

तस्य तद् वचनं श्रुत्वा, कृष्ण-द्वैपायनः प्रभुः
पुत्र-शोकाभिसन्तप्तं पुत्रं वचनम् अब्रवीत्,— ४

"पुत्र-शोकं समुत्पन्नं, हुताशं ज्वलितं यथा,
प्रज्ञाम्भसा, महा-राज, निर्वापय सदा सता ।" ५

---

३ । परिग्रहम्—दार-ग्रहणम् । ५ । सता—यथार्थेन ।

तच् श्रुत्वा तस्य वचनं व्यासस्यामित-तेजसः,
मुहूर्तं समनुध्याय, धृतराष्ट्रो ऽभ्यभाषत,— ६

"महता शोक-जालेन प्रणुन्नो ऽस्मि, द्विजोत्तम।
नात्मानम् अवबुध्यामि, मुह्यमानो मुहुर् मुहुः। ७

इदं तु वचनं श्रुत्वा तव, देव-नियोग-जम्,
धारयिष्याम्यहम् प्राणान्, यतिष्ये च न शोचितुम्।" ८

एतच् श्रुत्वा तु वचनं व्यासः सत्यवती-सुतः
धृत-राष्ट्रस्य, राजेन्द्र, तत्रैवान्तरधीयत। ९

गते व्यासे तु धर्मात्मा धृतराष्ट्रो मही-पतिः,
सञ्जयं योजयेत्युक्त्वा, विदुरं प्रत्यभाषत,— १०

"क्षिप्रम् आनय गान्धारीं सर्वाश् च भरत-स्त्रियः।
कुन्तीं चैव तथा, क्षत्तः, समानय ममान्तिकम्।" ११

एवम् उक्त्वा स धर्मात्मा विदुरं धर्म-वित्तमम्
शोक-विप्रहत-ज्ञानो यानम् एवान्वरोहत। १२

गान्धारी पुत्र-शोकार्ता भर्तुर् वचन-नोदिता
सह कुन्त्या यतो राजा सह स्त्रीभिर् उपाद्रवत्। १३

ताः, समासाद्य राजानं भृशं शोक-समन्विताः,
आमन्त्र्यान्योन्यम् ईयुः स्म, भृशम् उच्चुक्रुशुस् ततः, १४

७। प्रणुन्नः [प्र-नुद्+त, १।१]—चालितः। अव-बुध्यामि—अवबुध्ये, बोधामि, जानामि। पआ। १०। योजय—'यानेन अश्वान्' इति शेषः।

ताः समाश्वासयत् क्षत्ता, तास्त्यश्रु चार्ततरः स्वयम् ।
अश्रु-कण्ठीः समारोप्य ततो ऽसौ निर्ययौ पुरात् । १५
ततः प्रणादः संजज्ञे सर्वेषु कुरु-वेश्मसु ।
आ-कुमारं पुरं सर्वम् अभवच् छोक-कर्शितम् । १६
अदृष्ट-पूर्वा या नार्यः पुरा देव-गणैर् अपि,
पृथग्-जनेन दृश्यन्ते तास् तदा निहतेश्वराः । १७
प्रकीर्य केशान् सु-शुभान् भूषणान्यवमुच्य च,
एक-वस्त्र-धरा नार्यः परि-पेतुर् अनाथवत् । १८
श्वेत-पर्वत-रूपेभ्यो गृहेभ्यस् तास् त्वपाक्रमन्,
गुहाभ्य इव शैलानां पृषत्यो हत-यूथपाः । १९
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः
शोकार्तान्यद्रवन्, राजन्, किशोरीणाम् इवाङ्गने । २०
प्रगृह्य बाहून्, क्रोशन्त्यः पुत्रान् भ्रातॄन् पितॄन् अपि,
दर्शयन्तीव ता ह स्म युगान्ते लोक-संक्षयम् । २१
व्रीडां जग्मुः पुरा याः स्म सखीनाम् अपि योषितः,
ता एक-वस्त्रा निर्लज्जाः श्वश्रूणां पुरतो ऽभवन् । २२

---

१५ । समारोप्य—यानानि इति शेषः । १६ । आ-कुमारम्—आबालम्, बालकादि-स्थविर-पर्यन्तम् । १७ । पृथग्-जनेन—नीचैः । १८ । प्रकीर्य—विक्षिप्य, प्रसार्य । सुशुभान्—अति-सुन्दरान् । अवमुच्य—त्यक्त्वा । १९ । पृषत्यः—चित्र-हरिण्यः । २० । उदीर्णानि—उत्तेजितानि । अनेकशः—अनेकानि । स्वार्थे शस् । पा. ५।४।४२ किशोरीणाम्—अश्व-शावकीनाम् । अङ्गने—[नृत्य-शिक्षा-] प्राङ्गणे । २१ । दर्शयन्ति स्म—दर्शयामासुः ।

परस्परं सु-सूक्ष्मेषु शोकेष्वाश्वासयंस् तदा ।
ताः शोक-विह्वला, राजन्, अवैक्षन्त परस्परम् । २३

ताभिः परिवृतो, राजा, रुदतीभिः सहस्रशः,
निर्ययौ नगराद् दीनस् तूर्णम् आयोधनं प्रति । २४

शिल्पिनो वणिजो वैश्याः सर्वे कर्मोपजीविनः,
ते पार्थिवं पुरस्कृत्य निर्ययुर् नगराद् बहिः । २५

तेषां विक्रोशमानानाम् आर्तानां कुरु-संक्षये
प्रादुरासीद् महाञ् छब्दो व्यथयन् भुवनान्युत । २६

'युगान्त-काले संप्राप्ते भूतानां दह्यताम् इव
अभावः स्याद् अयं प्राप्त' इति भूतानि मेनिरे । २७

भृशम् उद्विग्न-मनसस् ते पौराः कुरु-संक्षये
प्राक्रोशन्त, महा-राज, स्वनुरक्तास्, तदा भृशम् । २८

क्रोशमात्रं ततो गत्वा ददृशुस् तान् महा-रथान्,
शारद्वतं कृपं द्रौणिं कृत-वर्माणम् एव च । २९

ते तु दृष्ट्वैव राजानं प्रज्ञा-चक्षुषम् ईश्वरम्
अश्रु-कण्ठा विनिःश्वस्य रुदन्तम् इदम् अब्रुवन्,—- ३०

"पुत्रस् तव, महा-राज, कृत्वा कर्म सुदुष्करम्
गतः सानुचरो, राजन्, शक्र-लोकं, मही-पते । ३१

२३ । सु-सूक्ष्मेषु—मर्म-घातिषु । २४ । सहस्रशः—सहस्रेण, अ-संख्याभिः इत्यर्थः । अ-प्रमितार्थे प्रमितार्थस्य प्रयोगः ।

दुर्योधन-बलाद् मुक्ता वयम् एव त्रयो रथाः ।
सर्वम् अन्यत् परिक्षीणं सैन्यं ते, भरतर्षभ !" ३२

इत्येवम् उक्त्वा राजानं, कृपः शारद्वतस् ततः
गान्धारीं पुत्र-शोकार्ताम् इदं वचनम् अब्रवीत्,— ३३

"अभीता युध्यमानास् ते, घ्नन्तः शत्रु-गणान् बहून्,
वीर-कर्माणि कुर्वाणाः, पुत्रास् ते निधनं गताः । ३४

सर्वे ह्यभिमुखा, राज्ञि, युध्यमाना हता युधि ।
न हि कश्चिद् धि शूराणां युध्यमानः पराङ्-मुखः
शस्त्रेण निधनं प्राप्तो, न च कश्चित् कृताञ्जलिः ॥ ३५

न चापि शत्रवस् तेषां मुच्यन्ते, राज्ञि, पाण्डवाः ।
शृणु यत् कृतम अस्माभिर् अश्वत्थाम-पुरोगमैः । ३६

अधर्मेण हतं श्रुत्वा भीम-सेनेन ते सुतम्
सुप्तं शिविरम् आसाद्य पाण्डूनां कदनं कृतम् । ३७

पाञ्चाला निहताः सर्वे धृष्टद्युम्न-पुरो-गमाः ।
द्रुपदस्यात्मजाश् चैव द्रौपदेयाश् च पातिताः । ३८

तथा विशसनं कृत्वा पुत्र-शत्रु-गणस्य ते,
प्राद्रवाम, रणे स्थातुं न हि शक्ष्यामहे त्रयः । ३९

अनुजानीहि नो, राज्ञि, मा च शोके मनः कृथाः ।
राजंस्, त्वम् अनुजानीहि, धैर्यम् आतिष्ठ चोत्तमम् ।" ४०

---

३४ । घ्नन्तः [हन्+अत् , १ । ब]—विनाशयन्तः ।

इत्येवम् उक्त्वा राजानं कृत्वा चाभि-प्रदक्षिणम्,
कृपश् च कृत वर्मा च द्रोण-पुत्रश् च, भारत, ४१
गङ्गाम् अनु, महा-राज, तूर्णम् अश्वान् अचोदयन् ।
आमन्त्र्यान्योन्यम्, उद्विग्नास्, त्रिधा ते प्रययुस् तदा । ४२
जगाम हास्तिन-पुरं कृपः शारद्वतस् तदा ।
स्वम् एव राष्ट्रं हार्दिक्यो, द्रौणिर् व्यासाश्रमं ययौ । ४३

तृतीयो ऽध्यायः

सेलनम्

हतेषु सर्व-सैन्येषु धर्म-राजो युधिष्ठिरः
शुश्रुवे पितरं वृद्धं निर्यान्तं गज-साह्वयात् । १
सो ऽभ्ययात् पुत्र-शोकार्तः पुत्र-शोक-परिप्लुतम्
शोचमानं, महा-राज, भ्रातृभिः सहितस् तदा,
अन्वीयमानो वीरेण दाशार्हेण महात्मना । २
तम् अन्वयात् सुदुःखार्ता द्रौपदी शोक-कर्शिता
सह पाञ्चाल-योषिद्भिर् यास् तत्रासन् समागताः । ३
स, गङ्गाम् अनु, वृन्दानि स्त्रीणां, भरत-सत्तम,
कुररीणाम् इवार्तानां, क्रोशन्तीनां ददर्श ह । ४

---

४२ । गङ्गाम् अनु—गङ्गाम् अभि, गङ्गाम् प्रति । तदा—गङ्गा-तीरं प्राप्य ।
४ । गङ्गाम् अनु—गङ्गाभिमुखम् [गच्छन्ति] ।

अतीत्य ता, महा-बाहुः, क्रोशन्तीः कुररीर् इव,
ववन्दे पितरं ज्येष्ठं धर्म-राजो युधिष्ठिरः। ५

ततो ऽभिवाद्य पितरं, क्रमेणामित्र-कर्शनाः
न्यवेदयन्त नामानि पाण्डवास् तेऽपि सर्वशः। ६

तम् आत्मजान्त-करणं पिता पुत्र-वधार्दितः
अ-प्रीयमाणः शोकार्तः पाण्डवं परिषस्वजे। ७

धर्म-राजं परिष्वज्य सान्त्वयित्वा च, भारत,
दुष्टात्मा भीमम् अन्वैच्छद्, दिधक्षुर् इव पावकः। ८

वासुदेवो, वरः पुंसाम्, इदं वचनम् अब्रवीत्,—
"पुत्र-शोकाभिसंतप्तं धर्माद् अपकृतं मनः
तव, राजेन्द्र। तेन त्वं भीम-सेनं जिघांससि। ९

न हि पुत्रा, महा-राज, जीवेयुस् ते कथञ्चन।
तस्माद् यत् कृतम् अस्माभिर् मन्यमानैः शमं प्रति,
अनुमन्यस्व तत् सर्वं, मा च शोके मनः कृथाः। १०

राजन्न्, अधीता वेदास् ते शास्त्राणि विविधानि च।
आत्मापराधात् कस्मात् त्वं कुरुषे कोपम् ईदृशम्? ११

६। सर्वशः—सर्वे। पा. ५।४।४२ ७। पाण्डवम्—[ज्येष्ठं] पाण्डवम्, युधिष्ठिरम्। अ-प्रीयमाणः—प्रीतिं (सन्तोषम्) अननुभवन् [अपि]। ८। दिधक्षुः [दह्-स+उ, १।१]—दग्धुम् इच्छुकः। दिधक्षुर् इव पावकः—धृतराष्ट्रः किल महा-बलो ऽपि अन्धत्वाद् योद्धुम् अ-शक्तः प्रेमालिङ्गन-च्छलेन बाहुभ्यां निष्पिंषन् भीमं हन्तुम् इयेष। आकारेण तु तस्य मानसं महा-प्रज्ञः केशवः सु-स्पष्टं बुबुधे। ९। अपकृतम्—अपसारितम्। जिघांससि [हन्-स+सि]—हन्तुम् इच्छसि।

उक्तवांस् त्वां तदैवाहं भीष्म-द्रोणौ च, भारत,
विदुरः सञ्जयश् चैव वाक्यं, राजन्। न तत् कृथाः, १२
राजंस्, त्वं ह्यविधेयात्मा, दुर्योधन-वशे स्थितः।
आत्मापराधाद् आपन्नस्। तत् किं भीमं जिघांससि ? १३
यस् तु तां स्पर्धया क्षुद्रः पाञ्चालीम् आनयत् सभाम्,
स हतो भीम-सेनेन वैरं प्रति-जिहीर्षता।" १४
एवम् उक्तः स कृष्णेन सर्वं सत्यं, जनाधिप,
उवाच देवकी-पुत्रं धृतराष्ट्रो मही-पतिः,—१५
"एवम् एतद्, महा-बाहो, यथा वदसि, माधव।
पुत्र-स्नेहस् तु बलवान् धर्माद् मां समचालयत्। १६
इदानीं त्वहम् अ-व्यग्रो गत-मन्युर् गत-ज्वरः
मध्यमं पाण्डवं वीरं स्प्रष्टुम् इच्छामि, माधव। १७
हतेषु पार्थिवेन्द्रेषु पुत्रेषु निहतेषु च,
पाण्डु-पुत्रेषु मे धर्मः प्रीतिश् चाप्यवतिष्ठते।" १८
ततः स भीमं च धनञ्जयं च
माद्र्याश् च पुत्रौ पुरुष-प्रवीरौ
पस्पर्श गात्रैः, प्ररुदन्, सु-गात्रान्;
आश्वास्य, कल्याणम् उवाच चैनान्। १९

१२। न कृथाः—न अकृथाः। अडभाव आर्षः। १३। अविधेयात्मा—अवश-चित्तः, अनायत्त-मनाः। आपन्नः—विपन्नः, विपद्-ग्रस्तः। १४। प्रति-जिहीर्षता [प्रति-हृ-सन्+अतृ, ३।१]—प्रतिचिकीर्षता, निर्यातयता।

धृतराष्ट्राभ्यनुज्ञातास् ततस् ते कुरु-पुङ्गवाः
अभ्ययुर् भ्रातरः सर्वे गान्धारीं, सह-केशवाः। २०

ततो ज्ञात्वा हतामित्रं धर्म-राजं, युधिष्ठिरम्
गान्धारी पुत्र-शोकार्ता शप्तुम् ऐच्छद्, अ-निन्दिता। २

तस्याः पापम् अभिप्रायं विदित्वा पाण्डवान् प्रति,
तं देशम् उपसंपेदे पाराशर्यो मनो-जवः। २२

दिव्येन चक्षुषा ज्ञात्वा मनसानुद्धतेन च,
सर्व-प्राण-भृतां भावं सततं स तु बुध्यति। २३

स स्नुषाम् अब्रवीत् काले कल्याणानि महा-तपाः,
शाप-कालम् अवाक्षिप्य शम-कालम् उदीरयन्,— २४

"पुरोक्ता युद्ध-काले त्वं पुत्रेण, जयम् इच्छता,
'जयम् आशास्स्व मे, मातर्, युध्यमानस्य शत्रुभिः' २५

उक्तवत्यसि, कल्याणि, 'यतो धर्मस् ततो जयः'।
स्मरामि भाषमाणां हि त्वाम् अहं सत्य-वादिनीम्। २६

जितं पाण्डु-सुतैर् युद्धे। नूनं धर्मस् ततो ऽधिकः।
कोपं संयच्छ, गान्धारि, पाण्डवेषु सुतेषु ते।" २७

२३। बुध्यति—बुध्यते, बोधति। पआ.। २४। कल्याणानि—हितानि [वचनानि]। अवाक्षिप्य—परिहृत्य, अपसार्य। उदीरयन्—उत्पादयन्। २५। आशास्स्व—मदीय-शुभेच्छया वद। २७। ततः—तेन। अधिकः—[अधर्मात्] गरीयान् [इति प्रतिपाद्यते]। संयच्छ—संयमय, दमय।

गान्धारी उवाच,—

भगवन्, नास्यसूयामि, नैतान् इच्छामि नश्यतः।
पुत्र-शोकेन तु बलाद् मनो विह्वलतीव मे। २८

यथैव कुन्त्या कौन्तेया रक्षितव्यास् तथा मया,
तथैव धृतराष्ट्रेण रक्षितव्या यथा त्वया। २९

युध्यमाना हि कौरव्याः कृत-मानाः परस्परम्
निहताः सहिताश् चान्यैस्, तत्र नास्त्य-प्रियं मम। ३०

किं तु कर्माकरोद् भीमो वासुदेवस्य पश्यतः—
दुर्योधनं समाहूय गदा-युद्धे महा-मनाः
अधो नाभ्याः प्रहृतवांस्। तद् मे कोपम् अवर्धयत्। ३१

वैशम्पायन उवाच,—

तच् श्रुत्वा वचनं तस्या, भीम-सेनो ऽथ भीतवत्
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा,— ३२

"अधर्मेण जितः पूर्वं तेन चापि युधिष्ठिरः,
निकृताश् च सदैव स्म, ततो विषमम् आचरम्। ३३

सैन्यस्यैको ऽवशिष्टो ऽयं गदा-युद्धे च वीर्यवान्
न त्यक्ष्यति हृतं राज्यम् इति वै तत् कृतं मया। ३४

एक-पत्नीं च पाञ्चालीम् एक-वस्त्रां रजस्वलाम्
भवत्या विदितं सर्वम् उक्तवान् यत् सुतस् तव। ३५

२८। विह्वलति—नितरां अस्थिरं भवति। ३०। कृत-मानाः—कृताहङ्काराः। ३५। एक-पत्नीम्—एकः (अ-द्वितीयः, अ-परिवर्त-सहः)

सुयोधनं त्वसंहृत्य न शक्या भूः स-सागरा
केवला भोक्तुम् अस्माभिर्, अतश् चैतत् कृतं मया। ३६

तच् चाप्यप्रियम् अस्माकं पुत्रस् ते समुपाचरत्,
द्रौपद्या यत् सभा-मध्ये सव्यम् ऊरुम् अदर्शयत्। ३७

वैरस्यास्य गताः पारं हत्वा दुर्योधनं रणे।
राज्यं युधिष्ठिरे प्राप्ते वयं च गत-मन्यवः।" ३८

गान्धारी उवाच,—

अपिबः शोणितं सङ्ख्ये दुःशासन-शरीर-जम्।
सद्भिर् विगर्हितं घोरम् अनार्य-जन-सेवितम्
क्रूरं कर्माकृथास् तस्मात्। तद् अ-युक्तं, वृकोदर। ३९

भीम उवाच,—

केश-पक्ष-परामर्शे द्रौपद्या द्यूत-कारिते
क्रोधाद् यद् अब्रवं चाहं तच् च मे हृदि वर्तते। ४०

क्षत्र-धर्माच् च्युतो, राज्ञि, भवेयं शाश्वतीः समाः
प्रतिज्ञां ताम् अनिस्तीर्य। ततस् तत् कृतवान् अहम्। ४१

अ-निगृह्य पुरा पुत्रान् अस्मास्वनप-कारिषु,
न ममार्हसि, कल्याणि, दोषेण परिशङ्कितुम्। ४२

पतिः यस्याः ताम् तथोक्ताम्, पतिमात्र-परायणाम्, साध्वीम्। जाता-वेक-वचनम्। *Cf.* उपरिष्टात् १।३५।१६ टी.। 'राज-पुत्रीम्' इति प्रतीच्यां पाठः। ३७। *Cf.* उपरिष्टात् २।२५।३६-४० ३९-४१। *Cf.* उपरिष्टात् २।२५।१-४. ४०। परामर्शे—स्पर्शे।

वैशम्पायन उवाच,—

युधिष्ठिरस् तु गान्धारीं मधुरं वाक्यम् अब्रवीत्,—
"पुत्र-हन्ता नृशंसोऽहं तव, देवि, युधिष्ठिरः ४३
शापार्हः पृथिवी-नाशे हेतु-भूतः। शपस्व माम्!
न हि मे जीवितेनार्थो, न राज्येन सुखेन वा!" ४४

तम् एवं-वादिनं भीतं सन्निकर्षागतं तदा
गान्धारी विगत-क्रोधा सान्त्वयामास मातृवत्। ४५
ते पाण्डवा, अनुज्ञाता, मातरं, वीत-मत्सराः,
अभ्यगच्छन्त, सहिताः, पृथां, पृथुल-वक्षसः। ४६
चिरस्य दृष्ट्वा पुत्रान् सा पुत्राधिभिर् अभिप्लुता,
वाष्पम् आहारयद् देवी वस्त्रेणावृत्य वै मुखम्। ४७
ततो वाष्पं समुत्सृज्य सह पुत्रैस्, तदा पृथा
अपश्यद् एनाञ् छस्त्रौघैर् बहुधा परि-विक्षतान्। ४८
सा तान् एकैकशः पुत्रान् संस्पृशन्ती पुनः पुनः
रुदन्तीम् अथ पाञ्चालीं ददर्श, पतितां भुवि। ४९

द्रौपदी उवाच—

आर्ये, पौत्राः क्व ते सर्वे सौभद्र-सहिता गताः?
न त्वां तेऽद्याभिगच्छन्ति चिरं दृष्ट्वा, तपस्विनीम्!
किं नु राज्येन वै कार्यं विहीनायाः सुतैर् मम? ५०

४४। अर्थः—प्रयोजनम्। ४७। पुत्राधिभिः—पुत्र-विषयाभिः मानस-व्यथाभिः। आहारयत्—मुमोच।

वैशम्पायन उवाच,—

तां समाश्वासयामास पृथा, पृथुल-लोचनाम्,
उत्थाप्याङ्केन सु-दतीं रुदतीं शोक-कर्शिताम् । ५१

तयैव सहिता चापि, पुत्रैर् अनुगता पृथा
अभ्यगच्छत गान्धारीम् आर्ताम्, आर्ततरा स्वयम् । ५२

ताम् उवाचाथ गान्धारी, सह कुन्त्या, यशस्विनीम्,
मैवं पुत्रीति, शोकार्ता,—"पश्य माम् अपि दुःखिताम् । ५३

मन्ये, लोक-विनाशो ऽयं काल-पर्याय-नोदितः
अवश्यम्भावी सं-प्राप्तः स्वभावाद् रोम-हर्षणः । ५४

इदं तत् समनुप्राप्तं विदुरस्य वचो महत्,
अ-सिद्धानुनये कृष्णे यद् उवाच महा-मतिः । ५५

तस्मिन्न् अपरिहार्ये ऽर्थे, व्यतीते च विशेषतः,
मा शुचो ! न हि शोच्यास् ते संग्रामे निधनं गताः । ५६

यथैव त्वं तथैवाहं । को वाम् आश्वासयिष्यति ?
ममैव ह्यपराधेन कुलं ह्यग्र्यं विनाशितम् ।" ५७

पाण्डु-पुत्राश् च ते सर्वे युधिष्ठिर-पुरो-गमाः,
वासुदेवं पुरस्कृत्य हत-बन्धुं च पार्थिवम्,
कुरु-स्त्रियः समादाय, जग्मुर् आयोधनं प्रति । ५८

---

५४ । स्वभावात्—[जगतः] आत्म-क्रियया । ५५ । Cf. उपरिष्टात् ५।२०।७-८ । ५७ । वाम्—आवाम् । अग्र्यम् [अग्र-य, ११] आद्यम्, सर्व-श्रेष्ठम् । ५८ । हत-बन्धुम्—विनाशित-स्व-जनम् ।

चतुर्थो ऽध्यायः

रणाजिर-परिदर्शनम्

समासाद्य कुरु-क्षेत्रं, ताः स्त्रियो निहतेश्वराः
अपश्यन्त हतांस् तत्र पुत्रान् भ्रातॄन् पितॄन् पतीन्, १
क्रव्यादैर् भक्ष्यमाणांश च गोमायु-बल-वायसैः
भूतैः पिशाचै रक्षोभिर् विविधैश् च निशा-चरैः। २
रुद्राक्रीड़-निभं दृष्ट्वा तदा विशसनं, स्त्रियः
कुरर्य इव शोकार्ता विक्रोशन्त्यो निपेतिरे। ३
दुःखोपहत-चित्ताभिः समन्तान् अनुनादितम्
दृष्ट्वायोधनम् अत्युग्रं, धर्मज्ञा सुबलात्मजा, ४
ततः सा पुण्डरीकाक्षम् आमन्त्र्य, पुरुषोत्तमम्,
कुरूणां वैशसं दृष्ट्वा, इदं वचनम् अब्रवीत्,— ५
"पश्यैताः, पुण्डरीकाक्ष, स्नुषा मे निहतेश्वराः
प्रकीर्ण-केशाः, क्रोशन्तीः कुररीर् इव, माधव। ६
अमूस् त्वभि-समागम्य स्मरन्त्यो भरतर्षभान्,
पृथग् एवानुपद्यन्ते पुत्रान् भ्रातॄन् पितॄन् पतीन्। ७
वीर-सूभिर्, महा-बाहो, हत-पुत्राभिर् आवृतम्,
क्वचिच् च वीर-पत्नीभिर् हत-वीराभिर् आवृतम्, ८
शोभितं पुरुष-व्याघ्रैर् भीष्म-कर्णाभिमन्युभिः
द्रोण-द्रुपद-शल्यैश् च ज्वलद्भिर् इव पावकैः, ९

काञ्चनैः कवचैर् दिव्यैर् मणिभिश् च महात्मनाम्
अङ्गदैर् हस्त-केयूरैः स्रग्भिश् च समलङ्कृतम्, १०

वीर-बाहु-विसृष्टाभिः शक्तिभिः परिघैर् अपि
खड्गैश् च विविधैस् तीक्ष्णैः स-शरैश् च शरासनैः, ११

क्रव्याद-सङ्घैः सहितैस् तिष्ठद्भिर् विविधैः क्वचित्,
क्वचिद् आक्रीड़मानैश् च शयानैर् अपरैः क्वचित्– १२

एतद् एवं-विधं, वीर, संपश्यायोधनं, विभो ;
पश्यमाना हि दह्यामि शोकेनाहं, जनार्दन। १३

पाञ्चालानां कुरूणां च विनाशे, मधु-सूदन,
पञ्चानाम् इव भूतानाम् अहं वधम् अचिन्तयम्। १४

तान् सु-पर्णाश् च गृध्राश् च विकर्षन्त्यसृगुक्षितान्,
विगृह्य चरणैर् गृध्रा भक्षयन्ति सहस्रशः ! १५

शयनान्युचिताः सर्वे मृदूनि विमलानि च,
विपन्नास् ते ऽद्य वसुधां विवृताम् अधिशेरते। १६

तेषाम् आभरणान्येते गृध्र-शोमायु-वायसाः
आक्षिपन्त्य-शिवा घोरा विनदन्तः पुनः पुनः। १७

संशोधनी। ५०२ पृ. २४. टी. 'सहस्रेण' 'सहस्रेण सहस्रेण' भवेत्। १२। आक्रीड़मानैः—क्रीड़द्भिः। पा. १।३।२१। १३। पश्यमाना—पश्यन्ती। आआ.। दह्यामि—दह्ये। पआ.। १४। पञ्चानाम् भूतानाम्—पञ्च-भूतमयस्य दृश्यमानस्य कृत्स्नस्य जगतः। १५। असृगुक्षितान्—शोणित-सिक्तान्। वि-गृह्य—दृढं गृहीत्वा। सहस्रशः—सहस्रं सहस्रम्। १६। शयनानि—शय्याः। उचिताः—अभ्यस्ताः। विवृताम्—अनावृताम्। १७। आक्षिपन्ति

सु-रूप-वर्णा बहवः क्रव्यादैर् अवघट्टिताः
ऋषभ-प्रतिरूपाक्षाः शेरते च सहस्रशः । १८

अपरे पुनर् आलिङ्ग्य गदाः, परिघ-बाहवः,
शेरते ऽभि-मुखाः शूरा, दयिता इव योषितः ; १९

बिभ्रतः कवचान्यन्ये विमलान्यायुधानि च
न धर्षयन्ति क्रव्यादा जीवन्तीति, जनार्दन । २०

एते गोमायवो भीमा निहतानां महात्मनाम्
कण्ठान्तर-गतान् हारान् आक्षिपन्ति सहस्रशः । २१

सर्वेष्वपर-रात्रेषु यान् अवन्दन्त वन्दिनः,
तान् इमाः परिदेवन्ति दुःखार्ताः परमाङ्गनाः । २२

बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति विलपन्ति च ;
पाणिभिश् चापरा घ्नन्ति शिरांसि, मृदु-पाणयः । २३

शिरोभिः पतितैर् हस्तैः सर्वाङ्गैः खण्डशः कृतैः
इतरेतर-संपृक्तैर् आकीर्णा भाति मेदिनी । २४

वि-शिरस्कान् अथो कायान् दृष्ट्वा घोराभिनन्दिनः
मुह्यन्ति सु-चिरं नार्यो, वि-देहानि शिरांसि च । २५

शिरः कायेन सन्धाय प्रेक्षमाणा वि-चेतसः
अपश्यन्त्यो ऽपरं तत्र नेदम् अस्येति दुःखिताः २६

—आकर्षन्ति, अपहरन्ति । २२ । अपर-रात्रेषु—रात्रीणां शेषावयवेषु, रात्रि-शेषेषु । परिदेवन्ति—परिदेवयन्ते । २४ । संपृक्तैः—संबद्धैः । २५ । घोराभिनन्दिनः—भीषणस्य सहचरान् । २६ । संधाय—योजयित्वा ।

बाहूरु-चरणान् अन्यान् विशिखोन्मथितान् पृथक्
संदधत्यो ऽसुखाविष्टा मूर्छन्त्येताः पुनः पुनः । २७

उत्कृत्त-शिरसश् चान्यान् विजग्धान् मृग-पक्षिभिः
दृष्ट्वा काश्चिद् न जानन्ति भर्तॄन्, भरत-योषितः । २८

पाणिभिश् चापरा घ्नन्ति शिरांसि, मधु-सूदन,
प्रेक्ष्य भ्रातॄन् पितॄन् पुत्रान् पतींश् च निहतान् परैः । २९

बाहुभिश् च स-खड्गैर् हि शिरोभिश् च स-कुण्डलैः
अगम्य-कल्पा पृथिवी मांस-शोणित-कर्दमा । ३०

न दुःखेषूचिताः पूर्वं, दुःखं गाहन्त्य-निन्दिताः
भ्रातृभिः पतिभिः पुत्रैर् उपाकीर्णां वसुन्धराम् । ३१

यूथानीव किशोरीणां सु-केशीनां, जनार्दन,
स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः । ३२

इतो दुःखतरं किं नु, केशव, प्रतिभाति मे
यद् इमा कुर्वते सर्वा रवम् उच्चावचं स्त्रियः । ३३

नूनम् आचरितं पापं मया पूर्वेषु जन्मसु,
या पश्यामि हतान् पुत्रान् पौत्रान् भ्रातॄंश् च, केशव ।" ३४

एवम् आर्ता विलपती समाभाष्य जनार्दनम्,
गान्धारी पुत्र-शोकार्ता ददर्श निहतं सुतम् । ३५

---

२८ । विजग्धान् [वि-अद्+त, २। ब]—भक्षितान् ।

पञ्चमो ऽध्यायः

अभिज्ञानम्

दुर्योधनं हतं दृष्ट्वा गान्धारी शोक कर्शिता
सहसा न्यपतद् भूमौ छिन्नेव कदली वने। १

सा तु, लब्ध्वा पुनः संज्ञां, विक्रुश्य च विलप्य च,
दुर्योधनम्, अभिप्रेक्ष्य, शयानं रुधिरोक्षितम्, २

परिष्वज्याथ गान्धारी कृपणं पर्यदेवयत्,
सु-गूढ़-जत्रु विपूलं हार-निष्क-निषेवितम् ३

वारिणा नेत्रजेनोरः सिञ्चन्ती। शोक-तापिता
समीप-स्थं हृषीकेशम् इदं वचनम् अब्रवीत्,— ४

"उपस्थिते ऽस्मिन् संग्रामे, ज्ञातीनां संक्षये, विभो,
माम् अयं प्राह, वार्ष्णेय, प्राञ्जलिर्, नृप-सत्तमः,—
'अस्मिन् ज्ञाति-समुद्धर्षे जयम् अम्बा ब्रवीतु मे'। ५

इत्युक्ते, जानती सर्वम् अहं स्व-व्यसनागमम्,
अब्रुवम्,—'पुरुष-व्याघ्र, यतो धर्मस् ततो जयः। ६

यथा च युध्यमानस् त्वं न प्रमुह्यसि, पुत्रक,
ध्रुवं शस्त्र-जिताँल् लोकान् प्राप्स्यस्यमरवत्, प्रभो'। ७

३। जत्रु—स्कन्ध-सन्धिः। सु-गूढ़-जत्रु—सु-गूढं (क्षत्रोचित-व्यायामेन प्रवर्द्धिताभिः पेशिभिः सम्यक् संवृतं) जत्रु (स्कन्ध-सन्धिः, कण्ठ-पार्श्वस्थम् अस्थि-द्वयं) यस्मिन् तत् तादृशम्। ५। ज्ञाति-समुद्धर्षे—महति ज्ञाति-रणोत्सवे। ६। अब्रुवम्—अब्रवम्। गुणाभाव आर्षः।

इत्येवम् अब्रुवं पूर्वं । नैनं शोचामि वै, प्रभो ।
धृतराष्ट्रं तु शोचामि कृपणं हत-बान्धवम् । ८

यो ऽयं मूर्धाभिषिक्तानाम् अग्रे याति परन्तपः,
सो ऽयं पांशुषु शेते ऽद्य ! पश्य कालस्य पर्ययम् ! ९

ध्रुवं दुर्योधनो वीरो गतिं न सुलभां गतः ।
तथा ह्यभिमुखः शेते शयने वीर-सेविते । १०

यं पुरा पर्युपासीना रमयन्ति वर-स्त्रियः,
तं वीर-शयने सुप्तं रमयन्त्य-शिवाः शिवाः । ११

यं पुरा पर्युपासीना रमयन्ति मही-क्षितः,
मही-तल-स्थं निहतं गृध्रास् तं पर्युपासते । १२

यं पुरा व्यजनैर् अग्र्यैर् उपवीजन्ति योषितः,
तम् अद्य पक्ष-व्यजनैर् उपवीजन्ति पक्षिणः । १३

पश्य दुर्योधनं कृष्ण, शयानं रुधिरोक्षितम्
निहतं भीम-सेनेन, गदां संस्वज्य, भारतम् ! १४

अक्षौहिणीर् महा-बाहुर् दश चैकां च, केशव,
आनयद् यः पुरा संख्ये सो ऽनयाद् निधनं गतः ! १५

एष दुर्योधनः शेते महेष्वासो महा-बलः,
शार्दूल इव सिंहेन, भीमसेनेन पातितः । १६

निः-सपत्ना मही यस्य त्रयो-दश समाः स्थिता,
स शेते निहतो भूमौ पुत्रो मे पृथिवी-पतिः ! १७

---

१४ । संस्वज्य—परिष्वज्य, आलिङ्गय ।

अपश्यं, कृष्ण, पृथिवीं धार्तराष्ट्रानुशासिताम्,
पूर्णां हस्ति-गवाश्वैश् च। वार्ष्णेय, न तु तच् चिरम्। १८

ताम् एवाद्य, महा-बाहो, पश्याम्यन्यानुशासिताम्
हीनां हस्ति-गवाश्वेन। किं नु जीवामि, माधव? १९

इदं कष्टतरं पश्य पुत्रस्यापि वधाद् मम,
यद् इमाः पर्युपासते हतान् छूरान् रणे स्त्रियः। २०

प्रकीर्ण-केशीं सु-श्रोणीं दुर्योधन-शुभाङ्कगाम्
रुक्म-वेदी-निभां पश्य, कृष्ण, लक्ष्मण-मातरम्। २१

कथं नु शतधा नेदं हृदयं मम दीर्यते
पश्यन्त्या निहतं पुत्रं पुत्रेण सहितं रणे? २२

पुत्रं रुधिर-संसिक्तं उपजिघ्रत्य-निन्दिता।
दुर्योधनं तु वामोरूः पाणिना परिमार्जति। २३

किं नु शोचति भर्तारं पुत्रं चैषा मनस्विनी?
तथा ह्यवस्थिता भाति पुत्रं चाप्यभिवीक्ष्य सा। २४

स्व-शिरः पञ्च-शाखाभ्याम् अभिहत्यायतेक्षणा,
पतत्युरसि वीरस्य कुरु-राजस्य, माधव। २५

पुण्डरीक-निभा भाति पुण्डरीकान्तर-प्रभा,
मुखं विमृज्य पुत्रस्य भर्तुश् चैव, तपस्विनी। २६

२५। पञ्च-शाखाभ्याम्—पञ्चाङ्गुलिभ्यां [हस्ताभ्याम्]। २६। विमृज्य—मार्जयित्वा।

यदि सत्यागमाः सन्ति, यदि वै श्रुतयस् तथा,
ध्रुवं लोकान् अवाप्तो ऽयं नृपो बाहु-बलार्जितान्। २७

पश्य, माधव, पुत्रान् मे शत-सङ्ख्यान् जित-क्लमान
गदया भीमसेनेन भूयिष्ठं निहतान् रणे। २८

इदं दुःखतरं मे ऽद्य यद् इमा मुक्त-मूर्ध-जाः
हत-पुत्रा रणे बालाः परिधावन्ति मे स्नुषाः। २९

प्रासाद-तल-चारिण्यश् चरणैर् भूषणान्वितैः
कायेनाद्य स्पृशन्तीमां रुधिरार्द्रां वसुन्धराम्! ३०

कृच्छ्राद् उत्सारयन्ति स्म गृध्र-गोमायु-वायसान्,
दुःखेनार्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत। ३१

फुल्ल-पद्म-प्रकाशानि, पुण्डरीकाक्ष, योषिताम्
अनवद्यानि वक्त्राणि तापयत्येष रश्मिवान्। ३२

एष, माधव, पुत्रो मे विकर्णः प्राज्ञ-सम्मतः
भूमौ विनिहतः शेते भीमेन शतधा कृतः। ३३

गज-मध्ये हतः शेते विकर्णो, मधु-सूदन,
नील-मेघ-परिक्षिप्तः शरदीव निशा-करः। ३४

अस्य चाप-ग्रहेणैव पाणिः कृत-किणो महान्
कथञ्चिच् छिद्यते गृध्रैर् अत्तु-कामैस् तलत्रवान्। ३५

अस्य भार्यामिष-प्रेप्सून् गृध्र-काकांस्, तपस्विनी,
वारयत्यनिशं बाला, न च शक्नोति, माधव। ३६

कर्णि-नालीक-नाराचैर् भिन्न-मर्माणम् आहवे
अद्यापि न जहात्येनं लक्ष्मीर् भरत-सत्तमम्। ३७

योो विभेद चमूम् एको मम पुत्रस्य दुर्भिदाम्,
स, भूत्वा मृत्युर् अन्येषां, स्वयं मृत्यु-वशं गतः। ३८

तस्योपलक्षये, कृष्ण, कार्ष्णेर् अमित-तेजसः
अभिमन्योर् हतस्यापि प्रभा नैवोपशाम्यति। ३९

एषा विराट-दुहिता स्नुषा गाण्डीव-धन्वनः
हतं बाला पतिं वीरं दृष्ट्वा शोचत्यनिन्दिता। ४०

तस्य क्षत-ज-संदिग्धं जात-रूप-परिष्कृतम्
विमुच्य कवचं, कृष्ण, शरीरम् अभिवीक्षते। ४१

अवेक्षमाणा तं बाला, कृष्ण, त्वाम् अभिभाषते,—
'अयं ते, पुण्डरीकाक्ष, सदृशाक्षो निपातितः'। ४२

तस्य शोणित-दिग्धान् वै केशान् उन्नम्य पाणिना,
उत्सङ्गे वक्त्रम् आधाय, जीवन्तम् इव पृच्छति,— ४३

'प्राप्य पुण्य-कृताल्ँ लोकान्, अप्सरोभिः समेयिवान्,
सौभद्र, विहरन् काले स्मरेथाः सु-कृतानि मे ?' ४४

इत्युक्त-वचनाम् एनाम् अपकर्षन्ति दुःखिताम्
उत्तरां मोघ-सङ्कल्पां मत्स्य-राज-कुल-स्त्रियः। ४५

३७। कर्णी—पक्षवद्-बाणः। नालीकः—नलात्मकत्वेन शब्दायमानो वेधक-शस्त्र-भेदः।

उत्तराम् अपकृष्यैनाम् आर्ताम् आर्ततराः स्वयम्,
विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च। ४६

वितुद्यमानं विहगैर् विराटम्। असितेक्षणाः
न शक्नुवन्ति विहगान् निवारयितुम्, आतुराः। ४७

पश्य वैकर्तनं कर्णं, निहत्यारि-रथान् बहून्
शोणितौघ-परीताङ्गं शयानं पतितं भुवि, ४८

यं स्म पाण्डव-संत्रासाद् मम पुत्रा महा-रथाः
अयुध्यन्त पुरस्कृत्य, मातङ्गा इव यूथपम्। ४९

स भूत्वा शरणं पूर्वं धार्तराष्ट्रस्य, माधव,
भूमौ विनिहतः शेते वात-भग्न इव द्रुमः। ५०

पश्य कर्णस्य पत्नीं त्वं, वृषसेनस्य मातरम्,
लालप्यमानां करुणं रुदितां पतितां भुवि। ५१

सा वर्तमाना पतिता पृथिव्याम्।
उत्थाय दीना पुनर् एव चैषा
कर्णस्य वक्त्रं परिजिघ्रमाणा
रोरूयते पुत्र-वधाभितप्ता। ५२

सिन्धु-सौवीर-भर्तारं दर्प-पूर्णं मनस्विनम्
भक्षयन्ति शिवा गृध्रा, जनार्दन, जयद्रथम्; ५३

संरक्ष्यमाणं भार्याभिर् अनुरक्ताभिर्, अच्युत,
भीषयन्त्यो विकर्षन्ति गहनं निम्नम् अन्तिकात्। ५४

५३। गृध्राः—लोलुपाः। ५४। गहनम् निम्नम्—उद्भित्-समावृतं गह्वरम्।

हा हा धिग्, दुःशलां पश्य, वीत-शोक-भयाम् इव,
भर्तुः शिर अपश्यन्तीं धावमानाम् इतस् ततः ! ५५

अहो धिक्, पश्य शल्यस्य पूर्ण-चन्द्र-सुदर्शनम्
मुखं पद्म-पलाशाक्षं काकैर् आदष्टम्, अ-व्रणम् ! ५६

एषा चामीकराभस्य तप्त-काञ्चन-स-प्रभा
आस्याद् विनिःसृता जिह्वा भक्ष्यते, कृष्ण, पक्षिभिः ! ५७

शल्यं निपतितं नार्यः परिवार्याभितः स्थिताः,
वासिता-गृष्टयः पङ्के परिमग्नम् इव द्विपम् । ५८

पश्य शान्तनवं, कृष्ण, शयानं सूर्य-वर्चसम्,
युगान्त इव कालेन पातितं सूर्यम् अम्बरात् । ५९

एष तप्त्वा रणे शत्रून् शस्त्र-तापेन वीर्यवान्,
नर-सूर्यो ऽस्तम् अभ्येति, सूर्यो ऽस्तम् इव, केशव । ६०

कर्णि-नालीक-नाराचैर् आस्तीर्य, शयनोत्तमम्
आविश्य शेते भगवान्, स्कन्दः शर-वणं यथा । ६१

प्रनष्टः कुरु-वंशश् च पुनर् येन समुद्धृतः,
तं पश्य पतितं द्रोणं कुरूणां गुरुम् उत्तमम् । ६२

गोमायवो विकर्षन्ति पादौ शिष्य-शतार्चितौ ।
कृपी कृपणम् अन्वास्ते दुःखोपहत-चेतना । ६३

द्रोणेन द्रुपदं सङ्ख्ये पश्य, माधव, पातितम्
महा-द्विपम् इवारण्ये सिंहेन महता हतम् । ६४

---

५७ । चामीकरम्— स्वर्णम् । ५८ । वासिता-गृष्टयः—तरुण-हस्तिन्यः ।

पाञ्चाल-राज्ञो विमलं, पुण्डरीकाक्ष, पाण्डरम्
आतपत्रं समाभाति, शरदीव निशाकरः । ६५

ये हन्युः शस्त्र-वेगेन देवान् अपि नरर्षभाः,
त इमे निहताः सङ्ख्ये । पश्य कालस्य पर्ययम् ! ६६

तदैव निहताः, कृष्ण, मम पुत्रास् तरस्विनः
यदैवाकृत-कामस् त्वम् उपप्लव्यं गतः पुनः ।" ६७

इत्युक्त्वा न्यपतद् भूमौ गान्धारी शोक-मूर्छिता
दुःखोपहत-विज्ञाना धैर्यम् उत्सृज्य, भारत । ६८

षष्ठो ऽध्यायः

प्रेत-कृत्यम्

शासनाद् धर्म-राजस्य क्षत्ता सूतश् च सञ्जयः
सुधर्मा धौम्य-सहित इन्द्रसेनादयस् तथा १

चन्दनागुरु-काष्ठानि तथा कालीयकान्युत
घृतं तैलं च गन्धांश् च क्षौमाणि वसनानि च २

समाहृत्य महार्हाणि दारूणां चैव सञ्चयान्
रथांश् च मृदितांस् तत्र नाना-प्रहरणानि च, ३

चिताः कृत्वा प्रयत्नेन, यथा-मुख्यान् नराधिपान्
दाहयामासुर्, अव्यग्रा, विधि-दृष्टेन कर्मणा । ४

---

१ । सु-धर्मा—दुर्योधनस्य पुरोहितः । २ । कालीयकानि—कालेयानि, कृष्ण-चन्दनानि ।

दुर्योधनं च राजानं भ्रातॄंश् चास्य महारथान्,
शल्यं शलं च राजानं भूरि-श्रवसम् एव च, ५

जयद्रथं च राजानम् अभिमन्युं च, भारत,
दौःशासनिं लक्ष्मणं च धृष्टकेतुं च पार्थिवम्, ६

बृहद्-बलं सोमदत्तं सृञ्जयांश् च शताधिकान्,
राजानं क्षेम-धन्वानं विराट-द्रुपदौ तथा, ७

शिखण्डिनं च पाञ्चाल्यं धृष्टद्युम्नं च पार्षतम्,
युधामन्युं च विक्रान्तम् उत्तमौजसम् एव च, ८

कौसल्यं द्रौपदेयांश् च शकुनिं चापि सौबलम्,
अचलं वृषकं चैव भगदत्तं च पार्थिवम्, ९

कर्णं वैकर्तनं चैव सह-पुत्रम् अमर्षणम्,
केकयांश् च महेष्वासांस् त्रिगर्तांश् च महा-रथान्, १०

घटोत्कचं राक्षसेन्द्रं बक-भ्रातरम् एव च
अलम्बुषं राक्षसेन्द्रं जलसन्धं च पार्थिवम्, ११

एतांश् चान्यांश् च सु-बहून् पार्थिवांश् च सहस्रशः
घृत-धाराहुतैर् दीप्तैः पावकैः समदाहयत्। १२

पितृ-मेधाश् च केषांचित् प्रावर्तन्त महात्मनाम्,
सामभिश् चाप्यगायन्त ते ऽन्वशोचन्त चापरैः। १३

साम्नाम् ऋचां च नादेन स्त्रीणां च रुदित-स्वनैः
कश्मलं सर्व-भूतानां निशायां समजायत। १४

१४। कश्मलम्—अवसादः।

ते विधूमाः प्रदीप्ताश् च दीप्यमानाश् च पावकाः
नभसीवान्वदृश्यन्त ग्रहास् तन्वभ्र-संवृताः। १५
ये चाप्य-नाथास् तत्रासन् नाना-देश-समागताः,
तांश् च सर्वान् समानाय्य राशीन् कृत्वा सहस्रशः, १६
चित्वा दारुभिर्, अव्यग्रैः, प्रभूतैः स्नेह-पाचितैः
दाहयामास विदुरो धर्म-राजस्य शासनात्। १७
कारयित्या क्रियास् तेषां, कुरुराजो युधिष्ठिरः,
धृत-राष्ट्रं पुरस्कृत्य गङ्गाम् अभिमुखो ऽगमत्। १८
ते, समासाद्य गङ्गां तु शिवां पुण्य-जलान्विताम्
ह्रादिनीं वप्र-सम्पन्नां महानूपां महा-वनाम्, १९
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च
कवचानि विचित्राणि, गङ्गाम् अवजगाहिरे। २०
ततः पितॄणां पौत्राणां भ्रातॄणां स्व-जनस्य च
पुत्राणाम् आर्यकाणां च पतीनां च कुरु-स्त्रियः २१
उदकं चक्रिरे सर्वा, रुदत्यो, भृश-दुःखिताः।
सुहृदां चापि धर्मज्ञाः प्रचक्रुः सलिल-क्रियाम्। २२

१७। चित्वा—स्तूपयित्वा। दारुभिः—काष्ठैः [सह]। अव्यग्रैः—स्थिर-चित्तैः [कर्म-कारिभिः]। स्नेह-पाचितैः—तैल-घृतादि-स्नेह-संसिक्तैः। पाचितै—पक्वीकृतैः। १९। ह्रादिनीम्—शब्दायमानाम्, नादिनीम्। २०। वेष्टनानि—उष्णीष-कटि-बन्धादीनि। २१। आर्यकाणाम्—पितामह-मातामहादि-पूज्य-व्यक्तीनाम्।

उदके क्रियमाणे तु वीराणां वीर-पत्निभिः,
सूप-तीर्थाभवद् गङ्गा, भूयो वै प्रससार च। २३

तद् महोदधि-सङ्काशं निरानन्दम् अनुत्सवम्
वीर-पत्नीभिर् आकीर्णं गङ्गा-तीरम् अशोभत। २४

ततः कुन्ती, महा-राज, सहसा शोक-कर्शिता
रुदती मन्दया वाचा पुत्रान् वचनम् अब्रवीत्,— २५

"यः स शूरो महेष्वासो रथ-यूथ-प-यूथ-पः
अर्जुनेन हतः सङ्ख्ये वीर-लक्षण-लक्षितः, २६

यं सूत-पुत्रं मन्यध्वं राधेयम् इति, पाण्डवाः,
यो व्यराजच् चमू-मध्ये दिवा-कर इव, प्रभुः, २७

प्रत्ययुध्यत वः सर्वान् पुरा यः स-पदानुगान्,
दुर्योधन-बलं सर्वं यः प्रकर्षन् व्यरोचत, २८

यस्य नास्ति समो वीर्ये पृथिव्याम् अपि कश्चन,
यो ऽवृणीत यशः शूरः प्राणैर् अपि सदा भुवि, २९

सत्य-सन्धस्य शूरस्य संग्रामेष्व-पलायिनः
कुरुध्वम् उदकं तस्य भ्रातुर् अक्लिष्ट-कर्मणः।
स हि वः पूर्व-जो भ्राता भास्कराद् मय्यजायत।" ३०

श्रुत्वा तु पाण्डवाः सर्वे मातुर् वचनम् अ-प्रियम्,
कर्णम् एवान्वशोचन्त, भूयश् चार्ततराभवन्। ३१

२३। वीर-पत्निभिः—वीर-पत्नीभिः। ह्रस्वत्वम् आर्षम्, छन्दोऽनुरोधात्। सूपतीर्था—शोभन-जलावतरण-मार्गा। २७। राधेयम् इति—राधेय इति। आप्र.। मन्यध्वम्—अमन्यध्वम्। अडभाव आर्षः।

ततः स पुरुष-व्याघ्रः कुन्ती-पुत्रो युधिष्ठिरः
उवाच मातरं वीरो, निश्वसन्न इव पन्नगः,— ३२

"यस्य बाहु-प्रतापेन तापिताः सर्वतो वयम्,
तम् अग्निम् इव वस्त्रेण, कथं छादितवत्यसि ? ३३

यस्य बाहु-प्रभावेण वैरम् अस्मास्वरोचयत्
सुयोधनस् तु, तं ज्येष्ठं कथं छादितवत्यसि ? ३४

भूमिपानां च सर्वेषां बलं, बलवतां वरः,
नान्यः कुन्ती-सुतात् कर्णाद् अगूहाद्, रथिनो, रथी। ३५

स नः प्रथम-जो भ्राता सर्व-शस्त्र-भृतां वरः !
असूत तं भवत्यग्रे कथम् अद्भुत-विक्रमम् ? ३६

अहो भवत्या मन्त्रस्य गूहनेन वयं हताः !
निधनेन हि कर्णस्य पीडिताः स्म स-बान्धवाः ! ३७

अभिमन्योर् विनाशेन द्रौपदेय-वधेन च
पाञ्चालानां विनाशेन कुरूणां पातनाद् अपि— ३८

ततः शत-गुणं दुःखम् इदम् आपतितं महत् !
कर्णम् एवानुशोचामि दह्याम्यग्नाव् इवाहितः। ३९

नेह स्म किञ्चिद् अप्राप्यं भवेद् अपि दिवि स्थितम्,
न च स्म वैशसं घोरं कौरवान्तकरं भवेत् !" ४०

एवं विलप्य बहुलं, धर्म-राजो युधिष्ठिरः
व्यरुदच् छनकै, राजंश्, चकारास्योदकं प्रभुः। ४१

४०। भवेत्—अभविष्यत् [यदि कर्णो भ्रातेति अज्ञास्यत]।

ततो विनेदुः सहसा स्त्रियस् ताः खलु सर्वशः,
अभितो याः स्थितास् तत्र, तस्मिन्न् उदक-कर्मणि। ४२

तत आनाययामास कर्णस्य स-परिच्छदाः
स्त्रियः कुरु-पतिर् धीमान् भ्रातुः प्रेम्णा युधिष्ठिरः। ४३

स ताभिः सह धर्मात्मा प्रेत-कृत्यम् अनन्तरम्
कृत्वोत्ततार गङ्गायाः सलिलाद्, आकुलेन्द्रियः। ४४

तत्र ते सु-महात्मानो न्यवसन् पाण्डु-नन्दनाः,
शौचं निर्वर्तयिष्यन्तो, मास-मात्रं, बहिः पुरात्। ४५

इत्यार्षे श्रीभारते वैयासिके

दश-साहस्र्यां संहितायां स्त्री-पर्व।

४५। तत्र—गङ्गा-तीरे। निर्वर्तयिष्यन्तः—सम्पादयिष्यन्तः, निष्पादयिष्यन्तः।

मासमात्रम्—अत्र मनुः (मसं. ५।८३),

'शुध्येद् विप्रो दशाहेन द्वादशाहेन भूमि-पः,
वैश्यः पञ्च-दशाहेन शूद्रो मासेन शुध्यति'।

किं च (मसं. ५।९८),

'उद्यतैर् आहवे शस्त्रैः क्षत्र-धर्म-हतस्य च,
सद्यः संतिष्ठते यज्ञस् तथा शौचम् इति स्थितिः'।

विरोधः स्पष्ट एव। अनेन मन्वादि-धर्म-शास्त्र-प्रचारात् प्रागेव भारतम् अजायतेति वक्तव्यम्।

इति तारकालोके नाम भारत-वृत्तौ स्त्री-पर्व।

अथ

श्रीभारते

शान्ति-पर्व

प्रथमो ऽध्यायः

पुर-प्रवेशः

वैशम्पायन उवाच,—

ततो वैतालिकैः सूतैर् मागधैश् च सु-भाषितैः
स्तूयमानो, ययौ राजा नगरं नागसाह्वयम्। १

अभियाने च पार्थस्य नरैर् नगर-वासिभिः
नगरं राज-मार्गाश् च यथावत् समलङ्कृताः। २

कुम्भाश् च नगर-द्वारि वारि-पूर्णा नवा दृढाः,
कन्याः सु-मनसो गौराः स्थापितास् तत्र तत्र ह। ३

तथा स्वलं-कृत-द्वारं नगरं पाण्डु-नन्दनः,
स्तूयमानः शुभैर् वाक्यैः, प्रविवेश, सुहृद्-वृतः। ४

३। सु-मनसः—सु-मतयः।

प्रवेशने तु पार्थानां जनानां पुर-वासिनाम्
दिदृक्षूणां सहस्राणि समाजग्मुः, सहस्रशः । ५
गृहाणि राज-मार्गेषु रत्नवन्ति महान्ति च
प्राकम्पन्तेव भारेण, स्त्रीणां पूर्णानि, भारत । ६
"धन्या त्वम् असि, पाञ्चालि, या त्वं पुरुष-सत्तमान्
उपतिष्ठसि, कल्याणि, महर्षीन् इव गौतमी ; ७
तव कर्माण्यमोघानि व्रत-चर्या च, भामिनि"
इति कृष्णां, महा-राज, प्रशशंसुस् तदा स्त्रियः । ८
तम् अतीत्य यथा-युक्तं राज-मार्गं, युधिष्ठिरः,
अलङ्कृतं, शोभमानम्, उपायाद् राज-वेश्म ह । ९
ततः प्रकृतयः सर्वाः, पौरा जानपदास्, तदा
ऊचुः कर्ण-सुखा वाचः, समुपेत्य, ततस् ततः,— १०
"दिष्ट्या राज्यं पुनः प्राप्तं धर्मेण च बलेन च ।
भव नस् त्वं, महा-राज, राजेह शरदां शतम् !" ११
ततः पुण्याह-घोषो ऽभूद्, दिवं स्तब्ध्वेव, भारत,
सुहृदां प्रीति-जननः पुण्यः श्रुति-सुखावहः । १२
हंसवद् नेदुषां, राजा द्विजानां तत्र भारतीम्
शुश्रुवे, वेद-विदुषां, पुष्कलार्थ-पदाक्षराम् । १३

---

६ । स्त्रीणाम्—स्त्रीभिः । षष्ठी आर्षी । पा २।३।६९ ७ । *Cf.* उपरिष्टात् १।३५।३० १२ । स्तब्ध्वा [स्तन्भ्+त्वा]—जडीकृत्य, वशीकृत्य, व्याप्य इत्यर्थः । १३ । नेदुषाम् [नद्+वस्, ६।ब]—नादं (ध्वनिं) कृतवताम् ।

ततो दुन्दुभि-निर्घोषः शङ्खानां च, मनो-रमः,
जयं प्रवदतां तत्र स्वनः प्रादुरभूद्, नृप। १४
निःशब्दे च स्थिते तत्र ततो विप्र-जने पुनः
राजानं ब्राह्मण-छद्मा चार्वाको राक्षसो ऽब्रवीत्,— १५
"धिग् भवन्तं कु-नृपतिं ज्ञाति-घातिनम् अस्तु वै!
घातयित्वा गुरूंश् चैव मृतं श्रेयो, न जीवितम्।" १६
इति ते वै द्विजाः श्रुत्वा तस्य दुष्टस्य रक्षसः,
व्रीड़िताः परमोद्विग्नास् तूष्णीम् आसन्, विशां पते। १७

युधिष्ठिर उवाच,—

प्रसीदन्तु भवन्तो मे प्रणतस्याभियाचतः!
प्रत्यासन्न-व्यसनिनं न मां धिक्-कर्तुम् अर्हथ। १८

वैशम्पायन उवाच,—

ततो, राजन्, ब्राह्मणास् ते सर्व एव, विशां पते,
ऊचुर्,—"नैतद् वचो ऽस्माकं। श्रीर् अस्तु तव, पार्थिव"! १९
ततः प्रकृतयः सर्वाः, पुरस्कृत्य पुरोहितम्,
ददृशुर् धर्म-राजानम्, आदाय बहु मङ्गलम्। २०

१५। चार्वाकः—चार्वाको नाम राक्षसो वदर्यां तपस् तप्त्वा ब्रह्मणो वरेण प्राणि-भयाद् मुमुचे, ब्राह्मणान् अवमन्यमानस् तु तद्-रोषेण पञ्चत्वम् अवाप। आसीत् स दुर्योधनस्य परमः सखा। १८। प्रत्यासन्न-व्यसनिनम्—प्रत्यासन्नाः (समीप-स्थाः) व्यसनिनः (विपद्-ग्रस्ताः, चिर-दुःखिनः [भ्रात्रादयो]) यस्य तादृशम्। मम भ्रात्रादेः सन्तोषाय जय-शब्दो वक्तव्यो न तु ममैव तृप्तये इति भावः।

दाशार्हेणाभ्यनुज्ञातस् तत्र धौम्यः पुरोहितः
व्याघ्र-चर्मोत्तरे शुक्ले सर्वतो-भद्र आसने २१

उपवेश्य महात्मानं कृष्णां च द्रुपदात्मजाम्,
जुहाव पावकं धीमान् विधि-मन्त्र-पुरस्कृतम्। २२

तत उत्थाय दाशार्हः, शङ्खम् आदाय पूरितम्,
अभ्यषिञ्चत् पतिं पृथ्व्याः कुन्ती-पुत्रं युधिष्ठिरम्, २३

धृतराष्ट्रश् च राजर्षिः सर्वाः प्रकृतयस् तथा।
ततोऽनुवादयामासुः पणवानक-दुन्दुभीन्। २४

ततो निष्क-सहस्रेण ब्राह्मणान् स्वस्त्यवाचयन्।
ते प्रीता ब्राह्मणा, राजन्, स्वस्त्यूचुर् जयम् एव च। २५

यान् यान् अमन्यद् योग्यांश् च येषु येष्विह कर्मसु,
तांस् तांस् तेष्वेव युयुजे प्रीयमाणो मही-पतिः। २६

विदुरं सञ्जयं चैव युयुत्सुं च महा-मतिम्
अब्रवीत् पर-वीर-घ्नो धर्मात्मा धर्म-वत्सलः,— २७

"उत्थायोत्थाय, तत्, कार्यम् अस्य राज्ञः पितुर् मम,
सर्वं भवद्भिः कर्तव्यम्, अ-प्रमत्तैर्, यथा मम। २८

पौर-जानपदानां च यानि कार्याणि नित्यशः,
राजानं समनुज्ञाप्य तानि कार्याणि धर्मतः।" २९

ततो युधिष्ठिरो राजा ज्ञातीनां ये हता युधि
श्राद्धानि कारयामास तेषां पृथग्, उदार-धीः। ३०

२३। शङ्खम्—पाञ्चजन्यम्।

ब्राह्मणानां सहस्राणि पृथग्, एकैकम् उद्दिशन्,
धनै रत्नैश् च गोभिश् च वस्त्रैश् च समतर्पयत्। ३१

ये चान्ये पृथिवी-पाला येषां नास्ति सुहृज्-जनः
उद्दिश्योद्दिश्य तेषां च चक्रे राजौर्ध्वदेहिकम्। ३२

सभाः प्रपाश् च विविधास् तडागानि च पाण्डवः
सुहृदां कारयामास, सर्वेषाम् और्ध्वदेहिकम्। ३३

धृतराष्ट्रं यथा-पूर्वं गान्धारीं विदुरं तथा
सर्वांश् च कौरवान् मान्यान् भृत्यांश् च समपूजयत्। ३४

याश् च तत्र स्त्रियः काश्चिद् हत-वीरा हतात्मजाः,
सर्वास् ताः कौरवो राजा सम्पूज्यापालयद्, घृणी। ३५

दीनान्ध-कृपणानां च गृहाच्छादन-भोजनैः
आनृशंस्य-परो राजा चकारानुग्रहं प्रभुः। ३६

ततो युधिष्ठिरो राजा, भीमं भीम-पराक्रमम्
सान्त्वयन्न्, अब्रवीच् श्रीमान्, अर्जुनं यम-जौ तथा,— ३७

"अरण्ये दुःख-वसतिर् मत्-कृते, भरतर्षभाः,
भवद्भिर् अनुभूता हि यथा का-पुरुषैस् तथा। ३८

३३। सभाः—धर्म-शालाः। प्रपाः—पानीय-शालाः। ३४। यथा-पूर्वम्—आनुपूर्व्येण। ३५। हत-वीराः—हत-रक्षकाः। ३८। का-पुरुषैः—कु-पुरुषैः, निरुद्यमैर् जुगुप्सार्हैर् भीरु-जनैः।

शत्रुभिर् विविधैः शस्त्रैः क्षत-देहा महा-रणे
श्रान्ता भवन्तः सु-भृशं तापिताः शोक-मन्युभिः।
यथा-सुखं यथा-जोषं जयो ऽयम् अनुभूयताम्!" ३९

ततो दुर्योधन-गृहं प्रासादैर् उपशोभितम्
बहु-रत्न-समाकीर्णं दासी-दास-समाकुलम् ४०

धृतराष्ट्राभ्यनुज्ञातं भ्रात्रा दत्तं वृकोदरः
प्रतिपेदे, महा-बाहुर्, मन्दिरं मघवान् इव। ४१

यथा दुर्योधन-गृहं तथा दुःशासनस्य तु
प्रासाद-माला-संयुक्तं हेम-तोरण भूषितम् ४२

दासी-दास-सुसम्पूर्णं प्रभूत-धन-धान्यवत्
प्रतिपेदे महा-बाहुर् अर्जुनो राज-शासनात्। ४३

दुर्मर्षणस्य भवनं दुःशासन-गृहाद् वरम्
कुबेर-भवन-प्रख्यं मणि-हेम-विभूषितम् ४४

नकुलाय वरार्हाय, कर्शिताय महारणे,
ददौ प्रीतो, महा-राज, कुन्ती-पुत्रो युधिष्ठिरः। ४५

दुर्मुखस्य च वेश्माग्र्यं श्रीमत्, कनक-भूषणम्,
पूर्णं पद्म-दलाक्षीणां स्त्रीणां, शयन-सङ्कुलम्, ४६

प्रददौ सहदेवाय, सततं प्रिय-कारिणे।
मुमुदे तच् च लब्ध्वा स, कैलासं धन-दो यथा। ४७

४६। स्त्रीणाम्—स्त्रीभिः। शयनानि—शय्याः।

द्वितीयो ऽध्यायः

धर्म-जिज्ञासा

ततो युधिष्ठिरो राजा यमौ भीमार्जुनाव् अपि,
भूतानीव समस्तानि, ययुः कृष्ण-निवेशनम्। १

शैनेय-सहितो धीमान् रथम् एवान्वपद्यत।
मेघ-घोषै रथ-वरैः प्रययुस् ते नरर्षभाः। २

ततो ययुर् यत्र भीष्मः शर-तल्प-गतः प्रभुः
आस्ते महर्षिभिः सार्धं, ब्रह्मा देव-गणैर् यथा। ३

ततो ऽवतीर्य गोविन्दो रथात् स च युधिष्ठिरः
भीमो गाण्डीव-धन्वा च यमौ सात्यकिर् एव च
ऋषीन् अभ्यर्चयामासुः करान् उद्यम्य दक्षिणान्। ४

स तैः परिवृतो राजा, नक्षत्रैर् इव चन्द्रमाः,
अभ्याजगाम गाङ्गेयं, ब्रह्माणम् इव वासवः। ५

शर-तल्पे शयानं तम् आदित्यं पतितं यथा,
स ददर्श महा-बाहुं, भयाच् चागत-साध्वसः। ६

आजग्मुर् ऋषयः सिद्धा नारद-प्रमुखा, नृप,
हत-शिष्टाश् च राजानो युधिष्ठिर-पुरो-गमाः। ७

मुहूर्तम् इव च ध्यात्वा, नारदो देव-दर्शनः
उवाच पाण्डवान् सर्वान् हत-शिष्टांश् च पार्थिवान्,— ८

६। आगत-साध्वसः—सम्भ्रमान्वितः।

"एष वृद्धः परालँ लोकान् सं-प्राप्नोति, तनु त्यजन् ।
तं शीघ्रम् अनुयुञ्जीध्वं संशयान् मनसि स्थितान् ।" ९

एवम् उक्ता नारदेन, भीष्मम् ईयुर् नराधिपाः ;
प्रष्टुं चाशक्नुवन्तस् ते वीक्षाञ्चक्रुः परस्परम् । १०

अथोवाच हृषीकेशं पाण्डु-पुत्रो युधिष्ठिरः,—
"नान्यस् त्वद्, देवकी-पुत्र, शक्तः प्रष्टुं पितामहम् ।" ११

अभिगम्य दुराधर्षं प्रव्याहारयद् अच्युतः,—
"कच्चित् सुखेन रजनी व्युष्टा ते, राज-सत्तम !
विस्पष्ट-लक्षणा बुद्धिः कच्चिच् चोपस्थिता तव ! १२

कच्चिज् ज्ञानानि सर्वाणि प्रतिभान्ति च ते ऽनघ,
न ग्लायते च हृदयं न च ते व्याकुलं मनः !" १३

भीष्म उवाच,—

दाहो मोहः श्रमश् चैव क्लमो ग्लानिस् तथा रुजा
तव प्रसादाद्, वार्ष्णेय, सद्यो व्यपगतानि मे । १४

यच् च भूतं भविष्यं च भवच् च, परम द्युते,
तत् सर्वम् अनुपश्यामि, पाणौ फलम् इवार्पितम् । १५

---

९ । अनुयुञ्जीध्वम् [अनु-युज् (रुउ.)+ध्वम्]—अनुयुङ्ध्वम्, पृच्छत । आप्र. । १० । ईयुः [इ+उस्]—जग्मुः । ११ । त्वत्—त्वत्तः । १२ । प्रव्याहारयत्—प्रोवाच । स्वार्थे णिच् । १४ । व्यपगतानि—व्यपगताः । क्लीवत्वम् आर्षम् ।

वासुदेव उवाच,—

राजानो हत-शिष्टास् त्वां, राजन्, अभित आसते,
धर्मान् अनुयुयुक्षन्तस्। तेभ्यः प्रब्रूहि, भारत। १६

भवान् हि वयसा वृद्धः श्रुताचार-समन्वितः,
कुशलो राज-धर्माणां सर्वेषाम् अपराश् च ये। १७

जन्म-प्रभृति ते कश्चिद् वृजिनं न ददर्श ह।
ज्ञातारं सर्व-धर्माणां त्वां विदुः सर्व-पार्थिवाः। १८

तेभ्यः, पितेव पुत्रेभ्यो, राजन्, ब्रूहि परं नयम्।
ऋषयश् चैव देवाश् च त्वया नित्यम् उपासिताः। १९

तस्माद् वक्तव्यम् एवेदं त्वयावश्यम् अ-शेषतः
धर्मं शुश्रूषमाणेभ्यः, पृष्टेन च सता पुनः। २०

वक्तव्यं विदुषा चेति धर्मम् आहुर् मनीषिणः।
अप्रतिब्रुवतः कष्टो दोषो हि भविता, प्रभो। २१

वैशम्पायन उवाच,—

अथाब्रवीद्, महा-राज, वाक्यं कौरव-नन्दनः,—
"हन्त, धर्मान प्रवक्ष्यामि। दृढे वाङ्-मनसी मम।
युधिष्ठिरस् तु धर्मात्मा मां धर्मान् अनुपृच्छतु।" २२

१६। अनुयुयुक्षन्तः [अनु-युज्-स+अत्, १।ब.]—अनुयोक्तुं (प्रष्टुम्) इच्छन्तः। १८। वृजिनम्—पापम्। २०। शुश्रूषमाणेभ्यः। [श्रु-स+आन, ४।ब.]—श्रोतुम् इच्छुकेभ्यः। २१। कष्टः—दुःख-करः, पीड़ा-दायकः। २२। हन्त—अहो। वाङ्-मनसी—वाङ्-मनसे। वैप्र.।

एवम् उक्तस् तु भीष्मेण, धर्म-पुत्रो युधिष्ठिरः,
विनीतवद् उपागम्य, तस्थौ सन्दर्शने ऽग्रतः। २३

अथास्य पादौ जग्राह। भीष्मश् चापि ननन्द तम्।
मूर्ध्नि चैनम् उपाघ्राय निषीदेत्यब्रवीत् तदा। २४

तम् उवाचाथ गाङ्गेयो वृषभः सर्व-धन्विनाम्,—
"मां पृच्छ, तात, विश्रब्धं। मा भैस् त्वं, कुरु-सत्तम!" २५

(१) राज-धर्म-प्रकरणम्

तृतीयो ऽध्यायः

राज-धर्मः

प्रणिपत्य हृषीकेशम्, अभिवाद्य पितामहम्,
अनुमान्य गुरून् सर्वान्, पर्यपृच्छद् युधिष्ठिरः,— १

"'राज्ञां वै परमो धर्म' इति धर्म-विदो विदुः।
महान्तम् एतं भारं च मन्ये। तद् ब्रूहि, पार्थिव।" २

भीष्म उवाच—

आदाव् एव, कुरु-श्रेष्ठ, राज्ञा रञ्जनम् इच्छता
देवतानां द्विजानां च वर्तितव्यं यथा-विधि। ३

२४। तम्—दृष्ट्वा इति शेषः। २५। विश्रब्धम्—निःशङ्कम्।
२। परमः—[धर्मेषु] श्रेष्ठः। महान्तम्—दुर्वहम्। एतं भारम्—राज्य-भारम्। ३। देवतानाम्—देवतासु।

उत्थानेन सदा, पुत्र, प्रयतेथा, युधिष्ठिर।
न ह्य् उत्थानम् ऋते दैवं राज्ञाम् अर्थं प्रसाधयेत्। ४

विपन्ने च समारम्भे सन्तापं मा स्म वै कृथाः।
घटेतैवं सदात्मानं। राज्ञाम् एष परो नयः। ५

न हि सत्याद् ऋते किञ्चिद् राज्ञां वै सिद्धि-कारकम्।
ऋषीणाम् अपि, राजेन्द्र, सत्यम् एव परं धनम्। ६

गुणवाञ् शीलवान् दान्तो मृदु-दण्डो जितेन्द्रियः
सु-दर्शः स्थूल-लक्ष्यश् च न भ्रश्येत सदा श्रियः। ७

आर्जवं सर्व-कार्येषु श्रयेथाः कुरु-नन्दन,
पुनर् नय-विचारेण त्रयी-सं-वरणेन च। ८

मृदुर् हि राजा सततं लङ्घ्यो भवति सर्वशः।
तीक्ष्णाच् चोद्विजते लोकस्। तस्माद् उभयम् आचरेत्। ९

४। उत्थानेन—उद्योगेन, पुरुषकारेण। प्रयतेथाः—अभीष्ट-सिद्धये यतस्व। ५। घटेत—व्यापारयेत। नयः—नीतिः, अभ्युदयोपायः। ७। गुणवान्—[शौर्योदार्य-गाम्भीर्यादि-] गुण-विशिष्टः। शीलवान् —सदाचारः। दान्तः—अ-चपलः। सु-दर्शः—प्रसन्न-मुखः। स्थूल-लक्ष्यः —बहु-प्रदः। भ्रश्येत—भ्रंशेत, भ्रश्येत्। आआ.। ८। आर्जवम् [ऋजु+अ, २।१]—सरलताम्, अवक्रताम्। त्रयी-संवरणेन—त्रय्याः ([स्व-रन्ध्र-गोपनं पर-रन्ध्राविष्करणं स्वाभिप्राय-सिद्धये क्रियमाणं कर्म चेति] त्रयस्य) संवरणेन (गोपनेन)। ९। उभयम्—यत्र मृदुत्वं समुचितं तत्र मृदुत्वं यत्र च तीक्ष्णत्वं समुचितं तत्र तीक्ष्णत्वम्।

अदण्डयाश् चैव ते, पुत्र, विप्राः स्युर् ददतां वर।
भौमं ब्रह्म द्विज-श्रेष्ठा धारयन्ति, समर्चिताः। १०

व्यसनानि च सर्वाणि त्यजेथा, भूरि-दक्षिण।
न सं-त्याज्यं च ते धैर्यं कदाचिद् अपि, पाण्डव। ११

परिहासश् च भृत्यैस् ते नात्यर्थं, वदतां वर,
कर्तव्यो, राज-शार्दूल। दोषम् अत्र हि मे शृणु। १२

अवमन्यन्ति भर्तारं स-हर्षम् उप-जीविनः,
स्वे स्थाने च न तिष्ठन्ति, लङ्घयन्ति च तद्-वचः। १३

सप्ताङ्गस्य च राज्यस्य विपरीतं य आचरेत्,
गुरुर् वा यदि वा मित्रं, प्रतिहन्तव्य एव सः। १४

षड् एतान् पुरुषो जह्याद्, भिन्नां नावम् इवार्णवे,—
अ-प्रवक्तारम् आचार्यम्, अनधीयानम् ऋत्विजम्, १५

अ-रक्षितारं राजानं भार्यां चाप्रिय-वादिनीम्,
ग्राम-कामं च गोपालं, वन-कामं च नापितम्। १६

एतत् ते राज-धर्माणां नवनीतं, युधिष्ठिर।
बृहस्पतिर् हि भगवान् नान्यं धर्मं प्रशंसति, १७

१०। भौमं ब्रह्म—वेदान्। वेद-धारणेन यज्ञा अपि धार्यन्ते। १३। अवमन्यन्ति—अवमन्यन्ते, अवजानन्ति। पआ.। १४। सप्ताङ्गस्य—[स्वाम्यमात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-बलानि] सप्त अङ्गानि यस्य तादृशस्य, सप्त-प्रकृतेः। विपरीतम्—प्रतिकूलम्। १७। नवनीतम्—[दुग्धस्य नवनीतवत्] सारः, श्रेष्ठांशः। बृहस्पतिः—देव-गुरुः।

विशालाक्षश् च भगवान् काव्यश् चैव महा-तपाः
सहस्राक्षो महेन्द्रश् च तथा प्राचेतसो मनुः १८

भरद्वाजश् च भगवांस् तथा गौर-शिरा मुनिः ।
राज-शास्त्र-प्रणेतारो ब्राह्मणा ब्रह्म-वादिनः १९

रक्षाम् एव प्रशंसन्ति धर्मं, धर्म-भृतां वर,
राज्ञां । राजीव-ताम्राक्ष, साधनं चात्र मे शृणु । २०

चारश् च प्रणिधिश् चैव काले दानम् अमत्सरात्,
युक्त्यादानं न चादानम् अ-योगेन, युधिष्ठिर, २१

सतां संग्रहणं शौर्यं दाक्ष्यं सत्यं प्रजा-हितम्,
अनार्जवैर् आर्जवैश् च शत्रु-पक्षस्य भेदनम्, २२

केतनानां च जीर्णानाम् अवेक्षा चैव सीदताम्,
द्विविधस्य च दण्डस्य प्रयोगः काल-चोदितः, २३

साधूनाम् अ-परित्यागः, कुलीनानां च धारणम्,
निचयश् च निचेयानां, सेवा बुद्धिमताम् अपि, २४

१८। काव्यः—शुक्राचार्यः। प्राचेतसः—प्रचेतो-वंश्यः। २०। साधनम्—उपायम्। २१। चारः—गुप्तश् चरः। प्रणिधिः—प्रकटश् चरः। दानम्—[भोजन-वेतनयोः] प्रदानम्। अमत्सरात्—परस्य उन्नतये। युक्त्यादानम्—युक्ति-ग्रहणम्। आदानम् अ-योगेन—अनुपायेन [कर-] ग्रहणम्। २३। केतनानाम्—गृहादीनाम्। अवेक्षा—अवेक्षणम्, पालनम्। सीदताम्—अवसीदताम्, निरुत्साहानाम् [जनानाम्]। द्विविधस्य दण्डस्य—शारीर-दण्डस्य अर्थ-दण्डस्य च। २४। निचयः—संग्रहः। निचेयानाम्—संग्राह्यानाम् [धान्यादीनाम्]।

बलानां हर्षणं नित्यं, प्रजानाम् अन्ववेक्षणम्,
कार्येष्व-खेदः कोषस्य तथैव च विवर्धनम्, २५

पुर-गुप्तिर् अ-विश्वासः पौर-सङ्घात-भेदनम्,
अरि-मध्यस्थ-मित्राणां यथावच् चान्ववेक्षणम्, २६

उपजापश् च भृत्यानाम्, आत्मनः पुर-दर्शनम्,
अ-विश्वासः स्वयं चैव परस्याश्वासनं तथा, २७

नीति-वर्त्मानुसारेण नित्यम् उत्थानम् एव च,
रिपूणाम् अनवज्ञानं नित्यं चानार्य-वर्जनम् । २८

उत्थान-हीनो राजा हि, बुद्धिमान् अपि नित्यशः
प्रधर्षणीयः शत्रूणां, भुजङ्ग इव निर्विषः । २९

न च शत्रुर् अवज्ञेयो दुर्बलो ऽपि बलीयसा ।
अल्पो ऽपि हि दहत्यग्निर्, विषम् अल्पं हिनस्ति च । ३०

एकाङ्गेनापि सम्भूतः, शत्रुर्, दुर्गम् उपाश्रितः,
सर्वं तापयते देशम् अपि राज्ञः समृद्धिनः । ३१

---

२६ । पुर-गुप्तिः—नगर-रक्षा । अविश्वासः—'स्वार्थ-परेषु स्वजनेष्वपि' इति शेषः । पौर-सङ्घातभेदनम्—[वाणिज्यादि-व्यपदेशेन राजद्विषां] पौराणां (नगर-वासिनाम्) संघातस्य (संहतेः, सङ्घस्य) भेदनम् (विघट्टनम्) । २७ । उपजापः—भेद-सम्पादनम् । भृत्यानाम्—[पर-] भृत्यानाम् । २८ । अनार्यम्—हीन-[कर्म] । ३१ । एकाङ्गेनापि सम्भूतः—हस्त्यश्व-रथ-पादातानाम् अन्यतमेन सम्पन्नः । समृद्धिनः [समृद्ध+इन्, ६।१]—समृद्धिमतः ।

राज्ञो रहस्यं यद् वाक्यं, जयार्थे, लोक-संग्रहः,
हृदि यच् चास्य जिह्मं स्यात्, कारणार्थं च यद् भवेत्, ३२

यच् चास्य कार्यं वृजिनं, मार्दवेनैव धार्यते।
रञ्जनार्थं च लोकस्य धर्मिष्ठाम् आचरेत् क्रियाम्। ३३

न शक्यं मृदुना वोढुम् आघात-स्थानम् उल्वणम्।
तस्माद् मिश्रेण सततं वर्तितव्यं, युधिष्ठिर। ३४

यद्यप्यस्य विपत्तिः स्याद् रक्षमाणस्य वै प्रजाः,
सो ऽप्यस्य विपुलो धर्म। एवं-वृत्ता हि भूमि-पाः। ३५

चतुर्थो ऽध्यायः

अभिषेक-शपथः

अनङ्ग-पुत्रो ऽति-बलो नीतिमान् अभिगम्य वै
प्रतिपेदे महा-राज्यम्। अथेन्द्रिय-वशो ऽभवत्। १

मृत्योस् तु दुहिता, राजन्, सुनीथा नाम नामतः
प्रख्याता त्रिषु लोकेषु या, सा वेणम् अजीजनत्। २

तं प्रजासु विधर्माणं राग-द्वेष-वशानुगम्
मन्त्र-पूतैः कुशैर् जघ्नुर् ऋषयो ब्रह्म-वादिनः। ३

ममन्थुर् दक्षिणं चोरुम् ऋषयस् तस्य, भारत।
ततो ऽस्य विकृतो जज्ञे ह्रस्वकः पुरुषो ऽ-शुचिः। ४

३२। जिह्मम्—कपटम्। कारणार्थम्—शत्रु-जयादि-हेतोः। ३३। वृजिनम्—हीनम्। मार्दवेन—मृदुताम् आश्रित्य।

निषीदेत्येवम् ऊचुस् तम् ऋषयो ब्रह्म-वादिनः ।
तस्माद् निषादाः संभूताः क्रूराः शैल-वनाश्रयाः । ५

भूयो ऽस्य दक्षिणं पाणिं ममन्थुस् ते महर्षयः ।
ततः पुरुष उत्पन्नो रूपेणेन्द्र इवापरः । ६

तं दण्ड-नीतिः सकला श्रिता, राजन् , नरोत्तमम् ।
ततस् तु प्राञ्जलिर् वैण्यो महर्षींस् तान् उवाच ह,— ७

"यद् मां भवन्तो वक्ष्यन्ति कार्यम् अर्थ-समन्वितम्
तद् अहं वः करिष्यामि । नात्र कार्या विचारणा ।" ८

तम् ऊचुस् तत्र देवास् ते ते चैव परमर्षयः,—
"नियतो यत्र धर्मो वै तम् अ-शङ्कः समाचर । ९

यश् च धर्मात् प्रविचलेल् लोके कश्चन मानवः,
निग्राह्यस् ते स्व-बाहुभ्यां शश्वद् धर्मम् अवेक्षता । १०

प्रतिज्ञां चाधिरोहस्व मनसा कर्मणा गिरा,—
'पालयिष्याम्यहं भौमं ब्रह्म इत्येव चासकृत् ; ११

यश् चात्र धर्म इत्युक्तो दण्ड-नीति-व्यपाश्रयः,
तम् अ-शङ्कः करिष्यामि, स्व-वशो न कदाचन' ।" १२

---

७ । दण्ड-नीतिः—राष्ट्र-शासन-विद्या । १२ । स्व-वशः—स्वेच्छाधीनः । ११-१२ । Cf. ऐतब्रा. ८।१५ :—'क्षत्रियं शापयित्वा अभिषिञ्चेत् । स ब्रूयात् सह श्रद्धया,—"यां च रात्रीम् अजाये ऽहं यां च प्रेतास्मि, तद् उभयम् अन्तरेणेष्टापूर्तं मे लोकं सु-कृतम् आयुः प्रजां वृञ्जीथा यदि ते द्रुह्येयम्" इति' (केपिज.) ।

वैण्यस् ततस् तान् उवाच देवान् ऋषि-पुरोगमान्,—
"ब्राह्मणा मे सहायाश् चेद्, एवम् अस्तु, सुरर्षभाः।" १३

एवम् अस्त्विति वैण्यस् तु तैर् उक्तो ब्रह्म-वादिभिः।
पुरोधाश् चाभवत् तस्य शुक्रो ब्रह्ममयो निधिः। १४

मन्त्रिणो वालखिल्याश् च सारस्वत्यो गणस् तथा,
महर्षिर् भगवान् गर्गस् तस्य सांवत्सरो ऽभवत्। १५

स विष्णुना च देवेन शक्रेण विबुधैः सह,
ऋषिभिश् च प्रजापाल्ये ब्रह्मणा चाभिषेचितः। १६

तं साक्षात् पृथिवी भेजे रत्नान्यादाय, पाण्डव,
सागरः सरितां भर्ता हिमवांश् चाचलोत्तमः। १७

तेन धर्मोत्तरश् चायं कृतो लोको महात्मना
रञ्जिताश् च प्रजाः सर्वास् तेन राजेति शब्द्यते। १८

सर्व-धर्म-परं क्षात्रं लोक-श्रेष्ठं सनातनम्
शश्वद् अक्षर-पर्यन्तम् अक्षरं सर्वतो-मुखम्। १९

प्रवर्धनी। पृ. ५४४, ११। भौमम्—पार्थिवं [संस्थानम्]। ब्रह्म—जगदीश्वरः। Cf. 'एष सर्वेश्वरः...एष सेतुर् विधरण एषां लोकानाम् अ-संभेदाय'—बृउ. ४।४।२२।

१४। पुरोधाः—पुरोहितः। १५। सारस्वत्यः—सारस्वतः, वाग्मी, वाक्-चतुरः। सांवत्सरः—ज्यौतिषिकः, गणकः। १९। अक्षर-पर्यन्तम्—मोक्षावसानम्।

पञ्चमो ऽध्यायः

राष्ट्र-कृत्यम्

युधिष्ठिर उवाच,—

राष्ट्रस्य यत् कृत्यतमं तद् मे ब्रूहि, पितामह।

भीष्म उवाच,—

राष्ट्रस्यैतत् कृत्यतमं राज्ञ एवाभिषेचनम्। १
अनिन्द्रम् अबलं राष्ट्रं दस्यवो ऽभिभवन्त्युत।
अराजकेषु राष्ट्रेषु धर्मो न व्यवतिष्ठते। २
नाराजकेषु राष्ट्रेषु वस्तव्यम् इति वैदिकम्।
नाराजकेषु राष्ट्रेषु हव्यं वहति पावकः। ३
अथ चेद् अभिवर्तेत राज्यार्थी बलवत्तरः
अ-राजकानि राज्यानि हत-वीर्याणि वा पुनः, ४
प्रत्युद्गम्याभिपूज्यः स्याद्। एतद् अत्र सु-मन्त्रितम्।
न हि राज्यात् पापतरम् अस्ति किञ्चिद् अ-राजकात्। ५
स चेत् समनुपश्येत समग्रं, कुशलं भवेत्।
बलवान् हि प्रकुपितः कुर्याद् निःशेषताम् अपि।
भूयांसं लभते क्लेशं या गौर् भवति दुर्दुहा। ६

१। राष्ट्रस्य—राष्ट्र-वासि-जन-समूहस्य। कृत्यतमम्—मुख्यं कार्यम्। २। अनिन्द्रम्—अ-राजकम्। अ-बलम्—शक्ति-हीनम्। व्यवतिष्ठते—लोकैर् मान्यते। ३। वैदिकम्—'अनुशासनम्' इति शेषः।

अ-राजकाः प्रजाः पूर्वं विनेशुर् इति नः श्रुतम्,
परस्परं भक्षयन्तो, मत्स्या इव जले कृशान् । ७
समेत्य तास् ततश् चक्रुः समयान् इति नः श्रुतम्,
'वाक्-शूरो दण्ड-परुषो यश् च स्यात् पारदारिकः
यः पर-स्वम् अथादद्यात् त्याज्या नस् तादृशा' इति । ८
विश्वासार्थं च सर्वेषां वर्णानाम्, अ-विशेषतः,
तास्, तथा समयं कृत्वा, समये नावतस्थिरे । ९
सहितास् तास् तदा जग्मुर् असुखार्ताः पितामहम्,—
"अनीश्वरा विनश्यामो ; भगवन्न्, ईश्वरं दिश १०
यं पूजयेम सम्भूय यश् च नः प्रतिपालयेत् ।"
ताभ्यो मनुं व्यादिदेश । मनुर् नाभिननन्द ताः । ११
तम् अब्रुवन् प्रजा,—"मा भैर् ! विधास्यामो धनं तव ।
पशूनाम् अथ पञ्चांशं हिरण्यस्य तथैव च, १२
धान्यस्य दशमांश भागं दास्यामः कोष-वर्धनम्,
कन्यां शुल्के चारु-रूपां विवाहेषूद्यतासु च । १३

---

८ । वाक्-शूरः—निष्ठुर-भाषी, मर्मन्तुद-वाक्य-वादी । दण्ड-परुषः—उग्र-दण्डः । पारदारिकः [पर-दार+इक, ११]—पर-दाराप-हारी, पर-स्त्री-कामी । आदद्यात्—आददीत, गृह्णीयात्, अपहरेत् । पआ. । १० । असुखार्ताः—दुःख-पीड़िताः । पितामहम्—पितॄणां (मरीच्यादि-पितृ-गणस्य) पितरम्, ब्रह्माणम् । ईश्वरम् [ईश् (शासने) +वर, २।१]—शासितारम् । ११ । नाभिननन्द—न सादरं जग्राह, नाङ्गीचकार । १२ । पञ्चांशम्—पञ्चमांशम् ।

मुख्येन शस्त्र-पत्रेण ये मनुष्याः प्रधानतः,
भवन्तं ते ऽनुयास्यन्ति, महेन्द्रम् इव देवताः । १४

स त्वं जात-बलो राजा दुष्प्रधर्षः प्रतापवान्
सुखे धास्यसि नः सर्वान्, कुवेर इव नैर्ऋतान् । १५

यं च धर्मं चरिष्यन्ति प्रजा, राज्ञा सु-रक्षिताः,
चतुर्थं तस्य धर्मस्य त्वत्संस्थं वै भविष्यति । १६

तेन धर्मेण महता सुखं लब्धेन भावितः
पाह्यस्मान् सर्वतो, राजन्, देवान् इव शत-क्रतुः । १७

विजयाय हि निर्याहि, प्रतपन् रश्मिवान् इव ।
मानं विधम शत्रूणां । धर्मो जयतु नः सदा !" १८

स निर्ययौ महा-तेजा, बलेन महता वृतः,
महाभिजन-सम्पन्नस्, तेजसा प्रज्वलन्न् इव । १९

तस्य दृष्ट्वा महत्त्वं ते, महेन्द्रस्येव देवताः,
अपतत्रसिरे सर्वे स्व-धर्मे च दधुर् मनः । २०

---

१४ । शस्त्र-पत्रेण—शस्त्रेण वाहनेन च । प्रधानतः—प्रधानाः, श्रेष्ठाः । प्रथमार्थे तसिल् । पा. ५।३।१४ १५ । नैर्ऋतान् [निर्ऋति+अ, २।ब]—राक्षसान् । कुवेर इव नैर्ऋतान्—ब्रह्मणः प्रपौत्रो विश्रवसः पुत्रश् च कुवेरो ब्रह्म-वरेण देव-शक्तिं लब्ध्वा पितुर् उपदेशेन लङ्कां जग्राह । पश्चात् तस्य वैमात्रेयो भ्राता रावणस् तं विद्राव्य लङ्काया राजा बभूव । १७ । भावितः—रक्षितः । १८ । मानम्—दर्पम् । विधम [वि-ध्मा+हि]—नाशय । १९ । अभिजनः—परिजनः, अनुचर-वर्गः । २० । अपतत्रसिरे—

ततो महीं परिययौ पर्जन्य इव वृष्टिमान्,
शमयन् सर्वतः पापान् स्व-कर्मसु च योजयन्। २१

एवं ये भूतिम् इच्छेयुः पृथिव्यां मानवाः क्वचित्,
कुर्य राजानम् एवाग्रे प्रजानुग्रह-कारणात्। २२

नमस्येरंश् च तं भक्त्या, शिष्य इव गुरुं, सदा।
सत्-कृतं स्व-जनेनेह परो ऽपि बहु-मन्यते। २३

राज्ञः परैः परिभवः सर्वेषाम् अ-सुखावहः।
तस्माच् छत्रं च पत्रं च वासांस्याभरणानि च २४

भोजनान्यथ पानानि राज्ञे दद्युर् गृहाणि च
आसनानि च शय्याश् च सर्वोपकरणानि च। २५

वर्जनीयं सदा युद्धं राज्य-कामेन धीमता।
उपायैस् त्रिभिर् आदानम् अर्थस्याह वृहस्पतिः। २६

सान्त्वेन तु प्रदानेन भेदेन च, नराधिप,
यम् अर्थं शक्नुयात् प्राप्तुं तेन तुष्येत पण्डितः। २७

त्रासाभिभूता बभूवुः। २४। पत्रम्—वाहनम्। २७। सान्त्वेन—साम्ना, सन्धिना।

षष्ठो ऽध्यायः

दण्ड-नीतिः

मज्जेत् त्रयी दण्ड-नीतौ हतायां,
सर्वे धर्माः प्रक्षयेयुर् विवृद्धाः।
सर्वे धर्माश् चाश्रमाणां हताः स्युः
क्षात्रे त्यक्ते राज-धर्मे पुराणे। १

सर्वे त्यागा राज-धर्मेषु दृष्टाः,
सर्वा दीक्षा राज-धर्मेषु चोक्ताः,
सर्वा विद्या राज-धर्मेषु युक्ताः,
सर्वे लोका राज-धर्मे प्रविष्टाः। २

आत्म-त्यागः सर्व-भूतानुकम्पा
लोक-ज्ञानं पालनं मोक्षणं च
विषण्णानां मोक्षणं पीड़ितानां
क्षात्रे धर्मे विद्यते पार्थिवानाम्। ३

युधिष्ठिर उवाच,—

दण्ड-नीतिश् च राजा च, समस्तौ ताव् उभाव् अपि,
कस्य किं कुर्वतः सिध्येत् तद् मे ब्रूहि, पितामह। ४

भीष्म उवाच,—

दण्ड-नीतिः स्व-धर्मेषु चातुर्वर्ण्यं नियच्छति।
प्रयुक्ता स्वामिना सम्यग् अधर्मेभ्यो नियच्छति। ५

१। त्रयी—ऋग्-वेदो यजुर्वेदः साम-वेदश् चेति वेद-त्रयम्। विवृद्धाः—समुन्नताः।

कालो वा कारणं राज्ञो राजा वा काल-कारणम्
इति ते संशयो मा भूद् ! राजा कालस्य कारणम् । ६

दण्ड-नीत्यां यदा राजा सम्यक् कार्त्स्न्येन वर्तते,
तदा कृत-युगं नाम कालः श्रेष्ठः प्रवर्तते । ७

योग-क्षेमाः प्रवर्तन्ते प्रजानां, नात्र संशयः।
व्याधयो न भवन्त्यत्र । नाल्पायुर् दृश्यते नरः । ८

विधवा न भवन्त्यत्र । नृशंसो नात्र जायते ।
अकृष्ट-पच्या पृथिवी भवन्त्योषधयस् तथा । ९

दण्ड-नीत्यां यदा राजा त्रीन् अंशान् अनुवर्तते,
चतुर्थम् अंशम् उत्सृज्य, तदा त्रेता प्रवर्तते । १०

अशुभस्य चतुर्थांशस् त्रीन् अंशान् अनुवर्तते,
कृष्ट-पच्यैव पृथिवी भवन्त्योषधयस् तथा । ११

अर्धं त्यक्त्वा यदा राजा नीत्यर्थम् अनुवर्तते,
ततस् तु द्वापरं नाम स कालः संप्रवर्तते. १२

अशुभस्य यदा त्वर्धं द्वाव् अंशाव् अनुवर्तते ।
कृष्ट-पच्यैव पृथिवी भवत्यर्ध-फला तदा । १३

७। कृत-युगम्—सत्य-युगम् । ९। अ-कृष्ट-पच्या—पृथिवी-पक्षे कर्षणाद् ऋते ऽपि फल-शस्य-शालिनी ओषधि-पक्षे च अकृष्ट-क्षेत्रे ऽपि पच्यमाना । ११ । अ-शुभस्य—अमङ्गलस्य, अधर्मस्य । कृष्ट-पच्या—कर्षणे-नैव फल-शस्य-शालिनी ।

दण्ड-नीतिं परित्यज्य यदा कात्स्न्र्येन भूमिपः
प्रजाः क्लिश्नात्ययोगेन, प्रवर्तेत तदा कलिः । १४

शूद्रा भैक्ष्येण जीवन्ति ब्राह्मणाः परिचर्यया ।
योग-क्षेमस्य नाशश् च वर्तते वर्ण-सङ्करः । १५

व्याधयश् च भवन्त्यत्र म्रियन्ते चाशतायुषः ।
विधवाश् च भवन्त्यत्र नृशंसा जायते प्रजा ।
क्वचिद् वर्षति पर्जन्यः क्वचित् सस्यं प्ररोहति । १६

रसाः सर्वे क्षयं यान्ति यदा नेच्छति भूमि-पः
प्रजाः संरक्षितुं सम्यग्, दण्ड-नीति-समाहितः । १७

राजा कृत-युग-स्रष्टा त्रेताया द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् । १८

बलि-षष्ठेन शुल्केन दण्डेनाथापराधिनाम्
शास्त्रानीतेन लिप्सेथा वेतनेन धनागमम् । १९

योग-क्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते ।
योग-क्षेमो हि राज्ञो हि समायत्तः पुरोहिते । २०

नित्योदकी ब्राह्मणः स्याद् नित्य-शस्त्रश् च क्षत्रियः ।
तयोर् हि सर्वम् आयत्तं यत् किञ्चिज् जगती-गतम् । २१

---

१४ । कात्स्न्र्येन—साकल्येन, सम्पूर्णम् । अयोगेन—गर्हितेन उपायेन । १५ । वर्ण-सङ्करः—वर्णानां मिश्रणम् । २१ । नित्योदकी—[आ-ब्रह्म-स्तम्ब-पर्यन्ताय जगते] नित्यम् उदकं ददाति यः स तादृशः ।

यं हि धर्मं चरन्तीह प्रजा राज्ञा सु-रक्षिताः,
चतुर्थं तस्य धर्मस्य राजा, भारत, विन्दति। २२

यद् राष्ट्रे ऽकुशलं किञ्चिद् राज्ञो ऽ-रक्षयतः प्रजाः,
चातुर्थं तस्य पापस्य राजा, भारत, विन्दति। २३

प्रत्याहर्तुम् अ-शक्यं स्यात् धनं चौरैर् हृतं यदि,
तत् स्व-कोषात् प्रदेयं स्याद् अशक्तेनोपजीवतः। २४

जन्म-कर्म-विहीना ये कदर्या ब्रह्म-बन्धवः,
तान् सर्वान् धार्मिको राजा बलिं विष्टिं च कारयेत्। २५

अ-ब्राह्मणानां वित्तस्य स्वामी राजेति वैदिकम्,
ब्राह्मणानां च ये केचिद् विकर्म-स्था भवन्त्युत। २६

'वि-कर्म-स्थाश् च नोपेक्ष्या विप्रा राज्ञा कथञ्चन'
इति राज्ञां पुरा-वृत्तम् अभिजल्पन्ति साधवः। २७

यस्य स्म विषये राज्ञः स्तेनो वै भवति द्विजः,
राज्ञ एवापराधं तं मन्यन्ते किल्बिषं, नृप। २८

अभिशस्तम् इवात्मानं मन्यन्ते तेन कर्मणा।
तस्माद् राजर्षयः सर्वे ब्राह्मणान् अन्वपालयन्। २९

२२। विन्दति—लभते। २४। अशक्तेन—'राज्ञा' इति शेषः। उपजीवतः— [धनेन] उपजीवतः [बणिगादेः]। *Cf.* यासं, २।३७; मसं, ८।४० २५। जन्म-कर्म—ब्राह्मण-जन्मोचित-कर्म। कदर्याः—क्षुद्र-चेतसः। बलिम्—कर-दानम्। विष्टिम्—वेतनं विना राज-सेवाम्। २८। स्तेनः—चौरः। २९। अभिशस्तम्—उपपन्न-पातकम्,पाप-कर्तारम्।—

राज्ञो ऽपि क्षीयमाणस्य ब्रह्मैवाहुः परायणम् ।
तस्माद् ब्रह्म-बलेनैव समुत्थेयं विजानता । ३०

यदा तु विजयी राजा क्षेमं राष्ट्रे ऽभिसन्दधेत्,
तदा वर्णा यथा-धर्मं निविशेयुः स्व-कर्मसु । ३१

उन्मर्यादे प्रवृत्ते तु दस्युभिः सङ्करे कृते,
सर्वे वर्णा न दुष्येयुः शस्त्रवन्तो, युधिष्ठिर । ३२

युधिष्ठिर उवाच,—

संप्रमूढेषु क्षत्रेषु यद् अन्यो ऽभिभवेद् बली,
ब्राह्मणो यदि वा वैश्यः शूद्रो वा, राज-सत्तम, ३३

दस्युभ्यो ऽथ प्रजा रक्षेद्, दण्डं धर्मेण धारयन्,
कार्यं कुर्यात् न वा कुर्यात्, स वार्यो वा भवेद् न वा ? ३४

भीष्म उवाच,—

अपारे यो भवेत् पारम् अ-प्लवे यः प्लवो भवेत्,
शूद्रो वा यदि वाप्यन्यः, सर्वथा मानम् अर्हति । ३५

मन्यन्ते—'राजानः' इति शेषः । तेन कर्मणा—ब्राह्मणस्य चौर्येण । तस्मात्—राज-धर्म-गुप्तये । अन्वपालयन्—पापेभ्यः अरक्षन् । ३० । ब्रह्म—ब्राह्मण-जातिम् । परायणम्—श्रेष्ठम् आश्रय-स्थानम् । ३१ । अभिसन्दधेत्—अभिसन्दध्यात्, उद्दिशेत् । आप्र. । Cf गी. । १७।१२ ३२ । उन्मर्यादे प्रवृत्ते—नियमम् अतिक्रम्य यथेच्छ-कर्मणि प्रवृत्ते जन-समूहे । दुष्येयुः—पाप-भाजो भवेयुः । शस्त्रवन्तः [सन्तः]—[राज्यं रक्षितुं] युद्धाय शस्त्रं धारयन्तः । ३३ । संप्रमूढेषु—सम्यङ्-मोह-ग्रस्तेषु, कृत्याकृत्य-भेद-बोध-रहितेषु । ३५ । पारम् [पर+अ, १।१]—पर-तीरम् ।

यथा विप्रो ऽनधीयानो, राजा यश् च न रक्षिता
मेघो न वर्षते यश् च, सर्व एव निरर्थकाः । ३६

नित्यं यस् तु सतो रक्षेद् असतश् च निवर्तयेत्,
स एव राजा कर्तव्यस् । तेन सर्वम् इदं धृतम् । ३७

सप्तमो ऽध्यायः

गण-नयनम्

युधिष्ठिर उवाच,—

यद् अप्यल्पतरं कर्म तद् अप्येकेन दुष्करम्
पुरुषेणासहायेन, किम् उ राज्ञा, पितामह । १

भीष्म उवाच,—

नाज्ञातिर् अनुगृह्णाति, नाज्ञातिर् वृद्धिम् अश्नुते,
उभयं ज्ञाति-वर्गेषु दृश्यते साध्वसाधु च । २

संमानयेत् पूजयेच् च वाचा नित्यं च कर्मणा,
कुर्याच् च प्रियम् एतेभ्यो, नाप्रियं किञ्चिद् आचरेत् । ३

य एवं वर्तते नित्यं ज्ञाति-सम्बन्धि-मण्डले,
मित्रेष्वमित्रे मध्यस्थे चिरं यशसि तिष्ठति । ४

---

३६ । अनधीयानः [न+अधि-इ+आन, ११]—[वेदम्] अ-पठन्, वेदाध्ययन-हीनः ।

युधिष्ठिर उवाच,—

एवम् अग्राह्यके तस्मिन् ज्ञाति-संबन्धि-मण्डले,
मित्रेष्वमित्रेष्वपि च कथं भावो विभाव्यते ? ५

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
संवादं वासुदेवस्य महर्षेर् नारदस्य च। ६

वासुदेव उवाच,—

नासुहृत् परमं मन्त्रं नारदार्हति वेदितुम्,
अ-पण्डितो वापि सुहृत्, पण्डितो वाप्यनात्मवान्। ७

स ते, सौहृदम् आस्थाय, किञ्चिद् वक्ष्यामि, नारद;
कृत्स्नां बुद्धिं च ते प्रेक्ष्य संपृच्छे, त्रिदिवं-गम। ८

दास्यम् ऐश्वर्य-वादेन ज्ञातीनां वै करोम्यहम्।
अर्धं भोक्तास्मि भोगानां वाग्-दुरुक्तानि च क्षमे। ९

अरणीम् अग्नि-कामो वा मथ्नाति हृदयं मम
वाचा दुरुक्तं। देवर्षे, तद् मां दहति नित्यदा। १०

५। अ-ग्राह्यके—आयत्ती-कर्तुम् अ-शक्ये। भावः—प्रीतिः। विभाव्यते—उद्दीप्यते। ६। पुरातनम्—पुरातनम् इव मान्यम् इति भावः भीष्म-कृष्णयोः समकालीनत्वात्। ७। अनात्मवान्—अ-महा-मनाः, अनुन्नत-स्वभावः। ८। कृत्स्नाम्—सम्पूर्णाम्, सर्वार्थ-बोध-समर्थाम्। ९। ऐश्वर्य-वादेन—नाम्ना शासिता सन्न् अपि। ऐश्वर्यम्—शासितृत्वम्। भोक्ता भोगानाम्—भू-पालन-कर्मणाम् (शासन-कर्मणाम्) कर्ता। क्षमे—सहे। १०। वा—इव।

बलं संकर्षणे नित्यं, सौकुमार्यं पुनर् गदे,
रूपेण मत्तः प्रद्युम्नः। सो ऽ-सहायो ऽस्मि, नारद। ११

अन्ये हि सु-महा-भागा बलवन्तो दुरासदाः
नित्योत्थानेन संपन्ना नारदान्धक-वृष्णयः १२

यस्य न स्युर्, न वै स स्याद्, यस्य स्युः, कृत्स्नम् एव तत्।
द्वाभ्यां निवारितो नित्यं वृणोम्येकतरं न च— १३

स्यातां यस्याहुकाक्रूरौ किं नु दुःखतरं ततः?
यस्य चापि न तौ स्यातां, किं नु दुःखतरं ततः? १४

सो ऽहं कितव-मातेव द्वयोर् अपि, महा-मुने,
नैकस्य जयम् आशंसे द्वितीयस्य पराजयम्। १५

ममैवं क्लिश्यमानस्य, नारदोभय-दर्शनात्,
वक्तुम् अर्हसि यच् छ्रेयो ज्ञातीनाम् आत्मनस् तथा। १६

११। सङ्कर्षणे—बल-रामे। गदः—कृष्णस्य कनिष्ठो भ्राता। सौकुमार्यम्—राज-पुत्र-सुलभः शोभनो गुण-राशिः। प्रद्युम्नः—कृष्ण-रुक्मिण्योः पुत्रः। मत्तः—प्रशस्यतरः इति शेषः। अ-सहायः—[एवं सत्यपि] अनुवर्ति-हीनः। १२। दुरासदाः—दुर्धर्षाः, दुःसहाः। उत्थानेन—उद्यमेन। १३। न स्यात्—विनश्येत्। १४। आहुकः—उग्रसेनस्य पिता। अक्रूरः—यदु-वंश्यो राज-पुत्रः आहुकस्य उग्रसेनस्य च जामाता कृष्णस्य अन्यतमः श्वशुरश् च। १५। कितव-माता—कितवयोः (द्यूत-कारिणोः) [एका] माता। १६। ज्ञातीनाम्—स्व-जनानाम्।

नारद उवाच,—

आपदो द्विविधाः, कृष्ण, बाह्याश् चाभ्यन्तराश् च ह
प्रादुर्भवन्ति, वार्ष्णेय, स्व-कृता यदि वान्यतः। १७

सेयम् आभ्यन्तरा तुभ्यम् आपत् कृच्छ्रा स्व-कर्म-जा
अक्रूर-भोज-प्रभवा। सर्वे ह्य् एते तदन्वयाः। १८

अर्थ-हेतोर् हि कामाद् वा वीर-बीभत्सया ऽपि वा
आत्मना प्राप्तम् ऐश्वर्यम् अन्यत्र प्रतिपादितम्। १९

कृत-मूलम् इदानीं तद् राज-शब्द-सहायवत्
न शक्यं पुनर् आदातुं वान्तम् अन्नम् इव स्वयम्। २०

बभ्रूग्रसेनतो राज्यं नाप्तुं शक्यं कथञ्चन
ज्ञाति-भेद-भयात्, कृष्ण, त्वया चापि विशेषतः। २१

१७। आपदः—गण-तन्त्रस्य इति शेषः। स्व-कृताः—आत्म-कृताः, गण-सदस्य-कृताः। अन्यतः [जाताः]—बाह्याः। १८। अक्रूर-भोज-प्रभवा—भोज-वंश्याद् अक्रूरात् जाता। *Cf.* कुन्ति-भोजः। उपरिष्टात् १।६।१७-२०, पृ. ७०८। तदन्वयाः—अक्रूरानुगामिनः। १९। अर्थ-हेतोः—विषय-वासनया। कामात्—स्वेच्छाचारितया। वीर-बीभत्सया—वीर-पुरुष-द्वेषेण। ऐश्वर्यम्—शासितृत्वम्, शासनाधिकारः। अन्यत्र—आहुके। २०। राज-शब्द-सहायवत्—पुत्रेण प्राप्तस्य राजोपाधेः शक्त्या शक्तिमत्। ज्ञाति-शब्द-सहायवत् (ज्ञातित्वाद् अनुच्छेदनीयञ्च) इति प्रतीचां पाठः। पं २—कृष्णः स्वयम् एव कंसं हत्वा यादव-राज्यम् आहुकस्य पुत्राय कंस-पित्रे उग्रसेनाय ददौ।

तच् च सिध्येत् प्रयत्नेन कृत्वा कर्म सु-दुष्करम्
महा-क्षयं। व्ययो वा स्याद् विनाशो वा पुनर् भवेत्। २२

अनायसेन शस्त्रेण मृदुना हृदय-च्छिदा
जिह्वाम् उद्धर सर्वेषां परिमृज्यानुमृज्य च। २३

वासुदेव उवाच,—

अनायसं, मुने, शस्त्रं मृदु विद्याम् अहं कथम
येनैषाम् उद्धरे जिह्वां परिमृज्यानुमृज्य २४

नारद उवाच,—

शक्त्यान्न-दानं सततं तितिक्षाजे.व-मार्दवम्
यथार्ह-प्रतिपूजा च. शस्त्रम् एतद् अनायसम्। २५

ज्ञातीनां, वक्तु-कामानां कटुकानि लघूनि च,
गिरा त्वं हृदयं वाचं शमयस्व मनांसि च। २६

नामहा-पुरुषः कश्चिद् नानात्मा नासहायवान्
महतीं धुरम् आदाय समुद्यम्योरसा वहेत्। २७

२२। तत्—राज्यस्य पुनरादानम्। क्षयः—क्षतिः। व्ययः—अपचयः। २३। अनायसेन—अ-लौहेन। उद्धर—उन्नमय, संशोधय। परिमृज्यानुमृज्य च—पुनः पुनः मार्जयित्वा (संशोध्य)। २५। यथार्ह-प्रतिपूजा—प्रतिपक्षस्य योग्यतायाः स्वीकरणम् योग्यत्वानुरूपा सम्मानना च। २६। हृदयम्—निश्चयम्। मनांसि—सङ्कल्पान्। २७। अनात्मा—अ-महामनाः। अ-सहायवान्—अनुवर्ति-हीनः। धुरम्—भारम्। समुद्यम्य—सम्यक् चेष्टित्वा। वहेत्—वोढुं शक्नोति।

सर्व एव गुरुं भारम् अनड्वान् वहते समे,
दुर्गे प्रतीतः सु-गवो भारं वहति दुर्वहम् । २८

भेदाद् विनाशः सङ्घानां । सङ्घ-मुख्यो ऽसि, केशव ।
यथा त्वां प्राप्य नोत्सीदेद् अयं सङ्घस् तथा कुरु । २९

नान्यत्र बुद्धि-क्षान्तिभ्यां नान्यत्रेन्द्रिय-निग्रहात्
नान्यत्र धन-सन्त्यागाद् गुणः प्राज्ञे ऽवतिष्ठते । ३०

धन्यं यशस्यम् आयुष्यं स्व-पक्षोद्भावनं सदा ।
ज्ञातीनाम् अ-विनाशः स्याद् यथा, कृष्ण, तथा कुरु । ३१

आयत्यां च तदात्वे च न ते ऽस्त्यविदितं, प्रभो,
षाड्-गुण्यस्य विधानेन यात्रा-यान-विधौ तथा । ३२

---

२८ । अनड्वान्—वृषः । समे—सम-भूमौ । दुर्गे—दुर्गमे [स्थाने]। प्रतीतः—अभिज्ञः । सु-गवः—श्रेष्ठो गौः । २९ । भेदात्—अ-मेलात् । सङ्घ-मुख्यः—गणस्य नेता । नोत्सीदेत्—न विनश्येत् । ३० । अवतिष्ठते —[सकल-गण-नेतृत्वाय] प्रभवति । ३१ । धन्यं यशस्यम् आयुष्यम्—धनाय यशसे दीर्घायुषे च हितम् । उद्-भावनम्—उन्नयनम् । ३२ । आयत्याम् [आ-या+अति, ७।१]--भविष्यत्-काले, भविष्यद्-नीतौ । तदात्वे —वर्तमान-काले, वर्तमान-नीतौ । षाड्-गुण्यस्य विधानेन—षण्णां गुणानां ([सन्धि विग्रह-यानासन-द्वैधीभाव-संश्रय-नाम्नाम् उपकारकाणाम्] उपायानां) विधानेन (प्रयोगेण) । सेना-हिरण्यादिभिर् आवाभ्याम् अन्योन्यस्य उपकर्तव्यम् इति नियम-बन्धः सन्धिः, सेनया अहिताचरणं विग्रहः, शत्रुं प्रति गमनं यानम्, उपेक्षणम् आसनम्, स्वार्थ-सिद्धये स्व-बलस्य द्विधा-करणम् द्वैधीभावः, शत्रु-भयेन प्रबलतर-शासित्राश्रयणं संश्रयः । *Cf.* मसं. ७।१६०. यात्रा-यानविधौ—अभिगमनाक्रमणयोः शास्त्रे । Cf. मसं.

यादवाः कुकुरा भोजाः सर्वे चान्धक-वृष्णयः
त्वय्यायत्ता, महा-बाहो, लोका लोकेश्वराश् च ये। ३३

अष्टमो ऽध्यायः

शासन-भङ्गी

युधिष्ठिर उवाच,—

सभा-सदः सहायाश् च सुहृदश् च, विशां पते,
परिच्छदास् तथामात्याः कीदृशाः स्युः, पितामह ? १

भीष्म उवाच,—

ह्री-निषेवास् तथा दान्ताः सत्यार्जव-समन्विताः,
शक्ताः कथयितुं सम्यक्, ते तव स्युः सभा-सदः। २

अमात्याश् चाति-शूराश् च ब्रह्मण्याश् च बहु-श्रुताः
सु-सन्तुष्टाश् च, कौन्तेय, महोत्साहाश् च कर्मसु,
एतान् सहायाल्ँ लिप्सेथाः सर्वास्वापत्सु, भारत। ३

कुलीनः पूजितो नित्यं, न हि शक्तिं निगूहति,
प्रसन्नम् अप्रसन्नं वा पीडितं हतम् एव वा
आवर्तयति भूयिष्ठं तद् एव ह्यनुपालितम्। ४

७।१६०-१७४ ३३। लोकाः—जनाः, मनुष्य-सङ्घाः। लोकेश्वराः—मनुष्य-सङ्घानां शासितारः।

२। सम्यक—यथा-न्यायम्। सभा-सदो व्यवहार-निर्णायकाः। ३। सहाया युद्धादौ उपयोगिनः। ४। ह्यहत् उच्यते। आवर्तयति—प्रत्यर्पयति। अनुपालितम्—रक्षणम्। सुहृदः हित-कर्तारः।

कुलीना देश-जाः प्राज्ञाः रूपवन्तो बहु-श्रुताः
प्रगल्भाश् चानुरक्ताश् च, ते तव स्युः परिच्छदाः। ५

कुलीनाञ् शील-सम्पन्नान् इङ्गित-ज्ञान् अ-निष्ठुरान्
देश-काल-विधान-ज्ञान् भर्तृ-कार्य-हितैषिणः
नित्यम् अर्थेषु सर्वेषु राजा कुर्वीत मन्त्रिणः। ६

तस्मै मन्त्रः प्रयोक्तव्यो दण्डम् आधित्सता, नृप,
पौर-जानपदा यस्मिन् विश्वासं धर्मतो गताः। ७

मन्त्रिणां मन्त्र-मूलं हि राज्ञो राष्ट्रं विवर्धते।
नित्यं पञ्चोपधातीतैर् मन्त्रयेत् सह मन्त्रिभिः। ८

चतुरो ब्राह्मणान् वैद्यान् प्रगल्भान् स्नातकान् शुचीन्,
क्षत्रियान् दश चाष्टौ च बलिनः शस्त्र-पाणिनः, ९
वैश्यान् वित्तेन सम्पन्नान् एक-विंशतिं संख्यया,
त्रींश् च शूद्रान् विनीतांश् च शुचीन् कर्मणि पूर्वके, १०

५। प्रगल्भाः—निर्भीकाः। परिच्छदाः सेनापत्यादयः। ६। इङ्गित-ज्ञान्—नेत्र-वक्त्रादि-चेष्टित-ज्ञान्। ७। आधित्सता—आधातुं (धारयितुम्) इच्छता। ८। पञ्चोपधातीतैः—उपधाः छलानि। ताः करण-भेदात् पञ्च-विधा भवन्ति, मानसी वाचिकी कायिकी वाक्-कायिकी मनो-वाक्-कायिकी चेति। मानसी धृतराष्ट्रस्य जतु-गृहे, वाचिकी युधिष्ठिरस्य द्रोण-वधे, कायिकी अश्वत्थाम्नः सौप्तिके, वाक्-कायिकी भीमस्य द्रोण-वधे, मनो-वाक्-कायिकी च दुर्योधनस्य जतु-गृहे। ९। वैद्यान् [विद्या+अ, २। ब]—विद्यावतः, विदुषः। प्रगल्भान्—प्रत्युत्पन्न-मतीन्, प्रतिभान्वितान्।

अष्टाभिश् च गुणैर् युक्तं सूतं पौराणिकं तथा
पञ्चाशद्-वर्ष-वयसं प्रगल्भम् अनसूयकम्, ११
श्रुति-स्मृति-समायुक्तं विनीतं सम-दर्शिनम्
कार्ये विवदमानानां शक्तम् अर्थेष्वलोलुपम्
वर्जितं चैव व्यसनैः सु-घोरैः सप्तभिर् भृशम्। १२
अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत्।
ततः संप्रेषयेद् राष्ट्रे राष्ट्रीयाय च दर्शयेत्।
अनेन व्यवहारेण द्रष्टव्यास् ते प्रजाः सदा। १३
बलात्-कृतानां बलिभिः कृपणं बहु जल्पताम्
नाथो वै भूमि-पो नित्यम् अनाथानां नृणां भवेत्। १४

११। अष्टाभिर् गुणैः—अष्टाभिर् धी-गुणैः। 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा, ऊहो ऽपोहो ऽर्थ-विज्ञानं तत्त्व-ज्ञानं च धी-गुणाः'—हेच. (शकद्रु.)। ऊहः—परीक्षणम् (न्याको.)। अपोहः—अपर-तर्क-निरासाय कृतो विपरीत-तर्कः (न्याको.)। १२। श्रुतिः—श्रोत्रेन्द्रिय-जन्यं ज्ञानम्। स्मृतिः—संस्कारमात्रजन्यं ज्ञानम्। व्यसनैः सप्तभिः—'मृगयाक्षाः स्त्रियः पानं वाक्-पारुष्यार्थ-दूषणे, दण्ड-पारुष्यम् इत्येतज् ज्ञेयं व्यसन-सप्तकम्'—हेच. (शकद्रु.)। पानम्—सुरा-पानम्। अर्थ-दूषणम्—पित्रादि-सञ्चितार्थस्य नाशनम्। अक्षाः—अक्ष-क्रीडा, देवनम्। १३। अष्टानाम्—चत्वारो ब्राह्मणाः त्रयः शूद्रा एकः सूतश् चेति अष्टानाम्। उपधारयेत्—चिन्तयेत्, [मन्त्रार्थं] निर्धारयेत्। राष्ट्रे—जानपद-सङ्घे। राष्ट्रीयाय—जानपद-मुख्याय। पं. १—जानपद-सङ्घं ज्ञापयितुं राजा निर्धारणम् जानपद-मुख्याय प्रकाशयेत्।

राज्ञो वधं चिकीर्षेद् यस् तस्य चित्रो वधो भवेत्,
आदीपकस्य स्तेनस्य वर्ण-सङ्करिकस्य च । १५

न तु हन्याद् नृपो जातु दूतं कस्यांचिद् आपदि ।
दूतस्य हन्ता निरयम् आविशेत् सचिवैः सह । १६

कुलीनः शील-सम्पन्नो वाग्मी दक्षः प्रियं-वदः
यथोक्त-वादी स्मृतिमान् दूतः स्याद् सप्तभिर् गुणैः । १७

एतैर् एव गुणैर् युक्तः प्रतीहारो ऽस्य रक्षिता ।
शिरो-रक्षश् च भवति गुणैर् एतैः समन्वितः । १८

धर्म-शास्त्रार्थ-तत्त्व-ज्ञः सान्धिविग्रहिको भवेत्,
मतिमान् धृतिमान् ह्रीमान् रहस्य-विनिगूहिता । १९

कुलीनः सत्त्व-सम्पन्नः शुक्लो ऽमात्यः प्रशस्यते ।
एतैर् एव गुणैर् युक्तस् तथा सेना-पतिर् भवेत्, २०
व्यूह-यन्त्रायुधानां च तत्त्व-ज्ञो विक्रमान्वितः
वर्ष-शीतोष्ण-वातानां सहिष्णुः पर-रन्ध्र-वित् । २१

विश्वासयेत् परांश् चैव न विश्वसेच् च कस्यचित् ।
पुत्रेष्वपि हि, राजेन्द्र, विश्वासो न प्रशस्यते । २२

---

१५ । चित्रः—बहु-विधः । आदीपकस्य—गृहादि-दाहकस्य । १७ । शील-सम्पन्नः—सच्चरित्रः । १८ । प्रतीहारः—द्वार-पालः । शिरो-रक्षः—दुर्ग-नगरादि-प्रधान-स्थान-रक्षकः । २० । शुक्लः—शुचिः । एतैः—धर्म-शास्त्रार्थ-तत्त्व-ज्ञानादिभिः । २१ । वर्षम्—वृष्टिः । २२ । विश्वसेत्—विश्वस्यात् । श्न्वादित्वम् आर्षम् ।

बाह्यम् आभ्यन्तरं चैव पौरं जानपदं तथा
चारैः सु-विदितं कृत्वा ततः कर्म प्रयोजयेत्। २३

चारान् मन्त्रं च कोशं च दण्डं चैव विशेषतः
अनुतिष्ठेत् स्वयं राजा। सर्वं ह्यत्र प्रतिष्ठितम्। २४

उदासीनारि-मित्राणां सर्वम् एव चिकीर्षितम्
पुरे जन-पदे चैव ज्ञातव्यं चार-चक्षुषा। २५

कृपणानाथ-वृद्धानां विधवानां च योषिताम्
योग-क्षेमं च वृत्तिं च नित्यम् एव प्रकल्पयेत्। २६

आत्मानं सर्व-कार्याणि तापसे राष्ट्रम् एव च
निवेदयेत् प्रयत्नेन तिष्ठेत् प्रह्वश् च सर्वदा। २७

सर्वार्थ-त्यागिनं राजा, कुले जातं बहु-श्रुतम्,
पूजयेत् तादृशं दृष्ट्वा शयनासन-भोजनैः। २८

तस्मिन् कुर्वीत विश्वासं राजा कस्याञ्चिद् आपदि।
तस्मिन् निधीन् आदधीत पुनः प्रत्याददीत च। २९

नवमो ऽध्यायः

राष्ट्र-गुप्तिः

युधिष्ठिर उवाच,—

राष्ट्र-गुप्तिं च मे, राजन्, राष्ट्रस्यैव तु संग्रहम्
सम्यग् जिज्ञासमानाय प्रब्रूहि, भरतर्षभ। १

२४। अनुतिष्ठेत्—अनुशीलयेत्। २६। कृपणः—कृपार्हः, महा-विपदापन्नो दीन-[जनः]।

१। गुप्तिः—रक्षणम्, परिपालनम्। संग्रहम्—एकी-करणम्, स्वतन्त्राणां

भीष्म उवाच,—

ग्रामस्याधिपतिः कार्यो दश-ग्राम्यास् तथापरः।
द्वि-गुणायाः शतस्यैवं सहस्रस्य च कारयेत्। २

ग्रामेयान् ग्राम-दोषांश् च ग्रामिकः प्रतिभावयेत्।
तान् ब्रूयाद् दश-पायासौ, स तु विंशति-पाय वै। ३

सो ऽपि विंशत्यधिपतिर् वृत्तं जानपदे जने
ग्रामाणां शत-पालाय सर्वम् एव निवेदयेत्। ४

यानि ग्राम्याणि भोज्यानि, ग्रामिकस् तान्युपाश्नियात्।
दश-पस् तेन भर्तव्यस्, तेनापि द्वि-गुणाधिपः। ५

ग्रामं ग्राम-शताध्यक्षो भोक्तुम् अर्हति, सत्कृतः,
महान्तं, भरत-श्रेष्ठ, सु-स्फीतं जन-सङ्कुलम्। ६

शाखा-नगरम् अर्हस् तु सहस्र-पतिर् उत्तमः
धान्य-हिरण्य-भोगेन, भोक्तुं, राष्ट्रीय-सङ्गतः। ७

तेषां संग्राम-कृत्यं स्याद् ग्राम-कृत्यं च तेषु यत्,
धर्म-ज्ञः सचिवः कश्चित तत् प्रपश्येद्, अ-तन्द्रितः। ८

विभागानां केन्द्राधीनी-करणम्। सम्यग् जिज्ञासमानाय—निःशेषं ज्ञातुम् इच्छते। २। दश-ग्राम्याः [दश-ग्राम+ई, ६।१]—दशानां ग्रामाणाम्। ३। ग्रामेयान्—ग्रामीणान्, ग्राम-वासिनः। ग्रामिकः—ग्रामाधिपतिः। प्रतिभावयेत्—यथा-यथं निर्धारयेत्। Cf. मसं ७।११६, &c.। ४। वृत्तम्—व्यवहारम्। ५। उपाश्नियात्—उपाश्नीयात्। आप्र.। ७। भोगेन—भोगाय ग्रहणेन। भोक्तुम्—[स्वाधिकृत-ग्रामान्] पालयितुम्। राष्ट्रीय-सङ्गतः—राष्ट्रीय-नियमानु-गतः [सन्]। ८। अतन्द्रितः—अनलसः।

नगरे नगरे वा स्याद् एकः सर्वार्थ-चिन्तकः ।
उच्चैः स्थाने घोर-रूपो, नक्षत्राणाम् इव ग्रहः ९
भवेत् स । तान् परिक्रामेत् सर्वान् एव सभासदः ।
तेषां वृत्तिं परिणयेत् कश्चिद् राष्ट्रेषु तच्चरः । १०
जिघांसवः पाप-कामाः पर-स्वादायिनः शठाः
रक्षाभ्यधिकृता नाम । तेभ्यो रक्षेद् इमाः प्रजाः । ११
विक्रयं क्रयम् अध्वानं भक्तं च स-परिच्छदम्
योग-क्षेमं च संप्रेक्ष्य वणिजां कारयेत् करान् । १२
उत्पत्तिं दान-वृत्तिं च शिल्पं संप्रेक्ष्य चा-सकृत्
शिल्पं प्रति करान् एवं शिल्पिनः प्रति कारयेत् । १३
उच्चावच-करा दाप्या महा-राज्ञा, युधिष्ठिर ।
यथा यथा न सीदेरंस् तथा कुर्याद् मही-पतिः । १४
फलं कर्म च संप्रेक्ष्य ततः सर्वं प्रकल्पयेत् ।
फलं कर्म च निर्हेतु न कश्चित् संप्रवर्तते । १५

---

१० । तान्—ग्राम-पतीन् । परिक्रामेत्—[नगर-पतिः] इतस्ततो भ्रमित्वा परिपश्येत् । वृत्तिम्—व्यवहारम् । परिणयेत्—निश्चिनुयात्, निर्णयेत् , साक्षात् ज्ञात्वा निवेदयेत् । *Cf.* मसं ७।१२२ ११ । परस्वादायिनः—पर-धन-ग्रहीतारः । रक्षाभ्यधिकृताः—[राज्ञा] रक्षणे नियुक्ताः । १२ । योगक्षेमम्—अभ्युदयम्, उन्नतिम् । कारयेत्—दापयेत् । १४ । महा-राज्ञा—महा-राजेन । आप्र. । १५ । फलम्—फलनम्, कृषि-बाणिज्य-पशु-पालनादिभिर् धनोत्पादनम् । फलं...निर्हेतु—उद्दिश्य इति शेषः ।

नोच्छिन्द्याद् आत्मनो मूलं परेषां चापि तृष्णया,
ईहा-द्वाराणि संरुध्य, राजा, संप्रीत-दर्शनः । १६

प्रद्विषन्ति परिख्यातं राजानम् अति-खादिनम् ।
प्रद्विष्टस्य कुतः श्रेयो ? नाप्रियो लभते फलम् । १७

वत्सौपम्येन दोग्धव्यं राष्ट्रम् अ-क्षीण-बुद्धिना ।
भृतो वत्सो जात-बलः पीड़ां सहति, भारत । १८

न कर्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर ।
राष्ट्रम् अप्यति-दुग्धं हि न कर्म कुरुते महत् । १९

यो राष्ट्रम् अनुगृह्णाति परिरक्षन् स्वयं नृपः,
सं-जातम् उपजीवन् स लभते सु-महत् फलम् । २०

आपदर्थं च निचयान् राजानो हि विचिन्वते ।
राष्ट्रं च कोश-भूतं स्यात्, कोशो वेश्म-गतस् तथा । २१

पौर-जानपदान् सर्वान् संश्रितोपाश्रितांस् तथा
यथाशक्त्यनुकम्पेत, सर्वान्—स्वल्प-धनान् अपि । २२

---

१६ । आत्मनो मूलम्—राष्ट्रम् । परेषां [मूलम्]—कृष्यादि । ईहा—लोभः । १७ । परि-ख्यातम्—समन्तात् कीर्तितम् । अति-खादिनम्—उचिताधिक-भक्षम् । १८ । पीडाम्—[भार-वहनादि-कर्म-जनितं] क्लेशम् । २१ । आपदर्थम्—[भावि-] विपत्-प्रतिकाराय । निचयान्—[धन-] राशीन् । विचिन्वते—संचिन्वन्ति, संगृह्णन्ति । २२ । संश्रितान्—सङ्घे सम्मिलितान् । उपाश्रितान्—सङ्घाधीनान् ततो बहिः-स्थितान् अपि ।

बाह्यं जनं भेदयित्वा भोक्तव्यो मध्यमः सुखम् ।
एवं नास्य प्रकुप्यन्ति जनाः सुखित-दुःखिताः । २३

प्राग् एव तु धनादानम्, अनुभाष्य, ततः पुनः
सन्निपत्य स्व-विषये भयं राष्ट्रे प्रदर्शयेत्,— २४
"इयम् आपत् समुत्पन्ना, पर-चक्र-भयं महत् ।
अपि चान्ताय कल्पन्ते वेणोर् इव फलागमाः । २५

अरयो मे समुत्थाय बहुभिर् दस्युभिः सह
इदम् आत्म-वधायैव राष्ट्रम् इच्छन्ति बाधितुम् । २६

अस्याम् आपदि घोरायां संग्रामे दारुणे भये,
परित्राणाय भवतः प्रार्थयिष्ये धनानि वः । २७

प्रतिदास्ये च भवतां सर्वं चाहं भय-क्षये ।
नारयः प्रतिदास्यन्ति यद् हरेयुर् बलाद् इतः । २८

कलत्रम् आदितः कृत्वा सर्वं वो विनशेद् इति
शरीर-पुत्र-दारार्थम् अर्थ-सञ्चय इष्यते । २९

---

२३ । भोक्तव्यः—राजाभिमतं ग्राहितव्यः । मध्यमः—राज-प्रजा-मध्य-स्थः सङ्घ-स्थो जनः । अस्य—अस्मै । २२ । प्राग् धनादानम्—धन-ग्रहणात् प्राक् । संनिपत्य—[प्रजाभिः] संगम्य । स्व-विषये—[राज-भवनं परित्यज्य] स्वकीये राज-धाने जनपदे च । अनुभाष्य—[जनेभ्यो] भाषित्वा । २५ । पर-चक्रम्—शत्रु-सैन्यम् । वेणोः—वंश-वृक्षस्य । फलागमो हि वंशस्य जीवनान्ताय कल्पते । २६ । दस्युभिः—पर-देशिभिर् बर्बरैः । बाधितुम्—आक्रमितुम्, क्षणितुम् । २९ । विनशेत्—विनश्येत् । श्वादित्वम् आर्षम् ।

नन्दामि वः प्रभावेण पुत्राणाम् इव चोदये ।
यथा-शक्त्युपगृह्णामि राष्ट्रस्यापीड़या च वः । ३०

आपत्स्वेव निवोढ़व्यं भवद्भिः सङ्गतैर् इह ।
न वः प्रियतरं कार्यं धनं कस्याञ्चिद् आपदि । ३१

इति वाचा मधुरया श्लक्ष्णया सोपचारया
स्व-रश्मीन् अभ्यवसृजेद् योगम् आधाय काल-वित् । ३२

उपेक्षिता हि नश्येयुर् गोमिनो ऽरण्य-वासिनः ।
तस्मात् तेषु विशेषेण मृदु-पूर्वं समाचरेत् । ३३

अजस्रम् उपयोक्तव्यं फलं गोमिषु, भारत ।
प्रभावयन्ति राष्ट्रं च व्यवहारं कृषिं तथा । ३४

तस्माद् गोमिषु यत्नेन प्रीतिं कुर्याद् विचक्षणः
दयावान् अ-प्रमत्तश् च, करान् संप्रणयन् मृदून् । ३५

सर्वत्र क्षेम-चरणं सुलभं नाम गोमिषु ।
न ह्यतः सदृशं किञ्चिद् धनम् अस्ति, युधिष्ठिर । ३६

---

३० । उदये—उन्नतौ । यथा-शक्ति—भवतां दान-शक्तिम् अनतिक्रम्य । ३१ । निवोढ़व्यम्—भारो वोढ़व्यः । वः—युष्माकम्—युष्माभिः । प्रियतरम्—अति-प्रियम् . प्रियत्वेन अ-त्याज्यम् । ३२ । स्व-रश्मीन्—आत्म-किरण-भूतान् अधिकारिणः पुरुषान् । अभ्यवसृजेत्—[प्रजाभ्यो धनम् उद्-ग्रहीतुम्] प्रेरयेत् । योगम्—[धन-प्राप्तेर्] उपायम् । ३३ । गोमिनः—वैश्याः । ३४ । अजस्रम्—निरन्तरम् । उपयोक्तव्यम्—उत्साहयितव्यम् । प्रभावयन्ति—'गोमिनः' इति शेषः । ३५ । संप्रणयन्—विदधत् ।

मधु-दोहं दुहेद् राष्ट्रं भ्रमरा इव पादपम्।
वत्सापेक्षी दुहेच् चैव स्तनांश् च न विकुट्टयेत्। ३७

अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत्।
ततो भूयस् ततो भूयः क्रम-वृद्धिं समाचरेत्। ३८

दमयन्न् इव दम्यानि शश्वद् भारं विवर्धयेत्;
मृदु-पूर्वं प्रयत्नेन पाशान् अभ्यवहारयेत्। ३९

यथा-मुख्यान् सान्त्वयित्वा भोक्तव्या इतरे जनाः।
न चास्थाने न चाकाले करांस् तेभ्यो निपातयेत्। ४०

पानागार-निवेशाश् च वेश्याः प्रापणिकास् तथा
कुशीलवाः स-कितवा ये चान्ये केचिद् ईदृशाः, ४१

नियम्याः सर्व एवैते, ये राष्ट्रस्योपघातकाः।
एते राष्ट्रे ऽभितिष्ठन्तो बाधन्ते भद्रिकाः प्रजाः। ४२

न केनचिद् याचितव्यः कश्चित् किञ्चिद् अनापदि
इति व्यवस्था भूतानां पुरस्ताद् मनुना कृता। ४३

३७। दुहेत्—दुह्यात्। तुआ। विकुट्टयेत्—विच्छिन्द्यात्। ३९। दमयन्—शासत्। दम्यानि—दम्यान्, भार-वहनादि-योग्य-वयसो ऽपि अ-शिष्टान् तरुणान् अनडुहः। अभ्यवहारयेत्—ग्राहयेत्। ४१। पानागार-निवेशाः—मद्य-शाला-पल्लयः। प्रापणिकाः—भ्राम्यन्तः पण्य-विक्रयिणः। कुशीलवाः—चारणाः। कितवाः—द्यूत-काराः। ४२। नियम्याः—दमनार्हाः। उपघातकाः—क्षति-कारकाः। भद्रिकाः—सदाचाराः।

सर्वे तथानुजीवेयुर् न कुर्युः कर्म चेद् इह,
सर्वा एव इमे लोका न भवेयुर् अ-संशयम् । ४४

आपद्येव तु याचेरन् येषां नास्ति परिग्रहः ।
दातव्यं धर्मतस् तेभ्यस् त्वनुक्रोशाद्, भयाद् न तु । ४५

मा ते राष्ट्रे याचनका भवेयुर् मा च दस्यवः ।
उपादातार एवैते, नैते भूतस्य भावकाः । ४६

दण्ड्यास् ते च, महा-राज, धनादान-प्रयोजकाः ।
प्रयोगं कारयेथास् ते यथा दद्युः करांस् तथा । ४७

कृषि-गो-रक्ष्य-वाणिज्यं यच् चान्यत् किञ्चिद् ईदृशम्,
पुरुषैः कारयेत् कर्म बहुभिः कर्म-भेदतः । ४८

धनिनः पूजयेद् नित्यं पानाच्छादन-भोजनैः ।
वक्तव्याश् चानुगृह्णीध्वं प्रजाः सह मयेति वै । ४९

---

४४ । अनुजीवेयुः—अन्यम् आश्रित्य जीवेयुः । चेत्—यदि । न भवेयुः—नश्येयुः, उत्सीदेयुः । *Cf.* गी. ३।२४ ४५ । परिग्रहः—प्रतिग्रहः, विधिवद् दत्तस्य द्विज-ग्रहण-योग्यस्य धनस्य ग्रहणम् । अनुक्रोशात्—अनुकम्पया । ४६ । याचनकाः [याच्+अन-क, १।ब]—याचकाः, भिक्षुकाः । उपादातारः—येन केनचित् उपायेन ग्रहीतारः । भावकाः—उपकारकाः । ४७ । प्रयोजकाः—प्रवर्तकाः । प्रयोगम्—प्रवर्तनम् । ४८ । गो-रक्ष्यम्—गो-रक्षस्य (गो-पालकस्य, पशु-पालकस्य) कर्म, पशु-पालनम् । कर्म-भेदतः—[पुरुष-गुणानु-सारि-] कर्म-विभागम् अनुसृत्य । पं २—बहून् पुरुषान् नियोज्य यो यत् कर्म कर्तुं शक्तः तत् तेन कारयेत् ।

अङ्गम् एतद् महद् राज्ये धनिनो नाम, भारत।
ककुदं सर्व-भूतानां धन-स्थो, नात्र संशयः। ५०

प्राज्ञः शूरो धन-स्थश् च स्वामी धार्मिक एव च
तपस्वी सत्य-वादी च बुद्धिमांश् चापि रक्षति। ५१

तस्मात् सर्वेषु भूतेषु प्रीतिमान् भव, पार्थिव।
सत्यम् आर्जवम् अ-क्रोधम् आनृशंस्यं च पालय। ५२

अतीत-दिवसे वृत्तं प्रशंसन्ति न वा पुनः ?
गुप्तैश् चारैर् अनुमतैः पृथिवीम् अनुसारयेत्। ५३

जानीत 'यदि मे वृत्तं प्रशंसन्ति न वा पुनः,
कच्चिद् रोचेज् जन-पदे कच्चिद् राष्ट्रे च मे यशः'। ५४

विमानितो हतः क्लिष्टस् त्रातारं चेद् न विन्दति,
अ-मानुष-कृतस् तत्र दण्डो हन्ति नराधिपम्। ५५
मा स्म, तात, बल-स्थस् त्वं भुञ्जीथा दुर्बलं जनम्।
मा त्वां दुर्बल-चक्षूंषि दहन्त्वग्निर् इवाशयम्! ५६

यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि रोदताम्,
तानि पुत्रान् पशून् घ्नन्ति तेषां मिथ्याभिशंसिनाम्। ५७

यदि नात्मनि, पुत्रेषु ; न चेत् पुत्रेषु, नप्तृषु ;
न हि पापं कृतं कर्म सद्यः फलति गौर इव। ५८

५०। ककुदम्—श्रेष्ठांशः। ५५। विमानितः—अवमानितः। ५७। अभिशस्तानाम् [अभि-शंस्+त, ६। व]—मिथ्या-दूषितानाम्, मिथ्यापवादितानाम्। अभि-शंसिनाम्—मिथ्या-दूषकाणाम्। मिथ्या शब्दस्य पृथक्-प्रयोगः मिथ्यैकान्तिकत्वं सूचयति।

पौर-जानपदा यस्य स्वनुरक्ता अ-पीड़िताः,
राष्ट्र-कर्म-करा ह्येते। राष्ट्रस्य च विरोधिनः
दुर्विनीता विनीताश् च, सर्वे साध्याः प्रयत्नतः। ५९
पौर-जानपदा यस्य भूतेषु च दयालवः
स-धना धान्यवन्तश् च, दृढ़-मूलः स पार्थिवः। ६०
प्रताप-कालम् अधिकं यदा मन्येत चात्मनः,
तदा लिप्सेत मेधावी पर-भूमिं धनान्युत। ६१

दशमो ऽध्यायः

विजिगीषु-कृत्यम्

युधिष्ठिर उवाच,—

अथ यो विजिगीषेत क्षत्रियः क्षत्रियं युधि,
कस् तस्य विजये धर्मो ह्येतं पृष्टो ब्रवीहि मे। १

भीष्म उवाच,—

स-सहायो ऽ-सहायो वा, राष्ट्रम् आगम्य भूमि-पः
ब्रूयाद्,—"अहं वो राजेति रक्षिष्यामि च वः सदा। २
मम धर्म-बलिं दत्त, किं वा मां प्रतिपत्स्यथ।"
ते चेत् तम् आगतं तत्र वृणुयुः, कुशलं भवेत्। ३

५९। साध्याः— वशी-कर्तव्याः।

२। भूमि-पः—[विजिगीषुर् अनुपस्थित-प्रतिपक्षश् च] राजा।

३। धर्म-बलिम्—धर्म्यं राज-स्वम्। प्रतिपत्स्यथ—शरणम् आगमिष्यथ, शरणम् आगच्छत। पआ.। लोडर्थे लृट्।

ते चेद् अ-क्षत्रियाः सन्तो विरुध्येरन् कथञ्चन,
सर्वोपायैर् नियन्तव्या विकर्मस्था, नराधिप। ४

ना-सन्नद्धो ना-कवचो योद्धव्यः क्षत्रियो रणे।
एक एकेन वाच्यश् च विसृजेति क्षिपामि च। ५

स चेत् सन्नद्ध आगच्छेत्, सन्नद्धव्यं ततो भवेत्।
स चेत् स-सैन्य आगच्छेत्, स-सैन्यस् तम् अथाह्वयेत्। ६

स चेद् निकृत्या युध्येत, निकृत्या प्रतियोधयेत्।
अथ चेद् धर्मतो युध्येद् धर्मेणैव निवारयेत्। ७

व्यसने न प्रहर्तव्यं न भीताय जिताय च।
नेषुर् लिप्तो न कर्णी स्याद्। अ-सताम् एतद् आयुधम्। ८

यो वै जयत्यधर्मेण क्षत्रियो धर्म-सङ्गरः,
आत्मानम् आत्मना हन्ति पापो निकृति-जीवनः। ९

महा-दृतिर् इवाध्मातः स्व-कृतेनैव वर्धते।
ततः स-मूलो ह्रियते नदी-कूलाद् इव द्रुमः। १०

बलेन विजितो यश् च न तं युध्येत भूमि-पः।
संवत्सरं विप्रणयेत्, तस्माज् जातः पुनर् भवेत्। ११

५। अ-सन्नद्धः— अ-बद्धास्त्रः। ६। आह्वयेत्—आह्वयेत, स्पर्धेत। ८। लिप्तः—[विष-]दिग्धः। कर्णी—स-पक्षः, प्रतीप-कण्टक पआ.। ऋजु-बाणः। ९। धर्म-सङ्गरः—धर्मं रक्षिष्यामीति कृत-प्रतिज्ञः। १०। दृतिः—चर्म-कोषः। आध्मातः—वायु-पूरितः, स्फीतः। वर्धते—अति-पुष्टो भवति। ११। बलेन—[स्व-] सैन्येन। [बाह्येन] सम्यक् शिक्षयेत्। पुनः—विप्रणयेत्—[दासो ऽस्मीति वद इति]

नार्वाक् संवत्सरात् कन्या प्रष्टव्या विक्रमाहृता ।
एवम् एव धनं सर्वं यच् चान्यत् सहसाहृतम् । १२

राज्ञा राजैव योद्धव्यस्, तथा धर्मो विधीयते ।
नान्यो राजानम् अभ्यस्येद् अ-राजन्यः कथञ्चन । १३

अनीकयोः संहतयोर् यदीयाद् ब्राह्मणो ऽन्तरा
शान्तिम् इच्छन्न्, उभयतो न योद्धव्यं तदा भवेत् । १४

आहवे तु हतं शूरं न शोचेत कथञ्चन ।
नह्यन्नं नोदकं तस्य न स्नानं नाप्यशौचकम् । १५

वराप्सरः-सहस्राणि शूरम् आयोधने हतम्
त्वरमाणानि धावन्ति 'मम भर्ता भवेद्' इति । १६

युधिष्ठिर उवाच,—

किं-शीलाः किं-समाचाराः कथं-रूपाश् च, भारत,
किं-सन्नाहाः कथं-शस्त्रा जनाः स्युः सङ्गरे क्षमाः ? १७

संवत्सरात् परम् । तस्माज् जातः—विजेतुर् उपन्नः [पुत्र एव] । पुत्र इव मोक्तव्यः इत्यर्थः । १२ । नार्वाक् संवत्सरात्—वत्सरान्तात् पूर्वं न । प्रष्टव्या—'अपि माम् अन्यं वा वरयितुम् इच्छसि ?' इत्येवं जिज्ञासनीया । वत्सरान्ते अन्यार्थिनी न स्व-गृहे स्थापयितव्या इति भावः । स्प्रष्टव्या इति पाठो न साधुः । स्प्रष्टव्या—स्पर्शनीया । एवम् एव—एवम् एव [वत्सरान्ते स्वामिने प्रत्यर्पणीयम्] । अन्यत्—दास-दास्यादिकम् । सहसाहृतम् [सहसा+आहृतम्]—बलात्कारेण आनीतम् । १३ । अभ्यस्येत्—अभिमुखम् [अस्त्रं] क्षिपेत् । अ-राजन्यः—अ-क्षत्रियः । १४ । संहतयोः—मिलितयोः । अन्तरा—मध्ये ।

भीष्म उवाच,—

गान्धाराः सिन्धु- सौवीरा नखर-प्रास-योधिनः
अभीरवः सु-बलिनस् । तद्-बलं सर्व-पार-गम् । १८
सर्व-शस्त्रेषु कुशलाः सत्त्ववन्तो ह्युशीनराः ।
प्राच्या मातङ्ग-युद्धेषु कुशलाः, कूट-योधिनः । १९
तथा यवन-काम्बोजा मथुराम् अभितश् च ये,
एते ऽश्व-युद्ध-कुशला । दाक्षिणात्यासि-चर्मिणः । २०
सर्वत्र शूरा जायन्ते महा-सत्त्वा महा-बलाः—
आवन्तिका महा-शूराश्, चतुरङ्गे च मालवाः ।
एको ऽपि हि सहस्रस्य तिष्ठत्यभिमुखो रणे । २१

एका-दशो ऽध्यायः

गण-तन्त्रम्

युधिष्ठिर उवाच,—

गणानां वृत्तिम् इच्छामि श्रोतुं, मतिमतां वर,
यथा गणाः प्रवर्धन्ते न भिद्यन्ते च, भारत,
अरींश् च विजिगीषन्ते सुहृदः प्राप्नुवन्ति च । १

संशोधनो । पृ. ५४३ श्लो. ४, पुरुपो पुरुषो भवेत् । पृ. ५४७ श्लो. १२, दशमांश दशमं । ५६३ पृ. १२ टी. पं. १ पं. २ ।

२० । अश्व-युद्ध-कुशलाः—'नियुद्ध-कुशलाः' इति प्रतीचां पाठः ।

१ । प्रवर्धन्ते—समृध्यन्ति । भिद्यन्ते—[शत्रोर् भेद-नीत्या] उच्छिद्यन्ते । विजिगीषन्ते—विजेतुं समीहन्ते ।

भेद-मूलो विनाशो हि गणानाम्, उपलक्षये ।
मन्त्र-संवरणं दुःखं बहूनाम् इति मे मतिः । २

भीष्म उवाच,—

गणानां च कुलानां च राज्ञां, भरत-सत्तम,
वैर-सन्दीपनाव् एतौ लोभामर्षौ, नराधिप । ३
लोभम् एको हि वृणुते ततो ऽमर्षम् अनन्तरम् ।
तौ क्षय-व्यय-संयुक्ताव् अन्योन्यं च विनाशिनौ । ४
चार-मन्त्र-बलादानैः साम-दान-विभेदनैः—
क्षय-व्यय-भयोपायैः प्रकर्षन्तीतरेतरम् । ५
तत्रादानेन भिद्यन्ते गणाः संघात-वृत्तयः ।
भिन्ना वि-मनसः सर्वे गच्छन्त्यरि-वशं भयात् । ६
भेदे गणा विनश्येयुर्, भिन्नास् तु सु-जयाः परैः ।
तस्मात् संघात-योगेन प्रयतेरन् गणाः सदा । ७

---

२ । मन्त्र-संवरणम्—निगूढ़-निर्धारण-संगोपनम् । ३ । कुलानां राज्ञाम्—राज-कुलानाम्, शासनाधिकारवतां कुलानाम् । कुलम्—गोष्ठी । अमर्षः—अ-सहिष्णुता, ईर्षा । ४ । एकः—गणानां (गण-सदस्यानां) कुलानां वा इति शेषः । तौ—लोभामर्षौ । अन्योन्यम्—अन्योन्यस्य । ५ । मन्त्रः—कु-मन्त्रः । बलम्—सैन्यम् । विभेदनम्—भेदः । क्षय...पायैः—'अन्यैश् च' इति शेषः । प्रकर्षन्ति—उत्पीड़यन्ति । ६ । आदानेन—[उक्तानाम् उपायानां] ग्रहणेन । सङ्घात-वृत्तयः—सम्मिलन-जीवनाः । वि-मनसः—अन्य-मनस्काः, उदासीनाः । ७ । संघात-योगेन—ऐकमत्य-प्रयोगेण ।

अर्थाश् चैवाधिगम्यन्ते संघात-बल-पौरुषैः।
बाह्याश् च मैत्रीं कुर्वन्ति तेषु संघात-वृत्तिषु। ८

ज्ञान-वृद्धाः प्रशंसन्ति शुश्रूषन्तः परस्परम्,
विनिवृत्ताभिसन्धानाः सुखम् एधन्ति सर्वशः। ९

धर्मिष्ठान् व्यवहारांश् च स्थापयन्तश् च शास्त्रतः
यथावत् प्रतिपश्यन्तो विवर्धन्ते गणोत्तमाः। १०

पुत्रान् भ्रातृन् निगृह्णन्तो विनयन्तश् च तान् सदा
विनीतांश् च प्रगृह्णन्तो विवर्धन्ते गणोत्तमाः। ११

चार-मन्त्र-विधानेषु कोश-संनिचयेषु च
नित्य-युक्ता, महा-बाहो, वर्धन्ते सर्वतो गणाः। १२

प्राज्ञाञ् शूरान् महोत्साहान् कर्मसु स्थिर-पौरुषान्
मानयन्तः सदा युक्तान् विवर्धन्ते गणा, नृप। १३

द्रव्यवन्तश् च शूराश् च शास्त्र ज्ञाः शास्त्र-पार-गाः
कृच्छ्रास्वापत्सु सं-मूढान् गणाः सं-तारयन्ति ते। १४

८। अर्थाः—सम्पत्तयः। संघात-बल-पौरुषैः—सम्मिलित-गण-सैन्य-पराक्रमैः। बाह्याः—बहिः-स्थिताः। ९। शुश्रूषन्तः परस्परम्—परस्परात् श्रोतुम् इच्छन्तः। विनिवृत्ताभिसन्धानाः—वञ्चना-वर्जिताः। एधन्ति—एधन्ते, वर्धन्ते। पआ.। १०। प्रतिपश्यन्तः—अन्योन्यं प्रति शुभ-दृष्टिमन्तः। ११। निगृह्णन्तः—नियमयन्तः। विनयन्तः—शिक्षयन्तः। विनीतान्—शिक्षितान्। प्रगृह्णन्तः—[गण-कर्माणि] आददानाः। १२। संनिचयेषु—सम्यक्-संग्रहेषु। १४। द्रव्यवन्तः—धनिनः।

क्रोधो भेदो भयं दण्डः कर्षणं निग्रहो वधः
नयत्यरि-वशं सद्यो गणान्, भरत-सत्तम । १५

तस्माद् मानयितव्यास् ते गण-मुख्याः प्रधानतः ।
लोक-यात्रा समायत्ता भूयसी तेषु, पार्थिव । १६

मन्त्र-गुप्तिः प्रधानेषु चारश् चामित्र-कर्षण ।
न गणाः कृत्स्नशो मन्त्रं श्रोतुम् अर्हन्ति, भारत ।
गण-मुख्यैस् तु संभूय कार्यं गण-हितं मिथः । १७

पृथग् गणस्य भिन्नस्य विततस्य ततो ऽन्यथा ।
अर्थाः प्रत्यवसीदन्ति तथानर्था भवन्ति च । १८

तेषाम् अन्योन्य-भिन्नानां स्व-शक्तिम् अनुतिष्ठताम्
निग्रहः पण्डितैः कार्यः क्षिप्रम् एव प्रधानतः । १९

कुलेषु कलहा जाताः कुल-वृद्धैर् उपेक्षिताः
गोत्रस्य नाशं कुर्वन्ति । गण-भेदस्य कारकम् २०

आभ्यन्तरं भयं रक्ष्यम् । अ-सारं बाह्यतो भयम् ।
आभ्यन्तरं भयं, राजन्, सद्यो मूलानि कृन्तति । २१

---

१५ । भयम्—[अन्योन्य-विश्वासाभाव-जनितस्] त्रासः । दण्डः—प्रहारः । कर्षणम्—अत्याचारः । निग्रहः—पीडनम् । १६ । मानयितव्याः—अनुसर्तव्याः । गण-मुख्याः—गण-नेतारः । प्रधानतः—प्रधानेन, प्रधानम् आश्रित्य । १७ । संभूय—मिलित्वा । १८ । विततस्य—विस्तृतस्य, असंहतस्य । प्रत्यवसीदन्ति—क्षीयन्ते । १९ । निग्रहः—दमनम् । पण्डितैः—[दण्ड-नीति-] विशारदैः । २१ । भयं रक्ष्यम्—भयात् रक्षितव्यम् । सद्यः—अचिरेणैव ।

अकस्मात् क्रोध-मोहाभ्यां लोभाद् वापि स्व-भावजात्
अन्योन्यं नाभिभाषन्ते । तत् पराभव-लक्षणम् । २२

जात्या च सदृशाः सर्वे कुलेन सदृशास् तथा ।
न चोद्योगेन बुद्ध्या वा रूप-द्रव्येण वा पुनः— २३

भेदाच् चैव प्रदानाच् च नाम्यन्ते रिपुभिर् गणाः ।
तस्मात् संघातम् एवाहुर् गणानां शरणं महत् । २४

द्वा-दशो ऽध्यायः

सत्यानृतम्

युधिष्ठिर उवाच,—

किं स्वित् सत्यं, किम् अनृतं, किं स्विद् धर्म्यं सनातनम् ?
कस्मिन् काले वदेत् सत्यं ? कस्मिन् वाप्यनृतं वदेत् ? १

भीष्म उवाच,—

सत्यस्य वचनं साधु । न सत्याद् विद्यते परम् ।
यत् तु लोके सु-दुर्ज्ञेयं तत् ते वक्ष्यामि, भारत । २

भवेत् सत्यम् अ-वक्तव्यं वक्तव्यं अनृतं भवेत्
यत्रानृतं भवेत् सत्यं सत्यं वाप्यनृतं भवेत् । ३

अप्यनार्यो ऽ-कृत-प्रज्ञः पुरुषो ऽप्यति-दारुणः
सु-महत् प्राप्नुयात् पुण्यं बलाको ऽन्ध-वधाद् इव । ४

---

२२ । नाभिभाषन्ते—'गण-सदस्याः' इति शेषः । २३ । जात्या—जन्मना । रूप-द्रव्येण—दैहिक-सौन्दर्येण । २४ । संघातः—संमिलनम् ।
२ । वचनम्—कथनम् । ४ । बलाको ऽन्ध-वधाद् इव—अन्धस्य

किम् आश्चर्यं च, यद् मूढो धर्म-कामो ऽप्य् । अ-धर्म-वित्,
सु-महत् प्राप्नुयात् पुण्यं गङ्गायाम् इव कौशिकः ! ५

प्रभवार्थाय भूतानां धर्म-प्रवचनं कृतम् ।
यः स्यात् प्रभव-संयुक्तः स धर्म इति निश्चयः । ६

धारणाद् धर्म इत्याहुर् । धर्मेण विधृताः प्रजाः ।
यः स्याद् धारण-संयुक्तः स धर्म इति निश्चयः । ७

अहिंसार्थाय भूतानां धर्म-प्रवचनं कृतम् ।
यः स्याद् अहिंसा-संयुक्तः स धर्म इति निश्चयः । ८

श्रुतिर् धर्म इति ह्येके, नेत्याहुर् अपरे जनाः ।
न हि तत् प्रत्यसूयामो । न हि सर्वं विधीयते । ९

घ्राण-चक्षुषः श्वापदस्य सर्व-प्राणि-वधाय उद्यतस्य वधाद् बलाको नाम व्याधो हिंस्र-स्वभावोऽपि स्वर्गं जगाम । *Cf.* मभा. ८।६९।३९-४३ । ५ । मूढो धर्म-कामो ऽपि—कौशिको नाम तपस्वी धर्म-कामो ऽपि धन-प्राण-रक्षणाय पलायमानानां मार्गं दस्युभ्यः ख्यापयन् मौढ्यात् सत्य-कथनेन नर-हत्या-पापं भेजे । अत्र प्राणात्यये ऽपि मौनमेव युज्यत इति वक्तव्यम् । गङ्गायाम् इव कौशिकः—कौशिकः (पेचको) गङ्गा-तीरे तीक्ष्ण-विषया सर्प्या स्थापितानि अण्डानि भित्त्वा सद्यो-लोक-नाशकान् महाविषान् सर्पान् सहस्रशो नाशयन् धर्मम् अजानन्न् अपि पुण्यं प्राप्नोति । ४-५ । अत्र तु वक्तव्यम् 'कर्तुर् अभिसन्धिर् एव कर्मणः पाप-पुण्यत्वे हेतुर्' इति । ६ । प्रभवार्थाय—अभ्युदयाय । प्रवचनम्—व्याख्यानम् । ७ । धारणम्—संरक्षणम् । ८ । अ-हिंसार्थाय—अ-पीडनाय । ९ । श्रुतिः—श्रुत्युक्तो ऽर्थः, श्रुति-विहितं कर्म । धर्म इति—[लोक-हिताय वेदस्याविर्भावात्]। नेति—[हिंसात्मक-स-काम-कर्मणो धर्मत्वाभावात्]।

ये ऽ-न्यायेन जिहीर्षन्तो धनम् इच्छन्ति कस्यचित्,
तेभ्यस् तु न तद् आख्येयं। स धर्म इति निश्चयः। १०

अ-कूजनेन चेद् मोक्षो, नावकूजेत् कथञ्चन।
अवश्यं कूजितव्यं वा शङ्केरन् वाप्यकूजनात्,
श्रेयस् तत्रानृतं वक्तुं सत्याद् इति विचारितम्। ११

न च तेभ्यो धनं दद्याच् छक्ये सति कथञ्चन।
पापेभ्यो हि धनं दत्तं दातारम् अपि पीडयेत्। १२

अ-विवाह्या अ-संभोज्या निकृत्यायतनं गताः
च्युता देव-मनुष्येभ्यो। यथा प्रेतास् तथैव ते। १३

यस्मिन् यथा वर्तति यो मनुष्यस्
तस्मिंस् तथा वर्तितव्यं। स धर्मः।
मायाचारो मायया बाधितव्यः।
साध्वाचारः साधुनैवाभ्युपेयः। १४

तत्—[वेदोक्त-कर्म-विषयकं] मत-द्वैधम्। प्रत्यसूयामः—निन्दामः। सर्वम्—'वेदोक्तम्' इति शेषः। १०। ये...तेभ्यः—चोरेभ्यः। ११। [चोरेषु धनिकं पृच्छत्सु] अ-कूजनेन—अ-भाषणेन, मौनेन। अवकूजेत्—भाषेत। अवश्यं ... ... विचारितम्—नेदम् अभिमतं शाक्यसिंहाद्युपदिष्टेन शुद्ध-धर्मेण संवदति। १२। तेभ्यः—चोरेभ्यः। १४। नीतिर् एवैषा धर्म-विरुद्धा। सा तु वस्तुतो नीतिर् अपि न।

त्रयो-दशो ऽध्यायः

सरित्सागर-संवादः—वैतसी वृत्तिः

युधिष्ठिर उवाच,—

राजा राज्यम् अनुप्राप्य दुर्बलो, भरतर्षभ,
अ-मित्रस्याति-वृद्धस्य कथं तिष्ठेद्, अ-साधनः ? १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
सरितां चैव संवादं सागरस्य च, भारत। २

सुरारि-निलयः शश्वत् सागरः सरितां पतिः
पप्रच्छ सरितः सर्वाः संशयं जातम् आत्मनः,— ३

"स-मूल-शाखान् पश्यामि निहतान् कायिनो द्रुमान्
युष्माभिर् इह पूर्णाभिर्, अन्यांस् तत्र न वेतसान्। ४

अल्प-कायश् चाल्प-सारो वेतसः कूल-जश् च यः,
अवज्ञया वा नानीतः ? किं च वा तेन वः कृतम् ? ५

तद् अहं श्रोतुम् इच्छामि सर्वासाम् एव वो मतम्
यथा चेमानि कूलानि हित्वा नायाति वेतसः।" ६

तत्र प्राह नदी गङ्गा वाक्यम् उत्तरम् अर्थवत्
हेतुमद् ग्राहकं चैव सागरं सरितां पतिम्,— ७

४। निहतान्—विनाशितान्, उन्मूलितान्। कायिनः—महा-शरीरान्। अन्यान्—वृक्षान् इति शेषः। ७। ग्राहकम्—[हृदय-] ग्राहि।

"तिष्ठन्त्येते यथा-स्थानं नगा ह्येक-निकेतनाः।
ततस् त्यजन्ति तत् स्थानं प्रातिलोम्याद्। न वेतसः। ८
वेतसो वेगम् आयान्तं दृष्ट्वा नमति, नापरे।
स च वेगे ह्यतिक्रान्ते स्थानम् आपद्यते पुनः। ९
काल-ज्ञः समय-ज्ञश् च सदा वश्यश् च, नोद्धतः,
अनु-लोमस् तथास्तब्धस्, तेन त्वां नैति वेतसः। १०
मारुतोदक-वेगेन ये नमन्त्युन्नमन्ति च,
ओषध्यः पादपा गुल्मा, न ते यान्ति पराभवम्।" ११
यो हि शत्रोर् विवृद्धस्य, प्रभोर् बन्ध-विनाशने,
पूर्वं न सहते वेगं, क्षिप्रम् एव विनश्यति। १२
सारासारं बलं वीर्यम् आत्मनो द्विषतश् च यः
जानन् विचरति प्राज्ञो, न स याति पराभवम्। १३
एवम् एव यदा विद्वान् मन्यते विपुलं बलम्,
संश्रयेद् वैतसीं वृत्तिम्। एतत् प्रज्ञान-लक्षणम्। १४

युधिष्ठिर उवाच,—

मित्रैः प्रहीयमाणस्य बह्व-मित्रस्य का गतिः
राज्ञः, संक्षीण-कोशस्य बल-हीनस्य, भारत? १५

८। एक-निकेतनाः—स्तम्भवद् निश्चलावस्थानाः। प्रातिलोम्यात्—प्रातिकूल्येन, [अस्मत्-] प्रतिकूलतया। १२। प्रभोः—शक्तस्य। १४। वैतसीं वृत्तिम्—नमनीयताम्।

भीष्म उवाच,—

राजा राष्ट्रं यथापत्सु द्रव्यौघैः परिरक्षति,
राष्ट्रेण राजा व्यसने परिरक्ष्यस् तथा भवेत् । १६

(२) आपद्-धर्म-प्रकरणम्

चतुर्-दशो ऽध्यायः

विश्वामित्र-संवादः—दुर्भिक्षम्

युधिष्ठिर उवाच,—

केन स्विद् ब्राह्मणो जीवेज् जघन्ये काल आगते
अ-तितिक्षुः पुत्र-पौत्रान् अनुक्रोशाद्, नराधिप ? १

भीष्म उवाच,—

तस्मिंस् त्वभ्यागते काले प्रजानां दोष-कारके,
विज्ञान-बलम् आस्थाय जीवितव्यं भवेत् तदा । २

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
विश्वामित्रस्य संवादं चण्डालस्य च, पक्कणे । ३

---

१ । जघन्ये—निकृष्टतमे । अ-तितिक्षुः—अ-सहिष्णुः । पुत्र-पौत्रान्—क्षुधा-तृष्णा-क्लिष्टान् इति शेषः । अनुक्रोशात्—अनुकम्पातः । ३ । पक्कणे—चाण्डालागारे ।

त्रेता-द्वापरयोः सन्धौ पुरा दैव-व्यतिक्रमात्
अनावृष्टिर् अभूद् घोरा लोके, द्वादश-वार्षिकी । ४

न ववर्ष सहस्राक्षः । प्रतिलोमो ऽभवद् गुरुः ।
जगाम दक्षिणं मार्गं सोमो व्यावृत्त-मण्डलः । ५

नावश्यायो ऽपि तत्राभूत् । कुत एवाभ्र-राजयः ?
नद्यः संक्षिप्त-तोयौघाः किञ्चिद् अन्तर्गतास् ततः । ६

सरांसि सरितश् चैव कूपाः प्रस्रवणानि च
हत-त्विषो न लक्ष्यन्ते निसर्गाद् दैव-कारितात् । ७

उपशुष्क-जल-स्थाना विनिवृत्त-सभा-प्रपा
निवृत्त-यज्ञ-स्वाध्याया निर्वषट्कार-मङ्गला ८

उच्छिन्न-कृषि-गो-रक्षा निवृत्त-विपणापणा
निवृत्त-पूर्व-समया विप्रनष्ट-महोत्सवा ९

अस्थि-कङ्काल-सङ्कीर्णा महा-भूतारवाकुला
शून्य-भूयिष्ठ-नगरा दग्ध-ग्राम-निवेशना १०

क्वचिच् चौरैः क्वचिच् छूरैः क्वचिद् राजभिर् आतुरैः
परस्पर-भयाच् चैव शून्य-भूयिष्ठ-निर्जना ११

---

४ । दैव-व्यतिक्रमात्—दैव-कृतेन प्राकृतिक-नियमस्य व्यत्ययेन । ५ । सहस्राक्षः—इन्द्रः । प्रतिलोमः—वक्री । गुरुः—[दैव-] गुरुः, वृहस्पतिः । व्यावृत्त-मण्डलः—अन्यथा-भूत-परिवेषः । ६ । अवश्यायः—धूमिका, কোয়াসা, mist. ७ । हत-त्विषः—निष्प्रभाः, विनष्ट-शोभाः । ८ । जल-स्थानानि—जलाशयाः । ९ । विपणः—बिक्रयादिः । आपणः—हट्टः ।

गत-दैवत-संस्थाना वृद्ध-बाल-विनाकृता
गो-ऽजावि-महिषी-हीना परस्पर-पराहता १२

हत-विप्रा हतारक्षा प्रनष्टौषधि-सञ्चया
शव-भूत-नर-प्राया बभूव वसुधा तदा । १३

तस्मिन् प्रति-भये काले क्षीण-धर्मे, युधिष्ठिर,
बभ्रमुः क्षुधिता मर्त्याः खादमानाः परस्परम् । १४

ऋषयो, नियमांस् त्यक्त्वा परित्यज्याग्नि-देवताः,
आश्रमान् संपरित्यज्य, पर्यधावन्न् इतस्ततः । १५

विश्वामित्रो ऽथ भगवान् महर्षिर् अ-निकेतनः
क्षुधा-परिगतो धीमान् समन्तात् पर्यधावत,
त्यक्त्वा दारांश् च पुत्रांश् च, कस्मिंश् चिज् जन-संसदि । १६

स कदाचित् परिपतन्, श्वपचानां निवेशनम्
हिंस्राणां प्राणि-घातानाम् आससाद वने क्वचित्, १७

विभिन्न-कलशाकीर्णं श्व-चर्म-च्छेदना-युतम्,
वराह-खर-भग्नास्थि-कपाल-घट-सङ्कुलम्, १८

मृत-चेल-परिस्तीर्णं निर्माल्य-कृत-भूषणम्,
सर्प-निर्मोक-मालाभिः कृत-चिह्न-कुटी-मुखम्, १९

---

१२ । परस्पर-पराहता—परस्परेण पराहता (व्याहता) [जन्तवो] यत्र तादृशी । १३ । हतारक्षाः—हताः आरक्षाः (रक्षा-कर्तारो) यस्याः तादृशी ।

कुक्कुटाराव-बहुलं, गर्दभ-ध्वनि-नादितम्,
उद्घोषद्भिः खरैर् वाक्यैः कलहद्भिः परस्परम्, २०

उलूक-पक्षि-ध्वजिभिर् देवतायतनैर् वृतम्
लोह-घण्टा-परिष्कारं, श्व-यूथ-परिवारितम्। २१

तत् प्रविश्य, क्षुधाविष्टो विश्वामित्रो महान् ऋषिः
आहाराण्वेषणे युक्तः परं यत्नं समास्थितः, २२

न च क्वचिद् अविन्दत् स भिक्षमाणो ऽपि कौशिकः
मांसम् अन्नं फलं मूलम् अन्यद् वा तत्र किञ्चन। २३

'अहो कृच्छ्रं मया प्राप्तम्' इति निश्चित्य, कौशिकः
पपात भूमौ दौर्बल्यात् तस्मिंश् चण्डाल-पक्कणे। २४

स चिन्तयामास मुनिः 'किं नु मे सु-कृतं भवेत् ?
कथं वृथा न मृत्युः स्याद् ?' इति, पार्थिव-सत्तम। २५

स ददर्श श्व-मांसस्य कुतन्त्रीं विततां मुनिः
चण्डालस्य गृहे, राजन, सद्यः शस्त्र-हतस्य वै। २६

स चिन्तयामास तदा,--'स्तैन्यं कार्यम् इतो मया।
न हीदानीम् उपायो मे विद्यते प्राण-धारणे।' २७

'हीनाद् आदेयम् आदौ स्यात, समानात् तदनन्तरम्,
अ-सम्भवे त्वाददीत विशिष्टाद् अपि धार्मिकात्' २८

२५। वृथा—केवलात् अन्नाभावात्, धर्म-साधनेतर-कारणेन। २६। कुतन्त्रीम्—कुत्सितां शून्य-गर्भ-दण्डिकाम्। शस्त्र-हतस्य श्व-मांसस्य—शस्त्र-हतस्य शुनः मांसस्य। सापेक्षत्वे ऽपि गमकत्वात् समासः। २७। स्तैन्यम् [स्तेन + य, ११]—चौर्यम्।

एतां बुद्धिं समास्थाय विश्वामित्रो महा-मुनिः
तस्मिन् देशे स सुष्वाप श्वपचो यत्र, भारत । २६

स, विशालां निशां दृष्ट्वा सुप्ते चण्डाल-पक्कणे,
शनैर् उत्थाय भगवान् प्रविवेश कुटी-मुखम् । ३०

स सुप्त इव चण्डालः श्लेष्म-पिहित लोचनः
परिभिन्न-स्वरो रूक्षमः प्रोवाचाप्रिय-दर्शनः,— ३१

"कः कु-तन्त्रीं घट्टयति सुप्ते चण्डाल-पक्कणे ?
जागर्मि, नैव सुप्तो ऽस्मि," हतो ऽसीति च, दारुणः । ३२

विश्वामित्रस् ततो भीतः सहसा तम् उवाच ह,
तत्र व्रीड़ाकुल-मुखः, सोद्वेगस् तेत कर्मणा,— ३३

"विश्वामित्रो ऽहम्, आयुष्मन्न्, आगतो ऽहं बुभुक्षितः ।
मा वधीर् मम, सद्-बुद्धे, यदि सम्यक् प्रपश्यसि !" ३४

चण्डालस् तद् वचः श्रुत्वा महर्षेर् भावितात्मनः,
शयनाद् उपसंभ्रान्त उद्ययौ प्रति तं ततः । ३५

स, विमृज्याश्रु नेत्राभ्यां, बहु-मानात्, कृताञ्जलिः,
उवाच कौशिकं,—"रात्रौ, ब्रह्मन्, किं ते चिकीर्षितम् ?" ३६

विश्वामित्रस् तु मातङ्गम् उवाच, परिसान्त्वयन्,—
"क्षुधितो ऽन्तर्गत-प्राणो हरिष्यामि श्व-जाघनीम् । ३७

३१ । परिभिन्न-स्वरः—विकृत-कण्ठः । ३२ । घट्टयति—चालयति । ३४ । मम [प्राणान्]—माम् । ३७ मातङ्गम्—चाण्डालम् । अन्तर्गत-प्राणः—बहि-स्फुरण-हीन-प्राणः । जाघनीम्—[जघन-सामीप्यात्] ऊरुम् । Cf. मसं. १०।१०८ ।

अवसीदन्ति मे प्राणाः । श्रुतिर् मे नश्यति क्षुधा ।
सो, ऽ-धर्मं बुध्यमानो ऽपि, हरिष्यामि श्व-जाघनीम् । ३८
अटन् भैक्ष्यं न विन्दामि । यदा युष्माकम् आलये,
तदा बुद्धिः कृता पापे । हरिष्यामि श्व-जाघनीम् । ३९
अग्निर्, मुखं पुरो-धाश् च देवानां, शुचि-षाड् विभुः
यथा च सर्व-भुग् ब्रह्मा, तथा मां विद्धि धर्मतः ।" ४०
तम् उवाच स चण्डालो,—"महर्षे, शृणु मे वचः ।
मृगाणाम् अधमं श्वानं प्रवदन्ति मनीषिणः ।
तस्याप्यधम उद्देशः शरीरस्य तु जाघनी । ४१
नेदं सम्यग् व्यवसितं, महर्षे, धर्म-गर्हितम्
चण्डाल-स्वस्य हरणम्, अ-भक्ष्यस्य विशेषतः । ४२
साध्वन्यम् अनुपश्य त्वम् उपायं प्राण-धारणे,
न मांस-लोभात् तपसो नाशस् ते स्याद्, महा-मुने ।" ४३
विश्वामित्रस् ततो, राजन्न्, इत्युक्तो, भरतर्षभ,
क्षुधार्तः प्रत्युवाचेदं पुनर् एव महा-मुनिः,— ४४
"निराहारस्य सु-महान् मम कालो ऽभिधावतः,
न विद्यते ऽप्युपायश् च कश्चिद् मे प्राण-धारणे । ४५

---

३९ । विन्दामि—लभे । ४० । पुरोधाः—पुरोहितः । ऋवे. १।१।१ शुचि-षाट् [शुचि-सह् + ०, १।१]—मेध्य-सहः, पवित्र-वस्तु-मात्र-भोजी, स्व-स्पर्श-पवित्रीकृत-वस्तु-भोजी । ब्रह्मा—ब्राह्मणः । Cf. उपरिष्टात् १।४२।२० । ४२ । स्वस्य—धनस्य । ४५ । कालः—'व्यतीतः' इति शेषः ।

येन केन विशेषेण, कर्मणा येन केनचित्
अभ्युज्जीवेत्, साद्यमानः। समर्थो धर्मम् आचरेत्। ४६
सो ऽहं जीवितम् आकाङ्क्षन् अ-भक्ष्यस्यापि भक्षणम्
व्यवस्ये बुद्धि-पूर्वं वै। तद् भवान् अनुमन्यताम्। ४७
जीवन् धर्मं चरिष्यामि प्रणोत्स्याम्यशुभानि तु
तपोभिर् विद्यया चैव, ज्योतींषीव महत् तमः। ४८

मित्रं च मे ब्राह्मणस्यायम् आत्मा,
प्रियश् च मे पूज्यतमश् च लोके।
तं भर्तु-कामो ऽहम् इमां जिहीर्षे।
नृशंसानाम् ईदृशानां न बिभ्ये!" ४९

श्वपच उवाच,—

कामं नरा जीवितं संत्यजन्ति,
न चाभक्ष्ये कचित् कुर्वन्ति बुद्धिम्।
सर्वान् कामान् प्राप्नुवन्तीह, विद्वन्,—
प्रयस्व कामं सहितः क्षुधैव! ५०

४६। येन केन विशेषेण (सु-स्पष्ट-कारणेन) साद्यमानः (क्लिश्यमानः) इत्यन्वयः। ४७। व्यवस्ये—व्यवस्यामि, इच्छामि, अभिप्रैमि। आआ.। ४८। प्रणोत्स्यामि—अपसारयिष्यामि। ४९। आत्मा—देहम्। जिहीर्षे [हृ-स+ए]—हर्तुम् इच्छामि। ईदृशानाम्—ईदृशेभ्यः। पा. १।४।२५ बिभ्ये—बिभेमि। आआ.। ५०। श्वपचः—चण्डालः। कामम् (१)—स्वेच्छया। कामम् (२)—काम्य-वस्तु। प्रयस्व [प्री+स्व]—इच्छ, कामयस्व। सहितः क्षुधैव [जितया]—अनाहारेणैव। Cf. गी. २।७०।

विश्वामित्र उवाच,—

पिबन्त्येवोदकं गावो मण्डूकेषु रुवत्स्वपि ।
न ते ऽधिकारो धर्मे ऽस्ति । मा भूर् आत्म-प्रशंसकः ! ५१

श्वपच उवाच,—

सुहृद् भूत्वानुशासे त्वां । कृपा हि त्वयि मे, द्विज ।
तद् इदं श्रेय आधत्स्व ! मा लोभे चेत आदधाः ! ५२

विश्वामित्र उवाच,—

अद्याहम् एतद् वृजिनं कर्म कृत्वा,
जीवंश् चरिष्यामि महा-पवित्रम् ;
संपूतात्मा धर्मम् एवाभिपत्स्ये ।
यद् एतयोर् गुरु तद् वै ब्रवीहि । ५३

श्वपच उवाच,—

यद्येष हेतुस् तव खादने स्याद्,
न ते वेदः कारणं नार्य-धर्मः ।
तस्माद् भक्ष्ये भक्षणे वा, द्विजेन्द्र,
दोषं न पश्यामि यथेदम् अत्र । ५४

---

५१ । रुवत्सु—शब्दायमानेषु । धर्मे—धर्मानुशासने । मा भूः &c.—मा विकत्थस्व, मा आत्मानं धर्मोपदेष्टारं मन्यस्व । ५२ । अनुशासे—[धर्मम्] अनुशास्मि । आआ. । आधत्स्व—गृहाण । मा आदधाः—मा स्थापय । ५३ । वृजिनम्—पापम् । एतयोः—पापम् अकृत्वा मरणम् पापं कृत्वा धर्माचरणाय जीवनं च इत्येतयोः । गुरु—गुरुतरम्, श्रेयः । ब्रवीहि—ब्रूहि । आप्र. । ५४ । एषः—भविष्यति

गो. भा. २—३८

विश्वामित्र उवाच,—

नैवाति-पापं भक्षमाणस्य दृष्टं ।
रां तु पीत्वा पततीति शब्दः,
अन्योन्य-कार्याणि यथा तथैव ।
न पाप-मात्रेण कृतं हिनस्ति । ५५

श्वपच उवाच,—

अस्थानतो हीनतः कुत्सिताद् वा
—तद् विद्वांसं बाधते साधु-वृत्तम्—
श्वानं पुनर् यो लभते ऽभिषङ्गात्
तेनापि दण्डः सहितव्य एव । ५६

धर्मम् आचरितुं वर्तमाने पाप-कर्मणा जीवन-धारणम् । विधेय-प्राधान्यात् पुंस्त्वम् । खादने—[अभक्ष्य-] भक्षणे । कारणम्—चरित्र-नियामकः । तस्मात्—एवं सति । भक्ष्ये—खाद्ये [द्रव्ये] । इदम्—भक्षण-जनित-दोषस्यादर्शनम् । यथा अत्र—यथा तव विषये तथा सर्वत्रैव । तस्मात् &c.—एवं सति यथा अत्र तथैव सर्वत्र [अभक्ष्य-] भक्षण-जनितो दोषो न स्याद् एव । ५५ । अति-पापम्—अति-पातकम् यथा पुरुष-पक्षे मातृ-दुहितृ-स्नुषा-गमनम् नारी-पक्षे च पुत्र-पितृ-श्वशुर-गमनम् । भक्षमाणस्य—[अभक्ष्यं] भक्षयमाणस्य । आप्र. । दृष्टम्—द्रष्टृभिः (ऋषिभिर्) अनुभूतम् । शब्दः—[शास्त्रस्य] अनुशासन [मात्रम्] । अन्योन्य-कार्याणि—[अवैध-] मैथुनानि [कृत्वा पतति इति] । न...एव—'अभक्ष्य-भक्षणं पापम् इति शास्त्रानुशासनमात्रम्' इति भावः । कृतम्—पुण्यम् । हिनस्ति—नाशयति । 'कर्म' इति शेषः Cf. मसं. ५।५६ पं.४—[तादृशं कर्म] ईषत्-पापत्वे ऽपि कर्मणः पुण्यं न नाशयति । ५६ । अ-स्थानतः—कु-स्थानात्, [चाण्डाल-गृहात्]। हीनतः—

भीष्म उवाच,—

एवम् उक्त्वा निववृते मातङ्गः कौशिकं तदा ।
विश्वामित्रो जहारैव, कृत-बुद्धिः, श्व-जाघनीम् ।
स-दारस् ताम्, उपाहृत्य, वने भोक्तुम् इयेष सः । ५७
अथास्य बुद्धिर् अभवद्,--'विधिनाहं श्व-जाघनीम्
भक्षयामि यथा-कामं पूर्वं सन्तर्प्य देवताः' । ५८
ततो, ऽग्निम् उपसंहृत्य ब्राह्मेण विधिना, मुनिः
ऐन्द्राग्नेयेन विधिना चरुं श्रपयत स्वयम् । ५९
ततः समारभत् कर्म दैवं पित्र्यं च, भारत,
आहूय देवान् इन्द्रादीन् भागं भागं विधि-क्रमात् । ६०
एतस्मिन्न् एव काले तु प्रववर्ष स वासवः
सञ्जीवयन् प्रजाः सर्वा, जनयामास चौषधीः । ६१
विश्वामित्रो ऽपि भगवांस्, तपसा दग्ध-किल्बिषः,
कालेन महता सिद्धिम् अवाप परमाद्भुताम् । ६२
स, संहृत्य च तत् कर्म अनास्वाद्य च तद् हविः,
तोषयामास देवांश् च पितॄंश् च द्विज-सत्तमः । ६३

हीन-(नीच-) कर्मणा, चौर्येण । कुत्सितात्—कदर्यात्, दातुम् अनिच्छतः । अभि-षङ्गात्—अत्याग्रहेण । सहितव्यः—सोढव्यः । ५७ । उपाहृत्य—आनीय । ५९ । उपसंहृत्य—संगृह्य, उत्पाद्य । ब्राह्मेण (वैदिकेन) विधिना—अरणिभ्याम् । श्रपयत—अश्रपयत्, श्रपयामास, अपचत् । आप्र. । ६० । समारभत्—समारभत । पआ. । ६३ । संहृत्य—समाप्य । अनास्वाद्य—अभक्षयित्वा । हविः—हवनीय-द्रव्यम् । हवनम्—होमः ।

एवं विद्वान् अ-दीनात्मा व्यसन-स्थो जिजीविषुः
सर्वोपायैर् उपाय-ज्ञो दीनम् आत्मानम् उद्धरेत् । ६४

युधिष्ठिर उवाच,—

पितामह, महा-प्राज्ञ, सर्व-शास्त्र-विशारद,
शरणागतं पालयतो यो धर्मस् तं ब्रवीहि मे । ६५

भीष्म उवाच,—

शिवि-प्रभृतयो, राजन्, राजानः शरणं गतान्
परिपाल्य महात्मानः संसिद्धिं परमां गताः । ६६

अराव् अप्युचितं कार्यम् आतिथ्यम्, गृहम् आगते ।
छेत्तुम् अप्यागते छायां नोपसंहरते द्रुमः । ६७

पञ्च-दशो ऽध्यायः

गृध्र-गोमायु-संवादः—मृतोज्जीवनम्

युधिष्ठिर उवाच,—

कच्चिद् पितामहेनासीच् श्रुतं वा दृष्टम् एव च,
कश्चिद् मर्त्यो मृतो, राजन्, पुनर् उज्जीवितो ऽभवत् । १

भीष्म उवाच,—

कस्यचिद् ब्राह्मणस्यासीद् दुःख-लब्धः सुतो मृतः
बाल एव विशालाक्षो बाल-ग्रह-निपीड़ितः । २

---

६४ । जिजीविषुः [जीव्-स+उ, १।१]—जीवितुम् इच्छुः । Cf. मसं. १०।१०४।१०८

२ । बाल-ग्रहाः स्कन्द-शकुनी-रेवती-पूतनादयो बालक-हन्तारो भूत-विशेषाः ।

दुःखिताः केचिद् आदाय बालम् अप्राप्त-यौवनम्
कुल-सर्वस्व-भूतं वै, रुदन्तः शोक-विह्वलाः ३

बालं मृतं गृहीत्वाथ श्मशानाभिमुखाः स्थिताः ;
अङ्केनाङ्कं समाक्रम्य, रुरुदुर् भृश-दुःखिताः ;
तं बालं भू-तले क्षिप्य प्रतिगन्तुं न शक्नुयुः । ४

तेषां रुदित-शब्देन गृध्रो ऽभ्येत्य वचो ऽब्रवीत्,—
"प्रेतात्मकम् इमं काले त्यक्त्वा गच्छत मा चिरम् । ५

इह पुंसां सहस्राणि स्त्री-सहस्राणि चैव ह
समानीतानि कालेन हित्वा वै यान्ति बान्धवाः । ६

संपश्यत जगत् सर्वं सुख-दुःखैर् अधिष्ठितम् ।
संयोगो विप्रयोगश् च पर्यायेणोपलभ्यते । ७

गृहीत्वा ये च गच्छन्ति ये ऽनुयान्ति च तान् मृतान्,
ते ऽप्यायुषः प्रमाणेन स्वेन गच्छन्ति जन्तवः । ८

अलं स्थित्वा श्मशाने ऽस्मिन् गृध्र-गोमायु-संकुले ।
न पुनर् जीवितः कश्चित् काल-धर्मम् उपागतः । ९

दिशान्तोपचितो यावद् अस्तं गच्छति भास्करः,
गम्यतां स्वम् अधिष्ठानं सुत-स्नेहं विसृज्य वै ।" १०

---

५ । प्रेतात्मकम्—पर-लोक-गतात्मानम्, मृतम् । ९ । अलं स्थित्वा—अवस्थानेन किम् अपि प्रयोजनं नास्ति । काल-धर्मम् उपागतः—मृतः । १० । दिशान्तोपचितः—पश्चिम-दिगन्ते (दृष्टि-वलयस्य पश्चिम-भागे) वृद्धिं प्राप्तः ।

ततो गृध्र-वचः श्रुत्वा विक्रोशन्तस् तदा, नृप,
बान्धवास् ते ऽभ्यगच्छन्त पुत्रम् उत्सृज्य भू-तले । ११

ध्वाङ्क्ष-पक्ष-स-वर्णस् तु बिलाद् निःसृत्य जम्बुकः
गच्छमानान् स्म तान् आह,—"निर्घृणाः खलु मानुषाः ! १२
आदित्यो ऽयं स्थितो, मूढाः । स्नेहं कुरुत, मा भयम् !
बहु-रूपो मुहूर्ताच् च जीवेद् अपि च बालकः । १३
दर्भान् भूमौ विनिक्षिप्य पुत्र-स्नेह-विना-कृताः
श्मशाने सुतम् उत्सृज्य कस्माद् गच्छत, निर्घृणाः ? १४
न वो ऽस्त्यस्मिन् सुते स्नेहो बाले मधुर-भाषिणि !
न पश्यध्वं सुत-स्नेहो यादृशः पशु-पक्षिणाम् ? १५
मानुषाणां कुतः स्नेहो येषां शोको न विद्यते ?
इमं कुल-करं पुत्रं त्यक्त्वा क नु गमिष्यथ ? १६
सर्वस्य दयिताः प्राणाः, सर्वः स्नेहं च विन्दति ।
तिर्यग्-योनिष्वपि सतां स्नेहं पश्यत यादृशम् । १७
त्यक्त्वा कथं गच्छथेमं पद्म-लोलायतेक्षणम्
यथा नवोद्वाह-कृतं स्नान-माल्य-विभूषितम् ?" १८
जम्बुकस्य वचः श्रुत्वा, कृपणं परिदेवतः,
न्यवर्तन्त तदा सर्वे बालार्थं ते स्म मानुषाः । १९

१२ । ध्वाङ्क्षः—काकः । निर्घृणाः—निष्करुणाः । १३ । बहु-रूपः—एकदा एक-रूपः अन्यदा अन्य-रूपश् च । १४ । दर्भान्—दूर्वा-श्यामाक-कुशादीनि तृणानि । १८ । लोलम्—चञ्चलम्, स-तृष्णम् । १९ । परिदेवतः—परिदेवयमानस्य, विलपतः ।

गृध्रो नास्तमिते ऽभ्येति तिष्ठेद् नक्तं च जम्बुकः।
मृतस्य तं परिजनम् ऊचतुस् तौ क्षुधान्वितौ। २०

स्व-कार्य-बद्ध-कक्षौ तौ, राजन्, गृध्रो ऽथ जम्बुकः,
क्षुत्-पिपासा-परिश्रान्तौ शास्त्रम् आलम्ब्य जल्पतः। २१

तयोर् विज्ञान-विदुषोर् द्वयोर् मृग-पतत्रिणोः
वाक्यैर् अमृतकल्पैस् तैः प्रतिष्ठन्ते व्रजन्ति च। २२

तथा तयोर् विवदतोर् विज्ञान-विदुषोर् द्वयोः
बान्धवानां स्थितानां चाप्युपातिष्ठत शङ्करः। २३

देव्या प्रणोदितो देवः कारुण्यार्द्रीकृतेक्षणः
ततस् तान् आह मनुजान् वर-दो ऽस्मीति शङ्करः। २४

ते प्रत्यूचुर् इदं वाक्यं दुःखिताः प्रणताः स्थिताः,—
"पुत्रस्य नो जीव-दानाज् जीवितं दातुम् अर्हसि"। २५

एवम् उक्तः, स भगवान् वारि-पूर्णेन पाणिना
जीवं तस्मै कुमाराय प्रादाद् वर्ष-शतानि वै।
तथा गोमायु-गृध्राभ्यां प्राददात् क्षुद्-विनाशनम्। २६

ततस् ते त्वरिता, राजंस्, त्यक्त्वा शोकं शिशूद्भवम्,
विविशुः, पुत्रम् आदाय, नगरं, हृष्ट-मानसाः। २७

षोड़शो ऽध्यायः

धर्म-मूलम्

युधिष्ठिर उवाच,—

धर्मस्य महतो, राजन्, बहु-शाखस्य तत्त्वतः
यद् मूलं परमं, तात, तत् सर्वं ब्रूहि तत्त्वतः। १

भीष्म उवाच,—

धर्मस्य विधयो नैके ये वै प्रोक्ता महर्षिभिः
स्वं स्वं विज्ञानम् आश्रित्य। दमस् तेषां परायणम्। २

ज्ञानारामस्य बुद्धस्य सर्व-भूताविरोधिनः
नावृत्ति-भयम् अस्तीह ; पर-लोक-भयं कुतः ? ३

एक एव दमे दोषो, द्वितीयो नोपपद्यते,
यद् एनं दम-संयुक्तम् अ-शक्तं मन्यते जनः। ४

धर्मः साधारणः सत्यं सर्व-वर्णेषु, भारत।
सत्यम् एव नमस्येत। सत्यं हि परमा गतिः। ५

सत्यं च—समता चैव दमश् चैव, न संशयः,
अ-मात्सर्यं क्षमा चैव ह्रीस् तितिक्षानसूयता ६

२। वि-ज्ञानम्—अनुभूति-सिद्धं ज्ञानम्। परायणम्—परमाश्रयः। दमः &c.—सर्वे धर्मा दम एवान्तर्भूताः। ३। अ-वृत्तिः—जीविका-शून्यत्वम्, जीवनोपाय-विहीनत्वम्। ५। नमस्येत [नमस्-य+ईत]—नमस्येत्, नमः कुर्यात्। आआ.।

त्यागो ध्यानम् अथार्यत्वं धृतिश् च सततं दया
अ-हिंसा चैव, राजेन्द्र, सत्याकारास् त्रयोदश। ७

सत्यं नामाव्ययं नित्यम् अविकारि तथैव च।
सर्व-धर्माविरुद्धे न योगेनैतद् अवाप्यते। ८

नकुल उवाच—

कथं चोत्पादितः खड्गः कस्मै चार्थाय केन वा?
पूर्वाचार्यं च खड्गस्य प्रब्रवीहि, पितामह। ९

भीष्म उवाच,—

महर्षि-सुर-गन्धर्वान् उवाचेदं पितामहः,—
"मयैवं चिन्तितं भूतम्—असिर् नामैष वीर्यवान्— १०
रक्षणार्थाय लोकस्य वधाय च सुर-द्विषाम्।"

ततस् तं नील-कण्ठाय रुद्रायर्षभ-केतवे
ब्रह्मा ददाव् असिं तीक्ष्णम् अधर्म-प्रतिवारणम्। ११

ततः स भगवान् रुद्रो दानव-क्षतजोक्षितम्
असिं धर्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे। १२

विष्णुर् मरीचये प्रादाद्, मरीचिर् भगवान् अपि
महर्षिभ्यो ददौ खड्गम्, ऋषयो वासवाय च। १३

महेन्द्रो लोक-पालेभ्यो, लोक-पालास् तु, पुत्रक,
मनवे सूर्य-पुत्राय ददुः खड्गं सु-विस्तरम्; १४

१४। सु-विस्तरम्—प्रयोग-विधिना सह।

ऊचुश् चैनं तथा वाक्यं,—"मानुषाणां त्वम् ईश्वरः ।
असिना धर्म-गर्भेण पालयस्व प्रजा" इति, १५

"धर्म-सेतुम् अतिक्रान्ताः स्थूल-सूक्ष्मार्थ-कारणात्
विभज्य दण्डं रक्ष्याः स्युर् धर्मतो, न यदृच्छया ।" १६

(३) मोक्ष-धर्म-प्रकरणम्

सप्त-दशो ऽध्यायः

पिता-पुत्र-संवादः—आत्मान्वेषणम्

युधिष्ठिर उवाच,—

अतिक्रामति काले ऽस्मिन् सर्व-भूत-क्षयावहे
किं श्रेयः प्रतिपद्येत, तद् मे [ब्रूहि, पितामह । १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
पितुः पुत्रेण संवादं ; तं निबोध, युधिष्ठिर । २

द्वि-जातेः कस्यचित्, पार्थ, स्वाध्याय-निरतस्य वै
बभूव पुत्रो मेधावी मेधावी नाम नामतः । ३

सो ऽब्रवीत् पितरं पुत्रः स्वाध्याय-करणे रतम्,
मोक्ष-धर्मार्थ-कुशलो, लोक-तत्त्व-विचक्षणः,— ४

---

१६ । विभज्य दण्डम्—वागर्थ-काय-दण्डेषु यो यद् दण्डम् अर्हति तद् एव तस्मै विधाय ।

४ । मोक्ष-धर्मार्थ-कुशलः—मोक्ष-साधक-कृत्यानां अर्थेषु (वक्तव्येषु) विचक्षणः ([ऊहापोह-] दक्षः) ।

"धीरः किं स्वित्, तात, कुर्यात् प्रजानन्
'क्षिप्रं ह्यायुर् भ्रश्यते मानवानाम्' ?
पितस्, तद् आचक्ष्व यथार्थ-योगं
ममानुपूर्व्या येन धर्मं चरेयम् ।" ५

पितोवाच,—

वेदान् अधीत्य ब्रह्म-चर्येण, पुत्र,
पुत्रान् इच्छेत् पावनार्थं पितॄणाम्,
अग्नीन् आधाय विधिवच् चेष्ट-यज्ञो ।
वनं प्रविश्याथ मुनिर् बुभूषेत् । ६

पुत्र उवाच,—

एवम् अभ्याहते लोके समन्तात् परिवारिते
अमोघासु पतन्तीषु किं धीर इव भाषसे ? ७

पितोवाच,—

कथम् अभ्याहतो लोकः, केन वा परिवारितः,
अमोघाः काः पतन्तीह ? किं नु भीषयसीव माम् ? ८

पुत्र उवाच,—

मृत्युनाभ्याहतो लोको जरया परिवारितः ।
अहो-रात्राः पतन्त्येते । ननु कस्माद् न बुध्यसे ?
अमोघा रात्रयश् चापि नित्यम् आयान्ति यान्ति च । ९

---

५ । यथार्थ-योगम्—फल-सम्बन्धम् अनतिक्रम्य । ६ । इष्ट-यज्ञः—सम्पादित-यज्ञः । मुनिः—ध्यान-भिक्षुः (नी.) । बुभूषेत् [भू-स + यात्]—भवितुम् इच्छेत् । ७ । अभ्याहते—अभितः (समन्तात्) [मृत्युना] ताडिते । परिवारिते—[जरया] वेष्टिते । अमोघासु—

रात्र्यां रात्र्यां व्यतीतायाम् आयुर् अल्पतरं यदा,
तदैव बन्ध्यं दिवसम् इति विद्याद् विचक्षणः। १०

गाधोदके मत्स्य इव सुखं विन्देत कस् तदा ?
अनवाप्तेषु कामेषु मृत्युर् अभ्येति मानवम्। ११

पुष्पाणीव विचिन्वन्तम् अन्यत्र गत-मानसम्,
वृकीवोरणम्, आसाद्य, मृत्युर् आदाय गच्छति। १२

अद्यैव कुरु यच् श्रेयो। मा त्वां कालो ऽत्यगाद् अयम्!
अकृतेष्वेव कार्येषु मृत्युर् वै सं-प्रकर्षति। १३

श्वः-कार्यम् अद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतम् अस्य न वा कृतम्। १४

को हि जानाति कस्याद्य मृत्यु-कालो भविष्यति ?
युवैव धर्म-शीलः स्याद्। अनित्यं खलु जीवितम्। १५

मोहेन हि समाविष्टः पुत्र-दारार्थम् उद्यतः
कृत्वा कार्यम् अकार्यं वा पुष्टिम् एषाम प्रयच्छति। १६

तं पुत्र-पशु-सम्पन्नं व्यासक्त-मनसं नरम्,
सुप्तं व्याघ्रो मृगम् इव, मृत्युर् आदाय गच्छति। १७

[आयुषो हरणे] स-फलासु [रात्रिषु]। १०। बन्ध्यम्—निष्फलम्। ११। गाधोदके—सुखोत्तरणीय-जले। १२। पुष्पाणि—पुष्पवत् मनोहराणि [काम्य-कर्म-फलानि]। मेष-पक्षे मेषीणाम् आर्तवानि [पशुषु ऋतु-कालाद् अन्यत्र मैथुनाभावात्]। वृकी—गो-वत्साद्यादिनी। उरणम्—मेषम्। १६। एषाम्—पुत्र-दाराणाम्। १७। व्यासक्त-मनसम्—अति-विषयासक्त-चित्तम्।

सञ्चिन्वानकम् एवैनं कामानाम् अ-वितृप्तकम्
व्याघ्रः पशुम् इवादाय मृत्युर् आदाय गच्छति। १८

इदं कृतम् इदं कार्यम् इदम् अन्यत् कृताकृतम्,
एवम् ईहा-सुखासक्तं कृतान्तः कुरुते वशे। १९

कृतानां फलम् अ-प्राप्तं कर्मणां, कर्म-संज्ञितम्,
क्षेत्रापण-गृहासक्तं मृत्युर् आदाय गच्छति। २०

दुर्बलं बलवन्तं च, शूरं भीरुं, जड़ं कविम्—
अप्राप्तं सर्व-कामार्थान् मृत्युर् आदाय गच्छति। २१

मृत्युर् जरा च व्याधिश् च दुःखं चानेक-कारणम्
अनुषक्तं यदा देहे, किं स्व स्थ इव तिष्ठसि ? २२

जातम् एवान्तको ऽन्ताय जरा चान्वेति देहिनम्।
अनुषक्ता द्वयेनैते भावाः स्थावर-जङ्गमाः। २३

मृत्योर् वा मुखम् एतद् वै या ग्रामे वसतो रतिः,
देवानाम् एष वै गोष्ठो यद् अरण्यम् इति श्रुतिः। २४

१८। संचिन्वानकम्—निन्दितं चिन्वानम् (संगृह्णन्तम्)। कुत्सायां क-प्रत्ययः। कामानाम्—कामैः। १९। कार्यम्—कर्तुम् इष्टम्। कृताकृतम्—अर्ध-कृतम्। ईहा—इच्छा, तृष्णा। २०। कृतानां...कर्मणाम्—अप्राप्त-कृत-कर्म-फलम्। कर्म-संज्ञितम्—बणिगित्यादि-कर्मानुरूप-संज्ञावन्तम्। २२। अनुषक्तम्—संलग्नम्। २३। अन्तकः—मृत्युः। अन्ताय—नाशाय। अनुषक्ताः—संलग्नाः। द्वयेन—मृत्युना जरया च। भावाः—सत्त्वानि। २४। मुखम्—द्वारम्। रतिः—स्त्र्यादिषु आसक्तिः। देवानाम्—अमराणाम्, अमृतत्व-प्राप्तानाम्। गोष्ठः—वास-स्थानम्।

न हिंसयति यो जन्तून् मनो-वाक्-काय-हेतुभिः
जीवितार्थापनयनैः प्राणिभिर् न स हिंस्यते । २५

न मृत्यु-सेनाम् आयान्तीं जातु कश्चित् प्रबाधते
ऋते सत्यम् । अ-सत् त्याज्यं । सत्ये ह्यमृतम् आश्रितम् । २६

तस्मात् सत्य-व्रताचारः सत्य-योग-परायणः
सत्यागमः सदा-दान्तः सत्येनैवान्तकं जयेत् । २७

अमृतं चैव मृत्युश् च द्वयं देहे प्रतिष्ठितम् ।
मृत्युर् आपद्यते मोहात्, सत्येनापद्यते ऽमृतम् । २८

सो ऽहं ह्यहिंस्रः सत्यार्थी काम-क्रोध-बहिष्कृतः
सम-दुःख-सुखः क्षेमी मृत्युं हास्याम्यमर्त्यवत् । २९

अरण्यम्—विजनो देशः । विजने ध्यानादिना परमात्मा विज्ञातुं शक्यते । परमात्म-दर्शनं हि अमृतत्व-कारणम् । Cf. श्वे. ३।८ । २५ । हेतुभिः—श्राद्धादि-निमित्तैः । जीवितार्थापनयनैः—जीवितम् अर्थांश् च अपनयन्ति ये तादृशैः । प्रयोज्ये तृतीया । cf. 'अहिंसा-प्रतिष्ठायां तत्-सन्निधौ वैर-त्यागः' (योसू. २।३५) । २६ । मृत्यु-सेनाम्—मृत्योर् जरा-व्याधि-रूपां सेनाम् । सत्—सदा सर्वत्र च एक-रूपं वस्तु । अमृतम्—मरणाभावः । २७ । सत्य-व्रताचारः—सत्य [-स्वरूप-ब्रह्म-प्रापकं] व्रतम् (यम-नियमादि-साधनम्) आचारो यस्य तादृशः । सत्य-योग-परायणः—सत्येन योग एव परं (श्रेष्ठम्) अयनम् (स्थानम्, आश्रयो) यस्य तादृशः । सत्यागमः—सत्यम् एव आगमः [अनश्वरम्] शास्त्रम्) यस्य तादृशः । दान्तः—संयतः, जितेन्द्रियः । २९ । क्षेमी—[सर्व-भूत-] मङ्गलार्थी । अमर्त्यवत्—अमर इव ।

शान्ति-यज्ञ-रतो दान्तो ब्रह्म-यज्ञे स्थितो मुनिः
वाङ्-मनः-कर्म-यज्ञश् च भविष्याम्युदगायने। ३०

पशु-यज्ञैः कथं हिंस्रैर् मादृशो यष्टुम् अर्हति
अन्तवद्भिर् इव प्राज्ञः क्षेत्र-यज्ञैः पिशाचवत्? ३१

यस्य वाङ्-मनसी स्यातां सम्यक् प्रणिहिते सदा,
तपस् त्यागश् च सत्यं च स वै सर्वम् अवाप्नुयात्। ३२

नास्ति विद्या-समं चक्षुर् नास्ति सत्य-समं तपः,
नास्ति राग-समं दुःखं, नास्ति त्याग-समं सुखम्। ३३

आत्मन्येवात्मना जात आत्म-निष्ठो ऽ-प्रजो ऽपि वा
आत्मन्येव भविष्यामि। न मां तारयति प्रजा। ३४

३०। शान्ति-यज्ञः—निवृत्ति-मार्गे स्थितो यत्नः। ब्रह्म-यज्ञः—नित्यं ब्रह्म-विषयकोपनिषदर्थ-चिन्तनम्। वाग्-यज्ञः—प्रणव-जपः। मनो-यज्ञः—प्रणव-विषय-भावना। कर्म-यज्ञः—स्व-पर-श्रेयोऽनुष्ठानम्। उदगायने—उत्तरायण-पथ-निमित्तम्। निमित्तात् सप्तमी। दैर्घ्यम् आर्षम्। ३१। अन्तवद्भिः—अनित्य-फलैः। क्षेत्र-यज्ञैः—[स्व-] देह-हवनैः। पिशाच-वत्—यथा हि कश्चित् पिशाचो वासनाधीनत्वेन स्व-देहं पुनः पुनर् विषेण अग्निना उद्-बन्धनेन वा नाशयति। अहं हि पश्वादि-शरीरम् आत्म-देहत्वेन पश्यामि। ३२। प्रणिहिते—[ब्रह्मणि] समर्पिते। सर्वम्—सर्वात्मभूतं [ब्रह्म]। ३३। विद्या—ग्रन्थ-ज्ञानम् अनुभव-सिद्धं ज्ञानं च। रागः—विषयासक्तिः। ३४। आत्मनि—परमात्मनि, ब्रह्मणि ; आत्मना—ब्रह्मणा ; न तु पित्रा मातरि। आत्म-निष्ठः—ब्रह्मणि दृढं स्थितः। अ-प्रजः—अनपत्यः। वा—एव। आत्मन्येव—ब्रह्मण्येव [न जायायां] पुत्र-रूपेण। प्रजा—सन्ततिः।

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च
शीलं स्थितिर् दण्ड-निधानम् आर्जवं
ततस् ततश् चोपरमः क्रियाभ्यः। ३५

किं ते धनैर्? बान्धवैर् वापि किं ते?
किं ते दारैर्, ब्राह्मण, यो मरिष्यसि?
आत्मानम् अन्विच्छ, गुहां प्रविष्टं!
पितामहास् ते क्व गताः पिता च? ३६

भीष्म उवाच,—

पुत्रस्यैतद् वचः श्रुत्वा यथाकार्षीत् पिता, नृप.
तथा त्वम् अपि वर्तस्व सत्य-धर्म-परायणः। ३७

अष्टा-दशो ऽध्यायः

निराकाङ्क्षत्वम्

युधिष्ठिर उवाच,—

ईहमानः समारम्भान् यदि नासादयेद् धनम्,
धन-तृष्णाभिभूतश् च, किं कुर्वन् सुखम् आप्नुयात्? १

३५। एकता—एकाकित्वम्। शीलम्—श्लाधनीयं वृत्तम्। दण्ड-निधानम्—[वाङ्-मनः-कायैः] हिंसा-त्यागः। ३६। गुहाम्—अभ्यन्तरम्।

१। ईहमानः—चेष्टमानः, सम्पादयितुं यतमानः। समारम्भान्—[कृषि-वाणिज्यादीनां जीवनोपायानां] उद्योगान्।

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् श्लोकं मोक्षोपसंहितम्
गीतं विदेह-राजेन जनकेन प्रशाम्यता,— २

अनन्त म् इव मे वित्तं यस्य मे नास्ति किञ्चन।
मिथिलायां प्रदीप्तायां न मे दह्यति किञ्चन।' ३

आशा बलवती, राजन्, नैराश्यं परमं सुखम्।
आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला। ४

सामिषं कुररं दृष्ट्वा वध्यमानं निरामिषैः
आमिषस्य परित्यागात् कुररः सुखम् एधते। ५

गृहारम्भो हि दुःखाय, न सुखाय कदाचन।
सर्पः पर-कृतं वेश्म प्रविश्य सुखम् एधते। ६

सुखं जीवन्ति मुनयो भैक्ष्य-वृत्तिं समाश्रिताः
अद्रोहेणैव भूतानां, सारङ्गा इव पक्षिणः। ७

संशोधनी—पृ. ५६१ टी. ४०, 'प्रेध्य' 'मेध्य' भवेत्। पृ. ६०८ टी. १, 'यानां' 'यानाम्'। २। प्रशाम्यता—एकान्तेन शान्तिम् आश्रयता। ३। अनन्तम्—[देशे काले वस्तुत्वे च] इयत्तया अ-परिमितम्। किञ्चन—किम् अपि [परिमितं] वस्तु। दह्यति—दह्यते। पआ.। ४। आशा—आकाङ्क्षा। पिङ्गला—आसीत् पुरा विदेह-नगरे पिङ्गला नाम वेश्या। सा हि इन्द्रिय-सुखम् अन्विष्यन्ती अन्वेषणस्य दुःसह-क्लेश-करत्वेन प्रशमम् काङ्क्षन्ती विषय-सुख-विमुखा बभूव। ७। सारङ्गाः—कोकिलाः। ३-७। अत्र वक्तव्यम्। निष्फले सदुद्यमे पुनर् एव निर्विकारेण निष्कामेण च चेतसा आ-सिद्धि यथा-शक्ति यतितव्यम्। Cf. उपरिष्टात् ६।३ सत्याम् अपि स्व-शक्तौ पर-जीवितं दोषायैव।

इषु-कारो नरः कश्चिद् इषाव् आसक्त-मानसः
समीपेनापि गच्छन्तं राजानं नावबुद्धवान् । ८

यथा धेनु-सहस्रेषु वत्सो विन्दति मातरम्,
तथा पूर्व-कृतं कर्म कर्तारम् अनुगच्छति । ९

शकुनानाम् इवाकाशे मत्स्यानाम् इव चोदके
पदं यथा न दृश्येत, तथा धर्म-विदां गतिः । १०

आत्मा क्षेत्रज्ञ इत्युक्तः संयुक्तः प्राकृतैर् गुणैः ।
तैर् एव तु विनिर्मुक्तः परमात्मेत्युदाहृतः । ११

तमो रजश् च सत्त्वं च विद्धि जीव-गुणान् इमान् ।
मानसो ऽग्निः शरीरेषु जीव इत्यभिधीयते । १२

न विशेषो ऽस्ति वर्णानां । सर्वं ब्राह्मम् इदं जगत्
ब्रह्मणा पूर्व-सृष्टं हि कर्मभिर् वर्णतां गतम् । १३

सत्यं ब्रह्म, तपः सत्यं, सत्यं विसृजते प्रजाः ।
सत्येन धार्यते लोकः । स्वर्गं सत्येन गच्छति । १४

अनृतं तमसो रूपं । तमसा नीयते ह्यधः ।
तमो-ग्रस्ता न पश्यन्ति प्रकाशं, तमसावृताः । १५

---

८ । एवम् आरम्भान्तर-वर्जितेन ब्रह्मणि ऐकाग्र्यम् चित्तस्य सम्पादनीयम् । ११ । क्षेत्र-ज्ञः—देहाबद्ध-ज्ञानः, जीवः । प्राकृतैर् गुणैः—सत्त्व-रजस्-तमसाम् अ-साम्याज् जायमानैर् इन्द्रिय-मनोभिः । १३ । ब्राह्मम्—ब्राह्मण-जातिमत् । १४ । ब्रह्म—वेदः, अनादि अनश्वरं च शास्त्रम् । तपः—धर्माय कृच्छ्र-साधनम् । विसृजते—विसृजति, प्रेरयति । आआ. । १५ । प्रकाशम्—आलोकम् ।

स्वर्गः प्रकाश इत्याहुर् नरकं तम एव च ।
सत्यानृतात् तद् उभयं प्राप्यते जगती-चरैः । १६

मानसं सर्व-भूतानां धर्मम् आहुर् मनीषिणः ।
तस्मात् सर्वेषु भूतेषु मनसा शिवम् आचरेत् । १७

तुलाम् आरोपितो धर्मः सत्यं चैवेति नः श्रुतम् ।
समां कक्षां धारयतोर् यतः सत्यं ततो ऽधिकम् । १८

यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा
न दृष्ट-पूर्वं मनुजैर्, न च तद् नास्ति तावता, १९

तद्वद् भूतेषु भूतात्मा सूक्ष्मो ज्ञानात्मवान् असौ
अ-दृष्ट-पूर्वश् चक्षुर्भ्यां, न चासौ नास्ति तावता । २०

ऋचाम् आदिस् तथा साम्नां यजुषाम् आदिर् उच्यते ।
अन्तश् चादिमतां दृष्टो । न त्वादिर् ब्रह्मणः स्मृतः । २१

ज्ञानेन निर्मलीकृत्य बुद्धिं, बुद्ध्या मनस् तथा,
मनसा चेन्द्रिय-ग्रामम् अक्षरं प्रतिपद्यते । २२

---

१६ । सत्यानृतात्—सत्यानृतम् इति प्रतीच्यां पाठः । १८ । धर्मः—जाति-जनपद-श्रेणी-कुलादि-विहिताचार-चयः । Cf. मसं. १।१०७-११० ; ८।४१,४६ । अत्र धर्म-शब्द आचार-वाचकः । २० । भूतात्मा—जीवात्मा । ज्ञानात्मवान्—ज्ञानेनैव स्वरूपवान्, ज्ञान-स्वरूपः । २१ । ब्रह्मणः—परमात्मनः, ईश्वरस्य (Cf. उपरिष्टात् ६।३।५१) । २२ । अक्षरम्—ब्रह्म ।

नव-दशो ऽध्यायः

मृत्यु-देवी

युधिष्ठिर उवाच,—

य इमे पृथिवी-पालाः शेरते पृथिवी-तले,
एते हि निहताः संख्ये तुल्य-तेजो-बलैर् नरैः। १

कस्य मृत्युः कुतो मृत्युः केन मृत्युर् इह प्रजाः
हरत्यमर-सङ्काश, तद् मे ब्रूहि, पितामह। २

भीष्म उवाच,—

पुरा कृत-युगे, तात, राजा ह्यासीद् अकम्पनः।
स शत्रु-वशम् आपन्नः संग्रामे, क्षीण-वाहनः। ३
तस्य पुत्रो हरिर् नाम नारायण-समो बले।
स शत्रुभिर् हतः संख्ये, स-बलः स-पदानुगः। ४
स राजा शत्रु-वश-गः पुत्र-शोक-समन्वितः
यदृच्छया, शान्ति-परो, ददर्श भुवि नारदम्। ५
तस्मै स सर्वम् आचष्ट यथा-वृत्तं, जनेश्वरः—
शत्रुभिर् ग्रहणं युद्धे पुत्रस्य मरणं तथा। ६
तस्य तद् वचनं श्रुत्वा, नारदो ऽथ तपोधनः
आख्यानम् इदम् आचष्ट पुत्र-शोकापहं तदा,— ७

२। कस्य—आत्मनो देहस्य वा, देह-पक्षे सूक्ष्मस्य स्थूलस्य वा। कुतः—कस्मात् पुरुषात्। केन—केन निमित्तेन।

"प्रजाः सृष्ट्वा महा-तेजाः प्रजा-सर्गे, पितामहः
अतीव वृद्धा बहुला नामृष्यत पुनः प्रजाः । ८

न ह्यन्तरम् अभूत् किञ्चित् क्वचिज् जन्तुभिर्, अच्युत ।
निरुच्छ्वासम् इवोन्नद्धं त्रैलोक्यम् अभवद्, नृप । ९

तस्य चिन्ता समुत्पन्ना संहारं प्रति, भू-पते ।
चिन्तयन् नाध्यगच्छच् च संहारे हेतु-कारणम् । १०

तस्य रोषाद्, महा-राज, खेभ्यो ऽग्निर् उदतिष्ठत ।
तेन सर्वा दिशो, राजन्, ददाह स पितामहः । ११

ततो हरो जटी स्थाणुर् देवो ऽध्वर-पतिः शिवः
जगाम शरणं देवो ब्रह्माणं परमेष्ठिनम् । १२

अब्रवीद् वर-दो देवो ज्वलन्न् इव तदा शिवम्,—
"करवाण्यद्य कं कामं ? वरार्हो ऽसि मतो मम ।" १३

---

८ । सर्गे—सृष्टौ । ९ । निरुच्छ्वासम्—निर्जीवम् । उन्नद्धम्—स्फीतम् । १० । हेतु-कारणम्—निमित्त-कारणम् । ११ । खेभ्यः—[इन्द्रिय-] च्छिद्रेभ्यः । १२ । स्थाणुः—स्थिति-शीलः [शिवः] । अध्वर-पतिः—यज्ञेश्वरः । १३ । पं. १—अस्यैव आख्यानस्य रूपान्तरे शिवो ब्रह्मणा पुत्रेति सम्बोध्यते ।

तथा हि,—

'किं कुर्मः कामं, कामार्ह ? कामाज् जातो ऽसि, पुत्रक !
करिष्यामि प्रियं सर्वं । ब्रूहि, स्थाणो, यद् इच्छसि ।'

महाभा. ७।५२।४५

स्थाणुर् उवाच,—

तव तेजो-ऽग्निना, देव, प्रजा दह्यन्ति सर्वशः।
ता दृष्ट्वा मम कारुण्यं। मा कुप्यासां, जगत्-प्रभो! १४

प्रजा-पतिर् उवाच,—

न कुप्ये, न च मे कामो न भवेयुः प्रजा इति।
लाघवार्थं धरण्यास् तु ततः संहार इष्यते। १५
इयं हि मां सदा देवी भारार्ता समचोदयत्
संहारार्थं, महा-देव, भारेणाप्सु निमज्जती। १६
यदाहं नाधिगच्छामि बुद्ध्या बहु विचारयन्
संहारम् आसां वृद्धानां ततो मां क्रोध आविशत्। १७

स्थाणुर् उवाच,—

संहारात् त्वं निवर्तस्व। मा क्रुधो, विबुधेश्वर!
मा प्रजाः, स्थावरं चैव जङ्गमं च, व्यनीनशः! १८
प्रसीद, भगवन्! साधो, वर एष वृतो मया।
नष्टा, न पुनर् एष्यन्ति प्रजा ह्येताः कथञ्चन। १९

नारद उवाच,—

श्रुत्वा तु वचनं देवः स्थाणोर्, नियत-वाङ्-मनाः
तेजस् तत् सं-निजग्राह पुनर् एवान्तरात्मनि। २०

१४। मा कुप्यासाम्—आभ्यः [प्रजाभ्यः] कोपं मा कुरु। १५। कुप्ये—कुप्यामि। आआ.। न भवेयुः—नश्येयुः। विबुधेश्वरः—देवेशः। मा व्यनीनशः [वि-नश्-इ+स्]—मा विनीनशः, मा नाशय, मा जहि। आप्र.। २०। संनिजग्राह—संजहार।

उपसंहरतस् तस्य तम् अग्निं रोष-जं तदा
प्रादुर्बभूव विश्वेभ्यः खेभ्यो नारी महात्मनः, २१

कृष्ण-रक्ताम्बर-धरा कृष्ण-नेत्र-तलान्तरा
दिव्य-कुण्डल-सम्पन्ना दिव्याभरण-भूषिता।
सा विनिःसृत्य वै खेभ्यो दक्षिणाम् आश्रिता दिशम्। २२

ताम् आहूय तदा देवो, लोकानाम् आदिर् ईश्वरः
'मृत्यो' इति, मही-पाल, 'जहि चेमाः प्रजा' इति। २३

एवम् उक्ता तु सा देवी मृत्युः कमल-मालिनी
प्रदध्यौ दुःखिता बाला साश्रु-पातम् अतीव च।
पाणिभ्यां चैव जग्राह तान्यश्रूणि जनेश्वरः। २४

विनीय दुःखम् अ-बला सात्मनैवायतेक्षणा
उवाच, प्राञ्जलिर् भूत्वा, तम् एवावर्जिता तदा,— २५

"त्वया सृष्टा कथं नारी मादृशी, वदतां वर,
—रौद्र-कर्माभिजायेत—सर्व-प्राणि-भयङ्करी ? २६

बिभेम्यहम् अधर्मस्य। धर्म्यम् आदिश कर्म मे।
त्वं मां भीताम् अवेक्षस्व शिवेनेश्वर-चक्षुषा ! २७

२१। विश्वेभ्यः—सर्वेभ्यः। २२। कृष्ण-रक्तम्—पिङ्गलम्। कृष्ण-नेत्र-तलान्तरा—नील-नयन-मध्या, नील-तारका। २३। लोकानाम् आदिर् ईश्वरः—Cf. 'ब्रह्मा देवानां प्रथमः सम्बभूव, विश्वस्य कर्ता भुवनस्य गोप्ता' (मुड. १।१।१)। इति (२)—'उवाच' इति शेषः। २५। विनीय—संयम्य। आवर्जिता—आनमिता।

बालान् वृद्धान् वयः-स्थांश् च न हरेयम् अनागसः
प्राणिनः—प्राणिनाम् ईश, नमस् ते ऽस्तु, प्रसीद मे— २८

प्रियान् पुत्रान् वयस्यांश् च भ्रातॄन् मातॄः पितॄन् अपि।
अपध्यास्यन्ति, यद्येवं मृतास्। तेभ्यो बिभेम्यहम्। २९

कृपणाश्रु-परिक्लेदो दहेद् मां शाश्वतीः समाः।
तेभ्यो ऽहं बलवद् भीता शरणं त्वाम् उपागता। ३०

यमस्य भवने, देव, पात्यन्ते पाप-कर्म्मिणः।
इच्छेयं त्वत्-प्रसादाच् च तपस् तप्तुं, महेश्वर।" ३१

"त्वं हि संहार-बुद्ध्या मे चिन्तिता रुषितेन च।
तस्मात् संहर सर्वास् त्वं प्रजा, मा च विचारय!" ३२

एवम् उक्ता, महा-बाहो, मृत्युः, पर-पुरञ्जय,
न व्याजहार, तस्थौ च प्रह्वा भगवदुन्मुखी— ३३

पुनः पुनर् अथोक्ता सा, गत-सत्त्वेव भामिनी,
तूष्णीम् आसीत्। ततो देवो लोकानाम् ईश्वरेश्वरः ३४

प्रससाद किल ब्रह्मा स्वयम् एवात्मनात्मनि।
सा कन्याथ जगामास्य समीपाद् इति नः श्रुतम्। ३५

अपसृत्याप्रतिश्रुत्य प्रजा-संहरणं तदा,
त्वरमाणेव, राजेन्द्र, मृत्युर् धेनुकम् अभ्यगात्। ३६

२८। अनागसः—निरपराधान्। २९। अपध्यास्यन्ति—[तेषां मृतानां सम्बन्धिनो मां] शप्स्यन्ते। यद्येवं मृताः—'बालादयः पित्रादयश् च' इति शेषः। ३०। बलवत्—अत्यन्तम्। ३६। अप्रतिश्रुत्य—अनङ्गीकृत्य। धेनुकम्—गो-तीर्थम् मायान्तर्वर्ति (नी.)।

ततो हिमवतो मूर्ध्नि, यत्र देवाः समीजिरे,
तस्थौ, पितामहं चैव तोषयामास यत्नतः। ३७

ततस् ताम् अब्रवीत् तत्र लोकानां प्रपितामहः,—
"किम् इदं वर्त्तसे, पुत्रि ? क्रियतां मम तद् वचः"। ३८

ततो ऽब्रवीत् पुनर् मृत्युर् भगवन्तं पितामहम्,—
"न हरेयं प्रजा, देव। पुनस् त्वाहं प्रसादये।" ३९

ताम् अधर्म-भयाद् भीतां पुनर् एव प्रयाचतीम्
तदाब्रवीद् देव-देवो निगृह्येदं वचस् ततः,— ४०

"अधर्मो नास्ति ते, मृत्यो; संयच्छेमाः प्रजाः, शुभे।
धर्मः सनातनश् च त्वाम् इहैवानुप्रवेक्ष्यति।" ४१

सैवम् उक्ता, महा-राज, कृताञ्जलिर् उवाच ह
पुनर् एव महात्मानं नेति देवेशम् अव्ययम्। ४२

ताम् अब्रवीत तदा देवो,—"मृत्यो, संहर मानवान्।
अ-धर्मस् ते न भविता यथा ध्यास्याम्यहं, शुभे। ४३

यान् अश्रु-विन्दून् पतितान् अपश्यं,
ये पाणिभ्यां धारितास् ते पुरस्तात्,
ते व्याधयो मानवान्, घोर-रूपाः,
प्राप्ते काले कालयिष्यन्ति, मृत्यो ! ४४

३७। समीजिरे [सम्-यज् + इरे]—'यज्ञैः' इति शेषः। ४४। कालयिष्यन्ति—मारयिष्यन्ति। 'पीड़यिष्यन्ति' इत्यवाचां पाठः।

सर्वेषां त्वं प्राणिनाम् अन्त-काले
काम-क्रोधौ सहितौ योजयेथाः ।
एवं धर्मस् त्वाम् उपैष्यत्यमोघो,
न चा-धर्मं लप्स्यसे तुल्य-वृत्तिः ।" ४५

सा वै तदा, मृत्यु-संज्ञा कृता, स्त्री,
शापाद् भीता, 'बाढम्' इत्यब्रवीत् तम् ।
अथो प्राणान् प्राणिनाम् अन्त-काले,
काम-क्रोधौ प्राप्य, नित्यं निहन्ति । ४६

सर्वे देवा मर्त्य-संज्ञा-विशिष्टाः ।
सर्वे मर्त्या देव-संज्ञा-विशिष्टाः ।
तस्मात् पुत्रं मा शुचो, राज-सिंह ।
पुत्रः स्वर्गं प्राप्यते मोदते ह । ४७

भीष्म उवाच,—

एवं मृत्युर्, देव-सृष्टा, प्रजानां
प्राप्ते काले संहरन्ती यथावत् ।
तस्याश् चैव व्याधयस् ते ऽश्रु-पाताः
प्राप्ते काले संहरन्तीह जन्तून् । ४८

---

४६ । प्राप्य—प्रापय्य । ४७ । पं. १—'क्षीणे पुण्ये देवानां मर्त्यत्व-प्राप्तेः' इति शेषः । पं. २—'कृते पुण्ये मर्त्यानां देवत्व-लाभात्' इति शेषः । ४८ । संहरन्ती—'आस्ते' इति शेषः ।

युधिष्ठिर उवाच,—

इमे वै मानवाः सर्वे धर्मं प्रति विशङ्किताः ।
को ऽयं धर्मः कुतो धर्मस् तद् मे ब्रूहि, पितामह । ४९

भीष्म उवाच,—

यद् अन्यैर् विहितं नेच्छेद् आत्मनः कर्म पुरुषः,
न तत् परेषु कुर्वीत जानन्न् अ-प्रियम् आत्मनः । ५०
जीवितुं यः स्वयं चेच्छेत् कथं सो ऽन्यं प्रघातयेत् ?
यद् यद् आत्मन इच्छेत तत् परस्यापि चिन्तयेत् । ५१

विंशो ऽध्यायः

तुलाधार-संवादः—अ-हिंसा

युधिष्ठिर उवाच,—

कामाद् अन्ये भयाद् अन्ये कारणैर् अपरैस् तथा
असन्तो ऽपि वृथाचारं भजन्ते बहवो ऽपरे । १
न हि सर्व-हितः कश्चिद् आचारः सं-प्रवर्तते ।
तेनैवान्यः प्रभवति सो ऽपरं बाधते पुनः । २

---

४९ । मृत्योः कारणस्य व्याधेः अधर्मात्मक-कर्म-भवत्वात् शिष्ट-धर्माणां नानात्वे साकल्येन दुष्करत्वाच् च मुख्यतः को धर्म एकान्तेनानुष्ठेय इति प्रश्नः ।

१ । असन्तः—अ-साधवः, दुष्टाः, धर्म-ध्वजिनः इत्यर्थः । वृथा—श्रद्धया विना । आचारम्—शास्त्र-विहितं जाति-जनपद-श्रेणि-कुलादि-चरिताचारम् ।

भीष्म उवाच,—

चिराभिपन्नः कविभिः पूर्वं धर्म उदाहृतः ।
तेनाचारेण पूर्वेण संस्था भवति शाश्वती । ३

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्,
तुला-धारस्य वाक्यानि धर्मे जाजलिना सह । ४

वने वन-चरः कश्चिज् जाजलिर् नाम वै द्विजः,
सागरोद्देशम् आगम्य, तपस् तेपे महा-तपाः, ५

नियतो नियताहारश् चीराजिन-जटा-धरः
मल-पङ्क-धरो धीमान्, बहून् वर्ष-गणान्, मुनिः । ६

स कदाचिद् महा-तेजा जल-वासो, मही-पते,
चचार लोकान् विप्रर्षिः प्रेक्षमाणो मनो-जवः । ७

स चिन्तयामास मुनिर् जल-मध्ये कदाचन,
विप्रेक्ष्य सागरान्तां गौ महीं स-वन-काननाम्,— ८

"न मया सदृशो ऽस्तीह लोके स्थावर-जङ्गमे
अप्सु, वैहायसं गच्छेद् मया यो ऽन्यः सहेति वै ।" ९

---

३ । चिराभिपन्नः—दीर्घ-कालेन स्वीकृतः । कविभिः—द्रष्टृभिः । Cf. ईउ. ८ । संस्था—मर्यादा, न्याय्य-पथे स्थितिः । ४ । अत्र (कृत्य-व्यवस्थायाम्) आचारस्य सार्वजनिकत्वाभावे को हि नाम धर्मे व्यवहार-नियामक इति विमर्शो जायते । तत्र तुलाधार-वाक्यानि नियामकत्वेन उदाहरन्ति । ८ । विप्रेक्ष्य—[तपो-बलेन] दूरात् दृष्ट्वा । ९ । वैहायसम्—आकाशस्थं [ग्रह-नक्षत्रादि] ।

स कदाचिद् निराहारो वायु-भक्षो महा-तपाः
तस्थौ काष्ठवद् अ-व्यग्रो, न चचाल च कर्हिचित्। १०

संभाव्य चटकान् मूर्ध्नि जाजलिर् जपतां वरः
आस्फोटयत् तथाकाशे धर्मः प्राप्तो मयेति वै। ११

अथान्तरिक्षे वाग् आसीत्, तां च शुश्राव जाजलिः,—
"धर्मेण न समस् त्वं वै तुलाधारस्य, जाजले। १२

वाराणस्यां महा-प्राज्ञस् तुलाधारः प्रतिष्ठितः।
सो ऽप्येवं नार्हते वक्तुं यथा त्वं भाषसे, द्विज।" १३

सो ऽमर्ष-वशम् आपन्नस्, तुलाधार-दिदृक्षया
पृथिवीम् अचरद्, राजन्, यत्र-सायं-गृहो मुनिः। १४

कालेन महतागच्छत् स तु वाराणसीं पुरीम्।
विक्रीणन्तं च पण्यानि तुलाधारं ददर्श सः। १५

सो ऽपि दृष्ट्वैव तं विप्रम् आयान्तं, भाण्ड-जीवनः
समुत्थाय सु-संहृष्टः स्वागतेनाभ्यपूजयत्। १६

तुलाधार उवाच,—

सागरानूपम् आश्रित्य तपस् तप्तं त्वया महत्।
न च धर्मस्य संज्ञां त्वं पुरा वेत्थ कथञ्चन। १७

१०। तस्थौ—दण्डायमान आस्त। अव्यग्रः—स्थिरः। ११। संभाव्य—वर्धयित्वा। आस्फोटयत्—बाहु-शब्दम् अकरोत्। १३। अर्हते— अर्हति। आआ.। १६। भाण्ड-जीवनः—भाण्डेन (मूल-धनेन) जीवनं यस्य तादृशः। १७। सागरानूपम्—सागर-समीप-स्थं स-जलं

ततः सिद्धस्य तपसा तव, विप्र, शकुन्तकाः
क्षिप्रं शिरस्यजायन्त । ते च सम्भावितास् त्वया । १८

जात-पक्षा यदा ते च, गताः सञ्चरितुं ततः ।
मन्यमानस् ततो धर्मं चटक-प्रभवं, द्विज,
खे वाचं त्वम् अथाश्रौषीर् मां प्रति, द्विज-सत्तम । १९

अमर्ष-वशम् आपन्नस् ततः प्राप्तो भवान् इह ।
करवाणि प्रियं किं ते, तद् ब्रूहि, द्विज-सत्तम । २०

जाजलिर् उवाच,—

अध्यगा नैष्ठिकीं बुद्धिं । कुतस् त्वाम् इयम् आगता ?
एतद् आचक्ष्व मे सर्वं निखिलेन, महा-मते । २१

भीष्म उवाच,—

एवम् उक्तस् तुला-धारो ब्राह्मणेन यशस्विना,
उवाच धर्म-सूक्ष्माणि वैश्यो धर्मार्थ-तत्त्व-वित्,— २२

"वेदाहं, जाजले, धर्मं स-रहस्यं सनातनम्
सर्व-भूत-हितं, मैत्रं पुराणं यं जना विदुः । २३

अद्रोहेणैव भूतानाम् अल्प-द्रोहेण वा पुनः
या वृत्तिः स परो धर्मस् । तेन जीवामि, जाजले । २४

प्रदेशम् । संज्ञाम्—संविदम्, प्रत्यक्ष-ज्ञानम् । पुरा वेत्थ—सद्यो वेदिष्यसि । पा. ३।३।४ Cf. मे. २।२२ । १८ । शकुन्तकाः—क्षुद्रा विहङ्गमाः । २१ । अध्यगाः [अधि-इ+स्]—अध्यगमः, अधिगतवान् असि । नैष्ठिकीम्—स्थिराम् ।

परिच्छिन्नैः काष्ठ-तृणैर् मयेदं शरणं कृतम्।
अलक्तं पद्मकं तुङ्गं गन्धांश् चोच्चावचांस् तथा २५
रसांश् च तांस् तान्, विप्रर्षे, मद्य-वर्ज्यान् बहून् अहम्
क्रीत्वा वै, प्रति-विक्रीणे, पर-हस्ताद्, अ-मायया। २६
सर्वेषां यः सुहृद् नित्यं सर्वेषां च हिते रतः
कर्मणा मनसा वाचा, स धर्मं वेद, जाजले। २७
नानुरुध्ये विरुध्ये वा न द्वेष्मि न च कामये;
समो ऽहं सर्व-भूतेषु, पश्य मे, जाजले, व्रतम्।
तुला मे सर्व-भूतेषु समा तिष्ठति, जाजले। २८
यदा चायं न बिभेति यदा चास्माद् न बिभ्यति,
यदा नेच्छति न द्वेष्टि, ब्रह्म सम्पद्यते तदा। २९
न भूतानाम् अ-हिंसाया ज्यायान् धर्मो ऽस्ति कश्चन।
ये च छिन्दन्ति वृषणान् ये च भिन्दन्ति नस्तकान्, ३०
वहन्ति महतो भारान्, बध्नन्ति दमयन्ति च,
हत्वा सत्त्वानि खादन्ति, तान् कथं न विगर्हसे ? ३१

२५। शरणम्—गृहम्। अलक्तम्—लाक्षा-रस-सारम्। पद्मकं तुङ्गञ् च—काष्ठ-विशेषौ। गन्धान् उच्चावचान्—[कस्तूर्यादीन्] विविधान् गन्धान्। २६। रसान्—लवणादीन्। क्रीत्वा वै पर-हस्तात् [न तु स्वयम् उत्पाद्य जीव-नाश-भयात्] इत्यन्वयः। २८। अनुरुध्ये—अनुमोदे, अनुवर्ते। २९। ब्रह्म सम्पद्यते—[ज्ञानेन प्रेम्णा कर्मणा च] ब्रह्मणा एकी-भवति। न तु सत्तया इति वक्तव्यम्। ३०। वृषणान्—अण्ड-कोषान्। नस्तकान्—नासा-गर्भान्। ३१। वहन्ति—वाहयन्ति। णेर् लोप आर्षः।

मानुषा मानुषान् एव दास-भावेन भुञ्जते,
वध-बन्ध-निरोधेन कारयन्ति दिवा-निशम्। ३२

अ-दंश-मशके देशे सुख-संवर्धितान् पशून्,
तांश् च मातुः प्रियान् जानन्, आक्रम्य बहुधा नराः ३३
बहु-दंशाकुलान् देशान् नयन्ति बहु-कर्दमान्।
वाह-सं-पीड़िता धुर्याः सीदन्त्य-विधिनापरे। ३४

कृषिं साध्विति मन्यन्ते। सा च वृत्तिः सु-दारुणा।
भूमिं भूमि-शयांश् चैव हन्ति काष्ठैर् अयो-मुखैः,
तथैवानडुहो युक्तान् समवेक्षस्व, जाजले ! ३५

जाजलिर् उवाच,—

अयं प्रवर्तितो धर्मस् तुलां धारयता त्वया,
स्वर्ग-द्वारं च वृत्तिं च भूतानाम् अवरोत्स्यते। ३६

कृष्या ह्यन्नं प्रभवति, ततस् त्वम् अपि जीवसि।
पशुभिश् चौषधीभिश् च मर्त्या जीवन्ति, वाणिज। ३७

३२। दास-भावेन—'दास-भोगेन' इति पाठान्तरम्। ३४। वाह-सम्पीड़िताः—वहन-कर्मणा क्लेशिताः। धुर्याः—भार-वाहिनो गो-महिषादयः। अ-विधिना—शास्त्र-विहित-निमित्तं विनापि। ३५। भूमि-शयान्—मूषिक-सर्पादीन्। काष्ठैर् अयो-मुखैः—लाङ्गलैः। अनडुहः—वृषान्। युक्तान्—युग-बद्धान्। ३६। अयम्—वृषण-च्छेदनादि-कृष्यादि-साधक-हिंसात्मक-कर्म-वर्जन-रूपः। वृत्तिम्—जीविकाम्। ३७। वाणिजः [वणिज्+अ, १।१]—वणिक्।

ततो यज्ञः प्रभवति। नास्तिक्यम् अपि जल्पसि!
न हि वर्तेद् अयं लोको वार्ताम् उत्सृज्य केवलाम्। ३८

तुलाधार उवाच,—

स्व-यज्ञं ब्राह्मणा हित्वा क्षत्र-यज्ञम् इहास्थिताः
लुब्धैर् वित्त-परैर्, ब्रह्मन्, नास्तिकैः संप्रवर्तितम्। ३९

यद् एव सु-कृतं हव्यं, तेन तुष्यन्ति देवताः।
नमस्कारेण हविषा स्वाध्यायैर् औषधैस् तथा ४०

पूजा स्याद् देवतानां हि यथा-शास्त्र-निदर्शनम्।
अकृष्ट-पच्या पृथिवी आशीर्भिर् वीरुधो ऽभवत्। ४१

३८। नास्तिक्यम—[हिंसात्मक-यज्ञादि-प्रवर्तकस्य] वेदस्य प्रामाण्यास्वीकरणम्। वर्तेत्—वर्तेत, जीवेत्। पञ.। वार्ताम—कृष्यादिम्। 'कृषि-वाणिज्य-गो-रक्षाः कुसीदं तुर्यम् उच्यते, वार्ता चतुर्विधा।'—भाग. १०।२४।२१ ३९। [ब्राह्मणस्य] स्व-यज्ञम—आत्म-यज्ञम्, ब्रह्माग्नौ जीव-हविषस् त्यागम्, परमात्मना जीवात्मनो मेलनम्। क्षत्र-यज्ञम—हिंसात्मकं ज्योतिष्टोमादिम्। नास्तिकैः—वैदिकस्य अर्थ-वादस्य स्तुतिमात्र-परत्वे ऽपि तम् एव विधिं मन्यमानैः अतएव केवलस्य यथार्थस्य वेद-विधेः प्रामाण्यम् अ-स्वीकुर्वाणैः। ४०। सु-कृतम—सत्-कर्मणा अर्जितम्। सुकृतं हव्यं त्रिविधम् नमस्कारः स्वाध्याय औषधं चेति। नमस्कारेण—कायेन मनसा वाचा च ब्रह्मण आनुगत्य-स्वीकारेण। स्वाध्यायैः—वेद-पाठैः, प्राधान्येन वेद-शिरो-भागस्य उपनिषदः पाठैः। औषधैः—औषधि-जातैर् व्रीहि-यवादिभिः। ४१। शास्त्र-निदर्शनम्—शास्त्रे (वेदादौ) निदर्शनम् (प्रत्यायकं वचनम्) [अस्ति]। अकृष्ट-पच्या—कर्षणाद् ऋते ऽपि फल-शस्य-दायिनी। आशीर्भिः—[मनसा] हित-प्रार्थनेन, [जगतः]

सत्य-यज्ञा दम-यज्ञा अ-लुब्धाश् चात्म-वृत्तयः
सतां वर्त्मानु-वर्तन्ते यथा-बलम् अहिंसया । ४२

सर्वा नद्यः सरस्वत्यः सर्वे पुण्याः शिलोच्चयाः,
जाजले, तीर्थम् आत्मैव । मा स्म देशातिथिर् भव ! ४३

सद्भिर् वा यदि वा-सद्भिर् अयं पन्थाः समाश्रितः,
प्रत्यक्षं क्रियतां साधु, ततो ज्ञास्यसि तद् यथा । ४४

एते शकुन्ता बहवः समन्ताद् विचरन्ति ह,
तवोत्तमाङ्गे सम्भूताः, श्येनाश् चान्याश् च जातयः । ४५

आहूयैनान्, महा-ब्रह्मन्, विशमानांस् ततस् ततः,
पश्येमान् हस्त-पादेश् च श्लिष्टान् देहेषु सर्वशः । ४६

सम्भावयन्ति पितरं त्वया सम्भाविताः खगाः ।
अ-संशयं पिता वै त्वं । पुत्रान् आह्वय, जाजले ।

शुभानुध्यानेन । वीरुधः—लताः, उद्भिदः, उद्भिन्मयो इत्यर्थः । अंश्यर्थो अंश-प्रयोगः । ४२ । आत्म-वृत्तयः—आत्मन्येव वृत्तिः (स्थितिर्) येषां तादृशाः । सतां वर्त्म—योग-मार्गम् इत्यर्थः । ४३ । सरस्वत्यः—सरस्वतीवत् पुण्याः । तीर्थम्—यज्ञ-भूमिः । देशातिथिः—[स्व-देशे] पर-देशी । ४४ । प्रत्यक्षं क्रियताम्—'तत्' इति शेषः । साधु—सम्यक् । ४६ । महा-ब्रह्मन्—महा-ब्राह्मण । विशमानांस् ततस् ततः—तेषु तेषु (विविधेषु) नीडेषु प्रविशतः । आआ । श्लिष्टान्—आलिङ्गितान् । ४७ । सम्भावयन्ति—आद्रियन्ते । सम्भाविताः—आदृताः ।

भीष्म उवाच,—

ततो जाजलिना तेन समाहूताः पतत्रिणः
वाचम् उच्चारयन्ति स्म धर्मस्य वचनात् किल। ४८

एक-विंशो ऽध्यायः

चिर-कारि-संवादः—विमृश्य-कारिता

युधिष्ठिर उवाच,—

कथं कार्यं परीक्षेत, शीघ्रं वाथ चिरेण वा ?
सर्वथा कार्य-दुर्गे ऽस्मिन् भवान् नः परमो गुरुः। १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
चिर-कारेस् तु यत् पूर्वं वृत्तम् आङ्गिरसे कुले। २

चिर-कारी महा-प्राज्ञो गौतमस्याभवत् सुतः।
चिरं स चिन्तयत्यर्थांश् चिरं जाग्रच् चिरं स्वपन्
चिरं कार्याभिपत्तिं च, चिर-कारी तथोच्यते। ३

४८। वाचम् उच्चारयन्ति स्म—शङ्काभाव-सूचक-स्वरैः प्रत्युत्तरं ददुः। धर्मस्य वचनात्—अहिंसात्मक-धर्म-प्रणोदित-वाक्यात्, प्रेमात्मक-वचनात्। एते विहङ्गमाः प्रेम-पर-वशाः सु-दीर्घेण वर्त्मना जाजलिम् अनुगम्य तस्य समीप एव अवतस्थिरे इति गम्यते।

१। कार्य-दुर्गे—कृत्ययोर् बाधी, कृत्य-सङ्कटे। २। आङ्गिरसे कुले—अङ्गिरसो वंशे। ३। कार्याभिपत्तिम्—कार्याधिगमम्। तथा—तेन हेतुना।

व्यभिचारे तु कस्मिंश् चिद् व्यतिक्रम्यापरान् सुतान्
पित्रोक्तः कुपितेनाथ 'जहीमां जननीम्' इति । ४

इत्युक्त्वा, स तदा विप्रो गौतमो जपतां वरः,
अविमृश्य, महा-भागो, वनम् एव जगाम सः । ५

स, तथेति चिरेणोक्त्वा, स्वभावाच् चिर-कारिकः,
विमृश्य, चिर-कारित्वाच् चिन्तयामास वै चिरम्,— ६

'पितुर् आज्ञां कथं कुर्यां, न हन्यां मातरं कथम्,
कथं धर्म-च्छले नास्मिन् निमज्जेयम् अ-साधुवत् ? ७

पितुर् आज्ञा परो धर्मः, स्व-धर्मो मातृ-रक्षणम्,
अ-स्व-तन्त्रं च पुत्रत्वं । किं तु मां नानुपीडयेत् ? ८

स्त्रियं हत्वा मातरं च को हि जातु सुखी भवेत् ?
पितरं चाप्यवज्ञाय कः प्रतिष्ठाम् अवाप्नुयात् ? ९

पिता धर्मः पिता स्वर्गः पिता हि परमं तपः ।
पितरि प्रीतिम् आपन्ने सर्वा प्रीयन्ति देवताः । १०

माता देहारणिः पुंसां सर्वस्यार्तस्य निर्वृतिः ।
मातृ-लाभे स-नाथत्वम्, अनाथत्वं विपर्यये । ११

न च शोचति, नाप्येनं स्थाविर्यम् अपकर्षति,
श्रिया हीनो ऽपि यो गेहम् अम्बेति प्रतिपद्यते । १२

---

५ । अ-विमृश्य—अ-विचार्य, [तथ्यम्] अननुसन्धाय । ७ । धर्मच्छले—धर्म-सङ्कटे । १० । प्रीयन्ति—प्रीयन्ते, तुष्यन्ति । पआ. । ११ । अरणिः—उत्पत्ति-स्थानम् । निर्वृतिः—सुखम्, सुख-कर्त्री । १२ । अम्बेति—[हे] अम्ब (मातः) इत्युक्त्वा ।

पुत्र-पौत्रोपपन्नो ऽपि जननीं यः समाश्रितः,
अपि वर्ष-शतस्यान्ते स द्वि-हायनवच् चरेत्। १३

समर्थं वासमर्थं वा कृशं वाप्यकृशं तथा
रक्षत्येव सुतं माता नान्यः पोष्टा विधानतः। १४

तदा स वृद्धो भवति, तदा भवति दुःखितः,
तदा शून्यं जगत् तस्य, यदा मात्रा वियुज्यते। १५

नास्ति मातृ-समा च्छाया, नास्ति मातृ-समा गतिः,
नास्ति मातृ-समं त्राणं, नास्ति मातृ-समा प्रिया। १६

कुक्षौ सन्धारणाद् धात्री जननाज् जननी स्मृता।
चेतनावान् स को हन्याद् यस्य न सुषिरं शिरः ? १७

एवं नारीं मातरं च गौरवे चाधिके स्थिताम्
अवध्यां तु विजानीयुः पशवो ऽप्यविचक्षणाः। १८

देवतानां समावायम् एक-स्थं पितरं विदुः।
मर्त्यानां देवतानां च स्नेहाद् अभ्येति मातरम्।' १९

एवं विमृशतस् तस्य चिर-कारितया बहु
दीर्घः कालो व्यतिक्रान्तस्, ततो ऽस्याभ्यागमत् पिता। २०

१३। द्वि-हायनवत्—वर्ष-द्वय-वया इव। १७। हन्यात्—हन्तुं शक्नोति। 'ताम्' इति शेषः। सुषिरम्—स-च्छिद्रम्, मस्तिष्केण रिक्तम् [छिद्र-पथेन तस्य बहिर्गमनात्]। 'अशुषिरम्' इति पाठो न समीचीनो भाति। १८। विजानीयुः—विज्ञातुं शक्नुवन्ति। १९। समावायम्—समूहम्। मर्त्यानां...च—'एक-स्थं समावायम्' इति शेषः। स्नेहात्—मातृ-स्नेहेन हेतुना। अभ्येति—[लोकः] अभिगच्छति।

विमृश्य तेन कालेन पत्न्याः संस्था-व्यतिक्रमम्,
सो ऽब्रवीद् भृश-सन्तप्तो दुःखेनाश्रूणि वर्तयन्,— २१

"त्राहि मां मातरं चैव तपो यच् चार्जितं त्वया
आत्मानं पातकेभ्यश् च—भवाद्य चिर-कारिकः !" २२

चिर-कारी तु, पितरं दृष्ट्वा, परम-दुःखितः,
शस्त्रं त्यक्त्वा, ततो मूर्ध्ना प्रसादायोपचक्रमे । २३

गौतमस्, तं ततो दृष्ट्वा शिरसा पतितं भुवि
पत्नीं चैव निराकारां, पराम् अभ्यागमद् मुदम् । २४

द्वा-त्रिंशो ऽध्यायः

द्युमत्सेन-संवादः—वध-दण्डः

युधिष्ठिर उवाच,—

कथं राजा प्रजा रक्षेद् न च किञ्चित् प्रघातयेत्
पृच्छामि त्वां, सतां श्रेष्ठ । तद् मे ब्रूहि, पितामह । १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
द्युमत्सेनस्य संवादं राज्ञः, सत्यवता सह । २

---

२१ । तेन—तावता । संस्था-व्यतिक्रमम्—मरण-वैपरीत्यम्, अ-मरणम् । यद्वा व्यवस्था-वैपरीत्यम् । संस्था—मरणम्, व्यवस्था ।
२४ । निराकाराम्—लज्जा-भय-घृणादिभिर् निरस्त-नारी-सुलभ-रूप-लावण्याम्, विरूपाम् ।

अव्याहृतं व्याजहार सत्यवान्—इति नः श्रुतम्—
वधाय नीयमानेषु पितुर् एवानुशासनात्,— ३
"अधर्मतां याति धर्मो यात्यधर्मश् च धर्मताम्,
वधो नाम भवेद् धर्मो। नैतद् भवितुम् अर्हति।" ४

द्युमत्सेन उवाच,—

अथ चेद् अ-वधो धर्मो, ऽ-धर्मः को जातु चिद् भवेत्?
दस्यवश् चेद् न हन्येरन्, सत्यवन्, सङ्करो भवेत्। ५
ममेदम् इति नास्यैतत् प्रवर्तेत कलौ युगे,
लोक-यात्रा न चैव स्याद्। अथ चेद् वेत्थ, शंस नः। ६

सत्यवान् उवाच,—

सर्व एव त्रयो वर्णाः कार्या ब्राह्मण-बन्धनाः।
धर्म-पाश-निबद्धानां नाल्पो ऽप्यपचरिष्यति। ७
यो यस् तेषाम् अपचरेत् तम् आचक्षीत वै द्विजः
अयं मे न शृणोतीति। तस्मिन् राजा प्रधारयेत्। ८

३। अव्याहृतम्—[प्राक् केन चिद्] अनुक्तम्। ४। भवेत्—'यदि' इति शेषः। ५। सङ्करः—विपरीत-भावापन्नानां नराणाम् मिश्रणम् (एकीकरणम्), सदसतां समीकरणम्। ६। मम...प्रवर्तेत—स्वत्वं नश्येत्। लोक-यात्रा—[अर्थ-सञ्चय-भूम्यधिकार-पशु-पालन-वाणिज्य-तीर्थ-यात्रादिः] व्यवहारः। वेत्थ—[अन्य-प्रकारं] जानासि। शंस—कथय। ७। त्रयो वर्णाः—क्षत्रिय-वैश्य-शूद्राः। ब्राह्मण-बन्धनाः—ब्राह्मणाधीनाः। अल्पो ऽपि—नीचो ऽपि। अप-चरिष्यति—धर्माद् बहिर् गमिष्यति, उत्पथं प्रस्थास्यते। ८। अपचरेत्—[ब्राह्मण-वचनम्] अतिक्रामेत्। आचक्षीत—[राज्ञो] निवेदयेत्। प्रधारयेत्—दण्डम् इति शेषः।

तत्त्वाभेदेन यच् छास्त्रं तत् कार्यं, नान्यथाविधम्
अ-समीक्ष्यैव कर्माणि नीति-शास्त्रं यथा-विधि। ९

दस्यून् निहन्ति वै राजा भूयसो वाप्यनागसः।
भार्या माता पिता पुत्रो हन्यन्ते पुरुषेण ते।
परेणापकृतो राजा तस्मात् सर्वं प्रधारयेत्। १०

अ-साधुश् चैव पुरुषो लभते शीलम् एकदा
साधोश् चापि। ह्य-साधुभ्यः शोभना जायते प्रजा। ११

न मूल-घातः कर्तव्यो। नैष धर्मः सनातनः।
अपि खल्व-वधेनैव प्रायश्चित्तं विधीयते— १२

उद्वेजनेन बन्धेन विरूप-करणेन च।
वध-दण्डेन ते क्लेश्या न। पुरोहित-संसदि १३

यदा पुरोहितं वा ते पर्येयुः, शरणैषिणः,
'करिष्यामः पुनर्, ब्रह्मन्, न पापम्' इति वादिनः, १४

९। तत्त्वाभेदेन [स्थितम्]—वस्तु-तन्त्रम्। अन्यथा-विधम्—अन्य-प्रकारम्, अ-वस्तु-तन्त्रम्। अन्यथा...-विधि—यथा-विधि, कर्माणि (कृत्यानि) अ-समीक्ष्य (सम्यक् अनालोच्य) अ-वस्तु-तन्त्रं नीति-शास्त्रम् (अभ्युदयोपाय-निर्देशक-शास्त्रं) न कार्यम् (क्रियया अनुसर्तव्यम्)। १०। भूयसः—बहुतरान्। अनागसः—निरपराधान्। सर्वम्—एतद् इति शेषः। प्रधारयेत्—विचारयेत्। ११। शीलम्—सच्चरित्रम्। १३। उद्वेजनेन—सर्व-स्वापहरणादि-भय-प्रदर्शनेन। १४। ते—दस्यवः। पर्येयुः [परि-आ-इ+युस्]—परिवृणुयुः, वेष्टेरन्।

तदा विसर्गम् अर्हाः स्युर् इतीदं धातृ-शासनम्।
बिभ्रद् दण्डाजिनं मुण्डो ब्राह्मणो ऽर्हति शासनम्— १५
गरीयांसो गरीयांसम् अपराधे पुनः पुनः।
तदा विसर्गम् अर्हन्ति न, यथा प्रथमे तथा। १६

द्युमत्सेन उवाच,—

यत्र यत्रैव शक्येरन् संयन्तुं समये प्रजाः,
स तावान् प्रोच्यते धर्मो यावद् न प्रति-लङ्घ्यते।
अहन्यमानेषु पुनः सर्वम् एव पराभवेत्। १७
पूर्वे पूर्वतरे चैव सु-शास्या अभवन् प्रजाः
मृदवः सत्य-भूयिष्ठा अल्प-द्रोहाल्प-मन्यवः। १८
पुरा धिग्-दण्ड एवासीद्, वाग्-दण्डस् तदनन्तरम्।
आसीद् आदान-दण्डो ऽपि। वध-दण्डो ऽद्य वर्तते।
वधेनापि न शक्यन्ते नियन्तुम् अपरे जनाः। १९
'नैव दस्युर् मनुष्याणां न देवानाम्' इति श्रुतिः,
'न गन्धर्व-पितृणां च'। कः कस्येह ? न कश्चन। २०

१५। विसर्गम्—मोक्षणम्। मुण्डः—मुण्डितः, अपनीत-केशः। पं.२—सन्न्यासिनो ऽपि शास्याः। १६। गरीयांसम्—'शासनम् अर्हन्ति' इति शेषः। पुनः पुनः—कृते' इति शेषः। प्रथमे—'अपराधे कृते' इति शेषः। १७। समये—नियमे, मर्यादायाम्। संयन्तुम्—निबद्धुम्। तावान्—तत्-परिमाणः। यावत्—यावान्, यत्परिमाणः। पराभवेत्—पराभूयेत। १९। पं. ३—एकस्य चोरस्य वधेन अपरे चोरा न त्रस्यन्ति। अतः सर्वे ऽपि चोरा निर्विशेषं हन्तव्याः इति भावः। २०। अन्योन्य-स्वत्व-रक्षणं हि कौटुम्बिकः सामाजिकश् च धर्मः। दस्यु-

पद्मं श्मशानाद् आदत्तो पिशाचांश् चापि दैवतम्,
तेषु कः समयं कुर्याद् अज्ञेषु हत-बुद्धिषु ? २१

सत्यवान् उवाच,—

तान् न शक्नोषि चेत् साधून्—परित्रातुम् अ-हिंसया,
कस्यचिद् भूत भव्यस्य लोभेनान्तं तथा कुरु। २२

राजानो लोक-यात्रार्थं तप्यन्ते परमं तपः।
ते ऽपत्रपन्ति तादृग्भ्यस्, तथा-वृत्ता भवन्ति च। २३

वृत्तेस् ताभ्यां विरोधात् न चोरो राष्ट्र-धर्मतः कुटुम्बेन समाजेन वा सम्बध्यते। राज्ञा चोरस्य वधेन सम्बन्धा-भावात् न तस्य भार्यादीनां वधः प्रसज्यते। नर-देव-पितृ-गन्धर्वादीनां सर्व-जीवानाम् एकस्मिन्न एव धर्म-राष्ट्रे ऽन्तर्भावात् चौर्येण सम्बन्धो यथा नरैस् तथा देवादिभिर् अपि विच्छिद्यते। २१। पद्मम्—शवालङ्कारम्। पक्वम् (पक्वान्ना-दिकम्) इति अवाचां पाठः। दैवतम्—देव-समूहम्, देवा इति। हत-बुद्धिषु—मोहाच्छन्नेषु, कृत्याकृत्य-विवेक-हीनेषु। २२। साधून्—'कर्तुम्' इति शेषः। भूत-भव्यस्य—नर-मेध-यज्ञे वध-दण्डार्हापराधि-हनन-रूपातीत-कर्मणो हन्तृ-हत-स्वर्ग-प्राप्ति-रूप-भावि-फलस्य। अन्तम्—[वध-दण्डार्हापराधिनां] नाशम्। तथा—यज्ञे पशुवत्। २३। अपत्रपन्ति—अपत्रपन्ते, ['ममापि राज्ये चोरः' वर्तते इति] लज्जन्ते। तादृग्भ्यः—चोरेभ्यः। हेतौ पञ्चमी। तथा-वृत्ताः—[प्रजाः शोधयितुं] तपस्विनः। Cf. छाउ. ५।११।५,—'न मे स्तेनो जन-पदे न कदर्यो न मद्यपः, नानाहिताग्निर् ना-विद्वान् न स्वैरी। स्वैरिणी कुतः ?' ते चोराः तादृग्भ्यः तपस्विभ्यः [राजभ्यः] इत्यादि व्याख्यानं साधीयो भाति।

वित्रास्यमानाः सुकृतो। न कामाद् घ्नन्ति दुष्कृतीन्।
सु-कृतेनैव राजानो भूयिष्ठं शासते प्रजाः। २४

श्रेयसः श्रेयसो ऽप्येवं वृत्तं लोको ऽनुवर्तते।
सदैव हि गुरोर् वृत्तम् अनुवर्तन्ति मानवाः। २५

द्युमत्सेन उवाच,—

आत्मानम् अ-समाधाय समाधित्सति यः परान्,
विषयेष्विन्द्रिय-वशं मानवाः प्रहसन्ति तम्। २६

यो राज्ञो दम्भ-मोहेन किञ्चित् कुर्याद् अ-साम्प्रतम्,
सर्वोपायैर् नियम्यः स। तथा पापाद् निवर्तते। २७

आत्मैवादौ नियन्तव्यो दुष्कृतं संनियच्छता।
दण्डयेच् च महा-दण्डैर् अपि बन्धून् अनन्तरान्। २८

२४। वित्रास्यमानाः सुकृतः—त्रासेनैव (भयेनैव) [प्रजाः] साध्व्यो [भवन्ति]। कामात्—स्वेच्छया। दुष्कृतीन्—दुष्टान्। भूयिष्ठम्—प्रायेण। शासते [शास्+अन्ते]—शासति। आआ.। २५। श्रेयसः श्रेयसः—क्रमेण पञ्चमी षष्ठी च। अनुवर्तन्ति—अनुवर्तन्ते। पआ.। Cf. गी. ३।२१ २६। आत्मानम्—स्व [-चित्त] म्। अ-समाधाय—अ-जित्वा। समाधित्सति [सम्-आ-धा-स+ति]—समाधातुं (जेतुम्) इच्छति। यः—यो राजा। मानवाः—[प्राकृत-] जनाः, प्रजाः। २७। राज्ञः—राज्ञो। अ-साम्प्रतम्—अ-युक्तम्, अनुचितम्। २८। दुष्कृतम् [दुष्कृत्, २।१]—दुष्ट-कर्म-कारिणम्। सं-नियच्छता—सं-नियमयता। बन्धून् अनन्तरान्—अव्यवहित-स्व-जनान्, पुत्र-सोदर्यादीन्।

यत्र गौ पाप-कृद् नीचो न महद् दुःखम् अर्च्छति,
वर्धन्ते तत्र पापानि धर्मो ह्रसति च ध्रुवम् । २९

इति कारुण्य-शीलस् तु विद्वान् गौ ब्राह्मणो ऽन्वशात्,
इति चैवानुशिष्टो ऽस्मि पूर्वैस्, तात-पितामहैः । ३०

त्रयो-विंशो ऽध्यायः

सुलभा-जनक-संवादः—मोक्ष-तत्त्वम्

युधिष्ठिर उवाच,—

अ-परित्यज्य गार्हस्थ्यं, कुरु-राजर्षि-सत्तम,
कः प्राप्तो विलयं बुद्ध्या ? मोक्ष-तत्त्वं वदस्व मे । १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
जनकस्य च संवादं सुलभायाश् च, भारत । २

सन्न्यास-फलिकः कश्चिद् बभूव नृपतिः पुरा
मैथिलो जनको नाम, धर्म-ध्वज इति श्रुतः । ३

---

२९ । यत्र—यस्मिन् [राज्ये] । अर्च्छति [ऋच्छ्+ति]—प्राप्नोति ।

१ । विलयं बुद्ध्याः—[चिदचिदात्मकं कृत्स्नं जगत् सद् एव इति] बुद्धेः [सद्रूपे आत्मनि] तिरोधानम् । विलयम्—'विनयम्' इति प्रतीचां पाठः । ३ । अनेन गम्यते यथेदानीं तथा पुरापि ब्रह्म-परायणो गृहस्थो धर्म-ध्वजो (धार्मिकत्व-ख्यापकः) ऊचे इति । सन्न्यास-फलिकः—सन्न्यास-फल-सम्यग्-दर्शनवान् ।

स वेदे मोक्ष-शास्त्रे च स्वे च शास्त्रे कृतागमः
इन्द्रियाणि समाधाय शशास वसुधाम् इमाम् । ४

अथ धर्म-युगे तस्मिन्, योग-धर्मम् अनुष्ठिता,
महीम् अनुचचारैका सुलभा नाम भिक्षुकी । ५

तया, जगद् इदं कृत्स्नम् अटन्त्या, मिथिलेश्वरः
तत्र तत्र श्रुतो मोक्षो कथ्यमानस् त्रि-दण्डिभिः । ६

साति-सूक्ष्मां कथां श्रुत्वा, तथ्यं नेति स-संशया,
दर्शने जात-सङ्कल्पा जनकस्य बभूव ह । ७

तत्र सा, विप्रहायाथ पूर्व-रूपं हि योगतः,
अबिभ्रद् अनवद्याङ्गी रूपम् अन्यद् अनुत्तमम् । ८

चक्षुर्निमेषमात्रेण, लघ्वस्त्र-गति-गामिनी,
विदेहानां पुरीं सुभ्रूर् जगाम, कमलेक्षणा । ९

---

४ । स्वे शास्त्रे—दण्ड-नीतौ । कृतागमः—कृत-विद्यः, व्युत्पन्नः । समाधाय—संयम्य । ५ । धर्म-युगे—सत्य-युगे । अनुष्ठिता—अनुष्ठितवती । अथ &c—अनेन स्त्रीणाम् अपि सन्न्यासे ऽधिकारस् तदानुषङ्गिकं-भिक्षा-चर्य्यं मोक्ष-शास्त्र-पाठः एकान्ते आत्म-ध्यानं च अभ्युपगम्यते । ६ । तत्र तत्र—नाना-स्थानेषु । मोक्षे—मोक्ष-शास्त्रे [प्रवीणः इति] । त्रि-दण्डिभिः—त्रि-दण्ड-धारिभिर् यतिभिः, सन्न्यासिभिः । दण्डः—दमनम् । 'वाग-दण्डो ऽथ मनो-दण्डः काय-दण्डस् तथैव च, यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ।' (मसं. १२।१०) । ८ । अनवद्याङ्गी—अनिन्द्यावयवा । ९ । लघु—शीघ्रम् । अस्त्र-गति-गामिनी—[योध-निक्षिप्तस्य] अस्त्रस्य गत्या गच्छति या तादृशी ।

सा प्राप्य मिथिलां रम्यां समृद्ध-जन-सङ्कुलाम्
भैक्ष्य-चर्यापदेशेन ददर्श मिथिलेश्वरम्। १०

राजा, तस्याः परं दृष्ट्वा सौकुमार्यं, पुनस् तदा
केयं कस्य कुतो वेति बभूवागत-विस्मयः। ११

ततो ऽस्याः स्वागतं कृत्वा व्यादिश्य च वरासनम्
पूजितां पाद-शौचेन वरान्नेनाप्यतर्पयत्। १२

अथ भुक्तवती, प्रीत्या राजानं मन्त्रिभिर् वृतम्
सर्व-भाष्य-विदां मध्ये चोदयामास भिक्षुकी। १३

सत्त्वं सत्त्वेन योग-ज्ञा प्रविवेश मही-पतेः,
नेत्राभ्यां नेत्रयोर् अस्य रश्मीन् संयोज्य रश्मिभिः। १४

जनको ऽप्युत्स्मयन् राजा भावम् अस्या विशेषयन्,
प्रति-जग्राह भावेन भावम् अस्या, नृपोत्तम। १५

तद् एकस्मिन् अधिष्ठाने संवादः श्रूयताम् अयम्
छत्रादिषु विमुक्तस्य मुक्तायाश् च त्रि-दण्डके। १६

१०। अपदेशेन—छलेन। ११। सौकुमार्यम्—सौन्दर्यम्। १३। भाष्य-विदाम्—सूत्रार्थ-ज्ञानवताम्। 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः, स्व-पदानि च वर्ण्यन्ते भाष्यं भाष्य-विदो विदुः।—भ. (शकद्र.)। चोदयामास—प्रवर्तयामास, उत्तेजयामास। १४। सत्त्वम्—बुद्धिम्। १५। भावम्—आशयम्। विशेषयन्—अभिभवन्। १६। अधिष्ठाने—आश्रये, देहे। छत्रादिषु [स्थितस्य]—बाह्येन छत्र-चामरादि-राज-चिह्न-युक्तस्य। त्रि-दण्डके [स्थितायाः]—बाह्यतः त्रि-दण्ड-विशिष्टायाः [सन्न्यासिन्याः]।

भगवत्याः क चर्येयं कृता, क च गमिष्यसि,
कस्य च त्वं कुतो वेति पप्रच्छैनां मही-पतिः, १७
"श्रुते वयसि जातौ च सद्-भावो नाधिगम्यते।
एष्वर्थेषूत्तरं तस्मात् प्रवेद्यं मत्समागमे। १८
छत्रादिषु विशेषेषु मुक्तं मां विद्धि तत्त्वतः।
स त्वां संमन्तुम् इच्छामि। मानार्हा हि मतासि मे। १९
भिक्षोः पञ्च-शिखस्याहं शिष्यः परम-सम्मतः
सांख्य-ज्ञाने च योगे च मही-पाल-विधौ तथा। २०
त्रिविधं मोक्षं, न च राज्याद् धि चालितः।
मुक्त-रागश् चराम्येकः पदे परमके स्थितः। २१
यश् च मे दक्षिणं बाहुं चन्दनेन समुक्षयेत्
सव्यं वास्यापि यस् तक्षेत्, समाव् एताव् उभौ मम। २२

१७। अनुप्रविष्टेन भिक्षुकया भावेन महा-योगिनो जनकस्य भाव-स्यानभिभूतत्वं स्फुटम् एव। १८। श्रुते—शास्त्र-ज्ञाने। सद्-भावः—यथार्थ-भावः, तत्त्वम्। प्रवेद्यम्—निश्चयेन ज्ञातव्यम्। १९। संमन्तुम्—सम्यक् ज्ञातुम्। २०। भिक्षोः पञ्च शिखस्य—अ-ज्ञात-जनक-जननीकः पञ्च-शिख ऋषेर् आसुरेः शिष्यत्वम् अवाप्य प्रख्यातः सांख्याचार्यो बभूव। गुरोर् जाया कपिला तं स्तन्येन पालयामास। महाभा. १२।११८-११९ सांख्य-ज्ञाने—सांख्य-दर्शन-प्रतिपाद्य-तत्त्व-ज्ञाने। योगे—सांख्य-दर्शन-सम्मते साधने। मही-पाल-विधौ—राजोचित-कर्मकाण्डे। २१। त्रि-विधो मोक्षः—क्रम-मुक्तिर् जीवन्-मुक्तिर् विदेह-मुक्तिश् चेति। २२। समुक्षयेत्—समुक्षेत्, लिम्पेत्। वास्या—वासि-नाम्ना शस्त्रेण, वाइस् द्वारा। तक्षेत्—तक्ष्णुयात्, छिन्यात्।

त्रि-दण्डादिषु यद्यस्ति मोक्षो ज्ञानेन कस्यचित्,
छत्रादिषु कथं न स्यात् तुल्य-हेतौ परिग्रहे ? २३

दोष-दर्शी तु गार्हस्थ्ये यो व्रजत्याश्रमान्तरे,
उत्सृज्य परिगृह्णंश् च, सो ऽपि सङ्गाद् न मुच्यते । २४

काषाय-धारणं मौण्डं त्रिविष्टब्धं कमण्डलुः
लिङ्गान्युत्पथ-भूतानि, न मोक्षायेति मे मतिः । २५

प्रवेशश् च कृतः केन मम राष्ट्रे पुरे ऽपि वा ?
कस्य वा सन्निकर्षात् त्वं प्रविष्टा हृदयं मम ? २६

वर्ण-प्रवर-मुख्यासि ब्राह्मणी, क्षत्रियस् त्वहम् ।
नावयोर् एक-योगो ऽस्ति । मा कृथा वर्ण-सङ्करम् ! २७

वर्तसे मोक्ष-धर्मेण त्वं, गार्हस्थ्ये ऽहम् आश्रमे ।
अयं चापि सु-कष्टस् ते द्वितीयो ऽऽश्रम-सङ्करः । २८

---

२३ । यदि ज्ञानेनैव मोक्षः सिध्येत, त्रिदण्डादि-परिग्रहवत् छत्रादि-परिग्रहो ऽपि न तस्य बाधको भवेत् । २५ । मौण्डम्—मौण्ड्यम्, मुण्डित-मस्तकत्वम्, केशाभावः । त्रिविष्टब्धम्—त्रि-दण्डकम् । लिङ्गानि—[आश्रम-परिचायकानि] चिह्नानि । उत्पथ-भूतानि—असद्-मार्ग-रूपाणि, विषयासक्ति-जनकानि इत्यर्थः । २६ । प्रवेशः—'जारिण्याः इव तव' इति शेषः । कस्य—जारस्येव कस्य । सन्निकर्षात्—सङ्केतात् इति भावः । २७ । वर्णसङ्करम्—वर्ण-धर्म-विरुद्धम् ब्राह्मण-क्षत्रिययोर् मिश्रणम् । २८ । आश्रम-सङ्करः—गार्हस्थ्य-सन्न्यासयोर् मिश्रणम् ।

स-गोत्रां वा-स-गोत्रां वा न वेद त्वां, न वेत्थ माम् ॥
स-गोत्रम् आविशन्त्यास् ते तृतीयो गोत्र-सङ्करः । २९
अथ जीवति ते भर्ता, प्रोषितो ऽप्यथ वा क्वचित् ।
अ-गम्या पर-भार्येति चतुर्थो धर्म-सङ्करः । ३०
इच्छतोर् अत्र यो लाभः स्त्री-पुंसोर् अमृतोपमः,
अ-लाभश् चापि रक्तस्य, सो ऽपि दोषो विषोपमः । ३१
उक्त-वाक्ये तु नृ-पतौ सु-लभा चारु-दर्शना
ततः चारुतरं वाक्यं प्रचक्रामाथ भाषितुम्,— ३२
"पर-तन्त्रः सदा राजा । स्वल्पे सो ऽपि प्रसज्जते
सन्धि-विग्रह-योगे च । कुतो राज्ञः स्व-तन्त्रता ? ३३
स्त्रीषु क्रीड़ा-विहारेषु नित्यम् अस्या-स्व-तन्त्रता
मन्त्रे चामात्य-समितौ । कुतस् तस्य स्व-तन्त्रता ? ३४
सत्त्वेनानुप्रवेशो हि यो ऽयं त्वयि कृतो मया,
किं तवाप-कृतं तत्र, यदि मुक्तो ऽसि सर्वशः ? ३५
नियमो ह्येष वर्णेषु यतीनां शून्य-वासिता ।
शून्यम् आवेशयन्त्या च मया किं कस्य दूषितम् ? ३६

---

३१ । रक्तस्य पुरुषस्य अ-लाभात् [अन्योन्यासक्तयोः] स्त्री-पुंसयोर् अमृतोपमो योगो ऽपि तव पक्षे विषोपम एव । इच्छतोः—अन्योन्यासक्तयोः । स्त्री-पुंसोः—स्त्री-पुंसयोः । आप्र. । ३२ । प्रचक्राम—प्रचक्रमे, आरेभे । पआ. । ३६ । शून्य-वासिता—शून्य-गृहे वासः । शून्यम्—बोध-शून्यं [तव बुद्धि-सत्त्वम्] । आवेशयन्त्या—आविशन्त्या, प्रविशन्त्या । स्वार्थो णिच् ।

न पाणिभ्यां, न बाहुभ्यां, पादोरुभ्यां न चानघ,
न गात्रावयवैर् अन्यैः स्पृशामि त्वां, नराधिप। ३७

कुले महति जातेन ह्रीमता दीर्घ-दर्शिना
नैतत् सदसि वक्तव्यं सद् वा-सद् वा मिथः कृतम्। ३८

यथा पुष्कर-पर्ण-स्थं जलं, तत् पर्णम् अ-स्पृशत्,
तिष्ठत्य-स्पृशती तद्वत् त्वयि वत्स्यामि, मैथिल। ३९

नास्मि वर्णोत्तमा जात्या, न वैश्या, नावरा तथा।
तव, राजन्, स-वर्णास्मि, शुद्ध-योनिर्, अ-विप्लुता। ४०

प्रधानो नाम राजर्षिर् व्यक्तं ते श्रोत्रम् आगतः।
कुले तस्य समुत्पन्नां सुलभां नाम विद्धि माम्। ४१

साहं तस्मिन् कुले जाता, भर्तर्यसति मद्विधे,
विनीता मोक्ष-धर्मेषु, चराम्येका मुनि-व्रतम्। ४२

नास्मि सत्र-प्रतिच्छन्ना, न पर-स्वापहारिणी,
न धर्म-सङ्कर-करी। स्व-धर्मे ऽस्मि धृत-व्रता। ४३

मोक्षे ते भावितां बुद्धिं श्रुत्वाहं कुशलैषिणी,
तव मोक्षस्य चाप्यस्य जिज्ञासार्थम् इहागता। ४४

३८। मिथः—रहसि। ३९। अ-स्पृशती—त्वाम् इति शेषः। ४०। वर्णोत्तमा—ब्राह्मणी। अ-वरा—अ-श्रेष्ठा, नीचा, शूद्रा। अ-विप्लुता—अ-त्यक्त-ब्रह्मचर्य-व्रता। ४२। विनीता—[गुरुभिः] शिक्षिता। ४३। सत्र-प्रतिच्छन्ना—आच्छादनाच्छादिता, छद्म-वेशा, कपट-सन्न्यासिनी। ४४। भाविताम्—उन्नमिताम्, परिपक्काम्। जिज्ञासार्थम्—ज्ञातुम् इच्छया।

यथा शून्ये पुरागारे भिक्षुर् एकां निशां वसेत्,
तथाहं त्वच्-छरीरे ऽस्मिन्न् इमां वत्स्यामि शर्वरीम्। ४५

साहं मान-प्रदानेन वाग्-आतिथ्येन चार्चिता
सुप्ता सु-शरणं प्रीता श्वो गमिष्यामि, मैथिल।" ४६

इत्येतानि स वाक्यानि हेतुमन्त्यर्थवन्ति च
श्रुत्वा, नाधिजगौ राजा किञ्चिद् अन्यद् अतः परम्। ४७

चतुर्-विंशो ऽध्यायः

पुरुषोत्तम-दर्शनम्

युधिष्ठिर उवाच,—

गृह-स्थो ब्रह्म-चारी वा वानप्रस्थो ऽथ भिक्षुकः,
य इच्छेत् सिद्धिम् आस्थातुं, देवतां कां यजेत सः? १

भीष्म उवाच,—

न ह्येतत् तर्कया शक्यं वक्तुं वर्ष-शतैर् अपि
ऋते देव-प्रसादाद् वा, राजन्, ज्ञानागमेन वा। २

४५। पुरागारे—नगरस्य गृहे। ४६। सुप्ता सु-शरणम्—उत्कृष्ट-गृहे शयिता। ४७। हेतुमन्ति—युक्तिमन्ति। अर्थवन्ति—प्रयोजनवन्ति। अधिजगौ—अधिगतवान्, [उत्तरं] वक्तुं शशाक।

२। तर्कया—तर्केण। ऋते देव-प्रसादात्—ईश्वरस्य अनुग्रहेण विना। Cf. कठ. १।२।२३, मुण्ड. ३।१।८।

क्षीरोदधेर् योत्तरतो हि द्वीपः,
श्वेतः स नाम्ना प्रथितो, विशालः ।
मेरोः सहस्रैः स हि योजनानां
द्वात्रिंशतोर्ध्वं कविभिर् निरुक्तः । ३

अनिन्द्रियाश् चानशनाश् च तत्र
निस्पन्द-हीनाः सु सुगन्धिनस् ते—
श्वेताः पुमांसो गत-सर्व-पापाश्,
चक्षुर्-मुषः पाप-कृतां नराणाम्, ४

३ । योत्तरतः [यः+उत्तरतः]—य उत्तरस्यां दिशि । श्वेत-द्वीपः—सप्त-द्वीपायाः पृथिव्याः केन्द्र-स्थो जम्बु-द्वीपः । जम्बु-द्वीपः पुनः दशसु द्वीपाख्येष्वेव भागेषु विभज्यते । तेषु द्वितीयः श्वेत-द्वीपः । स हि इदानीन्तन्याः कनीयस्या एसियायाः उपकूलम् । ईशानुगाः श्वेत-यवनाः श्वेतद्वीपं मिश्र-देशस्योत्तरोपकूलं चाध्यूषुः । यथेदानीं तथा पुरापि गन्धकाकर-प्राचुर्येण श्वेत-द्वीपो मिश्र-देशोपकूलाद् विशिशिषे । मेरुः—मेरु-पर्वतः, इदानीन्तन-तार्तारी-माल-भूमिः । सा हि जगत्-पृष्ठम् ('वाम्-इ-दुनिया') इति नाम्ना प्रख्यायते । (शी-) । श्वेत-द्वीपो हि मेरोः वायव्य-कोणे (उत्तर-पश्चिमस्यां दिशि) वर्तते । महाभा. १२।३३५।८ ऊर्ध्वम्—उत्तरतः, उत्तर-पश्चिमस्यां दिशि इति भावः । Cf. हिन्दी उपरमें (उत्तरमें) । कविभिः—पण्डितैः । निरुक्तः—निश्चयेन कथितः । ४ । अनिन्द्रियाः—स्थूल-देहेन्द्रिय-व्यापार-शून्याः । अनशनाः—अनाहाराः, विषय-भोग-शून्याः । निस्पन्द-हीनाः—पेशि-चलन-शून्याः, निश्-चेष्टाः । सु-सुगन्धिनः—'वायौ धूपादि-सुगन्धि-द्रव्याणां दाहेन' इति

वज्रास्थि-कायाः सम-मानोन्माना,
दिव्यावयव-रूपाः, शुभ-सारोपेताः,
छत्राकृति-शीर्षा, मेघौघ-निनादाः,
सम-मुष्क-चतुष्का, राजीव-च्छद-पादाः, ५

षष्ट्या दन्तैर् युक्ताः शुक्लैर् अष्टाभिर् दंष्ट्राभिर् ये,
जिह्वाभिर् ये विश्व-वक्त्रं लेलिह्यन्ते सूर्य-प्रख्यम्
देवं भक्त्या विश्वोत्पन्नं यस्मात् सर्वे लोकाः संप्रसूताः ।
वेदा धर्मा मुनयः शान्ता देवाः, सर्वे तस्य निसर्गः । ६

शेषः। चक्षुर्-मुषः—[मुख्यतः प्रक्षिप्तालोक-प्रक्षेपक-मसृण-श्वेत-वस्त्र-समावृत-श्वेत-देहत्वात्] दृष्टि-घातिनः। ५। वज्रास्थि-कायाः—अति-दृढास्थि-देहाः। वज्रम्—हीरकम्। सम-मानोन्मानाः—तुल्य-मानापमानाः। Cf. गी. १२।१८ दिव्यावयव-रूपाः-- स्वर्गीयाङ्गाकृतयः। शुभसारोपेताः—कल्याण-प्रसू-बल-सम्पन्नाः। छत्राकृति-शीर्षाः —[निर्मांस-ग्रीवत्वात्] आतपत्र-वृत्त-मस्तकाः। मेघौघ-निनादाः—चलद्-मेघ-श्रेणिवद् गम्भीर-शब्दाः। सम-मुष्क-चतुष्काः—समौ (अ-स्थूलौ) मुष्कौ (वृषणौ) तथा समं चतुष्कं (कक्ष्योर् अंसयोश् च अन्तरालम्) येषां ते तादृशाः। राजीव-च्छद-पादाः—[वर्णेन आभया च] पद्म-दल-चरणाः। ६। पं-१—षष्टि-दन्तत्वं अष्ट-दंष्ट्रत्वं च अलौकिकत्व-सूचनाय प्रकल्पितम्। विश्व-वक्त्रम्—विश्वतो-मुखम् (गी. ६।१५), सर्वात्मकम्, विश्वेश्वर-प्रतीक-भूतम् स-पिष्टक-मद्यम्, eucharist. लेलिह्यन्ते [लिह्-य+अन्ते]—[पायसम् इव] अतिशयेन लिहन्ति। सूर्य-प्रख्यम्—सूर्यवत् निर्मलम्।

एकाग्र-मनसो दान्ता मुनयः संयमे रताः
लोकान् संचिन्त्य मनसा ततः शास्त्रं प्रचक्रिरे। ७

नारायणानुशिष्टा हि तदा देवी सरस्वती
विवेश तान् ऋषीन् सर्वान् लोकानां हित-काम्यया। ८

ततस् ते लोक-पितरः सर्व-लोकार्थ-चिन्तकाः,
साङ्गोपनिषदं शास्त्रं स्थापयित्वा बृहस्पतौ,
जग्मुर् यथेप्सितं देशं, तपसे कृत-निश्चयाः। ९

तस्य शिष्यो बभूवाग्र्यो राजोपरिचरो वसुः।
तस्य यज्ञो महान् आसीद् अश्व मेधो महात्मनः। १०

बृहस्पतिर् उपाध्यायस् तत्र होता बभूव ह।
प्रजापति-सुताश् चात्र सदस्याश चाभवंस् त्रयः, ११

एकतश् च द्वितश् चैव त्रितश् चैव महर्षयः।
न तत्र पशु-घातो ऽभूत्। स राजैवं स्थितो ऽभवत्। १२

प्रीतस् ततो ऽस्य भगवान् देव-देवः पुरातनः,
साक्षात् तं दर्शयामास। सो, ऽ-दृश्यो ऽन्येन केनचित्,
स्वयं भागम् उपाघ्राय, पुरोडाशं गृहीतवान्। १३

विश्वोत्पन्नम्—विश्वम् उत्पन्नं यस्मात् तादृशम्। संपसूताः—सञ्जाताः। निसर्गः—सृष्टिः। १०। उपरिचरो वसुः—चेदि-प्रदेशाधिपः। स हि तपसा इन्द्राद् विमानं लेभे, तेन च प्रायेण नभसि विचरन् उपरि-चर इति नाम्ना पप्रथे। ११। होता [ह्वे + तृ, १।१]—[देवस्य] आह्वाता। १३। दर्शयामास—'आत्मानम्' इति शेषः। उपाघ्राय—घ्राणेन उपलभ्य। पुरोडाशः [पुरः-दाश्+अ, १।१]—यव-चूर्ण-निर्मित-रोटिका-विशेषः।

बृहस्पतिस् ततः, क्रुद्धः, स्रुचम् उद्यम्य, वेगितः,
आकाशं घ्नन् स्रुचः पातौ, रोषाद् अश्रूण्यवर्तयत् ; १४
उवाच चोपरिचरं,—"मया भागो ऽयम् उद्यतः
ग्राह्यः स्वयं हि देवेन मत्-प्रत्यक्षं न संशयः ।
किमर्थम् इह न प्राप्तो दर्शनं मे हरिर्, नृप ?" १५
अथैकतो द्वितश् चैव त्रितश् चैव महर्षयः
ऊचुश् चैनम्, अ-सम्भ्रान्ता,— 'न रोषं कर्तुम् अर्हसि । १६
न शक्यः स त्वया द्रष्टुम् अस्माभिर् वा, बृहस्पते ।
यस्य प्रसादं कुरुते, स वै तं द्रष्टुम् अर्हति । १७
वयं हि, ब्रह्मणः पुत्रा मानसाः परिकीर्तिताः,
गता निःश्रेयसार्थं हि कदाचिद् दिशम् उत्तराम्, १८
कथं पश्येमहि वयं देवं नारायणं त्विति ।
अथ व्रतस्यावभृथे वाग् उवाचाशरीरिणी,— १९
'एकान्तिनस् ते पुरुषाः श्वेत-द्वीप-निवासिनः ।
गच्छध्वं तत्र, मुनयस् । तत्रात्मा मे प्रकाशितः' । २०

---

१४ । स्रुक्—यज्ञाग्नौ घृत-प्रक्षेपाय निर्मितं काष्ठ-पात्रम् । उद्यम्य—उत्थाप्य । १५ । उद्यतः—उत्थापितः । १८ । निःश्रेयसम् [नास्ति श्रेयः (प्रशस्यतरं) यस्मात् तत्]—परमार्थः, मोक्षः । १९ । व्रतस्यावभृथे—नियमस्य अन्त्ये कर्मणि । २० । एकान्तिनः—'एकान्तेनासमो विष्णुर् यस्मात् एषां परायणः, तस्माद् एकान्तिनः प्रोक्तास् तद्-भागवत-चेतसः ।' गा. १२१ (शकद्रु.) । अ-समः—अ-द्वितीयः । गच्छध्वम्—गच्छत । आभा ।

प्राप्य श्वेतं महा-द्वीपं तच्चित्तास् तद्-दिदृक्षवः
व्रतावसाने च शुभान् नरान् ददृशिमो वयम्, २१

श्वेतांश् चन्द्र-प्रतीकाशान् सर्व-लक्षण-लक्षितान्
नित्याञ्जलि-कृतान् ब्रह्म जपतः प्रागुदङ्-मुखान्। २२

मानसो नाम स जपो जप्यते तैर् महात्मभिः।
तेनैकाग्र-मनस्त्वेन प्रीतो भवति वै हरिः। २३

याभवद् मुनि-शार्दूल, भाः सूर्यस्य युग-क्षये,
एकैकस्य प्रभा तादृक् साभवद् मानवस्य ह। २४

तेजो निवासः स द्वीप इति वै मेनिरे वयम्।
न तत्राभ्यधिकः कश्चित्। सर्वे ते सम-तेजसः। २५

अथ सूर्य-सहस्रस्य प्रभां युगपद् उत्थिताम्
सहसा दृष्टवन्तः स्म पुनर् एव, बृहस्पते। २६

सहसा चाभ्यधावन्त सर्वे ते मानवा द्रुतम्,
कृताञ्जलि-पुटा हृष्टा नम इत्येव वादिनः। २७

ततो हि वदतां तेषाम् अश्रौष्म विपुलं ध्वनिम्—
बलिः किलोपह्रियते तस्य देवस्य तैर् नरैः। २८

२१। ददृशिमः—ददृशिम। छन्दो-ऽनुरोधेन विसर्गागमः। २२। प्रागुदङ्-मुखान्—[क्वचित्] प्राङ्-मुखान् (पूर्व-मुखान्) [क्वचिद्] उदङ्-मुखान् (उत्तर-मुखांश्) च। २३। मानसो जपः—'विधि-यज्ञाज् जप-यज्ञो विशिष्टो दशभिर् गुणैः, उपांशुः स्याच् छत-गुणः साहस्रो मानसः स्मृतः।'—आव. (शकद्रु)।

वयं तु तेजसा तस्य सहसा हृत-चेतसः
न किञ्चिद् अपि पश्यामो, हृत-चक्षुर्बलेन्द्रियाः । २९

एकस् तु शब्दो विततः श्रुतो ऽस्माभिर् उदीरितः,
आकाशं पूरयन् सर्वं, शिक्षाक्षर-समन्वितः,— ३०

"जितं ते पुण्डरीकाक्ष ! नमस् ते, विश्व-भावन !
नमस् ते ऽस्तु, हृषीकेश, महा-पुरुष, पूर्व-ज !' ३१

एतस्मिन्न् अन्तरे वायुः सर्व-गन्ध-वहः शुचिः
दिव्यान्युवाह पुष्पाणि कर्मण्याश् चौषधीस् तथा । ३२

नूनं तत्रागतो देवो यथा तैर् वाग् उदीरिता ।
वयं त्वेनं न पश्यामो, मोहितास् तस्य मायया । ३३

मारुते सन्निवृत्ते च बलौ च प्रतिपादिते,
चिन्ता-व्याकुलितात्मानो जाताः स्मो, ऽङ्गिरसां वर । ३४

मानवानां सहस्रेषु तेषु वै शुद्ध-योनिषु
अस्मान् न कश्चिद् मनसा चक्षुषा वाप्यपूजयत् । ३५

ततो ऽस्मान् सु-परिश्रान्तांस् तपसा चाति-कर्शितान्
उवाच ख-स्थं किम् अपि भूतं तत्राशरीरकम्,— ३६

'दृष्टा वः पुरुषाः श्वेताः सर्वेन्द्रिय-विवर्जिताः ।
दृष्टो भवति देवेश एभिर् दृष्टैर् द्विजोत्तमैः । ३७

---

३० । शिक्षाक्षर-समन्वितः—शिक्षाख्य-वेदाङ्ग-सम्मतोच्चारण-विशिष्टः । ३१ । जितम्—जयः । पूर्व-जः—प्रथम-जातः, first-begotten. ३२ । कर्मण्याः—कर्म-योग्याः, क्रियार्थाः । ३७ । वः—युष्माभिः । षष्ठी आर्षी ।

गच्छध्वं, मुनयः, सर्वे यथागतम् इतो ऽचिरात् ।
न स शक्यस् त्व-भक्तेन द्रष्टुं देवः कथञ्चन । ३८

कामं कालेन महता एकान्तित्वम् उपागतैः,
शक्यो द्रष्टुं स भगवान् प्रभा-मण्डल-दुर्दशः ।' ३९

एवं सु-तपसा चैव हव्य-कव्यैस् तथैव च
देवो ऽस्माभिर् न दृष्टः स । कथं त्वं द्रष्टुम् अर्हसि ?" ४०

एवम् एकत-वाक्येन द्वित-त्रित-मतेन च
अनुनीतः सदस्यैश् च, बृहस्पतिर् उदार-धीः ४१

समापयत् ततो यज्ञं, दैवतं समपूजयत् ।
समाप्त-यज्ञो राजापि प्रजां पालितवान् प्रभुः ;
ब्रह्म-शापाद् दिवो भ्रष्टः प्रविवेश महीं ततः । ४२

नारायण-परो भूत्वा, नारायण-जपं जपन्,
मही-तलाद् गतः स्थानं ब्रह्मणः समनन्तरम् । ४३

युधिष्ठिर उवाच,—

यदा भागवतो ऽत्यर्थम् आसीद् राजा महान् वसुः,
किमर्थं स परिभ्रष्टो विवेश विवरं भुवः ? ४४

---

४० । हव्यम्—देवाय हवनीयं द्रव्यम् । कव्यम्—पितृभ्यो देयम् अन्नम् । ४३ । समनन्तरम्—अव्यवहित-परम् । ४४ । भागवतः [भगवत् + अ, १।१]—भगवद्-भक्तः ।

भीष्म उवाच,—

"अजेन यष्टव्यम्" इति प्राहुर् देवा द्विजोत्तमान्,
"स च च्छागो ऽप्यजो ज्ञेयो नान्यः पशुर् इति स्थितिः।" ४५

ऋषय ऊचुः,—

"बीजैर् यज्ञेषु यष्टव्यम्" इति वै वैदिकी श्रुतिः।
अज-संज्ञानि बीजानि। च्छागं नो हन्तुम् अर्हथ। ४६

भीष्म उवाच,—

तेषां संवदताम् एवम् ऋषीणां विबुधैः सह,
मार्गागतो नृप-श्रेष्ठस् तं देशं प्राप्तवान् वसुः। ४७
ऊचुर् द्वि-जातयो देवान्,—"एष च्छेत्स्यति संशयम्।
कथं स्विद् अन्यथा ब्रूयाद् एष वाक्यं महान् वसुः ?" ४८

एवं ते संविदं कृत्वा विबुधा ऋषयस् तथा
अपृच्छन् सहिताभ्येत्य वसुं राजानम् अन्तिकात्,— ४९

"भो राजन्, केन यष्टव्यम् अजेनाहो स्विद् औषधैः ?
एतन् नः संशयं छिन्धि। प्रमाणं नो भवान् मतः।" ५०

स तान्, कृताञ्जलिर् भूत्वा, परिपप्रच्छ वै वसुः,—
"कस्य वै को मतः पक्षो ? ब्रूत सत्यं, द्विजोत्तमाः"। ५१

ऋषय ऊचुः,—

'धान्यैर् यष्टव्यम् इत्येव पक्षो ऽस्माकं, नराधिप।
देवानां तु पशु-पक्षो मतो। राजन्, वदस्व नः। ५२

४९। संविदम्—बुद्धिम्। ५२। वदस्व नः—त्वम् एवात्र प्रमाणम्. इति नः संशयं छिन्धि। पा. १।३।४७।

भीष्म उवाच,—

देवानां तु मतं ज्ञात्वा, वसुना पक्ष-संश्रयात्
'छागेनाजेन यष्टव्यम्' एवम् उक्तं वचस् तदा । ५३

कुपितास् ते ततः सर्वे मुनयः सूर्य-वर्चसः
ऊचुर् वसुं विमान-स्थं देव-पक्षार्थ-वादिनम्,— ५४

"सुर-पक्षो गृहीतस् ते यस्मात् तस्माद् दिवः पत ।"
प्राप्ता गतिर् अधस्तात् तु द्विज-शापाद् महात्मना । ५५

केवलं पुरुषस् तेन सेवितो हरिर् ईश्वरः ।
ततः शीघ्रं जहौ शापं ब्रह्म-लोकम् अवाप च । ५६

प्राप्य श्वेतं महा-द्वीपं, नारदो भगवान् ऋषिः
ददर्श तान् एव नरान् श्वेतांश् चन्द्र-सम-प्रभान्, ५७

पूजयामास शिरसा, मनसा तैश् च पूजितः ।
दिदृक्षुर् जप्य-परमः सर्व-कृच्छ्र-गतः स्थितः, ५८

भूत्वैकाग्र-मना विप्र ऊर्ध्व-बाहुः समाहितः
स्तोत्रं जगौ स विश्वाय निर्गुणाय गुणात्मने । ५९

एवं स्तुतः स भगवान् गुह्यैस् तथ्यैश् च नामभिः,
तं मुनिं दर्शयामास नारदं, विश्व-रूप-धृक् । ६०

---

६० । गुह्यैः—गोपनीयैः । तथ्यैः—यथार्थैः । विश्व-रूप-धृक्—जगद्-रूप-धारयिता, बहिः जगदाकारेण प्रकाशमानः । Cf. 'विश्वतश् चक्षुर् उत विश्वतो-मुखो विश्वतो-बाहुर् उत विश्वतस्पात्' (ऋग्वे. १०।८१।३) ।

सहस्र-नयनः श्रीमाञ् छत-शीर्षः सहस्र-पात्
सहस्रोदर-बाहुश् च अ-व्यक्त इति च क्वचित्, ६१

ओङ्कारम् उद्गिरन् वक्त्रात् सावित्रीं च तदन्वयाम्
शेषेभ्यश् चैव वक्त्रेभ्यश् चतुर्वेदान् गिरन् बहून्, ६२

आरण्यकं जगौ देवो हरिर् नारायणो वशी।
वेदिं कमण्डलुं दर्भान् मणीन् उपानहौ कुशान् ६३

अजिनं दण्ड-काष्ठं च ज्वलितं च हुताशनम्
धारयामास देवेशो हस्तैर्, यज्ञ-पतिस्, तदा। ६४

तं प्रसन्नं प्रसन्नात्मा नारदो द्विज-सत्तमः,
वाग्-यतः प्रणतो भूत्वा, ववन्दे परमेश्वरम्। ६५

तम् उवाच, नतं मूर्ध्ना, देवानाम् आदिर् अव्ययः,—
"एकतश् च द्वितश् चैव त्रितश् चैव महर्षयः
इमं देशम् अनुप्राप्ता मम दर्शन-लालसाः। ६६

न च मां ते ददृशिरे। न च द्रक्ष्यति कश्चन
ऋते ह्यैकान्तिक-श्रेष्ठात्। त्वं चैवैकान्तिकोत्तमः।" ६७

नारद उवाच,—

अद्य मे तपसो, देव, यमस्य नियमस्य च
सद्यः फलम् अवाप्तं वै, दृष्टो यद् भगवान् मया। ६८

६२। उद्गिरन्—उत्सृजन्। सावित्रीम्—गायत्रीम्। तदन्वयाम्—तदनुगाम्। ६७। ददृशिरे—ददृशुः। आआ। ऐकान्तिकः—एकान्ती, एकेश्वरोपासकः। ६८। यमः—'अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः'—पायोसू. २।३० नियमः—'शौच-सन्तोष-तपः-स्वा-

भीष्म उवाच,—

एवं सन्दर्शयित्वा तु नारदं परमेष्ठिनम्
उवाच वचनं भूयो,—"गच्छ, नारद, मा चिरम्, ६९
'इमे ह्यनिन्द्रियाहारा मद्-भक्ताश् चन्द्र-वर्चसः
एकाग्राश् चिन्तयेयुर् मां, तेषां विघ्नो भवेद्' इति। ७०
सिद्धा ह्येते महा-भागाः पुरा ह्येकान्तिनो ऽभवन्,
तमो-रजोभिर् निर्मुक्ता मां प्रवेक्ष्यन्त्य-संशयम्।" ७१
एवं स भगवान् देवो विश्व-मूर्ति-धरो ऽव्ययः,
एतावद् उक्त्वा वचनं, तत्रैवान्तर्दधे पुनः। ७२

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
शान्ति-पर्व।

ध्यायेश्वर-प्रणिधानानि नियमाः'—पायोसू. २।३२। ७१। पुरा—पश्चात्। ७२। अन्तर्दधे—अन्तर्हितो बभूव।

इति तारकालोके नाम भारत-वृत्तौ
शान्ति-पर्व।

अथ

श्रीभारते

अनु-शासन-पर्व

प्रथमो ऽध्यायः

गौतमी-संवादः—कर्म-बन्धः

युधिष्ठिर उवाच,—

शमो बहु-विधाकारः सूक्ष्म उक्तः, पितामह ।
न च मे हृदये शान्तिर् अस्ति श्रुत्वेदम् ईदृशम् । १

वयं हि धार्तराष्ट्राश च काल-मन्यु-वशं गताः
कृत्वेदं निन्दितं कर्म प्राप्स्यामः कां गतिं, नृप ? २

अन्यस्मिन्न् अपि लोके नौ यथा मुच्येम किल्बिषात्,
तथा प्रशाधि मां, राजन्, मम चेद् इच्छसि प्रियम् । ३

---

१ । शमः—शोक-तरणोपायः । २ । मन्युः—क्रोधः । ३ । किल्बिषात्—[राग-द्वेष-क्रोधादि-] दोषात् ।

भीष्म उवाच,—

पर-तन्त्रं कथं हेतुम् आत्मानम् अनुपश्यसि
कर्मणां हि? महा-भाग, सूक्ष्मं ह्य् एतद् अतीन्द्रियम्। ४

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
संवादं मृत्यु-गौतम्योः काल-लुब्धक-पन्नगैः। ५

गौतमी नाम, कौन्तेय, स्थविरा शम-संयुता
सर्पेण दष्टं स्वं पुत्रम् अपश्यद् गत-चेतनम्। ६

अथ तं स्नायु-पाशेन बद्ध्वा सर्पम्, अमर्षितः
लुब्धको ऽर्जुनको नाम गौतम्याः समुपानयत्। ७

स चाब्रवीद्,—"अयं ते स पुत्र-हा पन्नगाधमः।
ब्रूहि क्षिप्रं, महा-भागे, वध्यतां केन हेतुना। ८

अग्नौ प्रक्षिप्यताम् एष, च्छिद्यतां खण्डशो ऽपि वा।
न ह्ययं बाल-हा पापश् चिरं जीवितुम् अर्हति।" ९

गौतमी उवाच,—

विसृजैनम्! अ-बुद्धिस् त्वम्! अ-वध्यो, ऽर्जुनक, त्वया।
को ह्यात्मानं गुरुं कुर्यात् प्राप्तव्यम् अ-विचिन्तयन्? १०

४। पर-तन्त्रम्—पराधीनम्, पूर्व-कर्माधीनम्। हेतुम्—[पाप-पुण्ययोः] कारणम्। ७। स्नायु-पाशेन—नाड़ी-रज्जु-जालेन। ८। केन हेतुना—केन [वध-साधकेन] उपायेन। १०। गुरुम्—[पाप-भारेण नरके] मज्जन-योग्यम्। प्राप्तव्यम्—लोकम् इति शेषः।

नास्मिन् हते पन्नगे पुत्रकों मे
संप्राप्स्यते, लुब्धक, जीवितं वै ।
गुणं चान्यं नास्य वधे प्रपश्ये ।
तस्मात् सर्पं, लुब्धक, मुञ्च जीवम् । ११

लुब्धक उवाच,—

वृत्रं हत्वा देव-राट् श्रेष्ठ-भाग् वै ।
यज्ञं हत्वा भागम् अवाप चैव
शूली देवो । देव-वृत्तं चर त्वं—
क्षिप्रं सर्पं जहि ! मा भूत् ते विशङ्का ! १२

भीष्म उवाच,—

अ-सकृत् प्रोच्यमानापि गौतमी भुजगं प्रति
लुब्धकेन, महा-भागा पापे नैवाकरोद् मतिम् । १३
ईषद् उच्छ्वसमानस् तु कृच्छ्रात् संस्तभ्य, पन्नगः
उत्ससर्ज गिरं मन्दां मानुषीं, पाश-पीडितः,— १४
"को न्वर्जुनक दोषो त्र विद्यते मम, बालिश,
अ-स्व-तन्त्रं हि मां मृत्युर् विवशं यद् अचूचुदत् । १५

---

११ । गुणम्—सु-फलम् । प्रपश्ये—प्रपश्यामि । आआ. । जीवम्—जीवन्तम् । १२ । शूली देवः—शिवः । १४ । उच्छ्वसमानः—उच्छ्वसन्, कृच्छ्रेण निःश्वसन् । संस्तभ्य—धैर्यम् आलम्ब्य । १५ । मृत्युः—प्राणानाम् अपहन्त्री देवता । अचूचुदत्—प्रेरयामास ।

तस्यायं वचनाद् दष्टो, न कोपेन, न काम्यया ।
तस्य तत् किल्बिषं, लुब्ध, विद्यते यदि किल्बिषम् ।" १६

तथा ब्रुवति तस्मिंस् तु पन्नगे मृत्यु-चोदिते
आजगाम ततो मृत्युः पन्नगं चाब्रवीद् इदम्,— १७

"प्रचोदितो ऽहं कालेन, पन्नग, त्वाम् अचूचुदम् ।
विनाश-हेतुर् नासि त्वम् अहं न प्राणिनः शिशोः ।" १८

अथोपगम्य कालस् तु तस्मिन् धर्मार्थ-संशये
अब्रवीत् पन्नगं मृत्युं लुब्धं चार्जुनकं तथा,— १९

"न ह्यहं नाप्ययं मृत्युर् नायं, लुब्धक, पन्नगः
किल्बिषी जन्तु-मरणे । न वयं हि प्रयोजकाः । २०

अकरोद् यद् अयं कर्म तद् नो, ऽर्जुनक, चोदकम् ।
विनाश-हेतुर् नान्यो ऽस्य । वध्यते ऽयं स्व-कर्मणा । २१

एवं नाहं न वै मृत्युर् न सर्पो न तथा भवान्
न चेयं ब्राह्मणी वृद्धा, शिशुर् एवात्र कारणम् ।" २२

तस्मिंस् तथा ब्रुवाणे तु ब्राह्मणी गौतमी, नृप,
स्व-कर्म-प्रत्ययाल्ँ लोकान् मत्वार्जुनकम् अब्रवीत्,— २३

---

१६ । काम्यया—[स्व-] कामनया, स्वेच्छया । तस्य—[प्रयोजकस्य] मृत्योः, न व्याध-शरस्येव प्रयुक्तस्य मम । २३ । स्व-कर्म-प्रत्ययान्—स्व-कर्मैव प्रत्ययः (हेतुः) येषां तान् तादृशान् । लोकान्—स्वर्ग-नरकादीन् ।

"नैव कालो न भुजङ्गो न मृत्युर् इह कारणम्,
स्व-कर्मभिर् अयं बालः कालेन निधनं गतः । २४
मया च तत् कृतं कर्म येनायं मे मृतः सुतः ।
यातु कालस् तथा-मृत्युर् । मुञ्चार्जुनक पन्नगम् ।" २५
ततो यथागतं जग्मुर् मृत्युः कालो ऽथ पन्नगः ।
अभूद् वि-शोको ऽर्जुनको वि-शोका चैव गौतमी । २६
एतच् श्रुत्वा शमं गच्छ । मा भूः शोक-परो, नृप !
स्व-कर्म-प्रत्ययाल्ँ लोकान् सर्वे गच्छन्ति वै, नृप । २७

द्वितीयो ऽध्यायः

सुदर्शनौघवती-संवादः—आतिथ्यम्

युधिष्ठिर उवाच,—

केन मृत्युर् गृहस्थेन धर्मम् आश्रित्य निर्जितः ?
इत्येतत् सर्वम् आचक्ष्व तत्त्वेनापि च, पार्थिव । १

भीष्म उवाच,—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम्
यथा मृत्युर् गृहस्थेन धर्मम् आश्रित्य निर्जितः । २

---

२५ । तत्—पुत्र-शोक-प्रदम् ।

१ । तत्त्वेन—याथातथ्येन ।

दुर्जयस्येन्द्र-वपुषः पुत्रो ऽग्नि-सदृश-द्युतिः
दुर्योधनो नाम महान् राजा राजर्षि-सत्तमः । ३

तं नर्मदा देव-नदी पुण्या शीत-जला शिवा
चकमे पुरुष-व्याघ्रं स्वेन भावेन, भारत । ४

तस्यां जज्ञे तदा नद्यां कन्या राजीव-लोचना
नाम्ना सु-दर्शना, राजन्, रूपेण च सु-दर्शना । ५

तस्याः समभवत् पुत्रो नाम्नाग्नेयः सु-दर्शनः ।
शिशुर् एवाध्यगात् सर्वं परं ब्रह्म सनातनम् । ६

अथौघवान् नाम नृपो नृगस्यासीत् पितामहः ।
तस्याथौघवती कन्या पुत्रश् चौघ-रथो ऽभवत् । ७

ताम् ओघवान् ददौ तस्मै स्वयम् ओघवतीं सुताम्
सुदर्शनाय विदुषे भार्यार्थे देव-रूपिणीम् । ८

स, गृहस्थाश्रम-रतस् तया सह, सुदर्शनः
कुरु-क्षेत्रे ऽवसद्, राजन्, जोघवत्या समन्वितः । ९

"गृहस्थश् चावजेष्यामि मृत्युम्" इत्येव स, प्रभो,
प्रतिज्ञाम् अकरोद्, धीमान् दीप्त-तेजा, विशां पते । १०

---

४ । चकमे—कामयामास । भावेन—अनुरागेण । ६ । आग्नेयः—अग्नि-पुत्रः । अग्निर् हि देवः सन्न् अपि भाव-वशात् मानव-पुत्रीं सु-दर्शनाम् उपयेमे । अध्यगात् [अधि इ+द्]—अध्यैट्, अध्यगीष्ट, अपाठीत् । पआ. । वरम्—श्रेष्ठम् । परं ब्रह्म—वेदस्य श्रेष्ठांशम्, वेद-शिरो-भाग-भूताम् उपनिषदम्, वेदान्तम् । सनातनम्—नित्यम् । १० । च—एव ।

ताम् अथौघवतीं, राजन्, स पावक-सुतो ऽब्रवीत्,—
"अतिथेः प्रतिकूलं ते न कर्तव्यं कथञ्चन। ११
येन येन च तुष्येत नित्यम् एव त्वयातिथिः,
अप्यात्मनः प्रदानेन, न ते कार्या विचारणा।" १२
तम् अब्रवीद् ओघवती तथा मूर्ध्नि कृताञ्जलिः,—
"न मे त्वद्-वचनात् किञ्चिद् न कर्तव्यं कथञ्चन।" १३
जिगीषमाणस् तु गृहे तदा मृत्युः सु-दर्शनम्
पृष्ठतो ऽन्वगमद्, राजन्, रन्ध्रान्वेषी तदा सदा। १४
इध्मार्थं तु गते तस्मिन्न् अग्नि-पुत्रे सु-दर्शने
अतिथिर् ब्राह्मणः श्रीमांस् ताम् आहौघवतीं तदा,— १५
"आतिथ्यं कृतम् इच्छामि त्वयाद्य, वर-वर्णिनि।"
आसनं चैव पाद्यं च तस्मै दत्त्वा द्वि-जातये, १६
प्रोवाचौघवती विप्रं—"केनार्थः ? किं ददानि ते ?"
ताम् अब्रवीत् ततो विप्रो राज-पुत्रीं सुदर्शनाम्,— १७
"यदि प्रमाणं धर्मस् ते गृहस्थाश्रम-सम्मतः,
प्रदानेनात्मनो, राज्ञि, कर्तुम् अर्हसि मे प्रियम्।" १८

१२। आत्मनः—शरीरस्य। १३। न कर्तव्यम्—अ-कर्तव्यम्। १४। जिगीषमाणः—जिगीषन्, जेतुम् इच्छन्। आआ.। तदा—गार्हस्थ्य-काले। १५। इध्मम्—अग्नि-सन्दीपन-काष्ठम्। १७। ददानि—'ददामि' इति पाठो न समीचीनो भाति।

स, तया छन्द्यमानो ऽन्यैर् ईप्सितैर् नृप-कन्यया,
नान्यम् आत्म-प्रदानात् स तस्या वव्रे वरं द्विजः। १९

सा तु राज-सुता, स्मृत्वा भर्तुर् वचनम् आदितः,
तथेति लज्जमाना सा तम् उवाच द्विजर्षभम्।
ततो विहस्य विप्रर्षिः सा चैवाथ विवेश ह। २०

अथेध्मानम् उपादाय स पावकिर् उपागमत्,
तां व्याजहारौघवतीं क्वासि यातेति चासकृत्। २१

उच्छिष्टास्मीति मन्वाना, लज्जिता भर्तुर् एव च,
तूष्णीम्भूताभवत् साध्वी, न चोवाचाथ किञ्चन। २२

अथ तां पुनर् एवेदं प्रोवाच स सुदर्शनः,—
"कथं न प्रत्युदेत्यद्य स्मयमाना यथा पुरा?" २३

उटज-स्थस् तु तं विप्रः प्रत्युवाच सुदर्शनम्,—
"अतिथिं विद्धि संप्राप्तं ब्राह्मणं, पावके, च माम्। २४

अनया छन्द्यमानो ऽहं भार्यया तव, सत्तम,
तैस् तैर् अतिथि-सत्कारैर्, ब्रह्मन्न्, एषा वृता मया। २५

१९। छन्द्यमानः—प्रलोभ्यमानः। २०। स्मृत्वा...आदितः—Cf. उपरिष्टात् १३।२।१२ विवेश—'शयन-गृहम्' इति शेषः। २५। छन्द्यमानः—इष्यमाणः। ओघवत्याः इच्छा एव सङ्गम-कारणम् न बलात्कारः इत्युक्तम्।

अनेन विधिना सेयं माम् अर्च्छति शुभानना ।
अनुरूपं यद् अत्रान्यत् तद् भवान् कर्तुम् अर्हति ।'' २६

सुदर्शनस् तु मनसा कर्मणा चक्षुषा गिरा
त्यक्तेर्ष्यास् त्यक्त-मन्युश् च स्मयमानो ऽब्रवीद् इदम्,— २७

"सुरतं ते ऽस्तु, विप्राग्र्य ! प्रीतिर् हि परमा मम ।
गृहस्थस्य हि धर्मो ऽग्र्यः संप्राप्तातिथि-पूजनम् । २८

प्राणा हि मम दाराश् च यच् चान्यद् विद्यते वसु,
अतिथिभ्यो मया देयम् इति मे व्रतम् आहितम् ।" २९

उटजात् तु ततस् तस्माद् निश्चक्राम स वै द्विजः,
उवाच चैनं धर्मज्ञं, पूर्वम् आमन्त्र्य नामतः,— ३०

"धर्मो ऽहम् अस्मिन्—भद्रं ते—जिज्ञासार्थं तवानघ
प्राप्तः । सत्यं च ते ज्ञात्वा प्रीतिर् मे परमा त्वयि । ३१

---

२६ । विधिना—प्रकारेण । अर्च्छति—आयाति । अनुरूपम् अन्यत्—स्त्री-दूषणानुगुणम् दण्डम् । २९ । आहितम्—गृहीतम् । ३१ । पत्युर् इच्छयापि अतिथेस् तुष्ट्यै नार्या पर-पुरुषाय देह-दानं गार्हस्थ्य-धर्म-विरुद्धम् एवेति वक्तव्यम्, एक-निष्ठत्वस्यैव अनवद्य-कुल-सन्तति-संरक्षण-मूलत्वात् । 'न स्त्री दुष्यति जारेण' (असं. १८९), 'रजसा शुध्यते नारी' (पसं. ७।४) 'व्यभिचाराद् ऋतौ शुद्धिः (यासं. १।७२) इत्यादीनि वचनानि मूल-घात-परिहाराय स्खलितानाम् अपि रक्षणम् एव विदधति न तु क्वचिद् अपि पुण्य-सञ्चितये नारीं पर-पुरुषाय देह-दाने प्रवर्तयति । Cf. उपरिष्टात् १२।१६।१६ ।

विजितश् च त्वया मृत्युर् यो ऽयं त्वाम् अनुगच्छति,
रन्ध्रान्वेषी तव सदा, त्वया धृत्या वशीकृतः। ३२

न चास्ति शक्तिस् त्रैलोक्ये कस्यचित्, पुरुषोत्तम,
पति-व्रताम् इमां साध्वीं तवोद्वीक्षितुम् अप्युत। ३३

रक्षिता त्वद्-गुणैर् एषा पातिव्रत्य-गुणैस् तथा।
अ-धृष्या यद् इयं ब्रूयात् तथा तद्, नान्यथा, भवेत्। ३४

अनया सह लोकांश् च गन्तासि तपसार्जितान्
यत्र नावृत्तिम् अभ्येति। शाश्वतांस् तान् सनातनान्
अनेन चैव देहेन लोकांस् त्वम् अभिपत्स्यसे। ३५

स्नेहो रागश् च तन्द्री च मोहो द्रोहश् च केवलः,
तव शुश्रूषया, राजन्, राज-पुत्र्या च निर्जिता।" ३६

शुक्लानां तु सहस्रेण वाजिनां रथम् उत्तमम्
युक्तं प्रगृह्य भगवान् वासवो ऽभ्याजगाम तम्। ३७

अतिथिः पूजितो यद् धि ध्यायते मनसा शुभम्
न तत् क्रतु-शतेनापि तुल्यम् आहुर् मनीषिणः। ३८

एतत् ते कथितं, पुत्र, मयाख्यानम् अनुत्तमम्
यथा हि विजितो मृत्युर् गृहस्थेन पुराभवत्। ३९

३६। तन्द्री—आलस्यम्। केवलः—कृत्स्नः। ३८। न क्रतु-शतेनापि तुल्यम—क्रतु-शताद् अपि अधिकम्।

तृतीयो ऽध्यायः

दैव-पुरुषकारौ

युधिष्ठिर उवाच,—

पितामह, महा-राज, सर्व-शास्त्र-विशारद,
दैवे पुरुषकारे च किं स्विच् श्रेष्ठतरं भवेत्? १

भीष्म उवाच,—

यादृशं वपते वीजं क्षेत्रम् आसाद्य कर्षकः
सुकृते दुष्कृते वापि, तादृशं लभते फलम्। २

यथा वीजं, विना क्षेत्रम्, उप्तं भवति निष्फलम्,
तथा पुरुषकारेण विना दैवं न सिध्यति। ३

क्षेत्रं पुरुष-कारस् तु दैवं वीजम् उदाहृतम्।
क्षेत्र-वीज-समायोगात् ततः सस्यं समृद्ध्यते। ४

कर्मणः फल-निर्वृत्तिं स्वयम् अश्नाति कारकः।
कृतं फलति सर्वत्र, नाकृतं भुज्यते क्वचित्। ५

१। पुरुषकारः—उद्यमः। दैवे पुरुषकारे च—दैव-पुरुषकारयोः [मध्ये]। पा. २।३।४१। २। सुकृते—पुण्ये। दुष्कृते—पापे। वैषयिकाधिकरणम्। ४। समृध्यते—समृध्यति, जायते वर्धते च। आआ.। ५। निर्वृत्तिम्—सिद्धिम्। अश्नाति—अश्नुते, भुङ्क्ते।

तपसा रूप-सौभाग्यं रत्नानि विविधानि च
प्राप्यते—कर्मणा सर्वं—न दैवाद् अकृतात्मना। ६

नादातारं भजन्त्यर्था न क्लीवं नापि निष्क्रियम्
नाकर्म-शीलं नाशूरं तथा नैवातपस्विनम्। ७

येन लोकास् त्रयः सृष्टा दैत्याः सर्वाश् च देवताः,
स एष भगवान् विष्णुः समुद्रे तप्यते तपः। ८

स्वं चेत् कर्म-फलं न स्यात् सर्वम् एवाफलं भवेत्,
लोको दैवं समालक्ष्य उदासीनो भवेद् ननु। ९

कृतः पुरुष-कारस् तु दैवम् एवानुवर्तते।
न दैवम् अ-कृते किञ्चित् कस्यचिद् दातुम् अर्हति। १०

यथा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि,
कथं, कर्म विना, दैवं स्थास्यति स्थापयिष्यति ? ११

न दैवतानि लोकेऽस्मिन् व्यापारं यान्ति कस्यचित्,
व्यासङ्गं जनयन्त्युग्रम् आत्माभिभव-शङ्कया। १२

७। अ-दातारम्—कृपणम्, व्यय-कुण्ठम्। ९। ननु—निश्चितम्। १०। अनुवर्तते—फल-दं करोति। अकृते—कर्माभावे। कस्यचित्—कस्मैचित्। ११। स्थानानि—[इन्द्रादि-] लोकाः। अ-नित्यानि—नश्वराणि; अ-स्थायीनि [देवानाम् अपि अधः-पतन-दर्शनात्]। १२। दैवतानि—देवाः। व्यापारं यान्ति—कर्म कुर्वन्ति, सहाया भवन्ति। व्यासङ्गम्—विषयासक्तिम्। उग्रम्—उत्कटम्, धर्म-विघ्न-करम्।

ऋषीणां देवतानां च सदा भवति विग्रहः ।
कस्य वाचा ह्य-दैवं स्याद् यतो दैवं प्रवर्तते ? १३

कथं तस्य समुत्पत्तिर् ? यतो दैवं प्रवर्तते ।
एवं त्रि-दश-लोके ऽपि प्राप्यन्ते बहवो गुणाः । १४

आत्मैव ह्यात्मनो बन्धुर् आत्मैव रिपुर् आत्मनः ।
आत्मैव ह्यात्मनः साक्षी कृतस्यापकृतस्य च । १५

देवानां शरणं पुण्यं सर्वं पुण्यैर् अवाप्यते ।
पुण्य-हीनं नरं प्राप्य किं दैवं प्रकरिष्यति ? १६

पुरा ययातिर् विभ्रष्टश् च्यावितः पतितः क्षितौ
पुनर् आरोपितः स्वर्गं दौहित्रैः पुण्य-कर्मभिः । १७

---

१३ । विग्रहः—वैरम् । पं. १—ऋषीणां विश्वामित्रादीनां तपसि दैवैर् विघ्नोत्पादनम् च्यवनादिभिर् ऋषिभिर् इन्द्रादि-देवानाम् अभिभवश् चात्र दृष्टान्त एव । किं च Cf. उपरिष्टात् १२।२४।४५-५५ कस्य...स्यात्—को वदेत् दैवं नास्तीति ? यतः—यस्मात् । प्रवर्तते—व्याप्रियते, व्याप्रियमाणं दृश्यते। १४। तस्य—कर्मणः। पं.१—दैवं सर्वत्र व्याप्रियमाणं दृश्यते। तस्य साहाय्यं विना कर्म न सम्भवति । एवं...ऽपि—यथा पृथिव्यां तथा स्वर्गे ऽपि [युगपत् दैव-पुरुष-काराभ्याम्] । गुणाः—भोगाः । १५। आत्मैव &c.—दैव-कर्मणोर् अन्योन्याधीनत्वे ऽपि आत्मैव &c. (पुरुषः स्वयम् एव &c.) । कृतस्य—सुकृतस्य, पुण्यस्य कर्मणः । अपकृतस्य—दुष्कृतस्य, पापस्य कर्मणः । साक्षी—प्रत्यक्ष-द्रष्टा, वृत्त-ज्ञः । १६ । शरणम्—गृहम् । पुण्य-हीनम्—'पुण्य-शीलम्' इति प्रतीचां पाठः । प्रकरिष्यति—करिष्यति । १७ । ययातिः &c.—स्वर्ग-स्थो ययातिर् इन्द्राय अन्येषां तपोभ्य आत्मनस् तपसो ज्यायस्त्वं कथयित्वा तस्य

पुरूरवाश् च, राजर्षिर् द्विजैर् अभिहितः, पुरा
ऐल इत्यभिविख्यातः स्वर्गं प्राप्तो मही-पतिः । १८

अश्व-मेधादिभिर् यज्ञैर् सत्कृतः कोशलाधिपः
महर्षि-शापात् सौदासः पुरुषादत्वम् आगतः । १९

वसुर्, यज्ञ-शतैर् इष्ट्वा द्वितीय इव वासवः,
मिथ्याभिधानेनैकेन रसा-तल-तलं गतः । २०

बलिर् वैरोचनिर्, बद्धो धर्म-पाशेन दैवतैः,
विष्णोः पुरुष-कारेण पाताल-सदनः कृतः । २१

वचनाद् दिवः पपात, पतंस् तु पथि समागतानां अष्टकादीनां चतुर्णां दौहित्राणां पुण्य-प्रभावेण पुनर् दिवम् आरुरोह । १८ । पुरूरवाः—इला-बुधयोः पुत्रश् चन्द्र-वंश्यो राजा । अभिहितः—आख्यातः । स्वर्गं प्राप्तः—गो-दानेन इति शेषः । Cf. महाभा, १३।७६ । १९ । सौदासः—मृगया-च्छलेन राक्षसस्य हननात् हतस्य भ्रातुश् चक्रिकया वशिष्ठाय नर-मांसं दत्त्वा तस्य शापेन राक्षसत्वम् अवाप, पश्चात् तस्यैव विज्ञापित-तथ्यस्य प्रसादात् पुना राक्षसं हत्वा स्व-रूपं लेभे । राक्षसः कल्माष-पादस् तस्यैव रूपान्तरम् । राक्षसत्व-प्राप्तिः पुनः-स्वरूप-लाभश् च सौदासस्य स्व-कर्म-फलम् एव इति ध्वन्यते । २० । वसुः—राजा उपचरः । मिथ्याभिधानेन—'वीजैर् यज्ञेषु यष्टव्यम्' इति वीज-यज्ञ-श्रुतिर् अप्रमाणम् इति 'अजेन यष्टव्यम्' इत्यत्र अज-शब्दश् छागार्थो न वीजार्थ इति च कथनेन । रसातल-तलम्—रसा-तलस्य (भूमेः) तलम् (पृष्ठम्)। Cf. उपरिष्टात् १२।२४।४५-५५ ।

गो-प्रदानेन मिथ्या च ब्राह्मणेभ्यो महा-मखे
पुरा नृगश् च राजर्षिः कृकलासत्वम् आगतः । २२

पाण्डवानां हृतं राज्यं धार्तराष्ट्रैर् महा-बलैः
पुनः प्रत्याहृतं चैव—न दैवाद्—भुज-संश्रयात् । २३

तपो-नियम-संयुक्ता मुनयः संशित-व्रताः,
किं ते दैव-बलाच् छापम् उत्सृजन्ते, न कर्मणा ? २४

पापम् उत्सृजते लोके सर्वं, प्राप्य, सु-दुर्लभम् ।
लोभ-मोह-समापन्नं न दैवं त्रायते नरम् । २५

यथाग्निः पवनोद्धूतः सु-सूक्ष्मो ऽपि महान् भवेत,
तथा कर्म-समायुक्तं दैवं साधु विवर्धते । २६

विपुलम् अपि धनौघं प्राप्य भोगान् स्त्रियो वा
पुरुष इह न शक्तः कर्म-हीनो हि भोक्तुम् ।
सु-निहितम् अपि चार्थं दैवतो रक्ष्यमाणं
पुरुष इह महात्मा प्राप्नुते, नित्य-युक्तः । २७

---

२२ । महा-मखे—महा-यज्ञे । नृगः—सूर्य-वंश्यो राजा । स हि स्वीयाभिर् गोभिः सह अज्ञानतो यदृच्छागतायाः परकीयाया गोर् दानात् स्वामिनो ग्रहीतुश् च शापेन कृकलासत्वम् आप । २४ । उत्सृजन्ते—उत्सृजन्ति, ददति । आआ् । २५ । पापम्—पापिनम् । उत्सृजते—उत्सृजति, त्यजति । सु-दुर्लभम्—अति-दुष्प्राप्यम् [ऐश्वर्यादिकम्] । पं. १—इह लोके अति दुष्प्राप्यम् ऐश्वर्यादिकं सर्वं पापिनं प्राप्य (उपेत्य) त्यजति । २७ । धनौघम्—धन-समूहम् । सु-निहितम्—अति-गुप्त-स्थाने स्थापितम् । नित्य-युक्तः—अविरत-चेष्टमानः ।

न च फलति विकर्मा जीव-लोके। न दैवं
व्यपनयति विमार्गं—नास्ति दैवे प्रभुत्वम्।
गुरुम् इव कृतम् अग्र्यं कर्म संयाति दैवं।
नयति पुरुष-कारः सञ्चितस् तत्र तत्र। २८

चतुर्थो ऽध्यायः

दान-यज्ञौ

युधिष्ठिर उवाच,—

दानं यज्ञ-क्रिया चेह, किं स्वित् प्रेत्य महा-फलम्?
कस्य ज्यायः फलं प्रोक्तं? कीदृशेभ्यः कथं कदा? १

भीष्म उवाच,—

रौद्रं कर्म क्षत्रियस्य सततं, तात, वर्तते।
तस्य वैतानिकं कर्म दानं चैवेह पावनम्। २

२८। फलति—पुरुषार्थं लभते। वि-कर्मा—कर्म-हीनः। व्यपनयति—वि-मार्गात् (कु-पथात्) सु-पथं नयति। वि-मार्गम्—विपथ-गतम्, उत्पथ-प्रस्थितम्। गुरुम् इव—गुरुम् शिष्य इव। अग्र्यम्—प्रधानम्। कर्म—पुरुष-कारम्। संयाति—अनुसरति। पं. ३। दैवम् इति कर्तृ-पदम्। सञ्चितः—[यत्र यत्र विषये] सम्यग् अनुष्ठितः। नयति—[दैवम्] उच्चालयति, [दैवम्] आविर्भावयति।

१। कस्य—'दान-यज्ञयोः' इति शेषः। कीदृशेभ्यः कदा [च]—दानम् इति शेषः। कथं कदा [च]—'यज्ञः' इति शेषः। २। वैतानिकम्

न ते पाप-कृतां राज्ञां प्रतिगृह्णन्ति साधवः।
एतस्मात् कारणाद् यज्ञैर् यजेद् राजाप्त-दक्षिणैः। ३

समृद्धः संप्रयच्छ त्वं ब्राह्मणेभ्यो, युधिष्ठिर,
धेनूर् अनडुहो ऽन्नानि च्छत्रं वासांस्युपानहौ ४

—आज्यानि यजमानेभ्यस् तथान्नानि च, भारत—
अश्ववन्ति च यानानि वेश्मानि शयनानि च। ५

एते देया व्युष्टिमन्तो लघूपायाश् च, भारत,
अजुगुप्सांश् च विज्ञाय ब्राह्मणान् वृत्ति-कर्शितान्। ६

उपच्छन्नं प्रकाशं वा वृत्त्या तान् प्रतिपालय।
राजसूयाश्वमेधाभ्यां श्रेयस् तत् क्षत्रियान् प्रति। ७

एवं पापैर् विनिर्मुक्तस् त्वं पुनः स्वर्गम् आप्स्यसि।
सञ्चयित्वा पुनः कोशं यद् राष्ट्रं पालयिष्यसि,
तेन त्वां ब्रह्म-भूयत्वम् अवाप्स्यसि धनानि च। ८

[वितान (यज्ञ)+इक, १।१]—यज्ञियम्। ३। पाप-कृतां राज्ञाम्—पापकृद्भ्यो राजभ्यः। आप्त-दक्षिणैः—बहु-दक्षिणैः। Cf. मसं. ७।७९। ६। देयाः [अर्थाः]—दानानि। व्युष्टिमन्तः—समृद्धिमन्तः, महार्हाः। व्युष्टिः—समृद्धिः। लघूपायाः—सुलभाः। अजुगुप्सान् [न+जुगुप्सा (निन्दा)]—अ-निन्दितान्। वृत्ति-कर्शितान्—जीविकार्थे क्लिष्टान्। ७। उपच्छन्नम्—प्रच्छन्नम्, रहसि। ८। यद्—यदि। ब्रह्मभूयत्वम् [ब्रह्म-भू-य+त्व, २।१]—ब्रह्म-भूयम्, ब्रह्मत्वम्, ब्रह्म-भावम्। एकार्थ-प्रत्यय-द्वय-प्रयोग आर्षः। पा. ३।१।१०७।

आत्मनश् च परेषां च वृत्तिं संरक्ष, भारत ।
पुत्रवच् चापि भृत्यान् स्वान् प्रजाश् च परिपालय । ९

योगः क्षेमश् च ते नित्यं ब्राह्मणेष्वस्तु, भारत ।
तदर्थं जीवितं ते ऽस्तु ! मा तेभ्यो ऽ-प्रतिपालनम् ! १०

अनर्थो ब्राह्मणस्यैष यद् वित्त-निचयो महान् ।
श्रिया ह्यभीक्ष्णं संवासो दर्पयेत् सं-प्रमोहयेत् । ११

ब्राह्मणेषु प्रमूढेषु धर्मो विप्रणशेद् ध्रुवम् ।
धर्म-प्रणाशे भूतानाम् अभावः स्याद् , न संशयः । १२

यो रक्षिभ्यः संप्रदाय राजा राष्ट्रं विलुम्पति
यज्ञे राष्ट्राद् धनं तस्माद् आनयध्वम् इति ब्रुवन्— १३

यच् चादाय तदाज्ञप्तं भीतं दत्तं, सु-दारुणम्,
यजेद् राजा—न तं यज्ञं प्रशंसन्त्यस्य साधवः । १४

अ-पीड़िताः सु-संवृद्धा ये ददत्यनुकूलतः,
तादृशेनाभ्युपायेन यष्टव्यं, नोद्यमाहृतैः । १५

---

१३ । रक्षिभ्यः—[कोष-] रक्षिभ्यः । संप्रदाय—[यथेप्सितं पारितोषिकं] दत्त्वा । विलुम्पति—लुण्ठति । यज्ञे—यज्ञार्थम् । १४ । आज्ञप्तम्—आदिष्टम् । भीतम्—भयेन । सुदारुणम्—सुदारुणम् यथा स्यात् तथा । अस्य—तस्य । १५ । अनुकूलतः—अनुकूला एव । सार्वविभक्तिकस् तसिल् । नोद्यमाहृतैः—प्रयत्नेन संगृहीतैर् न [धन-संग्रहाय राज-प्रयत्नस्य प्रजापीड़नात्मकत्वात्] ।

यदा परि-निषेव्येत नि-हितो वै यथा-विधि,
तदा राजा महा-यज्ञैर् यजेत बहु-दक्षिणैः। १६

वृद्ध-बाल-धनं रक्ष्यं अन्धस्य कृपणस्य च।
न खात-पूर्वं कुर्वीत, न रुदन्ती-धनं हरेत्। १७

हृतं कृपण-वित्तं हि राष्ट्रं हन्ति नृप-श्रियम्।
दद्याच् च महतो भोगान् क्षुद्-भयं प्रणुदेत् सताम्। १८

धिक् तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति
द्विजो ऽन्यो वा मनुष्यो ऽपि शिविर् आह वचो यथा। १९

यस्य स्म विषये राज्ञः स्नातकः सीदति क्षुधा,
अ-वृद्धिम् एति तद् राष्ट्रं, विन्दते सह राजकम्। २०

क्रोशन्त्यो यस्य वै राष्ट्राद् ह्रियन्ते तरसा स्त्रियः
क्रोशतां पति-पुत्राणां, मृतो ऽसौ, न च जीवति। २१

अ-रक्षितारं हर्तारं विलोप्तारम् अ-नायकम्—
तं वै राज-कलिं हन्युः प्रजाः, संनह्य, निर्घृणम्। २२

१६। परिनिषेव्येत—[प्रजाभिः धनैः स्वेच्छया] परिचर्येत। निहितः—[अनुरक्ताभिः प्रजाभिः राज्ये सु-दृढम्] स्थापितः। १७। न खात-पूर्वं [धनं] कुर्वीत—अनावृष्टौ कूपोदक-निष्पादितैर् धान्यैः जीवतां धनं न आत्मसात् कुर्यात्। १८। कृपणः—दीनः। प्रणुदेत्—अपसारयेत्। २०। स्नातकः—पालित-ब्रह्म-चर्य-व्रतः प्राप्त-वेदश् च गृही। विन्दते—लभते। सह—युगपत्। राजकम्—[विपक्ष-भूतं] राज-समूहम्। २२। हर्तारम्—[प्रजा-] धनापहारिणम्। विलोप्तारम्—

अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः,
स संहत्य निहन्तव्यो, श्वेव सोन्माद आतुरः। २३

पापं कुर्वन्ति यत् किञ्चित् प्रजा राज्ञा अ-रक्षिताः,
चतुर्थं तस्य पापस्य राजा विन्दति, भारत। २४

शुभं वा यच् च कुर्वन्ति प्रजा राज्ञा सु-रक्षिताः,
चतुर्थं तस्य पुण्यस्य राजा चाप्नोति, भारत। २५

जीवन्तं त्वानुजीवन्तु प्रजाः सर्वा, युधिष्ठिर।
ज्ञातयस् त्वानुजीवन्तु सुहृदश् च, परन्तप। २६

ध्रुवं श्रेयः परं, तात, भविष्यति तवोत्तमम्
यस्य ते, पुरुष-व्याघ्र, सखा चायं जनार्दनः। २७

पञ्चमो ऽध्यायः

विरामः

वैशम्पायन उवाच,—

एवं सम्भाषमाणे तु गाङ्गेये पुरुषर्षभे,
तूष्णीं-बभूव कौरव्यो मध्ये तेषां महात्मनाम्। १

अभूद् मुहूर्तं स्तिमितं सर्वं तद् राज-मण्डलम्,
तूष्णीं-भूते ततस् तस्मिन्, पटे चित्रम् इवार्पितम्। २

लुण्ठकम्। राज-कलिम्—नृपाधमम्। संनह्य—सज्जीभूय। निर्घृणम्—निर्दयम्। २३। संहत्य—संमिल्य, एकीभूय। २६। त्वानुजीवन्तु—त्वां सेवन्ताम्, तव हिताय भवन्तु।

१। कौरव्यः—युधिष्ठिरः।

मुहूर्तम् इव च ध्यात्वा, व्यासः सत्यवती-सुतः
नृपं शयानं गाङ्गेयम् इदम् आह वचस्, त्वरन् ,— ३

"राजन्, प्रकृतिम् आपन्नः, कुरु-राजो युधिष्ठिरः,
सहितो भ्रातृभिः सर्वैः पार्थिवैश् चानुयायिभिः, ४

उपास्ते त्वां, नर-व्याघ्र, सह कृष्णेन धीमता ।
तम् इमं पुर-यानाय समनुज्ञातुम् अर्हसि ।" ५

एवम् उक्तो भगवता व्यासेन, पृथिवी-पतिः
युधिष्ठिरं सहामात्यम् अनुजज्ञे, नदी-सुतः । ६

उवाच चैनं मधुरं नृपं शान्तनवो नृपः,—
"प्रविशस्व पुरीं, राजन् ! व्येतु ते मानसो ज्वरः । ७

आगन्तव्यं च भवता समये मम, पार्थिव,
विनिवृत्ते दिन-करे प्रवृत्ते चोत्तरायणे ।" ८

तथेत्युक्त्वा च कौन्तेयः, सो ऽभिवाद्य पितामहम् ,
प्रययौ स-परीवारो नगरं नागसाह्वयम् । ९

उषित्वा शर्वरीः श्रीमान् पञ्चाशद् नगरोत्तमे,
समयं कौरवाग्र्यस्य सस्मार पुरुषर्षभः । १०

स निर्ययौ गज-पुराद्, याजकैः परिवारितः,
दृष्ट्वा निवृत्तम् आदित्यं प्रवृत्तं चोत्तरायणम् । ११

---

८ : विनिवृत्ते—[दक्षिण-दिशः] प्रतिनिवृत्ते । उत्तरायणे—सूर्यस्य उत्तर-दिग्-गमन-काले । १० । पञ्चाशत्—पञ्चाशतम् । प्रथमा आर्षी । ११ । निवृत्तम्—[दक्षिण-दिशः] प्रति-निवृत्तम् ।

घृतं माल्यं च गन्धांश् च क्षौमाणि च, युधिष्ठिरः
चन्दनागुरु-मुख्यानि तथा कालीयकान्यपि, १२
प्रस्थाप्य सर्वं कौन्तेयो भीष्म-संस्करणाय वै,
माल्यानि च महार्हाणि रत्नानि विविधानि च, १३
धृत-राष्ट्रं पुरस्कृत्य गान्धारीं च यशस्विनीम्
मातरं च पृथां धीमान् भ्रातॄंश् च पुरुषर्षभान्, १४
जनार्दनेनानुगतो विदुरेण च धीमता,
युयुत्सुना च कौरव्यो युयुधानेन च, विभो. १५
महता राज-योग्येन परिवारेण संवृतः,
स्तूयमानो, महा-तेजा, भीष्मस्याग्नीन् अनुव्रजन्, १६
निश्चक्राम पुरात् तस्माद्, यथा देव-पतिस् तथा।
आससाद कुरु-क्षेत्रे ततः शान्तनवं नृपः। १७
उपास्यमानं व्यासेन पाराशर्येण धीमता,
नारदेन च, राजर्षे, देवलेनासितेन च,
हत-शिष्टैर् नृपैश् चान्यैर् नाना-देश-समागतैः, १८
रक्षिभिश् च महात्मानं रक्ष्यमाणं समन्ततः
शयानं वीर-शयने ददर्श नृपतिस् ततः। १९
ततो रथाद् अवारोहद् भ्रातृभिः सह धर्म-राट्।
अभिवाद्याथ कौन्तेयः पितामहम् अरिन्दमम् २०

१२। अगुरु—कृष्ण-चन्दनम्। कालीयकानि—दारु-हरिद्रा-राशिम्।
१६। अग्नीन्—गार्हपत्याहवनीय-दक्षिणाग्नीन्।

द्वैपायनादीन् विप्रांश् च, तैश् च प्रत्यभिनन्दितः,
ऋत्विग्भिर् ब्रह्मकल्पैश् च भ्रातृभिः सह धर्म-जः, २१

आसाद्य शर-तल्प-स्थम् ऋषिभिः परिवारितम्,
अब्रवीद् भरत-श्रेष्ठं धर्म-राजो युधिष्ठिरः,— २२

"युधिष्ठिरो ऽहं, नृपते ! नमस् ते, जाह्नवी-सुत !
शृणोषि चेद्, महा-बाहो, ब्रूहि किं करवाणि ते। २३

प्राप्तो ऽस्मि समये, राजन्न्, अग्नीन् आदाय ते, विभो।
आचार्या ब्राह्मणाश् चैव ऋत्विजो भ्रातरश् च मे, २४

पुत्रश् च ते महा-तेजा धृत-राष्ट्रो जनेश्वरः
उपस्थितः सहामात्यो, वासुदेवश् च वीर्यवान् २५

हत-शिष्टाश् च राजानः सर्वे च कुरु-जाङ्गलाः।
तान् पश्य, कुरु शार्दूल, समुन्मीलय लोचने।" २६

एवम् उक्तस् तु गाङ्गेयः कुन्ती-पुत्रेण धीमता
ददर्श भरतान् सर्वान् संस्थितान् परिवार्य तम्। २७

षष्ठो ऽध्यायः

प्राणोत्सर्गः

ततश् च बलवान् भीष्मः, प्रगृह्य विपुलं भुजम्,
उद्यन्-मेघ-स्वरो वाग्मी काले वचनम् अब्रवीत्,— १

२६। कुरु-जाङ्गलाः—कुरुजाङ्गल-प्रदेशाधिवासिनः।

१। उद्यन् [उत्-इ + अत्, ११]—उद्गच्छन्, ऊर्ध्वं गच्छन्।

"दिष्ट्या प्राप्तो ऽसि, कौन्तेय, सहामात्यो, युधिष्ठिर।
परिवृत्तो हि भगवान् सहस्रांशुर् दिवा-करः। २

अष्ट-पञ्चाशतं रात्र्यः शयानस्याद्य मे गताः
शरेषु निशिताग्रेषु यथा वर्ष-शतं तथा। ३

माघो ऽयं समनुप्राप्तो मासः सौम्यो, युधिष्ठिर,
त्रि-भाग-शेषः। पक्षो ऽयं शुक्लो भवितुम् अर्हति।" ४

एवम् उक्त्वा तु गाङ्गेयो धर्म-पुत्रं युधिष्ठिरम्,
धृतराष्ट्रम् अथामन्त्र्य काले वचनम् अब्रवीत्,— ५

"राजन्, विदित-धर्मो ऽसि सु-निर्णीतार्थ-संशयः।
बहु-श्रुता हि ते विप्रा बहवः पर्युपासिताः। ६

वेद-शास्त्राणि सूक्ष्माणि, धर्मांश् च, मनुजेश्वर,
वेदांश् च चतुरः सर्वान् निखिलेनानुबुध्यसे। ७

यथा पाण्डोः सुता, राजंस्, तथैव तव धर्मतः।
तान् पालय स्थितो धर्मे गुरु-शुश्रूषणे रतान्। ८

धर्म-राजो हि शुद्धात्मा निदेशे स्थास्यते तव।
आनृशंस्य-परं ह्येनं जानामि गुरु-वत्सलम्।" ९

२। परिवृत्तः—दक्षिण-दिशः प्रतिनिवृत्तः ३। अष्ट-पञ्चाशतम्—अष्ट-पञ्चाशत्। द्वितीया आर्षी। ४। अद्य मुख्य-चान्द्र-माघस्य शुक्लाष्टमी तिथिः। सौम्यः [सोम (चन्द्र)+अ, १।१]—[मुख्य-] चान्द्रः। ५। आमन्त्र्य—सम्बोध्य। ७। वेद-शास्त्राणि सूक्ष्माणि—उपनिषदः सूक्ष्म-ब्रह्म-तत्त्व-विषयत्वात्। धर्मान्—विहिताचारान्। अनुबुध्यसे—गुरोः जानासि।

एतावद् उक्त्वा वचनं धृत-राष्ट्रं मनीषिणम्,
वासुदेवं महा-बाहुम् अभ्यभाषत कौरवः,— १०

"रक्ष्याश् च ते पाण्डवेया भवान् येषां परायणम्।
यतः कृष्णस् ततो धर्मो, यतो धर्मस् ततो जयः। ११

स मां त्वम् अनुजानीहि, कृष्ण, मोक्ष्ये कलेवरम्।
त्वयाहं समनुज्ञातो गच्छेयं परमां गतिम्।" १२

वासुदेव उवाच,—

अनुजानामि, भीष्म, त्वां वसून् प्राप्नुहि, पार्थिव।
न ते ऽस्ति वृजिनं किञ्चिद् इह लोके, महा-द्युते। १३

पितृ-भक्तो ऽसि, राजर्षे ; मार्कण्डेय इवापरः
येन—मृत्युस् तव वशे स्थितो भृत्य इवानतः। १४

वैशम्पायन उवाच,—

एवम् उक्तस् तु गाङ्गेयः पाण्डवान् इदम् अब्रवीत्,
धृत-राष्ट्र-मुखांश् चापि, सर्वांश् च सुहृदस् तथा,— १५

"प्राणान् उत्स्रष्टुम् इच्छामि, तत्रानुज्ञातुम् अर्हथ।
सत्येषु यतितव्यं वः। सत्यं हि परमम् बलम्। १६

११। परायणम्—श्रेष्ठ आश्रयः। १३। वसून्—गण-देवता वसवो ऽष्टौ। तेषाम् किल अन्यतमो भुवि भीष्मो बभूव। १४। मार्कण्डेय इवापरः [असि]—मृकण्डु-पुत्रो मार्कण्डेयः किल विष्णु-भक्त्या मृत्युं जिगाय (नः भीष्मवत् पितृ-भक्त्या)। १६। वः—युष्माकम्, युष्माभिः।

आनृशंस्य-परैर् भाव्यं सदैव नियतात्मभिः
ब्रह्मण्यैर् धर्म-शीलैश् च तपो-नित्यैश् च, भारताः।" १७

इत्युक्त्वा सुहृदः सर्वांस् तथा संपूज्य चैव ह,
पुनर् एवाब्रवीद् धीमान् युधिष्ठिरम् इदं वचः,— १८

"ब्राह्मणाश् चैव ते नित्यं, प्राज्ञाश् चैव विशेषतः,
आचार्या ऋत्विजश् चैव पूजनीया, जनाधिप।" १९

एवम् उक्त्वा कुरून् सर्वान्, भीष्मः शान्तनवस् तदा
तूष्णीं बभूव कौरव्यः स मुहूर्तम्, अरिन्दम। २०

धारयामास चात्मानं धारणासु। यथा-क्रमम्
तस्योर्ध्वम् अगमन् प्राणाः सं-निरुद्धा महात्मनः। २१

सन्निरुद्धस् तु तेनात्मा सर्वेष्वायतनेषु वै
जगाम भित्त्वा मूर्धानं दिवम् अभ्युत्पपात ह। २२

देव-दुन्दुभि-नादश् च पुष्प-वर्षैः सहाभवत्।
सिद्धा ब्रह्मर्षयश् चैव साधु साध्विति हर्षिताः। २३

१७। ब्रह्मण्यैः [ब्रह्मन् (वेद) + य, ३।ब]—वेद-परायणैः। २१। धारयामास—बबन्ध, स्थिरी-चकार। आत्मानम्—चित्तम्। धारणासु—धारणा-स्थानेषु, एकाग्र-चित्त-स्थापन-स्थानेषु। यथा-क्रमम्—[चित्त-स्थापन-स्थानानां] क्रमम् अनुसृत्य। यथा-क्रमम् ऊर्ध्वम्—मूलाधारात् स्वाधिष्ठानम् ततो मणिपूरम् ततो ऽनाहतम् ततो विशुद्धम् तत आज्ञां ततः सहस्रारं च। प्राणाः—[चित्तेन सह निरुद्धो] वायुः। २२। आत्मा—[वायु-सहित-] चित्तम्। आयतनेषु—आधारेषु। २३। इति—'उदक्रोशन्' इति शेषः।

महोल्केव च भीष्मस्य मूर्ध-देशाज्, जनाधिप,
निःसृत्याकाशम् आविश्य क्षणेनान्तरधीयत। २४

एवं स, राज-शार्दूल, नृपः शान्तनवस् तदा
समयुज्यत कालेन, भरतानां कुलोद्वहः। २५

ततस् त्वादाय दारूणि गन्धांश् च विविधान् बहून्,
चितां चक्रुर् महात्मानः पाण्डवा विदुरस् तथा। २६

युधिष्ठिरश् च गाङ्गेयं विदुरश् च महा-मतिः
छादयामासतुर् उभौ क्षौमैर् माल्यैश् च कौरवम्। २७

धारयामास तस्याथ युयुत्सुश् छत्रम् उत्तमम्,
चामरे व्यजने शुभ्रे भीमसेनार्जुनाव् उभौ। २८

उष्णीषे पर्यगृह्णीताम् माद्री-पुत्राव् उभाव् अपि।
युधिष्ठिरेण सहितो धृत-राष्ट्रश् च पादतः। २९

स्त्रियः कौरव-नाथस्य भीष्मं कुरु-कुलोद्वहम्
ताल-वृन्तान्युपादाय पर्यवीजन्त सर्वशः। ३०

ततो ऽस्य विधिवच् चक्रुः पितृ-मेधं महात्मनः।
याजका जुहुवुश् चाग्नौ। जगुः सामानि साम-गाः। ३१

ततश् चन्दन-काष्ठैश् च तथा कालीयकैर् अपि
कालागुरु-प्रभृतिभिर् गन्धैश् चोच्चावचैस् तथा ३२

२९। उष्णीषे—किरीट-शिरो-वेष्टौ। पादतः—पादयोः [तस्थौ]।

समवच्छाद्य गाङ्गेयं सं-प्रज्वाल्य हुताशनम्,
अप-सव्यम् अकुर्वन्त धृतराष्ट्र-मुखाश् चिताम् । ३३

संस्कृत्य च कुरु-श्रेष्ठं गाङ्गेयं, कुरु-सत्तमाः
जग्मुर् भागीरथीं पुण्याम् ऋषि-जुष्टां कुरूद्वहाः । ३४

उदकं चक्रिरे सर्वे गाङ्गेयस्य महात्मनः
विधिवत् क्षत्रिय-श्रेष्ठाः स च सर्वो जनस् तदा । ३५

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
अनु-शासन-पर्व ।

---

३३ अपसव्यम् अकुर्वन्त—प्रदक्षिणम् अकुर्वत ।

इति तारकालोके नाम भारत-वृत्तौ
अनु-शासन-पर्व ।

अथ

श्रीभारते

आश्वमेधिक-पर्व

प्रथमो ऽध्यायः

शुद्धिः

वैशम्पायन उवाच,—

कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः
पुरस्कृत्य, महा-बाहुर् उत्तताराकुलेन्द्रियः। १

उत्तीर्य तु, महा-बाहुर् वाष्प-व्याकुल-लोचनः
पपात तीरे गङ्गाया, व्याध-विद्ध इव द्विपः। २

तं सीदमानं जग्राह भीमः कृष्णेन चोदितः।
"मैवम्" इत्यब्रवीच् चैनं कृष्णः पर-बलार्दनः, ३

३। सीदमानम्—सीदन्तम्, अवसीदन्तम्। आआ.।

"नेमाम् अर्हसि मूढानां वृत्तिं त्वम् अनुवर्तितुम् ।
पितृपैतामहं वृत्तम् आस्थाय धुरम् उद्वह । ४
न हि कश्चिद् धि शूराणां निहतो ऽत्र पराङ्-मुखः ।
न शक्यास् ते पुनर् द्रष्टुं त्वया, ये ऽस्मिन् रणे हताः ।" ५
एतावद् उक्त्वा गोविन्दो धर्म-राजं युधिष्ठिरम्,
विरराम महा-तेजास् । तम् उवाच युधिष्ठिरः,— ६
"प्रियं तु मे स्यात् सु-महत् कृतं, चक्र-गदा-धर,
यदि माम् अनुजानीयाद् भवान् गन्तुं तपो-वनम् । ७
न हि शान्तिं प्रपश्यामि घातयित्वा पितामहम्
कर्णं च पुरुष-व्याघ्रं, संग्रामेष्व-पलायिनम् ।
कर्मणा, तद् विधत्स्वेह, येन शुध्यति मे मनः ।" ८
तम् एवं-वादिनं पार्थं व्यासः प्रोवाच धर्म-वित्,
सान्त्वयन्, सु-महा-तेजाः, शुभं वचनम् अर्थवत्,— ९
"यजस्व वाजि-मेधेन विधिवद् दक्षिणावता
बहु-कामान्न-वित्तेन, रामो दाशरथिर् यथा ।" १०

युधिष्ठिर उवाच,—

अ-संशयं वाजि-मेधः पावयेत् पृथिवी-पतिम् ।
अभिप्रायस् तु मे कश्चित् । तं त्वं श्रोतुम् इहार्हसि । ११

---

४ । धुरम्—[राज्य-] भारम् । ५ । पराङ्-मुखः—विमुखः, पलायमानः । १०-११ । तथाहि श्रुतिः,—'तरति मृत्युं तरति पाप्मानं तरति ब्रह्म-हत्यां यो ऽश्व-मेधेन यजते । य उ चैनम्

इमं ज्ञाति-वधं कृत्वा सु-महान्तं, द्विजोत्तम,
दानम् अल्पं न शक्नोमि दातुं, वित्तं च नास्ति मे। १२

न तु बालान् इमान् दीनान् उत्सहे वसु याचितुम्,
तथैवार्द्र-व्रणान् कृच्छ्रे वर्त्तमानान् नृपात्मजान्। १३

स्वयं विनाश्य पृथिवीं, यज्ञार्थं, द्विज-सत्तम,
करम् आहारयिष्यामि कथं, शोक-परायणः? १४

दुर्योधनेन पृथिवी क्षयिता वित्त-कारणात्।
कोशश् चापि विशीर्णो ऽसौ धार्तराष्ट्रस्य दुर्मतेः। १५

पृथिवी दक्षिणा चात्र विधिः प्रथम-कल्पितः।
विद्वद्भिः परिदृष्टो ऽयं। शिष्टो विधि-विपर्ययः। १६

न च प्रतिनिधिं कर्तुं चिकीर्षामि, तपो-धन।
अत्र मे, भगवन्, सम्यक् साचिव्यं कर्तुम् अर्हसि। १७

वैशम्पायन उवाच,—

एवम् उक्तस् तु पार्थेन कृष्ण-द्वैपायनस् तदा,
मुहूर्तम् अनु-सञ्चिन्त्य धर्म-राजानम् अब्रवीत्,— १८

एवं वेद, (तैसं ५।३।१२।२)। अत्र विष्णुर् वक्ति (विसं. ३५।६ &
३६।८),—'अनुपातकिनस् त्वेते महा-पातकिनो यथा, अश्व-मेधेन
शुध्यन्ति तीर्थानुसरणेन वा।' 'अश्वमेधेन शुध्यन्ति महा-पातकिनस्
त्विमे।' तत्राधिकारे आपस्तम्बः (आसं.),—'राजा सार्वभौमः
अश्व-मेधेन यजेत, नाप्यसार्वभौमः।' १६। शिष्टः—अन्य-विध-दक्षिणा।
१७। प्रतिनिधिम्—अनु-कल्पम्, गौण-कल्पम्। १८। धर्म-राजानम्—
धर्म-राजम्। आप्र.।

"कोशश् चापि विशीर्णो ऽयं परिपूर्णो भविष्यति ।
विद्यते द्रविणं, पार्थ, गिरौ हिमवति स्थितम्, १९

उत्सृष्टं ब्राह्मणैर् यज्ञे मरुत्तस्य महात्मनः ।
तद् आनयस्व, कौन्तेय । पर्याप्तं तद् भविष्यति ।" २०

युधिष्ठिर उवाच,—

शुश्रूषे तस्य, धर्म-ज्ञ, राजर्षेः परिकीर्तनम् ।
द्वैपायन, मरुत्तस्य कथां प्रब्रूहि मे, ऽनघ । २१

व्यास उवाच,—

विविंशस्य सुता, राजन्, बभूवुर् दश पञ्च च ।
तेषां ज्येष्ठः खनी-नेत्रः । स तान् सर्वान् अपीड़यत् । २२

खनी-नेत्रस् तु विक्रान्तो, जित्वा राज्यम् अ-कण्टकम्,
नाशकद् रक्षितुं राज्यं । नान्वरज्यन्त तं प्रजाः ; २३

तम् अपास्य च तद्-राज्ये तस्य पुत्रं सु-वर्चसम्
अभ्यषिञ्चन्त, राजेन्द्र, मुदिता ह्यभवंस् तदा । २४

स, पितुर् विक्रियां दृष्ट्वा राज्याद् निरसनं च तत्,
नियतो वर्तयामास प्रजा-हित-चिकीर्षया । २५

---

२० । मरुत्तः—चन्द्र-वंश्यो राजा । स हि पितुर् अनुज्ञया पितामहात् राज्यं प्राप्य महा-यज्ञैर् ईजे । दिवि भुवि पाताले च तस्य प्रभावो ऽ-प्रतिहत आसीत् । मापु.१०३ (शकद्रु.) । २१ । शुश्रूषे [श्रु-स+ए]—श्रोतुम् इच्छामि ।

तं क्षीण-कोशं सामन्ताः समन्तात् पर्यपीड़यन् ।
ततः प्रदध्मौ स करं। प्रादुरासीत् ततो बलम्। २६

ततस् तान् अजयत् सर्वान् प्रातिसीमान् नराधिपान् ।
एतस्मात् कारणाद्, राजन्, विश्रुतः स करन्धमः । २७

तस्य कारन्धमः पुत्रस् त्रेता-युग-मुखे ऽभवत्
अविक्षिद् नाम । धर्मात्मा शौर्येणेन्द्र-समो ऽभवत् । २८

तस्य पुत्रो ऽतिचक्राम पितरं गुणवत्तया
मरुत्तो नाम धर्मज्ञश् चक्रवर्ती महा-यशाः । २९

स यक्ष्यमाणो धर्मात्मा शातकुम्भमयान्युत
कारयामास शुभ्राणि भाजनानि सहस्रशः, ३०

मेरु-पर्वतम् आसाद्य । हिमवत्-पार्श्व उत्तरे
काञ्चनः सु-महान् पादस्, तत्र कर्म चकार सः । ३१

ततः कुण्डानि पात्रीश् च पिठराण्यासनानि च
चक्रुः सुवर्ण-कर्तारो, येषां संख्या न विद्यते । ३२

तस्यैव च समीपे तु यज्ञ-वाटो बभूव ह ।
ईजे तत्र स धर्मात्मा विधिवत् पृथिवी-पतिः । ३३

---

२६ । प्र-दध्मौ—मुख-मारुतेन वादयामास । करम्—कर-पुटम् । २७ । प्रातिसीमान्—विपक्षान् (काप्रसि.) । ३२ । पिठराणि—स्थालीः ।

वैशम्पायन उवाच,—

व्यजहाच् शोकजं दुःखं सन्तापं चैव मानसम्,
अर्चयामास देवांश् च ब्राह्मणांश् च युधिष्ठिरः। ३४

कृत्वाथ प्रेत-कार्याणि बन्धूनां स पुनर्, नृपः
धृतराष्ट्रं पुरस्कृत्य विवेश गजसाह्वयम्। ३५

स, समाश्वास्य पितरं प्रज्ञा-चक्षुषम् ईश्वरम्,
अन्वशासत धर्मात्मा पृथिवीं भ्रातृभिः सह। ३६

द्वितीयो ऽध्यायः

प्राप्त-नष्टानुसन्धानम्

विजिते पाण्डवै, राजन्, प्रशान्ते च, विशां पते,
राष्ट्रे, बभूवतुर् हृष्टौ वासुदेव-धनञ्जयौ। १

इन्द्र-प्रस्थे महात्मानौ रेमतुः कृष्ण-पाण्डवौ,
प्रविश्य तां सभां रम्यां विजह्राते च, भारत। २

तत्र युद्ध-कथाश् चित्राः परिक्लेशांश् च, पार्थिव,
कथा-योगे कथा-योगे कथयामासतुः सदा। ३

ततः प्रतीतः कृष्णेन सहितः पाण्डवो ऽर्जुनः
निरीक्ष्य तां सभां रम्याम् इदं वचनम् अब्रवीत्,— ४

३६। अन्वशासत—[दुर्योधनात्] पश्चात् शशास। आप्र.।

"यत् तु तद् भवता प्रोक्तं पुरा, केशव, सौहृदात्,
तत् सर्वं, पुरुष-व्याघ्र, नष्टं मे व्यग्र-चेतसः। ५

मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः।
भवांश् च द्वारकां गन्ता न चिराद् इव, माधव।" ६

एवम् उक्तस् तु तं कृष्णः फाल्गुनं प्रत्यभाषत,
परिष्वज्य, महा-तेजा, वचनं, वदतां वरः,— ७

"श्रावितस् त्वं मया गुह्यं ज्ञापितश् च सनातनम्
धर्मं स्व-रूपिणं, पार्थ, सर्व-लोकांश् च शाश्वतान्। ८

न च साद्य पुनर् भूयः स्मृतिर् मे संभविष्यति।
परं हि ब्रह्म कथितं योग-युक्तेन तद् मया। ९

इतिहासं तु वक्ष्यामि तस्मिन्न् अर्थे पुरातनम्।
आगच्छद् ब्राह्मणः कश्चित् स्वर्ग-लोकाद्, अरिन्दम। १०

अस्माभिः परिपृष्टश् च यद् आह, भरतर्षभ,
दिव्येन विधिना, पार्थ, तच् छृणुष्वाविचारयन्। ११

'शुभानाम् अशुभानां च नेह नाशो ऽस्ति कर्मणाम्।
प्राप्य प्राप्यानुपच्यन्ते क्षेत्रं क्षेत्रं तथा तथा। १२

५। व्यग्र-चेतसः—[युद्ध-क्षेत्रे अन्योन्य-विपरीत-भाव-चय-सङ्घट्टेन] आकुल-चित्तस्य। ९। ब्रह्म—तत्त्वम्। १२। प्राप्य—आसाद्य। अनुपच्यन्ते—[कर्माणि] फलं प्रयच्छन्ति। क्षेत्रम्—देहम्।

यथा प्रसूयमानस् तु फली दद्यात् फलं बहु,
तथा स्याद् विपुलं पुण्यं शुद्धेन मनसा कृतम्। १३
पापं चापि तथैव स्यात् पापेन मनसा कृतम्।
पुरोधाय मनो हीह कर्म्मण्यात्मा प्रवर्त्तते। १४
यः स्याद् एकायने लीनस् तूष्णीं, किञ्चिद् अचिन्तयन्,
पूर्वं पूर्वं परित्यज्य, स तीर्णो बन्धनाद् भवेत्। १५
सर्व्व-मित्रः सर्व्व-सहः शमे रक्तो जितेन्द्रियः
व्यपेत-भय-मन्युश् च आत्मवान् मुच्यते नरः। १६
अ-गन्धम् अ-रस-स्पर्शम् अ-शब्दम् अ-परिग्रहम्
अ-रूपम् अनभिज्ञेयं दृष्ट्वात्मानं विमुच्यते। १७

१३। प्रसूयमानः [प्र-सू+आन, १।१]—[फलानि] उत्पादयन्। फली—फलवान् [वृक्षः]। १४। पं. २—इह खलु पुण्यापुण्य-सञ्चये मनस एव प्राधान्यम् उच्यते। १५। एकायने—सर्व्व-सत्त्वैकावस्थान-स्थाने[ब्रह्मणि]। पूर्वं पूर्वं परित्यज्य—पूर्वं पूर्वं सोपानम् अतिक्रम्य, क्रम-मुक्ति-मार्गं चरित्वा, स्थूलात् सूक्ष्मं ततः सूक्ष्मतरं ततस् ततोऽपि सूक्ष्मतरं भावं प्राप्य। १६। सर्व्व-मित्रः—सर्व्व-भूत-शुभाकाङ्क्षी। सर्व्व-सहः—सकल-सहिष्णुः, क्षमी। शमे—चित्त-संयमे। भयम्—[अ-सिद्धे योगे कर्म्म ब्रह्म चोभयत एव भ्रंशिष्ये इति भीतिः। Cf. गी. ६।३७-३८ मन्युः—इयतापि कालेन योगो न सिद्धः इति तस्मै द्वेषः। आत्मवान्—जित-चित्तः। १७। परिग्रहः—भोग-साधनानां स्वी-करणम्। अनभिज्ञेयम्—सोऽयम् इति न ज्ञेयम्, अज्ञात-पूर्व्वम्, अदृष्टचरम्।

विमुक्तः सर्व-संस्कारैस् ततो ब्रह्म सनातनम्
परम् आप्नोति संशान्तम् अचलं नित्यम् अक्षरम्। १८

इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत्।
तीव्रं तप्त्वा तपः पूर्वं मोक्ष-योगं समाचरेत्। १९

यथा स्व-कोष्ठे प्रक्षिप्य भाण्डं भाण्ड-मना भवेत्,
तथा स्व-काये प्रक्षिप्य मनो द्वारैर् अ-निश्चलैः,
आत्मानं तत्र मार्गेत, प्रमादं परिवर्जयेत्। २०

न त्वसौ चक्षुषा ग्राह्यो न च सर्वैर् अपीन्द्रियैः।
मनसैव प्रदीपेन महान् आत्मा प्रदृश्यते। २१

सर्वतः पाणि-पादान्तः सर्वतो ऽक्षि-शिरो-मुखः,
सर्वतः श्रुतिमाल्ँ लोके सर्वम् आवृत्य तिष्ठति।' २२

इत्युक्त्वा स तदा वाक्यं मां, पार्थ, द्विज-सत्तमः
मोक्ष-धर्माश्रितः सम्यक् तत्रैवान्तरधीयत। २३

१८। संस्कारैः—वासनाभिः। १९। संहृत्य—[स्व-स्व-विषयेभ्यः] प्रत्यावर्त्य। २०। कोष्ठे—गृहान्तः-कक्षायाम्। भाण्डम्—मूल-धनम्। भाण्ड-मना भवेत्—[निक्षिप्तं] भाण्डं विविच्य जानाति। स्व-काये—स्वकीय-देहाभ्यन्तरे। द्वारैः—इन्द्रियैः। अनिश्चलैः—अ-बहिश्चरद्भिः। योग-बलेनैव आत्मा ज्ञेय इति भावः। Cf. गी. ६।१०-१५, ८।११-१३। २१। Cf. गी. १०।११, मुण्ड. ३।१।८,—'न चक्षुषा गृह्यते नापि वाचा, नान्यैर् देवैस् तपसा कर्मणा वा; ज्ञान-प्रसादेन विशुद्ध-सत्त्वस्, ततस् तु तं पश्यते निष्कलं ध्यायमानः।' २२। Cf. श्वेत. ३।१६।

मयि चेद् अस्ति ते प्रीतिर्, नित्यं, कुरु-कुलोद्वह,
अध्यात्मम् एतच् श्रुत्वा त्वं सम्यग् आचर, सु-व्रत। २४

ततस् त्वं, सम्यग् आचीर्णे धर्मे ऽस्मिन्न्, अरि-कर्शन,
सर्व-पाप-विनिर्मुक्तो मोक्षं प्राप्स्यसि केवलम्। २५

पूर्वम् अप्येतद् एवोक्तं युद्ध-काल उपस्थिते
मया तव, महा-बाहो। तस्माद् अत्र मनः कुरु। २६

मया तु, भरत-श्रेष्ठ, चिर-दृष्टः पिता प्रभुः।
तम् अहं द्रष्टुम् इच्छामि सम्मते तव, फाल्गुन।" २७

इत्युक्त-वचनं कृष्णं प्रत्युवाच धनञ्जयः,—
"गच्छावो नगरं, कृष्ण, गजसाह्वयम् अद्य वै। २८

समेत्य तत्र राजानं धर्मात्मानं युधिष्ठिरम्,
समनुज्ञाप्य राजानं स्वां पुरीं यातुम् अर्हसि।" २९

तृतीयो ऽध्यायः

पितृ-दर्शनम्

ततस् तौ रथम् आस्थाय प्रयातौ कृष्ण-पाण्डवौ,
विकुर्वाणौ कथाश् चित्राः, प्रीयमाणौ, विशाम् पते। १

२५। आचीर्णे [आ-चर्+न, ७।१]—आचरिते, अनुशीलिते।
२९। समनुज्ञाप्य राजानम्—राज्ञः हार्दीम् अनुज्ञां गृहीत्वा।
१। विकुर्वाणौ—सृजन्तौ, उत्पादयन्तौ।

ततः समेत्य राजानं धृत-राष्ट्रम्, अरिन्दमौ
निवेद्य नाम-धेये स्वे तस्य पादाव् अगृह्णताम्। २

प्रभातायां तु शर्वर्यां कृत्वा पौर्वाह्णिकीं क्रियाम्,
धर्म-राजस्य भवनं जग्मतुः परमार्चितौ। ३

समासाद्य तु राजानं, वार्ष्णेय-कुरु-पुङ्गवौ
निषेदतुर्, अनुज्ञातौ प्रीयमाणेन तेन, तौ। ४

ततः स राजा मेधावी, विवक्षू प्रेक्ष्य ताव् उभौ,
प्रोवाच, वदतां श्रेष्ठो, वचनं, राज-सत्तमः,— ५

"विवक्षू हि युवां मन्ये, वीरौ यदु-कुरूद्वहौ।
ब्रूतं, कर्तास्मि सर्वं वां न चिराद्। मा विचार्यताम्!" ६

इत्युक्तः, फाल्गुनस् तत्र धर्म-राजानम् अब्रवीत्,—
"अयं चिरोषितो, राजन्, वासुदेवः प्रतापवान् ७

भवन्तं समनुज्ञाप्य पितरं द्रष्टुम् इच्छति।
स गच्छेद् अभ्यनुज्ञातो भवता, यदि मन्यसे।" ८

युधिष्ठिर उवाच,—

रोचते मे, महा-बाहो, गमनं तव, केशव।
मातुलश् चिर-दृष्टो मे त्वया, देवी च देवकी। ९

२। नाम-धेये—नामनी। अगृह्णताम्—अगृह्णीताम्। आप्र. छन्दो ऽनुरोधात्। ५। विवक्षू—[किञ्चित्] वक्तुम् इच्छुकौ। ६। वाम्—युवयोः।

समेत्य मातुलं गत्वा बल-देवं च, मान-द,
पूजयेथा, महा-प्राज्ञ, मद्-वाक्येन यथार्हतः। १०

स्मरेथाश् चापि मां नित्यं भीमं च बलिनां वरम्,
फाल्गुनं सह-देवं च नकुलं चैव, मान-द। ११

आनर्तान् अवलोक्य त्वं पितरं च, महा-भुज,
वृष्णींश् च, पुनर् आगच्छेर् हय-मेधे ममानघ। १२

स गच्छ रत्नान्यादाय विविधानि वसूनि च,
यच् चाप्यन्यद् मनो-ज्ञं ते तद् अप्यादत्स्व, सात्वत। १३

इयं च वसुधा कृत्स्ना प्रसादात् तव, केशव,
अस्मान् उपागता, वीरा निहताश् चापि शत्रवः। १४

वैशम्पायन उवाच,—

एवं ब्रुवति कौरव्ये धर्म-राजे युधिष्ठिरे
वासुदेवो, वरः पुंसाम्, इदं वचनम् अब्रवीत्,— १५

"तवैव रत्नानि धनं च केवलं,
धरा तु कृत्स्ना तु महा-भुजाद्य वै।
यद् अस्ति चान्यद् द्रविणं गृहे मम,
त्वम् एव तस्येश्वर नित्यम् ईश्वरः।" १६

रथे सुभद्राम् अधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते, जनार्दनः,

१२। आनर्तान्—सौराष्ट्रान्। आनर्ताः—इदानीन्तनं गुर्जरम् मालवांशं च व्याप्य स्थितः प्रदेशः (क), तत्-प्रदेशाधिवासिनः।

पितृ-ष्वसुश् चापि तथा, महा-भुजो
विनिर्ययौ। पौरजनाभिसंवृतः, १७

तम् अन्वयाद् वानर-वर्य-केतनः
स-सात्यकिर् माद्रवती-सुताव् अपि
अगाध-बुद्धिर् विदुरश् च, माधवं,
स्वयं च भीमो गज-राज-विक्रमः। १८

निवर्तयित्वा कुरु-राष्ट्र-वर्धनांस्
ततः स सर्वान् विदुरं च, वीर्यवान्
जनार्दनो दारुकम् आह, सत्वरः,
'प्रचोदयाश्वान्' इति, सात्यकिं तथा। १९

वर्तमाने, महाराज, महे रैवतकस्य च
उपायात् पुण्डरीकाक्षो युयुधानानुगस् तदा। २०

अलङ्कृतस् तु स गिरिर् नाना-रूपैर् वि-चित्रितैः,
बभौ, रत्नमयैः कोशैः संवृतः, पुरुषर्षभ। २१

काञ्चन-स्रग्भिर् अग्र्याभिः सु-मनोभिस् तथैव च
वासोभिश् च महा-शैलः कल्प-वृक्षैस् तथैव च, २२

दीप-वृक्षैश् च सौवर्णैर् अभीक्ष्णम् उपशोभितः
गुहा-निर्झर-देशेषु, दिवा-भूतो बभूव ह। २३

२०। महे—उत्सवे। २१। नाना-रूपैः—विविधाकृतिभिः। कोशैः—पान-पात्रैः। २२। सुमनोभिः—पुष्पैः। २३। अभीक्ष्णम्—अतिशयम्। दिवा-भूतः—[सूर्याकरोज्ज्वलः] दिवस इव शोभमानः।

पताकाभिर् विचित्राभिः स-घण्टाभिः समन्ततः
पुंभिः स्त्रीभिश् च संघुष्टः प्रगीत इव चाभवत् । २४

मत्तानां हृष्ट-रूपाणां स्त्रीणां पुंसां च, भारत,
गायतां पर्वतेन्द्रस्य दिव-स्पृग् इव निस्वनः । २५

प्रमत्त-मत्त-संमत्त-क्ष्वेड़ितोत्कृष्ट-संकुलः
तथा किल-किला-शब्दैर् भू-धरो ऽभूद् मनो-हरः, २६

विपणापणवान् रम्यो भक्ष्य-भोज्य-विहारवान्,
वस्त्र-माल्योत्कर-युतो वीणा-वेणु-मृदङ्गवान् । २७

सुरा-मैरेय-मिश्रेण भक्ष्य-भोज्येन चैव ह
दीनान्ध-कृपणादिभ्यो दीयमानेन चानिशम्
बभौ परम-कल्याणो महस् तस्य महा-गिरेः । २८

स नगो वेश्म-सङ्कीर्णो देव-लोक इवाबभौ
तदा च कृष्ण-सान्निध्यम् आसाद्य, भरतर्षभ । २९

गोविन्दः सात्यकिश् चैव जगाम भवनं स्वकम्
विवेश च, प्रहृष्टात्मा, चिर-काल-प्रवासतः । ३०

---

२४ । संघुष्टः—नितरां शब्दितः । प्रगीतः—संगीतमयः । २५ । मत्तानाम्—सुरा-पानेन विकलान्तःकरणानाम् । २६ । प्रमत्ताः—क्रीड़ाद्यासक्त्या अनवहिताः । संमत्ताः—हृष्टाः । क्ष्वेड़िताः—वीरोचित-सिंह-नाद-कारिणः । उत्कृष्टाः—अन्योन्यस्य हस्तेन उन्नीताः । उद्घृष्टाः इति पाठान्तरम् । संकुलः—व्याप्तः । २७ । विपणः—विपणिः, हट्टः, হাট, বাজার । आपणः—पण्य-विक्रय-शाला, দোকান । उत्करः—पुञ्जः, राशिः ।

उपायान्तं तु वार्ष्णेयं भोज-वृष्ण्यन्धकास् तथा
अभ्यगच्छन् महात्मानं देवा इव शत-क्रतुम्। ३१

स तान् अभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा,
अभ्यवादयत प्रीतः पितरं मातरं तथा। ३२

ताभ्यां स संपरिष्वक्तः सान्त्वितश् च महा-भुजः,
उपोपविष्टः सर्वैस् तैर् वृष्णिभिः परिवारितः। ३३

स विश्रान्तो महा-तेजाः कृत-पादावनेजनः
कथयामास तत् सर्वं, पृष्टः पित्रा महाहवम्। ३४

शृण्वतां तु, महा-राज, कथां तां रोम-हर्षणीम्
दुःख-शोक-परिक्लेशा वृष्णीनाम् अभवंस् तदा। ३५

अभिमन्योर् वधं वीरः सो ऽत्यक्रामद् महा-मतिः,
'अ-प्रियं वसु-देवस्य मा भूद्' इति, महा-मनाः। ३६

सु-भद्रा तु तम् उत्क्रान्तम् आत्म-जस्य वधं रणे,
"आचक्ष्व, कृष्ण, सौभद्र-वधम्" इत्यपतद् भुवि। ३७

ताम् अपश्यद् निपतितां वसु-देवः क्षितौ तदा।
दृष्ट्वैव च पपातोर्व्यां सो ऽपि, दुःखेन मूर्छितः। ३८

ततः स, दौहित्र-वधाद् दुःख-शोक-समाहतः,
वसु-देवो, महा-राज, कृष्णं वाक्यम् अथाब्रवीत्,— ३९

३४। अवनेजनम्—प्रक्षालनम्। ३७। उत्क्रान्तम्—उपलभ्य इति शेषः।

"ननु त्वां, पुण्डरीकाक्ष, सत्य-वाग् भुवि विश्रुतः ।
तद् भागिनेय-निधनं तत्त्वेनाचक्ष्व मे, प्रभो । ४०

दुर्मरं वत, वार्ष्णेय, काले प्राप्ते नृभिः सह
यत्र मे हृदयं दुःखाच् छतधा न विदीर्यते । ४१

किम् अब्रवीत् त्वां संग्रामे सुभद्रां मातरं प्रति,
मां चापि, पुण्डरीकाक्ष, चपलाक्षः प्रियो मम ? ४२

आहवं पृष्ठतः कृत्वा कच्चिद् न निहतः परैः,
कच्चिद्, मुखं न, गोविन्द, तेनाजौ विकृतं कृतम् ! ४३

स हि, कृष्ण, महा-तेजाः श्लाघन्न् इव ममाग्रतः
बाल-भावेन विनयम् आत्मनो ऽकथयत् प्रभुः । ४४

कच्चिद्, न निकृतो बालो द्रोण-कर्ण-कृपादिभिः,
धरायां निहतः शेते ! तद् ममाचक्ष्व, केशव । ४५

स हि भीष्मं च द्रोणं च कर्णं च बलिनां वरम्
स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम ।" ४६

एवं-विधं बहु तदा विलपन्तं सु-दुःखितम्
पितरं दुःखिततरो गोविन्दो वाक्यम् अब्रवीत्,— ४७

"न तेन विकृतं वक्त्रं कृतं संग्राम-मूर्धनि ।
न पृष्ठतः कृतश् चापि संग्रामस् तेन दुस्तरः । ४८

४१ । दुर्मरम्—मर्तुम् अशक्यम् । सह—युगपत्, एकस्मिन्न् एव काले । ४४ । श्लाघन्—श्लाघमानः । पआ. । विनयम्—शिक्षाम् । ४५ । निकृतः—[बालत्वात् स-भर्त्सनं] प्रत्याख्यातः ।

निहत्य पृथिवी-पालान् सहस्र-शत-सङ्घशः
खेदितो द्रोण-कर्णाभ्यां दौःशासनि-वशं गतः। ४६

एको ह्येकेन सततं युध्यमानो यदि, प्रभो,
न स शक्येत संग्रामे निहन्तुम् अपि वज्रिणा। ५०

समाहूते च संग्रामात् पार्थे संशप्तकैस् तदा,
पर्यवार्यत संक्रुद्धैः स द्रोणादिभिर् आहवे। ५१

ततः शत्रु-वधं कृत्वा सु-महान्तं रणे, पितः,
दौहित्रस् तव, वार्ष्णेय, दौःशासनि-वशं गतः। ५२

नूनं च स गतः स्वर्गं। जहि शोकं, महा-मते।
न हि व्यसनम् आसाद्य सीदन्ति कृत-बुद्धयः।" ५३

एतच् श्रुत्वा तु पुत्रस्य वचः, शूरात्मजस् तदा,
विहाय शोकं धर्मात्मा ददौ श्राद्धम् अनुत्तमम्। ५४

वासुदेवो ऽथ दाशार्हो बल-देवः स-सात्यकिः
अभिमन्योस् तदा श्राद्धम् अकुर्वन् सत्यकस् तथा। ५५

४६। खेदितः—अवसादितः, अवसन्नतां प्रापितः। ५३। कृत-बुद्धयः—[ज्ञानाग्नि-] निर्मलीकृतान्तःकरणाः। ५४। श्राद्धम् [श्रद्धा+अ, २।१]—[प्रेतस्य हित-कामनया] श्रद्धया [ब्राह्मणेभ्यो भोज्य-वासो-धन-रत्नादि-] दानम्।

चतुर्थो ऽध्यायः

धन-संग्रहः

तथैव पाण्डवा वीरा नगरे नागसाह्वये
नोपागच्छन्त वै शान्तिम्, अभिमन्यु-विना-कृताः । १
सु-बहूनि च, राजेन्द्र, दिवसानि विराट-जा
नाभुङ्क्त, पति-दुःखार्ता । तदाभूत् करुणं महत् । २
'कुक्षि-स्थ एव तस्याथ गर्भो वै सं-प्रलीयते'
आजगाम ततो व्यासो ज्ञात्वा दिव्येन चक्षुषा । ३
समागम्याब्रवीद् धीमान् पृथां पृथुल-लोचनाम्,
उत्तरां च, महा-तेजाः,—"शोकः संत्यज्यताम् अयम् । ४
जनिष्यते महा-तेजाः पुत्रस् तव, यशस्विनि !
पाण्डवानाम् अयं चान्ते पालयिष्यति मेदिनीम् !" ५
धनञ्जयं च संप्रेक्ष्य, धर्म-राजस्य शृण्वतः,
व्यासो वाक्यम् उवाचेदं, हर्षयन्न् इव, भारत,— ६
"पौत्रस् तव महा-भागो जनिष्यति, महा-मनाः
पृथ्वीं सागर-पर्यन्तां पालयिष्यति धर्मतः ।
तस्माच् छोकं, कुरु-श्रेष्ठ, जहि त्वम्, अरि-कर्शन ।" ७

---

२ । करुणम्—करुणः, शोकः । ३ । संप्रलीयते—क्षीयते । ५ । केवलाम् उत्तरां संप्रेक्ष्य उक्तम् इदम् । ७ । जनिष्यति—जनिष्यते, उत्पत्स्यते । पआ. ।

एवं पितामहेनोक्तो धर्मात्मा स धनञ्जयः,
त्यक्त्वा शोकं, महा-राज, हृष्ट-रूपो ऽभवत् तदा । ८
ततः सञ्चोदयामास व्यासो धर्मात्मजं नृपम्
अश्व-मेधं प्रति तदा । ततः सो ऽन्तर्हितो ऽभवत् । ९
ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च
ब्राह्मणान् अग्नि-सहितान्, प्रययुः पाण्डु-नन्दनाः, १०
समनुज्ञाप्य राजानं पुत्र-शोक-समाहतम्
धृत-राष्ट्रं स-भार्यं तौ पृथां च पृथु-लोचनाम् । ११
सरांसि सरितश् चैव वनान्युपवनानि च
अत्यक्रामद् महा-राजो गिरिं चाप्यन्वपद्यत । १२
तस्मिन् देशे च, राजेन्द्र, यत्र तद् द्रव्यम् उत्तमम्,
चक्रे निवेशनं राजा पाण्डवः सह सैनिकैः । १३
पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च,
प्रीतिमान् स कुरु-श्रेष्ठः खानयामास तद् धनम् । १४
ततः पात्रीः स-करका बहु-रूपा मनो-रमाः
भृङ्गाराणि कटाहानि कलसान् वर्धमानकान्, १५
बहूनि च विचित्राणि भाजनानि सहस्रशः
उद्धारयामास तदा धर्म-राजो युधिष्ठिरः । १६

---

१४ । धनाध्यक्षम्—कुबेरम् । १५ । पात्रीः—स्रुव-जुहूप्रभृतीनि यज्ञीय-पात्राणि (ससा.) । करकाः—स्वल्पायतन-घटाः । भृङ्गाराणि—गडुकान् । वर्धमानकान्—शरावाणि । १६ । भाजनानि—पात्राणि ।

वाहनं पाण्डु-पुत्रस्य तत्रासीत् तु, विशां पते,
षष्टिर् उष्ट्र-सहस्राणि शतानि, द्वि-गुणा हयाः,
वारणाश् च, महा-राज, सहस्र-शत-सम्मिताः, १७
शकटानि रथाश् चैव तावद् एव करेणवः ।
खराणां पुरुषाणां च परिसंख्या न विद्यते । १८
सा पुराभिमुखा, राजन्न्, उवाह महती चमूः
कृच्छ्राद्, द्रविण-भारार्ता, हर्षयन्ती कुरूद्वहान् । १९

पञ्चमो ऽध्यायः

परिक्षितो जन्म

एतस्मिन्न् एव काले तु वासुदेवो ऽपि वीर्यवान्
उपायाद् वृष्णिभिः सार्धं पुरं वारणसाह्वयम्, १
समयं वाजि-मेधस्य विदित्वा, पुरुर्षभः,
यथोक्तो धर्म-राजेन प्रव्रजन् स्व-पुरीं प्रति । २
वसत्सु वृष्णि-वीरेषु तत्राथ, जनमेजय,
जज्ञे तव पिता, राजन्, परिक्षित् पर-वीर-हा । ३
हृष्टानां सिंह-नादेन जनानां तत्र निस्वनः
आविवेश दिशः सर्वाः, पुनर् एव व्युपारमत् । ४
ततः सो ऽति-त्वरः कृष्णो विवेशान्तः-पुरं तदा
युयुधान-द्वितीयो वै व्यथितेन्द्रिय-मानसः । ५

ततस् त्वरितम् आयान्तीं ददर्श स्वां पितृ-ष्वसाम्
क्रोशन्तीम् अभिधावेति वासुदेवं पुनः पुनः, ६
पृष्ठतो द्रौपदीं चैव सुभद्रां च यशस्विनीम्।
विक्रोशन्त्यश् च करुणं बान्धवानां स्त्रियो, नृप, ७
अन्वगंश् च, महा-राज, सर्वाः सास्राविलेक्षणाः
'स्वस्रीयो वासुदेवस्य मृतो जात' इति, प्रभो। ८
ततः स प्राविशत् तूर्णं जन्म-वेश्म पितुस् तव,
अर्चितं, पुरुष-व्याघ्र, सितैर् माल्यैर् यथा-विधि ९
अपां कुम्भैः सु-पूर्णैश् च विन्यस्तैः सर्वतो दिशम्
घृतेन तिन्दुकालातैः सर्षपैश् च, महा-भुज, १०
अस्त्रैश् च वि-मलैर् न्यस्तैः पावकैश् च समन्ततः,
वृद्धाभिश् चापि रामाभिः परिचारार्थम् आवृतम्, ११
दक्षैश् च परितो धीर-भिषग्भिः कुशलैस् तथा।
ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः। १२
द्रौपदी त्वरिता गत्वा वैराटीं वाक्यम् अब्रवीत्,—
"अयम् आयाति ते भर्तुर् मातुलो मधु-सूदनः"। १३

६। पितृ-ष्वसाम्—पितृ-ष्वसारम्। आप्र.। 'मातृ-पितृभ्यां स्वसा' इति षत्वम् (पा. ८।३।८४)। ८। स्वस्रीयः [स्वसृ (भगिनी) +ईय, ४।१]—भगिनी-पौत्रः। ९। सितैः—श्वेतैः। १०। घृतेन—सह इति शेषः। तिन्दुकालातैः—तिन्दुक-वृक्षस्य ज्वलदङ्गारैः। ११। रामाभिः—सुन्दरीभिर् नारीभिः। आवृतम्—वेष्टितम्।

उत्तरा न्यपतद् भूमौ कृपणा पुत्र-गृद्धिनी,
प्राञ्जलिः पुण्डरीकाक्षं भूमाव् एवाभ्यवादयत्। १४

अ-संवीताभवद् देवी देववत् कृष्णम् ईयुषी,
दृष्ट्वा गोविन्दम् आयान्तं कृपणं पर्यदेवयत्। १५

श्रुत्वा स तस्या विपुलं विलापं, पुरुषर्षभः
अब्रवीच् च विशुद्धात्मा, सर्वं विश्रावयन् जगत्,— १६

"यथा सत्यं च धर्मश् च मयि नित्यं प्रतिष्ठितौ,
तथा मृतः शिशुर् अयं जीवताद् अभिमन्यु-जः।" १७

इत्युक्ते वासुदेवेन स बालो, भरतर्षभ,
शनैः शनैर्, महा-राज, प्रास्पन्दत, स-चेतनः। १८

व्यचेष्टत च बालो ऽसौ यथोत्साहं यथा-बलम्।
बभूवुर् मुदिता, राजंस्, ततस् ता भरत-स्त्रियः। १९

ब्राह्मणान् वाचयामासुर् गोविन्दस्यैव शासनात्।
तत्र मल्ला नटाश् चैव ग्रन्थिकाः सौखशायिकाः २०

सूत-मागध-सङ्घाश् चाप्यस्तुवंस् तं जनार्दनम्
कुरु-वंश-स्तवाख्याभिर् आशीर्भिर्, भरतर्षभ। २१

१५। अ-संवीता—वि-वस्त्रा। ईयुषी [इ+वस्+ई]—गन्तुम् इच्छती, गन्तुं चेष्टमाना। पा. ३।२।१३२। १७। जीवतात्—जीवतु। आशिषि तुपः तातङ्। पा. ७।१।३५। २०। वाचयामासुः—'स्वस्ति' इति शेषः। ग्रन्थिकाः—दैवज्ञाः। सौखशायिकाः—सौखशायनिकाः, सौख-सुप्तिकाः, सुखावह-शयन-प्रष्टारः, वैतालिकाः। आशीर्भिः—शुभाकाङ्क्षाभिः।

उत्थाय तु यथा-कालम्, उत्तरा यदु-नन्दनम्
अभ्यवादयत, प्रीता, सह पुत्रेण, भारत । २२

ततस् तस्य ददौ प्रीतो बहु-रत्नं विशेषतः,
तथैव वृष्णि-शार्दूलो नाम चास्याकरोत् प्रभुः । २३

परिक्षीणे कुले यस्माज् जातो ऽयम् अभिमन्यु-जः,
परिक्षिद् इति नामास्य भवत्वित्यब्रवीत् तदा । २४

अथाजग्मुः सु-बहुलं रत्नम् आदाय पाण्डवाः ।
अलञ्चक्रुश् च माल्यौघैः पुरुषा नाग-साह्वयम् २५

पताकाभिर् विचित्राभिर् ध्वजैश् च विविधैर् अपि ।
वेश्मानि समलञ्चक्रुः पौराश् चापि, जनेश्वर । २६

देवतायतनानां च पूजाः सु-विविधास् तथा
सन्दिदेशाथ विदुरः पाण्डु-पुत्र-प्रियेप्सया ।
राज-मार्गाश् च तत्रासन् सु-मनोभिर् अलङ्कृताः । २७

शुशुभे तत् पुरं चापि समुद्रौघ-निभ-स्वनम्
नर्तकैश् चापि नृत्यद्भिर् गायकानां च निस्वनैः । २८

तान् समीप-गतान् श्रुत्वा पाण्डवाञ् छत्रु-कर्शनः
वासुदेवः सहामात्यः प्रत्युद्-यातो दिदृक्षया । २९

ते कोशान् अग्रतः कृत्वा विविशुः स्व-पुरं तदा
पाण्डवाः प्रीत-मनसः सामात्याः स-सुहृद्-गणाः । ३०

ततस् तत् परमाश्चर्यं विचित्रम् महद् अद्भुतम्
शुश्रुवुस् ते तदा वीराः पितुस् ते जन्म, भारत । ३१

षष्ठो ऽध्यायः

हयोत्सर्गः

ततः कतिपयाहस्य व्यासः सत्यवती-सुतः
आजगाम महा-तेजा नगरं नाग-साह्वयम् । १

तत्र नाना-विधाकाराः कथाः समभिकीर्त्य वै,
युधिष्ठिरो धर्म-सुतो व्यासं वचनम् अब्रवीत्,— २

"भवत्-प्रसादाद्, भगवन्, यद् इदं रत्नम् आहृतम्,
उपयोक्तुं तद् इच्छामि वाजि-मेधे महा-क्रतौ । ३

तम् अनुज्ञातुम् इच्छामि भवता, मुनि-सत्तम ।
त्वदधीना वयं सर्वे कृष्णस्य च महात्मनः । ४

व्यास उवाच,—

अनुजानामि, राजंस्, त्वां । क्रियतां यद् अनन्तरम् ।
यजस्व वाजि-मेधेन विधिवद् दक्षिणावता । ५

अश्व-मेधो हि, राजेन्द्र, पावनः सर्व-पाप्मनाम् ।
तेनेष्ट्वा त्वं विपाप्मा वै भविता, नात्र संशयः । ६

वैशम्पायन उवाच,—

इत्युक्तः, स तु धर्मात्मा कुरु-राजो युधिष्ठिरः
वासुदेवम् अथाभ्येत्य वाग्मी वचनम् अब्रवीत्,— ७

---

३ । उपयोक्तुम्—नियोक्तुम्, विनियोक्तुम् । ६ । पावनः—विशोधकः । पाप्मनाम्—पापानाम् ।

"त्वत्-प्रभावार्जितान् भोगान् अश्नीम, यदु-नन्दन।
दीक्षयस्व त्वम् आत्मानं। त्वं हि नः परमो गुरुः।" ८

वासुदेव उवाच,—

त्वम् एवैतद्, महा-बाहो, कर्तुम् अर्हस्यरिन्दम।
त्वं गतिः सर्व-भूतानाम् इति मे निश्चिता मतिः। ९

यजस्व मदनुज्ञातः। प्राप्य एष क्रतुस् त्वया।
युनक्तु नो भवान् कार्ये यत्र वाञ्छसि, भारत। १०

वैशम्पायन उवाच,—

एवम् उक्तस् तु कृष्णेन, धर्म-पुत्रो युधिष्ठिरः,
व्यासम् आमन्त्र्य, मेधावी, ततो वचनम् अब्रवीत्,— ११
"यदा कालं भवान् वेत्ति हय-मेधस्य तत्त्वतः,
दीक्षयस्व तदा मां त्वं। त्वय्यायत्तो हि मे क्रतुः। १२

व्यास उवाच,—

अहं पैलो ऽथ, कौन्तेय, याज्ञवल्क्यस् तथैव च,
विधानं यद्, यथा-कालं तत् कर्तारो, न संशयः। १३

चैत्र्यां हि पौर्णमास्यां तु तव दीक्षा भविष्यति।
सम्भाराः संश्रियन्तां च यज्ञार्थं, पुरुषर्षभ। १४

वैशम्पायन उवाच,—

इत्युक्तः स तथेत्युक्त्वा, पाण्डवः पृथिवी-पतिः
चकार सर्वं, राजेन्द्र, यथोक्तं ब्रह्म-वादिना। १५

८। अश्नीम—अश्नीमः, भुञ्ज्महे। १४। सम्भाराः—[यज्ञस्य] उपकरण-द्रव्याणि। १५। चकार सर्वं &c.—Cf. यवे. २२-२५, २६।

दीक्षा-काले तु सं-प्राप्ते, ततस् ते सु-महर्त्विजः
विधिवद् दीक्षयामासुर् अश्व-मेधाय पार्थिवम् । १६

हयश् च हय-मेधार्थं स्वयं च ब्रह्म-वादिना
उत्सृष्टः शास्त्र-विधिना व्यासेनामित-तेजसा । १७

कृष्णाजिनी दण्ड-पाणिः क्षौम-वासाः स धर्म-जः
विबभौ द्युतिमान् भूयः प्रजा-पतिर् इवाध्वरे । १८

तथैवास्यर्त्विजः सर्वे तुल्य-वेशा, विशाम् पते,
बभूवुर् अर्जुनश् चापि प्रदीप्त इव पावकः । १९

श्वेताश्वः कृष्ण-सारं तं ससाराश्वं धनञ्जयः
विधिवत्, पृथिवी-पाल, धर्म-राजस्य शासनात् । २०

याज्ञवल्क्यस्य शिष्यश् च, कुशलो यज्ञ-कर्मणि,
प्रायात् पार्थेन सहितः शान्त्यर्थं, वेद-पार-गः । २१

ब्राह्मणाश् च, मही-पाल, बहवो वेद-पार-गाः
अनुजग्मुर् महात्मानं क्षत्रियाश् च, विशाम् पते । २२

अवमृद्नन् स राष्ट्राणि पार्थिवानां हयोत्तमः
शनैस् तदा परिययौ श्वेताश्वश् च महा-रथः । २३

तत्र संगणना नास्ति राज्ञाम् अ-युतशस् तदा,
ये ऽयुध्यन्त, महा-राज, क्षत्रिया हत-बान्धवाः— २४

---

१८ । प्रजापतिः—'दक्षः' इति शेषः । अध्वरे—यज्ञे । २१ । याज्ञवल्क्यस्य शिष्यः—सोम-श्रवाः (नी.) । २३ । परिययौ—समन्तात् चचार ।

किराता यवना, राजन्, बहवो ऽसि-धनुर्धराः
म्लेच्छाश् चान्ये बहु-विधाः पूर्वं ये निकृता रणे, २५
आर्याश् च पृथिवी-पालाः प्रहृष्ट-नर-वाहनाः
समीयुः पाण्डु-पुत्रेण बहवो युद्ध-दुर्मदाः । २६

सप्तमो ऽध्यायः

पिता-पुत्र-समागमः

क्रमेण स हयस् त्वेवं विचरन्, पुरुषर्षभ,
मणलूर-पतेर् देशम् उपायात्, सह-पाण्डवः । १
श्रुत्वा तु नृपतिः प्राप्तं पितरं, बभ्रु-वाहनः
निर्ययौ विनयेनाथ ब्राह्मणार्थ-पुरःसरः । २
मणलूरेश्वरं त्वेवम् उपायातं धनञ्जयः
नाभ्यनन्दत्, स मेधावी, क्षत्र-धर्मम् अनुस्मरन् । ३
उवाच च स धर्मात्मा स-मन्युः फाल्गुनस् तदा,—
"प्रक्रियेयं न ते युक्ता । बहिस् त्वं क्षत्र-धर्मतः । ४
संरक्षमाणं तुरगं यौधिष्ठिरम् उपागतम्
यज्ञियं विषयान्ते मां नायोत्सीः किं नु, पुत्रक ? ५
धिक् त्वाम् अस्तु, सु-दुर्बुद्धे, क्षत्र-धर्म-बहिष्कृतम्
यो मां युद्धाय संप्राप्तं साम्नैव प्रत्यगृह्णथाः ! ६

---

२५ । निकृताः—पराभूताः । २६ । समीयुः [सम्—इ+उस्]
—संजग्मिरे ।
६ । प्रत्यगृह्णथाः—प्रत्यगृह्णीथाः । आप्र. ।

यद्यहं न्यस्त-शस्त्रस् त्वाम् आगच्छेयं, सु-दुर्मते,
प्रक्रियेयं भवेद् युक्ता तावत् तव, नराधम ।" ७

ततः सा चारु-सर्वाङ्गी समुपेत्योरगात्मजा
उलूपी प्राह वचनं,—"क्षत्र-धर्म-विशारद, ८

उलूपीं मां निबोध त्वं मातरं पन्नगात्मजाम् ।
युध्यस्वैनं कुरु-श्रेष्ठं धनञ्जयम् अरिन्दमम् ।
एवम् एव हि ते प्रीतो भविष्यति, न संशयः ।" ९

एवम् उद्धर्षितो राजा स मात्रा बभ्रु-वाहनः
मनश् चक्रे महा-तेजा युद्धाय, भरतर्षभ । १०

संनह्य काञ्चनं वर्म शिरस्त्राणं च भानुमत्,
तूणीर-शत-संबाधम् आरुरोह रथोत्तमम् । ११

परमार्चितम् उच्छ्रित्य ध्वजं हंसं हिरण्मयम्
प्रययौ, पार्थम् उद्दिश्य, स राजा बभ्रु-वाहनः । १२

ततो ऽभ्येत्य हयं वीरो यज्ञियं पार्थ-रक्षितम्
ग्राहयामास पुरुषैर् हय-शिक्षा-विशारदैः । १३

गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा, स धनञ्जयः
पुत्रं रथ-स्थं भूमिष्ठः संन्यवारयद् आहवे । १४

तयोः समभवद् युद्धं पितुः पुत्रस्य चातुलम्,
देवासुर-रण-प्रख्यम्, उभयोः प्रीयमाणयोः । १५

महीं जगाम मोहार्तस् ततो, राजन्, धनञ्जयः।
सो ऽपि मोहं जगामाथ ततश् चित्राङ्गदा-सुतः। १६

भर्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि,
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरे,
मुमोह दुःख-सन्तप्ता पपात च मही-तले। १७

प्रतिलभ्य च सा संज्ञां देवी दिव्य-वपुर्-धरा
उलूपीं पन्नग-सुतां दृष्ट्वेदं वाक्यम् अब्रवीत्,— १८

"उलूपि, पश्य भर्तारं शयानं निहतं रणे!
साहं दुःखान्विता, देवि, पति-पुत्र-विना-कृता,
इहैव प्रायम् आसिष्ये प्रेक्षन्त्यास् ते, न संशयः।" १९

इत्युक्त्वा पन्नग-सुतां स-पत्नीं, चैत्रवाहनी
ततः प्रायम् उपासीना तूष्णीम् आसीज्, जनाधिप। २०

ततः संज्ञां पुनर् लब्ध्वा, स राजा बभ्रु-वाहनः,
मातरं ताम् अथालोक्य रण-भूमाव्, अथाब्रवीत्,— २१

"दुर्मरं पुरुषेणेह मन्ये, काले ह्यनागते
यत्र नाहं न मे माता विप्रयुज्येत जीवितात्।" २२

इत्युक्त्वा स ततो राजा दुःख-शोक-समाहतः
उपस्पृश्य, महा-राज, दुःखाद् वचनम् अब्रवीत्,— २३

१६। चित्राङ्गदा-सुतः—बभ्रु-वाहनः। १७। प्रविवेश रणाजिरे—रणाङ्गनं प्रविश्य तत्रैव अवतस्थे।

"शृण्वन्तु सर्व-भूतानि स्थावराणि चराणि च,
त्वां च, मातर्, यथा सत्यं ब्रवीमि, भुजगोत्तमे। २४
यदि नोत्तिष्ठति जयः पिता मे नर-सत्तमः,
अस्मिन्न् एव रणोद्देशे शोषयिष्ये कलेवरम्। २५
न हि मे पितरं हत्वा निष्कृतिर् विद्यते क्वचित्।
नरकं प्रतिपत्स्यामि ध्रुवं, गुरु-वधार्दितः।" २६
इत्येवम् उक्त्वा, नृ-पते, धनञ्जय-सुतो नृपः
उपस्पृश्याभवत् तूष्णीं प्रायोपेतो महा-मतिः। २७
प्रायोपविष्टे नृ-पतौ मणलूरेश्वरे तदा
पितृ-शोक-समाविष्टे सह मात्रा परन्तपे, २८
उलूपी चिन्तयामास तदा सञ्जीवनं मणिम्।
स चोपातिष्ठत तदा, पन्नगानां परायणम्। २९
तां गृहीत्वा तु, कौरव्य, नाग-राज-पतेः सुता
मनः-प्रह्लादनीं वाचं सैनिकानाम् अथाब्रवीत्,— ३०
"अयं तु मे मणिर् दिव्यः समानीतो, विशाम् पते,
मृतान् मृतान् पन्नगेन्द्रान् यो जीवयति नित्यदा। ३१
एनम् अस्योरसि त्वं च स्थापयस्व पितुः, प्रभो।
सञ्जीवितं तदा पार्थं स त्वं द्रष्टासि पाण्डवम्।" ३२

२५। जयः—[जय-शीलत्वाद्] अर्जुनः। २७। उपस्पृश्य—आचम्य। ३०। अब्रवीत्—'मणलूरेश्वरम्' इति शेषः। ३२। द्रष्टासि—अचिरात् द्रक्ष्यसि। लुट्।

इत्युक्तः, स्थापयामास तस्योरसि मणिं तदा
पार्थस्यामित-तेजाः स पितुः स्नेहाद्, अ-पाप-कृत्। ३३

तस्मिन् न्यस्ते मणौ, वीरो जिष्णुर् उज्जीवितः प्रभुः
चिर-सुप्त इवोत्तस्थौ, मृष्ट-लोहित-लोचनः। ३४

तम् उत्थितं महात्मानं लब्ध-संज्ञं मनस्विनम्
समीक्ष्य पितरं स्व-स्थं ववन्दे बभ्रु-वाहनः। ३५

उत्थाय च महा-बाहुः पर्याश्वस्तो धनञ्जयः
बभ्रु-वाहनम् आलिङ्ग्य समाजिघ्रत मूर्धनि। ३६

ददर्श चापि दूरे ऽस्य मातरं शोक-कर्शिताम्
उलूप्या सह तिष्ठन्तीं। ततो ऽपृच्छद् धनञ्जयः,— ३७

"किम् इदं ? लक्ष्यते सर्वं शोक-विस्मय-हर्षवत्!
जानाम्यहम् इदं युद्धं त्वया मद्-वचनात् कृतम्।" ३८

तम् उवाचोरग-पतेर् दुहिता प्रहसन्त्यथ,—
"आत्मा पुत्रः स्मृतस्, तस्मात् तेनेहासि पराजितः।" ३९

इत्येवम् उक्तो विजयः प्रसन्नात्माब्रवीद् इदम्,—
"सर्वं मे सु-प्रियं, देवि, यद् एतत् कृतवत्यसि।" ४०

इत्युक्त्वा सो ऽब्रवीत् पुत्रं मणलूर-पतिं जयः,—
"युधिष्ठिरस्याश्व-मेधः परि-चैत्रीं भविष्यति।
तत्रागच्छेः सहामात्यो मातृभ्यां सहितो, नृप।" ४१

३४। चिर-सुप्तः—दीर्घ-काल-निद्रितः। ४०। Cf. १४।७।६।
४१। परि-चैत्रीम्—सर्वतो-भावेन चैत्रस्य पौर्णमासीं व्याप्य।

इत्येवम् उक्तः पार्थेन, स राजा बभ्रु-वाहनः
उवाच पितरं धीमान् इदम् अस्राविलेक्षणः,— ४२

"उपयास्यामि, धर्म-ज्ञ, भवतः शासनाद् अहम्
अश्व-मेधे महा-यज्ञे द्वि-जाति-परिवेषकः। ४३

मम त्वनुग्रहार्थाय प्रविशस्व पुरं स्वकम्
भार्याभ्यां सह, धर्म-ज्ञ। मा भूत् ते ऽत्र विचारणा। ४४

उषित्वेह निशाम् एकां सुखं स्व-भवने, प्रभो,
पुनर् अश्वानुगमनं कर्तासि, जयतां वर।" ४५

इत्युक्तः स तु पुत्रेण तदा वानर-केतनः
स्मयन् प्रोवाच कौन्तेयस् तदा चित्राङ्गदा-सुतम्,— ४६

"विदितं ते, महा-बाहो, यथा दीक्षां चराम्यहम्।
न स तावत् प्रवेक्ष्यामि पुरं ते, पृथु-लोचन। ४७

यथा-कामं व्रजत्येष यज्ञियो ऽश्वो, नरर्षभ।
स्वस्ति ते ऽस्तु! गमिष्यामि। न स्थानं विद्यते मम।" ४८

स, तत्र विधिवत् तेन पूजितः, पाक-शासनिः,
भार्याभ्याम् अभ्यनुज्ञातः, प्रायाद् भरत-सत्तमः। ४९

४६। स्मयन्—स्मयमानः, हसन्। पआ.। ४८। स्थानम्—अवस्थानम्, परिचरणात् विरामः।

अष्टमो ऽध्यायः

यज्ञ-वाटः

स तु वाजी समुद्रान्तां पर्येत्य वसुधाम् इमाम्
निवृत्तो ऽभि-मुखो, राजन्, येन वारण-साह्वयम्। १

"आगन्तव्यं परां चैत्रीम् अश्व-मेधे नृपस्य नः"
इत्युक्त्वानुययौ पार्थो हयं तं काम-चारिणम्। २

तं निवृत्तं तु शुश्राव चारेणैव युधिष्ठिरः।
श्रुत्वार्जुनं कुशलिनं स च हृष्ट-मनाभवत्। ३

एतस्मिन्न् एव काले तु द्वादशीं माघ-मासिकीम्
इष्टं गृहीत्वा नक्षत्रं, धर्म-राजो युधिष्ठिरः ४

प्रोवाचेदं वचः काले तदा धर्म-भृतां वरः
आमन्त्र्य वदतां श्रेष्ठो भीमं प्रहरतां वरम्,— ५

"आयाति भीम-सेनासौ सहाश्वेन तवानुजः
यथा मे पुरुषाः प्राहुर् ये धनञ्जय-सारिणः। ६

उपस्थितश् च कालो ऽयम्, अभितो विद्यते हयः;
माघी च पौर्णमासीयं मासः शेषो, वृकोदर। ७

१। येन—वायुना [सह], वायु-वेगेन। ४। इष्टं नक्षत्रम्—पुष्यम्, तिष्यम्। ५। आमन्त्र्य—सम्बोध्य। ६। धनञ्जय-सारिणः—धनञ्जयानुसारिणः, धनञ्जयानुगामिनः। ७। अभितः—समीपे। 'मासः—[गौण-

तत् प्रस्थाप्यन्तु विद्वांसो ब्राह्मणा वेद-पार-गाः।
वाजिमेधार्थ-सिद्ध्यर्थं देशं पश्यन्तु यज्ञियम्। ८

ततो ययौ भीम-सेनः, प्राज्ञैः स्थपतिभिः सह,
ब्राह्मणान् अग्रतः कृत्वा, कुशलान् यज्ञ-कर्मणि। ९

तं स-साल-चयं श्रीमत्-स-प्रतोली-सु-घट्टितम्
मापयामास कौरव्यो यज्ञ-वाटं यथा-विधि, १०

प्रासाद-शत-संबाधं मणि-प्रवर-कुट्टिमम्
कारयामास विधिवद्, हेम-रत्न-विभूषितम्, ११

स्तम्भान् कनक-चित्रांश् च तोरणानि बृहन्ति च
यज्ञायतन-देशेषु, दत्त्वा शुद्धं च काञ्चनम्। १२

अन्तः-पुराणां राज्ञां च नाना-देश-समीयुषाम्
कारयामास धर्मात्मा तत्र तत्र यथा-विधि १३

ब्राह्मणानां च वेश्मानि नाना-देश-समीयुषाम्
कारयामास कौन्तेयो—विधिवत् तान्यनेकशः। १४

तथा संप्रेषयामास दूतान् नृपति-शासनात्
भीम-सेनो, महा-बाहो, राज्ञाम् अक्लिष्ट-कर्मणाम्। १५

चान्द्र-] मासस्य। गौण-चान्द्र-मासो हि कृष्ण-प्रतिपदादिः पौर्णमास्यन्तश् च। ८। प्रस्थाप्यन्तु—प्रस्थाप्यन्ताम्। पआ.। १०। सालः—प्राचीरम्। प्रतोली—रथ्या। मापयामास—मापनेन पृथक् चकार। १३। अन्तः-पुराणाम्—राज्ञी-समूहानाम्।

ते प्रियार्थं कुरु-पतेर् आ-ययुर्, नृप-सत्तम,
रत्नान्यनेकान्यादाय स्त्रियो ऽश्वान् आयुधानि च। १६

तेषां निर्विशतां तेषु शिविरेषु महात्मनाम्
नर्दतः सागरस्येव दिव-स्पृग् अभवत् स्वनः। १७

तेषाम् अभ्यागतानां च स राजा कुरु-वर्धनः
व्यादिदेशान्न-पानानि शय्याश् चाप्यतिमानुषाः। १८

वाहनानां च विविधाः शालाः शालीक्षु-गो-रसैः
उपेता भरत-श्रेष्ठो व्यादिदेश स धर्म-राट्। १९

तथा तस्मिन् महा-यज्ञे धर्म-राजस्य धीमतः
समाजग्मुर् मुनि-गणा बहवो ब्रह्म-वादिनः। २०

ये च द्वि-जाति-प्रवरास् तत्रासन्, पृथिवी-पते,
समाजग्मुः स-शिष्यास्। तान् प्रतिजग्राह कौरवः। २१

सर्वांश् च तान् अनुययौ यावद् आवसथान् प्रति
स्वयम् एव महा-तेजा, दम्भं त्यक्त्वा, युधिष्ठिरः। २२

ततः कृत्वा, स्थपतयः, शिल्पिनो ऽन्ये च ये, तदा
कृत्स्नं यज्ञ-विधिं, राजन्, धर्म-राजे न्यवेदयन्। २३

१९। गो-रसाः—दुग्ध-दधि-घृत-तक्रादीनि। २३। यज्ञ-विधिम्—शास्त्र-विहित-यज्ञ-वेद्यादिम्। विधिः—[शास्त्रेण] विधीयते यः सः।

तस्मिन् यज्ञे प्रवृत्ते तु वाग्मिनो हेतु-वादिनः
हेतु-वादान् बहून् आहुः, परस्पर-जिगीषवः । २४

ददृशुस् तं नृपतयो यज्ञस्य विधिम् उत्तमम्
देवेन्द्रस्येव, विहितं भीमसेनेन, भारत । २५

ददृशुस् तोरणान्यत्र शातकुम्भमयानि ते,
शय्यासन-विहारांश् च सु-बहून् रत्न-सञ्चयान्— २६

घटान् पात्रीः कटाहानि कलसान् वर्धमानकान्
—न हि किञ्चिद् अ-सौवर्णम् अपश्यन् वसुधाधिपाः— २७

यूपांश् च शास्त्र-पठितान् दारवान् हेम-भूषितान्
उपक्लृप्तान् यथा-कालं विधिवद् भूरि-वर्चसः । २८

स्थल-जा जल-जा ये च पशवः केचन, प्रभो,
सर्वान् एव समानीतान् अपश्यंस् तत्र ते नृपाः । २९

गाश् चैव महिषीश् चैव तथा वृद्ध-स्त्रियो ऽपि च
औदकानि च सत्त्वानि श्वापदानि वयांसि च ३०

जरायुजाण्ड-जातानि स्वेद-जान्युद्भिदानि च
पर्वतानूप-जातानि भूतानि ददृशुश् च ते । ३१

---

२४ । वाग्मिनः—वक्तारः । हेतु-वादिनः—तार्किकाः । हेतु-वादान्—तर्कान् । २८ । यूपान्—भवन्त्यश्व-मेधे यूपा एक-विंशतिः (ससा.) । उपक्लृप्तान्—कृतान् । Cf. यवे. २४।३४ ।

एवं प्रमुदितं सर्वं पशु-गो-धन-धान्यतः
यज्ञ-वाटं नृपा दृष्ट्वा परं विस्मयम् आगताः । ३२

पूर्णे शत-सहस्रे तु विप्राणां तत्र भुञ्जताम्
दुन्दुभिर् मेघ-निर्घोषो मुहुर् मुहुर् अताड्यत । ३३

अन्नस्य सु-बहून्, राजन्न्, उत्सर्गान् पर्वतोपमान्
दधि-कुल्याश् च ददृशुः सर्पिषश् च ह्रदान् जनाः । ३४

जम्बू-द्वीपो हि सकलो नाना-जन-पदायुतः,
राजन्न्, अदृश्यतैक-स्थो, राज्ञस् तस्य महा मखे । ३५

तत्र जाति-सहस्राणि पुरुषाणां, ततस् ततः
गृहीत्वा धनम् आजग्मुर्, बहूनि, भरतर्षभ । ३६

स्रग्विणश् चापि ते सर्वे सु-मृष्ट-मणि-कुण्डलाः
पर्यवेषन् द्वि-जातींस् तान् शतशो ऽथ सहस्रशः । ३७

विविधान्यन्न-पानानि पुरुषा ये ऽनुयायिनः
ते वै नृपोपभोज्यानि ब्राह्मणानां ददुश् च ह । ३८

नवमो ऽध्यायः

अश्व–मेधः

उपायाद् वचनाद् दूतो विजयस्य महात्मनः,
उपायातं नर-व्याघ्रं फाल्गुनं प्रत्यवेदयत् । १

३४ । कुल्या—क्षुद्रा कृत्रिमा नदी । ३८ । ब्राह्मणानाम्—ब्राह्मणेभ्यः ।

तच् श्रुत्वा नृ-पतिस् तस्य, हर्ष-वाष्पाकुलेक्षणः
प्रियाख्यान-निमित्तं वै ददौ बहु धनं तदा । २

ततो द्वितीय-दिवसे महाञ् छब्दो व्यवर्धत
आगच्छति नर-व्याघ्रे कौरवाणां धुरन्धरे । ३

ततो राजा सहामात्यः कृष्णश् च यदु-नन्दनः
धृत-राष्ट्रं पुरस्कृत्य तं प्रत्युद्-ययतुस् तदा । ४

सो ऽभिवाद्य पितुः पादौ धर्म-राजस्य धीमतः,
भीमादींश् चापि संपूज्य पर्यष्वजत केशवम् । ५

एतस्मिन्न् एव काले तु स राजा बभ्रु-वाहनः,
मातृभ्यां सहितो, धीमान् कुरून् एव जगाम ह । ६

ततस् तृतीय-दिवसे सत्यवत्यात्मजो मुनिः
युधिष्ठिरं समभ्येत्य वाग्मी वचनम् अब्रवीत्,— ७

"अद्य-प्रभृति, कौन्तेय, यजस्व । समयो हि ते ।
मुहूर्तो यज्ञियः प्राप्तश् । चोदयन्तीह याजकाः । ८

अ-हीनो नाम, राजेन्द्र, क्रतुस् ते ऽयं च कल्प्यताम्,
बहुत्वात् काञ्चनस्यास्य ख्यातो बहु-सुवर्णकः । ९

---

८ । अद्य-प्रभृति—फाल्गुनमासीय-शुक्लाष्टम्याम् अश्व-मेध आरभ्यते (ससा.) । ९ । अहीनः—द्व्यधिकैर् द्वादशानधिकैश् च दिनैः सम्पाद्यः सोम-यागः । त्रि-विध एव सोम-यागः एकाहः अहीनः सत्रं चेति । (ससा.) ।

एवम् अत्र, महा-राज, दक्षिणां त्रि-गुणां कुरु।
श्रीस् त्वां व्रजतु ! ते, राजन्, ब्राह्मणा ह्यत्र कारणम्। १०

त्रीन् अश्व-मेधान् अत्र त्वं सं-प्राप्य बहु-दक्षिणान्
ज्ञाति-वध्या-कृतं पापं प्रहास्यसि, नराधिप। ११

पवित्रं परमं चैतत् पावनानां च पावनम्
यद् अश्व-मेधावभृथं प्राप्स्यसे, कुरु-नन्दन।" १२

इत्युक्तः स तु तेजस्वी व्यासेनामित-बुद्धिना,
दीक्षां विवेश धर्मात्मा वाजि-मेधाप्तये ततः। १३

तत्र वेद-विदो, राजंश्, चक्रुः कर्माणि याजकाः।
न तेषां स्खलितं किञ्चिद् आसीच् चाप्यकृतं तथा। १४

कृत्वा प्रवर्ग्यं धर्माख्यं यथावद् द्विज-सत्तमाः,
चक्रुस् ते विधिवद्, राजंस्, तथैवाभिषवं द्विजाः। १५

अभिषूय ततो, राजन्, सोमं सोम-प-सत्तमाः,
सवनान्यानुपूर्व्येण चक्रुः शास्त्रानुसारिणः। १६

११। वध्या—हत्या। १२। अवभृथः—यज्ञान्त-स्नानम्। १५। प्रवर्ग्यः—प्रवर्गः, अश्व-मेधादेः शिरो-भूतो यज्ञाङ्ग-विशेषः। धर्माख्यम्—धर्मज्ञाः इति अवाचां पाठः। अभिषवः—सोम-लतातः सुराया उत्पादनम्। १६। सोमः—सोम-लता-रसः। सवनानि—[विभाग-ग्रहण-निर्दलन-निःसारणाहुति-पानादयः] सोम-क्रियाः। तानि काल-भेदेन त्रि-विधानि प्रातः-सवनानि मध्याह्न-सवनानि सायं-सवनानि चेति।

न तत्र कृपणः कश्चिद् न दरिद्रो बभूव ह,
क्षुधितो दुःखितो वापि, प्राकृतो वापि मानवः । १७

भोजनं भोजनार्थिभ्यो दापयामास शत्रु-हा
भीम-सेनो महा-तेजाः सततं राज-शासनात् । १८

संस्तरे कुशलाश् चापि सर्व-कार्याणि याजकाः
दिवसे दिवसे चक्रुर् यथा-शास्त्रानुदर्शनात् । १९

नाषड़ङ्ग-विद् अत्रासीत् सदस्यस् तस्य धीमतः,
नाव्रतो, नानुपाध्यायो, न च वादाविचक्षणः । २०

ततो यूपोच्छ्रये प्राप्ते षड् बैल्वान्, भरतर्षभ,
खादिरान् बिल्व-संमितांस् तावतः सर्व-वर्णिनः २१

देवदारुमयौ द्वौ तु यूपौ कुरु-पतेर् मखे
श्लेष्मातकमयं चैकं याजकाः समकल्पयन् । २२

१७ । प्राकृतः—नीचः । १९ । संस्तरे—इष्टकैः चयनाख्ये स्थण्डिल-रचने । २० । अ-षड़ङ्ग-वित्—शिक्षा कल्पो-व्याकरणं निरुक्तं छन्दो ज्योतिषं च इति षट् अङ्गानि वेदस्य । उपाध्यायः—'एक-देशं तु वेदस्य वेदाङ्गान्यपि वा पुनः, यो ऽध्यापयति वृत्त्यर्थम् उपाधायः स उच्यते' (मसं. २।१४१)। वृत्त्यर्थम्—जीविकार्थम् । वादाविचक्षणः—यथार्थ-बोधोत्पादक-भाषणे अ-दक्षः । २१ । यूपः—यज्ञे पशु-बन्धन-काष्ठम् । उच्छ्रये—उन्नमने, उन्नमन- [काले]। वर्णिनः—पलाश-काष्ठमयान् (नी.)। जटाधर-मते तु सर्व-वर्णिका गम्भारी-वृक्षः (शकद्रु.)। २२ । श्लेष्मातकः—बहु-वारक-वृक्षः, চালতা।

शोभार्थं चापरान् यूपान् काञ्चनान्, भरतर्षभ,
स भीमः कारयामास धर्म-राजस्य शासनात्। २३

ते व्यराजन्त, राजर्षे, वासोभिर् उपशोभिताः,
महेन्द्रानुगता देवा यथा सप्तर्षिभिर् दिवि। २४

इष्टकाः काञ्चनीश् चात्र चयनार्थं कृताभवन्।
शुशुभे चयनं तच् च दक्षस्येव प्रजा-पतेः। २५

चतुश्चित्यश् च तस्यासीद् अष्टा-दश-करात्मकः
स रुक्म-पक्षो निचितस् त्रि-कोणो गरुडाकृतिः। २६

ततो नियुक्ताः पशवो यथा-शास्त्रं मनीषिभिः
तं तं देवं समुद्दिश्य पक्षिणश् च, यथा-विधि। २७

ऋषभाः शास्त्र-पठितास् तथा जल-चराश् च ये,
सर्वांस् तान् अभ्ययुञ्जंस् ते तत्राग्नि-चय-कर्मणि। २८

यूपेषु नियता चासीत् पशूनां त्रि-शती तथा
अश्व-रत्नोत्तरा यज्ञे कौन्तेयस्य महात्मनः। २९

२५। काञ्चनीः—काञ्चन्यः, स्वर्णमय्यः। द्वितीया आर्षी। चयनम्—इष्टकादिभिर् निर्माणम्, इष्टकादि-निर्मितं वेद्यादि। २६। चित्या—वेदि-निर्माणम्, वेदि-स्थानम् इत्यर्थः। अष्टादश-करात्मकः—अष्टादशहस्त-परिमितः [देशः] (काप्रसि.)। निचितः—उत्थापितः। २७-२९। Cf. पआ. । अग्नि-चयः—अग्नि-चयनम्, [यज्ञाय] अग्नि-स्थापनम्। २९। नियताः—बद्धाः यवे. २४। २८। अभ्ययुञ्जन्—अभ्ययुञ्जत, आक्रामन्।

स यज्ञः शुशुभे तस्य साक्षाद् देवर्षि-सङ्कुलः
गन्धर्व-गण-सङ्गीतः प्र-नृत्यो ऽप्सरसां गणैः। ३०

स किम्पुरुष-सङ्कीर्णः किन्नरैश् चोपशोभितः
सिद्ध-विप्र-निवासैश् च समन्ताद् अभि-संवृतः। ३१

तस्मिन् सदसि नित्यास् तु व्यास-शिष्या द्विजर्षभाः
सर्व-शास्त्र-प्रणेतारः कुशला यज्ञ-कर्मसु। ३२

नारदश् च बभूवात्र तुम्बुरुश् च महा-द्युतिः
विश्वा-वसुश् चित्र-सेनस् तथान्ये गीत-कोविदाः। ३३

रमयन्ति स्म तान् विप्रान् यज्ञ-कर्मान्तरेषु वै
गन्धर्वा गीत-कुशला नृत्येषु च विशारदाः। ३४

श्रपयित्वा पशून् अन्यान् विधिवद् द्विज-सत्तमाः,
तं तुरङ्गं यथा शास्त्रम् आलभन्त द्वि-जातयः। ३५

उपसंवेशयाञ्चक्रुस् ततस् तां द्रुपदात्मजाम्
कलाभिस् तिसृभी, राजन्, यथा-विधि मनस्विनीम्। ३६

३१। किम्पुरुषः, किन्नरः—अश्व-मुखो गीत-मोदी स्वर्ग-गायकस् तुम्बुरादिः। ३५। श्रपयित्वा [श्रा-इ + त्वा]—पाचयित्वा। आलभन्त—यज्ञार्थं जघ्नुः। ३६। उपसंवेशयाञ्चक्रुः—पत्या सह सङ्गमाय स्त्रियम् इव स्व-समीपे हतेनाश्वेन शाययामासुः। यवे. २३। १९-३२ संवेशः—साभिलाषयोः स्त्री-पुंसयोर् एकत्र शयनम्। कलाभिः—कलनाभिः मन्त्र-द्रव्य-श्रद्धाख्याभिः [उपेताम्] (नी.)।

पृ. ७१७, श्लो. १७। निर्विशताम्—[विविधान् भोगान्] भुञ्जानानाम्।

उद्धृत्य तु वपां तस्य यथा-शास्त्रं द्वि-जातयः
श्रपयामासुर् अ-व्यग्रा विधिवद्, भरतर्षभ। ३७

तं वपा-धूम-गन्धं तु धर्म-राजः सहानुजैः
उपाजिघ्रद् यथा-शास्त्रं सर्व-पापापहं तदा। ३८

शिष्टान्यङ्गानि यान्यासंस् तस्याश्वस्य, नराधिप,
तान्यग्नौ जुहुवुर् धीराः समस्ताः षोड़शर्त्विजः। ३९

संस्थाप्यैनं तस्य राज्ञस् तं यज्ञं शक्र-तेजसः,
व्यासः स-शिष्यो भगवान् वर्धयामास तं नृपम्। ४०

दशमो ऽध्यायः

धन-वर्षणम्

ततो युधिष्ठिरः प्रादाद् ब्राह्मणेभ्यो यथा-विधि
कोटीः सहस्रं निष्कानां, व्यासाय तु वसुन्धराम्। १

प्रतिगृह्य धरां, राजन्, व्यासः सत्यवती-सुतः
अब्रवीद् भरत-श्रेष्ठं धर्म-राजं युधिष्ठिरम्,— २

३७। वपाम्—मेदः। श्रपयामासुः—पाचयामासुः। ३९। शिष्टान्यङ्गानि—हृदय-जिह्वा-वक्ष आदीनि अवशिष्टानि अश्वाङ्गानि। ४०। संस्थाप्य—सम्पाद्य, समाप्य। वर्धयामास—वर्धापयामास, वर्धस्व इति प्रोवाच, अभिननन्द।

१। ब्राह्मणेभ्यः—सदस्येभ्यः इति अवाचां पाठः।

"वसुधा भवतस् त्वेषा संन्यस्ता, राज-सत्तम।
निष्क्रयो दीयतां मह्यं। ब्राह्मणा हि धनार्थिनः।" ३

युधिष्ठिरस् तु तान् विप्रान् प्रत्युवाच महा-मनाः,—
"अश्व-मेधे महा-यज्ञे पृथिवी दक्षिणा स्मृता। ४

वनं प्रवेक्ष्ये, विप्राग्र्या, विभजध्वं महीम् इमाम्।
नाहम् आदातुम् इच्छामि ब्रह्म-स्वं, द्विज-सत्तमाः।" ५

प्रोवाच मध्ये विप्राणाम्, इदं संपूजयन्, मुनिः,—
"दत्तैषा भवता मह्यं। तां ते प्रतिददाम्यहम्।
हिरण्यं दीयताम् एभ्यो ब्राह्मणेभ्यो। धरास्तु ते।" ६

ततो ऽब्रवीद् वासुदेवो धर्म-राजं युधिष्ठिरम्,—
"यथाह भगवान् व्यासस् तथा त्वं कर्तुम् अर्हसि।" ७

इत्युक्तः स कुरु-श्रेष्ठः, प्रीतात्मा भ्रातृभिः सह,
कोटि-कोटी–कृतां प्रादाद् दक्षिणां त्रि-गुणां क्रतोः। ८

प्रतिगृह्य तु तद् रत्नं कृष्ण-द्वैपायनो मुनिः,
ऋत्विग्भ्यः प्रददौ विद्वांश्। चतुर्धा व्यभजंश् च ते। ९

धरण्या निष्क्रयं दत्त्वा तद् हिरण्यं, युधिष्ठिरः
धूत-पापो जित-स्वर्गो मुमुदे भ्रातृभिः सह। १०

३। संन्यस्ता—त्यक्ता, प्रत्यर्पिता। ६। संपूजयन्—संमानयन्। ९। चतुर्धा व्यभजन्—चातुर्होत्र-प्रमाणतः इति शेषः। चातुर्होत्र-प्रमाणतः—चातुर्होत्र-यज्ञस्य विधानस् अनुसृत्य (काप्रसि.)।

ऋत्विजस् तम् अ-पर्यन्तं सुवर्ण-निचयं तदा
व्यभजन्त द्वि-जातिभ्यो यथोत्साहं यथा-सुखम् ।   ११

यज्ञ-वाटे च यत् किञ्चिद् हिरण्यं स-विभूषणम्
—तोरणानि च यूपांश् च घटान् पात्रीस् तथेष्टकाः—
युधिष्ठिराभ्यनुज्ञाताः सर्वं तद् व्यभजन् द्विजाः ।   १२

अनन्तरं द्वि-जातिभ्यः क्षत्रिया जह्रिरे वसु,
तथा विट्-शूद्र-सङ्घाश् च, तथान्थे—म्लेच्छ-जातयः ।   १३

ततस् ते ब्राह्मणाः सर्वे मुदिता जग्मुर् आलयान्,
तर्पिता वसुना तेन धर्म-राजेन धीमता ।   १४

स्वम् अंशं भगवान् व्यासः कुन्त्यै, पादाभिवादितः,
प्रददौ तस्य महतो हिरण्यस्य, महा-द्युतिः ।   १५

श्वशुरात् प्रीति-दायं तं प्राप्य, सा प्रीत-मानसा,
चकार पुण्यकं तेन सु-महत् सङ्घशः पृथा ।   १६

गत्वा त्ववभृथं, राजा विपाप्मा भ्रातृभिः सह
सभाज्यमानः शुशुभे, महेन्द्रस् त्रि-दशैर् इव ।   १७

---

११ । अपर्यन्तम्—अनन्तम् । १३ । अनन्तरं द्वि-जातिभ्यः—विप्रेषु यथेच्छं धनं गृहीत्वा निवृत्तेषु अवशिष्टात् । १६ । प्रीति-दायम्—प्रीत्या दत्तं धनम् । पुण्यकम्—पुण्य-कर्म-समूहम् । १७ । अवभृथः—यज्ञान्त-स्नानम् । यज्ञ-शेषे जलाशयस्य तटं गत्वा कलशादीनि जल-पात्राणि अधो-मुखी-कृत्य सलिले संस्थाप्य मन्त्र-पाठादिकं कृत्वा दम्पती सुस्नातौ प्रत्यावर्तेते । इयम् एवावभृथ-क्रिया । (ससा) । सभाज्यमानः [सभाज (चुप) + य-आन, ११]—सम्मान्यमानः ।

राजभ्यो ऽपि ततः प्रादाद् रत्नानि विविधानि च
गजान् अश्वान् अलङ्कारान् स्त्रियो वासांसि काञ्चनम् । १८

आनीय च तथा वीरं राजानं बभ्रु-वाहनम्,
प्रदाय विपुलं वित्तं गृहं प्रास्थापयत् तदा । १९

नृपतींश् चैव तान् सर्वान् सु-विभक्तान् सु-पूजितान्
प्रस्थापयामास वशी कुरु-राजो युधिष्ठिरः । २०

गोविन्दं च महात्मानं बल-देवं महा-बलम्
भ्रातृभिः सहितो राजा प्रास्थापयद्, अरिन्दमः । २१

एवं बभूव यज्ञः स धर्म-राजस्य धीमतः,
बह्वन्न-धन-रत्नौघः सुरा-मैरेय-सागरः २२

सर्पिः-पङ्का ह्रदा यत्र बभूवुश् चान्न-पर्वताः,
रसाल-कर्दमा नद्यो बभूवुर्, भरतर्षभ । २३

भक्ष्य-खाण्डव-रागाणां क्रियतां भुज्यतां तथा
पशूनां वध्यतां चैव नान्तं ददृशिरे जनाः । २४

वर्षित्वा धन-धाराभिः कामै रत्नै रसैस् तथा,
विपाप्मा भरत-श्रेष्ठः कृतार्थः प्राविशत् पुरम् । २५

---

२० । तान्—अश्व-मेधे समागतान् । सु-विभक्तान्—प्राप्त-यथेष्ट-धन-भागान् । २४ । खाण्डवः—पिप्पली-शुण्ठी-युक्तो मुद्ग-यूषः (नी.), गुडादि-विकार-मिष्टान्न-द्रव्यम् (शकद्रु.) । रागः—शर्करा-युक्त-खाण्डवः (नी.) । क्रियताम्—क्रियमाणानाम् । भुज्यताम्—भुज्यमानानाम् । वध्यताम्—वध्यमानानाम् । पआ. । ददृशिरे—ददृशुः । आआ. ।

एका-दशो ऽध्यायः

आतिथ्य-यज्ञः

श्रूयतां, राज शार्दूल, महद् आश्चर्यम् उत्तमम्,
अश्व-मेधे महा-यज्ञे निर्वृत्ते यद् अभूत्, प्रभो । १

तर्पितेषु द्विजाग्र्येषु ज्ञाति-सम्बन्धि-बन्धुषु
दीनान्ध-कृपणे वापि तदा, भरत-सत्तम, २

घुष्यमाणे महा-दाने दिक्षु सर्वासु, भारत,
पतत्सु पुष्प-वर्षेषु धर्म-राजस्य मूर्धनि, ३

बिलाद् निःसृत्य नकुलो रुक्म-पार्श्वस् तदानघ
वज्राशनि-समं नादम् अमुञ्चद्, वसुधाधिप । ४

सकृद् उत्सृज्य तं नादं त्रासयानो मृग-द्विजान्,
मानुषं वचनं प्राह पुष्पोपरि-शयो महान्,— ५

"सक्तु-प्रस्थेन वो नायं यज्ञस् तुल्यो, नराधिपाः,
उञ्छ-वृत्तेर् वदान्यस्य कुरु-क्षेत्र-निवासिनः ।" ६

तस्य तद् वचनं श्रुत्वा नकुलस्य, विशाम् पते,
विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्षभाः । ७

---

१ । निर्वृत्ते—समाप्ते । ४ । रुक्म-पार्श्वः—स्वर्ण-पार्श्वः । ५ । मृग-द्विजान्—पशु-पक्षिणः । प्रस्थस् शराव-द्वयम्, कुडव-चतुष्टयम्, प्रायेण इदानीन्तनं सार्ध-शेरम् ।

ततः समेत्य, नकुलं पर्यपृच्छन्त ते द्विजाः,—
"कुतस् त्वं समनुप्राप्तो यज्ञं साधु-समागमम् ? ८
कथं भवन्तं विद्याम यो नो यज्ञं विगर्हसे
अ-विलुप्यागमं कृत्स्नं विविधैर् यज्ञियैः कृतम् ? ९
पूजार्हाः पूजिताश् चात्र विधिवच् छास्त्र-दर्शनात्,
मन्त्राहुति-हुतश् चाग्निर्, दत्तं देयम् अ-मत्सरम् । १०
तुष्टा द्वि-जातयश् चात्र दानैर् बहु-विधैर् अपि,
क्षत्रियाश् च सु-युद्धेन श्राद्धैश् चापि पितामहाः, ११
पालनेन विशस् तुष्टाः, कामैस् तुष्टा वर-स्त्रियः,
अनुक्रोशैस् तथा शूद्रा, दान-शेषैः पृथग्-जनाः, १२
ज्ञाति-सम्बन्धिनस् तुष्टाः शौचेन च नृपस्य नः,
देवा हविर्भिः पुण्यैश् च रक्षणैः शरणागताः । १३
यद् अत्र तथ्यं तद् ब्रूहि सत्यं सत्यं द्वि-जातिषु
यथा दृष्टं यथा श्रुतं, पृष्टो, ब्राह्मण-काम्यया ।" १४

इति पृष्टो द्विजैस् तैः, स प्रहसन् नकुलो ऽब्रवीत्,—
"नैषा मृषा मया वाणी प्रोक्ता दर्पेण वा, द्विजाः । १५
शृणुताव्यग्र-मनसः शंसतो मे यथा-तथम्,
अनुभूतं च दृष्टं च यद् मयाद्भुतम् उत्तमम् । १६

---

१४ । काम्यया—कामनया ।

धर्म-क्षेत्रे कुरु-क्षेत्रे धर्म-ज्ञैर् बहुभिर् वृते
उञ्छ-वृत्तिर् द्विजः कश्चित् कापोतिर् अभवत् पुरा। १७

स-भार्यः सह पुत्रेण स-स्नुषस् तपसि स्थितः
बभूव शुक्ल-वृत्तः स धर्मात्मा नियतेन्द्रियः। १८

षष्ठे काले सदा विप्रो भुङ्क्ते तैः सह, सु-व्रतः।
षष्ठे काले कदाचित् तु तस्याहारो न विद्यते। १९

कपोत-धर्मिणस् तस्य दुर्भिक्षे सति दारुणे
नाविद्यत तदा, विप्राः, सञ्चयस्। तद् निबोधत। २०

क्षीणौषधि-समावायो द्रव्य-हीनो ऽभवत् तदा।
काले काले ऽस्य संप्राप्ते नैव विद्येत भोजनम्। २१

क्षुधा-परिगताः सर्वे प्रातिष्ठन्त तदा तु ते
उञ्छं तदा शुक्ल-पक्षे मध्यं तपति भास्करे। २२

स तथैव क्षुधाविष्टः सार्धं परिजनेन ह
क्षपयामास तं कालं कृच्छ्र-प्राणो द्विजोत्तमः। २३

अथ षष्ठे गते काले यव-प्रस्थम् उपार्जयन्,
यव-प्रस्थं तु तं सक्तून् अकुर्वन्त तपस्विनः। २४

१७। कापोतिः—कपोत इव एकैकं कणकम् आददानो वर्तते यः सः तादृशः। १९। षष्ठे काले—अष्टसु सम-भागेषु विभक्तस्य दिनस्य षष्ठे भागे। २१। समावायः—गणः। २२। उञ्छम्—कणश आदानं [कर्तुम्]। २३। क्षपयामास—यापयामास।

कृत-जप्याह्निकास् ते तु हुत्वा चाग्निं यथा-विधि,
कुड़वं कुड़वं सर्वे व्यभजन्त तपस्विनः । २५

अथागच्छद् द्विजः कश्चिद् अतिथिर् भुञ्जतां तदा ।
ते तं दृष्ट्वातिथिं प्राप्तं प्रहृष्ट-मनसो ऽभवन् । २६

स-ब्रह्मचर्यं गोत्रं ते तस्य ख्यात्वा परस्परम्
कुटीं प्रवेशयामासुः क्षुधार्तम् अतिथिं तदा । २७

'इदम् अर्घ्यं च पाद्यं च बृषी चेयं तवानघ,
शुचयः सक्तवश् चेमे नियमोपार्जिताः, प्रभो,—
प्रतिगृह्णीष्व—भद्रं ते—मया दत्ता, द्विजर्षभ' १८

इत्युक्तः प्रतिगृह्याथ सक्तूनां कुड़वं द्विजः
भक्षयामास, राजेन्द्र, न च तुष्टिं जगाम सः । २९

द्वा-दशो ऽध्यायः

कुटुम्ब-धर्मः

स उञ्छ-वृत्तिस् तं प्रेक्ष्य क्षुधा-परिगतं द्विजम्,
आहारं चिन्तयामास 'कथं तुष्टो भवेद्' इति । १

तस्य भार्याब्रवीद् वाक्यं 'मद्-भागो दीयताम्' इति,
'गच्छत्वेष यथा-कामं परि-तुष्टो द्विजोत्तमः ।' २

२६ । भुञ्जताम्—भुञ्जानेषु, भोक्ष्यमाणेषु [तेषु] । पा. ३।३।१३१ पआ. । २७ । स-ब्रह्मचर्यम्—वेदाध्ययनाय व्रतिनां युगपत् एकस्मिन्न् एव गुरु-गृहे वासः । २८ । बृषी—व्रतिनां कुशासनम् ।

इति ब्रुवन्तीं तां साध्वीं भार्यां स द्विज-सत्तमः
क्षुधा-परिगतां ज्ञात्वा तान् सक्तून् नाभ्यनन्दत। ३

जानन् वृद्धां क्षुधार्तां च श्रान्तां ग्लानां तपस्विनीम्
त्वगस्थि-भूतां वेपन्तीं, ततो भार्याम् उवाच ह,— ४

'अपि कीट-पतङ्गानां मृगाणां चैव, शोभने,
स्त्रियो रक्ष्याश् च पोष्याश् च। न त्वेवं वक्तुम् अर्हसि। ५

धर्म-कामार्थ-कार्याणि शुश्रूषा कुल-सन्ततिः
दारेष्वधीनो धर्मश् च पितृणाम् आत्मनस् तथा।' ६

इत्युक्ता सा ततः प्राह,—'धर्मार्थौ नौ समौ, द्विज।
सक्तु-प्रस्थ-चतुर्भागं गृहाणेमं, प्रसीद मे।

पालनाद् धि पतिस् त्वं मे भर्तासि भरणाच् च मे,
पुत्र-प्रदानाद् वर-दस्। तस्मात् सक्तून् प्रयच्छ मे, ८

जरा-परिगतो वृद्धः क्षुधार्तो दुर्बलो भृशम्,
उपवास-परिश्रान्तो यदा त्वम् अपि कर्शितः।' ९

इत्युक्तः स तया, सक्तून् प्रगृह्येदं वचो ऽब्रवीत्,—
'द्विज, सक्तून् इमान् भूयः प्रतिगृह्णीष्व, सत्तम।' १०

स, तान् प्रगृह्य भुक्त्वा च न तुष्टिम् अगमद् द्विजः।
तम् उञ्छ-वृत्तिर् आलक्ष्य ततश् चिन्ता-परो ऽभवत्। ११

३। ब्रुवन्तीम्—ब्रुवतीम्। आप्र.। ४। वेपन्तीम्—वेपमानाम्। पआ.। ६। कुल-सन्ततिः—वंश-धारा

पुत्र उवाच,—

सक्तून् इमान् प्रगृह्य त्वं देहि विप्राय, सत्तम।
इत्येव सु-कृतं मन्ये। तस्माद् एतत् करोम्यहम्। १२

पिता उवाच,—

बालानां क्षुद् बलवती, जानाम्येतद् अहं, प्रभो।
वृद्धो ऽहं धारयिष्यामि। त्वं बली भव, पुत्रक। १३

जीर्णेन वयसा, पुत्र, न मां क्षुद् बाधते ऽपि च।
दीर्घ-कालं तपस् तप्तं। न मे मरणतो भयम्। १४

पुत्र उवाच,—

अपत्यम् अस्मि ते। पुंसस् त्राणात् पुत्र इति स्मृतः।
आत्मा पुत्रः स्मृतस्। तस्मात् त्राह्यात्मानम् इहात्मना। १५

पिता उवाच,—

रूपेण सदृशस् त्वं मे शीलेन च दमेन च,
परीक्षितश् च बहुधा। सक्तून् आदद्मि ते, सुत। १६

नकुल उवाच,—

इत्युक्त्वादाय तान् सक्तून् प्रीतात्मा द्विज-सत्तमः
प्रहसन्न् इव विप्राय स तस्मै प्रददौ तदा। १७

भुक्त्वा तान् अपि सक्तून् स नैव तुष्टो बभूव ह।
उञ्छ-वृत्तिस् तु धर्मात्मा व्रीडाम् अनुजगाम ह। १८

तां वै वधूः स्थिता साध्वी ब्राह्मण-प्रिय-काम्यया
सक्तून् आदाय संहृष्टा श्वशुरं वाक्यम् अब्रवीत्,— १९

१६। आदद्मि [आ-दा+मि = आददामि]—आददे। पआ.।

'सन्तानात् तव सन्तानं मम, विप्र, भविष्यति ।
सक्तून् इमान् अतिथये गृहीत्वा संप्रयच्छ मे । २०

तव प्रसादाद् निर्वृत्ता मम लोकाः किलाक्षयाः ।
पुत्रेण तान् अवाप्नोति यत्र गत्वा न शोचति । २१

पितॄन् ऋणात् तारयति पुत्र इत्यनुशुश्रुम ।
पुत्र-पौत्रैश् च नियतं साधु-लोकान् उपाश्नुते ।' २२

श्वशुर उवाच,—

वातातप-विशीर्णाङ्गीं त्वां वि-वर्णां निरीक्ष्य वै
कर्शितां, सु-व्रताचारे, क्षुधा-विह्वल-चेतसम्, २३

कथं सक्तून् ग्रहीष्यामि, भूत्वा धर्मोपघातकः ?
कल्याण-वृत्ते, कल्याणि, नैवं त्वं वक्तुम् अर्हसि । २४

बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया ।
उपवास-परिश्रान्ता त्वं हि बान्धव-नन्दिनी । २५

स्नुषा उवाच,—

गुरोर् मम गुरुस् त्वं वै यतो दैवत-दैवतम्
देवातिदेवस्, तस्मात् त्वं सक्तून् आदत्स्व मे, प्रभो । २६

देहः प्राणश् च धर्मश् च, शुश्रूषार्थम् इदं गुरोः ।
तव, विप्र, प्रसादेन लोकान् प्राप्स्यामहे शुभान् । २७

---

२२ । अनुशुश्रुम—अश्रृणुम । आप्र. । उपाश्नुते—प्राप्नोति ।
२५ । बान्धव-नन्दिनी—श्वश्रू-श्वशुरादि-प्रीति-दायिनी ।

श्वशुर उवाच,—

अनेन नित्यं साध्वी त्वं शील-वृत्तेन शोभसे,
या त्वं धर्म-व्रतोपेता गुरु-वृत्तिम् अवेक्षसे । २८

तस्मात् सक्तून् ग्रहीष्यामि—वधु, नार्हसि वञ्चनाम्—
गणयित्वा, महा-भागे, त्वां हि, धर्म-भृतां वरे । २९

नकुल उवाच,—

इत्युक्त्वा, तान् उपादाय सक्तून् प्रादाद् द्वि-जातये ।
ततस् तुष्टो ऽभवद् विप्रस् तस्य साधोर् महात्मनः । ३०

त्रयो-दशो ऽध्यायः

परम-दानम्

प्रीतात्मा स तु तं वाक्यम् इदम् आह द्विजर्षभम्,—
'अहो दानं घुष्यते ते स्वर्गे स्वर्ग-निवासिभिः !
गगनात् पुष्प-वर्षं च पश्येदं पतितं भुवि ! १

सर्वम् एतद् धि यस्मात् ते दत्तं शुद्धेन चेतसा
कृच्छ्र-काले, ततः स्वर्गो विजितः कर्मणा त्वया । २

क्षुधा निर्णुदति प्रज्ञां, धर्म-बुद्धिं व्यपोहति ।
क्षुधा-परिगत-ज्ञानो धृतिं त्यजति चैव ह । ३

---

२८ । अवेक्षसे—पालयसि । २९ । वञ्चनाम्—विडम्बनाम् । गणयित्वा—मानयित्वा ।

३ । निर्णुदति—नितरां पीडयति । व्यपोहति—अपनयति,

बुभुक्षां जयते यस् तु स स्वर्गं जयते ध्रुवम् ।
यदा दान-रुचिः स्याद् वै तदा धर्मो न सीदति । ४

अनवेक्ष्य सुत-स्नेहं कलत्र-स्नेहम् एव च,
धर्मम् एव गुरुं ज्ञात्वा तृष्णा न गणिता त्वया । ५

द्रव्यागमो नृणां सूक्ष्मः पात्रे दानं ततः परम् ।
कालः परतरो दानाच् श्रद्धा चैव ततः परा । ६

सहस्र-शक्तिश् च शतं शत-शक्तिर् दशापि च
दद्याद् अपश् च यः शक्त्या, सर्वे तुल्य-फलाः स्मृताः । ७

रन्ति-देवो हि नृ-पतिर् अपः प्रादाद् अ-किञ्चनः
शुद्धेन मनसा, विप्र, नाक-पृष्ठं ततो गतः । ८

न धर्मः प्रीयते, तात, दानैर् दत्तैर् महा-फलैः,
न्याय-लब्धैर् यथा सूक्ष्मैः श्रद्धा-पूतैः स तुष्यति । ९

गो-प्रदान-सहस्राणि द्विजेभ्यो ऽदाद् नृगो नृपः ।
एकां दत्त्वा स पारक्यां नरकं समपद्यत । १०

न राज-सूयैर् बहुभिर् इष्ट्वा विपुल-दक्षिणैः
न चाश्व-मेधैर् बहुभिः फलं सम इदं तव । ११

सक्तु-प्रस्थेन विजितो ब्रह्म-लोकस् त्वयाक्षयः ।
वि-रजो ब्रह्म-सदनं गच्छ, विप्र, यथा-सुखम् । १२

अपसारयति । धृतिम्—धारणाम्, परस्पर-विरुद्ध-वृत्तीनां स्वे स्वे ऽधिकारे धारणम् । ५ । अनवेक्ष्य—अ-पालयित्वा, अननुसृत्य । तृष्णा—भोगेच्छा । ८ । महा-राजो रन्ति-देवो वशिष्ठाय शीतोष्णं सलिलम् अर्घ्यत्वेन दत्त्वा

सर्वेषां वो, द्विज-श्रेष्ठ, दिव्यं यानम् उपस्थितम्।
आरोहत यथा-कामं। धर्मो ऽस्मि। द्विज, पश्य माम्!' १३

इत्युक्त-वाक्ये धर्मे तु यानम् आरुह्य, स द्विजः
स-दारः स-सुतश् चैव स-स्नुषश् च दिवं गतः। १४

तस्मिन् विप्रे गते स्वर्गं स-सुते स-स्नुषे तदा
भार्या-चतुर्थे धर्म-ज्ञे, ततो ऽहं निःसृतो बिलात्। १५

ततस् तु सक्तु-गन्धेन क्लेदेन सलिलस्य च
दिव्य-पुष्प-विमर्दाच् च साधोर् दान-लवैश् च तैः
शरीरार्धं च मे, विप्राः, शातकुम्भमयं कृतम्। १६

कथम् एवं-विधं स्याद् वै पार्श्वम् अन्यद् इति, द्विजाः,
तपो-वनानि यज्ञांश् च हृष्टो ऽभ्येमि पुनः पुनः। १७

यज्ञं त्वहम् इमं श्रुत्वा कुरु-राजस्य धीमतः
आशया परया प्राप्तो, न चाहं काञ्चनी-कृतः। १८

ततो मयोक्तं तद् वाक्यं प्रहस्य, ब्राह्मणर्षभाः,
सक्तु-प्रस्थेन यज्ञो ऽयं सम्मितो नेति, सर्वथा। १९

वैशम्पायन उवाच,—

इत्युक्त्वा नकुलः सर्वान् यज्ञे द्विज-वरांस् तदा
जगामादर्शनं तेषां। विप्रास् ते च ययुर् गृहान्। २०

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
आश्वमेधिक-पर्व।

स्वर्गं जगाम। (सभा. १२।११४, १३।१३०)। नाकः—स्वर्गः। १०।
Cf. उपरिष्टात् १३।३।२२ टी.। पारक्याम्—परकीयाम्।

इति तारकालोके नाम भारत-वृत्तौ
आश्वमेधिक-पर्व।

अथ

श्रीभारते

आश्रमवासिक-पर्व

प्रथमो ऽध्यायः

निर्वेदः

वैशम्पायन उवाच,—

धृत-राष्ट्रम् उपातिष्ठद् विदुरः सञ्जयस् तथा
वैश्या-पुत्रश् च मेधावी युयुत्सुः, कुरु-सत्तम । १

पाण्डवाः सर्व-कार्येषु पर्यपृच्छन्त तं नृपम्,
चक्रुस् तेनाभ्यनुज्ञाता वर्षाणि दश पञ्च च । २

सदाभिगम्य ते वीराः पर्युपासन्त तं नृपम्
पादाभिवादनं कृत्वा धर्म-राज-मते स्थिताः । ३

शयनानि महार्हाणि वासांस्याभरणानि च
राजार्हाणि च सर्वाणि भक्ष्य-भोज्यान्यनेकशः ४

---

१ । उपातिष्ठत्—उपातिष्ठत, असेवत । पआ. । २ । पर्यपृच्छन्त —पर्यपृच्छन् । आआ. । ३ । पर्युपासन्त—पर्युपासत, परिवृत्य उपाविशन् । आप्र. ।

युधिष्ठिरो, महा-राज, धृत-राष्ट्रे ऽभ्युपाहरत्।
तथैव कुन्ती गान्धार्यां गुरु-वृत्तिम् अवर्तत। ५

द्रौपदी च सुभद्रा च, याश् चान्याः पाण्डव-स्त्रियः,
समां वृत्तिम् अवर्तन्त तयोः श्वश्र्वोर् यथा-विधि। ६

व्यासश् च भगवान् नित्यम् आसाञ्चक्रे नृपेण ह,
कथाः कुर्वन् पुराणर्षिर् देवर्षि-पितृ-रक्षसाम्। ७

धर्म-युक्तानि कार्याणि व्यवहारान्वितानि च
—धृतराष्ट्राभ्यनुज्ञातो विदुरस् तान्यकारयत्। ८

अकरोद् बन्ध-मोक्षं च वध्यानां मोक्षणं तथा,
न च धर्म-सुतो राजा कदाचित् किञ्चिद् अब्रवीत। ९

ये चापि पृथिवी-पालाः समाजग्मुस् ततस् ततः,
उपातिष्ठन्त ते सर्वे कौरवेन्द्रं यथा पुरा। १०

यथा पुत्र-वियुक्तो ऽयं न किञ्चिद् दुःखम् आप्नुयात्
इति तान् अन्वशाद् भ्रातॄन् नित्यम् एव युधिष्ठिरः। ११

एवं ते धर्म-राजस्य श्रुत्वा वचनम् अर्थवत्
स-विशेषम् अवर्तन्त भीमम् एकं तदा विना। १२

न हि तत् तस्य वीरस्य हृदयाद् अपसर्पति
धृत-राष्ट्रस्य दुर्बुद्ध्या यद् वृत्तं द्यूत-मण्डले। १३

७। आसाञ्चक्रे—उपविवेश। १०। उपातिष्ठन्त—असेवन्त।
११। अन्वशात् [अनु-शास् + द्]—उपदिदेश।

परि-वृत्तेषु चाहःसु पुत्राणां श्राद्ध-कर्मणि
ददौ च राजा वित्तानि यावद् अस्य चिकीर्षितम्। १४

सौबलेयी च गान्धारी पुत्र-शोकम् अपास्य तम्
सदैव प्रीतिमत्यासीत् तनयेषु निजेष्विव। १५

न तां प्रीतिं पराम् आप पुत्रेभ्यः स कुरूद्वहः
यां प्रीतिं पाण्डु-पुत्रेभ्यः सदावाप नराधिपः। १६

न राज्ञो धृत-राष्ट्रस्य न च दुर्योधनस्य वै
उवाच दुष्कृतं कश्चिद् युधिष्ठिर-भयाद् नरः। १७
अन्ववर्तत भीमो ऽपि निश्चितो धर्मजं नृपम्।
धृत-राष्ट्रं च संप्रेक्ष्य सदा भवति दुर्मनाः। १८

यदा तु कौरवो राजा पुत्रं सस्मार बालिशम्,
तदा भीमं हृदा, राजन्, अपध्याति स पार्थिवः। १९
अप्रकाशं व्यलीकानि चकारास्य वृकोदरः,
आज्ञां प्रत्याहरच् चापि कृतकैः पुरुषैः सदा। २०

अथ भीमः सुहृद्-मध्ये बाहु-शब्दं तथाकरोत्
संश्रवे धृत-राष्ट्रस्य गान्धार्याश्च चाप्यमर्षणः। २१

१४। परिवृत्तेषु—गच्छति काले पुनर् आगतेषु। अहःसु—[मृत्यु-] दिनेषु। १५। अपास्य—परित्यज्य। प्रीतिमती—पाण्डवेषु इति शेषः। १८। निश्चितः—कृत-सिद्धान्तः। १९। हृदा अपध्याति (अपध्यायति)—मनसा शपति। २०। व्यलीकानि—अप्रियाणि। प्रत्याहरत्—न्यवर्तयत। कृतकैः—कृत्रिमैः।

स्मृत्वा दुर्योधनं शत्रुं कर्ण-दुःशासनाव् अपि,
प्रोवाचेदं सु-संरब्धो भीमः स- परुषं वचः,— २२

"अन्धस्य नृ-पतेः पुत्रा मया परिघ-बाहुना
नीता लोकम् अमुं सर्वे नाना-शस्त्रास्त्र-योधिनः ।" २३

सा च बुद्धिमती देवी काल-पर्याय-वेदिनी
गान्धारी सर्व-धर्म-ज्ञा तान्यलीकानि शुश्रुवे । २४

ततः पञ्चदशे वर्षे समतीते नराधिपः
राजा निर्वेदम् आपेदे भीम-वाग्-बाण-पीडितः । २५

नान्वबुध्यत तद् राजा कुन्ती-पुत्रो युधिष्ठिरः
श्वेताश्वो वाथ कुन्ती वा द्रौपदी वा यशस्विनी । २६

माद्री-पुत्रौ च भीमस्य मतं ताव् अन्ववर्तताम्,
राज्ञस् तु चित्तं रक्षन्तौ नोचतुः स्वयम् अ-प्रियम् । २७

ततः समानयामास धृत-राष्ट्रः सुहृज्-जनम्,
वाष्प-संदिग्धम् अत्यर्थम् इदम् आह च तान् भृशम्,— २८

"विदितं भवताम् एतद् यथा वृत्तः कुरु-क्षयः ।
ममापराधात् तत् सर्वम् इति ज्ञेयं तु, कौरवाः । २९

विशेषतस् तु दद्मासि वर्षे पञ्च-दशे । ऽद्य वै
अस्य पापस्य शुद्ध्यर्थं नियतो ऽस्मि, सु-दुर्मतिः । ३०

भूमौ शये जप्य-परो दर्भेष्वजिन-संवृतः
नियम-व्यपदेशेन, गान्धारी च यशस्विनी ।" ३१

३० । दद्मामि—दह्ये । पआ. । नियतः—दृढः, कृत-निश्चयः ।

इत्युक्त्वा, धर्म-राजानम् अभ्यभाषत कौरवः,—
"अनुज्ञातस् त्वया, वीर, संश्रयेयं वनान्यहम्
चीर-वल्कल-भृद्, राजन्, गान्धार्या सहितो ऽनया। ३२

उचितं नः कुले, तात, सर्वेषां, भरतर्षभ,
पुत्रेष्वैश्वर्यम् आधाय वयसो ऽन्ते वनं, नृप।" ३३

युधिष्ठिर उवाच,—

अहं वनं गमिष्यामि। भवान् राज्यं प्रशासतु।
न माम् अ-यशसा दग्धं भूयस् त्वं दग्धुम् अर्हसि। ३४

वयं पुत्रा हि भवतो यथा दुर्योधनादयः।
गान्धारी चैव कुन्ती च निर्विशेषे, मतिर् मम। ३५

इयं हि वसु-सम्पूर्णा मही सागर-मेखला
भवता विप्रहीणस्य न मे प्रीतिकरी भवेत्। ३६

भवदीयम् इदं सर्वं। शिरसा त्वां प्रसादये!
त्वदधीनाः स्म, राजेन्द्र। व्येतु ते मानसो ज्वरः! ३७

धृतराष्ट्र उवाच,—

चिरम् अध्युषितः, पुत्र, चिरं शुश्रूषितस् त्वया।
वृद्धं माम् अप्यनुज्ञातुम् अर्हसि त्वं, नराधिप। ३८

३४। प्रशासतु—प्रशास्तु। भ्वाआ.। ३८। अध्युषितः—[गृहे]
कृत-वासः।

वैशम्पायन उवाच,—

इत्युक्त्वा धर्म-राजानं, वेपमानः कृताञ्जलिः
उवाच विदुरं राजा धृत-राष्ट्रो ऽम्बिका-सुतः, ३९
सञ्जयं च महात्मानं कृपं चापि महा-रथम्,—
"अनुनेतुम् इहेच्छामि भवद्भिर् वसुधाधिपम्। ४०
ग्लायते मे मनो हीदं मुखं च परिशुष्यति
वयसा च प्रकृष्टेन वाग्-व्यायामेन चैव ह।" ४१
इत्युक्त्वा स तु धर्मात्मा वृद्धो राजा कुरूद्वहः
गान्धारीं शिश्रिये धीमान् सहसैव गतासुवत्। ४२
तं तु दृष्ट्वा समासीनं वि-संज्ञम् इव कौरवम्,
आर्तिं राजागमत् तीव्रां कौन्तेयः पर-वीर-हा। ४३
ततो ऽस्य पाणिना, राजंस्, जल-शीतेन पाण्डवः
उरो मुखं च शनकैः पर्यमार्जत धर्म-वित्। ४४
तेन रत्नौषधीमता पुण्येन च सु-गन्धिना
पाणि-स्पर्शेन राज्ञः स राजा संज्ञाम् अवाप ह। ४५
बाहुभ्यां सं-परिष्वज्य मूर्ध्न्यजिघ्रत पाण्डवम्।
विदुरादयस् ते सर्वे रुरुदुर् दुःखिता भृशम्। ४६
गान्धारी त्वेव धर्म-ज्ञा मनसोद्वहती भृशम्
दुःखान्यधारयद्, राजन्, मैवम् इत्येव चाब्रवीत्। ४७
इतरास् तु स्त्रियः सर्वाः, कुन्त्या सह, सु-दुःखिताः,
नेत्रैर् आगत-विक्लेदैः, परिवार्य स्थिताभवन्। ४८

अथाब्रवीत् पुनर् वाक्यं धृत-राष्ट्रो युधिष्ठिरम्,—
"अनुजानीहि मां, राजंस्, तापस्ये, भरतर्षभ।" ४९

इति ब्रुवति राजेन्द्रे धृत-राष्ट्रे युधिष्ठिरम्,
ऋषिः सत्यवती-पुत्रो व्यासो ऽभ्येत्य वचो ऽब्रवीत्,— ५०

"युधिष्ठिर, महा-बाहो, यथाह कुरु-नन्दनः
धृत-राष्ट्रो महा-तेजास् तत् कुरुष्वाविचारयन्। ५१

अयं हि वृद्धो नृपतिर्, हत-पुत्रो विशेषतः,
नेदं कृच्छ्रं चिरतरं सहेद् इति मतिर् मम। ५२

गान्धारी च महा-भागा प्राज्ञा करुण-वेदिनी
पुत्र-शोकं, महा राज, धैर्येणोद्वहते भृशम्। ५३

अनुज्ञां लभतां राजा, मा वृथेह मरिष्यति।
राजर्षीणां पुराणानाम् अनुयातु गतिं नृपः। ५४

एष एव परो धर्मो राजर्षीणां, युधिष्ठिर,
समरे वा भवेद् मृत्युर् वने वा विधि-पूर्वकम्। ५५

पित्रा तु तव, राजेन्द्र, पाण्डुना पृथिवी-क्षिता
शिष्य-वृत्तेन राजायं गुरुवत् पर्युपासितः। ५६

त्वया चायं, नर-व्याघ्र, गुरु-शुश्रूषयानघ
आराधितः स-भृत्येन गान्धारी च यशस्विनी। ५७

५३। करुण-वेदिनी [करुण (करुणा) + विद् (अनुभवे) + इन् (शीलार्थे) + ई]—करुण-स्वभावा। ५६। पर्युपासितः—सेवितः। ५७। आराधितः—तोषितः।

अनुजानीहि पितरं। समयो ऽस्य तपो-विधौ।
न मन्युर् विद्यते चास्य सु-सूक्ष्मो ऽपि, युधिष्ठिर।" ५८

एतावद् उक्त्वा वचनम्, अनुमान्य च पार्थिवम्,
तथास्त्विति च तेनोक्तः कौन्तेयेन, ययौ वनम्। ५९

गते भगवति व्यासे राजा पाण्डु-सुतस् तदा
प्रोवाच पितरं वृद्धं मन्दं मन्दम् इवानतः,— ६०

"यद् आह भगवान् व्यासो, यच् चापि भवतो मतम्,
यथाह च महेष्वासः कृपो विदुर एव च, ६१

युयुत्सुः सञ्जयश् चैव तत् कर्तास्म्यहम् अञ्जसा।
सर्व एव हि मान्या मे कुलस्यास्य हितैषिणः। ६२

इदं तु याचे, नृ-पते, त्वाम् अहं शिरसा नतः,
क्रियतां तावद् आहारस् ततो गच्छाश्रमं प्रति।" ६३

द्वितीयो ऽध्यायः

प्रव्रज्या

ततो राज्ञाभ्यनुज्ञातो धृत-राष्ट्रः प्रतापवान्
ययौ स्व-भवनं राजा गान्धार्यानुगतस्, तदा १

मन्द-प्राण-गतिर्, धीमान्, कृच्छ्राद् इव समुद्वहन्
पदानि स मही-पालो, जीर्णो गज-पतिर् यथा। २

५९। अनुमान्य—अनुमतये आमन्त्र्य।

तम् अन्वगच्छद् विदुरो विद्वान् , सूतश् च सञ्जयः,
स चापि परमेष्वासः कृपः शारद्वतस् तथा। ३

स, प्रविश्य गृहं, राजा, कृत-पूर्वाह्णिक-क्रियः,
तर्पयित्वा द्विज-श्रेष्ठान्, आहारम् अकरोत् तदा। ४

ततः प्रभाते राजा स धृत-राष्ट्रो ऽम्बिका-सुतः,
आनाय्य, पाण्डवान् वीरान् , वन-वासे कृत-क्षणः, ५
गान्धारी-सहितो धीमान् अभ्यनन्दद् , यथा-विधि
कार्तिक्यां कारयित्वेष्टिं ब्राह्मणैर् वेद-पारगैः। ६

अग्नि-होत्रं पुरस्कृत्य, वल्कलाजिन-संवृतः
वधू-जन-वृतो राजा निर्ययौ भवनात् ततः। ७

ततः प्रासाद-हर्म्येषु वसुधायां च, पार्थिव,
नारीणां च नराणां च निस्वनः सु-महान् अभूत्। ८

स राजा राज-मार्गेण नृ-नारी-सङ्कुलेन च
कथञ्चिद् निर्ययौ धीमान्, वेपमानः कृताञ्जलिः। ९

स वर्धमान-द्वारेण निर्ययौ गज-साह्वयात्।
विसर्जयामास च तं जनौघं स मुहुर् मुहुः। १०

६। अभ्यनन्दत्—संप्रहृष्यत्। कार्तिक्याम्—मुख्य-चान्द्र-कार्तिकस्य पौर्णमास्याम्। इष्टिम्—[गृह-वास-समापकम् उदवासनीयाख्यं] यागम्। ७। अग्नि-होत्रम्—गृह्याग्निम् यथाह मेधातिथिः (मे. ६।४) अग्नय एव अग्नि-होत्र-शब्देनोक्ताः इति। १०। वर्धमान-द्वारेण— अनेनैव पुरा द्यूत-पराजितो युधिष्ठिरः सानुगो वन-वासाय निर्ययौ। Cf.

वनं गन्तुं च विदुरो राज्ञा सह कृत-क्षणः,
सञ्जयश् च महा-मात्रः सूतो गावल्गणिस् तथा। ११
कृपं निवर्तयामास युयुत्सुं च महा-रथम्
धृत-राष्ट्रो मही-पालः परिदाप्य युधिष्ठिरे। १२
निवृत्ते पौर-वर्गे च राजा सान्तः-पुरस् तदा
धृतराष्ट्राभ्यनुज्ञातो निवर्तितुम् इयेष ह। १३
सो ऽब्रवीद् मातरं कुन्तीं वने तम् अनुजग्मुषीम्,—
"अहं राजानम् अन्विष्ये, भवती विनिवर्तताम्। १४
वधू-परिवृता, राज्ञि, नगरं गन्तुम् अर्हसि।
राजा यात्वेष धर्मात्मा तपसे कृत-निश्चयः।" १५
जगामैवाश्रु-पूर्णाक्षी। भीमस् ताम् इदम् अब्रवीत् ,—
"यदा राज्यम् इदं, कुन्ति, भोक्तव्यं पुत्र-निर्जितम्
प्राप्तव्या राज-धर्माश् च, तदेयं ते कुतो मतिः? १६
प्रसीद, मातर् , मा गास् त्वं वनम् अद्य, यशस्विनि।
श्रियं यौधिष्ठिरीं, मातर्, भुङ्क्ष्व पार्थ-बलार्जिताम्।" १७
जगामैव महा-प्राज्ञा वनाय कृत-निश्चया।
अन्वयुः पाण्डवास् तां तु स-भृत्यान्तः-पुरास् तथा। १८

उपरिष्टात् ३।१।२। ११। गावल्गणिः—गवल्गण-पुत्रः। १२। परिदाप्य [परि-दा+इ+य]—[तयोः] समर्पणां कारयित्वा। १४। अन्विष्ये—अन्विष्यामि, अनुगमिष्यामि। आआ.। १६। कुन्ति—जहो मातापि नाम्ना सम्बोध्यते! १७। मा गाः [इ+स्]—मा याहि।

ततः प्रमृज्य साश्रूणि पुत्रान् वचनम् अब्रवीत्,—
"द्यूतापहृत-राज्यानां, पतितानां सुखाद् अपि,
ज्ञातिभिः परिभूतानां कृतम् उद्धर्षणं मया। १९

कथं पाण्डोर् न नश्येत सन्ततिः, पुरुषर्षभाः,
यशश् च वो न नश्येत इति चोद्धर्षणम् कृतम्। २०

इयं च बृहती श्यामा तथात्यायत-लोचना
वृथा सभा-तले क्लिष्टा मा भूद् इति च तत् कृतम्। २१

प्रेक्षताम् एव वो, भीम, वेपन्तीं कदलीम् इव
स्त्री-धर्मिणीम् अरिष्टाङ्गीं तथा द्यूत-पराजिताम् २२

दुःशासनो यदा मौर्ख्याद् दासीवत् पर्यकर्षत,
तदैव विदितं मह्यं परा-भूतम् इदं कुलम्। २३

युष्मत्-तेजो-विवृद्ध्यर्थं मया ह्युद्धर्षणं कृतम्
तदानीं विदुला-वाक्यैर् इति तद् वित्त, पुत्रकाः। २४

कथं न राज-वंशो ऽयं नश्येत् प्राप्य सुतान् मम
पाण्डोर् इति, मया, पुत्रास्, तस्माद् उद्धर्षणं कृतम्। २५

१९। उद्धर्षणम्—उत्तेजनम्, उद्दीपनम्, उज्जीवनम्। २०। नश्येत—नश्येत्। आआ.। २१। बृहती—महती। २२। प्रेक्षताम्—प्रेक्षमाणानाम्। पआ.। अनादरे षष्ठी। वेपन्तीम्—वेपमानाम्, कम्पमानाम्। पआ.। स्त्री-धर्मिणीम्—ऋतुमतीम्। अरिष्टाङ्गीम्—परिपूर्णाङ्गीम्। २३। पर्यकर्षत—पर्यकर्षत्। आआ.। पराभूतम्—तिरस्कृतम्, विनाशितम्। २४। वित्त—जानीत।

भुक्तं राज्य-फलं, पुत्रा, भर्तुर् मे विपुलं पुरा।
महा-दानानि दत्तानि, पीतः सोमो यथा-विधि। २६

नाहम् आत्म-फलार्थं वै वासुदेवम् अचूचुदम्
विदुलायाः प्रलापैस् तैः। पालनार्थं च तत् कृतम्। २७

नाहं राज्य-फलं, पुत्राः, कामये पुत्र-निर्जितम्।
पति-लोकान् अहं पुण्यान् कामये तपसा, विभो। २८

श्वश्रू-श्वशुरयोः कृत्वा शुश्रूषां वन-वासिनोः
तपसा शोषयिष्यामि, युधिष्ठिर, कलेवरम्। २९

निवर्तस्व, कुरु-श्रेष्ठ, भीम-सेनादिभिः सह।
धर्मे ते धीयतां बुद्धिर् मनस् ते महद् अस्तु च।" ३०

कुन्त्यास् तु वचनं श्रुत्वा, पाण्डवा, राज-सत्तम,
व्रीड़िताः संन्यवर्तन्त पाञ्चाल्या सह, भारत। ३१

प्रदक्षिणम् अथावृत्य राजानं, पाण्डवास् तदा
अभिवाद्य न्यवर्तन्त पृथां, ताम् अ-निवर्त्य वै। ३२

धृत-राष्ट्रस् तु तेनाह्ना गत्वा सु-महद् अन्तरम्,
ततो भागीरथी-तीरे निवासम् अकरोत् प्रभुः। ३३

स राजाग्नीन पर्युपास्य हुत्वा च विधिवत् तदा
सन्ध्या-गतं सहस्रांशुम् उपातिष्ठत, भारत। ३४

२९। श्वश्रू-श्वशुरयोः—गान्धारी-धृतराष्ट्रयोः। Cf मसं. ६।१०८, ११०, ५७, २९। गुरुः—पिता। ३०। धीयताम्—स्थाप्यताम्। ३३। अन्तरम्—[हास्तिन-भागीरथ्योर्] व्यवधानम्। ३४। पर्युपास्य—पूजयित्वा। सहस्रांशुम्—सूर्यम्। उपातिष्ठत—उपासाञ्चक्रे।

विदुरः सञ्जयश् चैव राज्ञः शय्यां कुशैस् ततः
चक्रतुः कुरु-वीरस्य गान्धार्याश् चाविदूरतः । ३५

गान्धार्याः सन्निकर्षे तु निषसाद कुशे सुखम्
युधिष्ठिरस्य जननी कुन्ती साधु-व्रते स्थिता । ३६

तेषां सं-श्रवणे चापि निषेदुर् विदुरादयः,
याजकाश् च यथोद्देशं द्विजा ये चानुयायिनः । ३७

प्राधीत-द्विज-मुख्या सा सं-प्रज्वलित-पावका
बभूव तेषां रजनी ब्राह्मीव प्रीति-वर्धिनी । ३८

ततो रात्र्यां व्यतीतायां कृत-पूर्वाह्णिक-क्रियाः
हुत्वाग्निं विधिवत् सर्वे प्रययुस् ते यथा-क्रमम्
उदङ्-मुखा निरीक्षन्त उपवास-परायणाः । ३९

स तेषाम् अति-दुःखो ऽभूद् निवासः प्रथमे ऽहनि
शोचतां, शोच्यमानानां पौर-जानपदैर् जनैः । ४०

सायाह्ने स मही-पालस् ततो गङ्गाम् उपेत्य च,
चकार विधिवच् छौचं गान्धारी च यशस्विनी । ४१

ते चैवान्ये पृथक् सर्वे तीर्थेष्वाप्लुत्य, भारत,
चक्रुः सर्वाः क्रियास् तत्र पुरुषा विदुरादयः । ४२

---

३८ । प्राधीत-द्विज-मुख्याः—प्राधीताः (वेदाध्ययन-निरताः) द्विज-मुख्याः (ब्राह्मण-प्रवराः) यस्यां सा तादृशी । ब्राह्मी—वेदमयी ।
३९ । निरीक्षन्तः—निरीक्षमाणाः, दृष्टि-गोचरं सर्वं स-विशेषं पश्यन्तः ।
४२ । आप्लुत्य—स्नात्वा ।

कृत-शौचं ततो वृद्धं श्वशुरं कुन्ति-भोज-जा,
गान्धारीं च पृथा, राजन्, गङ्गा-तीरम् उपानयत् । ४३

राज्ञस् तु याजकैस् तत्र कृतो वेदी-परिस्तरः ।
जुहाव तत्र वह्निं स नृपतिः सत्य-सङ्गरः । ४४

ततो भागीरथी-तीरात् कुरु-क्षेत्रं जगाम सः
सानुगो नृपतिर् वृद्धो नियतः संयतेन्द्रियः । ४५

तत्राश्रम-पदं धीमान् अभिगम्य, स पार्थिवः
आससादाथ राजर्षिं शत-यूपं मनीषिणम् । ४६

स हि राजा महान् आसीत् केकयेषु । परन्तपः
स्व-पुत्रं मनुजैश्वर्यो निवेश्य वनम् आविशत् । ४७

तेनासौ सहितो राजा ययौ व्यासाश्रमं प्रति ।
तत्रैनं विधिवद् राजा प्रत्यगृह्णात् कुरूद्वहम् । ४८

स, दीक्षां तत्र संप्राप्य, राजा कौरव-नन्दनः
शत-यूपाश्रमे तस्मिन् निवासम् अकरोत् तदा । ४९

तस्मै सर्वं विधिं राज्ञे राजाचख्यौ महा-मतिः
आरण्यकं, महा-राज, व्यासस्यानुमते तदा । ५०

एवं स तपसा, राजन्, धृत-राष्ट्रो महा-मनाः
योजयामास चात्मानं तांश् चाप्यनुचरांस् तदा । ५१

४४ । वेदी-परिस्तरः—भूमेर् वेदी-भूतस्य आवरणम् ।

तथैव देवी गान्धारी वल्कलाजिन-धारिणी
कुन्त्या सह, महा-राज, समान-व्रत-चारिणी। ५२

कर्मणा मनसा वाचा चक्षुषा चैव ते, नृप,
सं-नियम्येन्द्रिय-ग्रामम् आस्थिताः परमं तपः। ५३

त्वग्-अस्थि-भूतः परिशुष्क-मांसो
जटाजिनी वल्कल-संवृताङ्गः
स पार्थिवस् तत्र तपश् चकार,
महर्षिवत्, तीव्रम्, अपेत-मोहः। ५४

क्षत्ता च धर्मार्थ-विद् अग्र्य-बुद्धिः
स-सञ्जयस् तं नृ-पतिं स-दारम्
उपाचरद्, घोर-तपो-जितात्मा
तदा, कृशो वल्कल-चीर-वासाः। ५५

तृतीयो ऽध्यायः

स्व-जन-दिदृक्षा

वनं गते कौरवेन्द्रे दुःख-शोक-समन्विताः
बभूवुः पाण्डवा, राजन्, मातृ-शोकेन चान्विताः। १

ते राज-कार्याणि तदा नाकार्षुः सर्वतः पुरे,
गमने चाभवद् बुद्धिर् धृतराष्ट्र-दिदृक्षया। २

५५। उपाचरत्—असेवत।

आज्ञापयामास ततः सेनां भरत-सत्तमः ।
सेनाम् आदाय सेनानीः प्रययाव् आश्रमं प्रति । ३
ततो द्विजैः परिवृतः कुरु-राजो युधिष्ठिरः
रथानीकेन महता निर्जगाम, कुरूद्वहः । ४
गजैश् चाचल-सङ्काशैर् भीम-कर्मा वृकोदरः
सज्ज-यन्त्रायुधोपेतैः प्रययौ, पवनात्मजः । ५
माद्री-पुत्राव् अपि तथा हयारोहौ सु-संवृतौ
जग्मतुः शीघ्र-गमनौ सन्नद्ध-कवच-ध्वजौ । ६
अर्जुनश् च महा-तेजा रथेनादित्य-वर्चसा
वशी श्वेतैर् हयैर् युक्तैर् दिव्येनान्वगमद् नृपम् । ७
द्रौपदी-प्रमुखाश् चापि स्त्री-सङ्घाः शिविका-गताः
स्त्र्यध्यक्ष-गुप्ताः प्रययुर् विसृजन्तो ऽमितं वसु । ८
युयुत्सुश् च महा-तेजा धौम्यश् चैव पुरो-हितः
युधिष्ठिरस्य वचनात् पुर-गुप्तिं प्रचक्रतुः । ९
ततस् ते पाण्डवा, दूराद् अवतीर्य, पदातयः
अभिजग्मुर् नर-पतेर् आश्रमं, विनयानताः । १०
स च योध-जनः सर्वो, ये च राष्ट्र-निवासिनः,
स्त्रियश् च कुरु-मुख्यानां पद्भिर् एवान्वयुस् तदा । ११
आश्रमं ते ततो जग्मुर् धृत-राष्ट्रस्य पाण्डवाः,
शून्यं मृग-गणाकीर्णं कदली-वन-शोभितम् । १२

३ । सेनानीः—कृपः ।

ततस् तत्र समाजग्मुस् तापसा नियत-व्रताः
पाण्डवान् आगतान् द्रष्टुं, कौतूहल-समन्विताः । १३

तान् अपृच्छत् ततो राजा,—"क्वासौ-कौरव-वंश-भृत् ?"
ते तम् ऊचुस् ततो वाक्यं, 'यमुनाम् अवगाहितुम्
पुष्पाणाम् उद-कुम्भस्य चार्थे गत' इति, प्रभो । १४

ततस् ते सत्वरा जग्मुर्, पितुर् दर्शन-काङ्क्षिणः ।
सह-देवस् तु प्राधावद् वेगेन यत्र सा पृथा । १५

राजा तान् स्वर-योगेन स्पर्शेन च, महा-मनाः,
प्रत्यभिज्ञाय, मेधावी समाश्वासयत प्रभुः । १६

ततस् ते वाष्पम् उत्सृज्य गान्धारी-सहितं नृपम्
उपतस्थुर्, महात्मानो, मातरं च यथा-विधि ।
सर्वेषां तोय-कलशान् जगृहुस् ते स्वयं तदा । १७

युधिष्ठिर उवाच,—

क्व चासौ विदुरो, राजन् ? नेमं पश्यामहे वयम् ।
सञ्जयः कुशली चायं कच्चिद् नु, तपसि स्थिरः । १८

वैशम्पायन उवाच,—

इत्युक्तः प्रत्युवाचैनं धृत-राष्ट्रो जनाधिपम्,—
"कुशली विदुरः, पुत्र, तपो घोरं समाश्रितः, १९

वायु-भक्षो निराहारः कृशो धमनि-सन्ततः
कदाचिद् दृश्यते विप्रैः शून्ये ऽस्मिन् कानने क्वचित् ।" २०

२० । धमनि-सन्ततः—अनाहार-ज-क्षयेण नाड़ी-जालमयः ।

इत्येवं ब्रुवतस् तस्य जटी वीटा-मुखः कृशः
दिग्-वासा मल-दिग्धाङ्गो वन-रेणु-समुक्षितः
दूराद् आलक्षितः क्षत्ता तत्राख्यातो मही-पतेः। २१
निवर्तमानं सहसा जनं दृष्ट्वाश्रमं प्रति,
तम् अन्वधावद् नृपतिर् एक एव युधिष्ठिरः,
प्रविशन्तं वनं घोरं, लक्ष्यालक्ष्यं क्वचित् क्वचित्। २२
'भो भो विदुर, राजाहं दयितस् ते युधिष्ठिरः!'
इति ब्रुवन् नर-पतिस् तं यत्नाद् अभ्यधावत। २३
ततो विविक्त एकान्ते तस्थौ बुद्धिमतां वरः
विदुरो, वृक्षम् आश्रित्य कञ्चित्, तत्र वनान्तरे। २४
तं राजा क्षीण-भूयिष्ठम् आकृतीमात्र-सूचितम्
अभिजज्ञे महा-बुद्धिं महा-बुद्धिर् युधिष्ठिरः। २५
युधिष्ठिरो ऽहम् अस्मीति वाक्यम् उक्त्वाग्रतः स्थितः
विदुरस्याश्रमे राजा। स च प्रत्याह संज्ञया। २६
ततः सो ऽ-निमिषो भूत्वा राजानं तम् उदैक्षत,
संयोज्य विदुरस् तस्मिन् दृष्टिं दृष्ट्या, समाहितः।
स योग-बलम् आस्थाय विवेश नृपतेस् तनुम्। २७

२१। वीटा—पाषाण-कवलः। दिग्-वासाः—दिगम्बरः, वि-वस्त्रः। २२। लक्ष्यालक्ष्यं क्वचित् क्वचित्,—क्वचित् दृष्टि-गोचरं क्वचिद् दृष्टि-बहिर्भूतं च। २६। संज्ञया—संकेतेन, हस्त-भ्रू-लोचनादिभिर् अर्थ-सूचनया।

विदुरस्य शरीरं तु तथैव स्तब्ध-लोचनम्
वृक्षाश्रितं तदा राजा ददर्श गत-चेतनम्। २८

बलवन्तं तथात्मानं मेने बहु-गुणं तदा
धर्म-राजो महा-तेजास्। तच् च सस्मार पाण्डवः २९

पौराणम् आत्मनः सर्वं, विद्यावान् स, विशां पते,
योग-धर्मं, महा-तेजा, व्यासेन कथितं यथा। ३०

धर्म-राजश् च तत्रैनं संचस्कारयिषुस् तदा
दग्धु-कामो ऽभवद् विद्वान्। अथ वाग् अभ्यभाषत,— ३१

"भो भो राजन्, न दग्धव्यम् एतद् विदुर-संज्ञकम्
कलेवरम् इहैवं ते! धर्म एष सनातनः।
यति-धर्मम् अवाप्तो ऽसौ। नैष शोच्यः, परन्तप।" ३२

इत्युक्तो धर्म-राजः स विनिवृत्य ततः पुनः
राज्ञो वैचित्रवीर्यस्य तत् सर्वं प्रत्यवेदयत्। ३३

तच् श्रुत्वा प्रीतिमान् राजा भूत्वा धर्म-जम् अब्रवीत्,—
"आपो मूलं फलं चैव ममेदं प्रतिगृह्यताम्।
यदन्नो हि नरो, राजंस्, तदन्नो ऽस्यातिथिः स्मृतः।" ३४

इत्युक्तः स तथेत्येवं प्राह धर्मात्मजो नृपम्,
फलं मूलं च बुभुजे, राज्ञा दत्तं, सहानुजः। ३५

३०। पौराणम्—अतीत-कालीनम्। ३१ संस्कारयिषुः—संस्कार-
यितुम् इच्छुः।

ततस् ते वृक्ष-मूलेषु कृत-वास-परिग्रहाः
तां रात्रिम् अवसन् सर्वे फल-मूल-जलाशनाः । ३६

चतुर्थो ऽध्यायः

संशय-च्छेदी

व्यतीतायां तु शर्वर्यां, कृत-पौर्वाह्णिक-क्रियः,
भ्रातृभिः सहितो राजा ददर्शाश्रम-मण्डलम् । १

व्यासश् च भगवान् विप्रो देवर्षि-गण-सेवितः,
वृतः शिष्यैर् महा-तेजा दर्शयामास पार्थिवम् । २

वरं तु विष्टरं कौश्यं कृष्णाजिन-कुशोत्तरम्
प्रतिपेदे तदा व्यासस् तदर्थम् उपकल्पितम् । ३

ते च सर्वे द्विज-श्रेष्ठा विष्टरेषु समन्ततः
द्वैपायनाभ्यनुज्ञाता निषेदुर्, विपुलौजसः । ४

ततः समुपविष्टेषु पाण्डवेषु महात्मसु,
व्यासः सत्यवती-सुतः प्रोवाचामन्त्र्य पार्थिवम्,— ५

३। विष्टरः—आसनम् । कौश्यम्—कौशेय-वस्त्र-निर्मितम् । कृष्णाजिनम्—कृष्ण-व्याघ्रादि-चर्म । कृष्णाजिन-कुशोत्तरम्—कृष्णाजिनं कुशाश् च उत्तरे यस्मिन् तादृशम् । पं. १—कुशानाम् उपरि कृष्ण-व्याघ्रादि-चर्म तदुपरि च कौशेयं वस्त्रम् आस्तीर्य निर्मितम् श्रेष्ठम् आसनम् । Cf. गी. ६।११ ।

"धृत-राष्ट्र महा-बाहो, कच्चित् ते वर्तते तपः।
कच्चिद् मनस् ते प्रीणाति वन-वासे, नराधिप। ६
किम् इच्छसि, मही-पाल, मत्तः प्राप्तुम् अभीप्सितम्
द्रष्टुं स्प्रष्टुम् अथ श्रोतुं ? तत् कर्तास्मि तवानघ।" ७
प्रोवाच वदतां श्रेष्ठः पुनर् एव स तद् वचः,
प्रीयमाणो, महा-तेजाः सर्व-वेद-विदां वरः,— ८
"विदितं मम, राजेन्द्र, यत् ते हृदि विवक्षितम्,
दह्यमानस्य शोकेन तव पुत्र-कृतेन वै, ९
गान्धार्याश् चैव यद् दुःखं हृदि तिष्ठति नित्यदा,
कुन्त्याश् च यद्, महा-राज, द्रौपद्याश् च हृदि स्थितम्। १०
यच् च धारयते तीव्रं दुःखं पुत्र-विनाश-जम्
सुभद्रा कृष्ण-भगिनी, तच् चापि विदितं मम। ११
श्रुत्वा समागमम् इमं सर्वेषां वस्ततो, नृप,
संशय-च्छेदनार्थाय प्राप्तः, कौरव-नन्दन।" १२
एवम् उक्तः स राजेन्द्रो व्यासेनामित-बुद्धिना,
मुहूर्तम् इव सञ्चिन्त्य वचनायोपचक्रमे,— १३
"मम पुत्रेण मूढेन पापेनाकृत-बुद्धिना
क्षयं नीतं कुलं दीप्तं पृथिवी-राज्यम् इच्छता। १४

९। विवक्षितम्—वक्तुम् इष्टम्। १२। वस्ततः [वस् + त, (तस्)]—वास-स्थानेभ्यः। संशयः—युद्धे हता वीरा अद्यापि कुत्रचित् सन्ति किं न वेति शङ्का।

५।ब

एतत् सर्वम् अनुस्मृत्य दह्यमानो दिवा-निशम्
न शान्तिम् अधिगच्छामि, दुःख-शोक-समाहतः ।" १५
तच् श्रुत्वा विविधं तस्य राजर्षेः परिदेवितम्
पुनर् नवी-कृतः शोको गान्धार्या, जनमेजय, १६
कुन्त्या द्रुपद-पुत्र्याश् च सुभद्रायास् तथैव च
तासां च वर-नारीणां वधूनां कौरवस्य ह । १७

पुत्र-शोक-समाविष्टा गान्धारी त्विदम् अब्रवीत्
श्वशुरं, बद्ध-नयना देवी, प्राञ्जलिर् उत्थिता,— १८
"षोड़शेमानि वर्षाणि गतानि, मुनि-पुङ्गव,
अस्य राज्ञो हतान् पुत्राञ् छोचतो, न शमो, विभो । १९
पुत्र-शोक-समाविष्टो निश्वसन् ह्येष भूमि-पः
न शेते वसतीः सर्वा धृत-राष्ट्रो, महा-मुने । २०
इयं च द्रौपदी कृष्णा, हत-ज्ञाति-सुता भृशम्,
शोचत्यतीव, सर्वासां स्नुषाणां दयिता स्नुषा । २१
तथा कृष्णस्य भगिनी सुभद्रा भद्र-भाषिणी
सौभद्र-वध-सन्तप्ता भृशं शोचति, भाविनी । २२
श्रीमतो ऽस्य महा-बुद्धेः संग्रामेष्वपलायिनः
पुत्रस्य ते पुत्र-शतं निहतं यद् रणाजिरे, २३

१६ । परिदेवितम्—विलापम् । १९ । शमः—[शोकस्य] शान्तिः ।
२० । न शेते—न स्वपिति । वसतीः—रात्रीः ।

तस्य भार्या-शतम् इदं दुःख-शोक-समाहतम्,
पुनः पुनर् वर्धयानं शोकं राज्ञो—ममैव च,
तेनारम्भेण महता माम् उपास्ते, महा-मुने। २४

ये च शूरा महात्मानः श्वशुरा मे महा-रथाः
सोमदत्त-प्रभृतयः, का नु तेषां गतिः, प्रभो? २५

तव प्रसादाद्, भगवन्, वि-शोको ऽयं मही-पतिः
यथा स्याद् भविता चाहं कुन्ती चेयं वधूस् तव।" २६

इत्युक्तवत्यां गान्धार्यां, कुन्ती व्रत-कृशानना
प्रच्छन्न-जातं पुत्रं तं सस्मारादित्य-सन्निभम्। २७

श्वशुराय ततः कुन्ती, प्रणम्य शिरसा, तदा
उवाच वाक्यं स-व्रीड़ा, विवृण्वाना पुरातनम्,— २८

"गूढ़ोत्पन्नं सुतं बालं जले कर्णम् अवासृजम्।
तद् मां दहति, विप्रर्षे, यथा सु-विदितं तव। २९

यदि पापम् अ-पापं वा यद् एतद् विवृतं मया,
तां द्रष्टुम् इच्छां, भगवन्, व्यपनेतुं त्वम् अर्हसि।" ३०

२४। वर्धयानम्—वर्धयमानम्। आरम्भेण—[शोकस्य] उद्यमेन। उपास्ते—परिवार्य तिष्ठति। २५। श्वशुरा मे—बाह्लिको हि शान्तनोः भ्राता। तत्-पुत्रः सोम-दत्तो विचित्र-वीर्य-भ्रातृत्वात् वैचित्रवीर्यस्य धृतराष्ट्रस्य पत्न्या गान्धार्या श्वशुर एव। प्रभृति-शब्देन भीष्मादयो गृह्यन्ते। २६। यथा स्यात्—'तथा कार्यम्' इति शेषः। भविता—[स्वाभाविक-] जीवनवती। ३०। व्यपनेतुम्—सफलां कृत्वा अपसारयितुम्।

इत्युक्तः प्रत्युवाचेदं व्यासो वेद-विदां वरः,—
"साधु सर्वम् इदं भाव्यम्। एवम् एतद् यथात्थ माम्। ३१
सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति।
तत्र द्रक्ष्यथ तान् सर्वान् ये हतास्मिन् रणाजिरे।" ३२
इति व्यासस्य वचनं श्रुत्वा सर्वो जनस् तदा
महता सिंह-नादेन गङ्गाम् अभिमुखो ययौ। ३३
जगाम तद् अहश् चापि तेषां वर्ष-शतं यथा
निशां प्रतीक्षमाणानां, दिदृक्षूणां मृतान् नृपान्। ३४
अथ पुण्यं गिरि-वरम् अस्तम् अभ्यगमद् रविः।
ततः कृताभिषेकास् ते नैशं कर्म समाचरन्। ३५

पञ्चमोऽध्यायः

प्रेत-समागमः

ततो निशायां प्राप्तायां कृत-सायाह्निक-क्रियाः
व्यासम् अभ्यगमन् सर्वे ये तत्रासन् समागताः। १
धृत-राष्ट्रस् तु धर्मात्मा, पाण्डवैः सहितस्, तदा
शुचिर् एक-मनाः, सार्धम् ऋषिभिस् तैर्, उपाविशत्। २

३१। भाव्यम्—चिन्तनीयम्। ३५। अस्तः—पश्चिमाचलः। नैशं कर्म—सन्ध्योपासनादिकम्।

गान्धार्या सह नार्यस् तु रहिताः समुपाविशन् ।
पौरो जानपदश् चापि जनः सर्वो यथा-वयः । ३

ततो व्यासो महा-तेजाः पुण्यं भागीरथी-जलम्
अवतीर्याजुहावाथ सर्वाँल् लोकान्, महा-मुनिः । ४

ततः सु-तुमुलः शब्दो जलान्ते, जनमेजय,
प्रादुरासीद्, यथा-पूर्वं, कुरु-पाण्डव-सेनयोः । ५

ततस् ते पार्थिवाः सर्वे भीष्म-द्रोण-पुरोगमाः
स-सैन्याः सलिलात् तस्मात समुत्तस्थुः सहस्रशः । ६

विराट-द्रुपदौ चैव सह-पुत्रौ स-सैनिकौ
द्रौपदेयाश् च सौभद्रो राक्षसश् च घटोत्कचः ७

कर्ण-दुर्योधनौ चैव शकुनिश् च महा-रथः
दुःशासनादयश् चैव धार्तराष्ट्रा महा-बलाः ८

लक्ष्मणो राज-पुत्रश् च धृष्ट-द्युम्नः सहात्मजः,
बाह्लिकः सोम-दत्तश् च चेकितानश् च पार्थिवः, ९

एते चान्ये च बहवो बहुत्वाद् ये न कीर्तिताः
सर्वे भासुर-देहास् ते समुत्तस्थुर् जलात् ततः । १०

यस्य वीरस्य यो वेशो यो ध्वजो यच् च वाहनम्,
तेन तेन व्यदृश्यन्त समुपेता नराधिपाः, ११

---

३ । रहिताः...—[पुरुषैर्] वर्जिताः..., पुरुष-वर्जिते स्थाने... । 'सहिताः' इति पाठान्तरम् । ४ । आजुहाव—आह्वयत् । ९ । चेकितानः—केकय-राज-पुत्रः । १० । भासुर-देहाः—ज्योतिर्मय-शरीराः ।

दिव्याम्बर-धराः सर्वे सर्वे भ्राजिष्णु-कुण्डलाः,
निर्वैरा, निरहङ्कारा विगत-क्रोध-मत्सराः, १२

गन्धर्वैर् उपगीयन्तः स्तूयमानाश् च वन्दिभिः,
दिव्य-माल्य-स्रजोपेता वृताश् चाप्सरसां गणैः । १३

धृत-राष्ट्रस्य च तदा दिव्यं चक्षुर्, नराधिप,
मुनिः सत्यवती-पुत्रः प्रीतः प्रादात् तपो-बलात् । १४

दिव्य-ज्ञान-बलोपेता गान्धारी च यशस्विनी
ददर्श पुत्रांस् तान् सर्वान् ये चान्ये ऽपि मृधे हताः । १५

तद् अद्भुतम् अचिन्त्यं च सु-महल् लोम-हर्षणम्
विस्मितः स जनः सर्वो ददर्शा-निमिषेक्षणः । १६

ततस् ते पुरुष-श्रेष्ठाः समाजग्मुः परस्परम्,
विगत-क्रोध-मात्सर्याः सर्वे विगत-कल्मषाः । १७

पुत्रः पित्रा च मात्रा च, भार्याश् च पतिभिः सह,
भ्रात्रा भ्राता, सखा चैव सख्या, राजन्, समागताः । १८

पाण्डवाश् च महेष्वासं कर्णं सौभद्रम् एव च
सं-प्रहर्षात् समाजग्मुर् द्रौपदेयांश् च सर्वशः । १९

ततस् ते प्रीयमाणा वै कर्णेन सह पाण्डवाः
समेत्य, पृथिवी-पाल, सौहृद्ये च स्थिताभवन् । २०

---

१२ । भ्राजिष्णु—उज्ज्वलम् । १३ । उपगीयन्तः— उपगीयमानाः । प्रआ. ।

अ-सौहृद्यं परित्यज्य सौहृदे पर्यवस्थिताः,
एवं समागताः सर्वे गुरुभिर् बान्धवैः सह, २१

पुत्रैश् च पुरुष-व्याघ्राः कुरवो, ऽन्ये च पार्थिवाः
तां रात्रिम् अखिलाम् एवं विहृत्य प्रीत-मानसाः, २२

मेनिरे परितोषेण नृपाः स्वर्ग-सदो यथा।
नात्र शोको भयं त्रासो नारतिर् नायशो ऽभवत्। २३

समागतास् ताः पितृभिर् भ्रातृभिः पतिभिः सुतैः,
मुदं परमिकां प्राप्य, नार्यो दुःखम् अथात्यजन्। २४

एकां रात्रिं विहृत्यैवं ते वीरास् ताश् च योषितः
आमन्त्र्यान्योन्यम् आश्लिष्य ततो जग्मुर् यथागतम्। २५

ततो विसर्जयामास लोकांस् तान् मुनि-पुङ्गवः।
क्षणेनान्तर्हिताश् चैव प्रेक्षताम् एव ते ऽभवन्। २६

अवगाह्य महात्मानः पुण्यां भागीरथीं नदीम्,
स-रथाः स-ध्वजाश् चैव स्वानि वेश्मानि भेजिरे। २७

देव-लोकं ययुः केचित्:केचिद् ब्रह्म-सदस् तथा,
केचिच् च वारुणं लोकं केचित् कौवेरम् आप्नुवन्। २८

ततो वैवस्वतं लोकं केचिच् चैवाप्नुवन् नृपाः,
राक्षसानां पिशाचानां केचिच् चाप्युत्तरान् कुरून्। २९

गतेषु तेषु सर्वेषु, सलिल-स्थो महा-मुनिः
ततः प्रोवाच ताः सर्वाः क्षत्रिया निहतेश्वराः,— ३०

"या याः पति-कृताल्ँ लोकान् इच्छन्ति परम-स्त्रियः,
ता जाह्नवी-जलं क्षिप्रम् अवगाहन्त्व-तन्द्रिताः ।" ३१

ततस् तस्य वचः श्रुत्वा, श्रद्धाना वराङ्गनाः,
श्वशुरं समनुज्ञाप्य, विविशुर् जाह्नवी-जलम् । ३२

विमुक्ता मानुषैर् देहैस्, ततस् ता भर्तृभिः सह
समाजग्मुस् तदा साध्व्यः सर्वा एव, विशां पते, ३३

दिव्य-रूप-समायुक्ता दिव्याभरण-भूषिताः
दिव्य-माल्याम्बर-धरा यथासां पतयस् तथा । ३४

यस्य यस्य तु यः कामस् तस्मिन् काले बभूव ह,
तं तं विसृष्टवान् व्यासो वर-दो धर्म-वत्सलः । ३५

तद् दृष्ट्वा महद् आश्चर्यं पुत्राणां दर्शनं, नृप,
वीत-शोकः, स राजर्षिः पुनर् आश्रमम् आगमत् । ३६

इतरस् तु जनः सर्वस् ते चैव परमर्षयः
प्रति-जग्मुर् यथा-कामं धृतराष्ट्राभ्यनुज्ञया । ३७

पाण्डवास् तु महात्मानो लघु-भूयिष्ठ-सैनिकाः
अनुजग्मुर् महात्मानं स-दारास् तं मही-पतिम् । ३८

तम् आश्रम-गतं धीमान् ब्रह्मर्षिर् लोक पूजितः
द्वैपायनो ऽभ्युपागम्य राजानम् इदम् अब्रवीत्,— ३९

---

३१ । अवगाहन्तु—अवगाहन्ताम् । पआ. । ३८ । । लघु-भूयिष्ठ-सैनिकाः—स्वल्पैः प्रधान-योधैः सहिताः ।

"धृत-राष्ट्र, महा-बाहो, शृणु, कौरव-नन्दन,
मा स्म शोके मनः कार्षीर् ! दिष्टे न व्यथते बुधः। ४०
गतास् ते क्षत्र-धर्मेण, शस्त्र-पूता, गतिं शुभाम्,
यथा दृष्टास् त्वया पुत्रास् तथा काम-विहारिणः। ४१
युधिष्ठिरः स्वयं धीमान् भवन्तम् अनुरुध्यते,
सहितो भ्रातृभिः सर्वैः, स-दारः स-सुहृज्जनः। ४२
विसर्जयैनं, यात्वेष, स्व-राज्यम् अनुशासताम् !
मासः समधिकस् तेषाम् अतीतो वसतां वने। ४३
एतद् धि नित्यं यत्नेन पदं रक्ष्यं, नराधिप,
बहु-प्रत्यर्थिकं ह्य् एतद् राज्यं नाम, कुरूद्वह।" ४४
इत्युक्तः कौरवो राजा व्यासेनातुल-तेजसा,
युधिष्ठिरम् अथाहूय वाग्मी वचनम् अब्रवीत्,— ४५
"अ-जात-शत्रो, भद्रं ते, शृणु मे भ्रातृभिः सह।
त्वत्-प्रसादाद्, मही-पाल, शोको नास्मान् प्रबाधते। ४६
प्राप्तं पुत्र-फलं त्वत्तः। प्रीतिर् मे परमा त्वयि।
न मे मन्युर्, महा-बाहो। गम्यतां, पुत्र, मा चिरम्। ४७
भवन्तं चेह संप्रेक्ष्य तपो मे परिहीयते।
तपो युक्तं शरीरं च त्वां दृष्ट्वा धावितं पुनः। ४८

४०। दिष्टे—भाग्ये, भाग्य-विपर्यये। ४२। भवन्तम् अनुरुध्यते—भवत इष्टं सम्पादयति। ४३। अनुशासताम्—अनुशास्तु, प्रशास्तु। भ्वाआआ.। ४४। बहु-प्रत्यर्थिकम्—अनेक-प्रति-याचकम्, बहु-विपक्षम्। ४८। परिहीयते—परिक्षीयते। धावितम्—गृहं प्रति इति शेषः।

मातरौ च तथैवेमे शीर्ण-पर्ण-कृताशने
मम तुल्य-व्रते, पुत्र, न चिरं वर्तयिष्यतः । ४९

दुर्योधन-प्रभृतयो दृष्टा लोकान्तरं गताः—
प्रयोजनं च निर्वृत्तं जीवितस्य ममानघ ।
उग्रं तपः समास्थास्ये । त्वम् अनुज्ञातुम् अर्हसि । ५०

त्वय्यद्य पिण्डः कीर्तिश् च कुलं चेदं प्रतिष्ठितम् ।
श्वो वाद्य वा, महा-बाहो, गम्यतां, मा चिरं कृथाः !" ५१

तम् उवाच ततः कुन्ती परिष्वज्य महा-भुजम्,—
"आगमा वः शिवाः सन्तु, स्वस्था भवत, पुत्रकाः ।" ५२

ततो युधिष्ठिरो राजा स-दारः सह-सैनिकः
नगरं हास्तिन-पुरं पुनर् आयात्, स-बान्धवः । ५३

षष्ठो ऽध्यायः

दाव-संयोगः

द्वि-वर्षोपनिवृत्तेषु पाण्डवेषु, यदृच्छया
देवर्षिर् नारदो, राजन्न्, आजगाम युधिष्ठिरम् । १

तम् अभ्यर्च्य महा-बाहुः कुरु-राजो युधिष्ठिरः
आसीनं परि-विश्वस्तं प्रोवाच, वदतां वरः,— २

---

४९ । वर्तयिष्यतः—वृत्तिं करिष्यतः, जीविष्यतः । ५० । निर्वृत्तम्—सम्पन्नम् । समास्थास्ये—समास्थास्यामि, आश्रयिष्यामि, करिष्यामि । ५१ । पिण्डः—जीविका । ५२ । आगमाः—[अर्थादि-] प्राप्तयः । शिवाः—शुभ-दः ।

२ । परिविश्वस्तम्—एकान्त-विश्वासार्हम् ।

"चिरात् तु नानुपश्यामि भगवन्तम् उपस्थितम् ।
के देशाः परिदृष्टास् ते ? किं च कार्यं करोमि ते ?" ३

नारद उवाच,—

चिर-दृष्टो ऽसि मे ऽत्येवम् आगतो ऽहं तपो-वनात् ।
परिदृष्टानि तीर्थानि गङ्गा चैव मया, नृप । ४

युधिष्ठिर उवाच,—

वदन्ति पुरुषा मे ऽद्य गङ्गा-तीर-निवासिनः
धृत-राष्ट्रं महात्मानम् आस्थितं परमं तपः । ५

अपि दृष्टस् त्वया तत्र कुशली स कुरूद्वहः
गान्धारी च पृथा चैव सूत-पुत्रश् च सञ्जयः ? ६
कथं च वर्तते चाद्य पिता मम स पार्थिवः ?
श्रोतुम् इच्छामि, भगवन् , यदि दृष्टस् त्वया नृपः । ७

नारद उवाच,—

वन-वास-निवृत्तेषु भवत्सु, कुरु-नन्दन,
कुरु-क्षेत्रात् पिता तुभ्यं गङ्गा-द्वारं ययौ, नृप, ८
गान्धार्या सहितो धीमान् , वध्वा कुन्त्या समन्वितः
सञ्जयेन च सूतेन, साग्नि-होत्रः स-याजकः । ९
आतस्थे स तपस् तीव्रं पिता तव तपो-धनः,
वीटां मुखे समाधाय वायु-भक्षो ऽभवद् मुनिः । १०
वने स मुनिभिः सर्वैः पूज्यमानो, महा-तपाः,
त्वगस्थिमात्र-शेषः स षड् मासान् अभवद् नृपः । ११

---

४ । चिर-दृष्टो ऽसि मे ऽति—तव दर्शनात् परम् अति-दीर्घ-कालो व्यतीतः ।

गान्धारी तु जलाहारी कुन्ती मासोपवासिनी,
सञ्जयः षष्ठ-भुक्तेन वर्तयामास, भारत। १२

अग्नींस् तु याजकास् तत्र जुहुवुर् विधिवत्, प्रभो,
दृश्यतो ऽदृश्यतश् चैव वने तस्मिन् नृपस्य तौ। १३

अनिकेतो ऽथ राजा स बभूव वन-गो-चरः।
ते चापि सहिते देव्यौ सञ्जयश् च तम् अन्वयुः। १४

सञ्जयो नृ-पतेर् नेता समेषु विषमेषु च।
गान्धार्याश् च पृथा, राजंश्, चक्षुर् आसीद्, अ-निन्दिता। १५

ततः कदाचिद् गङ्गायाः कच्छे स नृप-सत्तमः,
गङ्गायाम् आप्लुतो, धीमान् आश्रमाभिमुखो ऽभवत्। १६

अथ वायु-समुद्भूतो दावाग्निर् अभवद् महान्,
ददाह तद् वनं सर्वं परिगृह्य समन्ततः। १७

दह्यत्सु मृग-यूथेषु द्वि-जिह्वेषु समन्ततः,
वराहाणां च यूथेषु संश्रयत्सु जलाशयान्,
—सं-प्रदीप्ते वने तस्मिन् प्राप्ते व्यसन उत्तमे— १८

निराहारतया राजा मन्द-प्राण-विचेष्टितः
अ-समर्थो ऽपसरणे, सु-कृशे मातरौ च ते। १९

१२। षष्ठ-भुक्तेन—षष्ठे दिने सकृद्-भोजनेन। वर्तयामास—जीवितं धारयामास। १३। दृश्यतो ऽदृश्यतश् च नृपस्य—यथा सन्निहिते दृश्यमाने तथा दूरस्थे अ-दृश्यमाने ऽपि नृपे। भावे षष्ठी आर्षी। कर्मणि पआ। १४। वन-गो-चरः--वन-स्थः। १६। कच्छः--जल-प्रान्तः। १७। दावाग्निः--वन-वह्निः। १८। दह्यत्सु—दह्यमानेषु। पआ.। द्वि-जिह्वेषु—सर्पेषु। व्यसने—विपदि।

ततः स नृपतिर् दृष्ट्वा वह्निम् आयान्तम् अन्तिकात्,
इदम् आह ततः सूतं सञ्जयं, जयतां वरः,— २०
"गच्छ, सञ्जय, यत्राग्निर् न त्वां दहति कर्हिचित्।
वयम् अत्राग्निना युक्ता गमिष्यामः परां गतिम्। २१
तम् उवाच किलोद्विग्नः सञ्जयो वदतां वरः,—
"राजन्, मृत्युर् अनिष्टो ऽयं भविता ते वृथाग्निना। २२
न चोपायं प्रपश्यामि मोक्षणे जात-वेदसः।
यद् अत्रानन्तरं कार्यं तद् भवान् वक्तुम् अर्हति।" २३
इत्युक्तः सञ्जयेनेदं पुनर् आह स पार्थिवः,—
"नैष मृत्युर् अनिष्टो नो, निःसृतानां गृहात् स्वयम्। २४
जलम् अग्निस् तथा वायुर् अथ वापि विकर्षणम्,
तापसानां प्रशस्यं ते। गच्छ, सञ्जय, मा चिरम्।" २५
इत्युक्त्वा सञ्जयं राजा समाधाय मनस् तथा,
प्राङ्-मुखः सह गान्धार्या कुन्त्या चोपाविशत् तदा। २६
सञ्जयस् तं तथा दृष्ट्वा प्रदक्षिणम् अथाकरोत्,
उवाच चैनम् मेधावी, "युङ्क्ष्वात्मानम्" इति, प्रभो। २७

२०। दृष्ट्वा—उपलभ्य। २५। विकर्षणम्—अनशनम् (नी.), उपवासः। Cf. मस्तं. ६।३१-३२ [पूर्व-श्लोक-सूचितानां] महर्षिणाम् अन्यतमया '(नदी-प्रवेशनेन भृगु-प्रपतनेन अग्नि-प्रवेशनेन [कुम्भकेन] आहार-निवृत्त्या वा) शरीरं त्यजेत्'—मेति. ६।३२। २६। समाधाय—[परमात्मनि] स्थिरीकृत्य। २७। युङ्क्ष्वात्मानम्—चित्तं परमात्मनि समाधत्स्व।

ऋषि-पुत्रो मनीषी स राजा चक्रेऽस्य तद् वचः।
स, निरुध्येन्द्रिय-ग्रामम्, आसीत् काष्ठोपमस् तदा। २८

गान्धारी च महा-भागा जननी च पृथा तव
दावाग्निना समायुक्ते, स च राजा पिता तव। २९

सञ्जयस् तु महा-मात्रस् तस्माद् दावाद् अमुच्यत,
गङ्गा-कूले मया दृष्टस् तापसैः परिवारितः। ३०

स तान् आमन्त्र्य तेजस्वी, निवेद्यैतच् च सर्वशः,
प्रययौ सञ्जयो धीमान् हिमवन्तं मही-धरम्। ३१

यदृच्छयानुव्रजता मया—राज्ञः कलेवरम्
तयोश् च देव्योर् उभयोर् मया दृष्टानि, भारत। ३२

ततस् तपो-वने तस्मिन् समाजग्मुस् तपो-धनाः
श्रुत्वा राज्ञस् तदा निष्ठां, न त्वशोचन् गतीश् च ते। ३३

तत्राश्रौषम् अहं सर्वम् एतत्, पुरुष-सत्तम,
यथा च नृ-पतिर् दग्धो देव्यौ ते चेति, पाण्डव। ३४

न शोचितव्यं, राजेन्द्र। स्वतः स पृथिवी-पतिः
प्राप्तवान् अग्नि-संयोगं, गान्धारी जननी च ते। ३५

वैशम्पायन उवाच,—

एतच् श्रुत्वा च, सर्वेषां पाण्डवानां महात्मनाम्,
निर्याणं धृत-राष्ट्रस्य, शोकः समभवद् महान्। ३६

२८। ऋषि-पुत्रः—व्यास-पुत्रत्वात् स्व-भावत एव चित्तं समाधातुं समर्थः।

ऊर्ध्व-बाहुः, स्मरन् मातुः, प्ररुरोद युधिष्ठिरः
भीमसेन-पुरोगाश् च भ्रातरः सर्व एव ते। ३७

अन्तः-पुरेषु च तदा सु-महान् रुदित-स्वनः
प्रादुरासीद् , महा-राज, पृथां श्रुत्वा तथा-गताम्। ३८

तं च वृद्धं तथा दग्धं हत-पुत्रं नराधिपम्
अन्वशोचन्त ते सर्वे गान्धारीं च तपस्विनीम्। ३९

ततः स पृथिवी-पालः पाण्डवानां धुरन्धरः
निर्ययौ सह-सोदर्यैः स-दारश् च नरर्षभः। ४०

पौर-जानपदाश् चैव राज-भक्ति-पुरस्कृताः
गङ्गां प्रजग्मुर् अभितो, वाससैकेन संवृताः। ४१

ततो ऽवगाह्य सलिलं, सर्वे ते नर-पुङ्गवाः,
युयुत्सुम् अग्रतः कृत्वा, ददुस् तोयं महात्मने ४२

गान्धार्याश् च पृथायाश् च विधिवद् नाम-गोत्रतः ;
शौचं निर्वर्तयन्तस् ते तत्रोषुर् नगराद् वहिः। ४३

प्रेषयामास स नरान् विधिज्ञान् आप्त-कारिणः
गङ्गा-द्वारं नर-श्रेष्ठो, यत्र दग्धो ऽभवद् नृपः। ४४

तत्रैव तेषां कृत्यानि गङ्गा-द्वारे ऽन्वशात् तदा
कर्तव्यानीति पुरुषान् दत्त-देयान् मही-पतिः। ४५

धृत-राष्ट्रं समुद्दिश्य ददौ स पृथिवी-पतिः
सुवर्णं रजतं गाश् च शय्याश् च सु-महा-धनाः। ४६

३९। अन्वशोचन्त—अन्वशोचन्। आआ.। ४३। शौचम्—शुद्धिम्।

गान्धार्याश् चैव तेजस्वी पृथायाश् च पृथक् पृथक्
संकीर्त्य नामनी राजा ददौ दानम् अनुत्तमम् । ४७

यानम् आच्छादनं भोगान् दासीश् च समलङ्कृताः
ददौ राजा समुद्दिश्य तयोर् मात्रोर् मही-पतिः । ४८

प्रविवेश पुनर् धीमान् नगरं वारणाह्वयम् ।
ते चापि राज-वचनात् पुरुषा, ये गताभवन्, ४९
माल्यैर् गन्धैश् च विविधैर् अर्चयित्वा यथा-विधि,
कुल्यानि तेषां संयोज्य तद् आचख्युर् मही-पतेः । ५०

समाश्वास्य तु राजानं धर्मात्मानं युधिष्ठिरम्,
नारदो ऽप्यगमत् प्रीतः परमर्षिर् यथेप्सितम् । ५१

एवं वर्षाण्यतीतानि धृत-राष्ट्रस्य धीमतः
वनवासे तथा त्रीणि, नगरे दश पञ्च च । ५२

युधिष्ठिरस् तु नृपतिर् नाति-प्रीत-मनास् तदा
धारयामास तद् राज्यं, निहत-ज्ञाति-बान्धवः । ५३

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायाम्
आश्रमवासिक-पर्व ।

निर्वर्तयन्तः—निष्पादयन्तः । ५० । कुल्यानि—अस्थीनि । तेषाम्—धृतराष्ट्रादीनाम् । संयोज्य—गङ्गया इति शेषः ।

इति तारकालोके नाम भारत-वृत्तौ
आश्रमवासिक-पर्व ।

अथ

श्रीभारते

मौसल-पर्व

प्रथमो ऽध्यायः

पान-विभ्रमः

वैशम्पायन उवाच,—

षट्-त्रिंशे ऽथ ततो वर्षे—वृष्णीनाम् अ-नयो महान्—
अन्योन्यं मुसलैस् ते तु निजघ्नुः, काल-चोदिताः ! १

अघोषयंश् च नगरे वचनाद् आहुकस्य ते
जनार्दनस्य रामस्य बभ्रोश् चैव महात्मनः,— २

"अद्य-प्रभृति सर्वेषु वृष्ण्यन्धक-कुलेष्विह
सुरासवो न कर्तव्यः सर्वैर् नगर-वासिभिः । ३

यश् च नो विदितं कुर्यात् पेयं कश्चिद् नरः क्वचित्,
जीवन् स शूलम् आरोहेत्, स्वयं कृत्वा, स-बान्धवः ।" ४

---

१ । अ-नयः—दुर्नीतिः, दुश्चरितत्वम् । बभूव इति शेषः । २ । आहुकः—Cf. उपरिष्टात् १२।७।१४,२० ते—वृष्णयः । बभ्रुः—अक्रूरः ।
३ । सुरासवः—सुरा-सन्धानम् ।

ततो राज-भयात् सर्वे नियमं चक्रिरे तदा
नराः, शासनम् आज्ञाय रामस्याक्लिष्ट-कर्मणः । ५
नापत्रपन्त पापानि कुर्वन्तो वृष्णयस् तदा,
प्राद्विषन् ब्राह्मणांश् चापि पितॄन् देवांस् तथैव च । ६
गुरूंश् चाप्यवमन्यन्ते, न तु राम-जनार्दनौ ।
पत्न्यः पतीन् उच्चरन्ति पत्नीश् च पतयस् तथा । ७
विभा-वसुः प्रज्वलितो वामं विपरिवर्तते,
नील-लोहित-मञ्जिष्ठा विसृजन्न् अर्चिषः पृथक् । ८
उदयास्तमने नित्यं पुर्यां तस्यां दिवा-करः
व्यदृश्यतासकृत् पुंभिः कबन्धैः परिवारितः । ९
अघोषयन्त पुरुषास् तत्र केशव-शासनात्
तीर्थ-यात्रा समुद्रे वः कार्येति, पुरुषर्षभाः । १०
ततो भोज्यं च भक्ष्यं च पेयं चान्धक-वृष्णयः
बहु नाना-विधं चक्रुर्—मद्यं मांसम् अनेकशः । ११
ततः सीधुषु सक्ताश् च निर्ययुर् नगराद् बहिः
यानैर् अश्वैर् गजैश् चैव, श्रीमन्तस् तिग्म-तेजसः । १२
ततः प्रभाते न्यवसन् यथोद्दिष्टं यथा-गृहम्
प्रभूत-भक्ष्य-पेयास् ते स-दारा यादवास् तदा । १३

---

५ । आज्ञाय—ज्ञात्वा । रामस्य—रामात् । २-५ । सुरा-पानं हि वृष्णीनां दुश्चरितत्वे मुख्यं कारणम् इति गम्यते । ७ । उच्चरन्ति—व्यभिचरन्ति । ९ । कबन्धैः—धूमकेतुभिः । १२ । सीधुः—गुड़-समुद्भवं मद्यम् ।

ब्राह्मणार्थेषु यत् सिद्धम् अन्नं तेषां महात्मनाम्,
तद् वानरेभ्यः प्रददुः, सुरा-गन्ध-समन्वितम्। १४

ततस् तूर्य-शताकीर्णं नट-नर्तक-सङ्कुलम्
आवर्तत महा-पानं प्रभासे तिग्म-तेजसाम्। १५

कृष्णस्य सन्निधौ रामः सहितः कृत-वर्मणा
अपिबद् युयुधानश् च गदो बभ्रुस् तथैव च। १६

ततः परिषदो मध्ये युयुधानो मदोत्कटः
अब्रवीत् कृत-वर्माणम् अवहस्यावमन्य च,— १७

"कः क्षत्रियो हन्यमानः सुप्तान् हन्याद् मृतान् इव?
तद् न मृष्यन्ति, हार्दिक्य, यादवा, यत् त्वया कृतम्।" १८

इत्युक्ते युयुधानेन पूजयामास तद् वचः
प्रद्युम्नो रथिनां श्रेष्ठो, हार्दिक्यम् अवमन्य च। १९

ततः परम-संक्रुद्धः कृत-वर्मा तम् अब्रवीत्,
निर्दिशन्न् इव सावज्ञं तदा सव्येन पाणिना,— २०

"भूरि-श्रवाश् छिन्न-बाहुर् युद्धे प्राय-गतस् त्वया
वधेन सु-नृशंसेन कथं वीरेण पातितः?" २१

इति तस्य वचः श्रुत्वा, केशवः पर-वीर-हा
तिर्यक् स-रोषया दृष्ट्या वीक्षांचक्रे, स मन्युमान्। २२

१५। आवर्तत—क्रमशः समन्तात् प्रावर्तत। १६। गदः—वसुदेव-रोहिण्योः पुत्रः रामस्य सहोदरश् च। १८। मृष्यन्ति—क्षमन्ते, सहन्ते। हार्दिक्यः—कृत-वर्मा। १९। प्रद्युम्नः—कृष्ण-रुक्मिण्योः पुत्रः। २१। Cf. उपरिष्टात् ७।१३।२४-३१।

मणिः स्यमन्तकश् चैव यः, स सत्राजितो ऽभवत् ।
तां कथां श्रावयामास सात्यकिर् मधु-सूदनम् । २३

तच् श्रुत्वा केशवस्याङ्कम् अगमद् रुदती तदा
सत्यभामा प्रकुपिता, कोपयन्ती जनार्दनम् । २४

तत उत्थाय स-क्रोधः सात्यकिर् वाक्यम् अब्रवीत्,—
"पञ्चानां द्रौपदेयानां धृष्ट-द्युम्न-शिखण्डिनोः २५

एष गच्छामि पदवीं—सत्येन च तथा शपे—
सौप्तिके ये च निहताः सुप्ता—येन दुरात्मना २६

द्रोण-पुत्र-सहायेन पापेन कृत-वर्मणा
समाप्तम् आयुर् अस्याद्य यशश् चैव, सु-मध्यमे ।" २७

इत्येवम् उक्त्वा खड्गेन केशवस्य समीपतः
अभिद्रुत्य शिरः कोपाच् चिच्छेद कृत-वर्मणः । २८

२३। सत्यभामायाः पिता सत्राजित् सख्युः सूर्यात् प्रसादनेन स्यमन्तकं लेभे । तस्य भ्राता प्रसेनो मणि-ग्रीवो मृगयायै वनं गत्वा सिंहेनाहन्यत । कृष्ण एव हन्ता मणि-चोरश् चेति तस्य भ्रात्रा अपोद्यत । जाम्बवान् सिंहं हत्वा मणिं लेभे पुनश् च कृष्णेन द्वन्द्वे पराजितः दुहित्रा तां तस्मै ददौ । कृष्णस् तु मणिं सत्राजिते ऽर्पयामास । स हि अपवाद-कर्तृत्वापराधं क्षालयितुम् मणिना सह अक्रूर-कृतवर्मभ्यां प्राक् प्रतिश्रुतां स्व-दुहितरं सत्यभामां कृष्णाय ददौ । कृष्णः सत्यभामाम् उपयेमे, मणिं तु न प्रतिजग्राह । अक्रूर-कृतवर्माणौ निर्यातन-परौ शत-धन्वना सुप्तं सत्राजितं घातयित्वा स्यमन्तकं हारयामासतुः । कृष्णः स-हल-धरः श्वशुर-हन्तारं शत-धन्वानं पलायमानम् अपि जघान मणिं तु न प्राप अक्रूर-हस्त-गतत्वात् । (भाग. १०।५६-५७) ।

तथान्यान् अपि निघ्नन्तं युयुधानं समन्ततः
अभ्यधावद् हृषीकेशो विनिवारयितुं तदा। २६

एकी-भूतास् ततः सर्वे काल-पर्याय-चोदिताः
भोजान्धका, महा-राज, शैनेयं पर्यवारयन्। ३०

तान् दृष्ट्वा पततस् तूर्णम् अभिक्रुद्धान्, जनार्दनः
न चुक्रोध महा-तेजा, जानन् कालस्य पर्ययम्। ३१

ते तु पान-मदाविष्टाश्, चोदिताः काल-धर्मणा,
युयुधानम् अथाभ्यघ्नन्न् उच्छिष्टैर् भाजनैस् तदा। ३२

हन्यमाने तु शैनेये क्रुद्धो रुक्मिणि-नन्दनः
तदनन्तरम् आगच्छद्, मोक्षयिष्यन् शिनेः सुतम्।
स भोजैः सह संयुक्तः सात्यकिश् चान्धकैः सह। ३३

व्यायच्छमानौ तौ वीरौ बाहु-द्रविण-शालिनौ
बहुत्वाद् निहतौ तत्र उभौ, कृष्णस्य पश्यतः। ३४

हतं दृष्ट्वा तु शैनेयं पुत्रं च, यदु-नन्दनः
एरकाणां तदा मुष्टिं कोपाज् जग्राह केशवः। ३५

तद् अभूद् मुसलं घोरं वज्रकल्पम् अयोमयम्।
जघान कृष्णस् तांस् तेन ये ये प्रमुखतो ऽभवन्। ३६

३३। रुक्मिणि-नन्दनः—प्रद्युम्नः। ह्रस्व आर्षश् छन्दसे। तद-नन्तरम्—शैनेयस्य पार्श्वम्। ३४। व्यायच्छमानौ [वि-आ-यम्+आन, १।२]—आयस्यन्तौ। ३५। एरकाणाम्—शिम्बीनाम्, शरीणाम्। ३६। अ-मानुष-बलेन चालितानि तृणान्यपि वज्र-कर्म साधयन्तीति महा-वात्यासु दृश्यते।

ततो ऽन्धकाश् च भोजाश् च शैनेया वृष्णयस् तथा
जघ्नुर् अन्योन्यम् आक्रन्दे मुसलैः, काल-चोदिताः। ३७
अवधीत् पितरं पुत्रः पिता पुत्रं च, भारत।
नासीत् पलायने बुद्धिर् वध्यमानस्य कस्यचित्। ३८
साम्बं च निहतं दृष्ट्वा चारुदेष्णं च माधवः
प्रद्युम्नं चानिरुद्धं च, ततश् चुक्रोध, भारत, ३९
गदं वीक्ष्य शयानं च। भृशं कोप-समन्वितः,
स निःशेषं तदा चक्रे, शार्ङ्ग-चक्र-गदा-धरः। ४०

द्वितीयो ऽध्यायः

वासुदेव-संक्रमणम्

ततः, समासाद्य, महानुभावः
कृष्णस् तदा दारुकम् अन्वशासत्,—
"गत्वा कुरून्, सर्वम् इमं महान्तं
पार्थाय शंसस्व वधं यदूनाम्।' १

३७। आक्रन्दः—भीषणं युद्धम्। ३९। साम्बः—कृष्ण-जाम्बवत्योः पुत्रः। चारुदेष्णः—कृष्ण-रुक्मिण्योः पुत्रः। अनिरुद्धः—प्रद्युम्न-रुक्मवत्योः पुत्रः। ४०। शार्ङ्ग-चक्र-गदा-धरः [सन्]—शार्ङ्गेण ([शृङ्ग+अ, ३।१], धनुषा) चक्रेण गदया च।

१। अन्वशासत्—अन्वशात्, आदिदेश। भ्वाआ.। कुरून्—कुरु-प्रदेशम्। शंसस्व—शंस, कथय। आआ.।

ततः पुरीं द्वारवतीं प्रविश्य
जनार्दनः पितरं प्राह वाक्यम्,—
"स्त्रियो भवान् रक्षतु नः, समग्रा,
धनञ्जयस्यागमनं प्रतीक्षन् । २

दृष्टं मयेदं निधनं यदूनां,
राज्ञां च पूर्वं कुरु-पुङ्गवानाम् ।
नाहं, विना यदुभिर्, यादवानां
पुरीम् इमाम् अशकं द्रष्टुम् अद्य ।
तपश् चरिष्यामि, निबोध तद् मे,
रामेण सार्धं, वनम् अभ्युपेत्य ।" ३

इतीदम् उक्त्वा, शिरसा च पादौ
संस्पृश्य, कृष्णस् त्वरितो जगाम ।
ततो महान् निनदः प्रादुरासीत्
स-स्त्री-कुमारस्य पुरस्य तस्य । ४

अथाब्रवीत् केशवः, सन्निवृत्य
शब्दं श्रुत्वा योषितां क्रोशतीनाम्,—
"पुरीम् इमाम् एष्यति सव्य-साची ।
स वो दुःखाद् मोचयिता, नराग्र्यः ।" ५

---

२ । प्रतीक्षन्—प्रतीक्षमाणः, परि-पालयन् । पआ. । ३ । अशकम् —शक्नोमि । अद्यतनातीते लुङ् । ५ । मोचयिता [मुच्-इ+ता]— अचिरात् मोचयिष्यति, मोक्षयिता ।

ततो गत्वा, केशवस् तं ददर्श
राम वने स्थितम् एकं विविक्ते।
अथापश्यद् योग-युक्तस्य तस्य
नागं मुखाद् निःसरन्तं महान्तम् ६
श्वेतं। ययौ स ततः प्रेक्ष्यमाणो,
महार्णवो येन महानुभावः,
सहस्र-शीर्षः पर्वताभोग-वर्ष्मा
रक्ताननः, स्वां तनुं तां विमुच्य। ७
ततो—गते भ्रातरि—वासुदेवो,
जानन् सर्वा गतयो, दिव्य-दृष्टिः,
वने शून्ये विचरंश् चिन्तयानो
भूमौ चाथ संविवेशाग्र्य-तेजाः। ८
संचिन्तयन् अन्धक-वृष्णि-नाशं
कुरु-क्षयं चैव, महानुभावः
मेने ततः संक्रमणस्य कालं,
ततश् चकारेन्द्रिय-संनिरोधम्। ९

७। पर्वताभोग-वर्ष्मा—विस्तृत-पर्वत-परिमितः। आभोगः—विस्तारः। वर्ष्मा—परिमाणम्। बहुषु देशेषु जातिषु च मानवात्मनः सर्प-देह-धारणं वर्ण्यते। तथा हि शर्मण्य-देशे छसस्य राज्ञो गुणट्रम आत्मा सर्प-देहं परिगृह्य शैलं विवेशेति श्रूयते। ८। गतयः—गतीः। चिन्तयानः—चिन्तयमानः। संविवेश—शिश्ये। अग्र्य-तेजाः—परम-तेजस्वी। ९। संक्रमणस्य—जीवनान्तर-प्रवेशस्य।

स संनिरुद्धेन्द्रिय-वाङ्-मनास् तु
शिश्ये, महा-योगम् उपेत्य, कृष्णः ।
जराथ तं देशम् उपाजगाम,
लुब्धस्, तदानीं मृग-लिप्सुर्, उग्रः । १०

स केशवं योग-युक्तं शयानं
मृगाशङ्की लुब्धकः सायकेन
जराविध्यत् पाद-तले । त्वरावांस्
तं चाभितस् तज्-जिघृक्षुर् जगाम । ११

अथापश्यत् पुरुषं योग-युक्तं ।
पादौ जरा जगृहे शङ्कितात्मा ।
आश्वासयंस् तं महात्मा तदानीं
गच्छत्यूर्ध्वं रोदसी व्याप्य लक्ष्म्या । १२

दिवं प्राप्तं वासवो ऽथाश्विनौ च
रुद्रादित्या वसवश् चाथ विश्वे
प्रत्युद्-ययुर् मुनयश् चापि सिद्धा
गन्धर्व-मुख्याश च सहाप्सरोभिः । १३

---

१३ । वासवः—इन्द्रः । अश्विनौ—अश्वीभूतायां पत्न्यां संज्ञायां जातौ सूर्यस्य यमल-पुत्रौ देव-चिकित्सकौ । रुद्राः—एकादश रुद्राख्या गण-देवताः । आदित्याः—द्वादश आदित्याख्या गण-देवताः । वसवः—अष्टौ वस्वाख्या गण-देवताः । विश्वे [देवाः]—विश्वा-पुत्राः, दश गण-देवताः । सिद्धाः—मुक्ताः ।

तृतीयो ऽध्यायः

अर्जुनागमनम्

दारुको ऽपि, कुरून् गत्वा, दृष्ट्वा पार्थान् महा-रथान्,
आचष्ट मौसले वृष्णीन् अन्योन्येनोपसंहृतान्। १

श्रुत्वा विनष्टान् वार्ष्णेयान् स-भोजान्धक-कौकुरान्,
पाण्डवाः शोक-सन्तप्ता वित्रस्त-मनसो ऽभवन्। २

ततो ऽर्जुनस्, तान् आमन्त्र्य, केशवस्य प्रियः सखा,
प्रययौ मातुलं द्रष्टुं, नेदम् अस्तीति चाब्रवीत्। ३

स, वृष्णि-निलयं गत्वा दारुकेण सह, प्रभो,
ददर्श द्वारकां वीरो, मृत-नाथाम् इव स्त्रियम्। ४

षोड़श स्त्री-सहस्राणि वासुदेव-परिग्रहः।
तासाम् आसीद् महान् नादो दृष्ट्वैवार्जुनम् आगतम्। ५

तास् तु दृष्ट्वैव कौन्तेयो वाष्पेणापिहितेक्षणः,
हीनाः कृष्णेन पुत्रैश् च, नाशकत् सो ऽभिवीक्षितुम्। ६

सात्राजिती ततः सत्या रुक्मिणी च, विशां पते,
अभिपत्य प्ररुरुदुः परिवार्य धनञ्जयम्। ७

ताः संस्तूय गोविन्दं कथयित्वा च, पाण्डवः,
आश्वास्य ताः स्त्रियश् चापि, मातुलं द्रष्टुम् अभ्यगात्। ८

७। सात्राजिती—सत्राजितः कन्या सत्यभामा। सत्या—नाग्नजिती, कोशल-पतेः नग्न-जितः कन्या (भाग- १०।५८।३२-४७)।

तस्याश्रु-परिपूर्णाक्षो व्यूढोरस्को महा-भुजः
आर्तस्यार्ततरः पार्थः पादौ जग्राह, भारत। ९

तस्य मूर्धानम् आघ्रातुम् इयेषानक-दुन्दुभिः
स्वस्रीयस्य महा-बाहुर्, न शशाक च, शत्रु-हन्। १०

समालिङ्ग्यार्जुनं वृद्धः स भुजाभ्यां महा-भुजः
रुरोदाथ स्मरन् शौरिं, विललाप, सु-विह्वलः,
भ्रातॄन् पुत्रांश् च पौत्रांश् च दौहित्रान् स सखीन् अपि। ११

"यैर् जिता भूमि-पालाश् च दैत्याश् च शतशो, ऽर्जुन,
तान् सर्वान् नेह पश्यामि। जीवास्यर्जुन, दुर्मरः!
इमांस् तु नैच्छत् स्वान् ज्ञातीन् रक्षितुं स सखा तव! १२

ततः पुत्रांश् च पौत्रांश् च भ्रातॄन् अथ सखींस् तथा
शयानान् निहतान् दृष्ट्वा, कृष्णो माम् अब्रवीद् इदम्,— १३

'संप्राप्तो ऽद्यायम् अस्यान्तः कुलस्य,' भरतर्षभ।
'आगमिष्यति बीभत्सुर् इमां द्वारवतीं पुरीम्। १४

आख्येयं तस्य यद् वृत्तं—वृष्णीनां वैशसं महत्।
यो ऽहं तम् अर्जुनं विद्धि, यो ऽर्जुनः सो ऽहम् एव तु।
यद् ब्रूयात् तत् तथा कार्यम् इति बुध्यस्व,' भारत। १५

१०। आनक-दुन्दुभिः—वसु-देवः [तस्य जन्मनि देवैर् आकाशे आनकानां दुन्दुभीनां च वादनात्]। १२। दुर्मरः—दुर्लभ-मृत्युः। १५। वैशसम्—विशसनम्, निधनम्।

'स स्त्रीषु प्राप्त-कालासु पाण्डवो बालकेषु च
प्रतिपत्स्यति बीभत्सुर्, भवतश् चौर्ध्वदेहिकम् । १६
इमां च नगरीं सद्यः प्रति-याते धनञ्जये
प्राकाराट्टालकोपेतां समुद्रः प्लावयिष्यति । १७
अहं देशे तु कस्मिंश्चित् पुण्ये, नियमम् आस्थितः,
कालं काङ्क्षे सद्य एव रामेण सहितो वने ।' १८
एवम् उक्त्वा हृषीकेशो माम्, अ-चिन्त्य-पराक्रमः,
हित्वा मां बालकैः सार्धं, दिशं काम् अप्यगात् प्रभुः । १९
न भोक्ष्ये न च जीविष्ये । दिष्ट्या प्राप्तो ऽसि, पाण्डव ।
यद् उक्तं, पार्थ, कृष्णेन, तत् सर्वम् अखिलं कुरु । २०
एतत् ते, पार्थ, राज्यं च स्त्रियो रत्नानि चैव हि ।
इष्टान् प्राणान् अहं हीमांस् त्यक्ष्याम्यरि-निषूदन ।" २१
एवम् उक्तः स बीभत्सुर् मातुलेन, परन्तपः,
दुर्मना दीन-वदनो वसु-देवम् उवाच ह,— २२
"नाहं वृष्णि-प्रवीरेण बन्धुभिश् चैव, मातुल,
विहीनां पृथिवीं द्रष्टुं शक्ष्यामीह कथञ्चन । २३
राजा च भीमसेनश् च सहदेवश् च पाण्डवः
नकुलो याज्ञसेनी च, षड् एक-मनसो वयम् । २४

---

१६ । प्राप्त-कालासु—[तत्-साहाय्यार्हत्व-] कालं प्राप्तासु । प्रतिपत्स्यति—प्रतिपत्स्यते, [स्त्री-पक्षे साहाय्यम्] निष्पादयिष्यते । पआ. । १८ । कालम्—मृत्युम् । काङ्क्षे—काङ्क्षामि । आआ. । १९ । काम् अपि—काञ्चित्, अनिश्चिताम् । २३ । शक्ष्यामि—शक्नोमि ।

राज्ञः सं-क्रमणे चापि कालो ऽयं वर्तते ध्रुवम् ।
तम् इमं विद्धि सं-प्राप्तं कालं, काल-विदां वर । २५
सर्वथा वृष्णि-दारांश् च बालं वृद्धं तथैव च
नयिष्ये परिगृह्याहम् इन्द्र-प्रस्थम्, अरिन्दम ।" २६
इत्युक्त्वा दारुकम् इदं वाक्यम् आह धनञ्जयः,—
"अमात्यान् वृष्णि-वीराणां द्रष्टुम् इच्छामि मा चिरम् ।" २७
इत्येवम् उक्त्वा वचनं, सु-धर्मां यादवीं सभाम्
प्रविवेशार्जुनः शूरः, शोचमानो महा-रथान् । २८
तम्—आसन-गतं तत्र—सर्वाः प्रकृतयस् तथा
ब्राह्मणा नैगमास् तत्र परिवार्योपतस्थिरे । २९
तान् दीन-मनसः सर्वान् विमूढान् गत-चेतसः
उवाचेदं वचः काले पार्थो दीनतरस् तथा,— ३०
"शक्र-प्रस्थम् अहं नेष्ये वृष्ण्यन्धक-जनं स्वयम् ।
इदं तु नगरं सर्वं समुद्रः प्लावयिष्यति । ३१
सज्जीकुरुत यानानि रत्नानि विविधानि च ।
वज्रो ऽयं भवतां राजा शक्र-प्रस्थे भविष्यति ।" ३२
इत्युक्तास् तेन, ते सर्वे, पार्थेनाक्लिष्ट-कर्मणा,
सज्जम् आशु ततस् चक्रुः स्व-सिद्धयर्थं समुत्सुकाः । ३३

---

२९ । नैगमाः—वणिजः । ३२ । वज्रः—कृष्णस्य प्रपौत्रः प्रद्युम्नस्य पौत्रः अनिरुद्धस्य पुत्रश् च ।

तां रात्रिम् अवसत् पार्थः केशवस्य निवेशने,
महता शोक-मोहेन सहसाभिपरिप्लुतः। ३४

श्वो-भूते ऽथ ततः शौरिर् वसुदेवः प्रतापवान्
युक्त्वात्मानं महा-तेजा जगाम गतिम् उत्तमाम्। ३५

ततः शब्दो महान् आसीद् वसुदेव-निवेशने
दारुणः क्रोशतीनां च रुदतीनां च योषिताम्। ३६

प्रकीर्ण-मूर्ध-जाः सर्वा विमुक्ताभरण-स्रजः,
उरांसि पाणिभिर् घ्नन्त्यो व्यलपन् करुणं स्त्रियः। ३७

तं देवकी च भद्रा च रोहिणी मदिरा तथा,
अन्वारोहन्त च तदा भर्तारं, योषितां वराः। ३८

ततः शौरिं नृ-युक्तेन बहु-मूल्येन, भारत,
यानेन महता पार्थो बहिर् निष्क्रामयत् तदा। ३९

तं तै चतसृभिः स्त्रीभिर् अन्वितं पाण्डु-नन्दनः
अदाहयच् चन्दनैश् च गन्धैर् उच्चावचैर् अपि। ४०

ततः प्रादुरभूच् छब्दः समिद्धस्य विभावसोः
सामगानां च निर्घोषो, नराणां रुदताम् अपि। ४१

ततो वज्र-प्रधानास् ते वृष्ण्यन्धक-कुमारकाः
सर्वे चैवोदकं चक्रुः, स्त्रियश् चैव महात्मनः। ४२

अ-लुप्त-धर्मास्, तं धर्मं कारयित्वा, स फाल्गुनः
जगाम वृष्णयो यत्र विनष्टा, भरतर्षभ। ४३

३८। अन्वारोहन्त भर्तारम्—सह-दाहाय पश्चात् स-भर्तृकां चिताम् आरोहन्।

स, तान् दृष्ट्वा निपतितान् कदने, भृश-दुःखितः
बभूवातीव कौरव्यः, प्राप्त-कालं चकार ह। ४४

ततः शरीरे रामस्य वासुदेवस्य चोभयोः
अन्विष्य दाहयामास पुरुषैर् आप्त-कारिभिः। ४५

स तेषां विधिवत् कृत्वा प्रेत-कार्याणि, पाण्डवः
सप्तमे दिवसे प्रायाद् रथम् आरुह्य, सत्वरः। ४६

अश्व-युक्तै रथैश् चापि गो-खरोष्ट्र-युतैर् अपि
स्त्रियस् ता वृष्णि-वीराणां रुदन्त्यः शोक-कर्शिताः
अनुजग्मुर् महात्मानं पाण्डु-पुत्रं धनञ्जयम्। ४७

भृत्यास् त्वन्धक-वृष्णीनां सादिनो रथिनश् च ये
वीर-हीना वृद्ध-बाला पौर-जानपदास् तथा,
ययुस् ते परिवार्याथ कलत्रं पार्थ-शासनात्। ४८

दश षट् च सहस्राणि—वासुदेवावरोधनम्—
पुरस्कृत्य ययुर् वज्रं पौत्रं कृष्णस्य धीमतः। ४९

बहूनि च सहस्राणि प्रयुतान्यर्वुदानि च
भोज-वृष्ण्यन्धक-स्त्रीणां हत-नाथानि निर्ययुः। ५०

तत् सागर-सम-प्रख्यं वृष्णि-चक्रं महर्द्धिमत्
उवाह रथिनां श्रेष्ठः पार्थः पर-पुरञ्जयः। ५१

४७। खरः—अश्वतरः। ४८। कलत्रम्—दारान्। ४९। पौत्रम्—प्रपौत्रम् इति वक्तव्यम्। Cf. उपरिष्टात् ३२ टी.। ५१। उवाह—निनाय।

निर्याते तु जने तस्मिन्, सागरो मकरालयः
द्वारकां रत्न-सम्पूर्णां जलेनाप्लावयत् तदा । ५२

चतुर्थोऽध्यायः

वृष्णि-दार-हरणम्

काननेषु च रम्येषु पर्वतेषु नदीषु च
निवसन्न्, आनयामास वृष्णि-दारान् धनञ्जयः । १

स, पञ्च-नदम् आसाद्य, धीमान् अति-समृद्धिमत्,
देशे गो-पशु-धान्याढ्ये निवासम् अकरोत् प्रभुः । २

ततो लोभः समभवद् दस्यूनां, निहतेश्वराः
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन, भारत । ३

ततस् ते पाप-कर्माणो लोभोपहत-चेतसः
आभीरा मन्त्रयामासुः समेत्याशुभ-दर्शनाः,— ४

"अयम् एको ऽर्जुनो धन्वी वृद्ध-बालं हतेश्वरम्
नयत्यस्मान् अतिक्रम्य । योधाश् चेमे हतौजसः ।" ५

ततो यष्टि-प्रहरणा दस्यवस् ते सहस्रशः
अभ्यधावन्त वृष्णीनां तं जनं, लोप्त्र-हारिणः, ६

महता सिंह-नादेन त्रासयन्तः पृथग्-जनम् ।
अभिपेतुर् धनार्थं ते काल-पर्याय-चोदिताः । ७

६ । लोप्त्र-हारिणः—चोरित-धन-वहन-शीलाः, लुण्ठकाः । ७ । पृथग्-जनम्—नीचम्, मूर्खम् ।

ततो ऽर्जुनो धनुर् दिव्यं गाण्डीवम् अजरं महत्
आरोपयितुम् आरेभे यत्नाद् इव कथञ्चन । ८

चकार सज्यं कृच्छ्रेण सम्भ्रमे तुमुले सति ।
चिन्तयामास चास्त्राणि, न च सस्मार तान्यपि । ९

वैकृतं तद् महद् दृष्ट्वा भुज-वीर्यं तथा युधि,
दिव्यानां च महास्त्राणां विनाशाद् व्रीडितो ऽभवत् । १०

वृष्णि-योधाश् च ते सर्वे गजाश् च रथ-योधिनः
न शेकुर् आवर्तयितुं ह्रियमाणं स्वकं जनम् । ११

मिषतां सर्व-योधानां ततस् ताः प्रमदोत्तमाः
समन्ततो ऽवकृष्यन्त, कामाच् चान्याः प्रवव्रजुः । १२

ततो गाण्डीव-निर्मुक्तैः शरैः पार्थो धनञ्जयः
जघान दस्यून्, सोद्वेगो, वृष्णि-भृत्यैः सह, प्रभुः । १३

क्षणेन तस्य ते, राजन्, क्षयं जग्मुर् अ-जिह्म-गाः,
अ-क्षया हि पुरा भूत्वा क्षीणाः, क्षत-ज-भोजनाः । १४

स, शर-क्षयम् आसाद्य, दुःख-शोक-समाहतः,
धनुष्कोट्या तदा दस्यून् अवधीत् पाक-शासनिः । १५

प्रेक्षतस् त्वेव पार्थस्य वृष्ण्यन्धक-वर-स्त्रियः
जग्मुर् आदाय ते म्लेच्छाः समन्ताज्, जनमेजय । १६

---

८ । आरोपयितुम्—स-ज्यां कर्तुम् । ११ । आवर्तयितुम्—घूर्णयितुम् । १४ । अ-जिह्मगाः—सरल-पथ-गामिनः, बाणाः । क्षत-जम्—शोणितम् । १६ । प्रेक्षतः...—प्रेक्षमाणस्य..., प्रेक्षमाणं तु पार्थम् अनादृत्यैव । पआ. ।

ततः स, शेषम् आदाय कलत्रस्य, महा-मतिः,
हृत-भूयिष्ठ-रत्नस्य कुरु-क्षेत्रम् अवातरत् । १७

युधिष्ठिरस्यानुमते वंश-कर्तॄन् कुमारकान्
न्यवेशयत कौरव्यस् तत्र तत्र धनञ्जयः । १८

ततो बालांश् च वृद्धांश् च स्त्रियश् चादाय, पाण्डवः
वीरैर् विहीनान् सर्वांस् तान् शक्र-प्रस्थे न्यवेशयत् । १९

इन्द्र-प्रस्थे ददौ राज्यं वज्राय पर-वीर-हा ।
वज्रेणाक्रूर-दारास् तु वार्यमाणाः प्रवव्रजुः । २०

रुक्मिणी त्वथ गान्धारी शैब्या हैमवतीत्यपि
देवी जाम्बवती चैव विविशुर् जात-वेदसम् । २१

सत्यभामा तथैवान्या देव्यः कृष्णस्य सम्मताः
वनं प्रविविशू, राजंस्, तापस्ये कृत-निश्चयाः । २२

द्वारका-वासिनो ये तु पुरुषाः पार्थम् अभ्ययुः,
यथार्हं सं-विभज्यैनान् वज्रे पर्यददाज् जयः । २३

स, तत् कृत्वा, प्राप्त-कालं, वाष्पेणापिहितो, ऽर्जुनः
कृष्ण-द्वैपायनं व्यासं ददर्शासीनम् आश्रमे । २४

---

१८ । वंश-कर्तॄन्—वंश-धरान्, [यदु-] वंश-रक्षकान् । तत्र तत्र—नाना-स्थानेषु । १९ । शक्र-प्रस्थे—इन्द्र-प्रस्थे २० । प्रवव्रजुः—संसारं संन्यस्य तपसे प्रतस्थिरे । २१ । जात-वेदसम्—अग्निम् । २३ । पर्यददात्—समर्पयामास । २४ । वाष्पेण अपिहितः [सन्]—नेत्र जलावृतः [सन्], भृशं रुदन् ।

तम् अ-प्रतीत-मनसं निःश्वसन्तं पुनः पुनः
निर्विण्ण-मनसं दृष्ट्वा, पार्थं व्यासो ऽब्रवीद् इदम्,— २५

"न त्वां प्रभिन्नं जानामि। किम् इदं, भरतर्षभ ?
श्रोतव्यं चेद् मया, पार्थ, क्षिप्रम् आख्यातुम् अर्हसि।" २६

अर्जुन उवाच,—

यः स मेघ-वपुः श्रीमान् वृहत्-पङ्कज-लोचनः,
स कृष्णः सह रामेण त्यक्त्वा देहं दिवं गतः। २७

ये ते शूरा महात्मानः सिंह-दर्पा महा-बलाः
भोज-वृष्ण्यन्धका, ब्रह्मन्, अन्योन्यं तैर् हतं युधि। २८

इतः कष्टतरं चान्यच्। छृणु तद् वै, तपो-धन,
मनो मे दीर्यते येन चिन्तयानस्य वै मुहुः। २९

पश्यतो वृष्णि-दाराश् च मम, ब्रह्मन्, सहस्रशः
आभीरैर् अभिभूयाजौ हृताः, पञ्च-नदालयैः। ३०

तत्राहं धनुर् आदाय नाशकं तस्य पूरणे ;
यथा पुरा च मे वीर्यं भुजयोर्, न तथाभवत्। ३१

अस्त्राणि मे प्रनष्टानि विविधानि, महा-मुने।
शराश् च क्षयम् आपन्नाः क्षणेनैव समन्ततः। ३२

२५। अ-प्रतीत-मनसम्—अ-सन्तुष्ट-चित्तम्। निर्विण्ण-मनसम्—विरक्त-चित्तम्, विषयानुराग-शून्य-मानसम्। २६। प्रभिन्नम्—भग्नम्, पराजितम्।

प्रनष्ट-ज्ञाति-वीर्यस्य शून्यस्य परिधावतः
उपदेष्टुं मम श्रेयो भवान् अर्हति, सत्तम । ३३

व्यास उवाच,—

कृत्वा भारावतरणं पृथिव्याः, पृथु-लोचनः,
मोक्षयित्वा तनुं, प्राप्तः कृष्णः स्व-स्थानम् उत्तमम् । ३४

त्वयापीह महत् कर्म देवानां, पुरुषर्षभ,
कृतं, भीम-सहायेन यमाभ्यां च, महा-भुज । ३५

कृत-कृत्यांश् च वो मन्ये, सं-सिद्धान्, कुरु-पुङ्गव,
गमनं प्राप्त-कालं च । इदं श्रेयस्करं, विभो । ३६

वैशम्पायन उवाच,—

एतद् वचनम् आज्ञाय व्यासस्यामित-तेजसः
अनुज्ञातो ययौ पार्थो नगरं नागसाह्वयम् । ३७

प्रविश्य च पुरीं, वीरः, समासाद्य युधिष्ठिरम्,
आचष्ट तद् यथा वृत्तं वृष्ण्यन्धक-कुलं प्रति । ३८

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्र्यां संहितायां
मौसल-पर्व ।

---

३५ । महत् कर्म देवानाम्—दुष्कृतां विनाशेन धर्म-स्थापनम् इति भावः ।

इति तारकालोके नाम भारत-वृत्तौ
मौसल-पर्व ।

अथ

श्रीभारते

महाप्रस्थानिक-पर्व

प्रथमो ऽध्यायः

महा-प्रस्थानम्

वैशम्पायन उवाच,—

श्रुत्वैवं कौरवो राजा वृष्णीनां कदनं महत्,
प्रस्थाने मतिम् आधाय वाक्यम् अर्जुनम् अब्रवीत्,— १

"कालः पचति भूतानि सर्वाण्येव, महा-मते।
काल-पाशम् अहं मन्ये, त्वम् अपि द्रष्टुम् अर्हसि।" २

इत्युक्तः स तु कौन्तेयः, 'कालः काल' इति ब्रुवन्,
अन्वपद्यत तद् वाक्यं भ्रातुर् ज्येष्ठस्य धीमतः। ३

१। प्रस्थाने—गृहात् निःसरणे। २। कालः—Cf. उपरिष्टात् १३।१ मन्ये—मानयामि, स्वीकरोमि। द्रष्टुम्—अनुभवितुम्। ३। कालः कालः—उपर्युपरि सर्वेषां कालश् चरति नित्यशः, मरणम् अपरिहार्यम् इति भावः। अन्वपद्यत—अनुससार।

अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा
अन्वपद्यन्त तद् वाक्यं यद् उक्तं सव्य-साचिना । ४

ततो युयुत्सुम् आनाय्य, प्रव्रजन् धर्म-काम्यया,
राज्यं परिददौ सर्वं वैश्या-पुत्रे युधिष्ठिरः । ५

अभिषिच्य स्व-राज्ये च राजानं च परीक्षितम्,
दुःखार्तश् चाब्रवीद् राजा सुभद्रां, पाण्डवाग्रजः,— ६

"एष पुत्रस्य पुत्रस् ते कुरु-राजो भविष्यति ।
यदूनां परिशेषश् च वज्रो राजा कृतश् च ह । ७

परीक्षिद् धास्तिने पुरे शक्र-प्रस्थे च यादवः
वज्रो राजा त्वया रक्ष्यो । मा चाधर्मे मनः कृथाः ।" ८

इत्युक्त्वा, धर्म-राजः स वासुदेवस्य धीमतः
मातुलस्य च वृद्धस्य रामादीनां तथैव च ९

भ्रातृभिः सह धर्मात्मा कृत्वोदकम्, अ-तन्द्रितः
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत् तदा । १०

ददौ रत्नानि वासांसि ग्रामान् अश्वान् रथांस् तथा
स्त्रियश् च द्विज-मुख्येभ्यस् तदा शत-सहस्रशः । ११

---

५ । राज्यम्—राज-कर्म । परिददौ—निचिक्षेप । ६ । स्व-राज्ये—निज-स्वे राज-पदे । ८ । अ-धर्मे—संसार-त्यागेन अधर्मात्मके बालयो राज्ञोर् अ-रक्षणे ।

कृपम् अभ्यर्च्य च गुरुम् अथ पौर-पुरस्कृतम्
शिष्यं परिक्षितं तस्मै ददौ भरत-सत्तमः । १२

ततस् तु प्रकृतीः सर्वाः समानाय्य, युधिष्ठिरः
सर्वम् आचष्ट राजर्षिश् चिकीर्षितम् अथात्मनः । १३

ततः स राजा कौरव्यो धर्म-पुत्रो युधिष्ठिरः,
उत्सृज्याभरणान्यङ्गाज्, जगृहे वल्कलान्युत । १४

भीमार्जुन-यमाश् चैव द्रौपदी च यशस्विनी
तथैव जगृहुः सर्वे वल्कलानि, नराधिप । १५

विधिवत् कारयित्वेष्टिं नैष्ठिकीं, भरतर्षभ,
समुत्सृज्याप्सु सर्वे ऽग्निं प्रतस्थुर् नर-पुङ्गवाः । १६

ततः प्ररुरुदुः सर्वाः स्त्रियो, दृष्ट्वा नरोत्तमान्
प्रस्थितान् द्रौपदी-षष्ठान्, पुरा द्यूत-जितान् यथा । १७

हर्षो ऽभवच् च सर्वेषां भ्रातॄणां गमनं प्रति,
युधिष्ठिर-मतं ज्ञात्वा वृष्णि-क्षयम् अवेक्ष्य च । १८

भ्रातरः पञ्च, कृष्णा च षष्ठी, श्वा चैव सप्तमः ।
आत्मना सप्तमो राजा निर्ययौ गज-साह्वयात्, १९
पौरैर् अनुगतो दूरं सर्वैर् अन्तः-पुरैस् तथा ।
न चैनम् अशकत् कश्चिद् निवर्तस्वेति भाषितुम् । २०

---

१२ । पौर-पुरस्कृतम्—नगर-वासिभिः अग्रे स्थापितम् (प्रधानीकृतम्) ।
१६ । इष्टिं नैष्ठिकीम्—अन्तिमं यागम् । प्रतस्थुः—प्रतस्थिरे । पआ. ।

न्यवर्तन्त ततः सर्वे नरा नगर-वासिनः ।
कृप-प्रभृतयश् चैव युयुत्सुं पर्यवारयन् । २१

विवेश गङ्गां, कौरव्य, उलूपी भुजगात्मजा ।
चित्राङ्गदा ययौ चापि मणलूर-पुरं प्रति ।
शिष्टाः परिक्षितं त्वन्या मातरः पर्यवारयन् । २२

पाण्डवाश् च महात्मानो द्रौपदी च यशस्विनी
कृतोपवासाः, कौरव्य, प्रययुः प्राङ्-मुखास् ततः । २३

योग-युक्ता महात्मानस्, त्याग-धर्मम् उपेयुषः.
अभिजग्मुर् बहून् देशान् सरितः सागरांस् तथा । २४

युधिष्ठिरो ययाव् अग्रे भीमश् च तदनन्तरम्,
अर्जुनस् तस्य चान्वेव, यमौ चापि यथा-क्रमम् । २५

पृष्ठतस् तु वरारोहा श्यामा पद्म-दलेक्षणा
द्रौपदी, योषितां श्रेष्ठा, ययौ, भरत-सत्तम । २६

श्वा चैवानुययाव् एकः प्रस्थितान् पाण्डवान् वनम् ।
क्रमेण ते ययुर् वीरा लौहित्यं सलिलार्णवम् । २७

---

२२ । शिष्टाः अन्याः—युधिष्ठिरादीनां अन्याः भार्याः देविकादयः । २४ । योग-युक्ताः—समाहित-चित्ताः । उपेयुषः [उप-इ + वस्, २।ब]—उपेयिवांसः, उपागताः । द्वितीया आर्षी । २५ । अनु—पश्चात् । २७ । लौहित्यम्—ब्रह्म-पुत्रं नाम नदम् । Cf. कापु. ८४-८५ (शकद्रु.) ।

गाण्डीवं तु धनुर् दिव्यं न मुमोच धनञ्जयः
रत्न-लोभाद्, महा-राज, ते चाक्षय्ये महेषुधी। २८

अग्निं ते ददृशुस् तत्र स्थितं शैलम् इवाग्रतः,
मार्गम् आवृत्य तिष्ठन्तं साक्षात् पुरुष-विग्रहम्। २९

ततो देवः स सप्तार्चिः पाण्डवान् इदम् अब्रवीत्,—
"अहम् अग्निः, कुरु-श्रेष्ठा, मया दग्धं च खाण्डवम्। ३०

अयं वः फाल्गुनो भ्राता गाण्डीवं परमायुधम्
परित्यज्य वने यातु। नानेनार्थो ऽस्ति कश्चन। ३१

चक्र-रत्नं तु यत् कृष्णे स्थितम् आसीद्, महात्मनि,
गतं तच् च, पुनर् हस्ते कालेनैष्यति तस्य ह। ३२

वरुणाद् आहृतं पूर्वं मयैतत् पार्थ-कारणात्
गाण्डीवं, धनुषां श्रेष्ठं, वरुणायैव दीयताम्।" ३३

ततस् ते भ्रातरः सर्वे धनञ्जयम् अचोदयन्।
स जले प्राक्षिपच् चैतत् तथाक्षय्ये महेषुधी। ३४

ततो ऽग्निर्, भरत-श्रेष्ठ, तत्रैवान्तरधीयत।
ययुस् ते पाण्डवा वीरास् ततस्—ते दक्षिणामुखाः। ३५

२९। पुरुष-विग्रहम्—पुरुष-मूर्तिम्। ३०। सप्तार्चिः—सप्त-जिह्वः, अग्निः। ३१। अर्थः—प्रयोजनम्। ३५। दक्षिणा-मुखाः [दक्षिणस्यां दिशि मुखानि येषां तादृशाः]—दक्षिणा-दिङ्-मुखाः।

ततस् ते तूत्तरेणैव तीरेण लवणाम्भसः
जग्मुर्, भरत-शार्दूल, दिशं दक्षिण-पश्चिमाम्। ३६

ततः, पुनः समावृत्ताः पश्चिमां दिशम् एव, ते
ददृशुर् द्वारकां चापि सागरेण परिप्लुताम्। ३७

उदीचीं, पुनर् आवृत्य, ययुर् भरत-सत्तमाः,
प्रादक्षिण्यं चिकीर्षन्तः पृथिव्या, योग-धर्मिणः। ३८

द्वितीयो ऽध्यायः

सह-यात्रि-पातः

ततस् ते नियतात्मान, उदीचीं दिशम् आस्थिताः,
ददृशुर् योग-युक्ताश् च हिमवन्तं महा-गिरिम्। १

तं चाप्यतिक्रमन्तस्, ते ददृशुर् वालुकार्णवम्,
अवैक्षन्त महा-शैलं मेरुं शिखरिणां वरम्। २

तेषां तु गच्छतां शीघ्रं सर्वेषां योग-धर्मिणाम्
याज्ञसेनी भ्रष्ट-योगा निपपात मही-तले। ३

१। नियतात्मानः—संयत-चित्ताः। २। अतिक्रमन्तः—अतिक्रामन्तः, अतिक्रममाणाः। आप्र.। वालुकार्णवम्—विस्तृतां मरु-भूमिम् इदानीन्तन-गोबी-नाम्नीम्। मेरुम्—Cf. उपरिष्टात् १२।२४।२ टी.। ३। भ्रष्ट-योगा—ध्यानात् स्खलित-मानसा, विक्षिप्त-चित्ता।

तां तु प्रपतितां दृष्ट्वा, भीमसेनो महा-बलः
उवाच धर्म-राजानं याज्ञसेनीम् अवेक्ष्य ह,— ४

"नाधर्मश् चरितः कश्चिद् राज-पुत्र्या, परन्तप ।
कारणं किं नु तद् ब्रूहि यद् कृष्णा पतिता भुवि ।" ५

युधिष्ठिर उवाच,—

पक्ष-पातो महान् अस्या विशेषेण धनञ्जये ।
तस्यैतत् फलम् अद्यैषा भुङ्क्ते, पुरुष-सत्तम । ६

वैशम्पायन उवाच,—

एवम् उक्त्वानवेक्ष्यैनां ययौ भरत-सत्तमः,
समाधाय मनो, धीमान् धर्मात्मा पुरुषर्षभः । ७

सह-देवस् ततो विद्वान् निपपात मही-तले ।
तं चापि पतितं दृष्ट्वा, भीमो राजानम् अब्रवीत्,— ८

"यो ऽयम् अस्मासु सर्वेषु शुश्रूषुर् अनहङ्कृतः,
सो ऽयं माद्रवती-पुत्रः कस्माद् निपतितो भुवि ?" ९

युधिष्ठिर उवाच,—

आत्मनः सदृशं प्राज्ञं नैषो ऽमन्यत कश्चन ।
तेन दोषेण पतितो विद्वान् एष नृपात्मजः । १०

७। अनवेक्ष्य—[दर्शन-जया आसक्त्या चित्त-विक्षेपो मा भूद् इति] अदृष्ट्वा । समाधाय—[अभीष्ट-विषये] स्थिरीकृत्य ।

वैशम्पायन उवाच,—

इत्युक्त्वा, तां समुत्सृज्य सह-देवं, ययौ तदा
भ्रातृभिः सह कौन्तेयः, शुना चैव, युधिष्ठिरः। ११

कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम्,
आर्तो बन्धु-प्रियः शूरो नकुलो निपपात ह। १२

तस्मिन् निपतिते वीरे नकुले चारु-दर्शने
पुनर् एव तदा भीमो राजानम् इदम् अब्रवीत्,— १३

"यो ऽयम् अक्षत-धर्मात्मा भ्राता वचन-कारकः,
रूपेणाप्रतिमो लोके, नकुलः पतितो भुवि।" १४

इत्युक्तो भीम-सेनेन, प्रत्युवाच युधिष्ठिरः
नकुलं प्रति, धर्मात्मा सर्व-बुद्धिमतां वरः,— १५

"रूपेण मत्समो नास्ति कश्चिद् इत्यस्य दर्शनम्।
अधिकश् चाहम् एवैक इत्यस्य मनसि स्थितम्। १६

नकुलः पतितस् तस्माद्। आगच्छ त्वं, वृकोदर।
यस्य यद् विहितं, वीर, सो ऽवश्यं तद् उपाश्नुते।" १७

तांस् तु प्रपतितान् दृष्ट्वा, पाण्डवः श्वेत-वाहनः
पपात, शोक-सन्तप्तस् ततो ऽनु, पर-वीर-हा। १८

तस्मिंस् तु पुरुष-व्याघ्रे पतिते शक्र-तेजसि
म्रियमाणे दुराधर्षे, भीमो राजानम् अब्रवीत्,— १९

"अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्मनः।
अथ कस्य विकारो ऽयं येनायं पतितो भुवि ?" २०

युधिष्ठिर उवाच,—

'एको ऽहं निर्दहेयं वै शत्रून्' इत्यर्जुनो ऽब्रवीत्।
न च तत् कृतवान् एष, शूर-मानी, ततो ऽपतत्। २१

अवमेने धनुर्ग्राहान् एष सर्वांश् च फाल्गुनः।
तथा चैतद् न तु तथा कर्तव्यम् भूतिम् इच्छता। २२

वैशम्पायन उवाच,—

इत्युक्त्वा प्रस्थितो राजा। भीमो ऽथ निपपात ह।
पतितश् चाब्रवीद् भीमो धर्म-राजं युधिष्ठिरम्,— २३

"भो भो राजन्, अवेक्षस्व ! पतितो ऽहं प्रियस् तव।
किं निमित्तं च पतनं, ब्रूहि मे, यदि वेत्थ ह।" २४

युधिष्ठिर उवाच,—

अति-भुक्तं च भवता प्राणेन च विकत्थसे
अनवेक्ष्य परं, पार्थ, तेनासि पतितः क्षितौ। २५

२१। एको ऽहम्—Cf. उपरिष्टात् ५।७।११ 'एकाह्ना' इति प्रतीचां वर्धमानस्य च पाठः। ६-२५। पक्ष-पातेन द्रौपदी प्राज्ञत्व-गर्वेण सहदेवः रूप-गर्वेण नकुलः शौर्य-गर्वेण प्रतिज्ञा-भङ्गेन चार्जुनः अति-भोजनेन बल-गर्वेण च भीमसेनः स-शरीरः स्वर्गं न जगाम।

वैशम्पायन उवाच,—

इत्युक्त्वा तं, महा-बाहुर् जगामानवलोकयन् ।
श्वाप्येको ऽनुययौ यस् ते बहुशः कीर्तितो मया । २६

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्रयां संहितायां
महाप्रस्थानिक-पर्व ।

---

२६ । पं २— Cf. उपरिष्टात् १७।१।१९, परस्तात् १८।१।७-१६,२१ ।

इति तारकालोके नाम भारत-वृत्तौ
महाप्रस्थानिक-पर्व ।

अथ

श्रीभारते

स्वर्गारोहण-पर्व

प्रथमो ऽध्यायः

स्वर्गारोहणम्

वैशम्पायन उवाच,—

ततः संनादयन् शक्रो दिवं भूमिं च सर्वशः,
रथेनोपययौ पार्थम् आरोहेत्यब्रवीच् च तम्। १

स, भ्रातॄन् पतितान् दृष्ट्वा, धर्म-राजो युधिष्ठिरः
अब्रवीच् छोक-सन्तप्तः सहस्राक्षम् इदं वचः,— २

"भ्रातरः पतिता मे ऽत्र। गच्छेयुस् ते मया सह।
न विना भ्रातृभिः स्वर्गम् इच्छे गन्तुं, सुरेश्वर। ३

सु-कुमारी सुखार्हा च राज-पुत्री, पुरन्दर।
सास्माभिः सह गच्छेत। तद् भवान् अनुमन्यताम्।" ४

१-२। शक्रः, सहस्राक्षः—इन्द्रः। ३। इच्छे—इच्छामि। आआ.। ४। गच्छेत—गच्छेत्। आआ.।

शक्र उवाच,—

भ्रातॄन् द्रक्ष्यसि स्वर्गे त्वम्, अग्रतस् त्रिदिवं गतान्,
कृष्णया सहितान् सर्वान्। मा शुचो, भरतर्षभ। ५

निक्षिप्य मानुषं देहं गतास् ते, भरतर्षभ।
अनेन त्वं शरीरेण स्वर्गं गन्ता, न संशयः। ६

युधिष्ठिर उवाच,—

अयं श्वा, भूत-भव्येश, भक्तो मां नित्यम् एव ह।
स गच्छेत मया सार्धम्। आनृशंस्या हि मे मतिः। ७

शक्र उवाच,—

अमर्त्यत्वं मत्समत्वं च, राजन्,
श्रियं कृत्स्नां महतीं चैव सिद्धिम्
सं-प्राप्तो ऽसि स्वर्ग-सुखानि च त्वं।
त्यज श्वानं। नात्र नृशंसम् अस्ति। ८

युधिष्ठिर उवाच,—

अनार्यम्, आर्येण, सहस्र-नेत्र,
शक्यं कर्तुं, दुष्करम् एतद्, आर्य।
मा मे श्रिया सं-गमनं तयास्तु
यस्याः कृते भक्त-जनं त्यजेयम्। ९

५। त्रि-दिवम्—स्वर्गम्। ७। भूत-भव्येशः—अतीतानागतयोः प्रभुः। भक्तः—पूज्य इति बुद्ध्या अनु-रक्तः। आनृशंस्या—अ-निष्ठुरा। ९। 'अनार्यं [यथा स्यात् तथा कर्तुं] शक्यम् [अपि] एतद् आर्येण दुष्करम्' इत्यन्वयः। संगमनम्—संयोगः।

इन्द्र उवाच,—

स्वर्गे लोके श्ववतां नास्ति धिष्ण्यम्—
इष्टा-पूर्तं क्रोध-वशा हरन्ति ।
ततो विचार्य क्रियतां, धर्म-राज ।
त्यज श्वानं । नात्र नृशंसम् अस्ति । १०

युधिष्ठिर उवाच,—

भक्त-त्यागं प्राहुर् अत्यन्त-पापं,
तुल्यं लोके ब्रह्म-वध्या-कृतेन ।
तस्माद् नाहं जातु कथञ्चनाद्य
त्यक्ष्याम्येनं स्व-सुखार्थी, महेन्द्र । ११
भीतं भक्तं, नान्यद् अस्तीति चार्तं,
प्राप्तं, क्षीणं रक्षणे, प्राण-लिप्सुम्
प्राण-त्यागाद् अप्यहं नैव मोक्तुं
यतेयं वै । नित्यम् एतद् व्रतं मे । १२

इन्द्र उवाच,—

शुना दृष्टं क्रोध-वशा हरन्ति
यद् दत्तम् इष्टं विवृतम् [अथो] हुतं च ।
तस्माच् छुनस् त्यागम् इमं कुरुष्व ।
शुनस् त्यागात् प्राप्स्यसे देव-लोकम् । १३

१०। धिष्ण्यम्—स्थानम् । पं. २। क्रोध-वशा नाम देव-गणा
(नी.) [श्व-साहचर्यादिना अशुचेर्] इष्टा-पूर्त-फलं घ्नन्ति । इष्टा-
पूर्तम्—Cf. उपरिष्टात् ५।१८।१४ टी. ११। ब्रह्म-वध्या—ब्रह्म-हत्या ।
१३। विवृतम्—अनावृतम् । प्राप्स्यसे—प्राप्स्यसि । आआ. ।

त्यक्त्वा भ्रातॄन् दयितां चापि कृष्णां,
प्राप्तो लोकः कर्मणा स्वेन, वीर ।
श्वानं चैनं न त्यजसे कथं नु ?
त्यागं कृत्स्नं चास्थितो मुह्यसे ऽद्य । १४

युधिष्ठिर उवाच,—

न विद्यते सन्धिर् अथापि विग्रहो
मृतैर् मर्त्यैर् इति लोकेषु निष्ठा ।
न ते मया जीवयितुं हि शक्यास् ।
ततस् त्यागस् तेषु कृतो, न जीवताम् । १५

प्रति-प्रदानं शरणागतस्य
स्त्रिया वधो ब्राह्मण-स्वापहारः
मित्र-द्रोहस्, तानि चत्वारि, शक्र ।
भक्त-त्यागश् चैव समो मतो मे । १६

वैशम्पायन उवाच,—

तद् धर्म-राजस्य वचो निशम्य,
धर्म-स्व-रूपी भगवान् उवाच
युधिष्ठिरं, प्रीति-युक्तो, नरेन्द्रं
श्लक्ष्णैर् वाक्यैः संस्तव-सं-प्रयुक्तैः,— १७

---

१४ । त्यजसे—त्यजसि ; मुह्यसे—मुह्यसि । आआ. । १५ । निष्ठा—दृढ़ा स्थितिः । १६ । प्रतिप्रदानम्—यतः पलायनं तस्मा एव समर्पणम् । भीति-प्रदानम् इति प्रतीचां वर्धमानस्य च पाठः

"अभिजातो ऽसि, राजेन्द्र, पितुर् वृत्तेन मेधया
अनुक्रोशेन चानेन सर्व-भूतेषु, भारत। १८

पुरा द्वैत-वने चासि मया, पुत्र, परीक्षितः,
पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः, १९

भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातराव् उभौ
मात्रोः साम्यम् अभीप्सन् वै नकुलं जीवम् इच्छसि। २०

अयं श्वा भक्त इत्येव त्यक्तो देव-रथस् त्वया।
तस्मात् स्वर्गे न ते तुल्यः कश्चिद् अस्ति, नराधिपः। २१

अतस् तवाक्षया लोकाः। स्व-शरीरेण, भारत,
प्राप्तो ऽसि, भरत-श्रेष्ठ, दिव्यां गतिम् अनुत्तमाम्।" २२

ततो धर्मश् च शक्रश् च मरुतश् चाश्विनाव् अपि
देवा देवर्षयश् चैव रथम् आरोप्य पाण्डवम्, २३

प्रययुः स्वैर् विमानैस् ते, सिद्धाः काम-विहारिणः,
सर्वे वि-रजसः पुण्याः पुण्य-वाग्-बुद्धि-कर्मिणः। २४

स तं रथं समास्थाय, राजा कुरु-कुलोद्वहः
ऊर्ध्वम् आचक्रमे शीघ्रं, तेजसावृत्य रोदसी। २५

ततो देव-निकाय्य-स्थो नारदः सर्व-लोक-वित्
उवाचोच्चैस् तदा वाक्यं, बृहद्-वादी, बृहत्तपाः,— २६

१८। अभिजातः—कुलीनत्व-प्राप्तः। पितुः—पाण्डोः। २०। इच्छसि—ऐषीः। पा ३।२।१३१। २५। आचक्रमे—आरुरोह। पा. १।३।४०। रोदसी—द्यावापृथिव्यौ। २६। निकाय्य-स्थः—निवास-स्थः

"ये ऽपि राजर्षयः पूर्वे ते चापि समुपस्थिताः ।
कीर्तिं प्रच्छाद्य तेषां वै कुरु-राजो ऽधितिष्ठति । २७

लोकान् आवृत्य यशसा तेजसा वृत्त-सम्पदा
स्व-शरीरेण सं-प्राप्तं नान्यं शुश्रुम पाण्डवात् । २८

तेजांसि यानि दृष्टानि भूमिष्ठेन त्वया, विभो,
वेश्मानि, भुवि, देवानां पश्यामूनि सहस्रशः ।" २९

नारदस्य वचः श्रुत्वा, राजा वचनम् अब्रवीत्,
भ्रातॄन् अपश्यन्, धर्मात्मा, स्व-पक्ष्यांश् चैव पार्थिवान्,—३०

"शुभं वा यदि वा पापं, भ्रातॄणां स्थानम् अद्य मे ।
तद् एव प्राप्तुम् इच्छामि, लोकान् अन्यान् न कामये ।" ३१

राज्ञस् तु वचनं श्रुत्वा, देव-राजः पुरन्दरः
आनृशंस्य-समायुक्तं प्रत्युवाच युधिष्ठिरम्,— ३२

"स्थाने ऽस्मिन् वस, राजेन्द्र, कर्मभिर् निर्जिते शुभैः ।
किं त्वं मानुष्यकं स्नेहम् अद्यापि परिकर्षसि ? ३३

सिद्धिं प्राप्तो ऽसि परमां यथा नान्यः पुमान् क्वचित् ।
नैव ते भ्रातरः स्थानं संप्राप्ताः, कुरु-नन्दन । ३४

अद्यापि मानुषो भावः स्पृशते त्वां, नराधिप ।
स्वर्गो ऽयं । पश्य देवर्षीन् सिद्धांश् च त्रिदिवालयान् ।" ३५

---

२७ । समुपस्थिताः—स्मृति-विषयाः सन्ति, स्मर्यन्ते । ३३ । परि-कर्षसि—वहसि । ३५ । स्पृशते—स्पृशति । आआ. ।

युधिष्ठिरस् तु देवेन्द्रम् एवं-वादिनम् ईश्वरम्
पुनर् एवाब्रवीद्, धीमान्, इदं वचनम् अर्थवत्,— ३६

"तैर् विना नोत्सहे वस्तुम् इह, दैत्य-निबर्हण।
गन्तुम् इच्छामि तत्राहं यत्र मे भ्रातरो गताः, ३७

यत्र सा बृहती श्यामा बुद्धि-सत्त्व-गुणान्विता
द्रौपदी योषितां श्रेष्ठा यत्र चैव सुता मम।" ३८

दुर्योधनं श्रिया जुष्टं ददर्शासीनम् आसने,
देवैर् भ्राजिष्णुभिः साध्यैः सहितं पुण्य-कर्मभिः। ३९

ततो युधिष्ठिरो, दृष्ट्वा दुर्योधनम् अमर्षितः,
सहसा सन्निवृत्तो ऽभूच् छ्रियं दृष्ट्वा सु-योधने, ४०

ब्रुवन् उच्चैर् वचस् तान् वै,—"नाहं, दुर्योधनेन वै
सहितः, कामये लोकान्, लुब्धेनादीर्घ-दर्शिना, ४१

यत्-कृते पृथिवी सर्वा सुहृदो बान्धवास् तथा
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महा-वने। ४२

अस्ति, देवा, न मे कामः सुयोधनम् उदीक्षितुम्।
तत्राहं गन्तुम् इच्छामि यत्र ते भ्रातरो मम।" ४३

"नैवम्" इत्यब्रवीत् तं तु नारदः, प्रहसन्न् इव,
"स्वर्गे निवासे, राजेन्द्र, विरुद्धं चापि नश्यति। ४४

४४। विरुद्धम्—वैरादिकम्।

समागच्छ यथा-न्यायं राज्ञा दुर्योधनेन नौ ।
स्वर्गो ऽयं । नेह नैराणि भवन्ति, मनुजाधिप ।" ४५

नारदेनैवम् उक्तस् तु कुरु-राजो युधिष्ठिरः
भ्रातॄन् पप्रच्छ, मेधावी वाक्यम् एतद् उवाच ह,— ४६

"यदि दुर्योधनस्यैते वीर-लोकाः सनातनाः,
ये ते वीरा महात्मानो भ्रातरो मे महा-व्रताः
तेषाम् इदानीं के लोकाः ? द्रष्टुम् इच्छामि तान् अहम्, ४७

कर्णं चैव महात्मानं कौन्तेयं सत्य-सङ्गरम्,
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् । ४८

ये च शस्त्रैर् वधं प्राप्ताः क्षत्र-धर्मेण पार्थिवाः,
क्व नु ते ? पार्थिवान्, ब्रह्मन्, नैतान् पश्यामि, नारद । ४९

शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश् च सर्वशः
अभिमन्युं च दुर्धर्षं द्रष्टुम् इच्छामि, नारद । ५०

राजानो राज-पुत्राश् च ये मदर्थे हता रणे,
क्व ते महा-रथाः सर्वे शार्दूल-सम-विक्रमाः ? ५१

कच्चिद् न तैर् अवाप्तो ऽयं नृपैर् लोको ऽक्षयः शुभः !
न तैर् अहं विना वत्स्ये, भ्रातृभिर् ज्ञातिभिस् तथा । ५२

किं मे भ्रातृ-विहीनस्य स्वर्गेण, सुर-सत्तमाः ?
यत्र ते मम स स्वर्ग । नायं स्वर्गो मतो मम ।" ५३

---

५२ । वत्स्ये—वत्स्यामि । आआ. ।

द्वितीयो ऽध्यायः

नरक-प्रवेशः

"यदि नौ तत्र ते श्रद्धा, गम्यतां तत्र मा चिरम्।
प्रिये हि तव वर्तामो देव-राजस्य शासनात्।" १

इत्युक्त्वा तां, ततो देवा देव-दूतम् उपादिशन्,
युधिष्ठिरस्य सुहृदो दर्शयेति, परन्तप। २

ततः कुन्ती-सुतो राजा देव-दूतश् च जग्मतुः,
सहितौ, राज-शार्दूल, यत्र ते पुरुषर्षभाः। ३

अग्रतो देव-दूतश् च ययौ राजा च पृष्ठतः
पन्थानम् अशुभं दुर्गं, सेवितं पाप-कर्मभिः, ४

तमसा सं-वृतं घोरं केश-शैवल-शाद्वलम्
युक्तं पाप-कृतां गन्धैर्, मांस-शोणित-कर्दमम्, ५

दंशोत्पातक-भल्लूक-मक्षिका-मशकावृतम्,
इतश् चेतश् च कुणपैः समन्तात् परिवारितम्, ६

अस्थि-केश-समाकीर्णं, कृमि-कीट-समाकुलम्,
ज्वलनेन प्रदीप्तेन समन्तात् परिवेष्टितम्, ७

अयो-मुखैश् च काकाद्यैर् गृध्रैश् च समभिद्रुतम्,
सूची-मुखैस् तथा प्रेतैर् विन्ध्य-शैलोपमैर् वृतम्, ८

१। श्रद्धा—स्पृहा। वर्तामः—वर्तामहे, तिष्ठामः। पआ।
६। उत्पातकाः—उपद्रविणः। कुणपैः—शवैः। ७। ज्वलनेन—अग्निना।

मेदो-रुधिर-युक्तैश् च च्छिन्न-बाहूरु-पाणिभिः
निकृत्तोदर-पादैश् च तत्र तत्र प्रवेरितैः । ९

स तं कुणप-दुर्गन्धम् अ-शिवं रोम-हर्षणम्
जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन् । १०

ददर्शोष्णोदकैः पूर्णां नदीं चापि सु-दुर्गमाम्
असि-पत्र-वनं चैव निशित-क्षुर-संवृतम् , ११

करम्भ-वालुकास् तप्ता आयसीश् च शिलाः पृथक्,
लौह-कुम्भीश् च तैलस्य क्वाथ्यमानाः समन्ततः, १२

कूट-शाल्मलिकं चापि दुःस्पर्शं तीक्ष्ण-कण्टकम् ।
ददर्शान्याश् च कौन्तेयो यातनाः पाप-कर्मिणाम् । १३

स तं दुर्गं समालक्ष्य, देव-दूतम् उवाच ह,—
"कियदध्वानम् अस्माभिर् गन्तव्यम् इमम् ईदृशम् ? १४

क्व च ते भ्रातरो मह्यं ? तद् ममाख्यातुम् अर्हसि ।
देशो ऽयं कश् च देवानाम् एतद् इच्छामि वेदितुम् ।" १५

स सं-निववृते, श्रुत्वा धर्म-राजस्य भाषितम्,
देव-दूतो, ऽब्रवीच् चैनम्,—"एतावद् गमनं तव ।" १६

---

९ । प्रवेरितैः [प्र-अव-ईर्+त, ३।ब.]—इतस् ततः प्रक्षिप्तैः । १२ । करम्भ-वालुकाः—भृज्यमान-वालुकाः, भ्राष्ट्र-वालुकाः । Cf. मेति. & कुभ. १२।७६ १३ । कूट-शाल्मलिकः—नरकस्य दुरारोहः कण्टकाच्छन्नो लौह-शाल्मलि-वृक्षः । १४ । तम्—पन्थानम् इति शेषः । अध्वानम्—अत्यन्त-संयोगे (व्याप्तौ) द्वितीया । पा. २।३।५। १५ । मह्यम्—मम ।

युधिष्ठिरस् तु निर्विण्णस् तेन गन्धेन मूर्च्छितः,
निवर्तने धृत-मनाः, पर्यावर्तत, भारत। १७

स सन्निवृत्तो धर्मात्मा दुःख-शोक-समाहतः
शुश्राव तत्र वदतां दीना वाचः समन्ततः,— १८

"अनुग्रहार्थम् अस्माकं तिष्ठ तावद् मुहूर्तकम्।
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः। १९

सन्तिष्ठस्व, महा-बाहो, मुहूर्तम् इह, भारत।
त्वयि तिष्ठति, कौरव्य, यातनास्मान् न बाधते।" २०

"अहो कृच्छ्रम् !" इति प्राह तस्थौ स च युधिष्ठिरः,
उवाच—"के भवन्तो वै ? किमर्थं चेह तिष्ठथ ?" २१

इत्युक्तास् ते ततः सर्वे समन्ताद् अवभाषिरे,—
"कर्णो ऽहम्" "भीमसेनो ऽहम्" "अर्जुनो ऽहम्" इति, प्रभो, २२

"नकुलः" "सहदेवो ऽहं" "धृष्टद्युम्नो ऽहम्" इत्युत।
"द्रौपदी" "द्रौपदेयाश्" च इत्येवं ते विचुक्रुशुः। २३

ता वाचः स तदा श्रुत्वा, तद्देश-सदृशीर्, नृप,
ततो विममृशे राजा,—'किं न्विदं दैव-कारितम् ? २४

१७। निर्विण्णः—विरक्तः। पर्यावर्तत—जुघूर्णा। २१। कृच्छ्रम्—कष्टम्। २४। विममृशे—विममर्श, विचारयामास। आआ.।

किं नु तत् कलुषं कर्म कृतम् एभिर् महात्मभिः
य इमे पाप-गन्धे ऽस्मिन् देशे सन्ति सु-दारुणे ? २५

किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सु-योधनः
महेन्द्र इव लक्ष्मीवान् आस्ते, परम-पूजितः ? २६

किं नु सुप्तो ऽस्मि, जागर्मि, चेतयामि, न चेतये ?
अहो चित्त-विकारो ऽयं, स्याद् वा मे चित्त-विभ्रमः !' २७

एवं बहु-विधं राजा विममर्श युधिष्ठिरः
दुःख-शोक-समाविष्टश् चिन्ता-व्याकुलितेन्द्रियः । २८

क्रोधम् आहारयच् चैव तीव्रं धर्म-सुतो नृपः,
देवांश् च गर्हयामास धर्मं चैव युधिष्ठिरः । २९

स तीव्र-शोक-सन्तप्तो देव-दूतम् उवाच ह,—
"गम्यतां तत्र, येषां त्वं दूतस् तेषाम् उपान्तिकम् । ३०

नह्यहं तत्र यास्यामि, स्थितो ऽस्मीति निवेद्यताम् ।
मत्-संश्रयाद् इमे दूनाः सुखिनो भ्रातरो हि मे ।" ३१

इत्युक्तः, स तदा दूतः, पाण्डु-पुत्रेण धीमता,
जगाम तत्र यत्रास्ते देव-राजः शत-क्रतुः । ३२

निवेदयामास च तद् धर्म-राज-चिकीर्षितम्
यथोक्तं धर्म-पुत्रेण, सर्वम् एव, जनाधिप । ३३

---

२७ । चेतयामि—स-चेतनो ऽस्मि । २९ । आहारयत्—समचिनोत् ।
३१ । दूनाः [दू + त, १।ब]—क्लिष्टाः ।

तृतीयो ऽध्यायः

स्वर्ग-वासः

स्थिते मुहूर्तं पार्थो तु धर्म-राजे युधिष्ठिरे
आजग्मुस् तत्र, कौरव्य, देवाः शक्र-पुरो-गमाः । १

स च विग्रहवान् धर्मो राजानं प्रसमीक्षितुम्
तत्राजगाम यत्रासौ कुरु-राजो युधिष्ठिरः । २

तेषु भासुर-देहेषु पुण्याभिजन-कर्मसु
समागतेषु देवेषु व्यगमत् तत् तमो, नृप । ३

नादृश्यन्त च तास् तत्र यातनाः पाप-कर्मिणाम्,
नदी वैतरणी चैव कूट-शाल्मलिना सह ।
लौह-कुम्भ्यः शिलाश् चैव नादृश्यन्त, भयानकाः । ४

विकृतानि शरीराणि यानि तत्र समन्ततः
ददर्श राजा कौरव्यस्, तान्यदृश्यानि चाभवन् । ५

ततो वायुः सुख-स्पर्शः पुण्य-गन्ध-वहः शुचिः
ववौ, देव-समीप-स्थः, शीतलो ऽतीव, भारत । ६

मरुतः सह शक्रेण वसवश् चाश्विनौ सह,
साध्या रुद्रास् तथादित्या ये चान्ये ऽपि दिवौकसः,
सर्वे तत्र समाजग्मुः सिद्धाश् च परमर्षयः । ७

ततः शक्रः सुर-पतिः, श्रिया परमया युतः,
युधिष्ठिरम् उवाचेदं—सान्त्व-पूर्वम् इदं वचः,— ८

३ । अभिजनः—कुलम्, वंशः ।

"युधिष्ठिर महा-बाहो, प्रीता देव-गणास् तव ।
एह्येहि, पुरुष-व्याघ्र, कृतम् एतावता, विभो । ९

सिद्धिः प्राप्ता, महा-बाहो, लोकाश् चाप्यक्षयास् तव ।
न च मन्युस् त्वया कार्यः, शृणु चेदं वचो मम । १०

अवश्यं नरकस्, तात, द्रष्टव्यः सर्व-राजभिः ।
शुभानाम् अशुभानां च द्वौ राशी, पुरुषर्षभ । ११

यः पूर्वं सु-कृतं भुङ्क्ते, पश्चाद् निरयम् एति सः ।
पूर्वं नरक-भाग् यस् तु पश्चात् स्वर्गम् उपैति सः । १२

भूयिष्ठं पाप-कर्मा यः स पूर्वं स्वर्गम् अश्नुते ।
तेन त्वम् एवं गमितो मया श्रेयो-ऽर्थिना, नृप । १३

व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति ।
व्याजेनैव ततो, राजन्, दर्शितो नरकस् तव । १४

यथैव त्वं तथा भीमस् तथा पार्थो यमौ तथा
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः । १५

आगच्छ, नर-शार्दूल । मुक्तास् ते चैव कल्मषात्
स्व-पक्ष्याश् चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गम् अनुप्राप्तास् । तान् पश्य, भरतर्षभ । १६

---

९ । कृतम्—पर्याप्तिः । १४ । व्याजेन—छलेन, कापट्येन, गज-वाची शब्दो मनुष्य-परत्वेन श्रावित इत्युपचार-च्छलेन । उपचीर्णः—वञ्चितः । १६ । तुभ्यम्—त्वदर्थे ।

कर्णश् चैव महेष्वासः सर्व-शस्त्र-भृतां वरः,
स गतः परमां सिद्धिं, यदर्थं परितप्यसे । १७

तं पश्य पुरुष-व्याघ्रम् आदित्य-तनयं, विभो,
स्व-स्थान-स्थं, महा-बाहो । जहि शोकं, नरर्षभ ! १८

भ्रातॄन् पुत्रांस् तथा पश्य स्व-पक्ष्यांश् चैव पार्थिवान्,
स्वं स्वं स्थानम् अनुप्राप्तान् । व्येतु ते मानसो ज्वरः ! १९

कृच्छ्रं पूर्वं चानुभूय इतः प्रभृति, कौरव,
विहरस्व मया सार्धं, गत-शोको निरामयः । २०

कर्मणां, तात, पुण्यानां ज्ञानानां तपसां स्वयम्
दानानां च, महा-बाहो, फलं प्राप्नुहि, पार्थिव ! २१

अद्य त्वां देव-गन्धर्वा दिव्याश् चाप्सरसो दिवि
उपसेवन्तु, कल्याणं, वि-रजो-ऽम्बर-भूषणाः । २२

राजसूय-जिताँल् लोकान् अश्वमेधाभिनिर्मितान्
प्राप्नुहि त्वं, महा-बाहो, तपसश् च महा-फलम् । २३

उपर्युपरि राज्ञां हि तव लोका, युधिष्ठिर,
हरिश्चन्द्र-समः, पार्थ, येषु त्वं विहरिष्यसि । २४

---

२२ । उपसेवन्तु—उपसेवन्ताम्, परिचरन्तु । पआ. । २४ । हरिश्चन्द्रः—त्रि-शङ्कु-पुत्रः सूर्य-वंश्यो राजा हरिश्चन्द्रो विश्वामित्राय प्रार्थयिष्यमाणस्य यस्य कस्यचिद् धनस्य दानं प्रतिश्रुत्य तस्मै प्रार्थितं सकलं राज्यं ददौ, दक्षिणा-दानाय च स-दार-पुत्रम् आत्मानं विचिक्रिये ।

मान्धाता यत्र राजर्षिर् यत्र राजा भगीरथः,
दौष्मन्तिर् यत्र भरतस् तत्र त्वं विहरिष्यसि। २५

एषा देव-नदी पुण्या, पार्थ, त्रैलोक्य-पावनी
आकाश-गङ्गा, राजेन्द्र। तत्राप्लुत्य गमिष्यसि। २६

अत्र स्नातस्य भावस् ते मानुषो विगमिष्यति।
गत-शोको निरायासो मुक्त-वैरो भविष्यसि।" २७

एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम्,
धर्मो विग्रहवान् साक्षाद् उवाच सुतम् आत्मनः,— २८

"भो भो राजन् महा-प्राज्ञ, प्रीतो ऽस्मि तव, पुत्रक,
मद्-भक्त्या सत्य-वाक्येन क्षमया च दमेन च। २९

एषा तृतीया जिज्ञासा तव, राजन्, कृता मया।
न शक्यसे चालयितुं स्व-भावात्, पार्थ, हेतुतः। ३०

२५। मान्धाता—युवनाश्व-पुत्रः सूर्य-वंश्यो राजा मान्धाता जननी-निरपेक्ष एव पुत्रार्थि-मन्त्र-पूतं जलं पीतवतः पितुः कुक्षौ जातो देव-कृतेन विवरेण निश्चक्राम। निखिलां महीं विजित्य स शिष्टं लवणं जिगीषुस् तेनैवाहन्यत। ईजे स राज-सूय-शतेनाश्व-मेध-शतेन च (जीको.)। Cf. उपरिष्टात् ६।२।४टी.। भगीरथः—सूर्य-वंश्यो राजा दिलीप-पुत्रो भगीरथः कपिलेन भस्मी-कृतान् प्रपितामहस्य वैमात्रेय-भ्रातॄन् उद्धर्तुं महता तपसा गङ्गां हिमालयात् रसा-तलम् अवतारयामास। दौष्मन्तिः—आसीद् अशेष-समर-विजयी चक्र-वर्ती दुष्मन्त-शकुन्तलयोः पुत्रो भरतो नाम। ईजे स राज-सूय-शतेनाश्व-मेध-सहस्रेण च (जीको.)। २९। प्रीतः—सन्तुष्टः। ३०। जिज्ञासा—ज्ञातुम् इच्छा, परीक्षा। हेतुतः—[केनचित्] कारणेन।

इदं तृतीयं, भ्रातृणाम् अर्थे यत् स्थातुम् इच्छसि।
विशुद्धो ऽसि, महा-भाग, सुखी विगत-कल्मषः। ३१

न च ते भ्रातरः सर्वे नरकार्हा, विशां पते।
मायैषा देव-राजेन महेन्द्रेण प्रयोजिता। ३२

न सव्य-साची भीमो वा यमौ वा पुरुषर्षभौ
कर्णो वा सत्य-वाक् शूरो नरकार्हाश् चिरं, नृप। ३३

न कृष्णा राज-पुत्री च नरकार्हा कथञ्चन।
एह्येहि, भरत-श्रेष्ठ, पश्य चेमांस् त्रि-लोक-गान्!" ३४

एवम् उक्तः, स राजर्षिस्, तव पूर्व-पितामहः,
जगाम सह धर्मेण सर्वैश् च त्रिदिवालयैः। ३५

गङ्गां देव-नदीं पुण्यां पावनीम् ऋषि-संस्तुताम्
अवगाह्य, ततो राजा तनुं तत्याज मानुषीम्। ३६

ततो दिव्य-वपुर् भूत्वा, धर्म-राजो युधिष्ठिरः
स्तूयमानो ययौ तत्र यत्र ते कुरु-पुङ्गवाः। ३७

ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम्
तेनैव दृष्ट-पूर्वेण सादृश्येनैव सूचितम्, ३८

३४। त्रि-लोक-गान्—त्रि-लोकीं पर्यटतः [त्रिदिवालयान्]। Cf. भाग. १।५।७। ३५। त्रिदिवालयैः—स्वर्ग-वासिभिः। ३६। गङ्गां देव-नदीम्—स्वर्ग-स्थां गङ्गां मन्दाकिनीं नाम। ३८। ब्राह्मेण—ब्रह्म-निष्ठा-जात-ज्योतिर्विशिष्टेन। ब्रह्मणा आराध्येन इति नी.। Cf. 'ब्राह्मया लक्ष्म्या विवर्जिताम्' (तपः-सम्भूतया शोभया त्यक्ताम्)। उपरिष्टात् ३।३६।११।

दीप्यमानं स्व-वपुषा दिव्यैर् अस्त्रैर् उपस्थितम्
उपास्यमानं वीरेण फाल्गुनेन सु-वर्चसा । ३९

ताव् उभौ पुरुष-व्याघ्रौ समुद्वीक्ष्य युधिष्ठिरम्,
यथावत् प्रतिपेदाते पूजया, देव-पूजितौ । ४०

अपरस्मिन्न् अथोद्देशे कर्णं शस्त्र-भृतां वरम्
द्वादशादित्य-सहितं ददर्श कुरु-नन्दनः । ४१

अथापरस्मिन्न् उद्देशे मरुद्-गण-वृतं विभुम्
भीमसेनम् अथापश्यत् तेनैव वपुषान्वितम् । ४२

अश्विनोस् तु तथा स्थाने दीप्यमानौ स्व-तेजसा
नकुलं सहदेवं च ददर्श कुरु-नन्दनः । ४३

तथा ददर्श पाञ्चालीं कमलोत्पल-मालिनीम्,
वपुषा स्वर्गम् आक्रम्य तिष्ठन्तीम्, अर्क-वर्चसम् । ४४

अथैनां सहसा राजा स्प्रष्टुम् ऐच्छद् युधिष्ठिरः ।
ततो ऽस्य भगवान् इन्द्रः कथयामास देव-राट्,— ४५

"श्रीर् एषा द्रौपदी-रूपा त्वदर्थे मानुषं गता,
अ-योनि-जा लोक-कान्ता पुण्य-गन्धा, युधिष्ठिर । ४६

---

३९ । उपस्थितम्—सेवितम् । उपास्यमानम्—अपेक्ष्यमाणम्, परि-पाल्यमानम् । ४० । प्रतिपेदाते—प्रतिजगृहतुः । ४१ । सहितम्—सदृशम् इति पाठान्तरम् । ४२ । तेनैव—पूर्व-परिचितेनैव । ४६ । मानुषम्—मनुष्यत्वम् । अ-योनि-जा—धृष्टद्युम्नो द्रौपदी च द्रुपद-विजेतुर् द्रोणस्य मरण-कामनया आहूते यज्ञे वेद्या उद्-बभूवतुः । Cf. उपरिष्टात् ।१७।१०।

एते पञ्च महा-भागा गन्धर्वाः पावक-प्रभाः
द्रौपद्यास् तनया, राजन्, युष्माकम्, अमितौजसः। ४७

पश्य गन्धर्व-राजानं धृत-राष्ट्रं मनीषिणम्।
एनं च त्वं विजानीहि भ्रातरं पूर्व-जं पितुः। ४८

अयं ते पूर्व-जो भ्राता कौन्तेयः पावक-द्युतिः
सूर्य-पुत्रो रथि-श्रेष्ठो राधेय इति विश्रुतः। ४९

साध्यानाम् अथ देवानां विश्वेषाम् मरुताम् अपि
गणेषु पश्य, राजेन्द्र, वृष्ण्यन्धक-महा-रथान्
सात्यकि-प्रमुखान् वीरान्, भोजांश् चैव महा-बलान्। ५०

सोमेन सहितं पश्य सौभद्रम् अ-पराजितम्
अभिमन्युं महेष्वासं निशा-कर-सम-द्युतिम्। ५१

एष पाण्डुर् महेष्वासः, कुन्त्या माद्र्या च सङ्गतः,
विमानेन सदाभ्येति, पिता तव, ममान्तिकम्। ५२

४७। गन्धर्वाः—देवानां गायकाः। द्रौपद्याः—पञ्चमी। पा. १।४।३०। ४८। गन्धर्व-राजानम्—गन्धर्व-राजम्। आप्र.। पा. ५।४।९१ ४९। कौन्तेयः सूर्य-पुत्रः—पाण्डोः कानीनः पुत्रः विवाहात् प्राग् एव कुन्त्यां सूर्याज् जातः। मनुः ९।१७२। राधेयः—[सारथेर् अधिरथस्य पत्न्याः] राधायाः अपविद्धः पुत्रः। मनुः ९।१७१। ५०। साध्याः—एक-नामानो द्वादश गण-देवाः। विश्वे—एक-नामानो विश्वा-पुत्रा दश गण-देवाः। मरुतः—रुद्र-पृश्न्योः पुत्रा एक-नामानो षष्टिः सप्त वा त्रि-गुणा गण-देवाः। ५२। Cf. उपरिष्टात् २।२।११-१४।

वसुभिः सहितं पश्य भीष्मं शान्तनवं नृपम्,
द्रोणं बृहस्पतेः पार्श्वे । गुरुम् एनं निशामय । ५३
एते चान्ये मही-पाला योधास् तव च, पाण्डव,
गन्धर्व-सहिता यान्ति, यक्ष-पुण्य-जनैस् तथा । ५४
गुह्यकानां गतिं चापि केचित् प्राप्ता, नराधिप,
त्यक्त्वा देहं । जितः स्वर्गः पुण्य-वाग्-बुद्धि-कर्मभिः ।" ५५

एतत् ते सर्वम् आख्यातं विस्तरेण, महा-द्युते,
कुरूणां चरितं कृत्स्नं पाण्डवानां च, भारत । ५६

इत्यार्षे श्रीभारते वैयासिके
दश-साहस्रयां संहितायाम्
स्वर्गारोहण-पर्व ।

समाप्तं चेदं भारतं वैयासिकं
गोविन्दनाथ-प्रोक्तम् ।

---

५३ । पं. १—द्यौर् वसूनाम् अन्यतमः पत्न्या अनुरोधात् वशिष्ठस्य धेनुं हृत्वा तस्य शापेन मानुष्यके लोके भीष्मो बभूव । देहं त्यक्त्वा स स्व-गणेन समगच्छत । (देभा.) । ५४-५५ । यक्ष-गुह्यकाः—देवोद्भवाः प्राणि-विशेषाः । प्रास-गदादि-हस्तास् ते धनेशं कुबेरं तथा तस्य धनागारम् उद्यानानि च रक्षन्ति । 'विद्याधराप्सरो-यक्ष-रक्षो-गन्धर्व-किन्नराः, पिशाचो गुह्यकः सिद्धो भूतो ऽमी देव-योनयः' । (अमरः) ।

इति तारकालोके नाम भारत-वृत्तौ
स्वर्गारोहण-पर्व ।

समाप्ता चेयं तारकालोको नाम
गोविन्दनाथ-कृता भारत-वृत्तिः ।

उपसंहारः

सौतिर् उवाच,—

एतच् श्रुत्वा द्विज-श्रेष्ठात्, स राजा जनमेजयः
विस्मितोऽभवद् अत्यर्थं, यज्ञ-कर्मान्तरेष्वथ। १

ततः समापयामासुः कर्म तत् तस्य याजकाः।
आस्तीकश् चाभवत् प्रीतः परिमोक्ष्य भुजङ्गमान्। २

ततो द्वि-जातीन् सर्वांस् तान् दक्षिणाभिर् अतोषयत्।
पूजिताश् चापि ते राज्ञा ततो जग्मुर् यथागतम्। ३

विसर्जयित्वा विप्रांस् तान्, राजापि जनमेजयः
ततस् तक्ष-शिलायाः स पुनर् आयाद् गजाह्वयम्। ४

एतत् ते सर्वम् आख्यातं वैशम्पायन-कीर्तितम्,
व्यासाज्ञया समाज्ञातं सर्प-सत्रे नृपस्य हि। ५

अष्टादश पुराणानि धर्म-शास्त्राणि सर्वशः
वेदाः साङ्गास तथैकत्र, भारतं चैकतः स्थितम्। ६

त्रिभिर् वर्षैर् महत् पुण्यं कृष्ण-द्वैपायनः प्रभुः
अखिलं भारतं चेदं चकार, भगवान् मुनिः। ७

३। अतोषयत्—राजेति शेषः। ५। ते—Cf. उपरिष्टात् उपक्रमणिका, १।५ (पृ. २)।

ऊर्ध्व-बाहुर् विरौम्येष, न च कश्चिच् छृणोति मे,—
"धर्माद् अर्थश् च कामश् च, स किमर्थं न सेव्यते ?" ८

न जातु कामाद् न भयाद् न लोभाद्
धर्मं त्यजेज्, जीवितस्यापि हेतोः।
नित्यो धर्मः, सुख-दुःखे त्वनित्ये।
जीवो नित्यो, हेतुर् अस्य त्वनित्यः। ९

यथा समुद्रो भगवान् यथा हि हिमवान् गिरिः
ख्याताव् उभौ रत्न-निधी, तथा भारतम् उच्यते। १०

इदं भारतम् आख्यानं यः पठेत्, सु-समाहितः,
स गच्छेत् परमां सिद्धिम् इति मे नास्ति संशयः। ११

इत्युपसंहारः।

९। भारत-सावित्री। जीवितस्यापि हेतोः—'न च' इति शेषः।

उत्तर-भागे क्रोड़-पत्रम्

(१) ५१ पृष्ठे उद्योग-पर्वणि अष्टमे ऽध्याये अष्टमं नवमं च श्लोकम् अन्तरा निवेशयितव्यो ऽयं श्लोकः,—

अहं हि तत् करिष्यामि परं पुरुष-कारतः।
दैवं तु न मया शक्यं कर्म कर्तुं कथञ्चन। ९

इतः परं नवादयः क्रमिकाः श्लोक-संख्या दशादयो भवेयुः।

(२) ५६ पृष्ठे उद्योग-पर्वणि नवमे ऽध्याये षोड़शं सप्त-दशं च श्लोकम् अन्तरा निवेशयितव्यो ऽयं श्लोकः,—

यथावध्ये वध्यमाने भवेद् दोषो, जनार्दन,
स वध्यस्यावधे दृष्ट इति धर्म-विदो विदुः। १७

इतः परं सप्त-दशादयः क्रमिकाः श्लोक-संख्याः अष्टा-दशादयो भवेयुः।

(३) ६३ पृष्ठे उद्योग-पर्वणि एकादशे ऽध्याये अष्टाविंशं नव-विंशं च श्लोकम् अन्तरा निवेशयितव्यं श्लोक-द्वयम्,—

अन्तं वीरा निषेवन्ते—मध्यं ग्राम्य-सुख-प्रियाः—
उत्तमांश्च च परिक्लेशान् भोगांश्च चातीव मानुषान्। २९

अन्तेषु रेमिरे वीरा, न ते मध्येषु रेमिरे,
अन्त-प्राप्तिं सुखं प्राहुर् दुःखम् अन्तरम् अन्तयोः । ३०

इतः परं नव-विंशत्यादयः क्रमिकाः श्लोक-संख्या एक-त्रिंश-दादयो भवेयुः ।

(४) ६६ पृष्ठे उद्योग-पर्वणि द्वादशे ऽध्याये विंशम् एक-विंशं च श्लोकम् अन्तरा निवेशयितव्या नव श्लोकाः,—

तं भुक्तवन्तम् आश्वस्तं निशायां विदुरो ऽब्रवीत्,—
"नेदं सम्यग् व्यवसितं केशवागमनं तव । २१

अनेयः श्रेयसां मन्दो धार्तराष्ट्रो, जनार्दन,
त्वयोच्यमानः श्रेयो ऽपि संरम्भाद् न ग्रहीष्यति । २२

दुर्बुद्धीनाम् अशिष्टानां बहूनां दुष्ट-चेतसाम्
प्रतीपं वचनं मध्ये तव, कृष्ण, न रोचते ।" २३

विदुरस्य वचः श्रुत्वा प्रश्रितं, पुरुषोत्तमः,
इदं प्रोवाच वचनं मधुरं मधु-सूदनः,— २४

"हितं हि धार्तराष्ट्राणां पाण्डवानां तथैव च
पृथिव्यां क्षत्रियाणां च यतिष्ये ऽहम् अमायया । २५

हितं प्रयतमानं मां शङ्केद् दुर्योधनो यदि,
हृदयस्य च मे प्रीतिर् आनृण्यं च भविष्यति । २६

---

२२ । अनेयः श्रेयसाम्—श्रेयांसि अप्रापणीयः ।

ज्ञातीनां हि मिथो भेदे यद् मित्रं नाभिपद्यते
सर्व-यत्नेन माध्यस्थ्यं, न तद् मित्रं विदुर् बुधाः । २७

न मां ब्रूयुर् अधर्मिष्ठा मूढ़ा ह्यसुहृदस् तथा,
'शक्तो नावारयत् कृष्णः संरब्धान् कुरु-पाण्डवान्' । २८

मम धर्मार्थ-युक्तं हि श्रुत्वा वाक्यम् अनामयम्
न चेद् आदास्यते बालो, दिष्टस्य वशम् एष्यति ।" २६

इतः परं क्रमिका श्लोक-संख्या एकविंशतिः त्रिंशत् भवेत् ।

(५) ६८ पृष्ठे उद्योग-पर्वणि त्रयोदशे ऽध्याये सप्तमम् अष्टमं च श्लोकम् अन्तरा निवेशयितव्यं श्लोक-द्वयम्,—

ऋषीन् शान्तनवो दृष्ट्वा सभा-द्वारम् उपस्थितान्,
त्वरमाणस् ततो भृत्यान् आसनानीत्यचोदयत् । ८

तेषु तत्रोपविष्टेषु गृहीतार्घ्येषु, भारत,
निषसादासने कृष्णो राजानश् च यथासनम् । ६

इतः परम् अष्टादयः क्रमिकाः श्लोक-संख्याः दशादयो भवेयुः ।

(६) ३७७ पृष्ठे कर्ण-पर्वणि सप्तमे ऽध्याये त्रयो-दशे श्लोके प्रथमां द्वितीयां च पंक्तिम् अन्तरा निवेशयितव्येयं पंक्तिः,—

"प्राणिनाम् अवधस्, तात, सर्व-ज्यायान् मतो मम ।

(७) ६०२ पृष्ठे शान्ति-पर्वणि सप्त-दशे ऽध्याये युधिष्ठिरोक्तेः प्राक् निवेशयितव्यं श्लोक-द्वयम्,—

सर्वत्र विहितो धर्मः स्वर्ग्यः सत्य-फलोदयः ।
बहु-द्वारस्य धर्मस्य नेहास्ति विफला क्रिया । १

यस्मिन् यस्मिंस् तु विषये यो यो याति विनिश्चयम्,
स तम् एवाभिजानाति, नान्यं, भरत-सत्तम । २

इतः परं एकादयः क्रमिकाः श्लोक-संख्यास् त्र्यादयो भवेयुः ।

पूर्व-भागे क्रोड़-पत्रं चतुर्थम्

(१) ५ पृष्ठे उपक्रमणिकायां प्रथमे ऽध्याये ऽन्तिम-श्लोकात् परम् एव निवेशयितव्यो ऽयं श्लोकः,—

यो विद्याच् चतुरो वेदान् साङ्गोपनिषदो द्विजः,
न चाख्यानम् इदं विद्याद्, नैव स स्याद् विचक्षणः । १७

पूर्व-श्लोकस्य क्रमिका संख्या अष्टा-विंशतिः षोड़श भवेत् ।

(२) तत्रैव द्वितीये ऽध्याये प्रथम-श्लोकात् पूर्वम् एव निवेशयितव्यो ऽयं श्लोकः,—

---

१ । सत्य-फलोदयः—अवश्यम्भावि-फलोदयः । क्रिया—अनुष्ठानम् ।

परिक्षिद् इति विख्यातो राजा कौरव-वंश-भृत्।
न हि तेन मृगो विद्धो जीवन् गच्छति वै वनम्। १

इतः परं एकादयः क्रमिकाः श्लोक-संख्याः द्व्यादयो भवेयुः।

(३) ४१ पृष्ठे आदि-पर्वणि षष्ठे ऽध्याये सप्तमम् अष्टमं च श्लोकम् अन्तरा निवेशयितव्यं श्लोक-पञ्चकम्,—

राजा पाण्डुर् महारण्ये मृग-व्याल-निषेविते
वने मैथुन-कालस्थं ददर्श मृग-यूथपम्। ८

ततस् तां च मृगीं तं च रुक्म-पुङ्खैः सु-पत्रिभिः
निर्बिभेद शरैस् तीक्ष्णैः पाण्डुः पञ्चभिर् आशु-गैः। ९

स च, राजन्, महा-तेजा ऋषि-पुत्रस् तपो-धनः
भार्यया सह तेजस्वी मृग-रूपेण सङ्गतः। १०

"प्रियया सह संवासं प्राप्य, काम-विमोहितः
त्वम् अप्यस्याम् अवस्थायां प्रेत-लोकं गमिष्यसि।" ११

एवम् उक्त्वा सु-दुःखार्तो जीवितात् स व्यमुच्यत
मृगः। पाण्डुश् च शोकार्तः क्षणेन समपद्यत। १२

इतः परम् अष्टादयः क्रमिकाः श्लोक-संख्यास् त्रयोदशादयो भवेयुः।

(४) तत्रैव एकादशं द्वादशं च श्लोकम् अन्तरा निवेशयितव्यं श्लोक-त्रयम्,—

सिंह-दर्पा महेष्वासाः सिंह-विक्रान्त-गामिनः
सिंह-ग्रीवा मनुष्येन्द्रा ववृधुर्, देव-विक्रमाः । १७

विवर्धमानास् ते तत्र पुण्ये हैमवते गिरौ
विस्मयं जनयामासुर् महर्षीणां समेयुषाम् । १८

पुत्राणां जन्म वृद्धिं च वैदिकाध्ययनानि च
पश्यतः सततं पाण्डोः शश्वत् प्रीतिर् अवर्धत । १९

इतः परं क्रमिका श्लोक-संख्या द्वादश विंशतिर् भवेत् ।

(५) तत्रैव त्रयो-दशे [विवर्धनेन एक-विंशे] श्लोके प्रथमां द्वितीयां च पंक्तिम् अन्तरा निवेशयितव्याः पंक्तयः,—

"राज्ञः शरीरेण सह ममापीदं कलेवरम् २१
दग्धव्यं सु-प्रतिच्छन्नम् । एतद्, आर्ये, प्रियं कुरु ।
दारकेष्व-प्रमत्ता च भवेथास् त्वं, हिता मम ।" २२

इत्युक्त्वा तं चिताग्नि-स्थं धर्म-पत्नी, नरर्षभम्,
मद्र-राजात्मजा तूर्णम् अन्वारोहद्, यशस्विनी । २३

उदार-मनसः सिद्धा गमने चक्रिरे मनः
भीष्माय पाण्डवान् दातुं धृत-राष्ट्राय चैव हि । २४

---

२२ । सुप्रतिच्छन्नम्—[वस्त्रादिभिः] समावृतम् । आर्ये—ज्यायसी सपत्नी सम्बोध्यते । दारकेषु—पुत्रेषु । २६ । तम्—पाण्डुम् ।

कृत-शौचांस् ततस् तांस् तु पाण्डवान् भरतर्षभान्
आदाय विविशुः पौराः पुरं वारण-साह्वयम्। २५

इतः परं त्रयोदशादयः [विवर्धनेन एक-विंशत्यादयः] श्लोक-संख्याः षड्विंशत्यादयो भवेयुः।

(६) १६४ पृष्ठे सभा-पर्वणि तृतीये ऽध्याये पञ्चम-श्लोकात् परं कृष्णोक्तेः प्राक् च निवेशायितव्यं श्लोक-त्रयम्,—

केचिद् धि सौहृदाद् एव न दोषं परिचक्षते।
स्वार्थ-हेतोस् तथैवान्ये प्रियम् एव वदन्त्युत। ६

प्रियम् एव परीप्सन्ते केवलात्मनि यद् धितम्।
एवं-प्रायाश् च दृश्यन्ते जन-वादाः प्रयोजने। ७

त्वं तु हेतून् व्यतीत्यैतान्, काम-क्रोधौ व्युदस्य च,
यत् क्षेमं परमं लोके यथावद् वक्तुम् अर्हसि। ८

इतः परं षडादयः क्रमिकाः श्लोक-संख्या नवादयो भवेयुः।

(७) २०३ पृष्ठे सभा-पर्वणि चतुर्थे ऽध्याये चतुस्त्रिंश-श्लोकान्ते निवेशायितव्येयं पंक्तिः,—

अस्मांस् तद् एनो ऽगच्छद् नौ कृतं, वार्हद्रथ, त्वया। ३४

६। परिचक्षते [परि-चक्ष्+अन्ते]—कथयन्ति। ७। परीप्सन्ते—लब्धुम् इच्छन्ति। ८। व्युदस्य—त्यक्त्वा। ३४। एनः—अपराधः।

(८) २२४ पृष्ठे सभा-पर्वणि नवमे ऽध्याये एकादश-श्लोकस्यान्ते निवेशयितव्येयं पंक्तिः,—

नृणां लोके हि को ऽन्यो ऽस्ति विशिष्टः केशवाद् ऋते ? ११

(९) २२७ पृष्ठे सभा-पर्वणि नवमे ऽध्याये चतुस्त्रिंशं पञ्च-त्रिंशं च श्लोकम् अन्तरा निवेशयितव्यं श्लोक-द्वयम्,—

यद् अनेन हता बाल्ये शकुनी, चित्रम् अत्र किम्,
तौ वाश्व-वृषभौ, भीष्म, यौ न युद्ध-विशारदौ ? ३५

यस्य चानेन, धर्मज्ञ, भुक्तम् अन्नं बलीयसः,
स चानेन हतः कंस इत्येतद् न महाद्भुतम् ! ३६

इतः परं पञ्च-त्रिंशदादी क्रमिके संख्ये सप्त-त्रिंशदादी भवेताम् ।

अतः परं पूर्व-भागस्य अन्ते स्थितस्य क्रोड़-पत्र-त्रयस्य श्लोकान् क्रमशो यथा-स्थानं संनिवेश्य आदितः पर-वर्ति-श्लोकानां क्रमिकाः संख्या यथा-यथं परिवर्तयेत् ।

पुनश् चोत्तर-भागे (८) ६०१ पृष्ठे शान्ति-पर्वणि षोड़शे ऽध्याये अष्टमं नवमं च श्लोकम् अन्तरा भीष्म-वाचि निवेशयितव्यो ऽयं श्लोकः,—

श्रद्दधानः शुभां विद्यां हीनाद् अपि समाप्नुयात्,
सुवर्णम् अपि चामेध्याद् आददीताविचारयन् । ९

इतः परं क्रमिकाः श्लोक-संख्या दशादयो भवेयुः ।

---

३५ । शकुनी—श्यामा, चटकी (रानि.) ।

प्रवर्धनी

पृ. ३१८, १० टी. । 'यो वा द्रोणात् पराभवेत्'—'यं वा द्रोणः पराभवेत्' इति प्रतीचाम् अवाचां च पाठः । द्रोणात् पराभवेत्—द्रोणात् पराजयेत, द्रोणेन पराभूयेत । cf. पा. १।४।२६ ।

पृ. ६१०, १०टी. । 'धर्म-विदाम्'—'ब्रह्म-विदाम्' इति प्रताप-धृतः पाठः ।

पृ. ७६०, २ टी. । पञ्च-नदम्—शतद्रु-विपाशेरावती-चन्द्रभागा-वितस्ताभिर् नाम पञ्चभिर् नदीभिः सिच्यमानः प्रदेश इदानीन्तन-पञ्जाव-नामा । क्लीवत्वम् आर्षम् ।

संशोधनी

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
४	११	वाणां	वानां
५	१४	पाते	स्रते
८	३९	ज्ञाः ।	ज्ञाः,
१२	४५टी.	दिता	दिताः
१३	५५	धम्य	धर्म्यं
,,	५२टी.	च्छ	च्छु
१६	१७टी.	तं	तम्
२०	२५	त्र	क्र
२३	२	श्रै	श्र
२५	१२टी.	र्मना	र्मणा
२६	१७	ा क	ाक
,,	२०	पय	पया
,,	,,	ते	ते ।
२७	२५	व	व,

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
२८	२टी.	रो	र्रि
३०	१७	ति	तिः
३०	१८	वं	वँ
३०	१९	चनं	चनम्
३०	२०टी.	तेः	तैः
३१	२२	ह्रौं	ह्रीं
,,	२४	लाम्	लास् ।
३४	१२	कुरुन्	कुरून्
३५	१५	याच	याच्च
३५	१६	तं	तल्
३८	२६	द्रांस्	द्रांसस्
३९	३५	समङ्ग	समच्च
४०	३४टी.	रूपेण	रूपेण
,,	,,	ग्टङ्गी	ग्टङ्गी

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
४१	३७	मह	महा
४२	५टी.	पर्थिं	पार्थिं
,,	,,	वोध	बोध
४३	७	स्वञ्जये	सञ्जयै
४४	१३	वह्न	वह्न
,,	१४टी.	अनमो	अनुमो
४६	२९	ग्गु	म्मु
४८	४२	हानि	हनि
५०	६	नाद	नार्द
,,	८	सञ्ज	सृञ्ज
५१	१३	राः ।	राः
,,	,,	त्वा नु या	त्वानुया
५२	२०टी.	लुट्ता	ट,१।१
५३	२५	।"	।

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
५३	३०	।	।”
५४-५७	शीर्षे	द्वी·प	द्वीप
५४	२	वीरा	वीर
५६	१२टी.	प्रतिवि	वि
,,	,,	अभिगन्तुम्	रोद्धुम्
५७	२३	रच	वच
,,	२४	ता	ता।
५८	१	तै	ते
५९	४टी.	म्य	भ्य
६०	३	यौ	यौ।
६१	११	ह्न	ह्ल
६२	२२	?	!
६३	२४	स्वीम	सीम
,,	,,	मीढ़	मीढ़
,,	२५	स्वरी	स्वरी
,,	२६	३६	२६
६४	१	णम्।	णम्,
,,	,,	ने	ने।
६५	११	यम्”	यम्।
,,	१२	वान्	वान्।
६६	१८	च।	च
,,	१९	णा	णाः
,,	२०टी.	मिमि:	मिभि:
,,	२१	री	री।
६८	८	तुष्णीं	तूष्णीं
,,	९	धव	धवः
,,	१२टी.	णःप्र	ण-प्र
६९	१८	?	!
७०	२१	चित:	चित:।
७१	३१	हतात्	हतान्
,,	३२	जााः	जाः
,,	३४	र्या	र्याः
,,	,,	यात्	यात्।
७२	४३	नां भ	नां, भ
७३	४९	र्घो	र्घौ
,,	५०	भुं	भुङ्
७४	५५	म्पत्	म्पत
७५	३	ह्वित	ह्विते
७५	६	कतु	कर्तु
७६	१४	स्यो	थ्यो
,,	१०टी.	गरह्ना	गरह्ला
७७	२०	?	!
७८	२७	वान्स	वान्ध
,,	२७टी.	रेन	रेण
७९	३६	जौ	जौ—
८०	४२	मम्	मम्।
,,	४३	।	।”
८१	३टी.	वार	चार
,,	,,	नम्	णम्
,,	६टी.	वे	वे)
,,	,,	या)	या.
,,	७	धात	धार्त
८२	१४	चित्,	चित्’
८३	२१टी.	र्षः	र्षः,
८४	३१टी.	नम्	नम्,
८५	शीर्षे	पञ्चद	षोड़
८६	१०	येत्”	येत् ?”
,,	११	न:	न:।
८७	२३	वन	वितु
८८	२५टी.	राय	राय]
,,	,,	क्तो	क्तो[
,,	२६	रूंश्	रूंस्
८९	३	ङ्का	ह्वा
,,	४	ङ्की	ह्वा
९१	१४	ङ्की	ह्वी
,,	१४टी.	,,	,,
९२	२३	वीत्।	वीत्,
९३	३२	।	।”
,,	६टी.	गुञ्ज	भञ्ज
९६	१०टी.	स्फ्	स्फु
,,	११टी.	यताम्।	यताम्,
,,	,,	उर्ज	ऊर्ज
९७	१३टी.	ब्धा	बुध्वा
,,	१४	कि	किं
९९	२३	३	२३
,,	२९	तुत	तुम्
१००	३०टी.	मेत्	मेत
१०१	३६टी.	यत्	। यत्
,,	३८	रशी	वशी
१०२	४७टी.	स्यात्	स्याः
,,	,,	द्यात्	द्याः
१०७	७	हंति	हंति ?
१०७	शीर्षे	द्या	द्यो
११३	,,	द्या	द्यो
१२१	,,	द्या	द्यो
१०८	२	ङ्की	ह्वी
,,	,,	धन:	धन:।
११०	२०टी.	ह्वा	च्हा
,,	२१टी.	ह्व	ह्व

पृष्ठे श्लोके	अशुद्धम्	शुद्धम्
१११ २५	स्वि	स्वि,
११२ ३१	दूर	दुर
,, ३४	भव	तव
,, ३५टी.	खाय	खाय,
११३ ३९	र्यात्	र्याम्
,, ४०टी.	तुं	रितु
११८ २९टी.	चयम्	चयः
१२३ ८टी.	वरतू	वस्तू
,, १३	श च	श्च
,, १४	धात	धार्त
१२६ ३६टी.	१।३	७।३४
,, ३८टी.	,[ ]	[ ],
१२८ ६	। ६	।'' ६
१३० २०	भाव	'भाव
,, २१	।	।'
१३७ ४६	सनि	सैनि
१३८ ५७	वण	वेण
१४२ २०	ताः,	ताः।
१४३ ३टी.	ष्ठाम्	ष्ठा
१४८ ४टी.	तोति	तीति
१५० १६	शौके	षौके
१५६ १०	ध्रुवा	ध्रुवो
१५८ १९टी.	प्रमत	प्रमत्त
१७९ शीर्षे	पव	पर्व
,, २९	सव	सर्व
१८१ १०	हाः-रथ	हा-रथः
१८३ २५	क्रूस	क्रूस्
१८३ २७टी.	सीम्	सीम्?
१९० ४	स्ते	सुते
१९२ २१	वतति	वर्तति
१९३ १०	तिका	किता
१९७ ४२	न् श	ञ् श
२०३ शीर्षे	पव	पर्व
२०६ २	ग्रामु	प्रामु
२०८ २५	ते ऽहि	ते हि
२१३ शीर्षे	पय	पर्य
२२१ ,,	पव	पर्व
२३९ ३८टी.	दाय	दार्य
,, ४४टी.	द्र	द्रु
,, ,,	द्रतं	द्रुतं
२४६ १०	ऽह्य	ह्य
२४८ २९	मी	भी
,, २६टी.	ध्रुक	ध्रुक्
,, ,,	ि	ि
२६७ शीर्षे	द्रा	द्रो
२६९ ,,	भीष्म	द्रोण
२७३ ३६	कण	कर्ण
२७६ ६	चाय	चार्य
,, ,,	कत	कत
२८३ २५टी.	दंशं	देशे
,, २६टी.	सत्वत	सात्वत
२८४ ३२टी.	वेच	वैच
२८७ ९टी.	धिस्य	धिष्य
२९६ ८टी.	वय	वर्ण
३०० २५टी.	३	३०
३०१ ३१टी.	वु	व्रु
३०२ ५	शर	शरे
३१९ १६	ैं	ै
३२४ २२	क्रस	कृष्ण
३३२ १९	घ्य	घ्ये
३३४ ३८	ग्र	ग्रु
३३५ शीर्षे	।वंशा	विंशो
३३७ ,,	विंशा	विंशो
३५० ३४	गजन्	गजान्
३५१ ३८	तत्	त्वत्
३५६ १	कण	कर्ण
३६० ३१	बौ	वौ
३६६ २७	तता	ततो
,, ,,	ि	ि
३६७ शीर्षे	कण	कर्ण
३७१ ११	च	च्
३७३ २७टी.	कुरु	कुरु
३९४ ३२टी.		
३९७ १०	रै	रैः
४०३ ४७	ष्टाः,	ष्टा,
४०८ शीर्षे	भारते	भारते
४२१ ३	हत	हतं
४२७ १६	वीर	वीरं
४४६ ३७	उत्म	उत्तम
४४७ ४८	कम	कर्म
४४८ ५३	गौर	गौर्
,, ५६	गार्	गौर्
,, ५७	धामा	धामो
,, ५८	चन	चन्
४५० १०	वात	घात
४५१ १९	क्ष	क्षं
४५३ २८	: १	२
,, ३०	धिप	धिपः
४५६ ५७टी.	र्ता	र्त्ता
४६३ १७	दश	दर्श

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
४७३	१४	त्नाम	त्नाम्
४७९	१२	ग्रजा	प्रजा
४८१	६	न्सु	न्सू
४८७	१२	भ्यश	भ्यश्
४९६	२६	गैर्	गैः
४९९	४२	या	यो
५०२	२४	सहस्त्रेण सहस्त्रेण	सहस्त्रेण
५२४	१२	हयत्	हयन्
५२७	३२	सन्न	सन्न्
५२८	४४	क्त	त्त
५३१	१५टी.	दयें	दर्यां
५३९	७	दश	दर्श
५४२	२६टी.	स्वाय	स्वार्थ
५४३	४	रुपो	रुषो
५४७	१३	मंश	मं
५६३	१३टी.	पं. १	प. २
५९१	४०टी.	प्रेध्य	मेध्य
६०८	१टी.	जो	जौ
,,	,,	यानां	यानाम्
६१३	८टी.	सृष्ठौ	सृष्टौ
६१६	२९	धास्य	ध्यास्य
६२१	१२	त्व	त्वं
६२८	१०	र्वा	र्वाः
६३३	२०टी.	धर्न	धर्म
६३७	९	ि	ि
६४८	२५	जोनि	जो-नि
६५४	७२	मग	भग
६५५	२	श च	श् च
६५७	१४टी.	उच्छ	उच्छ्र
६६३	३१टी.	धर्न	धर्म
६६६	९	नुतु	ननु
६७३	२०	दुरा	दु-रा
६८५	१५	क्रार	कार
६८८	३६टी.	पश्वा	पश्चा
६९६	२७	ज्य	ज्य
६९७	३१	तार्षो	वार्षो
७११	१९	प्रेच्च	प्रेच्च
७२२	१७	चिद	चिद्
७२९	३	यु	युं
७४२	३०	ासि	ामि
७४७	५	वासि	वासि
७४८	१२	षरि	परि
७५१	३९	वां	वग्रां
,,	३८टी.	ख्याः(१)	ख्या
७५९	शीर्षे	थ	र्थो
७६१	२५टी.	र्या	र्याः
७६३	शीर्षे	मा	मो
,,	,,	प्र	प्रे
७६८	५२टी.	द	दाः
७७०	१८टी.	ह्न	ह्य
७७९	३६टी.	ज्ञ	ज्ञ
७८९	४८	ला	लाः
७९३	३१	;	०
७९३	३१	,	०
८०२	१५	भोम	भौम
८०७	१०टी.	गण	गणाः
८०८	१४	तृर्न	तृर्न
८२४	शीर्षे	स्वगारा	स्वर्गारो
८२७	२९	र्षे	षे